BIBLIOTHECA INDICA

A

COLLECTION OF ORIENTAL WORKS

Published by

THE ASIATIC SOCIETY OF BENGAL.

New series Nos. 874, 878, 879, 881, and 882.

THE AITAREYA BRÁHMAṆA

OF THE ṚG-VEDA,

WITH THE

Commentary of Sáyaṇa Áchárya.

EDITED BY

PAṆḌIT SATYAVRATA SÁMAŚRAMÍ,

Associate Member of the Asiatic Society of Bengal; Editor, Author, Commentator, Annotator, Compiler, Translator, & Publisher of different Vedic Works &c. &c.

VOL. III. IV.

Calcutta:

Printed by M. N. Sarkár, SATYA PRESS.

1896.

॥ ऐतरेयब्राह्मणम् ॥

(ऋग्वेदस्य)

भगवत्सायणाचार्यकृत-'वेदार्थप्रकाश'-नामभाष्ययुतम् ।

वङ्गदेशीयास्यायितिकसमितेरनुमत्या व्ययेन च,

सामश्रमिश्रीसत्यव्रतशर्म्मणा

यथामति संशोध्य सट्टीक्य च सम्पादितम् ।

॥ तृतीयभागः ॥

(पञ्चमषष्ठपञ्चिकात्मकः)

कलिकाता-राजन्वत्याम्,
१९५३-संवत्समायां सत्ययन्त्रेण यत्नतो मुद्रितम् ॥

॥ सम्पादकोक्तिः ॥

अथेह खलु पञ्चमषष्ठपञ्चिकाद्वयात्मके ऽस्मत्कल्पिते ऐतरेयतृतीयभागे आदितश्चतुरध्याय्यां द्वादशाहविधिः समाम्नातः; ततोऽध्यायेनैकेन अग्निहोत्रविधिर्बोधितः, प्रसङ्गसङ्गत्यान्ततो ऽत्रैव व्याहृतिब्रह्मत्वविवेकश्चोपदिष्टः; ततः पञ्चभिरध्यायैः प्रधानतो होतृहोत्रकगोचरं शस्त्रादिकं वर्णितम्।

तदेतस्यैतरेयकस्यादितः पञ्चविंशत्यध्यायाः एकाहाहीनसत्रलक्षणसर्वविधयागविषया इति पञ्चपञ्चिकात्मक आद्यो यागकाण्डः, तत एषा पञ्चाध्यायी षष्ठपञ्चिका तु शस्त्रकाण्ड इति सुवचम्।

इह हि शस्त्रकाण्डे शिल्पविधिप्रकरणे (३३८–३७६ पृ०) वालखिल्याना मसकृच्छ्रुतेः, ततः (३८५–४०१ पृ०) कुन्तापादीनां शंसनविधेश्चावगम्यत एवैषां मन्त्राणा मपि ऋक्संहितान्तर्गतत्वम्, किञ्चास्मद्दृष्टे ऋक्परिशिष्टे समुपलब्धपाठाना मपि देवनीथपदाना मेतद्ब्राह्मणे प्रपठ्य विधानात् (४०७ पृ०) शाखान्तरीयत्व मेवेति। अथ पञ्चैकपदाविधादावपि (३२९ पृ०) एव मेवास्ति किञ्चिच्चिन्तनीय मिति शम्॥

कलिकाता।
संवत् १९५३।

सामश्रमी श्रीसत्यव्रतशर्म्मा।
(सम्पादकः)

॥ अथ सङ्केताक्षरसूची ॥

अनु० सू० ...	अनुपदसूत्रम् ।
आप० श्रौ०	आपस्तम्बश्रौतम् ।
आर० आ०	आरण्यार्च्चिकः ।
ऋ० अनु०	ऋग्वेदानुक्रमणी ।
ऋ० प० ...	ऋक्परिशिष्टः ।
गौ० ध० सू०	गौतमधर्मसूत्रम् ।
जु० ...	जुहोत्यादिः ।
ना० वृ०	नारायणकृता वृत्तिः ।
प० अ० ख०	पञ्चिकायाः अ० ख० ।
पञ्च० सू० ...	पञ्चविधसूत्रम् ।
महा० आ०	महानाम्न्यार्च्चिकः ।
साङ्ख्या० ब्रा०	साङ्ख्यायनब्राह्मणम् ।

॥ अथ परिच्छेदसूची ॥

॥ अथ पञ्चमपञ्चिका ॥

(२१) अथ प्रथमाध्यायः ... (द्वादशाहे पृष्ठ्यः षडहः) ... १
तत्र प्रथमः खण्डः (तृतीयाहनिरूपणम्*) ... ,,
अथ द्वितीयः खण्डः (,,) ११
अथ तृतीयः खण्डः (चतुर्थाहनिरूपणम्) ... १७
अथ चतुर्थः खण्डः (,,) २५
अथ पञ्चमः खण्डः (,,) ३५

---

* प्रथमद्वितीयाह्नयोः शस्त्रादिनिरूपण माम्नातं पूर्वाध्याये ।

(२२) अथ द्वितीयाध्यायः … (द्वादशाह एव) … ४१
तत्र प्रथमः खण्डः (पञ्चमाहनिरूपणम्) … ,,
अथ द्वितीयः खण्डः (,,) … … ४८
अथ तृतीयः खण्डः (,,) … … ५३
अथ चतुर्थः खण्डः (षष्ठाहनिरूपणम्) … ५७
अथ पञ्चमः खण्डः (,,) … … ६१
अथ षष्ठः खण्डः (,,) … … ६३
अथ सप्तमः खण्डः (,,) … … ६५
अथ अष्टमः खण्डः (,,) … … ७३
अथ नवमः खण्डः (,,) … … ७९
अथ दशमः खण्डः (,,) … … ८५
(२३) अथ तृतीयाध्यायः (द्वादशाहे छन्दोमस्त्वग्रहः) … ९१
तत्र प्रथमः खण्डः (सप्तमाहनिरूपणम्) … ,,
अथ द्वितीयः खण्डः (,,) … १०३
अथ तृतीयः खण्डः (अष्टमाहनिरूपणम्) १०८
अथ चतुर्थः खण्डः (,,) … ११६
(२४) अथ चतुर्थाध्यायः (द्वादशाह एव) … … १२३
तत्र प्रथमः खण्डः (नवमाहनिरूपणम्) ,,
अथ द्वितीयः खण्डः (छन्दोमशेषः) … १३०
अथ तृतीयः खण्डः (दशमाहनिरूपणम्) १३७
अथ चतुर्थः खण्डः (,,) … १४४
अथ पञ्चमः खण्डः (,,) … १४८
अथ षष्ठः खण्डः (,,) … १५३

(२५) अथ पञ्चमाध्यायः ... (अग्निहोत्रयागः) ... १६३
तत्र प्रथमः खण्डः (अग्निहोत्रहोत्रम्) ... ,,
अथ द्वितीयः खण्डः (तत्र वैकल्यप्रायश्चित्तम्) १६७
अथ तृतीयः खण्डः (तत्र भावनाहोमः) ... १७१
अथ चतुर्थः खण्डः (तत्रानुदितहोमनिन्दादि) १७८
अथ पञ्चमः खण्डः (तत्रोदितहोमप्रशंसा) १८२
अथ षष्ठः खण्डः (अग्निहोत्रयागशेषः) ... १९१
अथ सप्तमः खण्डः (व्याहृतिसृष्टिकथा) ... १९५
अथ अष्टमः खण्डः (ब्रह्मत्वनिर्णयः) ... २०२
अथ नवमः खण्डः (ब्रह्मणः कर्त्तव्यम्) ... २०६

॥ अथ षष्ठपञ्चिका ॥

(२६) अथ प्रथमाध्यायः ... (ग्रावस्तुत्सुब्रह्मण्ययोः) ... २१३
तत्र प्रथमः खण्डः (ग्रावस्तुत्कर्त्तव्यम्) ... ,,
अथ द्वितीयः खण्डः (अभिष्टवगतर्क् सञ्ज्ञा) २१८
अथ तृतीयः खण्डः (सुब्रह्मण्याग्नीध्रयोः) २२४
(२७) अथ द्वितीयाध्यायः (मैत्रावरुणादीनाम्) ... २३२
तत्र प्रथमः खण्डः (होत्रकाणां शस्त्राणि) ,,
अथ द्वितीयः खण्डः (अहर्गणेषु स्तोत्रियानुरूपौ) २३७
अथ तृतीयः खण्डः (आरम्भणीयाः) ... २३९
अथ चतुर्थः खण्डः (परिधानीयाः) ... २४२
अथ पञ्चमः खण्डः (उभय्यः परिधानीयाः) २४६

(२८) अथ तृतीयाध्यायः .. (होत्रानिरूपणम्) ... २५६
तत्र प्रथमः खण्डः (प्रातस्सवनेउन्नीयमानसूक्तानि) ,,
अथ द्वितीयः खण्डः (प्रातस्सवनेप्रस्थितयाज्याः) २६१
अथ तृतीयः खण्डः (माध्यन्दिने सवने उन्नीयमानसूक्तम्, प्रस्थितयाज्याश्च) ... २६५
अथ चतुर्थः खण्डः (तृतीयसवने उन्नीयमानसूक्तम्, प्रस्थितयाज्याश्च) ... २७०
अथ पञ्चमः खण्डः (सवनत्रयसाम्यादिकथा) २७१
अथ षष्ठः खण्डः
अथ सप्तमः खण्डः
अथ अष्टमः खण्डः } (अग्निष्टोमादिषु होत्रकाणां प्रयोगनिर्णयाः) २८०–३००

(२९) अथ चतुर्थाध्यायः .. (विविधशंसनकथा) ... ३०१
तत्र प्रथमः खण्डः (अहर्गणेषु माध्यन्दिनीयशस्त्रक्लृप्तिः) ...३०१
अथ द्वितीयः खण्डः (सम्पातसूक्तविधिः) ३०४
अथ तृतीयः खण्डः (सम्पातानां विधयः) ३११
अथ चतुर्थः खण्डः (अहीनसूक्तानि) ... ३१६
अथ पञ्चमः खण्डः (कदन्तः प्रगाथाः) ... ३२२
अथ षष्ठः खण्डः (सूक्तप्रतिपदः) ३२९
अथ सप्तमः खण्डः (युक्ति-विमुक्ती) ... ३३२
अथ अष्टमः खण्डः (शिल्पस्वरूपाणि) ... ३३८
अथ नवमः खण्डः (दूरोहणशंसनम्) ... ३४७
अथ दशमः खण्डः (संशंसनविचारः) ... ३५२

(३०) अथ पञ्चमाध्यायः ... (शिल्पशंसनादि) ... ३६०
अथ प्रथमः खण्डः (होतृशिल्पम्) ... ,,
अथ द्वितीयः खण्डः (मैत्रावरुणशिल्पम्) ३६५
अथ तृतीयः खण्डः (ब्राह्मणाच्छंसिशिल्पम्) ३७२
अथ चतुर्थः खण्डः (अच्छावाकशिल्पम्) ३७४
अथ पञ्चमः खण्डः (विश्वजिति विचारः) ३८१
अथ षष्ठः खण्डः (कुन्तापादिशंसनम्) ... ३८५
अथ सप्तमः खण्डः (ऐतशप्रलापादिशंसनम्) ३९४
अथ अष्टमः खण्डः (देवनीथाख्यायिका) ... ४०२
अथ नवमः खण्डः (तदाख्यायिकाशेषः) ... ४०६
अथ दशमः खण्डः (भूतेच्छदादिशंसनम्) ४१४

॥ अथ याज्ञिकशब्दसूची ॥

शब्दः ... ... पृष्ठा
अक्षरम् (वकारादि) ... १९
—— (ओं) ... १९८
अग्निः (नेष्टा) ... २२९
अग्निहोत्रम् १६५,२००
अग्निहोत्री १६८
अग्नीत् २८२
अग्नीत्प्रेषणम् ... २२९
अग्नेरायुः ३९६
अग्न्याधेयम् २००

शब्दः ... पृष्ठा
अग्न्युद्धरणम् १६४
अङ्गानि (होत्रकाः) ... २५४
अच्युतः ... ८,५२,७२,१०३,११५,१२९
अच्युतता ... ८,१६,३९,५२,५६,७२,८९,
१०२,१०७,११४,१२१,१२९,१३५
अच्छा २८३
अच्छावाकः २१५,
२८९,२३५,२४१,२४५,२४९,२५२,
अच्छावाकप्रवराः ... २८७

शब्दः ... पृष्ठा

अच्छावाकशस्त्रम् २३५,२७९,२९२,२९३

अच्छावाकीया ... ३०९

अतिच्छन्दाः ६८,६९

अतिजागतम् ३७५,३७९

अतिमर्शम् ३७०

अतिवादः ३८७,४०१

अतिशंसनम् २५२,३३७

अतिशंसार्धर्चः ... २५७

अथर्वचेत्रवान् २०३

अधीतरसम् २७३

अध्यर्धकारम् ५१

अध्यायवान् ५२

अध्यासः ४४, ५६

अध्वर्युः २१५,२८३

अध्वर्युप्रत्ययम् १९९

अनभ्यावर्त्तीनि ... ३१०

अनवानम् २५२,३४९

अनाराशंसीः ३००

अनिरुक्तम् ... ९४,१०७,३२१,३६२

अनुकथाः २७७,२७८

अनुचरवती १८७

अनुदितहोमी १८१

अनुद्रुत्य २०९,२१०

अनुरूपः २३७,३०२

अनुवषट्कारः ... २२८

अनुसवनम् २७७

अनूचानः १४८

अन्तरूपम् ४

शब्दः पृष्ठा

अन्तर्वेदि २२६

अन्तर्हस्तीनानि ... ६४

अन्तवत् १४,१६,
७०,७४,७६,८९,१२८,१३२,१३५

अन्तःश्लेषणानि ... २०१

अन्त्यः ३००

अनूग्रङ्गाः ३१४

अन्वाहार्यः २००

अन्वाहार्यपचनः ... २००

अभिजित् ३१०

अभितष्टीयः ३१२

अभितष्टीयम् ३००,३३२

अभित्सवत्यः २६८

अभिवत् ३२०

अभिष्टवः (प्रातस्सवनिकः) ... २१५

——— (माध्यन्दिनः) ... २२२

अभिष्टवनीयाः ... २१९

अभिहिंषत् २५३

अभ्यावर्त्तिनः ३०९

अमध्यन्दिनसाचि ... ३७९

अयातयामम् ३०,९६,३९६

अर्धभाक् २०९

अर्धर्चविहारः ३६८

अर्बुदसूक्तम् २१५

अर्बुदोदासर्पणी ... २१६

अविज्ञाता १९९,२०९

अविवाक्यम् १४०,१६४

अविहृताः २४७,२५७

शब्द: … … पृष्ठ
अश्व … … ६
अश्ववत् … … ६
अश्वाभिधानी … … ४१०
अष्टाचत्वारिंश: … १००
असमायी … … ३५४,४१९
असम्प्रेषित: … … २२२
अस्तोमकृन्तत्रम् … … १०२
अहरह:शस्यम् … … ३१४,३३१
अहर्गण: … … २३७,२५१
अहीन: … २४८,३०२,३३०,३२४
अहीनकर्म … … ३३६
अहीनगता: … … ३३६
अहीनपरिधानीया: … ३३६
अहीनसन्तति: … … ३०१,३०२
अहीनसूक्तानि २४९,३०३,३०८,३१०,३११
अहीनसूक्तान्तम् … … २४९
अहीत्भ्य: … … २८५

आग्नीध्र: … … २१५
आग्नीध्रयाग; … … २२८
आग्नीध्रीय: … … १९९,२१०
आग्नीध्रीया … … २८२,२८५
आग्नेयम् (प्रातस्सवनम्) … २३५
आग्रयणम् … … २००
आजिज्ञासेन्या: … … ३८७,४००
आज्यप्रउगे … … २७९
आज्यम् … ५,२८,१११,१२६,२८२
आतान: … ३२,४७,९८,११२,१२७

शब्द: … … पृष्ठ
आध्वर्यवम् … … १९९,२०३
आनुष्टुभम् … … २८
आयुष्यम् … … ९८
आरम्भणीया … २४०,३०३,३२४
आरम्भणीयानि … … २९२
आर्त्ति: … … १९९,२०९
आर्त्विज्यम् … … २२६,४०५
आर्भव: … … १०६
—— (पवमान:) … २७२
आर्भवम् … ३८,७६,१२०,१३४
आर्भवत्वम् … … २७२,२७६
आवपनीयानि … … ३१५
आवापम् … … ३१४
आश्विनम् … … १६५
आहनस्यम् … … ४१६
आहनस्या: … … ४१६
आहवनीय: … … १९९,२१०
आहवनीया: … … २५७
आहाव: … … १५५

इष्टप्रथमयज्ञा: … … २१५
इन्द्रगाथा: … … ३८७,३९३

उक्थम् … … २८२
उक्थसंस्थ: … … २८८
उक्थानि … … ४१९
उक्थिभ्य: … … २७७,२८२
उत्कर: … … २१६

शब्दः ... पृष्ठा
उदानयनम् २२९
उदितहोमी १८१
उद्गाता २१५
उद्गातृप्रैषाः २८७
उद्गातृणाम् २८६
उद्गीथः १४६
उद्गीथम् १९९,२०३
उन्नीयमानम् २६६,२७१
उन्नीयमानानि २५७
उन्नेता २१५
उपरिष्टादायतना ३६४
उपरिष्टादुदर्कः १६
उपविमोकम् ३३६
उपांशु २२८
उपाकृतः २०४
उपावसृष्टा १६८
उभय्यः २४७,२५०,३३६

ऊनातिरिक्तम् २८
ऊर्द्धवत्त्वम् १२०

ऋक्षवह्नी ५९
ऋक्परिशिष्टः (ग्रन्थः) ... २८३
ऋगावानम् ३४३
ऋग्मियम् १०५
ऋग्विहारः ३६८
ऋजीषम् २७३
ऋतुप्रैषाः ५८

शब्दः ... पृष्ठा
ऋत्विजः (१६) ... २१५,२२६
ऋषभवत् ३१९

एकपदा ३४१,३४२
एकप्रैषाः २८३
एकातिथिः १८७,१८८
एकान्तरिताः ३६९
एकाहः ... २५१,३०२,३५८
एवयामरुत् ३७५,४१९

ऐकाहिकम् २५२
ऐकाहिकाः ... २४८,३३६,३८७
ऐतशप्रलापः ... ३८७,३९६,३९९
ऐन्द्रः (यज्ञः) ... २५८,२६३,२६७
—— (वृषाकपिः) ... ४१९
ऐन्द्रम् (ऐकाहिकम्) ... ३५७
—— (दुग्धम्) १६५
—— (माध्यन्दिनसवनम्)... २६७
—— (रूपम्) २६२
—— (शस्त्रम्) २३४
ऐन्द्राः २८९
ऐन्द्राग्नं (शस्त्रम्) ... २३५
ऐन्द्राणि २९२
ऐन्द्राबार्हस्पत्यम् ... २८९,४१८,४१९,४२०
ऐन्द्राबार्हस्पत्या ४१९,४२०
ऐन्द्रार्भवं (शस्त्रम्) ... २७३
ऐन्द्रार्भव्यः २०१
ऐन्द्रावरुणम् २८८

शब्दः पृष्ठा
ऐन्द्रावरुणम् (ऐकाहिकम्) ३५७
ऐन्द्रावरुणी ३५८
ऐन्द्रावैष्णवम् २८९
ऐन्द्राः (वालखिल्याः) ... ३५७

ओं १९८
ओकवत् १२७
ओकस्सारी ३०३,३३१
औदुम्बरी १५०
औष्णिहम् ७

कः ३२४
कद्वन्तः (प्रगाथाः) ... ३०३,३२४
कयाशुभीयम् ९८
करिष्यत् २८,९४
कवयः ३२१
कारव्या ३८७,३९१
कुन्तापम् ३८७
कुन्तापाध्यायः ३८७
कुर्वत् ४५,१११
कृतम ४,६९
कृन्तत्रम् १०२
कृष्णशवासी ८३
केवलशः २६१
केवलसूक्तानि २५९
कौण्डपायिनामयनम् ... २००
क्षुद्रसूक्ताः ३५०

शब्दः पृष्ठा
चेतिवत् ... १२६,१३२,१३५

खिलसूक्तानि ३४७,३५१
खैलिकम् ३५२

गतवत् १२६,१३२
गवामयनमूलम ... २५१
गाथा १८७
गायत्रतृतीयसवनः ... १०६,
१२१,१२२,१३५,१३६
गायत्रम् २५८
गार्त्समदम् १३
गार्हपत्यः १९९,२१०
गूर्द्दम् ३५८
गृहपतिः २८२
ग्रहः (मन्त्रः) १५७
ग्रावस्तुद् ... २१४,२१६,२१७
ग्रावस्तोत्रीयम २२०
ग्रावाणः २१५

चतुरुत्तराभ्यासः २९६,२९७
चतुर्विंशः (स्तोमः) ... ९९
चतुर्विंशम् (अहः) ३१०
चतुर्विंशाहः ३३५
चतुर्होतारः ... १४७,१५७
चत्वारिंशः (स्तोमः) ... १००
चमसोन्नयनम् २०१
चातुर्मास्यानि २००

शब्दः … पृष्ठा

छन्दोगप्रत्ययम् … … १९९
छन्दोगाः … … १३
छन्दोमः … ९९,१३८

जगत्प्रातस्सवनः … … २९
जगत्प्रासाहा … २७६,२७८
जनकल्पाः … २८७,३९३
जागतम् … ४,२८,३४,३८,९९,११८,
१२३,२९२,३५०,३७५,३७९
जातवत् … २८,३४,३८,९८,१०६,१०७
जातवेदस्यं (सूक्तम्) १६,१२१,१३५
जातवेदस्या … १२१,१३५
ज्योतींषि … … १९७

तार्तीयसवनिक्यः … २७६
तिस्रोदेवताः … … २५८
तृतीयसवनम् … २७३,२९२,२९८
त्रयस्त्रिंशः (स्तोमः) … ६७
त्रिणवः (स्तोमः) … ४२
त्रिवत् … … १३४,१३५
त्रिवान् … … ९ १०,१४,७७
त्रिष्टुप् … … २९२
त्रिष्टुप्प्रातस्सवनः १११,१२६,१२७
त्रैष्टुभम् … ११३,११८,२६७
त्र्यक्षरम् … … १९

शब्दः पृष्ठा

दक्षिणा … … २२९,४०९
दर्शपूर्णमासौ … २००
दशरात्रम् … … ३५८
दशर्चम् … … ३२२
दशिनी … … ११९
दाक्षायणयज्ञः … २००
दाधिक्री … … ४१७
दिशांक्लृप्तयः … … ३८७,३९२
दीक्षिताः … … २४३
दूरोहणम् … ३४७,३४९,३५०
देवक्षेत्रम् … … ५७
देवनीथः … ३८७,४०३,४११
देवपवित्रम् … … ४१७
देवशिल्पानि … … ३६१
द्यावापृथिवीयम् … १०५,१२०,१३४
——— (दुग्धम्) … १६५
द्विपदाः … … १०६,१३४
द्विहूतवत् … … १११
द्वैपदः (तृचः) … ३५८
द्व्यग्नी … … १११
द्व्युक्थः … … २७९

धिष्ण्यशस्त्रक्लृप्तिसूक्तम् * … ३४०
धीतरसम् … … २७३

---

* यद्यप्यस्मत्सङ्गृहीतेषु सर्वेष्वेवादर्शपुस्तकेषु एव मेवास्ति पाठः, पर मेषः स्यात् लिपिकरप्रमादप्रवाहज इत्यस्माकम्; "शिल्पशस्त्रक्लृप्तिसूक्तम्"–इत्येवम्पाठेनैवेह भवितव्य मिति सुधीभिराकलनीयम्।

शब्दः ... पृष्ठा
घेनुः २२५

नगरी १८९
नभाकस् ३४१
नवायातम् २४८
नानादेवत्याः २६४,२७६
नाभाकाः ३४१
नाभानेदिष्ठम् ६९,७९,३६२,४१९
नाराशंसस ६९,२९८,३६३
नाराशंस्यः ३८७,३८८
नाराशंस्या ३८७
निगदः २२५
निनर्दः २९९,३९०
निवृत्तवत् ८,७२
निविदध्यायः ३८७
ने २८३
नेत्रवेष्टनम् २१६
नेष्टा ... २१५,२२९,२८३
नेष्ट्रीया २८२
न्यङ्गाः २८३
न्यूङ्खः २१,२४,२९९,३७३,३७५,३९०,४१७

पङ्क्तिः ३१४,३१९
पङ्क्तिशंसः ३७२
पत्नीभाजनम् ... २२९
पत्नीशाला १४१
पदावग्राहम् ... ३९९,४१२
पनाय्यम् २९३

शब्दः ... पृष्ठा
पराच्चिषु ३०९,३१०
परिधानीयाः ... २४२,२५१,
२५७,२९३,२९४,२९७
परिधानीयावैलक्षण्यम ... २५१
पर्यस्तवान् ९
पर्यायत्वचः २४८
पर्यासः ४८,३३४
पवमानस्तोत्राणि ... २०६
पशुमत् ३१९
पाङ्क्ताः ११४,११९,१२९,१३३,३७३
पाङ्क्तम् २९,५४
पात्नीवतः २२८
पादविहारः २६८
पारिच्चित्यः ३८७,३९०
पारुच्छेपम् ६९
पारुच्छेपी ६१,३१४
पारुच्छेपीयम् ... ६३
पावमान्यः ४१८
पिववान् १०२
पीतवत् २६३
पीतवत्यः ... २५७,२६६,२७१
पुनरावृत्तम् १४
पुनर्निवृत्तम १४,८९
पुनर्वत् १११
पुरस्तादायतना ... २६४
पुरस्तादुदर्कः १६
पुरोगवी ४११
पुरोनुवाक्याः २५९

शब्दः ... पृष्ठा
पुरोरुगध्यायः ३८७
पृष्ठ्यः (षडहः) ... १३८
पो २८३
पोता २१५,२८३
पोतृनेष्टारौ २८५
पोत्रीया २८२
पौष्णम् १६५
प्र २८३
प्रउगं (शस्त्रम्) ... ७,३१
४६,७०,९७,१११,१२६,
प्रकृतिपूर्वम् २५१
प्रगाथाः (ककुभः) ... ३०३,३२४
प्रग्राहम ३८९–३९२
प्रजापतेस्तन्वः ... १५८,१५९
प्रणवः ३४१
प्रणेता २४०
प्रणीव्मती २४०
प्रतिगरः १५५
प्रतिज्ञानम् ४०५
प्रतिपदः (आरम्भणीयाः) ३०३
प्रतिप्रस्थाता २१५
प्रतिराधः ३८७,४०१
प्रतिष्ठा (एकाहः) ... २५१,२५२
प्रतिष्ठितपदम् ... ३३
प्रतिहर्त्ता २१५
प्रतिहारः १४७
प्रत्युत्तम्भनम् १०२
प्रत्येवयामरुत् ३८०

शब्दः ... पृष्ठा
प्रवरः २८७
प्रवह्लिकाः ३८७,३९९
प्रवृताहुतिः २८७
प्रशास्ता २१०,२८७
——— (मैत्रावरुणः) ... २७७,२८७
प्रसर्पणम् १४१
प्रस्तावः १४६
प्रस्तोता २१०,२१५
प्रस्थितयाज्याः ... ६१,२६२,२६८,२७६
प्रस्थितसोमाः २६३,२६८
प्राजापत्यम् ३२१
प्राणः (होता) ... २५४
प्राणाः (१०) ... ३२२
——— १९३,२८६
प्रातराहुतयः १७७
प्रातस्सवनम् २५८
प्रातरनुवाकः २०४
प्रातस्सवनिक्यः ... २७६
प्रैषः ... २८३,२८४,२८६
प्रैषकर्त्ता २८६
प्रैषसमाम्नायः २८५
प्रैषाध्यायः २८३,२८७
प्रैषसूक्तम् २८३,२८७

बरु ३५०
बर्हिर्वेदि २२६
बह्वृचः १३,३०९
ब्रह्मभिव्याहृतम् ... १६

शब्दः पृष्ठा

बार्हतम् ४६,७२,१२०
—— (अहः) ... १८५
बार्हस्पत्यम् १६५
बृहती योनिः ११५
बृहत्पृष्ठम् १०१,१२९
ब्र २८३
ब्रह्मण्वत् ३१९
ब्रह्मत्वम् १९९,२०३
ब्रह्मा २१०,२१५
ब्रह्माणः २०४
ब्रह्मोद्यम् १५८,१६०
ब्राह्मणाच्छंसिशस्त्रम् ... २३४,२७९
ब्राह्मणाच्छंसिसूक्तम् ... २९२
ब्राह्मणाच्छंसी ... २१५,२३४,२४०,
२४३,२५०,२५२,२६२,२७७,२८५,२८९

भावनाहोमः १७३
भिषक् २०९
भूतेच्छदः ३८७,४१६

मद्वत् ४७,५४
मद्वतीः ... २५७,२६६,२७१
मध्यायतना ३६४
मनः (ग्रावस्तुत्) ... २२२
मरुत्वतीयः ८,९
मरुत्वतीयम् ... ७१,२८२
—— (शस्त्रम्) ... ११२,१२७
मरुत्वतीयनिष्केवल्ये ... २७९

शब्दः पृष्ठा

महद्वत् ... १११,११२,११३,१२०
महावदाः २०२
महानाम्न्यः ४९ ३४५
महावालभिद् ३४२ ३४४,३६८
महाव्रतम् ३१०,३४५
महासूक्तम् ३५०
महास्तोमानि ... ३१५
माध्यन्दिनम् ... २६७
माध्यन्दिनीयशस्त्रकृतिः ... ३०१
माध्यन्दिन्यः २७६
मानुषशिल्पम् ... ३६१
मारुतः ३७६
मारुतम् ... २९,१०७,१३५,१६५
माहानामनानि ... ३४५
मुख्यर्त्विजः २४८
मूलप्रकृतिः २५१
मैत्रम् १६५
मैत्रावरुणः ... २४५,२३३,२४०,२४३,
२४८,२५२,२५७,२८८
मैत्रावरुणशस्त्रम् २३४,२४९,२७९
मैत्रावरुणसूक्तम् ... २९२

यजुष्मत्यः १०८
यज्ञः २०३
यज्ञगाथा ... १८२,१८३,१८५,१८६;
१९२,१९४,२२८
यज्ञवेशसम् २३३
यथाप्रवृत्तम् २८७

शब्दः … पृष्ठा
याज्या … … २५९
——(अच्छावाकस्य) २६४,२६९,१७५
——(आग्नीध्रस्य) २६४,२६९,२७५
——(नेष्टुः) … २६४,२६८,२७५
——(पोतु) … २६३,२६८,२७४,२७५
——(ब्राह्मणाच्छंसिनः) २६३,२६८
——(मैत्रावरुणस्य) … २६३,२६८
——(होतु) २७,२६३,२६८
युक्तवती … … ३३०
युक्तिः … … ३३३
योषा (नेष्टा) … २२९

रतवत् … … ४
रथन्तरपृष्ठम् … … १०२
रथन्तरस्य योनिः … १०२,१२९
रथवत् … … ९९
राजा … … २२५
राथन्तरम् … … १०२
राथन्तराणि … … ९
राथन्तरी (रात्रिः) … १८५
रूपसमृद्धाः … २५७,२६६,२७१
रेतः … … २२८
रेवान् … … ७२
रैभ्यः … … ३८७,३९०
रैवतम् … … ६८,६९
रोहितम् … … ६२
रौद्रम् … … १६५

शब्दः … पृष्ठा
लोकाः … … १९७

वत्सः … … २२५
वपुष्मत् … … ५६
वर्णाः … … १९८
वर्त्तनिः … … २०४
वर्त्तन्यौ … … २०४
वर्षिष्ठः … … २२७
वषट्कर्त्तारः … … २८७
वहुराविणी … … ५९
वह्निवत् … … ३०९
वाक् (सुब्रह्मण्या) … २२५
वाचःकूटः … … ३४१,३४४
वाचंयमः … … २०५
वाचीरूपम् … … २८
वाद्यम् … … २८७
वायव्यम् … … १६५
वारुणम् … … १६५
वालखिल्याः ३४१,३४२,३५७,३६७,४१९
वाशिता … … ३११
वासिष्ठः … … २०४
वासिष्ठम् … … ३२०
विकृतानि … … २९८
विकृतिः … … २९९
विच्छिद्राः … … ४४
विच्छन्दाः … … २८,३८
विपर्यासः … … ३७७
विमुक्तिः … … ३३३

शब्दः ... पृष्ठा
विराजः ३१४
विरिफितम् २८
विवत्तृचः २४३
विश्वजित् ... ३१०,३७७,३८२
विषमाः २७८
विषविद्या २१५
विषुवत् ३१०
विष्णुन्यङ्गः ३८०
विहरणम् २९९
विहारः ३४३,३४४
विहृताः ३५७,३६७
वीर्यम् (त्रिष्टुप्) ... २९४
वृधन्वत् ५२,१२१
वृषण्वत् ५२
वृषण्वती ... २५७,२६६,२७१
वृषा (अग्नीत्) ... २२९
वृषाकपिः ३७२,४१९
वेदाः १९७
वैमदम् २८
वैमदी ३१४
वैराजम् २८
वैरूपत्वम् ५
वैश्वदेवम् २८२,
१५,३८,७०,१२१,१३५,२९२
—— (अहोरात्रम्) ... १६५
—— (तृतीयसवनम्) ... २३६
—— (दुग्धम्) ... १६५
वैश्वदेवाग्निमारुते ... २७९

शब्दः ... पृष्ठा
वैश्वामित्रम् ३१८;३२१
वैणवम् १६५
व्यतिमर्शम् ३४३
व्यन्वारम्भणम् ... २५१
व्याह्नस्या ४१७
व्याहावः ३२७
व्याहृतयः २०१

शस्तम् २७९
शस्त्रम् २५३
शाक्वरम् ४५,५०
शान्तानि ३२५
शिल्पत्वम् ३४३
शिल्पम् (ब्राह्मणाच्छंसिनः) ३८७
—— (मैत्रावरुणस्य) ... ३६७
—— (होतुः) ... ३६१
शिल्पानि (चत्वारि) ... २९८,४१९
शुक्रवत् २८
शुक्रवती २७३
शुक्राणि १९७
शुक्रियम् २७३
शुचिवत् ... १२५,१२६,१३४
शुनंहुवीया ३३१
श्रद्धाहोमः १७१
श्रूयमाणदेवता ... २८०

षडहस्तोत्रियाः ... ३०३,३०८
षोडशकलम् ... १६५

शब्दः ... पृष्ठा
संशंसनम् ३५४,४१९
संस्कारः ३८३
संस्था २२८
सञ्ज्ञानम् ९८
सत्यवत् ... १२५,१२६,१३२
सत्रपरिवेषणम् ... ८१
सत्रम् २१४
सत्रायणम् ३३०
सत्रासाहीयम् ... ३५८
सन्तनि ९८
सन्धानम् २०१
सप्तनदम् ६९
सप्तरूपा ३४७
सप्तर्त्विजः २६०
सप्तसप्त २५९
सप्तानुवचनम् ... २५९
समयाध्युषितः ... १५१
समयाविषितः १५१
समयास्तमिषितः ... १५१
समाः २७८
समानोदर्कम् १२५,१२८,१३६
समूढम् ३१९
समूढाः २७८
सम्पातसूक्तानि ... ३०६
—— (अच्छावाकस्य) ... ३१३
—— (नोधसः) ... ३०८
—— (ब्राह्मणाच्छंसिनः) ३१३
—— (भरद्वाजस्य) ... ३०८

शब्दः ... पृष्ठा
—— (मैत्रावरुणस्य) ... ३१३
—— (वसिष्ठस्य) ... ३०८
—— (वामदेवस्य) ... ३०६
—— (विश्वामित्रस्य) ... ३०७
सम्पाद्यमानदेवता ... २८०
सम्प्रारिण्यः २४१
सर्पराज्ञी १४५,१४६
सर्वचरुः २१४
सर्वव्यापद् १९९,२०९
सवनकल्पनम् ... २३७
सवनीयप्रैषाः २८३
सहचराणि ८७,३७६
सहस्रतमी २९६
सहस्रम् २९६
सामप्रगाथः ... १०२,११५,१२९
सायमाहुतयः ... १७७
सार्पराज्ञानि १४५
सावित्रम् १४,५५,१०५,१२०,१६४,१६५
सिमा ५१
सिषासवः २४३
सुकीर्त्तिः ३७२
सुतः ३०२
सुतवती ... २५७,२६६,२७१
सुब्रह्मण्यः २१५
सुब्रह्मण्यां ... २२५,२२६,२२९
सुब्रह्मण्याह्वानम् ... २२६
सूक्तप्रतिपदः ३२५,३२९
सूक्तम् (यजमानः) ... २६०

शब्दः ... पृष्ठा
सूक्तानुवचनम् ... २५९
सूक्तान्ताः २५४
सोमपीथः २५२
सौत्रामणी २००
सौपर्णम् ३५१
सौम्यम् १६५
स्तोत्रम् २५२
स्तोत्रियः २३७,३५५
स्तोत्रियानुरूपौ ... २८८,२८९
स्तोमभागाः २०४
स्तोमवृद्धिनियमः ... २५२
स्वर्ग्यम् ३१९
स्ववत् १९८

हंसवती ३४९

शब्दः ... पृष्ठा
हववत् २८
हविर्यज्ञसंस्थाः ... २००
हविर्यज्ञाः २००
हविष्मत् ५६
हो २८३
होता २१५,२६२,२७३,२७९,२८५
होत्रकशस्त्राणि ... २५७
होत्रकाः ... २३३,२४७,२४८,२७९,२८५
होत्रकौ २८५
होत्रा ... २१५,२२०,२७७,
२७८,२८२,२८३,२८४,३५१
होत्राशंसिनः ... २८६,३२५
हौखिड्नौ ३४४,३६८
हौवम् १९९,२०२
हौपामर्शाः १९९

मानसः (ग्रहः) * १४१ (पद मिद मिहैव १२ पृ० १० पङ्क्त्यनन्तरं निवेश्यम्)
श्रौः ... १४० (पद मिद मिहैव १५ पृ० २३ पङ्क्त्यनन्तरं निवेश्यम्)

---

* एष चेहैवाग्रे षष्ठे खण्डे सुव्यक्तः—“ते वा ग्रह मगृह्णत”–इत्यादिना (१५३,१५७पृ०)। उद्गातृगेयं मानसं स्तोत्रं तु विहित मेवं सामब्राह्मणे— “प्रत्यञ्चः प्रपद्य सर्पराज्ञ्या ऋग्भिः स्तुवन्ति०—० मनसोपावर्त्तयति, मनसा हिङ्करोति, मनसा प्रस्तौति, मनसोद्गायति, मनसा प्रतिहरति, मनसा निधन मुपयन्त्यसमाप्तस्य समाप्त्यै”–इति ता० ब्रा० ४.९.९। मानसस्य दशमाहाङ्गताधिकरणं च मीमांसादर्शने द्रष्टव्यम् (जै० सू० १० अ० ६ पा० २४–४४ सू० १३ अधि०)। उद्धृतं च तत् तै० सं० ७.३.१ भाष्ये (ए० सो० सु० ३२९पृ०)। “इतरैः स्तोत्रैर्वाचिकी स्तुतिः क्रियते, ‘ताभिः’ सार्पराज्ञीभिरत्र मानसग्रहस्य प्रवर्त्तमानत्वात् मनसा स्तुतिं कुर्युः”–इति च सा० भा० तत्रैव (३२७ पृ०)॥

॥ अथेहालोच्यस्थानसूची ॥

पृ०	पं०	पृ०	पं०	पृ०	पं०	पृ०	पं०	पृ०	पं०
२	७	५७	२	७७	१५	८३	३	८६	१
९१	१२	१३७	२	१४४	१०	१४४	१९	१४९	१
१७१	१३	१७८	१२	१८३	१७	१९१	३	१९१	८
१९५	११	१९६	६	१९६	८	१९७	३	२०२	१
२०२	१७	२०७	३	२१३	६	२१२	१३	२१९	४
२४७	१	२५६	१०	२७०	५	२९८	४	३०४	११
३०६	४	३१७	१६	३१७	१८	३२३	११	३२३	१९
३३३	५	३३३	१०	३३९	१६	३४२	१५	३४२	१९
३४५	१	३४७	२२	३५१	२४	३४२	१४	३५९	१६
३६१	८	३६३	१	३६४	१	३८७	१४	३९४	८
४०१	२०	४०२	२	४०२	१४	४०२	१७	४०६	९
४१७	२१ ॥								

॥ शुद्धिपत्रम् ॥

अशुद्धम्	शुद्धम्	पृ०	पं०
आहननं	आहनस्यं	४१६	१८
उतेमाशु	उते माशु	४०७	१०
तदेषाभियज्ञगाथा	तदेषाभि यज्ञगाथा	१८३	३, ९
“	“	१८६	८
“	“	१९२	१४
नेतसन्न विचे०	नेत सन्नविचे०	४०७	५, ६
पते	ऽप ते	१५४	१७
“	“	१६०	११
पत्वा	पत्त्वा	४०७	१०
वहरासिवणी	वहराविणी	५७	१२
शिश्रिरं	शिथिरं	२९९	६
सूक्तानुवन	सूक्तानुवचन	२५९	९

अथेहापराण्यप्येव मकिञ्चित्कराण्यशुद्धानि पदानि स्युः, तानि त्वादर्श मनपेक्ष्यैव मतिमद्भिरनायासशोध्यानीति शम् ॥

अथ

॥ ऐतरेयब्राह्मणम् ॥

॥ अथ पञ्चमपञ्चिका ॥

(तत्र)

॥ प्रथमाध्यायस्य प्रथमः खण्डः ॥

॥ ॐ ॥ विश्वे वै देवा देवतास्तृतीय महर्वहन्ति॑ सप्तदश स्तोमो वैरूपं साम॑ जगती च्छन्दो यथादेवत मेनेन॑ यथास्तोमं यथासाम॑ यथाच्छन्दसं राध्नोति य एवं वेद॑ यद्वै समानोदर्कं * तत्तृतीयस्याह्नो रूपं॑ यदश्ववद्यदन्तवद्य॑त्पुनरावृत्तं यत्पुनर्निनृत्तं॑ यद्रतवद्यत्पर्यस्तवद्य॑त्त्रिवद्यदन्तरूपं॑ यदुत्तमे पदे देवता निरुच्यते॑ यदसौ लोको ऽभ्युदितो॑ यद्वैरूपं यज्जागतं यत् कृत॑ मेतानि वै तृतीयस्याह्नो रूपाणि॑ युक्ष्वा हि देवहूतमाँ॑ अश्वाँ अग्ने † रथीरिवेति॑ तृतीयस्याह्न आज्यं भवति॑ देवा वै तृतीयेनाह्ना॑ स्वर्गं लोक मायंस्ता॑नसुरा रक्षांस्यन्ववारयन्त॑ ते विरूपा भवत॑ विरूपा

---

* 'समानोदर्कं' ख, ङ।

† 'तमाँ अश्वां अग्ने' क, 'तमां अश्वा२ अग्ने' ख, 'तमाँऽ अश्वाँ अग्ने' ग, 'तमाँ२ अश्वाँ२ अग्ने' घ, 'तमां अश्वाँऽ अग्ने' ङ। 'तमा॰ अश्वा॰' ठ।

भवतेति भवन्त आयं॑स्ते यद्विरूपा भवत॑ विरूपा भवतेति भवन्त आयं॑स्तद्वैरूपं सामाभवत्त॑द्वैरूपस्य वैरूपत्वं॑ विरूपः पाप्मना भूत्वा॑ पाप्मान मप हते य एवं वेद॑ तान् ह स्मा॑न्वेवागच्छन्ति॑ स मेव सृज्यन्ते॑ तानश्वा भूत्वा पड्भिरपाघ्नत॑ यदश्वा भूत्वा पड्भिरपाघ्नत॑ तदश्वाना मश्वत्वं॑ मश्नुते यद्यत्कामयते य एवं वेद॑ तस्मादश्वः पशूनां॑ जविष्ठ॑स्तस्मादश्वः प्रत्यङ् पदा हिनस्त्यप॑ पाप्मानं हते य एवं वेद॑ तस्मादेतदश्ववदाज्यं भवति॑ तृतीये ऽहनि तृतीयस्याह्नो रूपं॑ वायवायाहि वीतये॑ वायो याहि शिवा दिव॑ इन्द्रश्च वायवेषां सुतानां॑ मा मित्रे वरुणे वय॑ मश्विनावेह गच्छतं॑ मा याह्यद्रिभिः सुतं॑ सजूर्विश्वेभिर्दे॑वेभिरुत नः प्रिया प्रियास्वि॑त्यौष्णिहं प्रउगं॑ समानोदर्कं* तृतीये ऽहनि तृतीयस्याह्नो रूपं॑ तं तमिद्राधसे महे॑ त्रय इन्द्रस्य सोमा इति॑ मरुत्वतीयस्य प्रतिपदनुचरौ॑ निनृत्तवत् त्रिवत्तृ॑तीये ऽहनि तृतीयस्याह्नो रूप॑ मिन्द्र नेदीय एदिहीत्यच्युतः प्रगाथः॑ प्र नूनं ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यो॑ निनृत्तवांस्तृतीये ऽहनि तृतीयस्याह्नो रूप॑

---

* सगानोदर्कं ख, ग।

मग्निर्नेता त्वं सोम क्रतुभिः पिन्वन्त्यप इति धाय्या अच्युता न किः सुदासो रथं पर्यासनरीरमदिति मरुत्वतीयः प्रगाथः पर्यस्तवांस्तृतीये ऽहनि तृतीयस्याह्नो रूपं त्र्यर्यमा मनुषो देवतातेति सूक्तं त्रिवत्तृतीये ऽहनि तृतीयस्याह्नो रूपं यद् द्याव इन्द्र ते शतं यदिन्द्र यावतस्त्व मिति वैरूपं पृष्ठं भवति राथन्तरे ऽहनि तृतीये ऽहनि तृतीयस्याह्नो रूपं यद्वावानेति धाय्याच्युताभि त्वा शूर नोनुम इति रथन्तरस्य योनि मनु निवर्त्तयति राथन्तरं ह्येतदहरायातने नेन्द्र त्रिधातु शरण मिति सामप्रगाथस्त्रिवांस्तृतीये ऽहनि तृतीयस्याह्नो रूपं त्य मू षु वाजिनं देवजूत मिति तार्क्ष्यो ऽच्युतः ॥ १ ॥

॥ श्रीगणेशाय नमः ॥

भिन्नान्याहुर्दैवतास्तोमसामच्छन्दांस्यङ्गस्तस्य तस्यापि षसाम् ।
विद्वद्वाक्यादुत्तरं स्यात् समानं स्यात्स्वांल्लोकान्विति त्रिकोणेष्वहस्सु ॥
सिद्धानि शस्त्राणि षडेव हौत्राण्याज्येन सूक्तप्रउगे तृचाश्च ।
मरुत्वतीये प्रतिपत्-तृचौ च धाय्याः प्रगाथाश्च तथैव सूक्तम् ॥
निष्केवल्ये स्तोत्रियः पृष्ठयोनिर्योनिस्थाने स्व-स्व-सामप्रगाथः ।
तार्क्ष्यात् सूक्तात् पूर्वं मन्ये तु नित्ये स्यात् स्यात् सूक्ताज्जातवेदस्य मन्यत्॥
छन्दोगानां वैश्वदेवात् पुरस्तादायाहीमाहृभुसूक्तानि चैव ॥

राथन्तर मयुग्मं स्याद् बृहत्सामेतरद्भवेत् ।
वैरूपादि द्वितीयं स्यात् तृतीयादिष्वनुक्रमात् ॥

अथेन्द्रपूर्वौ निहवः प्रगाथो धाय्याश्च तार्क्ष्यं च समान मह्नाम्।
स्यात् स्यात् तथा जातवेदस्य मग्र्यं छन्दोम आद्यस्त्र्यहकस्तृतीयः॥

अथ द्वादशाहान्तर्गतस्य नवरात्रस्य तृतीय महर्निरूपयति— "विश्वे वै देवा देवतास्तृतीय महर्वहन्ति, सप्तदश स्तोमो वैरूपं साम जगतीच्छन्दः"—इति। देवतासु मध्ये विश्वे देवाः, स्तोमानां मध्ये सप्तदशः, साम्नां मध्ये वैरूपं, छन्दसां मध्ये जगती, तान्येतानि तृतीयस्याह्नो निर्वाहकाणि। यद्यपि पृष्ठ्ये षडहे प्रथमतृतीयपञ्चमान्यहानि राथन्तराणि, द्वितीयचतुर्थषष्ठान्यहानि बार्हतानि; तथापि रथन्तर-बृहत्सामसम्बन्धः साधारणो वैरूपादिसामसम्बन्धो विशेषस्तृतीयेऽहनि; सत्यपि हि रथन्तरपृष्ठे वैरूपं साम द्वितीयत्वेन प्रयुज्यते, अतो वैरूपस्यैतस्मिन्नहनि असाधारणत्वान्निर्वाहकत्व मुच्यते॥ वेदनं प्रशंसति—"यथादैवत मेनेन यथास्तोमं यथासाम यथाच्छन्दसं राध्नोति य एवं वेद"—इति। उक्तदेवतादीनां वेदिता एतान्यतिक्रम्य तत्प्रसादेन समृद्धो भवति॥

एतस्याह्नः सम्बन्धिषु मन्त्रेषु पूर्ववल्लिङ्गानि निरूपयति— "यद्वै समानोदर्कं तत् तृतीयस्याह्नो रूपं, यदश्ववद्यदन्तवद्यत् पुनरावृत्तं यत् पुनर्निनृत्तं यद्रतवद्यत् पर्यस्तवद्यत् त्रिवद्यदन्तरूपं, यदुत्तमे पदे देवता निरुच्यते, यदसौ लोकोऽभ्युदितो यद्द्विरूपं यज्जागतं यत् क्षत मेतानि वै तृतीयस्याह्नो रूपाणि"—इति। उदर्कः समाप्तिः, समान उदर्कः तुल्या समाप्तिर्यस्य मन्त्रभागस्य तत् 'समानोदर्कम्'; तादृशं यदेवास्ति, तत् तृतीयस्याह्नो 'रूपं' निरूपकम्, लिङ्ग मित्यर्थः। अश्वशब्दोपेतम् 'अश्ववत्'; अन्तशब्दोपेतम् 'अन्तवत्'; पठितस्यैव पुनः पाठः 'पुन-

रावृत्तम्’ ; पुनरपि नितरां ‘नृत्तं’ नर्त्तनं ‘पुनर्निनृत्तं’, स्वरविशेषेणाक्षराणां पुनःपुनरावर्त्तनेन वा नर्त्तनसादृश्यम्। पुनरावृत्तं पठितस्यैव पादस्यावृत्तिः, अत्र तु स्वराक्षरमात्रस्येति विशेषः। ‘रन्तवत्’–इति धात्वर्थमात्र मत्र विवक्ष्यते। ‘पर्यस्तवत्’–इति पर्य्यासशब्दवत्। ‘त्रिवत्’–इति त्रिशब्दोपेतम्। ‘अन्तरूपम्’–इति अन्तशब्दोपेतम् ; पूर्वं मुक्तस्यैवाय मनुवादः ; अथवा पुनर्वचनं प्राधान्यप्रतिपादनार्थं तदीयार्थपरिग्रहार्थं वा। उत्तमे पादे देवताया अभिधानं, स्वर्गलोकस्य कथनं, वैरूपसामसम्बन्धित्वं, जगतीच्छन्दस्सम्बन्धित्वं, भूतार्थप्रत्ययोपेतः करोतिधातुर्धातुमात्रं वा, एतानि सर्वाणि तृतीयस्याह्नो रूपाणि ॥

इदानी माज्यशस्त्रं विधत्ते—“युक्ष्वा हि देवहूतमाँ अश्वाँ अग्ने रथीरिवेति (सं० ८.७५.) तृतीयस्याह्न आज्यं भवति”–इति ॥

तदेतच्छस्त्रं प्रशंसितु माख्यायिका माह—“देवा वै तृतीयेनाह्ना स्वर्गं लोक मायंस्तानसुरा रक्षांस्यन्ववारयन्त ; ते विरूपा भवत विरूपा भवतेति भवन्त आयंस्ते यद्विरूपा भवत विरूपा भवतेति भवन्त आयंस्तद्वैरूपं सामाभवत्तद्वैरूपस्य वैरूपत्वम्”–इति। यदा देवाः तृतीय महरनुष्ठाय तेन स्वर्गं लोकं गताः, तदानी मसुरा रक्षांसि च ‘तान्’ देवान् ‘अनु’गम्य स्वर्गप्रवेशो यथा न भवति तथा ‘अवारयन्त’ निवारितवन्तः। ततः ‘ते’ देवास्तानसुरान् प्रति ‘विरूपाः’ विरुद्धरूपोपेता भवतेति शपित्वा ‘भवन्तः’ स्वेन रूपेणैवाविर्भवन्तः ‘आयन्’ स्वर्गं प्रत्यागच्छन्। विरूपा भवतेति वीप्सा सर्वदेवोक्तिद्योतनार्था, असुरशापेऽत्यन्त मादरार्था वा। ‘ते’ देवाः यस्मात् कारणादसुरान् प्रति विरूपत्वं शापं दत्तवन्तः, तस्मादसुराणां ‘तद्’ विरुद्धं रूपं वैरूपाख्यं सामाभवत्,—

विरूपोक्तिसम्बन्धादेव तस्य वैरूपं नाम सम्पन्नम् ॥ उक्तार्थवेदनं प्रशंसति—"विरूपः पाप्मना भूत्वा पाप्मान मप हते य एवं वेद"—इति। वेदिता पूर्वं केन चित्पाप्मना विरुद्धरूपयुक्तो भूत्वापि पश्चाद्वेदनसामर्थ्यात्तं पाप्मानम् 'अप हते' विनाशयति ॥

प्रासङ्गिकं वैरूपशब्दनिर्वचनं कृत्वा प्रकृत मेवोपाख्यानशेष माह— "तान्ह स्मान्वेवागच्छन्ति, स मेव सृज्यन्ते; तानश्वा भूत्वा पद्भिरपाघ्नत; यदश्वा भूत्वा पद्भिरपाघ्नत, तदश्वाना मश्वत्वम्"—इति। देवशापात् कुरूपत्वं प्राप्ता असुराः पुनरपि 'तान्' देवान् 'अनु' पश्चादागच्छन्त्येव, न तु परित्यजन्ति। आगत्य च देवैः 'संसृज्यन्त एव', न तु दूरे तिष्ठन्ति। तदानीं देवाः सर्वेऽप्यश्वरूपधारिणो भूत्वा पृष्ठत आगच्छतः तानसुरान् पद्भिः 'अपाघ्नत' स्वकीयपादताडनैर्हतवन्तः। यस्मादेव मश्वा भूत्वा पद्भिर्हतवन्तः, तस्माल्लोकेऽपि पादताडनकुशलानां चतुष्पदाना मश्वनाम सम्पन्नम् ॥ उक्तार्थवेदनं प्रशंसति—"अश्नुते यद्यत् कामयते य एवं वेद"—इति ॥

देवैरश्ववेषकृतं व्यापार मिदानीन्तनेष्वश्वेषु दर्शयति— "तस्मादश्वः पशूनां जविष्ठस्तस्मादश्वः प्रत्यङ् पदा हिनस्ति" —इति। यस्मादश्वरूपैः देवैर्वेगेन गमनं पद्भिस्ताडनं चाचरितम्, तस्माल्लोकेऽपि पशूनां मध्ये ऽश्वोत्यन्तवेगवान्, 'तस्मादु' तस्मादेव कारणात् लौकिकोऽश्वः 'प्रत्यङ्' पृष्ठतः पादेन पुरुषं 'हिनस्ति' ताडयति ॥ उक्तार्थवेदनं प्रशंसति— "अप पाप्मानं हते य एवं वेद"—इति ॥

युक्ष्वाहीति सूक्तं प्रशस्याज्यविधिर्निगमयति—"तस्मादेतदश्ववदाज्यं भवति तृतीयेऽहनि तृतीयस्याह्नो रूपम्"—इति।

यस्मादश्वस्य ईदृशो महिमा, तस्मात् 'अश्ववत्' अश्वशब्दोपेतं "युक्ष्वा हि"-इति सूक्तं (सं० ८.७५.) तृतीये ऽहन्याज्यशस्त्रं भवति। यदश्ववदिति पूर्वलक्षणस्योक्तत्वादिद मश्वशब्दोपेतं सूक्तं तृतीयस्याह्नो रूपकम् ॥

अथ प्रउगशस्त्रं विधत्ते—"वायवा याहि वीतये, वायो याहि शिवा दिव, इन्द्रश्च वायवेषां सुताना, मा मित्रे वरुणे वय, मश्विनावेह गच्छत, मा याह्यद्रिभिः सुतं, सजूर्विश्वेभिर्देवेभि, रुत नः प्रिया प्रियास्वित्यौष्णिहं प्रउगं समानोदर्कं तृतीयेऽहनि तृतीयस्याह्नो रूपम्"-इति। "वायवा याहि वीतये"-इत्येका (सं० ५.५१.५.), "वायो याहि शिवा दिवः"-इत्यादिके द्वे ऋचौ (सं० ८.२६.२३,२४.), मिलित्वा सोऽय मेकस्तृचः ; "इन्द्रश्च वायवेषां सुतानाम्"-इत्यादिके द्वे ऋचौ (सं० ५.५१.६,७.), तृचत्वसम्पादनाय तयोरन्यतरा द्विरावर्त्तनीया ; "आ मित्रे वरुणे वयम्"-इत्यादिकस्तृचः (सं० ५.७२.१-३.); "अश्विनावेह गच्छतम्"-इत्यादिकस्तृचः (सं० ५.७५.७-९.); "आ याह्यद्रिभिः सुतम्"-इत्यादिकस्तृचः (सं० ५.४०.१-३.); "सजूर्विश्वेभिर्देवेभिः"-इत्यादिकस्तृचः (सं० ५.५१.८-१०.); "उत नः प्रिया प्रियासु"-इत्यादिकस्तृचः (सं० ६.६१.१०-१२.); त एते सप्त तृचाः उष्णिक्छन्दस्काः। तत्सर्वं मौष्णिहं प्रउगशस्त्रं कुर्यात्। तत्र समानोदर्कत्वं तृतीयस्याह्नो लिङ्गम्। आ मित्रे वरुण इति सूक्ते तिसृष्वृक्षु "नि बर्हिषीत्यादिकोऽन्तिमः पाद एक एव। अश्विनावेहेति सूक्तेऽपि "हंसाविवेत्यादिकोऽन्तिमः पाद एक एव। आ याहीति सूक्तेऽपि "वृषन्निन्द्रेत्यन्तिमः पाद एक एव। सजूर्विश्वेभिरिति तृचेऽपि "आ याह्यग्न इत्य-

न्तिमः पाद एक एव। एवं कतिपयेषु समानोदर्कत्वं लिङ्गम्* ॥

अथ मरुत्वतीयशस्त्रस्य तृचद्वयं विधत्ते—"तं त मिद्राधसे महे, त्रय इन्द्रस्य सोमा इति मरुत्वतीयस्य प्रतिपदनुचरौ, निनृत्तवत् त्रिवत् तृतीयेऽहनि तृतीयस्याह्नो रूपम्"-इति। "तं त मित्यादिकस्तृचो मरुत्वतीयशस्त्रस्य प्रतिपत् (सं० ९.२२.६–८.); तस्योपक्रमे 'तं तं'-इति द्विरावृत्तः शब्दो नृत्तगततालानुकरणसदृशः, अन्ते च 'कृष्टीनां नृतुः'-इति नर्त्तनवाची शब्दः श्रूयते; तदिदं निनृत्तवल्लिङ्गम्। "त्रय इन्द्रस्य"-इत्यय मनुचरस्तृचः (सं० ८.२.७–९.); तस्यादौ त्रिशब्दश्रवणात् इदं त्रिवल्लिङ्गम् ॥

अथ प्रगाथद्वयं विधत्ते—"इन्द्र नेदीय एदिहीत्यच्युतः प्रगाथः; प्र नूनं ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यो, निनृत्तवांस्तृतीयेऽहनि तृतीयस्याह्नो रूपम्"-इति। "इन्द्र नेदीयः"-इतिप्रगाथस्य (सं० ८.२३.५,६.) पूर्वयोरप्यह्नोर्विहितत्वादच्युतत्वम्। अथ प्रग्रथनेन तृचत्वं सम्पादयितुं चतुर्थः पादः षष्ठः पादश्च त्रिस्त्रिरभ्यस्यते, तस्य नृत्तसमानत्वादयं प्रगाथो निनृत्तलिङ्गवान्। एवं ब्राह्मणस्पत्यप्रगाथेऽपि (सं० १.४०.५,६.) द्रष्टव्यम्। यद्वा यस्मिन् 'इन्द्रो वरुणो मित्रो अर्यमा'-इत्योकारस्य त्रिरभ्यासो नृत्तसमानः ॥

अन्यास्तिस्र ऋचो विधत्ते—"अग्निर्नेता, त्वं सोम क्रतुभिः, पिन्वन्त्यप इति धाय्या अच्युताः"-इति। यद्यप्यच्युतत्वं द्वितीयस्याह्नो लिङ्गं†, तथाप्यत्र वाचनिकः प्रयोगो द्रष्टव्यः ॥

---

* वायवा याहीत्यस्या मृचि, इन्द्रश्चेति द्व्यृचीश्चान्तिमं वाक्यम् 'अभि प्रयः'-इति समानम्; उत नः प्रियेति तृचे तु समानोदर्कत्वं वचनादेव।

† २भा० ४१७ पृ० १७पं० द्रष्टव्यम्।

अथान्यं प्रगाथं विधत्ते—“न किः सुदासो रथं पर्यास नरीरमदिति मरुत्वतीयः प्रगाथः, पर्यस्तवांस्तृतीयेऽहनि तृतीयस्याह्नो रूपम्”–इति। अस्मिन् प्रगाथे ‘यस्य मरुतः’–इति तृतीयपादे श्रवणादयं मरुत्वतीयः; अत्र ‘पर्यास’–इतिश्रुतत्वादयं पर्यस्तलिङ्गवान् (सं० ७.३२.१०,११.) ॥

सूक्तान्तरं विधत्ते—“त्र्यर्यमा मनुषो देवतातेति सूक्तं त्रिवत् तृतीयेऽहनि तृतीयस्याह्नो रूपम्”–इति। आदौ त्रिशब्दस्य श्रुतत्वात् त्रिवल्लिङ्गयुक्तमिदं सूक्तम् (सं० ५.२९.१,२.) ॥

अथ निष्केवल्यशस्त्रे स्तोत्रियानुरूपौ प्रगाथौ विधत्ते—“यद्द्याव इन्द्र ते शतं, यदिन्द्र यावतस्त्वमिति वैरूपं पृष्ठं भवति राथन्तरेऽहनि तृतीयेऽहनि तृतीयस्याह्नो रूपम्”–इति। वैरूपसाम्ना निष्पाद्यं तृतीयेऽहनि पृष्ठस्तोत्रम्; तस्य च साम्न आधारभूतो ‘यद्द्यावः’–इति (सं० ८.७०.५,६.) प्रगाथः स्तोत्रियः, “यदिन्द्र”–इति (सं० ७.३२.१८,१९.) प्रगाथोऽनुरूपः। तदुभयं रथन्तरसामसम्बन्धिनि तृतीयेऽहनि युक्तम्। प्रथमतृतीयपञ्चमान्यहानि राथन्तराणि *; रथन्तरसाम्ना पृष्ठस्तोत्रस्य गातव्यत्वात्। वैरूपसाम्नाप्यत्र पृष्ठस्तोत्रं गातव्यम्; वैरूपशाक्वरयोः रथन्तरपुत्रत्वेन † तदीयेऽहनि युक्तत्वात्। तस्मात् तृतीयेऽहनि एतत् प्रगाथद्वयं शंसनीयम्; वैरूपसामसम्बन्धस्य तृतीयदिवसलिङ्गस्य विद्यमानत्वात् ॥

ऋगन्तरं विधत्ते—“यद्वावानेति (सं० १०.७४.६.) धाय्याच्युता”–इति। सर्वेष्वहःस्वच्युतत्वं सर्वस्याप्यह्नो लिङ्गं भवतीति तृतीयेऽहन्यपि तद्युक्तम् ॥

---

* २भा० ३९७ पृ० ‘[illegible]’ द्रष्टव्यम्।

† २भा० ३९६, ३९७ पृष्ठयोः द्रष्टव्यम्।

अपरं प्रगाथद्वयं विधत्ते—“अभि त्वा शूर नोनुम इति रथन्तरस्य योनि मनु निवर्त्तयति ; राथन्तरं ह्येतदहरायतनेन” –इति । “अभि त्वा शूर”–इत्येषा (सं० ७.३२.२२.) रथन्तरसाम्नो योनिः*; तां पूर्वोक्ताया धाय्याया ‘अनु’ पश्चात् ‘निवर्त्तयति’ प्रशंसेदित्यर्थः । एतच्च तृतीय महः ‘आयतनेन’ स्थानेन ‘राथन्तरम्’ अयुग्माना मन्त्रां रथन्तरसम्बन्धित्वात् ॥

अथान्यप्रगाथं विधत्ते—“इन्द्र त्रिधातु शरण मिति सामप्रगाथस्त्रिवांस्तृतीयेऽहनि तृतीयस्याह्नो रूपम्”–इति । अत्रत्यस्य वैरूपसाम्नः सम्बन्धी “इन्द्र त्रिधातु”–इति (सं० ६.४६.९,१०.) प्रगाथः ; स च त्रिशब्दयुक्तत्वात् त्रिवान् । अतो लिङ्गसद्भावात् तृतीयेऽहनि योग्यः ॥

सूक्तान्तरं विधत्ते— “त्य मू षु वाजिनं देवजूत मिति (सं० १०.१७८.) तार्क्ष्योऽच्युतः”–इति । तार्क्ष्यनाम्नः सूक्तविशेषस्याच्युतत्वं सर्वदिनसम्बन्धि लिङ्गम् ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां प्रथमाध्याये
(एकविंशाध्याये) प्रथमः खण्ड ॥ १ ॥

॥ अथ द्वितीयः खण्डः ॥

यो जात एव प्रथमो मनस्वानिति सूक्तं॑ समा॑नोदर्कं तृतीये ऽहनि तृतीयस्याह्नो रूपं॑ तदु सजनीय॑

---

* २मा० २९४ पृ० १८ पं० ‘*’ द्रष्टव्यम् ।

मेतद्वा इन्द्रस्येन्द्रियं यत्सजनीय मेतस्मिन् वै शस्यमान इन्द्र मिन्द्रिय मा विशति तद्वाप्याहुश्छन्दोगास्तृतीये ऽहनि बह्वृचा इन्द्रस्येन्द्रियं शंसन्तीति तदु गार्त्समद मेतेन वै गृत्समद इन्द्रस्य प्रियं धामोपागच्छत्स परमं लोक मजयदुपेन्द्रस्य प्रियं धाम गच्छति जयति परमं लोकं य एवं वेद तत्सवितुर्वृणीमहे ऽद्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ राथन्तरे ऽहनि तृतीयेऽहनि तृतीयस्याह्नो रूपम् तद्देवस्य सवितुर्वार्यं महदिति सावित्र मन्तो वै महदन्तस्तृतीय महस्तृतीये ऽहनि तृतीयस्याह्नो रूपम् घृतेन द्यावापृथिवी अभीवृते इति द्यावापृथिवीयं घृतश्रिया घृतपृचा घृतावृधेति पुनरावृत्तं पुनर्निनृत्तं तृतीये ऽहनि तृतीयस्याह्नो रूप मनश्वो जातो अनभीशुरुक्थ्य इत्यार्भवं रथस्त्रिचक्र इति त्रिवत् तृतीये ऽहनि तृतीयस्याह्नो रूपम् परावतो ये दिधिषन्त आप्य मिति वैश्वदेवं मन्तो वै परावतोऽन्तस्तृतीय मह स्तृतीये ऽहनि तृतीयस्याह्नो रूपम् तदु गाय मेतेन वै गयः प्लातो * विश्वेषां देवानां प्रियं धामोपागच्छत्स परमं लोक मजयदुप विश्वेषां

---

* 'प्लावी' घ, ङ, भाष्यसम्मतश्च ।

देवानां प्रियं धाम गच्छति॑ जयति परमं लोकं य एवं वेद॑ वैश्वानराय धिषणा ऋतावृध इत्याग्निमारुतस्य प्रतिपद्व॑न्तो वै धिषणान्तस्तृ॑तीय मह॑स्तृतीये ऽहनि तृतीयस्याह्नो रूपम्॑ धारावरा मरुतो धृष्ण्वोजस इति मारुतं॑ बह्वभिव्याहृत्य॑ मन्तो वै बह्वन्त॑स्तृतीय महस्तृतीये ऽहनि तृतीयस्याह्नो रूपम्॑ जातवेदसे सुनवाम सोम मिति जातवेदस्याच्युता त्व मग्ने प्रथमो अङ्गिरा ऋषिरिति जातवेदस्यं पु॑रस्तादुदर्कं॑ * तृतीये ऽहनि तृतीयस्याह्नो रूपम्॑ त्वं त्व मित्युत्तरं चाह मभिवदति॑ सन्तत्यै सन्ततैस्त्र्यहै रव्यवच्छिन्नैर्य॑न्ति य एवं विद्वांसो यन्ति॑ ॥ २ ॥

अथ निविद्धानीयं सूक्तं विधत्ते—“यो जात एव प्रथमो मनस्वानिति सूक्तं समानोदर्कं तृतीयेऽहनि तृतीयस्याह्नो रूपम्”–इति । अस्मिन् सूक्ते “नृम्णस्य मह्ना स जनास इन्द्रः”–इत्यन्तिमः पादः सर्वास्वृक्षु (१—१५.) समानः । तस्मादिदं सूक्तं (सं० २.१२.) समानोदर्कलिङ्गोपेतम् ॥

एतत्सूक्तं प्रशंसति—“तदु सजनीय मेतद्वा इन्द्रस्येन्द्रियं यत् सजनीय मेतस्मिन्वै शस्यमान इन्द्र मिन्द्रिय मा विशति”–इति । ‘तदु’ तच्च सूक्तं ‘सजनीयं’ सजनशब्दोपेतं ‘स जनास इन्द्रः’–इतिश्रुतत्वात् । बहुजनयुक्तत्व मेवैक मुत्कर्षकारणम् । किञ्च यत्

---

* ‘दुदर्कं’ ङ ।

'सजनीयं' सूक्त मस्ति, एतदेवेन्द्रस्येन्द्रिय मुच्यते । कथं तत् ? उच्यते— पुरा कदाचिदेतस्मिन्नेव सूक्ते शस्यमाने सति 'इन्द्रियं' चक्षुरादिपाटवम् 'इन्द्रं' देव माविशति । तस्मादिन्द्रियप्रवेशहेतुत्वादिदं प्रशस्तम् ॥

शाखान्तराध्येतृप्रसिद्ध्या प्रशंसति—"तद्धाप्याहुश्छन्दोगास्तृतीये ऽहनि बह्वृचा इन्द्रस्येन्द्रियं शंसन्तीति"–इति । 'तद्ध' तस्मिन्नेव सजनीयसूक्ते 'छन्दोगाः' छन्दांसि गायन्तीति सामवेदिनः, परस्पर मेव माहुः,—पृष्ठ्यस्य षडहस्य तृतीयेऽहनि 'बह्वृचाः' ऋग्वेदाध्यायिनो होतारः इन्द्रस्य सम्बन्धीन्द्रियरूपं सजनीयसूक्तं शंसतीति । अतोऽस्य सूक्तस्येन्द्रियप्रदत्वप्रसिद्धिर्महती ॥

ऋषिसम्बन्ध मुपजीव्य प्रशंसति—"तदु गार्त्समद मेतेन वै गृत्समद इन्द्रस्य प्रियं धामोपागच्छत्स परमं लोक मजयत्"–इति । गृत्समदो नाम कश्चिदृषिस्तेन दृष्टत्वादिदं सूक्तं 'गार्त्समदम्' । कथ मिति, तदुच्यते—'एतेनैव' सजनीयसूक्तेन गृत्समदाख्यो महर्षिः इन्द्रं तोषयित्वा, तस्येन्द्रस्य प्रियं स्थानं प्राप्य, ततः स तेनेन्द्रेणानुगृहीत उत्तमं लोकं जितवान् ॥ वेदनं प्रशंसति—"उपेन्द्रस्य प्रियं धाम गच्छति, जयति परमं लोकं य एवं वेद"–इति ॥

वैश्वदेवस्य शस्त्रे तृचद्वयं विधत्ते—"तत्सवितुर्वृणीमहे ऽद्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ, राथन्तरेऽहनि तृतीयेऽहनि तृतीयस्याह्नो रूपम्"–इति । "तत्सवितुः"–इति तृचः (सं० ५.८२.१–३.) प्रतिपत्, स च रथन्तरसाम्नः सम्बन्धी ; "अद्या नो देव सवितः"–इति (५.८२.४–६.) अनुचरः । तदेतदुभयं रथन्तरसम्बन्धिन्यस्मिन् योग्यम् ॥

सवितृदेवताकं सूक्तान्तरं दर्शयति — "तद्देवस्य सवितुर्वार्यं महदिति सावित्रम्"-इति। 'तत्' एतत् 'सावित्रं' सवितृदेवताकम् (सं० ४.५३.)। तत्र हि सवितुर्देवस्य सम्बन्धि 'वार्यं' वरणीयं 'महत्' अधिकं तेज इत्यय मर्थः श्रूयते; अतः सवितृसम्बन्धश्रवणात् सावित्रम् ॥

पूर्वत्र तृचे रथन्तरसम्बन्धरूपं लिङ्ग मुक्तम्, अत्र तु लिङ्गान्तरं दर्शयति—"अन्तो वै महदन्तस्तृतीय महस्तृतीयेऽहनि तृतीयस्याह्नो रूपम्"-इति। अत्र प्रथमपादे महच्छब्दोऽस्ति; महच्च वस्तु काम्यमानानां वस्तूना मन्तो भवति,—न खलु महतोऽप्यधिकं केनचित् क्वचित् किञ्चिदधिकं काम्यते; तादृशस्याभावात्। तस्मान्महद्वस्त्वेवान्तो भवति। इदञ्च तृतीय महः प्रथमस्य त्र्यहस्यान्तः। 'अन्तः' अन्तत्वसाम्यात् तृतीयेऽहनि "तद्देवस्य"-इत्यादिकं योग्यम्। यद्यप्यन्तशब्दोऽत्र नास्ति, तथाप्युक्तनीत्यान्तशब्दार्थस्य सद्भावादन्तवल्लिङ्ग मस्ति ॥

तृचान्तरं विधत्ते—"घृतेन द्यावापृथिवी अभि वृते इति (सं० ६.७०.) द्यावापृथिवीयं घृतश्रिया घृतपृचा घृतावृधेति पुनरावृत्तं पुनर्निनृत्तं तृतीयेऽहनि तृतीयस्याह्नो रूपम्"-इति। द्यावापृथिवीदेवताकत्वं विस्पष्टम्। घृतश्रियेत्यादिः द्वितीयः पादः; तत्र घृतशब्दस्य पुनःपुनरावृत्तिरेकं लिङ्गम्; तया चावृत्त्या नृत्तगततालानुकरण प्रतीतं पुनर्निनृत्तं लिङ्गान्तरम् ॥

ऋभुदेवताकं सूक्तान्तरं विधत्ते—"अनश्वो जातो अनभीशुरुक्थ्य इत्यार्भवं (सं० ४.३६.); रथस्त्रिचक्र इति त्रिवत्, तृतीयेऽहनि तृतीयस्याह्नो रूपम्"-इति। द्वितीयस्या ऋचश्चतुर्थपादे

"ऋभवो वेदयामसि"–इतिश्रवणात् ऋभुदेवताकत्वम्। प्रथमाया ऋचो द्वितीयपादे "रथस्त्रिचक्रः"–इति त्रिशब्दोपेतं लिङ्गम् ॥

बहुदेवताकं सूक्तान्तरं विधत्ते—"परावतो ये दिधिषन्त आप्य मिति (सं० १०.६३.) वैश्वदेवम्; अन्तो वै परावतोऽन्तस्तृतीय महस्तृतीयेऽहनि तृतीयस्याह्नो रूपम्"–इति। द्वितीयस्या ऋचः पूर्वार्द्धे एवं पठ्यते – "विश्वा हि वो नमस्यानि वन्द्या नामानि देवा उत यज्ञियानि वः"–इति। तत्र देवा इति यद् बहुवचनम्, अत्र प्रथमाया ऋचश्चतुर्थपादे "देवा आसते"–इति बहुवचनम्; तेन वैश्वदेवं बहुदेवताक मिदम्। परावत इत्यनेन शब्देन दूरदेशोऽभिधीयते; स च निवासदेशापेक्षयान्तो भवति; तृतीय महश्च त्र्यहस्यान्तः; अतः पूर्ववत् अर्थतोऽन्तवल्लिङ्ग मस्ति ॥

तदेतत् वैश्वदेवसूक्तं प्रशंसति—"तदु गाय मेतेन वै गयः प्लावो विश्वेषां देवानां प्रियं धामोपागच्छत्स परमं लोक मजयत्"–इति। 'तदु' तदेतत्सूक्तं 'गायं' गयेन दृष्टं प्लवनामकस्य पुत्रो गयनामको महर्षिः 'एतेन' परावत इत्यादिसूक्तेन विश्वेषां देवानां प्रियं स्थानं प्राप्य तैरनुगृहीत उत्तमं लोकं जितवान् ॥ वेदनं प्रशंसति—"उप विश्वेषां देवानां प्रियं धाम गच्छति, जयति परमं लोकं य एवं वेद"–इति ॥

शस्त्रान्तरस्य प्रतिपत्सूक्तं विधत्ते—"वैश्वानराय धिषणा मृतावृध इत्याग्निमारुतस्य प्रतिपद् (सं० ३.२.१.); अन्तो वै धिषणान्तस्तृतीय महस्तृतीयेऽहनि तृतीयस्याह्नो रूपम्"–इति। अत्र धिषणीत्यन्तःकरणवाचकः श्रूयते; अन्तःकरणं च भूम्यादेरन्तं प्राप्तुं शक्नोति। तथा चान्यत्र श्रूयते--"न वा इमा मश्वरथो न वाश्वतरीरथः सद्यः पर्य्याप्तु मर्हति; मनो वा इमां सद्यः

पर्य्याप्तु मर्हति"–इति । 'अन्तः' सहस्रा भूम्याद्यन्तप्राप्तिहेतुत्वात् 'धिषणा'-शब्दोऽन्तस्योपलक्षकः । अन्तस्तृतीय मित्यादि पूर्ववत् ॥

मरुद्देवताकं सूक्तं विधत्ते—"धारावरा मरुतो धृष्ण्वोजस इति मारुतं बह्वभिव्याहृत्य मन्तो वै बह्वन्तस्तृतीय महस्तृतीयेऽहनि तृतीयस्याह्नो रूपम्"–इति । मारुतत्व मत्र विस्पष्टम् । बहुविधम् 'अभि व्याहृत्यम्' अभिव्याहरणीयं शंसनीय मृग्जातं यस्मिन्सूक्ते तद् 'बह्वभिव्याहृत्यम्' ; अत्र हि पञ्चदशर्चाः शंसनीया इति बहुत्वम्, बहूनां देवाना मभिव्याहरणीयानां विद्यमानत्वाद्बहुत्वम् । तस्य बहुत्वस्य अनेकत्वद्वित्वापेक्षयान्तत्वम् ; अतोऽन्तवल्लिङ्ग मस्ति (सं० २.३४.) ॥

ऋगन्तरं विधत्ते—"जातवेदसे सुनवाम सोम मिति (सं० १ ९९.) जातवेदस्याच्युता"–इति । अच्युतत्वं सर्वेषा मन्त्रां साधारणं लिङ्गम् ॥

जातवेदोदेवताकं सूक्तं विधत्ते –"त्व मग्ने प्रथमो अङ्गिरा ऋषिरिति (सं० १.३१.) जातवेदस्यं पुरस्तादुदर्कं तृतीये ऽहनि तृतीयस्याह्नो रूपम्; त्वं त्व मित्युत्तरं त्र्यह मभिवदति सन्तत्यै"–इति । यद्यपि त्वमग्न इत्यग्निरेव देवता प्रतीयते; तथाप्यसौ जातवेदः-शब्दवाच्यो भवति ; जातस्य सर्वस्य जगतो वेदितृत्वात् । तस्मादेतत्सूक्तं 'जातवेदस्यम्' । तच्च 'पुरस्तादुदर्कम्' उदर्कशब्दोऽवसानवचनः ; अवसानं च विच्छेदः । सोऽपि द्विविधः,—पुरस्तादुपरिष्टाच्च; उपक्रमात् पूर्वं शंसनीयस्याभावात् अयं पूर्वकालीनो विच्छेदः पुरस्तादुदर्क इत्युच्यते । शंसनात् पूर्वकालीनोऽविच्छेदः उपरिष्टादुदर्कः । समानोदर्कत्वं च तृतीयस्याह्नो लिङ्गं युक्तम् । तच्चोपरिष्टादुदर्कसाम्यं सजनीयादिषूदाहृतम् (१२ पृ०) ;

अत्र पुरस्तादुदर्कसाम्यं लिङ्गत्वेनोदाह्रियते। तथा ह्यस्मिन् सूक्ते सर्वास्वप्यृक्षु "त्व मग्ने"—इति पदद्वयं समाम्नातम्, तदिदं समानोदर्कत्व मेकं लिङ्गम्। असकृदभिधानादेव पुनरावृत्तलिङ्गं च वक्तुं शक्यम्। किञ्च लोके कञ्चित्पुरुषं सम्बोध्याभिमुखीकृत्य त्व मिति वदन्ति; एव मत्रापि उत्तरत्रग्रह मभिमुखीकृत्यैव प्रत्यृचं त्वं त्व मिति शब्दः प्रयुज्यते, तच्च प्रथमद्वितीययोस्त्र्यहयोश्च 'सन्तत्यै' विच्छेदराहित्याय भवति॥ वेदनपूर्वक मनुष्ठानं प्रशंसति—"सन्ततैस्त्र्यहैरव्यवच्छिन्नैर्यन्ति य एवं विद्वांसो यन्ति"—इति। 'ये' पुरुषाः प्रत्यृचं त्वं-शब्दैः सूचितं त्र्यहयोः सातत्यं विद्वांसो ऽनुतिष्ठन्ति, ते पुरुषाः 'सन्ततैः' परस्परसम्बद्धैः, अत एव विच्छेदरहितैस्त्र्यहैरनुतिष्ठन्ति, तेषां विघ्नो न भवतीत्यर्थः ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां प्रथमाध्याये
(एकविंशाध्याये) द्वितीयः खण्डः ॥ २ ॥

॥ अथ तृतीयः खण्डः ॥

आप्यन्ते वै स्तोमा॑ आप्यन्ते छन्दांसि तृतीयेऽहन्ये॑तदेव तत उच्छिष्यते॑ वागित्येव तदेतदक्षरं त्र्यक्षरँ॑ वागित्येक मक्षर मक्षर मिति त्र्यक्षरं॑ स

एवैष उत्तरस्त्र्यहो वागेकं गौरेकं द्यौरेकं ततो वै वागेव चतुर्थं महर्वहति तद्यच्चतुर्थं महर्न्यूङ्खयन्त्येतदेव तदक्षर मभ्यायच्छन्त्येतद्वर्धयन्त्येतत्सविभावयिष्यन्ति चतुर्थस्याह्न उद्यात्या अन्नं वै न्यूङ्खो यदेळवा अभिगेष्णास्वरन्त्यथान्नाद्यं प्रजायते तद्यच्चतुर्थं महर्न्यूङ्खयन्त्यन्न मेव तत्प्रजनयन्त्यन्नाद्यस्य प्रजात्यै तस्माच्चतुर्थं महर्जातवद् भवति चतुरक्षरेण न्यूङ्खयेदित्याहुश्चतुष्पादा वै पशवः पशूना मवरुद्ध्यै त्र्यक्षरेण न्यूङ्खयेदित्याहुस्त्रयो वा इमे त्रिवृतो लोका एषा मेव लोकाना मभिजित्या एकाक्षरेण न्यूङ्खयेदिति ह स्माह लाङ्गलायनो ब्रह्मा मौद्गल्य एकाक्षरा वै वागेष वाव सम्प्रति न्यूङ्खं न्यूङ्खयति य एकाक्षरेण न्यूङ्खयतीति द्व्यक्षरेणैव न्यूङ्खयेत् प्रतिष्ठाया एव द्विप्रतिष्ठो वै पुरुषश्चतुष्पादाः पशवो यजमान मेव तद् द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति तस्माद् द्व्यक्षरेणैव न्यूङ्खयेन्मुखतः प्रातरनुवाके न्यूङ्खयति मुखतो वै प्रजा अन्न मदन्ति मुखत एव तदन्नाद्यस्य यजमानं दधाति मध्यत आज्ये न्यूङ्खयति मध्यतो वै प्रजा अन्नं धिनोति मध्यत एव तदन्नाद्यस्य यजमानं दधाति मुखतो मध्यन्दिने न्यूङ्खयति मुखतो

वै प्रजा अन्न मदन्ति मुखत एव तदन्नाद्यस्य यजमानं दधाति तदुभयतो न्यूङ्खं परिगृह्णाति सवनाभ्या मन्नाद्यस्य परिगृहीत्यै ॥ ३ ॥

द्वादशाहमध्यवर्त्तिनो नवरात्रस्य "त्रयश्च वा एते त्र्यहाः"—इति यत्पूर्वं मुक्तम् *, तत्र प्रथमस्त्र्यहो ऽभिहितः। स च पृष्ठ्यषडहस्य पूर्वो भागः; अथ तस्योत्तरो भागो नवरात्रे मध्यमस्त्र्यहो वक्तव्यः, तस्मिंश्च यत्प्रथम महस्तत् नवरात्रे चतुर्थ महर्भवति। तत्र शस्त्रक्लृप्ति मुपरिष्टाद्विधास्यन्ते; आदौ तावत् न्यूङ्खो वक्तव्यस्तदर्थं प्रस्तौति—"आप्यन्ते वै स्तोमा आप्यन्ते छन्दांसि तृतीये ऽहन्येतदेव तत्र उच्छिष्यते वागित्येतदेतदक्षरं त्र्यक्षरं वागित्येक मक्षर मक्षर मिति त्र्यक्षरम्"—इति। पूर्वोक्तेषु त्र्यहस्सु त्रिवृत्-पञ्चदश-सप्तदशाख्याः 'स्तोमाः' 'आप्यन्ते' समाप्ता इत्यर्थः। तथा गायत्री-त्रिष्टुब्-जगतीत्येतानि 'छन्दांसि' 'आप्यन्ते' समाप्तानि। तत ऊर्ध्वम् 'एतदेव' वक्ष्यमाणम् 'उच्छिष्यते' पूर्वं मनुक्तत्वात् उत्कर्षेणावशिष्यते। तस्यैवावशिष्टस्य 'वागिति' निर्देशः। एवकारस्तु पूर्वोक्तदेवताव्यावृत्त्यर्थः। 'अग्निर्वै देवता'—'इन्द्रो वै देवता'—'विश्वे वै देवा देवता'—इत्येवं तस्य तस्याह्नो निर्वाहकं देवतात्रयं पूर्वं मुक्तत्वात् † नावशिष्टम्; वाग् देवता पूर्वं मनुक्तत्वादवशिष्टा। तस्य वाचकं 'वागिति एतत्' शब्दरूपं 'तदेतदक्षरं' वकारादिवर्णात्मकं पुनरपि 'त्र्यक्षरं' त्रिभिरक्षरैरुपेतम्। कथ मेतदिति? तदेतत् स्पष्टीक्रियते—वागित्युक्ते सत्येकाक्षरं भवति; वकार-

---

* २भा० ३६९पृ० द्रष्टव्यम्।

† २भा० ४००,४१२पृ० अत्र च १पृ० द्रष्टव्यम्।

गकाराभ्यां युक्तस्याकाराक्षरस्य एकत्वात् ; तदेवाक्षर मिति वाग्देवतानाम्नोच्चार्यमाणं त्र्यक्षरं भवति; अतो वाग्देवताया नामनि एकरूपत्वं त्रिरूपत्वं च सम्पन्नम् ॥

तत्र रूपत्रयसम्पत्तौ प्रयोजन माह—“स एवैष उत्तरस्त्र्यहो वागेकं गौरेकं द्यौरेकम्”–इति । वाग्देवताया अक्षरशब्देन व्यवहारे सति योऽय मकारादीनां त्रयाणां समूहः, स एष एव ‘उत्तरस्त्र्यहः’ चतुर्थ-पञ्चम-षष्ठाहरूपोऽभवत् । उत्तरस्याहस्त्रयस्य निर्वाहकं देवतात्रयस्वरूपं सम्पन्न मित्यर्थः । तत्र लोकत्रय-प्रसिद्धा या वाग्देवता, तदेकं स्वरूपम् ; या च गौर्देवता, तद्द्वितीयं स्वरूपम्; यापि द्यौर्देवता, तत्तृतीयं स्वरूपम् ॥

एवं सति किं फलित मित्याशङ्क्य फलितं दर्शयति—“ततो वै वागेव चतुर्थ महर्वहति”–इति। यस्माद्देवतात्रयं निष्पन्नम्, ‘ततो वै’ तस्मादेव कारणाद् वागेव प्रथमदेवता मध्यमत्र्यहस्य प्रथमं नवरात्रापेक्षया चतुर्थं महर्वहति ॥

एतस्मिन्नहनि न्यूंखं विधत्ते—“तद्यच्चतुर्थ मह्न्यूंखयन्त्येतदेव तदक्षर मभ्यायच्छन्त्येतद्वर्धयन्त्येतत्प्रविभावयिषन्ति चतुर्थस्याह्न उद्यत्यै”–इति । यस्मात् कारणाद्वागेव चतुर्थस्याह्नो निर्वाहिका , तस्मात् कारणाद्यदि चतुर्थ महरूपे तानि ‘ऊङ्खयन्ति’ ओकारस्य सूत्रोक्तप्रकारेणोच्चारण विशेषं कुर्य्युः, तदानी मेतदेव वागित्येतदक्षरं देवताया वाचकम् ‘अभि’लक्ष्य ‘आयच्छन्ति’ उद्यमं कुर्वन्ति । न केवल मुद्यमः किन्त्वेतदक्षरं ‘वर्धयन्ति’, वृद्धिप्रकार एव ‘प्रविभाषयिषन्ति’–इत्यनेन स्पष्टीक्रियते, प्रभुत्वं विभुत्वं वाक्षरस्य कर्त्तु मिच्छन्ति । प्रभुत्वं सामर्थ्यम्, विभुत्वं विशालत्वम् ॥

न्यूंखस्वरूप माश्वलायनेन वर्णितम्—"चतुर्थेऽहनि प्रातरनुवाकं प्रतिपद्यर्द्धर्चाद्यो न्यूंखो द्वितीयं स्वर मोकारं त्रिमात्र मुदात्तं त्रिस्तस्य तस्य चोपरिष्टादपरिमितान् पञ्च वार्द्धौकाराननुदात्तानुत्तमस्य तु त्रीन् पूर्व मक्षरं निहन्यते न्यूंख्यमाने"– इति (श्रौ० ७.११.१–५.)। अस्याय मर्थः—"चतुर्थेऽहनि प्राप्ते सति प्रातरनुवाकस्य येय मृक् प्रथमास्ति, तस्या ऋचो यौ द्वावर्द्धर्चौ तयोरर्द्धर्चयोर्यावादी, तयोराद्योर्न्यूंखः कर्त्तव्यः। नितरा मत्यन्तविषमप्रकारेण 'ऊङ्खनम्' उच्चारणं 'न्यूंखः'*। कथ मिति, तदेव स्पष्टीक्रियते—"आपो रेवतीः क्षयथा"–इति (सं० १०.३०.१२.) प्रातरनुवाकस्य प्रतिपत्। तस्याः पूर्वार्द्धस्यादौ योऽयं द्वितीयस्वरः ओकारः पकारादूर्द्ध्वभावी, तं त्रिमात्रोपेत मुदात्तस्वरयुक्तं त्रिवार मुच्चारयेत्। त एते त्रय ओङ्काराः सम्पद्यन्ते। तत्रैकैकस्योकारस्योपरि पुनरप्योकारा अर्द्धस्वरूपा ह्रस्वमात्रा अपरिमिताः पञ्च वोच्चारणीयाः। ते चार्द्धौकाराः सर्वेऽप्यनुदात्ताः। उत्तमस्य तु त्रिमात्रस्योकारस्योपरि त्रीनर्द्धौकारानुच्चारयेत्। तेष्वर्द्धौकारेषु प्रथम मक्षरं 'निहन्यात्' अत्यन्तनीचस्वरेणानुदात्तं कुर्यादिति। एवं सति उदात्तास्त्रिमात्रास्त्रय ओकारा अर्द्धौकारास्त्रयोदश इत्येव मोकाराः षोडश सम्पद्यन्ते। प्रथमद्वितीययोस्त्रिमात्रयोर्मध्ये पञ्चानुदात्ता अर्द्धौकाराः; द्वितीयतृतीययोस्त्रिमात्रयोर्मध्ये पञ्चानुदात्ता अर्द्धौकाराः; तृतीयस्य त्रिमात्रस्योपरिष्टादनुदात्ता अर्द्धौकारास्त्रयः; सोऽय मुच्चारणविशेषो न्यूंख इत्युच्यते। सोऽयं न्यूंखश्चतुर्थस्याह्नः 'उद्यत्यै' उद्यमनाय सर्वस्मादुत्कर्षाय भवति॥

---

* "तदपि निदर्शनायोदाहरिष्यामः—"आपो३ ओ ओ ओ ओ ओ ओ३ ओ ओ ओ

त मिमं न्यूंखं प्रशंसति—“अन्नं वै न्यूंखो यदेळवा अभि गेष्णाश्चरन्त्यथान्नाद्यं प्र जायते, तद्यच्चतुर्थं महन्न्यूँखयन्त्यन्न मेव तत्प्र जनयन्त्यन्नाद्यस्य प्रजात्यै; तस्माच्चतुर्थं महर्जातवद्भवति”—इति। योऽय मुक्तो न्यूंखोऽस्ति, तदेतत् ‘अन्नं वै’ अन्नसाधनत्वादन्नस्वरूप मेव। कथ मेतदिति, तदुच्यते—इळ-शब्दोऽन्नवाची, तद्येषां कर्षकाणा मस्ति, ते कर्षकाः ‘इळवाः’। ते च वर्षन्तं पर्जन्यम् ‘अभि’लक्ष्य ‘गेष्णाः’ हर्षेण गायन्तो यदाचरन्ति, अथ तदानी मन्नाद्यं प्रजायते। सकालवृष्टिसमृद्धिं च दृष्ट्वा कर्षका हृष्यन्ति, हृष्टाश्च गायन्तीति यदस्ति, तत्सदृश मिदं चतुर्थेऽहनि न्यूंखरूप मुच्चारणम्। अतो ऽनेनोच्चारणेनान्न मुत्पादयन्ति। तदेव मन्नाद्यस्य ‘प्रजात्यै’ उत्पादनार्थं सम्पद्यते। ‘तस्मात्’ अन्नप्रजातियुक्तत्वादेव चतुर्थ महः ‘जातवद्भवति’। जातवत्त्व मेतस्मिन्नहनि मन्त्रवचनेनोपरिष्टाद् वक्ष्यते ॥

न्यूंखस्य मन्त्रमध्ये स्थानविशेषं विधत्ते—“चतुरक्षरेण न्यूंखयेदित्याहुश्चतुष्पादा वै पशवः पशूना मवरुद्ध्यै”—इति। मन्त्रे योऽय मादौ चतुरक्षरो भागस्तेन ‘न्यूंखयेत्’ चत्वार्यक्षराण्युच्चार्य तदन्ते यथोक्तं न्यूंखं प्रयुञ्ज्यादिति केचिद्याज्ञिका आहुः। चतुस्सङ्ख्यया पादचतुष्टयोपेतानां पशूनां प्राप्तिर्भवतीति तदभिप्रायः ॥

पक्षान्तरं विधत्ते—“त्र्यक्षरेण न्यूङ्खयेदित्याहुस्त्रयो वा इमे त्रिवृतो लोका एषा मेव लोकाना मभिजित्यै”—इति। पूर्ववद् व्याख्येयम् ॥

ओ ओ३ ओ ओ ओ रेवतीः चयथा हि वस्वः क्रतुश्च भद्रं विभृथामृतञ्च। रायो३ ओ ओ ओ ओ ओ ओ३ ओ ओ ओ ओ ओ ओ३ ओ ओ ओश्च स्थः सुपत्यस्य पत्नीः सरस्वती तद् गृणते वयोधी३ मापो३”—इति शा० श्रौ० ७.११.७।

पक्षद्वय मुक्त्वा तृतीयपक्षं विधत्ते—"एकाक्षरेण न्यूङ्खयेदिति ह स्माह लाङ्गलायनो ब्रह्मा मौद्गल्य एकाक्षरा वै वागेष वाव सम्प्रति न्यूङ्खं न्यूङ्खयति य एकाक्षरेण न्यूङ्खयतीति"—इति। लाङ्गलाख्यस्य महर्षेः पौत्रो 'लाङ्गलायनः'; मुद्गलाख्यस्य पुत्रो 'मौद्गल्यः', स च 'ब्रह्मा' इत्येतन्नामको ब्राह्मणः। स ह्येक मक्षर मुच्चार्य न्यूङ्खयेदिति। तत्किम्? तत्रेय मुपपत्तिः,—येयं वागहर्देवतेति पूर्व मुक्ता, सेय मेकाक्षरा; तथा सति यः पुमानेकाक्षरेण न्यूङ्खयति, एष एव सम्प्रति सम्यक् न्यूङ्ख मनुतिष्ठति। अक्षरसङ्ख्याया देवतानुसारित्वादिति तस्य महर्षेरभिप्रायः॥

तदेतत् पक्षत्रय मङ्गीकृत्य स्वाभिप्रेतं पक्षं विधत्ते—"द्व्यक्षरेणैव न्यूङ्खयेत् प्रतिष्ठाया एव; द्विप्रतिष्ठो वै पुरुषश्चतुष्पादाः पशवो यजमान मेव तद् द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति; तस्माद् द्व्यक्षरेणैव न्यूङ्खयेत्"—इति। एवकारः पूर्वोक्तपक्षत्रयव्यावृत्त्यर्थः। 'प्रतिष्ठाया एव' यजमानस्य प्रतिष्ठार्थ मेव हि द्विसङ्ख्या; द्वाभ्यां पादाभ्या मवस्थितत्वात् पुरुषो 'द्विप्रतिष्ठः'। स्पष्ट मन्यत्॥

प्रातरनुवाके विशेषेण स्थानं विधत्ते—"मुखतः प्रातरनुवाके न्यूङ्खयति; मुखतो वै प्रजा अन्न मदन्ति, मुखत एव तदन्नाद्यस्य यजमानं दधाति"—इति। प्रातरनुवाके मुखत अर्द्धर्चस्यादौ द्वितीयस्मिन्नक्षरे न्यूङ्खयेत्। प्रजानां सर्वासां मुखेनैवान्नादनात्। तथा सति यजमान मन्नाद्यस्य 'मुखत एव' समीप एव स्थापयति॥

आज्यशस्त्रे स्थानविशेषं विधत्ते—"मध्यत आज्ये न्यूङ्खयति; मध्यतो वै प्रजा अन्नं धिनोति, मध्यत एव तदन्नाद्यस्य यजमानं दधाति"—इति। 'मध्यतः' तृतीयपादे इत्यर्थः। तथा चाश्वला-

यन आह—"अग्निं न स्ववृक्तिभिरित्याज्यम् *; तस्योत्तमावर्जं तृतीयेषु पादेषु न्यूङ्खः"—इति (श्रौ० ७.११.८,९.)। अन्नं हि मध्यभागे धृतम्। तत्र प्रजां 'धिनोति' प्रीणयति। ततस्तत्पाठेनान्नाद्यस्य मध्यतो धारणे यजमानम् अवस्थापयति ॥

माध्यन्दिने सवने स्थानविशेषं विधत्ते—"मुखतो मध्यन्दिने न्यूङ्खयति, मुखतो वै प्रजा अन्नमदन्ति, मुखत एव तदन्नाद्यस्य यजमानं दधाति"—इति। 'मुखतः' अर्द्धर्चादौ। तथा चाश्वलायनो मरुत्वतीयं निष्केवल्यञ्च निरूप्य पश्चादिदमाह—"श्रुधीहवीयस्य तु † तृच आदोऽर्द्धर्चादिषु न्यूङ्खः"—इति (श्रौ० ७.११.२८.)॥

सवनद्वयगतं न्यूङ्खं प्रशंसति—"तदुभयतो न्यूङ्खं परिगृह्णाति सवनाभ्यामन्नाद्यस्य परिगृहीत्यै"—इति। 'उभयतः' प्रातःसवने माध्यन्दिनसवने च ‡ ॥ ३ ॥

इति श्रीमत्सायणार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां प्रथमाध्याये
(एकविंशाध्याये) तृतीयः खण्डः ॥ ३ ॥

---

* "अग्निं न स्ववृक्तिभिः"—इति सं० १०.२१.१।

† "श्रुधी हव मिन्द्र मरुत्वाँ इन्द्र"—इति सं० २.११.१।

‡ "नूङ्खाः षोडश ओकारास्तत्र केचिदुदात्ताः केचिदनुदात्ताः"—इति पा० १.२.३४। "नूङ्खयन्ते अधि पक्व आमिषि"—इति (सं० १०.९४.३.) ऋचो व्याख्याने 'नूङ्खयन्ते—शब्दविशेषं कुर्वन्ति'—इति सा० भा०। साङ्ख्या० ब्रा० २२.६; २५.१३। साङ्ख्या० श्रौ० १०, ५.२१; १२.१३.१,५,७। कात्या० श्रौ० १,८.१९। द्रष्टव्यं पुनः ६.१९,२९।

॥ अथ चतुर्थः खण्डः ॥

वाग्वै देवता चतुर्थ महर्वहत्येकविंश स्तोमो वैराजं सामानुष्टुप् छन्दो यथादेवत मेनेन यथास्तोमं यथासामं यथाच्छन्दसं राध्नोति य एवं वेद यद्वा एति च प्रेति च तच्चतुर्थस्याह्नो रूपं यद्वेव प्रथम महस्तदेतत्पुनर्यच्चतुर्थं यद्युक्तवद्यद्रथवद्यदाशुमद्यत्पिबवद्यत्प्रथमे पदे देवता निरुच्यते यदयं लोको ऽभ्युदितो यज्जातवद्यद्धववद्यच्छुक्रवद्यद्वाचो रूपं यद्वैमदं यद्विरिफितं यद्विच्छन्दा यदूनातिरिक्तं यद्वैराजं यदानुष्टुभं यत्करिष्यद्यत्प्रथमस्याह्नो रूप मेतानि वै चतुर्थस्याह्नो रूपाण्याग्निं न स्ववृक्तिभिरिति चतुर्थस्याह्न आज्यं भवति वैमदं विरिफितं विरिफितस्य रूपेश्चतुर्थेऽहनि चतुर्थस्याह्नो रूपं मष्टर्चं पाङ्क्तम् पाङ्क्तो यज्ञः पाङ्क्ताः पशवः पशूना मवरुद्ध्यै ता उ दश जगत्यो जगत्प्रातस्सवन एष त्र्यहस्तेन चतुर्थस्याह्नो रूपं ता उ पञ्चदशानुष्टुभ आनुष्टुभं ह्येतदहस्तेन चतुर्थस्याह्नो रूपं ता उ विंशतिर्गायत्र्यः पुनः प्रायणीयं ह्येतदहस्तेन चतुर्थस्याह्नो रूपं तदेतदस्तुत मशस्त मयातयामसूक्तं यज्ञ एव साक्षात्तद्यदेतच्चतुर्थस्याह्न आज्यं

भवति॑ यज्ञादेव तद्यज्ञं तन्वते॑ वाच मेव तत्पुनरुपयन्ति॑ सन्तत्यै सन्ततैस्त्र्यहै॑रव्यवच्छिन्नैर्यन्ति॑ य एवं विद्वांसो यन्ति॑ वायो शुक्रो अयामि ते॑ विहि होत्रा अवीता॑ वायोः शतं हरीणा॑ मिन्द्रश्च वायवेषां सोमाना॑मा चिकितान सुक्रतू॑ आ नो विश्वाभिरूतिभिस्॑ त्य मु वो अप्रहण॑ मप त्यं वृजिनं रिपु॑ मम्बितमे नदीतम इत्यानुष्टुभं प्रउग॑ मेति च प्रेति च शुक्रवच्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपं॑ तं त्वा यज्ञेभिरीमह इति॑ मरुत्वतीयस्य प्रतिपदीमह इत्य॑भ्यायाम्य मिवैतदह॑स्तेन चतुर्थस्याह्नो रूप॑ मिदं वसो सुत मन्ध॑ इन्द्र नेदीय एदिहि॑ प्रैतु ब्रह्मणस्पति॑ रग्निर्नेता॑ त्वं सोम क्रतुभिः॑ पिन्वन्त्यपः॑ प्र व इन्द्राय बृहत इति॑ प्रथमेनाह्ना समान आतान॑श्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपं॑ श्रुधी हव मिन्द्र मा रिषण्य इति सूक्तं॑ हववच्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपं॑ मरुत्वाँ इन्द्र वृषभो रणायेति सूक्त॑ मुग्रं सहोदा मिह तं हुवेमेति॑ हववच्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपं॑ तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन॑ सवनं दाधारायतनादेवैतेन न प्रच्यवते॑ *इमं नु मायिनं हुव इति पर्यासो॑ हववांश्चतुर्थे

---

* "प्राच्यावत" क।

ऽहनि चतुर्थस्याह्नो रूपं॑ ता उ गायत्र्यो गायत्र्यो वा॑ एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति॑ तद्धैतच्छन्दो वहति॑ यस्मिन् निविद्धीयते॑ तस्माद् गायत्रीषु निविदं दधाति॑ पिबा सोम मिन्द्र मन्दतु त्वा॑ श्रुधी हवं विपिपानस्याद्रेरिति॑ वैराजं पृष्ठं भवति॑ बार्हते ऽहनि चतुर्थे ऽहनि चतुर्थस्याह्नो रूपं॑ यद्वावानेति धाय्याच्युता॑ त्वा मिद्धि हवामह इति॑ बृहतो योनि मनु निवर्त्तयति॑ बार्हतं ह्येतदहरायतनेन॑ त्व मिन्द्र प्रतूर्तिष्विति॑ सामप्रगाथो॑ ऽशस्तिहा जनितेति॑ जातवांश्चतुर्थे ऽहनि॑ चतुर्थस्याह्नो रूपं॑ त्य मू षु वाजिनं देवजूत मिति तार्क्ष्यो॑ ऽच्युतः ॥ ४ ॥

चतुर्थं महर्विधत्ते—“वाग्वै देवता चतुर्थं महर्वहत्येकविंश स्तोमो वैराजं सामानुष्टुप् छन्दो यथादेवत मेनेन यथास्तोमं यथासाम यथाच्छन्दसं राध्नोति य एवं वेद”–इति । पूर्ववद्व्याख्येयम् ॥

चतुर्थस्याह्नो गमकानि मन्त्रगतानि लिङ्गानि दर्शयति—“यद्वा एति च प्रेति च तच्चतुर्थस्याह्नो रूपं, यद्ध्येव प्रथम महस्तदेतत्पुनर्यच्चतुर्थं यद्युक्तवद्यद्रथवद्यदाशुमद्यत्पिबवद्यत्प्रथमे पदे देवता निरुच्यते यदयं लोकोऽभ्युदितो यज्जातवद्यन्नववद्यच्छुक्रवद्यद्वाचो रूपं यद्वैमदं यद्विरिफितं यद्विच्छन्दा यदूनातिरिक्तं यद्वैराजं यदानुष्टुभं यत्कारिष्यद्यत्प्रथमस्याह्नो रूप मेतानि वै चतुर्थस्याह्नो रूपाणि”–इति । आकारः प्रशब्दश्चेति यदेव पूर्वत्र प्रथम

स्याह्नो निरूपक मुक्तम्*, तदत्र चतुर्थस्याह्नो निरूपकम् । प्रथमस्यहापेक्षया प्रथम मह: पूर्वं यदुक्तम्, तदेतत्पुनरपि मध्यमत्र्यहापेक्षया प्रथम महरुच्यते ; अतो नवरात्रापेक्षया यत् चतुर्थं, तस्य त्र्यहापेक्षया प्रथमत्वात्प्रथमस्याह्नो लिङ्गान्यत्र योग्यानि ; तत एव तद्युक्तवदित्यारभ्यायं लोकोऽभ्युदित इत्यन्तानि पूर्वोक्तान्येवाभिहितानि†। 'जातवत्' जनिधातुयुक्तम् । 'ह्ववत्' इति ह्वयतिधातुयुक्तम् । 'शुक्रवत्' शुक्रशब्दयुक्तम् । 'वाचो रूपं' वाक्प्रतिपादकशब्दयुक्तम् । 'वैमदं' विमदाख्येन महर्षिणा दृष्टम् । रिफतिधातु: क्लेशार्थे वर्त्तते ; विशेषक्लेशेन न्यूङ्खेनोच्चारितम् 'विरिफितम्' । 'विच्छन्दा:' इति विविधच्छन्दसा युक्तम् । तदूनं चातिरिक्तं च 'ऊनातिरिक्तम्' अक्षरह्रासवृद्धी इत्यर्थ: । वैराजाख्यसामसम्बद्धं 'वैराजम्' । अनुष्टुप्छन्दस्सम्बद्धम् 'आनुष्टुभम्' । जातवदित्यादीनि अत्र विशेषलिङ्गानि । भविष्यदर्थवाचिप्रत्ययोपेतं धातुरूपं 'करिष्यत्'–इत्युच्यते । अत्र यन्नूतनं यच्च पूर्वोक्तं प्रथमस्याह्नो रूप मस्ति, तानि सर्वाण्यपि चतुर्थस्याह्नो निरूपकाणि ॥

इदानी माज्यशस्त्रं विधत्ते—"अग्निं न स्ववृक्तिभिरिति चतुर्थस्याह्न आज्यं भवति ; वैमदं विरिफितं विरिफितस्य ऋषेश्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपम्"–इति । अग्नि मित्यादिकं (सं० १०.२१.) सूक्तं 'वैमदं' विमदाख्येन महर्षिणा दृष्टम् । 'विरिफितं' न्यूङ्खरूपेण विशेषक्लेशेनोच्चारितम् । अत एव 'विरिफितस्य' विशेषक्लेशरूपतया युक्तस्य विमदाख्यस्य महर्षे: सम्बन्धि ।

---

* २ भा० ४०० पृ० ८ पं० द्रष्टव्यम् ।

† २ भा० ४०० पृ० ८—१० पं० द्रष्टव्यम् ।

अतो विमर्देन इष्टत्वं विरिफितत्वञ्चेति लिङ्गद्वयसद्भावाच्चतुर्थेऽहन्येतत्सूक्तं योग्यम् ; तस्माच्चतुर्थस्याह्नो निरूपकम् ॥

ऋक्सङ्ख्यां छन्दश्चोपजीव्य सूक्तं प्रशंसति—"अष्टर्चं पाङ्क्तम् ; पाङ्क्तो यज्ञः, पाङ्क्ताः पशवः, पशूना मवरुद्ध्यै"—इति । ऋक्सङ्ख्योत्तरत्रोपयुज्यते । यत् किञ्चिच्छन्दोयोगात् 'पाङ्क्तम्' । पूर्वोक्तहविष्पङ्क्त्यादिभिः * यज्ञस्य पाङ्क्तत्वम् । चतुर्भिः पादैर्मुखेन च, पञ्चावयवैः 'पशवः पाङ्क्ताः' । तस्मादेतच्छंसनं पशुप्राप्त्यै भवति ॥

जगतीद्वारा पुनः प्रशंसति—"ता उ दश जगत्यो जगत्प्रातःसवन एष त्र्यहस्तेन चतुर्थस्याह्नो रूपम्"—इति । 'ता उ' तास्तु सूक्तगता अष्टावृचो 'दश जगत्यः' सम्पद्यन्ते । कथं सम्पत्तिरिति, तदुच्यते— सूक्तस्याद्यन्तयोर्ऋचोस्त्रिरावृत्त्या द्वादश पङ्क्तयो भवन्ति ; पङ्क्तिश्चैकचत्वारिंशदक्षरा ; ततो मिलित्वा अशीत्यधिकचतुःशताक्षराणि सम्पद्यन्ते । अष्टाचत्वारिंशदक्षराणां जगतीनां दशसङ्ख्याकानां तावन्त्येवाक्षराणि । एवं जगतीसम्पत्तिः । जगतीच्छन्दोयुक्तं प्रातस्सवनं यस्य मध्यमस्य त्र्यहस्य सोऽयं 'जगत्प्रातस्सवनः' । पूर्व मेव छन्दसां विवादे जगत्याः प्रातस्सवनस्थान मुक्तम् † । अतः प्रातस्सवने जगतीसम्बन्धश्चतुर्थस्याह्नो निरूपकः ॥

अनुष्टुप्सम्बन्धेन प्रशंसति—"ता उ पञ्चदशानुष्टुभ आनुष्टुभं ह्येतदहस्तेन चतुर्थस्याह्नो रूपम्"—इति । तास्तु दश जगत्यः 'पञ्चदशानुष्टुभः' सम्पद्यन्ते । तथाहि,— अष्टाचत्वारिंशदक्षरा जगती ; द्वात्रिंशदक्षरानुष्टुप् ; तथा सत्येकैका जगती सार्द्धानुष्टुब्-

---

* १ भा० ३९२ पृ०, २ भा० १०५ पृ० द्रष्टव्यम् ।

† २ भा० १२५ पृ० ४ ख० द्रष्टव्यम् ।

भवति। अहश्चैतदनुष्टुभः सम्बन्धि ; अनुष्टुभो निर्वाहकत्वस्योक्तत्वात् *। तेनेदं सूक्तं अनुष्टुब्द्वारा चतुर्थस्याह्नो निरूपकम् ॥

गायत्रीद्वारा प्रशंसति—"ता उ विंशतिर्गायत्र्यः पुनः प्रायणीयं ह्येतदहस्तेन चतुर्थस्याह्नो रूपम्"-इति। तास्तु दश जगत्यः पुनरपि प्रत्येकं द्वेधा विभज्यमाना चतुर्विंशत्यक्षरा गायत्र्यो विंशतिर्भवन्ति। गायत्रीसम्बन्धश्चान्यत्र—"प्रायणीयं प्रथम महर्गायत्रो वा ऐन्द्रवायवो गायत्रं प्रायणीय महः"-इति-श्रुत्यन्तरात्। इदं चाहर्मध्यमे त्र्यहे प्रथमत्वात् प्रायणीयम्। अतो गायत्री द्वारा सम्बन्धस्य वक्तुं शक्यत्वादेतत्सूक्तं (सं० १०.२१.) चतुर्थस्याह्नो निरूपकम् ॥

सारयुक्तत्वेन पुनः प्रशंसति—"तदेतदस्तुत मशस्त मयातयामसूक्तं यज्ञ एव साक्षात् तद्यदेतच्चतुर्थस्याह्न आज्यं भवति, यज्ञादेव तद् यज्ञं तन्वते ; वाच मेव तत्पुनरुपयन्ति सन्तत्यै"-इति। 'तदेतत्' आग्नि मित्यादि सूक्तम् (सं० १०.२१.), उद्गातृभिः पूर्वं मस्तुतं होतृभिरप्यशस्तम् ; तस्मात् 'अयातयामं' गतसारं न भवतीति साक्षाद् यज्ञ एव ; यज्ञमध्ये सारत्वात्। तथा सति यद्येतत्सूक्त मत्राज्यं भवेत्, तदानीं यज्ञरूपादेव सूक्ताद् यज्ञरूप महः 'तन्वते' विस्तारयन्ति, किञ्चाहर्देवतां 'वाच मेव' तेन सारयुक्तेन पुनः प्राप्नुवन्ति। तच्च मध्यमस्य त्र्यहस्य 'सन्तत्यै' विच्छेदराहित्याय भवति ॥

वेदनपूर्वक मनुष्ठानं प्रशंसति—"सन्ततैस्त्र्यहैरव्यवच्छिन्नैर्यन्ति य एवं विद्वांसो यन्ति"-इति। पूर्ववद्व्याख्येयम् ॥

अथ प्रउगशस्त्रं विधत्ते— "वायो शुक्रो अयामि ते, विहि

---

* 'चतुर्थं महर्वहति ०—० अनुष्टुप् छन्दः'-इत्युक्तिः २५ पृ० २ पं० द्रष्टव्या।

होत्रा अवीता, वायो शतं हरीणा, मिन्द्रश्च वायवेषां सोमाना, मा चिकितान सुक्रतू, आ नो विश्वाभिरूतिभिस्, त्य मु वो अप्रहण, मप त्यं वृजिनं रिपु, मम्बितमे नदीतम इत्यानुष्टुभं प्रउगमिति च प्रेति च शुक्रवच्चतुर्थेऽहनि चतुर्थस्याह्नो रूपम्"–इति। वायो शुक्र इत्याद्यं प्रतीकम् (सं०४.४७.१.)। विहि होत्रा इति (सं० ४.४८.१.) द्वितीयम्। वायो शत मिति (सं० ४.४८,५.) तृतीयम्। इन्द्रश्चेति (सं० ४.४७.२.) चतुर्थम्। आ चिकितानेति (सं० ५.६६.१.) पञ्चमम्। आ नो विश्वाभिरिति (सं० ८.८.१.) षष्ठम्। त्य मु व इति (सं० ६.४४.४.) सप्तमम्। अप त्य मित्यष्टमम् (सं० ६.५१.१३.)। अम्बितम इति (सं० २.४१.१६.) नवमम्। अत्राद्यैस्त्रिभिः प्रतीकैरेकस्तृचः, इतरैः षट्प्रतीकैः षडृचाः। एतत्सर्वं मनुष्टुप्छन्दस्कं प्रउगशस्त्रं कार्य्यम्। अत्र आकारः, प्रशब्दः, शुक्रशब्दश्चेति लिङ्गानि द्रष्टव्यानि। वायो इत्यत्र शुक्रवल्लिङ्गम्। विहि होत्रेत्यस्या मृचि 'वायवा चन्द्रेण"–इत्याकारः। वायोः शत मित्यत्र "रथ आ यातु"–इत्याकारः। इन्द्रश्चेत्यत्र द्वितीयस्या मृचि "आ यातम्"–इत्याकारः। आ चिकितानेत्यत्र, आ नो विश्वाभिरित्यत्राकारौ स्पष्टौ। त्य मु वो अप्रहण मित्यत्र प्र-शब्दः। अप त्यं वृजिन मित्यत्र तृतीयस्या मृचि "आ सुगम्"–इत्याकारः। अम्बितम इत्यत्र "प्रशस्ति मम्ब"–इति प्र शब्दः। अतो लिङ्गसद्भावेन चतुर्थेऽहनि योग्यत्वात् इदं सर्वं चतुर्थस्याह्नो निरूपकम् ॥

मरुत्वतीयशस्त्रस्य प्रतिपदं विधत्ते—"तं त्वा यज्ञेभिरीमह इति (सं० ८.६८.१०.) मरुत्वतीयस्य प्रतिपदीमह इत्यभ्यायास्य मिवैतदहस्तेन चतुर्थस्याह्नो रूपम्"–इति। अत्र यदेतदीमह

इति पद मस्ति, तद् याचामहे इत्यस्मिन्नर्थे वर्त्तते ; याञ्चा च दीर्घकालेन फलप्रदा ; तस्मादेतदहः 'अभ्यायाम्य मिव' अभितो दीर्घं कर्त्तव्य मिव प्रयोगबाहुल्येन दृश्यते। तेन याञ्चार्थवाचिधातुद्वारेण दीर्घत्वेन साम्यप्रतीतेरिदं मन्त्रवाक्यं चतुर्थस्याह्नो निरूपकम् ॥

मन्त्रान्तराणि विधत्ते— "इदं वसो सुत मन्ध (सं० ८.२.१.), इन्द्र नेदीय एदिहि (सं० ८.५३.५.), प्रैतु ब्रह्मणस्पति (सं० १.४०.३.), रग्निर्नेता (सं० ३.२०.४.), त्वं सोम क्रतुभिः (सं० १.९१.२.), पिन्वन्त्यपः (सं० १.६४.६.), प्र व इन्द्राय बृहत (८.८९.३.) इति प्रथमेनाह्ना समान आतानश्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपम्"—इति। 'आतानः' शस्त्रक्लृप्तिः। सा चेदं वसो सुत मित्यादिका। अस्मिन् चतुर्थेऽहनि पूर्वोक्तेन प्रथमेनाह्ना समानात्साम्यं चैकं लिङ्गम् ॥

सूक्तान्तरं विधत्ते—"श्रुधी हव मिन्द्र मा रिषण्य इति (सं० २.१०.) सूक्तं हववच्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपम्"—इति। हवशब्दोपेत मेतस्याह्नो विशेषलिङ्ग मिति पूर्व मुक्तम् ॥

अन्यस्मिन्नपि सूक्ते तल्लिङ्गं दर्शयति— "मरुत्वाँ इन्द्र वृषभो रणायेति (सं० ३.४७.) सूक्त, मुग्रं सहोदा मिह तं हुवेमेति हववच्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपम्"—इति। मरुत्वानित्यस्य सूक्तस्य "उग्रम्"—इत्यादिरन्तिमः पादः ; तत्र "हुवेम"—इति हवशब्दार्थवाची धातुर्दृश्यते ; अतो लिङ्गसद्भावादह्नो निरूपकम् ॥

एतत्सूक्तं प्रशंसति—"तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवत"—इति। 'तदु' तत्तु सूक्तं त्रिष्टुप्छन्दस्कम्। प्रतिष्ठितानि पदानि प्रतिनियताक्षरसङ्ख्यायुक्ताः पादाः

यस्मिन् सूक्ते तत्सूक्तं 'प्रतिष्ठितपदम्'। तादृशेन तेन सूक्तेन 'सवनं' माध्यन्दिनसवनगतं मरुत्वतीयशस्त्रं 'दाधार' धारितवान् भवति। एतेन सूक्तेन स्वयम् 'आयतनात्' स्वकीयगृहात् कदाचिदपि न प्रच्यवते ॥

अन्त्यं तृचं विधत्ते—"इमं नु मायिनं हुव इति पर्यासो हववांश्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपम्"—इति। इमं न्वित्यादिस्तृचविशेषः (सं० ८.७६.१–३.) परितः पूर्वोक्ताना मन्ते प्रक्षेपणीयः। तत्र "हुवे"—इति हवशब्दार्थो धातुरस्ति, अतश्चतुर्थस्याह्नो निरूपकस्तृचः ॥

तदेतत्प्रशंसति—"ता उ गायत्र्यो गायत्र्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति"—इति। 'ता उ' ताः सूक्तगता ऋचः गायत्रीच्छन्दस्काः गायत्र्यश्च 'एतस्य' मध्यमस्य त्र्यहस्य 'मध्यन्दिनं' सवनं वहन्ति। पूर्वोक्तनिर्वाहक्रमेण जगत्याः प्रातस्सवनवाहित्वं गायत्र्या माध्यन्दिनसवनवाहित्वं च दर्शितम् ॥

अस्मिन् तृचे निविद्धानं विधत्ते—"तद्वैतच्छन्दो वहति यस्मिन्निविद्धीयते; तस्माद्गायत्रीषु निविदं दधाति"—इति। 'यस्मिन्' छन्दसि 'निविन्' पदसमूहः प्रक्षिप्यते, तदेतत् छन्दो 'वहति' सवनस्य निर्वाहकं भवति। तस्मान्निर्वहणाय तासु गायत्रीषु निविदं दध्यात् ॥

अथ वैराजसामसम्बद्धं तृचद्वयं विधत्ते—"पिबा सोम मिन्द्र मन्दतु त्वा, श्रुधी हवं विपिपानस्याद्रेरिति वैराजं पृष्ठं भवति, बार्हते ऽहनि चतुर्थे ऽहनि चतुर्थस्याह्नो रूपम्"—इति। पृष्ठस्तोत्रसाधनस्य वैराजसाम्नः आधारः "पिबा सोमम्"—इत्यादि (सं० ७.२२.१–३.) स्तोत्रियस्तृचः, "श्रुधी हवम्"—इत्याद्यनुरूपः (सं०

७.२२.४–६.) ; अतो वैराजसामसम्बन्धो लिङ्गम् । किञ्च बृहत्साम्नो ऽपत्यं वैराजसाम, इदं चाहर्युग्मरूपत्वात् बृहत्सामसम्बन्धि ; अतोऽपि कारणात् अस्मिन्नहनि एतत् तृचद्वयं युक्तम् ॥

ऋगन्तरं विधत्ते—"यद्द्यावानिति धाय्याच्युता"–इति । अच्युतत्वं सर्वसम्बन्धि लिङ्ग मित्युक्तम् ॥

तस्मात्तृच ऊर्द्ध मन्यं प्रगाथं विधत्ते--"त्वा मिद्धि हवामह इति (सं० ६.४६.१,२.) बृहती योनि मनु निवर्त्तयति ; बार्हतं ह्येतदहरायतनेन"–इति । त्वा मिद्धीत्यस्या मृचि बृहत्साम उत्पन्नम् ; तस्मादेतं योनिभूतं प्रगाथं पूर्वोक्तधाय्याम् 'अनु' पश्चात् शंसेत् । 'एतदहरायतनेन' युग्माहस्वरूपस्थानेन 'बार्हतं' बृहत्सामसम्बन्धं लिङ्ग मित्युक्तम् ॥

वैराजसाम्नः सम्बन्धिनं प्रगाथं विधत्ते—"त्व मिन्द्र प्रतूर्त्तिष्विति (सं० ८.९९.५,६.) सामप्रगाथः"–इति ॥

तत्र लिङ्गं दर्शयति—"अशस्तिहा जनितेति जातवांश्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपम्"–इति । उक्ते प्रगाथे तृतीयपादोऽयम् । अत्र "अशस्तिहा जनिता"–इति ; ततोऽयं जातवान् । 'जनि'-धातुयुक्तं जातवत्त्वं चैतस्याह्नो लिङ्गम् ॥

त्य मू ष्विति सूक्तविशेषस्याच्युतत्वं लिङ्गं दर्शयति—"त्य मू षु वाजिनं देवजूत मिति (सं० १०.१७८.) तार्क्ष्यो ऽच्युतः ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां प्रथमाध्याये
(एकविंशाध्याये) चतुर्थः खण्डः ॥ ४ ॥

॥ अथ पञ्चमः खण्डः ॥

कुह श्रुत इन्द्रः कस्मिन्नद्येति सूक्तं। वैमदं विरिफितं विरिफितस्य ऋषेश्।चतुर्थे ऽहनि चतुर्थस्याह्नो रूपं। युध्मस्य ते वृषभस्य स्वराज इति सूक्त।मुग्रं गभीरं जनुषाभ्युग्र मिति। जातवच्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपं। तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन। सवनं दाधारायतनादेवैतेन न प्रच्यवते। त्य मु वः सत्रासाह मिति पर्यासो। विश्वासु गीर्ष्वायत मि।त्यभ्यायाम्य मिवैतदह।स्तेन चतुर्थस्याह्नो रूपं। ता उ गायत्र्यो गायत्र्यो वा। एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति। तद्वैतच्छन्दो वहति। यस्मिन्निविद्धीयते। तस्माद् गायत्रीषु निविदं दधाति। विश्वो देवस्य नेतुस्। तत्सवितुर्वरेण्य।मा विश्वदेवं सत्पति मिति। वैश्वदेवस्य प्रतिपदनुचरौ। बार्हते ऽहनि चतुर्थेऽहनि चतुर्थस्याह्नो रूप।मा देवो यातु सविता सुरत्न इति सावित्र।मेति चतुर्थे ऽहनि चतुर्थस्याह्नो रूपम्। प्र द्यावा यज्ञैः पृथिवी नमोभिरिति द्यावापृथिवीयं। प्रेति चतुर्थे ऽहनि चतुर्थस्याह्नो रूपम्। प्र ऋभुभ्यो दूत मिव वाचमिष्य इत्यार्भवं। प्रेति च वाच मिष्य इति च चतुर्थे ऽहनि चतुर्थस्याह्नो रूपम्। प्र शुक्रैतु देवी मनीषेति

वैश्वदेवं॑ प्रेति च शुक्रवच्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपं॑ ता उ विच्छन्दसः सन्ति द्विपदा॑ः सन्ति चतुष्पदा॑स्तेन चतुर्थस्याह्नो रूपं॑ वैश्वानरस्य सुमतौ स्यामेत्या॑ग्निमारुतस्य प्रतिप॑दितो जात इति॑ जातवच्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपं॑ क ईं॑ व्यक्ता नरः सनीळा इति मारुतं॑ न किर्ह्येषां जनूंषि वेदेति॑ जातवच्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपं॑ ता उ विच्छन्दसः सन्ति द्विपदाः सन्ति चतुष्पदा॑स्तेन चतुर्थस्याह्नो रूपं॑ जातवेदसे सुनवाम सोम मिति॑ जातवेदस्याच्युता॑ग्निं नरो दीधितिभिररण्योरिति॑ जातवेदस्यं॑ हस्तच्युती जनयन्तेति जातवच्चतुर्थे ऽहनि॑ चतुर्थस्याह्नो रूपं॑ ता उ विच्छन्दसः सन्ति॑ विराजः सन्ति त्रिष्टुभ॑स्तेन चतुर्थस्याह्नो रूप मह्नो रूपम्॑ ॥ ५ ॥

॥ इत्यैतरेयब्राह्मणे पञ्चमपञ्चिकायां प्रथमोऽध्यायः ॥१॥

विमदेन महर्षिणा दृष्टं न्यूङ्खसहितं सूक्तं विधत्ते—“कुह श्रुत इन्द्रः कस्मिन्नद्येति (सं० १०.२२.) सूक्तं वैमदं विरिफितं विरिफितस्य ऋषेश्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपम्”–इति । पूर्ववद् व्याख्येयम् ॥

सूक्तान्तरं विधत्ते—“युध्मस्य ते वृषभस्य स्वराज इति सूक्तमुग्रं गभीरं जनुषाभ्युग्र मिति जातवच्चतुर्थे ऽहनि चतुर्थस्याह्नो

रूपम्"–इति । युष्मस्येति (सं० ३.४६.) सूक्ते "उरुं गभीरम्" –इति यः पादः, तत्र "जनुषा"–इतिश्रवणात् 'जातवत्' जनिधातुयुक्तं लिङ्ग मस्ति ॥

सूक्तगतं छन्दोऽवलम्ब्य प्रशंसति—"तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते"–इति । पूर्ववद् व्याख्येयम् ॥

तृतीयं तृचं विधत्ते— "त्य मु वः सत्रासाह मिति (सं० ८.८१.७–९.) पर्यासो विश्वासु गीर्ष्वायत मित्यभ्यायाम्य मिवैतदहस्तेन चतुर्थस्याह्नो रूपम्"–इति । परितः प्रक्षेपणीयः 'पर्यासः' अन्तिमस्तृचः । तस्मिन् "विश्वासु"–इति यः पादः, तत्र आयत मिति शब्दो दीर्घत्ववाचकः श्रूयते । अहश्चैतत् 'अभ्यायाम्य मिव' प्रयोगाधिक्यादतिदीर्घ मिव; अतोऽत्र दीर्घत्वं लिङ्गम् ॥

छन्दो द्वारा प्रशंसति— "ता उ गायत्र्यो गायत्र्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति; तद्वैतच्छन्दो वहति यस्मिन्निविद्धीयते; तस्माद् गायत्रीषु निविदं दधाति"–इति । पूर्ववद् व्याख्येयम् ॥

शस्त्रान्तरं विधत्ते— "विश्वो देवस्य नेतुस्, तत्सवितुर्वरेण्य, मा विश्वदेवं सत्पति मिति वैश्वदेवस्य प्रतिपदनुचरौ; बार्हतेऽहनि चतुर्थेऽहनि चतुर्थस्याह्नो रूपम्"–इति । "विश्वो देवस्य"–इति (सं० ५.५०.१.) ऋगेका, "तत्सवितुः"–इति (सं० ३.६२.१०, ११.) द्वे ऋचौ । एष तृचो बृहत्सामसम्बन्धी, वैश्वदेवस्य प्रतिपत् । "आ विश्वदेवम्"–इति (सं० ५.८२.७–९.) तृचो ऽनुचरः । अह्नो युग्मत्वाद् बार्हतत्वम्; बृहत्सामसम्बन्ध एव मन्त्रलिङ्गम् ॥

सवितृदेवताकं सूक्तं विधत्ते— "आ देवो यातु सविता सुरत्न इति (सं० ७.४५.) सावित्र मेति चतुर्थेऽहनि चतुर्थस्याह्नो रूपम्"-इति। आकारोऽत्र लिङ्गम् ॥

प्र-शब्दलिङ्गोपेतं सूक्तं विधत्ते—"प्र द्यावा यज्ञैः पृथिवी नमोभिरिति (सं० ७.५३.) द्यावापृथिवीयं; प्रेति चतुर्थेऽहनि चतुर्थस्याह्नो रूपम्"-इति ॥

प्र-शब्दो वाक्सम्बन्धश्चेति लिङ्गद्वयोपेतं सूक्तं विधत्ते— "प्र ऋभुभ्यो दूत मिव वाच मिष्य इत्यार्भवं; प्रेति च वाच मिष्य इति च चतुर्थेऽहनि चतुर्थस्याह्नो रूपम्"-इति। ऋभुदेवताकत्वं स्पष्टम्। प्र-शब्दो वाक्सम्बन्धश्च प्रेति चेत्यादिना प्रदर्श्यते ॥

प्र-शब्देन शुक्र-शब्देन चोपेतं सूक्तान्तरं विधत्ते—"प्र शुक्रैतु देवी मनीषेति (सं० ७.३४.) वैश्वदेवं; प्रेति च शुक्रवच्चतुर्थेऽहनि चतुर्थस्याह्नो रूपम्"-इति। अत्र बहुदेवताकत्वाद् वैश्वदेवत्वम् ॥

नानाविधच्छन्दोयुक्तत्वरूपं लिङ्गान्तरं दर्शयति— "ता उ विच्छन्दसः सन्ति द्विपदाः सन्ति चतुष्पदास्तेन चतुर्थस्याह्नो रूपम्"-इति। 'ता उ' तासु सूक्तागता ऋचो 'विच्छन्दसः' विविधच्छन्दोयुक्ताः; तत्रैकविंशतिः द्विपदाः सन्ति, अवशिष्टाश्चतुष्पदाः सन्ति; 'तेन' विच्छन्दस्त्वेन अह्नो निरूपकम् ॥

शस्त्रान्तरस्थं प्रतिपत्सूक्तं विधत्ते—"वैश्वानरस्य सुमतौ स्यामेत्याग्निमारुतस्य प्रतिपद्; इतो जात इति जातवच्चतुर्थेऽहनि चतुर्थस्याह्नो रूपम्"-इति। तस्य सूक्तस्य (सं० १.९८.) प्रथमाया ऋचस्तृतीयपादे "इतो जातः"-इतिश्रवणाज्जातवच्छब्दोपेतं लिङ्ग मस्ति ॥

मरुद्देवताकं सूक्तं विधत्ते—“क ईं व्यक्ता नरः सनीळा इति मारुतं; न किर्ह्येषां जनूंषि वेदेति जातवच्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपम्”–इति। अस्मिन् सूक्ते (सं० ७.५६.) तृतीयस्या मृचि [*] “मरुद्भिरस्तु”–इतिश्रवणान्मारुतम्। न किर्हीत्यादिकः प्रथमायाः [†] ऋचस्तृतीयः पादः। तत्र “जनूंषि”–इति ‘जनि’धातुयुक्तत्वं लिङ्गम्॥

विविधच्छन्दस्त्वयुक्तं लिङ्गान्तरं दर्शयति—“ता उ विच्छन्दसः सन्ति द्विपदाः सन्ति चतुष्पदास्तेन चतुर्थस्याह्नो रूपम्”–इति। अस्मिन् सूक्ते एकादश द्विपदाः, इतराश्चतुष्पदाः [‡]॥

अच्युतत्वलिङ्गोपेता मृचं विधत्ते—“जातवेदसे सुनवाम सोम मिति (सं० १.९९.) जातवेदस्याच्युता”–इति॥

जातवेदोदेवताक मन्यत् सूक्तं विधत्ते— “अग्निं नरो दीधितिभिररण्योरिति (सं० ७.१.) जातवेदस्यं; हस्तच्युती जनयन्तेति जातवच्चतुर्थे ऽहनि चतुर्थस्याह्नो रूपम्”–इति। जातस्य जगतो वेदितृत्वात् अग्निरेव ‘जातवेदाः’। हस्तच्युतीत्यादिः द्वितीयः पादः; तत्र “जनयन्त”–इतिश्रवणाज्जनिधातुयुक्तं लिङ्गम्॥

विविधच्छन्दोरूपं लिङ्गान्तरं दर्शयति—“ता उ विच्छन्दसः सन्ति विराजः सन्ति त्रिष्टुभस्तेन चतुर्थस्याह्नो रूप मह्नो रूपम्”–इति। अत्राष्टादश विराजः, इतरास्त्रिष्टुभः॥

---

[*] पञ्चम्या मृचीति वक्तु मुचितम्।

[†] द्वितीयाया इति वक्तव्यम्; न हि प्रथमा ऋक् चतुष्पदा।

[‡] क ईं व्यक्ता इति पञ्चविंशत्यृचं सूक्तम्। तत्राद्या एकादश द्विपदाः, विंशत्यक्षरा विराजः; शिष्टाश्चतुर्दश त्रिष्टुभः। तदिह यदुक्तं पुरस्तात् ‘तृतीयस्या मृचि’–इति, यच्चोक्तं ‘प्रथमाया ऋचः’–इति, तदुभय मेव भाष्यकारस्यैतस्य भ्रम मावेदयतीति स्फुटम्।

अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां प्रथमाध्याये
(एकविंशाध्याये) पञ्चमः खण्डः ॥ २ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरवुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'नामभाष्ये
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायाः प्रथमोऽध्यायः ॥

॥ अथ द्वितीयाध्यायः ॥

(तत्र)

॥ प्रथमः खण्डः ॥

॥ ॐ ॥ गौर्वै देवता पञ्चम महर्वहति॑ त्रिणव स्तोमः शाक्वरं साम॑ पङ्क्तिश्छन्दो* यथादेवत मेनेन॑ यथास्तोमं यथासाम॑ यथाच्छन्दसं राध्नोति य एवं वे॑द यद्वै नेति न मेति॑ यत्स्थितं यत्पञ्चमस्याह्नो रूपं॑ यद्वेव द्वितीय मह॑स्तदेतत्पुनर्यत्पञ्चमं॑ यदूर्ध्वव॑द्यत्प्रतिवद्यदन्तर्वद् यद्वृषण्वद्॑ यद्वृधन्वद्यन्मध्यमे पदे देवता निरुच्यते॑ यदन्तरिक्ष मभ्युदितं॑ यद्दुग्धवद् यदूधवद्॑ यद्धेनुमद् यत्पृश्निमद्॑ यन्मद्वद् यत्पशुरूपं॑ यदध्यासवद्विक्षुद्रा इव हि पशवो॑ यज्जागतं जागता हि पशवो॑ यद्बार्हतं बार्हता हि पशवो॑ यत्पाङ्क्तं पाङ्क्ता हि पशवो॑ यद्वामं वामं हि पशवो॑ यद्धविष्मद्धविर्हि पशवो॑ यद् वपुष्मद् वपुर्हि पशवो॑ यच्छाक्वरं यत्पाङ्क्तं यत्कुर्वद् यद् द्वितीयस्याह्नो रूप॑ मेतानि वै पञ्चमस्याह्नो रूपाणीम॑ मू षु वो अतिथि मुषर्बुध मिति॑ पञ्चमस्याह्न आज्यं

---

* "पंक्तिच्छन्दो" घ, ङ ।

भवति जागत मध्यासवत्पशुरूपं पञ्चमे ऽहनि पञ्चमस्याह्नो रूपं मा नो यज्ञं दिविस्पृश मा नो वायो महे तने रथेन पृथुपाजसा बहवः सूरचक्षस इमा उ वां दिविष्टयः पिबा सुतस्य रसिनो देवं देवं वो ऽवसे देवं देवं बृहदु गायिषे वच इति बार्हतं प्रउगं पञ्चमे ऽहनि पञ्चमस्याह्नो रूपं यत्पाञ्चजन्यया विशेति मरुत्वतीयस्य प्रतिपत्पाञ्चजन्ययेति पञ्चमे ऽहनि पञ्चमस्याह्नो रूपमिन्द्र इत्सोमपा एक इन्द्र नेदीय एदिह्युत्तिष्ठ ब्रह्मणस्पते ऽग्निर्नेता त्वं सोम क्रतुभिः पिन्वन्त्यपो बृहदिन्द्राय गायतेति द्वितीयेनाह्ना समान आतानः पञ्चमे ऽहनि पञ्चमस्याह्नो रूपमवितासि सुन्वतो वृक्तबर्हिष इति सूक्तं मद्वत्पाङ्क्तं पञ्चपदं पञ्चमे ऽहनि पञ्चमस्याह्नो रूपमित्था हि सोम इन्मद इति सूक्तं मद्वत्पाङ्क्तं पञ्चपदं पञ्चमे ऽहनि पञ्चमस्याह्नो रूपमिन्द्र पिब तुभ्यं सुतो मदायेति सूक्तं मद्वत् त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते मरुत्वाँ इन्द्र मीढ्व इति पर्यासो नेति न प्रेति पञ्चमे ऽहनि पञ्चमस्याह्नो रूपं ता उ गायत्री गायत्र्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति तद्वै-

तच्छन्दो वहति यस्मिन्निविद्धीयते तस्माद् गायत्रीषु निविदं दधाति ॥ १ (६) ॥

अथ नवरात्रापेक्षया पञ्चमं, मध्यमत्र्यहापेक्षया द्वितीय महर्विधत्ते—"गौर्वै देवता पञ्चम महर्वहति त्रिणव स्तोमः शाक्वरं साम पङ्क्तिश्छन्दो यथादेवत मेनेन यथास्तोमं यथासाम यथाच्छन्दसं राध्नोति य एवं वेद"–इति । पूर्वत्र वागेकं गौरेकं द्यौरेक मिति देवताया रूपत्रय मुक्तम् ; तत्र वागात्मकं रूपं चतुर्थे ऽहन्युक्तम्, पञ्चमस्याह्नो गौरेव देवता निर्वाहिका। स्तोमानां मध्ये त्रिणवो निर्वाहकः । तस्य त्रिणवस्य स्तोमस्य स्वरूपं छन्दोगैरेव माम्नातम्—"नवभ्यो हिङ्करोति स तिसृभिः स पञ्चभिः स एकया, नवभ्यो हिङ्करोति स एकया स तिसृभिः सपञ्चभिः ; नवभ्यो हिङ्करोति स पञ्चभिः स एकया स तिसृभिः ; वज्रो वै त्रिणवः"–इति *। अस्याय मर्थः । एकस्तृचस्त्रिभिः पर्यायैरावर्त्तनीयः ; तत्र प्रथमायास्त्रिः पाठः, द्वितीयायाः पञ्चकृत्वः पाठः, तृतीयस्याः सकृदेव पाठः । द्वितीयपर्याये प्रथमायाः सकृत्पाठः, द्वितीयस्याः त्रिः पाठः, तृतीयस्याः पञ्चकृत्वः पाठः । तृतीयपर्याये प्रथमायाः पञ्चकृत्वः पाठः, द्वितीयस्याः सकृत्पाठः, तृतीयस्यास्त्रिः पाठः । एव मावृत्ताभिः सप्तविंशतिसङ्ख्याकाभिः ऋग्भिस्त्रिणवः स्तोमो भवति । अन्यत्पूर्ववद् व्याख्येयम् ॥

पञ्चमस्याह्नो मन्त्रलिङ्गानि दर्शयति—"यद्वै नेति न प्रेति यत् स्थितं यत्पञ्चमस्याह्नो रूपम्"–इति । आकारः प्र-शब्दश्च नात्र

---

* ता० ब्रा० २प्र० १,२ ख० ।

लिङ्ग मिति नकारद्वयेन प्रतिषिध्यते। यत्तु 'स्थितं' तिष्ठतिधात्वर्थरूप मप्रचलितं तत् पञ्चमस्याह्नो निरूपकम् ॥

द्वितीयेऽहन्युक्तं लिङ्गजातं पञ्चमेऽहन्यतिदिशति— "यद्वेव द्वितीय महस्तदेतत् पुनर्यत्पञ्चमम्"–इति। नवरात्रापेक्षया यत्पञ्चम महर्विद्यते, तत् पृथङ् न भवति, किन्तु यदेव द्वितीय महस्तदेव पञ्चमत्वेन पुनः क्रियते; तत्रत्यं लिङ्गजात मत्रानुसन्धेय मित्यर्थः * ॥

तानि लिङ्गानि दर्शयति—"यदूर्ध्ववद्यत्प्रतिवद्यदन्तर्वद्यद् वृषण्वद् यद् वृधन्वद्यन्मध्यमे पदे देवता निरुच्यते यदन्तरिक्ष मभ्युदितम्"–इति। पूर्ववद् व्याख्येयम् ॥

अथ विशेषलिङ्गानि दर्शयति— "यद्दुग्धवद् यदूधवद्यद्धेनुमद्यत्पृश्निमद्यन्मदवद्यत्पशुरूपं यदध्यासवद् विक्षुद्रा इव हि पशवो, यज्जागतं जागता हि पशवो, यद्बार्हतं बार्हता हि पशवो, यत्पाङ्क्तं पाङ्क्ता हि पशवो, यद् वामं वामं हि पशवो, यद्धविष्मद्धविर्हि पशवो, यद्वपुष्मद्वपुर्हि पशवो, यच्छाक्वरं यत्पाङ्क्तं यत्कुर्वद्, यद् द्वितीयस्याह्नो रूप मेतानि वै पञ्चमस्याह्नो रूपाणि"–इति। दुग्धोधधेनुपृश्निमच्छब्दैरुपेतं यद्यदस्ति, तत्सर्वं लिङ्गम्। तथाविधं पशुरूपं यदस्ति, तदपि लिङ्गम्। पशुरूपस्य बहुविधत्व मेव यदध्यासवदित्यादिना प्रपञ्च्यते। अधिकपादस्य प्रक्षेपः 'अध्यासः'। प्रकृतौ यावदस्ति, तावतोऽप्यधिकपादोपेतम् 'अध्यासवत्'; पशूना मपि चतुर्भ्यः पादेभ्योऽधिकं मुख मेकं परिगण्यते; अतोऽध्यासवत् पशुरूपं भवति। तदेव 'विक्षुद्रा इव'–इत्यनेन स्पष्टीक्रियते। विविधाः क्षुद्राः 'विक्षुद्राः'; एकस्मादन्यो न्यूनः,

---

* २भा० ४१४पृ० २पं० द्रष्टव्यम्।

तस्मादप्यन्यो न्यूनः ;—गजापेक्षया अश्वः क्षुद्रः, तदपेक्षया महिषः क्षुद्रः, ततो गौः, ततोऽजेत्येवं पशुषु क्षुद्रत्वं द्रष्टव्यम् । ‘जागतं’ जगतीसम्बद्धं यदस्ति, तदपि पशुरूपम् ; सोमाहरणप्रसङ्गे * जगत्याः पशूना मानीतत्वाज्जागतत्वम् । तथा ‘बार्हतं’ बृहतीसम्बद्धं पशुरूपम् ; पशुविषये छन्दसा माजिधावने † बृहत्या विजयेन पशूनां बार्हतत्वम् । पङ्क्तिच्छन्दस्सम्बद्ध मपि पशुरूपम् ; पङ्क्तिमुखेन पञ्चावयवैः उपेताः पशवः पाङ्क्ताः । यत् ‘वामं’ रमणीयं सूक्तं स्वरवर्णादिभिः श्राव्यं भवति, तदपि पशुरूपम् ; लोकेऽपि गवाश्वादिपशव इति यदस्ति, तद् ‘वामं’ रमणीयं दृश्यते । ‘हविष्मद्’ हविःसञ्ज्ञोपेतं यदस्ति, तदपि पशुस्वरूपम् ; पशवो हि देवतासम्बद्धहविःस्वरूपेण हूयन्ते । ‘वपुष्मद्’ वपुःसञ्ज्ञोपेतं यदस्ति, तदपि पशुस्वरूपम् ; पशवो हि वपुःपुष्टाङ्गा भूत्वा दृश्यन्ते । “विदा मघवन्”—इत्यादिषु महानाम्नीषूत्पन्नं ‘शाक्करं’ साम ‡ ; तत्सम्बद्ध मेकं लिङ्गम् । पाङ्क्त मिति यत् पुनर्वचनं, तत् पञ्चसङ्ख्यायुक्तं ; पूर्वत्र पङ्क्तिच्छन्दःसम्बद्ध मिति विशेषः । ‘कुर्वत्’—इति वर्त्तमानार्थवाचिप्रत्ययोपेतं धातुमात्रं विवक्षितम् । एतच्च द्वितीयस्याह्नो रूप मिति पूर्वं मुक्तम् § । एवं च सति यानि द्वितीयेऽहन्युक्तानि लिङ्गानि, यानि चात्र नूतनानि, एतानि सर्वाण्यपि पञ्चमस्याह्नो निरूपकाणि द्रष्टव्यानि ॥

---

* २ भा० ११६ पृ० १७पं०—११७ पृ० १६ पं० द्रष्टव्यम् ।

† १ भा० २५७ पृ० १०पं० द्रष्टव्यम् ।

‡ सामसंहितासु महानाम्नीसाम पृथगीव पन्यः, तच्चारण्यकाध्ययनान्तेऽध्यापयन्ति ।

§ २ भा० ४१६ पृ० ६ पं० द्रष्टव्यम् ।

आज्यशस्त्रं विधत्ते — "इम मू षु वो अतिथि मुषर्बुध मिति पञ्चमस्याह्न आज्यं भवति ; जागत मध्यासवत्पशुरूपं, पञ्चमे ऽहनि पञ्चमस्याह्नो रूपम्"–इति। इम मू ष्वित्यादि सूक्ते (सं० ६. १५.) ; जगतीच्छन्दोयुक्ता आद्या नवर्चः शंसनीयाः *। तत्र तृतीयस्या मृचि जगतीच्छन्दस्केभ्यः चतुर्थपादेभ्योऽधिकः पादो "भरद्वाजाय सप्रथः"–इत्येषः समाम्नायते। अतोऽधिकपादयुक्तत्वादिद मध्यासवल्लिङ्गं तत्र पशुस्वरूपम् ; पशोरपि पादचतुष्टयादधिकस्य मुखस्य विद्यमानत्वात्। तदेतल्लिंगयुक्तं पञ्चमे ऽहनि विनियोक्तुं युक्तं योग्यम् ; तस्मादेतत्पञ्चमस्याह्नो 'रूपं' निरूपकम् ॥

अथ प्रउगशस्त्रं विधत्ते— "आ नो यज्ञं दिविस्पृश, मा नो वायो महे तने, रथेन पृथुपाजसा, बह्वः सूरचक्षस, इमा उ वां दिविष्टयः, पिबा सुतस्य रसिनो, देवं देवं वो ऽवसे देवं देवं †, बृहदु गायिषे वच इति बार्हतं प्रउगं पञ्चमे ऽहनि पञ्चमस्याह्नो रूपम्" –इति। आ नो यज्ञ मिति (सं० ८.१०१.९,१०.) द्वे ऋचौ, आ नो वायो इत्येका (सं० ८.४६.२५.), सोऽयं प्रथमस्तृचः ; रथेनेत्यादिः (सं० ४.४६.५–७.) द्वितीयः, बह्व इत्यादिः (सं० ७.६६.१०–१२.) तृतीयः, इमा उ वा मित्यादिः (सं० ७.७४.१–३.) चतुर्थः, पिबा सुतस्येत्यादिः (सं० ८.३.१–३.) पञ्चमः, देवं देव मिति (सं० ८.२७.१३–१५.) षष्ठः, बृहदिति (सं० ७.९६.१–३.) सप्तमः। तदेतत्सप्तकं बृहतीच्छन्दोयोगाद् 'बार्हतम्'। अतो लिंगसद्भावात्पञ्चमेऽहनि योग्यतया तस्य निरूपकम् ॥

---

* इम मू षु व इत्येकोनविंशत्यृचं सूक्तम्। तत्रादितो नवर्चं एवात्र शंसनीया भवन्ति, "इम मू षु वो अतिथि मुषर्बुध मिति नवाज्यम्"–इतिकल्पोक्तेः (७.१२.)।

† द्वादशसूक्तीयर्चो ग्रहणवारणायेह पादाधिकप्रतीकग्रहणम्।

अथ शस्त्रान्तरस्य प्रतिपदं विधत्ते—"यत्पाञ्चजन्यया विशेति मरुत्वतीयस्य प्रतिपत्पाञ्चजन्ययेति पञ्चमे ऽहनि पञ्चमस्याह्नोरूपम्"–इति । अस्मिंस्तृचे प्रथमाया मृचि (सं० ८.६३.७.) पाञ्चजन्ययेति पदे पञ्चशब्दयोगो लिंगम् ॥

अथ द्वितीयेनाह्ना समानत्वलिंगयुक्तं शस्त्रक्लृप्तिं विधत्ते—"इन्द्र इत्सोमपा एक (सं० ८.२.४.), इन्द्र नेदीय एदिहि (सं० ८.५३.५.), उत्तिष्ठ ब्रह्मणस्पते (सं० १.४०.१.), ऽग्निर्नेता (सं० ३.२०.४.), त्वं सोम क्रतुभिः (सं० १.९१.२.), पिन्वन्त्यपो (सं० १.६४.६.), बृहदिन्द्राय गायतेति (सं० ८.८९.१.), द्वितीयेनाह्ना समान आतानः, पञ्चमे ऽहनि पञ्चमस्याह्नो रूपम्"-इति । 'आतानः' शस्त्रक्लृप्तिः ॥

अथ मदशब्दलिंगेन पञ्चपादोपेतपाङ्क्तत्वलिंगेन चोपेतं सूक्तं विधत्ते— "अवितासि सुन्वतो वृक्तबर्हिष इति (सं० ८.३६.) सूक्तं मद्वत् पाङ्क्तं पञ्चपदं, पञ्चमे ऽहनि पञ्चमस्याह्नो रूपम्"–इति । अत्र द्वितीयपादे "पिबा सोमं मदाय"–इतिश्रवणात् इदं सूक्तं मद्वद्भवति। पञ्चपादाः विस्पष्टाः * ॥

तादृश मेवान्यत्सूक्तं विधत्ते—"इत्था हि सोम इन्मद इति सूक्तं (सं० १.८०.) मद्वत्पाङ्क्तं, पञ्चपदं पञ्चमे ऽहनि पञ्चमस्याह्नो रूपम्"–इति ॥

पुनरपि मदशब्दलिंगोपेतं त्रिष्टुपछन्दस्कं सूक्तं विधत्ते—"इन्द्र पिब तुभ्यं सुतो मदायेति (सं० ६.४०.) सूक्तं मद्वत्त्रैष्टुभं ;

---

* अवितासि सुन्वती वृक्तबर्हिषः, पिबा सोमं मदाय कं शतक्रती । यं ते भाग मधारयन्, विश्वाः सेहानः पृतना उरु ज्रयः, समप्सुजिन्मरुत्वाँ इन्द्र सत्पते"–इति ।

तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते"—इति। पूर्ववद् व्याख्येयम् ॥

आकार·प्रशब्दवर्ज्जितमरुत्वतीयशस्त्रस्यान्ते प्रक्षेपणीयं तृचं विधत्ते—"मरुत्वाँ इन्द्र मीढ्व इति पर्यासो नेति न प्रेति पञ्चमे ऽहनि पञ्चमस्याह्नो रूपम्"—इति। परितो प्रक्षेपणीयः पर्यासः ॥

तस्मिंस्तृचे निविद्धानं विधत्ते—"ता उ गायत्र्यो गायत्र्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति तद्धैतच्छन्दो वहति, यस्मिन्निविद्धीयते; तस्माद् गायत्रीषु निविदं दधाति"—इति। पूर्ववद् व्याख्येयम् ॥ १ ॥

इति श्रीमत्सायणार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां द्वितीयाध्याये
(द्वाविंशाध्याये) प्रथमः खण्डः ॥ १ (६) ॥

॥ अथ द्वितीयः खण्डः ॥

महानाम्नीष्वत्र स्तुवते॑ शाक्वरेण साम्ना॑ राथन्तरे ऽहनि पञ्चमे ऽहनि पञ्चमस्याह्नो रूप॑मिन्द्रो वा एताभिर्महानात्मानं निरमिमी॑त तस्मान्महानाम्न्यो॑ ऽथो इमे वै लोका महानाम्न्य॑ इमे महान्त इमान्वै लोकान् प्रजापतिः सृष्ट्वेदं सर्वमशक्नोद्यदिदं किं च॑ यदिमाल्लोकान्* प्रजापतिः सृष्ट्वेदं

---

* "यदिमान् लोकान्" क, ञ, ठ; "यदिमांल्लोकान्" ख, ग, ङ, ज; "यदिमाल्लोकान्" घ, ट; "यदिमाँल्लोकान्"—इत्येव व्यवहारसम्मतः।

सर्वं मशक्नोद्यदिदं किञ्चˈ तच्छक्वर्योऽभवंˈस्तच्छक्वरीणां शक्वरीत्वंˈ ता ऊर्ध्वाः सीम्नो ऽभ्यसृजतˈ यदूर्ध्वाः सीम्नो ऽभ्यसृजतˈ तत्सिमा अभवंˈस्तत्सिमानां सिमात्वंˈ स्वादोरित्था विषूवतˈ उप नो हरिभिः सुतˈ मिन्द्रं विश्वा अवीवृधन्नित्यनुरूपोˈ वृषण्वान् पृश्निमान्महान्ˈवृधन्वान् पञ्चमे ऽहनि पञ्चमस्याह्नो रूपंˈ यद्वावानेति धाय्याच्युताˈभि त्वा शूर नोनुम इतिˈ रथन्तरस्य योनि मनु निवर्तयतिˈ राथन्तरं ह्येतदहरायतनेनˈ मो षु त्वा वाघतश्चनेति सामप्रगाथोˈ ऽध्यासवान् पशुरूपंˈ पञ्चमे ऽहनि पञ्चमस्याह्नो रूपंˈ त्य मू षु वाजिनं देवजूत मितिˈ तार्च्योऽच्युतः॥ २ (७)॥

अथ शाक्वरसामसम्बन्धेन लिंगेन युक्ता ऋचो विधत्ते— "महानाम्नीष्वत्र स्तुवते शाक्वरेण साम्ना राथन्तरे ऽहनि पञ्चमे ऽहनि पञ्चमस्याह्नो रूपम्"–इति। "विदा मघवन्"–इत्यादयो नव ऋचो महानाम्नीसञ्ज्ञकाः *। तासूद्गातारः शाक्वराख्येन साम्ना † स्तुवते ; अहश्चेद मयुग्मत्वाद्राथन्तरम् ; शाक्वरं साम च रथन्तररूपजन्यत्वाद्राथन्तरम् ; अतोऽत्र ता ऋचो योग्याः ॥

'महानाम्नी'-शब्दं निर्वक्ति— "इन्द्रो वा एताभिर्महानात्मानं निरमिमीत, तस्मान्महानाम्न्यो ऽथो इमे वै लोका महा-

---

* सा० महा० आ० १—९ ; ऐ० आ० ४. १—१५ ।

† तच्च साम चतुर्भ्यो गानग्रन्थेभ्यः पृथगेवाम्नातम् ।

नाम्न्य इमे महान्तः”–इति । पुरा कदाचिदिन्द्रः स्वय मेव ऐश्वर्यादिगुणैर्महान् भविष्यामीति विचार्य्य “विदा मघवन्”–इत्यादिभिर्ऋग्भिः स्वात्मानं गुणैर्महान्तं निर्मितवान् । तस्मान्महत्वनिर्माणसाधनत्वान्महानाम्नीशब्दवाच्याः सम्पन्नाः । अपि च महानाम्न्यो भूरादिलोकत्रयस्वरूपाः; लोकाश्च महान्तः ; तस्मादप्यासां महानाम्नीत्वम् ॥

ननु शक्वरीषूत्पन्नं साम शाक्वर मिति वक्तव्यं,— शक्वरी च सप्तपादोपेता; न चैता ऋचस्तथाविधाः, किन्तु पादचतुष्टयोपेता अनुष्टुभः ; तत् कथ मासां शक्वरीत्व मित्याशङ्क्य शक्तिप्रदत्वाच्छक्वरीत्व मिति निर्वचनं दर्शयति— “इमान्वै लोकान् प्रजापतिः सृष्ट्वेदं सर्वं मशक्नोद्यदिदं किञ्च ; यदिमाल्लोकान् प्रजापतिः सृष्ट्वेदं सर्वं मशक्नोद्यदिदं किञ्च, तच्छक्वर्यो ऽभवंस्तच्छक्वरीणां शक्वरीत्वम्”–इति । पुरा प्रजापतिः “विदा मघवन्”–इत्यादिका महानाम्नीरनुसन्धाय, तदात्मकान् लोकान् (प्रजापतिः) सृष्ट्वा, ताभिर्महानाम्नीभिरनुगृहीतं, पश्चादेषु लोकेषु यत् किञ्चित् स्थावरजङ्गमप्राणिजातं स्रष्टव्य मस्ति, तत्सर्वं स्रष्टु मशक्नोत् शक्तिमानभूत् * । यस्मादेवं प्रजापतिरकरोत्, तस्माच्छक्तिहेतुत्वात् एता ऋचः शक्वरीनामकाः अभवन् । अनेन प्रकारेण तासां शक्वरीत्वं सम्पन्नम् ॥

प्रकारान्तरेण महानाम्नीः प्रशंसति— “ता ऊर्ध्वाः सीम्नो ऽभ्यसृजत ; यदूर्ध्वाः सीम्नो ऽभ्यसृजत, तत्सिमा अभवंस्तत्सिमानां सिमात्वम्”–इति । या एता महानाम्न्यः सन्ति, ताः ‘सीम्न ऊर्ध्वा अभ्यसृजत’ “अग्नि मीळे”–इत्यारभ्य “यथा वः सु सहासति”–

---

* “शक्तिमानाभूत्”–इति क, ख, घ ।

इत्यन्ता दाशतयीनां सीमा ; तस्याः 'सीम्नः' ऊर्ध्वभाविनीः कृत्वा प्रजापतिः अभितः सृष्टवान् ; अत एवैताः संहिताः संहितायां नाम्नायन्ते किन्तु आरण्यकाण्डे * आम्नायन्ते। अथवा नवैता ऋचस्त्रिवेदेभ्य उपरि स्थितत्वेन प्रयुज्यन्ते। तथा चाश्वालयन आह— "शाक्करं चेत्पृष्ठं महानाम्न्यः स्तोत्रियस्ता अर्ध्वर्द्धकारं नव प्रकृत्या तिस्रो भवन्ति"–इति (श्रौ० ७.१२.१०.)। अस्यायमर्थः। यदा शाक्कर साम्ना पृष्ठस्तोत्रं निष्पाद्यते, तदानीं महानाम्न्य ऋचः स्तोत्रियस्तृचो भवति। तासु 'प्रकृत्या' स्वभावेन नवसङ्ख्यकास्तथापि तिस्रः कर्तव्या। अर्ध्वर्द्धकार मिति अत्रोपाय उच्यते। अधिकेनार्द्धेन युक्ता मेका मृच मेक मर्द्धर्चं कृत्वेत्युक्तं भवति। ततस्त्रयाणा मर्द्धर्चाना मेकार्द्धत्वे सति तिस्र ऋचो भवन्तीति। सोऽयं सीम्नः उल्लङ्घनप्रकारः। यस्मात्सीम्नः ऊर्ध्वाः सतीः प्रजापतिरसृजत, तस्मात् 'सिमा'-इत्येतन्नामका अभवन्। महानाम्नीना मनेन प्रकारेण सिमानामकत्वं विज्ञेयम् † ॥

स्तोत्रिय मुक्तानुरूपं तृचं विधत्ते— "स्वादोरित्था विषूवत, उप नो हरिभिः सुत, मिन्द्रं विश्वा अवीवृधन्नित्यनुरूपो वृषण्वान् पृश्निमान्महद्वान्वृधन्वान् पञ्चमे ऽहनि पञ्चमस्याह्नो रूपम्"–इति। स्वादोरित्यादिरध्ययनप्रकारेणैकस्तृचः (सं० १.८४.१०.) उप न इत्यादिर्द्वितीयः (सं० ८.९३.३१.) इन्द्रं विश्वा इति (सं०

---

* चतुर्थे इति शेषः।

† अथ सामब्राह्मणयोः—"इन्द्रः प्रजापति मुपाधावत् वृत्रꣳ हनानीति, तस्मा एतच्छन्दोभ्य इन्द्रियं वीर्यं निर्माय प्रायच्छदेतेन शक्नुहीति; तच्छक्करीणाꣳ शक्करीत्वम्। सीमान मभिनत् तत् सिमा। मङ्क्रा मंकरोत् तन्मङ्क्रा। महान् घोष आसीत्तन्महानाम्न्यः"–इति ता० ब्रा० १३.४। "ऐन्द्री महानाम्न्यः प्रजापतेर्वा विष्णोर्वा विश्वामित्रस्य वा सिमा वा मङ्क्रा वा शक्कर्यो वा"–इति आर्षे० ब्रा० ३.२९।

१.११.१.) तृतीयः ; एतत्त्रयं मिलित्वा पूर्वोक्तस्तोत्रियसादृश्यादनुरूपस्तृचो भवति। तत्र स्वादोरित्येतस्मिन् "वृष्णा मदन्ति"-इति वृषण्वत्वं च दृश्यते, "सोमं श्रीणन्ति पृश्नयः"-इति पृश्निमत्त्वम्, "इदं विश्वा अवीवृधन्"-इति वृधन्वत्वम् ; तान्येतानि पञ्चमे ऽहनि योग्यत्वात् पञ्चमस्य गमकानि ॥

अच्युतत्वलिङ्गेन धाय्यां विधत्ते—"यद्वावानेति (सं० १०.७४.६.) धाय्याच्युता"-इति ॥

तां धाय्या मनु रथन्तरसामयोनिः शंसनं विधत्ते—"अभि त्वा शूर नोनुम इति (सं० ७.३२.२२.) रथन्तरस्य योनि मनु निवर्त्तयति ; राथन्तरं ह्येतदहरायतनेन"-इति। अयुग्मत्वादह्नो रथन्तरायतनत्व मेतदेव तल्लिङ्गम् ॥

शाक्वरसामसम्बन्धि-सामप्रगाथं विधत्ते— "मो षु त्वा वाघतश्चनेति (सं० ७.३२.१.) सामप्रगाथो ऽध्यासवान् ; पशुरूपं, पञ्चमे ऽहनि पञ्चमस्याह्नो रूपम्"-इति। ऋग्द्वय मेव सर्वत्र प्रगाथस्य स्वरूपम् ; अत्र तु "रायस्कामः"-इत्येषा (सं० ७.३२.३.) द्विपदाधिकत्वेन प्रक्षिप्ता * ; तस्मादयं प्रगाथो ऽध्यासवान्। तच्च पशुरूपत्वात् पञ्चमे ऽहनि योग्यम् ॥

अच्युतत्वलिंगेन सूक्तविशेषं विधत्ते— "त्य मू षु वाजिनं देवजूत मिति (सं० १०.१७८.) तार्क्ष्यो ऽच्युतः"-इति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां द्वितीयाध्याये
(द्वाविंशाध्याये) द्वितीयः खण्डः ॥ २ (७) ॥

---

* तदयं प्रगाथस्तृच एवेति फलितम्। "मोषु त्वा वाघतश्चनेति सद्विपद उपसम-

॥ अथ तृतीयः खण्डः ॥

प्रेदं ब्रह्म वृत्रतूर्येष्वाविथेति सूक्तं पाङ्क्तं पञ्चपदं पञ्चमेऽहनि पञ्चमस्याह्नो रूपमिन्द्रो मदाय वावृध इति सूक्तं मरुत्पाङ्क्तं पञ्चपदं पञ्चमेऽहनि पञ्चमस्याह्नो रूपं सत्रा मदासस्तव विश्वजन्या इति सूक्तं मरुत्वत्त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते तमिन्द्रं वाजयामसीति पर्यासः स वृषा वृषभो भुवदिति पशुरूपं पञ्चमेऽहनि पञ्चमस्याह्नो रूपं ता उ गायत्र्यो गायत्र्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति तद्वैतच्छन्दो वहति यस्मिन्निविद्धीयते तस्माद् गायत्रीषु निविदं दधाति तत्सवितुर्वृणीमहेऽद्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ राथन्तरेऽहनि पञ्चमेऽहनि पञ्चमस्याह्नो रूपमुदु ष्य देवः सविता दमूना इति सावित्रं मा दाशुषे सुवति भूरि वाममिति वामं पशुरूपं पञ्चमेऽहनि पञ्चमस्याह्नो रूपं मही द्यावापृथिवी इह ज्येष्ठे इति द्यावापृथिवीयं रुवद्धोक्षेति पशुरूपं पञ्चमेऽहनि पञ्चमस्याह्नो रूपमृभुर्विभ्वा वाज इन्द्रो नो अच्छेत्यार्भवं वाजो वै

स्येद् द्विपदाम्"–इति आश्व० श्रौ० ७.६। सामसंहितायां तु (उ० आ० ८.२.६.१,२.) तृच एवेत्यस्य सामप्रगाथत्व मव्याहृतम्।

पशवः पशुरूपं॑ पञ्चमे ऽहनि पञ्चमस्याह्नो रूपं॑ स्तुषे जनं सुव्रतं नव्यसीभिरिति वैश्वदे॑वं मध्यासवत्पशुरूपं॑ पञ्चमे ऽहनि पञ्चमस्याह्नो रूपं॑ हविष्पान्तमजरं स्वर्विदीत्या॑ग्निमारुतस्य प्रतिपद्ध॑विष्मत्पञ्चमे ऽहनि पञ्चमस्याह्नो रूपं॑ वपुर्नु तच्चिकितुषे चिदस्त्विति मारु॑तं वपुष्मत्पञ्चमे ऽहनि पञ्चमस्याह्नो रूपं॑ जातवेदसे सुनवाम सोम मिति जातवेदस्याच्यु॑ताग्निर्होता गृहपतिः स राजेति जातवेद॑स्यं मध्यासवत्पशुरूपं॑ पञ्चमे ऽहनि पञ्चमस्याह्नो रूप॑म् ॥(३)८॥

पञ्चपादोपेततया पाङ्क्तत्वलिङ्गयुक्तं सूक्तं विधत्ते— "प्रेदं ब्रह्म वृत्रतूर्येष्वाविथेति (सं० ८.३७.) सूक्तं पाङ्क्तं ; पञ्चपदं, पञ्चमे ऽहनि पञ्चमस्याह्नो रूपम्"–इति ॥

मदशब्देन पाङ्क्तत्वेन च लिङ्गद्वयेनोपेतं सूक्तं विधत्ते— "इन्द्रो मदाय वावृध इति (सं० १.८१.) सूक्तं मद्वत्पाङ्क्तं ; पञ्चपदं, पञ्चमे ऽहनि पञ्चमस्याह्नो रूपम्"–इति ॥

मदिधातुलिङ्गकं त्रिष्टुप्छन्दस्कं सूक्तं विधत्ते— "सत्रा मदासस्तव विश्वजन्या इति (सं० ६.३६.) सूक्तं मद्वत् त्रैष्टुभं ; तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते"–इति ॥

शस्त्रान्ते प्रक्षेपणीयं तृचं विधत्ते— "त मिन्द्रं वाजयामसीति (सं० ८.९२.७–९.) पर्यासः ; स वृषा वृषभो भुवदिति पशुरूपं, पञ्चमे ऽहनि पञ्चमस्याह्नो रूपम्"–इति । स वृषेत्यादिस्तृतीयः पादः ; तत्र वृषभशब्दश्रवणात् पशुरूपत्वम् ॥

तस्मिंस्तृचे निविद्धानं विधत्ते— "ता उ गायत्र्यो गायत्र्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति ; तद्वैतच्छन्दो वहति, यस्मिन्निविद्धीयते ; तस्माद् गायत्रीषु निविदं दधाति"–इति ॥

वैश्वदेवशस्त्रस्य तृचद्वयं विधत्ते— "तत्सवितुर्वृणीमहे, अद्या नो देव सवितरिति, वैश्वदेवस्य प्रतिपदनुचरौ ; राथन्तरेऽहनि पञ्चमेऽहनि पञ्चमस्याह्नो रूपम्"–इति। "तत्सवितुः"–इति (सं० ५.८२.१–३.) तृचः प्रतिपत्, "अद्या नः"–इति (सं० ५.८२.४–६.) तृचोऽनुचरः ; तावुभौ रथन्तरसम्बन्धिनौ। अहश्चायुग्मत्वात् राथन्तरम् ; एवं लिङ्गं सम्पादनीयम् ॥

रमणीयत्ववाचकेन वामशब्दलिंगेन युक्तं तृचं विधत्ते— "उदु ष्य देवः सविता दमूना इति (सं० ६.७१.४–६.) सावित्रम् ; आ दाशुषे सुवति भूरि वाममिति वामं पशुरूपं, पञ्चमेऽहनि पञ्चमस्याह्नो रूपम्"–इति। सावित्रत्वं स्पष्टम्। "आ दाशुषे" –इति चतुर्थः पादः ; तत्र "भूरि वामम्"–इति वामशब्दरूपं लिङ्गं पशुरूपमस्ति ॥

पशुवाचकेनोक्षशब्दरूपेण लिंगेन युक्तं चतुरृचं विधत्ते— "मही द्यावापृथिवी इह ज्येष्ठे इति (सं० ४.५६.१–४.) द्यावापृथिवीयं ; रुवद्धोक्षेति पशुरूपं, पञ्चमेऽहनि पञ्चमस्याह्नो रूपम्"–इति। रुवदित्यादिश्चतुर्थः पादः ; तत्रोक्षेति पुङ्गवाभिधायकः शब्दोऽस्ति ॥

ऋभुदेवताकं सूक्तं विधत्ते— "ऋभुर्विभ्वा वाज इन्द्रो नो अच्छेत्यार्भवं (सं० ४.३४.) ; वाजो वै पशवः पशुरूपं, पञ्चमेऽहनि पञ्चमस्याह्नो रूपम्"–इति। पशोर्हविष्ट्वेन देवतान्नत्वादन्नं वाजः ; वाजशब्दः पशुरूपं लिङ्गम् ॥

अध्यासलिङ्गकं सूक्तं विधत्ते— "स्तुषे जनं सुव्रतं नव्यसीभिरिति (सं० ६.४९.) वैश्वदेव मध्यासवत्पशुरूपं, पञ्चमे ऽहनि पञ्चमस्याह्नो रूपम्"–इति। त्रिष्टुप्छन्दस्के सूक्ते "विश आ देवीः" -इत्येकः पादोऽधिकः प्रक्षिप्यते * ; सोऽय मध्यासो लिङ्गम् ॥

शस्त्रान्तरस्य प्रतिपदं सूक्तं विधत्ते— "हविष्पान्त मजरं स्वर्विदीत्याग्निमारुतस्य प्रतिपद्धविष्मत्पञ्चमे ऽहनि पञ्चमस्याह्नो रूपम्"–इति। हविःशब्दोपेतत्व मत्र (सं० १०.८८.) लिङ्गम् ॥

वपुःशब्दोपेतं मरुद्देवताकं सूक्तं विधत्ते— "वपुर्नु तच्चिकितुषे चिदस्त्विति (सं० ६.६६.) मारुतं; वपुष्मत्पञ्चमे ऽहनि पञ्चमस्याह्नो रूपम्"–इति। "मरुतो वावृधन्त"-इतिश्रवणात्तत्सूक्तं मारुतम् ; वपुः-शब्दलिङ्गं तु स्पष्टम् ॥

अच्युतत्वलिङ्गयुक्ता मृचं विधत्ते— "जातवेदसे सुनवाम सोम मिति (सं० १.९९.१.) जातवेदस्याच्युता"–इति ॥

अध्यासलिंगेन युक्तं जातवेदोदेवताकं तृचं विधत्ते— "अग्निर्होता गृहपतिः स राजेति (६.१५.१३–१५.) जातवेदस्या मध्यासवत्पशुरूपं, पञ्चमे ऽहनि पञ्चमस्याह्नो रूपम्"–इति। त्रिष्टुप्छन्दकस्य तृचस्यावसाने "ता तरेम"–इत्यधिकः पादोऽध्यासः † ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां द्वितीयाध्याये
(द्वाविंशाध्याये) तृतीयः खण्डः ॥ ३ (८)॥

---

* "विश आ देवीरभ्य१श्नवाम"–इति सं० ६.४९.१५ ।

† "ता तरेम तवावसा तरेम"–इति सं० ६.१५.१५ ।

देवक्षेत्रं वा एतद्यत्षष्ठ महर्देवक्षेत्रं वा एत आगच्छन्ति ये षष्ठ महरागच्छन्ति न वै देवा अन्योऽन्यस्य गृहे वसन्ति नर्तुर्ऋतोर्गृहे वसतीत्याहुस्तद्यथायथ मृत्विज ऋतुयाजान् यजन्त्यसम्प्रदायं तद्यथर्त्वृतून् कल्पयन्ति यथायथं जनतास्तदाहुर्नर्तुप्रैषैः प्रेषितव्यं नर्तुप्रैषैर्वषट्कृत्यं वाग्वा ऋतुप्रैषा आप्यते वै वाक् षष्ठे ऽहनीति यदृतुप्रैषैः प्रेष्येयुर्यदृतुप्रैषैर्वषट्कुर्युर्वाच मेव तदाप्तां श्रान्ता मृक्णवहीं वहराविणी मृच्छेयुर्यद्वेभिर्न प्रेष्येयुर्यद्वेभिर्न वषट्कुर्युरच्युताद्यज्ञस्य च्यवेरन्यज्ञात्प्राणात्प्रजापतेः पशुभ्यो जिह्मा ईयु*स्तस्मादृग्मेभ्य एवाधि प्रेषितव्य मृग्मेभ्यो ऽधि वषट्कृत्यं तं न वाच माप्तां श्रान्ता मृक्णवहीं वहरासिवणी मृच्छन्ति नाच्युताद्यज्ञस्य च्यवन्ते न यज्ञात् प्राणात् प्रजापतेः पशुभ्यो जिह्मायन्ति ॥ (४) ९ ॥

अथ षष्ठ महरारभ्यते— “देवक्षेत्रं वा एतद्यत् षष्ठ महर्देवक्षेत्रं वा एत आगच्छन्ति, ये षष्ठ महरागच्छन्ति”—इति । द्वादशाह-मध्ये नवरात्रान्तर्गते पृष्ठ्यषडहे यत् षष्ठ महरस्ति, तदेतत् ‘देवक्षेत्रं वै’ देवानां निवासस्थान मेव। एवं सति ‘ये’ यजमानाः षष्ठ महरनुतिष्ठन्ति, एते देवानां निवासस्थान मागच्छन्ति ॥

---

* “द्रयु” ङ, भा०—घ ।

अथास्मिन् षष्ठेऽहनि ऋतुप्रैषेषु ऋतुयाज्यासूक्ते कञ्चिद् विशेषं विधातुं प्रस्तौति – "न वै देवा अन्योऽन्यस्य गृहे वसन्ति, नर्त्तुर्ऋतोर्गृहे वसतीत्याहुस्तद्यथायथ मृत्विज ऋतुयाजान् यजन्त्यसम्प्रदायं तद्यथर्त्वृतून्कल्पयन्ति यथायथं जनताः"–इति। देवाः सर्वेऽपि अन्योऽन्यस्य गृहे वासं नैव कुर्वन्ति ; किन्तु स्वस्व एव गृहे। एवं च सत्यृतुरप्यृतोरन्यस्य स्थाने न वसति, किन्तु सर्वोऽपि वसन्ताद्यृतुः स्वस्व एव स्थाने निवसति। तस्मात् कारणात् यथायथं स्वस्वस्थान मनतिक्रम्य सर्वोऽप्यृत्विजः ऋतुयाजान् यजेयुः ; 'असम्प्रदायम्" अन्यस्मै अदत्त्वा। अय मर्थः— ऋतुग्रहाणां प्रचारो यदा वर्त्तते, तदानीं मैत्रावरुणः प्रैषसूक्तगतेन मन्त्रेण होत्रादीन् प्रेष्यति, अन्ते च याज्यया वषट् कुर्वन्ति ; अध्वर्युयजमानौ तु प्रेषितौ स्वस्वयाज्यां होत्रे प्रयच्छतः। तदिदं प्रकृतावनुष्ठानम्। अत्र तु तौ होत्रे न प्रयच्छतः, किन्तु स्वय मेव याज्यां पठत इति। तथा सति 'यथर्त्तु' तं त मृतु मनतिक्रम्य सर्वानृतूनृत्विजः 'कल्पयन्ति' स्वस्वप्रयोजनसमर्थान् कुर्वन्ति। ऋतूनां तथा कल्पने सति 'जनताः' जनसमूहः 'यथायथं' स्वं स्वं स्थान मनतिक्रम्य व्यवस्थिताः सुखिनो भवन्ति। एव मृतुयाजा अत्र प्रस्तुताः। तत्रैतच्चिन्त्यते,— कि मृतुयाजेषु प्रैषवषट्कारौ प्रकृतिवन्न कर्त्तव्या वुत कर्तव्यौ ? आहोस्वित्प्रकारान्तरेण कर्तव्यौ ? इति॥

तत्र तावदकरणपक्ष मुपन्यस्यति— "तदाहुर्नर्तुप्रैषैः प्रेषितव्यं नर्तुप्रैषैर्वषट्कर्त्तव्यं, वाग्वा ऋतुप्रैषा आप्यते वै वाक् षष्ठेऽहनीति"–इति। ऋतुयाज्यार्थं मैत्रावरुणेन पठितव्या मन्त्राः 'ऋतुप्रैषाः'। तैः प्रैषमन्त्रैर्होत्रादीन् प्रति च न प्रेषितव्यम्,—

“होता यक्षदिन्द्रम्”-इत्यादिभिः * प्रेषणं न कर्त्तव्यम्। होत्रादिभिश्च ऋतुप्रैषमन्त्रैर्न वषट् कर्तव्यं, याज्यात्वेन न पठितव्या इत्यर्थः। तत्रेय मुपपत्तिः— ये ऋतुप्रैषाः, ते सर्वेऽपि ‘वाग्वै’ वाग्रूपैव ; वाक् च षष्ठे ऽहनि ‘आप्यते’ समाप्यते ; न हि समाप्तायां वाचि मन्त्रप्रयोगो युज्यत इति निषेधवादिना मभिप्रायः॥

तेषा मेव मत माश्रित्य विधिवादिनां पक्षे दोषं दर्शयति— यदृतुप्रैषैः प्रेष्येयुर्यदृतुप्रैषैर्वषट्कुर्युर्वाच मेव तदाप्तां श्रान्ता मृक्णवहीं वहराविणी मृच्छेयुः”-इति। य ऋतुप्रैषास्तत्पूर्वको वषट्कारश्चानुष्ठीयेरन्, तदानीम् ‘आप्तां’ समाप्तां वाच मेव ऋच्छेयुः। कीदृशीं वाचम्? ‘ऋक्णवहीम्’। ‘वहः’ बलीवर्दस्य लाङ्गलादिवहनप्रदेशः, ‘वृक्णः’ भग्नः, “वृजो भञ्जे”-इति धातुः। वृक्णो भग्नो वहो वहनप्रदेशो यस्या वाचः, सा ‘ऋक्णवही’, श्रान्तत्वाद्यज्ञभारं वोढु मशक्तेत्यर्थः। ‘वहराविणीम्’ अशक्यवहननिमित्तो रावो रोदनरूपो ध्वनिर्यस्याः, सा ‘वहराविणी’ तादृशीम्; उपद्रवद्वययुक्तां कृत्वा वाचं विनाशयेयुः॥

एव मनुष्ठानपक्षे दोव मुक्त्वा निषेधपक्षे व्यवस्थिते सति विधिवादी स्वाभिप्रेत मनुष्ठानं हृदि निधाय निषेधपक्षे बाध मुपन्यस्यति— “यद्वेभिर्न प्रेष्येयुर्यद्वेभिर्न वषट् कुर्युरच्युताद्यज्ञस्य च्यवेरन्यज्ञात्प्राणात्प्रजापतेः पशुभ्यो जिह्मा ईयुः”-इति। ‘यदु’ यदि वा ‘एभिः’ मन्त्रैर्न प्रेष्येयुः, यदि वा एभिर्मन्त्रैर्याज्यामन्त्रैर्न वषट् कुर्य्युः। तदानी मृत्विजो यज्ञस्य ‘अच्युतात्’ अविनष्टात्प्रयोगात् ‘च्यवेरन्’ विनश्येयुः, यज्ञप्रयोगः साङ्गो न भवेदित्यर्थः। किञ्च तस्माद्यज्ञात् स्वकीयप्राणात् ‘प्रजापतेः’ स्वकीययजमाना-

---

* २भा० २२९—२४२ पृ० ६ख० द्रष्टव्यः।

ज्ञवादिपशुभ्यश्च 'जिह्मा ईयुः' ऋत्विजः सर्वेऽपि कुटिला भूत्वा गच्छेयुः, यज्ञप्राणयजमानपशुभ्यो भ्रष्टा भवेयुरित्यर्थः ॥

इत्थं विधिनिषेधपक्षयोरुभयोरपि बाध मुक्त्वा प्रकारान्तरेण अनुष्ठानं सिद्धान्तयति— "तस्मादृग्मिभ्य एवाधि प्रेषितव्य मृग्मेभ्योऽधि वषट्कृत्यं; तं न वाच मामां श्रान्ता मृक्णवहीं वह्वराविणी मृच्छन्ति; नाच्युताद्यज्ञस्य च्यवन्ते, न यज्ञात्प्राणात्प्रजापतेः पशुभ्यो जिह्मायन्ति"–इति। यस्मादनुष्ठानपक्षे श्रान्ता मित्याद्युक्तदोषः, परित्यागपक्षे तु अच्युतादित्याद्युक्तदोषः, 'तस्माद्' दोषद्वयपरिहाराय प्रकारान्तरेणानुष्ठेयम्। प्रकृतौ हि मैत्रावरुणः तं प्रैषमन्त्रं पठित्वा होतर्यजेत्यादिना प्रेष्यति; होत्रादयश्च तत ऊर्ध्वं याज्यां प्रैषरूपा मेव पठित्वा, तदन्ते वौषडिति वषट् कुर्वन्ति; अत्र तु न तथा कर्त्तव्यम्। किं तर्हि? 'ऋग्मिभ्यः' एव 'अधि' ऋक्शिरस्केभ्यो होत्रादिविषयप्रैषेभ्य एवोर्ध्वं मैत्रावरुणो होतर्यजेत्यादिना प्रेष्येत्, होत्रादयश्च तथैव ऋग्मेभ्योऽधि वषट्कृत्य "तुभ्यं हिन्वानः"–इत्याद्यृक्शिरस्कैः प्रैषैः यजेयुः। तथा सति प्रकृतिवदनुष्ठानाभावाद् वाच मामा मित्यादिरनुष्ठानपक्षे प्रोक्तो दोषो न भवति; अनुष्ठानपरित्यागस्याप्यभावात् प्रतिषेधपक्षे प्रोक्तोऽच्युतादित्यादिदोषोऽपि न भविष्यति ॥ ४ ॥

इति श्रीमत्सायणार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां द्वितीयाध्याये
(द्वाविंशाध्याये) चतुर्थः खण्डः ॥ ४ (८) ॥

॥ अथ पञ्चमः खण्डः ॥

पारुच्छेपीरुपदधति॑ पूर्वयोः सवनयो॑ः पुरस्तात्प्रस्थितयाज्यानां॑ रोहितं वै नामैतच्छन्दो॑ यत्पारुच्छेप मेतेन वा इन्द्र॑ः सप्त स्वर्गाल्लोकानरोह॑द्रोहति सप्त स्वर्गाल्लोकान् * य एवं वेद॑ तदाहुर्यत्पञ्चपदा एव पञ्चमस्याह्नो रूपं॑ षट्पदाः षष्ठस्या॑थ कस्मात्सप्तपदाः षष्ठेऽहञ्छस्यन्त इति॑ षड्भिरेव पदैः षष्ठ महराप्नुव॑न्त्यपच्छिद्यो वैतदहर्यत्सप्तमं॑ तदेव सप्तमेन पदेनान्वारभ्य वसन्ति॑ वाच मेव तत्पुनरुपयन्ति सन्तत्यै॑ सतन्तैस्त्र्यहैरव्यवच्छिन्नैर्यन्ति॑ य एवं विद्वांसो यन्ति॑ ॥ (५) १० ॥

अथ सवनद्वये कांश्चिदृग्विशेषान्विधत्ते— "पारुच्छेपीरुपदधति पूर्वयोः सवनयोः पुरस्तात्प्रस्थितयाज्यानां रोहितं वै नामैतच्छन्दो यत्पारुच्छेप मेतेन वा इन्द्रः सप्त स्वर्गाल्लोकानरोहत्"— इति। प्रातस्सवने माध्यन्दिनसवने च याः 'प्रस्थितयाज्याः' चोदकेन प्रकृतितः प्राप्ताः, तासां पुरस्तात् 'पारुच्छेपीः' परुच्छेपाख्येन महर्षिणा † दृष्टा ऋचः उपदध्युः ;— एकैकां पारुच्छेपी मृच मुक्त्वा पश्चादेकैकां प्रस्थितयाज्यां पठेत्। "वृष-

---

* इह सर्वत्रैव पूर्ववत् (४८ पृ० "*") पाठभेदोऽवगन्तव्यः ।

† "परुच्छेप ऋषिः ; पर्ववच्छेपः, परुषिपरुषि शेपोऽस्येति वा"—इति निरु० १०. ४. ५। "परुच्छेपी दैवोदासिः"—इति ऋ० अनु० ।

न्निन्द्र वृषपाणास इन्दवः"–इत्याद्याः (सं० १.१३९.६.), "पिबा सोम मिन्द्र सुवान मद्रिभिः"–इत्याद्याश्च (सं० १.१३०.२.), पारुच्छेप्यः ऋचः* सूत्रकारेण विस्पष्ट मुदाहृताः †। पारुच्छेपीष्वृक्षु यच्छन्दोऽस्ति, तदिदं रोहितनामकम्। कथ मिति, तदुच्यते— 'एतेन' पारुच्छेपीयेन छन्दसा पुरा कदाचिदिन्द्रः 'सप्त स्वर्गान् लोकान् अरोहत्' उत्तमाधमभोगावस्थानविशेषान् सप्तसङ्ख्याकान् स्वर्गान् रोहत्यनेन छन्दसेति 'रोहितं' नाम सम्पन्नम्॥ वेदनं प्रशंसति— "रोहति सप्त स्वर्गाल्लोकान् य एवं वेद"–इति॥

तस्मिन् छन्दसि चोद्य मुद्भावयति— "तदाहुर्यत्पञ्चपदा एव पञ्चमस्याह्नो रूपं षट्पदाः षष्ठस्याथ कस्मात्सप्तपदाः षष्ठेऽहञ्छस्यन्त इति"–इति। सङ्ख्यासाम्यात्पञ्चपदोपेता ऋचः पञ्चमेऽहनि युक्ताः, षट्पदोपेताः षष्ठेऽहनि; पारुच्छेप्यस्तु सप्तपदोपेताः, अतः षष्ठेऽहनि तच्छंसन मयुक्त मिति चोद्यवादिना मभिप्रायः॥

तत्रोत्तर माह— "षड्भिरेव पदैः षष्ठ महराप्नुवन्त्यपच्छिदेवैतदहर्यत्सप्तमं, तदेव सप्तमेन पदेनाभ्यारभ्य वसन्ति, वाच मेव तत्पुनरुपयन्ति सन्तत्यै"–इति। एकैकस्या मृचि य एते प्रथमभाविनः षट् पादास्तैः सर्वैर्यदा षष्ठ महराप्नुवन्ति, तदानी मुपरितमं यत्सप्तम महस्तत् 'अपच्छिदेव' पृथक्त्वेन तस्य विच्छेदं कृत्वैव प्राप्नोति; तस्माद् विच्छिन्नं सप्तम महस्तेन सप्तमेन पादेनाभिमुख्येनोपक्रम्य वसन्ति। तथा सति विच्छिन्नां वाच मेव पुनरपि

---

* ताः सर्वाः सं० १.१२७—१३९ सूक्तगताः द्रष्टव्याः ।

† "षष्ठस्य प्रातस्सवने प्रस्थितयाज्यानां पुरस्तात्"–इत्युपक्रम्य 'वृषन्निन्द्र वृषपाणास इन्दवः' ०—० 'पिबा सोम मिन्द्र सुवान मद्रिभिः'०—० पारुच्छेप्यः"–इति आश्व० श्रौ०८.१.१-११।

प्राप्नुवन्ति । तच्च मध्यमयोस्त्र्यहयोः सन्तत्यै सम्पद्यन्ते ॥ वेदनपूर्वक मनुष्ठानं प्रशंसति—“सन्ततैस्त्र्यहैरव्यवच्छिन्नैर्यन्ति य एवं विद्वांसो यन्ति”–इति । पूर्ववद् व्याखेयम् ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां द्वितीयाध्याये
(द्वाविंशाध्याये) पञ्चमः खण्डः ॥ ५ (१०) ॥

॥ अथ षष्ठः खण्डः ॥

देवासुरा वा लोकेषु एषु समयतन्त ते वै देवाः षष्ठेनैवाह्नैभ्यो लोकेभ्यो ऽसुरान् प्राणुदन्त तेषां यान्यन्तर्हस्तीनानि वसून्यासंस्तान्यादाय समुद्रं प्रौप्यन्त त एतेनैव छन्दसा ऽनुहायान्तर्हस्तीनानि वसून्याददत तद्यदेतत्पदं पुनःपदं स एवाङ्कुश आसञ्जनाया ऽऽद्विषतो वसु दत्ते निरेन मेभ्यः सर्वेभ्यो लोकेभ्यो नुदते य एवं वेद ॥ (६) ११ ॥

पारुच्छेपीयं छन्द उपाख्यानेन प्रशंसति—“देवासुरा वा एषु लोकेषु समयतन्त; ते वै देवाः षष्ठेनैवाह्नैभ्यो लोकेभ्यो ऽसुरान् प्राणुदन्त; तेषां यान्यन्तर्हस्तीनानि वसून्यासंस्तान्यादाय समुद्रं

प्रैप्यन्त ; त एतेनैव छन्दसा ऽनुहायान्तर्हस्तीनानि वसून्याददत ; तद्यदेतत्पदं पुनः पदं स एवाङ्कुश आसञ्जनाय"–इति। देवाश्चासुराश्च लोकविषये यदा 'समयतन्त' सङ्ग्राम मकुर्वत, तदानीं 'ते' देवाः षष्ठ महरनुष्ठाय, तत्सामर्थ्येन असुरान् लोकेभ्यो निस्सारितवन्तः। तदानीं 'तेषाम्' असुराणां सम्बन्धीनि 'वसूनि' धनानि बहून्यासन्। कीदृशानि ? 'अन्तर्हस्तीनानि' हस्तिनां गजाना मुपरि भारवहनाय स्थापितानि; यद्वा स्वकीयस्य हस्तस्यान्तर्मध्ये गोप्यत्वेन स्थापितानि 'अन्तर्हस्तीनानि'। तानि सर्वाण्यादाय असुरा 'समुद्रं प्रैप्यन्त' समुद्रं गतवद्भिरसुरैः तस्मिन् समुद्रे तानि धनानि प्रक्षिप्तानि। 'ते' देवाः एतत्पारुच्छेपीयं छन्दोऽनुष्ठाय, तस्मात्सामर्थ्यात् 'अनुहाय' पृष्ठतो गत्वा हस्तिना मुपरि स्थितानि तदीयहस्ते ऽवस्थितानि वा सर्वाणि धनानि 'आददत' स्वीकृतवन्तः। समुद्रमध्यस्थितानां धनाना माकर्षणे किं साधन मिति, तदुच्यते—'तत्' तत्र पारुच्छेपीयास्वृक्षु यदेतत्पदपाठोऽस्ति कीदृशम् ? 'पुनःपदं' षट्सु पादेषु समाप्तेषु पुनः पश्चादुच्चार्यमाणः * "सुमृळीको न आ गहि"-इत्येवंविधः सप्तमः पादः †, स एव धनानाम् 'आसञ्जनाय' आसक्तानि कृत्वा समाकर्षणाय अङ्कुशोऽभूत् ; यथा लोके अङ्कुशेनाकृष्यते, तद्वत्सप्तमेन पादेनासुरधनान्याकृष्टानि ॥

वेदनं प्रशंसति— "आ द्विषतो वसु दत्ते निरेनमेभ्यः सर्वेभ्यो लोकेभ्यो नुदते य एवं वेद"–इति। वेदिता 'द्विषतः' शत्रोः

---

* "अभ्यासे भूयांस मर्थं मन्यन्ते, यथाहो दर्शनीयाहो दर्शनीयेति ; तत परुच्छेपस्य शीलम्"–इति निरु० १०. ४. ५।

† "वृषन्निन्द्र०—०सुमृळीको न आ गहि"–इति सं० १.१२९.६ । इहागहिपदाभ्यासः।

सम्बन्धि 'वसु' धनं सर्व मादत्ते; एवं च 'द्विषन्तं' शत्रुं लोकेभ्यो 'निर्णुदते' निस्सारयति ॥ ६ ॥

इतिश्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां द्वितीयाध्याये
(द्वाविंशाध्याये) षष्ठः खण्डः ॥ ६ (११) ॥

॥ अथ सप्तमः खण्डः ॥

द्यौर्वै देवता षष्ठ महर्वहति॑ त्रयस्त्रिंश* स्तोमो रैवतं सामातिच्छन्दाश्छन्दो यथादेवत मेनेन॑ यथास्तोमं यथासाम॑ यथाच्छन्दसं राध्नोति य एवं वेद॑ यद्वै समानोदर्कं† तत्षष्ठस्याह्नो रूपं॑ यद्ध्येव तृतीय महस्तदेतत्पुनर्यत्षष्ठं॑ यदश्ववद्यदन्तवद्॑यत्पुनरावृत्तं यत्पुनर्निवृत्तं॑ यद्रतवद्यत्पर्यस्तवद्॑यत्त्रिवद्यदन्तरूपं यदुत्तमे पदे देवता निरुच्यते॑ यदसौ लोको ऽभ्युदितो॑ यत्पारुच्छेपं यत्सप्तपदं॑ यन्नाराशंसं यन्नाभानेदि॑ष्ठं यद्रैवतं यदतिच्छन्दा॑ यत्कृतं यत् तृतीयस्याह्नो रूप॑मेतानि वै षष्ठस्याह्नो रूपाण्य॑यं जायत मनुषो धरीमणीति॑ षष्ठस्याह्न आज्यं भवति॑ पारुच्छेप मति-

---

* "त्रयस्त्रिंशः" क ; वैकल्पिकः ।

† "समानोदर्कं" ख, ङ ; वैकल्पिकः । एव मुत्तरत्रापि ।

छन्दाः॑ सप्तपदं * षष्ठे ऽहनि षष्ठस्याह्नो रूपं॑ स्तीर्णं बर्हिरुप नो याहि वीतय॑ आ वां रथो नियुत्वान् वक्षदवसे॑ सुषुमा यात मद्रिभि॑र्युवां स्तोमेभिर्देवयन्तो अश्विना॑ अवर्मह इन्द्र वृषन्निन्द्रा॑ ऽस्तु श्रौषळोषु णो अग्ने॑ शृणुहि त्व † मीळितो॑ ये देवासो दिव्येकादश स्थे॑य मददाद्रभस मृणच्युत मिति प्रउगं पारुच्छेप मतिच्छन्दाः॑ सप्तपदं षष्ठे ऽहनि षष्ठस्याह्नो रूपं॑ स पूर्व्यो महाना मिति॑ मरुत्वतीयस्य प्रतिप॑दन्तो वै महद्दन्तः॑ षष्ठ महः षष्ठे ऽहनि षष्ठस्याह्नो रूपं॑ त्रय इन्द्रस्य सोमा ‡ इन्द्र नेदीय एदिहि॑ प्र नूनं ब्रह्मणस्पति॑रग्निर्नेता त्वं सोम क्रतुभिः॑ पिन्वन्त्यपो॑ नकिः सुदासो रथ मिति॑ तृतीयेनाह्ना समान आता॑नः षष्ठे ऽहनि षष्ठस्याह्नो रूपं॑ यं त्वं रथ मिन्द्र मेधसातय इति सूक्तं॑ पारुच्छेप मतिच्छन्दाः॑ सप्तपदं षष्ठे ऽहनि षष्ठस्याह्नो रूपं॑ स यो वृषा वृष्ण्येभिः स मोका इति सूक्तं समानोदर्कं षष्ठे ऽहनि षष्ठस्याह्नो रूप॑ मिन्द्र मरुत्व § इह पाहि सोम मिति सूक्तं॑ तेभिः साकं पिबतु वृत्रखाद इत्यन्तो खादोऽन्तः॑ षष्ठ महः षष्ठे ऽहनि षष्ठस्याह्नो रूपं॑ तदु त्रैष्टुभं॑

---

* "सप्तमपदं" ङ ; अशुद्धः ।

† "त्वा" क ; अशुद्धः ।

‡ "सोम" क, ग ; अशुद्धः ।

§ "मरुत्वा" क ; अशुद्धः ।

तेन प्रतिष्ठितपदेन॑ सवनं दाधारायतनादेवैतेन न प्रच्यवते॑ ऽयं ह येन वा इद मिति पर्यासः॑ स्वर्मरुत्वता जित मित्य॑न्तो वै जित मन्तः॑ षष्ठ महः षष्ठे ऽहनि षष्ठस्याह्नो रूपं॑ ता उ गायत्र्यो गायत्र्यो वा॑ एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति॑ तद्वै तच्छन्दो वहति॑ यस्मिन्निविद्धीयते॑ तस्माद् गायत्रीषु निविदं दधाति॑ रेवतीर्नः सधमादे॑ रेवाँ* इद्रेवतस्तोतेति॑ रैवतं पृष्ठं भवति॑ बार्हते ऽहनि षष्ठे ऽहनि षष्ठस्याह्नो रूपं॑ यद्वावानेति धाय्याच्युता॑ त्वा मिद्धि हवामह इति॑ बृहतो योनि मनु निवर्त्तयति॑ बार्हतं ह्येतदहरायतने॑नेन्द्र मिद्देवतातय इति सामप्रगाथो॑ निरुक्तवान् षष्ठे ऽहनि षष्ठस्याह्नो रू॑पं त्य मूषु वाजिनं देवजूत मिति तार्क्ष्यो ऽ॑च्युतः ॥ ७ (१२) ॥

इदानीं षष्ठ महर्विधत्ते—“द्यौर्वै देवता षष्ठ महर्वहति त्रयस्त्रिंश स्तोमो रैवतं सामातिच्छन्दाश्छन्दो यथादेवत मेनेन यथास्तोमं यथाच्छन्दसं राध्नोति य एवं वेद”–इति। पूर्वत्र वागेकं गौरेकं द्यौरेक मिति यत्तृतीयं देवतास्वरूप मुक्तम्†, सेयं देवता षष्ठ महर्निर्वहति। तथा स्तोमानां मध्ये त्रयस्त्रिंशस्तोमो निर्वाहकः। तस्य स्तोमस्य स्वरूपं छन्दोगैरेव माम्नायते— “एकादशभ्यो हिङ्करोति स तिसृभिः स सप्तभिः स एकया, एकादशभ्यो

---

* “रेवां” क, ख, ग, घ, ट ; व्यावहारिकः।

† १८,२० पृष्ठे द्रष्टव्यं।

हिङ्करोति स एकया स तिसृभिः स सप्तभिरेकादशभ्यो हिङ्करोति स सप्तभिः स एकया स तिसृभिरन्तो वै त्रयस्त्रिंशः" इति * (ता० ब्रा० ३.३–७. ख०)। अस्याय मर्थः— एक एव तृचस्त्रिभिः पर्य्यायैरावर्त्तनीयः ; तत्र प्रथमे पर्य्याये प्रथमायास्त्रिरभ्यासः, मध्यमायाः सप्तकृत्वोऽभ्यासः, उत्तमायाः सकृत्पाठः ; द्वितीयपर्य्याये प्रथमायाः सकृत्पाठः, मध्यमायास्त्रिरभ्यासः, उत्तमायाः सप्तकृत्वोऽभ्यासः ; तृतीयपर्य्याये प्रथमायाः सप्तकृत्वोऽभ्यासः, मध्यमायाः सकृत्पाठः, उत्तमायास्त्रिरभ्यास ; एवं त्रयस्त्रिंशस्तोमनिष्पत्तिरिति। "रेवतीर्नः सधमादे"—इत्यस्या मृचि उत्पन्नं साम 'रैवतम्' †। गायत्र्यादिभ्यः छन्दोभ्योऽक्षरैरधिकत्वाद् 'अतिच्छन्दाः'—इति कस्यचित् छन्दसो नामधेयम्। अन्यत् पूर्ववद् व्याख्येयम् ॥

अत्र शस्त्रगतमन्त्रलिङ्गानि दर्शयति— "यद्वै समानोदर्कं तत्षष्ठस्याह्नो रूपं ; यद्ध्येव तृतीय मह्नस्तदेतत्पुनर्यत्षष्ठं ; यदश्ववद्यदन्तवद्यत्पुनरावृत्तं यत्पुनर्निनृत्तं यद्रतवद्यत्पर्यस्तवद्यत्त्रिवद्यदन्तरूपं यदुत्तमे पदे देवता निरुच्यते यदसौ लोको ऽभ्युदितः"—इति। 'समानोदर्कं' तुल्यसमाप्तिकं यदस्ति, तत्षष्ठस्याह्नो रूपम्। 'यद्धि एव' यदप्यन्यत् पूर्वत्र प्रथमे त्र्यहे तृतीय महरस्ति, तत् पुनरत्रानुसन्धेयम् ;— यदिदानीं षष्ठ महः प्रस्तूयते, तत् तदेव भवति ; पूर्वस्मिंस्तृतीयेऽहनि, यद्यल्लिङ्ग मुक्तं, तत् षष्ठेऽपि द्रष्टव्य मित्यर्थः। यदश्ववदित्यादिना यदसौ लोकोऽभ्युदित इत्यन्तेन तान्येतानि लिङ्गानि दर्शितानि ‡ ॥

---

* त्रयस्त्रिंशस्तोमस्य विष्टुतयः पञ्च ; तत्राद्या समन्त्रंशाख्या, सैवेयम्।

† २ भा० ३१४ पृ० "‖" द्रष्टव्यम्।

‡ १ पृ० ११ पं० द्रष्टव्यम्।

अथ विशेषलिङ्गानि दर्शयति—“यत्पारुच्छेपं यत्सप्तपदं यन्नाराशंसं यन्नाभानेदिष्ठं यद्रैवतं यदतिच्छन्दा यत्कृतं यत् तृतीयस्याह्नो रूप मेतानि वै षष्ठस्याह्नो रूपाणि”–इति। परुच्छेपेन दृष्टं ‘पारुच्छेपम्’। सप्तभिः पादैरुपेतं ‘सप्तपदम्’। नराशंसाख्यसम्बन्धि ‘नाराशंसम्’। नाभानेदिष्ठेन दृष्टं ‘नाभानेदिष्ठम्’। रैवतसामसम्बन्धि ‘रैवतम्’। सप्तभ्यश्छन्दोभ्योऽधिकाक्षरा ‘अतिच्छन्दाः’। भूतार्थवाचिप्रत्यययुक्तं धातुमात्रं ‘कृतं’ तदप्युक्तमनुक्तं वा तृतीयस्याह्नो निरूपकम्। एतानि सर्वाणि षष्ठस्याह्नो निरूपकाणि वेदितव्यानि॥

अथाज्यशस्त्रं विधत्ते—“अयं जायत मनुषो धरीमणीति (सं॰ १.१२८.) षष्ठस्याह्न आज्यं भवति, पारुच्छेप मतिच्छन्दाः सप्तपदं षष्ठेऽहनि षष्ठस्याह्नो रूपम्”–इति। परुच्छेपेन दृष्टत्व मेकं लिङ्गम्, अतिच्छन्दस्त्वं द्वितीयम्, सप्तपादोपेतत्वं तृतीयम्; एतेन लिङ्गत्रयेण षष्ठस्याह्नो निरूपकम्॥

अथ प्रउगशस्त्रं विधत्ते— “स्तीर्णं बर्हिरुप नो याहि वीतय आ वां रथो नियुत्वान्वक्षदवसे सुषुमा यात मद्रिभिर्युवां स्तोमेभिर्देवयन्तो अश्विनावर्मंह इन्द्र वृषन्निन्द्रास्तु श्रौषळोषु णो अग्ने शृणुहि त्वा मीळितो ये देवासो दिव्येकादश स्थेय मददाद्रभस मृणच्युत मिति प्रउगं, पारुच्छेप मतिच्छन्दाः सप्तपदं षष्ठेऽहनि षष्ठस्याह्नो रूपम्”–इति। “स्तीर्णं बर्हिः”–इत्याद्यस्तृचः (सं॰ १.१३५.१–३.); “आ वां रथः”–इति (सं॰ १.१३५.४–६.); द्वितीयः “सुषुमा यातम्”–इति (सं॰ १.१३७.१–३.) तृतीयः; युवां स्तोमेभिः”–इति (सं॰ १.१३९.३–५.) चतुर्थः; “अवर्मंहः” –इति (सं॰ १.१३३.६–७.) द्वे ऋचौ, “वृषन्निन्द्र”–इत्येका

(सं० १.१३९.६.), उभाभ्यां पञ्चमस्तृचः; "अस्तु श्रौषट्"–इत्येका (सं० १.१३९.१.), "ओ षू णः"–इत्येका (सं० १.१३९.७.), "ये देवासः"–इत्येका (सं० १.१३९.११.), एतत्त्रितयः षष्ठः; "इय मददात्"–इति (सं० ६.६१.१–३.) सप्तमः। इत्येतत्सर्वं प्रउगशस्त्रं कुर्य्यात्; लिङ्गानि पूर्ववत् ॥

शस्त्रान्तरस्य प्रतिपदं तृचं विधत्ते—"स पूर्व्यो महाना मिति (सं० ८.६३.१.) मरुत्वतीयस्य प्रतिपदन्तो वै महदन्तः षष्ठ महः षष्ठे ऽहनि षष्ठस्याह्नो रूपम्"–इति। अत्र महाना मिति महच्छब्दः पादस्यान्ते दृश्यते, षष्ठं चाहः पृष्ठ्याख्यस्य षडहस्यान्तो भवति, तस्मादन्तत्वलिङ्गेन षष्ठेऽहनि योग्यम्; यद्वा महतोऽप्यधिकस्थानस्याभावात् महदन्ते इति अन्तवत्वं व्याख्येयम् ॥

तृतीयेनाह्ना सह समानं शस्त्रक्लृप्तियुक्तं मन्त्रजातं दर्शयति—"त्रय इन्द्रस्य सोमा (सं० ८.२.), इन्द्र नेदीय एदिहि (सं० ८.५३.), प्र नूनं ब्रह्मणस्पति (सं० १.४०), अग्निर्नेता (सं० ३.२०.), त्वं सोम क्रतुभिः (सं० १.९१.), पिन्वन्त्यपो (सं० १.६४.), नकिः सुदासो रथ मिति (सं० ७.३२.) तृतीये नाह्ना समान आतानः; षष्ठेऽहनि षष्ठस्याह्नो रूपम्"–इति ॥

परुच्छेपेन दृष्टं सूक्तं दर्शयति—"यं त्वं रथ मिन्द्र मेधसातय इति (सं० १.१२९.) सूक्तं पारुच्छेप मतिच्छन्दाः सप्तपदं षष्ठेऽहनि षष्ठस्याह्नो रूपम्"–इति ॥

तुल्यावसानत्वलिङ्गोपेतं सूक्तं दर्शयति— "स यो वृषा वृष्ण्येभिः समोका इति (सं० १.१००.) सूक्तं समानोदर्कं, षष्ठेऽहनि षष्ठस्याह्नो रूपम्"–इति। "मरुत्वान् नो भवतु"-इत्यस्य चतुर्थपादस्य सर्वास्वृक्षु विद्यमानत्वात्समानोदर्कत्वम् ॥

तृचात्मकं सूक्तान्तरं विधत्ते— "इन्द्र मरुत्व इह पाहि सोम मिति (सं० ३.५१.७-९.) सूक्तं; तेभिः साकं पिबतु वृत्रखाद इत्यन्तो वै खादोऽन्तः षष्ठ महः; षष्ठे ऽहनि षष्ठस्याह्नो रूपम्"-इति। अस्मिन् सूक्ते "तेभिः साकम्"-इत्यादिकस्तृतीयस्या मृचि तृतीयः पादः। तत्र वृत्रं खादति भक्षयतीति 'वृत्रखादः'; तेन भक्षणेन वृत्रस्यावसानं मरणं सम्पद्यते। तस्मात् खादो वृत्रस्यान्तः; षष्ठस्यान्तत्वं पूर्व मेवोक्तम्; अतोऽन्तवत्वलिङ्गम्। यद्यपीदं सूक्तं न भवति *, तथापि सूक्तस्थानापन्नत्वात्सूक्त मित्युक्तम् ॥

सूक्तगतं छन्दः प्रशंसति— "तदु त्रैष्टुभं; तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते"-इति। पूर्ववद् व्याख्येयम् ॥

शस्त्रस्यान्तिमं तृचं विधत्ते— "अयं ह येन वा इद मिति (सं० ८.६५.) पर्यासः; स्वर्मरुत्वता जित मित्यन्तो वै जित मन्तः षष्ठ महः, षष्ठे ऽहनि षष्ठस्याह्नो रूपम्"-इति। "स्वर्मरुत्वता जितम्"-इति द्वितीयः पादः, तत्र भूतार्थवाचि-क्त-प्रत्ययान्तो जयतिधातोरेकं लिङ्गम्; किञ्च जयस्य युद्धावसानत्वाज्जित मिति शब्दोऽन्तप्रतिपादकः, तदेतदन्तवत्त्व मपरं लिङ्गम् ॥

अत्रावस्थितच्छन्दःप्रशंसाद्वारा निविद्धानं विधत्ते— "ता उ गायत्र्यो, गायत्र्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति, तद्वैतच्छन्दो वहति, यस्मिन्निविद्धीयते; तस्माद् गायत्रीषु निविदं दधाति"-इति। पूर्ववद् व्याख्येयम् ॥

---

* अस्ति दाशतय्यां तृतीयस्य चतुर्थे चर्षणीधृत मिति द्वादशर्चं त्रयोदशं सूक्तम्; तदीयतृतीयतृचस्यैवात्र ग्रहण मिष्टम्। तदेतत् "षष्ठे ऽहनि षष्ठस्य"-इति खण्डे (८.१.) आश्वलायनेन स्पष्टीकृतम्,—"इन्द्र मरुत्व इति तिस्र इति मरुत्वतीयम्"-इति।

रैवतसामसाध्यपृष्ठस्तोत्रस्याधारभूतं स्तोत्रियं तृच मनुरूपञ्च तृचं विधत्ते—“रेवतीर्नः सधमादे रेवाँ इन्द्रेवत स्तोतेति रैवतं पृष्ठं भवति, बार्हते ऽहनि षष्ठे ऽहनि षष्ठस्याह्नो रूपम्”–इति। “रेवतीर्नः सधमादे”–इति (सं० १.३०.१३–१५.) स्तोत्रियस्तृचः, “रेवान्”–इत्यनुरूपः (सं० ८.२.१३–१५.), रैवतं साम बृहत्साम्न उत्पन्नम् *, अहश्च युग्मत्वाद्बार्हतम् †, सोऽयं बृहत्सम्बन्धो भवति लिङ्गम् ॥

अच्युतत्वलिङ्गोपेता मृचं विधत्ते— “यद्वावानेति (सं० १०.७४.६.) धाय्याच्युता”–इति ॥

तां धाय्या मनु बृहत्साम्नो योनिभूतं प्रगाथं विधत्ते— “त्वामिद्धि हवामह इति (सं० ६.४६.१,२.) बृहतो योनिमनु निवर्त्तयति; बार्हतं ह्येतदहरायतनेन”–इति। अह्नो बार्हतत्वं पूर्वमेवोक्तम्, तदेवात्र बृहत्सामसम्बन्धरूपं लिङ्गम् ॥

रैवतसामसम्बन्धिनं सामप्रगाथं विधत्ते— “इन्द्र मिद्देवतातय इति (सं० ८.३.५,६.) सामप्रगाथो निनृत्तवान्, षष्ठेऽहनि षष्ठस्याह्नो रूपम्”–इति। अस्य प्रगाथस्य सर्वेष्वपि पादेषु ‘इन्द्र’-शब्दावृत्तेस्तालध्वनिसदृशत्वान्निनृत्तवल्लिङ्गम् ॥

अच्युतत्वलिङ्गकं सूक्तविशेषं विधत्ते—“त्य मू षु वाजिनं देवजूत मिति (सं० १०.१०८.) तार्क्ष्यो ऽच्युतः”–इति ॥ ७ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां द्वितीयाध्याये
(द्वाविंशाध्याये) सप्तमः खण्डः ॥ ७ (१२) ॥

---

* २भा० ३९५ पृ० १० पं० द्रष्टव्यम्। † २ भा० ३९७ पृ० टिप्पणी द्रष्टव्या।

॥ अथ अष्टमः खण्डः ॥

ऐन्द्र याह्युप नः परावत इति सूक्तं । पारुच्छेप मतिच्छन्दाः सप्तपदं षष्ठे ऽहनि षष्ठस्याह्नो रूपं । प्र घा न्वस्य महतो महानीति सूक्तं । समानोदर्कं षष्ठे ऽहनि षष्ठस्याह्नो रूप । मभूरेको रयिपते रयीणा मिति सूक्तं । रथ मातिष्ठ तुविनृम्ण भीम मित्यन्तो वै स्थित मन्तः । षष्ठ महः । षष्ठे ऽहनि षष्ठस्याह्नो रूपं । तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन । सवनं दाधारायतनादेवैतेन न प्रच्यवत । उप नो हरिभिः सुत मिति पर्यासः । समानोदर्कः षष्ठे ऽहनि षष्ठस्याह्नो रूपं । ता उ गायत्र्यो गायत्र्यो वा । एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति । तद्वैतच्छन्दो वहति । यस्मिन्निविद्धीयते । तस्माद् गायत्रीषु न्निविदं दधात्यभि त्यं देवं सवितार मोण्योरिति । वैश्वदेवस्य प्रतिपदतिच्छन्दाः षष्ठे ऽहनि षष्ठस्याह्नो रूपं । तत्सवितुर्वरेण्यं । दोषो आगादित्यनुचरो । ऽन्तो वै गत मन्तः । षष्ठ महः । षष्ठेऽहनि षष्ठस्याह्नो रूप । मुदु ष्य देवः सविता सवायेति सावित्रं । शश्वत्तमं तदपा वह्निरस्थादित्यन्तो वै स्थित मन्तः । षष्ठ महः । षष्ठे ऽहनि षष्ठस्याह्नो रूपं । कतरा पूर्वा कतरापरायोरिति द्यावापृथिवीयं । समानोदर्कं षष्ठे ऽहनि । षष्ठ-

स्याह्नो रूप॑ किमु श्रेष्ठः किं यविष्ठो न आ जगन्नु॑प नो वाजा अध्वर मृभुक्षा इत्यार्भवं॑ नाराशंसं त्रिवत् षष्ठे ऽहनि॑ षष्ठस्याह्नो रूप॑मिद मित्या रौद्रं गूर्तवचा॑ ये यज्ञेन दक्षिणाया समक्ता इति वैश्वदेव॑म् ॥ ८ (१३) ॥

पारुच्छेपत्वादिलिङ्गत्रयोपेतं सूक्तं विधत्ते—"एन्द्र याह्युप नः परावत इति (सं० १.१३०.) सूक्तं, पारुच्छेप मतिच्छन्दाः सप्तपदं षष्ठे ऽहनि षष्ठस्याह्नो रूपम्"—इति ॥

तुल्यसमाप्तिकत्वलिङ्गोपेतं सूक्तं विधत्ते—"प्र घा न्वस्य महतो महानीति (सं० २.१५.) सूक्तं, समानोदर्कं षष्ठेऽहनि षष्ठस्याह्नो रूपम्"—इति। "सोमस्य ता मद इन्द्रश्चकार"—इत्यस्य चतुर्थपादस्य बहुषु ऋक्षु * विद्यमानत्वात्समानोदर्कत्वम् ॥

तिष्ठतिधातुरूपलिङ्गयुक्तं सूक्तं विधत्ते— "अभूरेको रयिपते रयीणा मिति (सं० ६.३१.) सूक्तं, रथ मा तिष्ठ तुविनृम्ण भीम मित्यन्तो वै स्थित मन्तः षष्ठ महः षष्ठे ऽहनि षष्ठस्याह्नो रूपम्"—इति। "अभूरेकः"—इत्यस्य सूक्तस्य पञ्चम्या मृचि "रथ मा तिष्ठ"—इति द्वितीयः पादः ; तत्र स्थितशब्दार्थवाची तिष्ठतिधातुर्विद्यते, स च गतिनिवृत्तिरूपत्वादन्तो भवति ; षष्ठस्याह्नोऽन्तत्वं पूर्व मुक्तम् ; अतोऽन्तवत्त्वं लिङ्गम् ॥

तत्रत्यं छन्दः प्रशंसति—"तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते"—इति। पूर्ववद् व्याख्येयम् ॥

---

* प्र घा न्वस्येति दशर्चं सूक्तम् ; तत्र द्वितीयाद्यष्टसु सर्वत्रैवास्त्येष पादः।

निष्केवल्यस्य शस्त्रस्यान्तिमं तृचं विधत्ते—"उप नो हरिभिः सुत मिति पर्यासः, समानोदर्कः, षष्ठे ऽहनि षष्ठस्याह्नो रूपम्"–इति। तिसृष्वप्यृक्षु "उप नो हरिभिः"–इति पादस्यैकत्वात् समानोदर्कत्वम् ॥

तत्र निविद्धानं विधत्ते—"ता उ गायत्र्यो, गायत्र्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति; तद्वैतच्छन्दो वहति, यस्मिन्निविद्धीयते; तस्माद्गायत्रीषु निविदं दधाति"–इति। पूर्ववद्व्याख्येयम् ॥

शस्त्रान्तरस्य प्रतिपदेका मृचं विधत्ते—"अभि त्यं देवं सवितार मोण्योरिति[*] वैश्वदेवस्य प्रतिपदतिच्छन्दाः, षष्ठे ऽहनि षष्ठस्याह्नो रूपम्"–इति। अतिच्छन्दस्त्व मत्र लिङ्गम् ॥

प्रतिपच्छेष मृग्द्वय मनुचरतृचं च विधत्ते—"तत्सवितुर्वरेण्यं; दोषो आगादित्यनुचरोऽन्तो वै गत मन्तः षष्ठ महः षष्ठे ऽहनि षष्ठस्याह्नो रूपम्"–इति। "तत्सवितुः"–इति (सं० ३.६२.१०, ११.) द्वे ऋचौ, प्रतिपच्छेषभूतौ; "दोषो आगात्"–इत्येष सूक्ते पठितः[†] तृचो ऽनुचरः। अत्र भूतार्थवाची 'गमि'धातुर्योऽस्ति, तस्यार्थः आगादितिशब्देनोच्यते। भूतार्थवाचित्वाद्गतं गमनसमाप्तिरन्तो भवति। तदेतदन्तवत्त्वं लिङ्गम्। यस्मादत्र सूत्रकारोऽभित्य मित्येका मृचं तत्सवितुरिति द्वे ऋचौ मिलित्वा प्रतिपत्तृचत्वेनोक्त्वा दोषो आगादित्यादिकस्तृचो ऽनुचर इत्युक्तवान्[‡], तस्मादस्माभिस्तत्सवितुरिति वाक्यं पूर्वशेषत्वेन विच्छेदनीयम् ॥

---

[*] सा० छ० आ० ५.२.३.८; यजु० वा० सं० ४.२५; अथ० सं० ११.४.२।

[†] आश्व० श्रौ० ८.१.१८ (सा० छ० आ० २.२.४.३.)।

[‡] "अभि त्यं देवं सवितार मोण्यो रित्येका, तत् सवितुर्वरेण्य मिति द्वे; दोषो

सवितृदेवताकं सूक्तं विधत्ते— "उदु ष्य देवः सविता सवायेति (सं० २.३८.) सावित्रं, शश्वत्तमं, तदपा वह्निरस्थादित्यन्तो वै स्थित मन्तः षष्ठ महः षष्ठे ऽहनि षष्ठस्याह्नो रूपम्"–इति। शश्वत्तम मित्यादि द्वितीयः पादः; तस्मिन्नस्थादिति भूतार्थवाचिप्रत्ययान्तस्तिष्ठतिधातुः श्रुतः, तच्च स्थितत्वं गमनस्यान्तः। तदिद मन्तवत्त्वं लिङ्गम् ॥

तुल्यसमाप्तिकलिङ्गकं सूक्तं विधत्ते— "कतरा पूर्वा कतरा परायोरिति (सं०१.१८५.) द्यावापृथिवीयं, समानोदर्कं, षष्ठे ऽहनि षष्ठस्याह्नो रूपम्"–इति। द्वितीयस्या ऋचः चतुर्थे पादे "द्यावा रक्षतं पृथिवी"–इत्युक्तत्वादिदं सूक्तं द्यावापृथिवीयम्; तत्र 'द्यावा रक्षतम्'–इतिपादस्य बहुषु ऋक्षु विद्यमानत्वात्समानोदर्कत्वम् ॥

ऋभुदेवताकं सूक्तद्वयं विधत्ते—"किमु श्रेष्ठः किं यविष्ठो न आजगन्नुप नो वाजा अध्वर मृभुक्षा इत्यार्भवं, नाराशंसं त्रिवत्, षष्ठे ऽहनि षष्ठस्याह्नो रूपम्"–इति। "किमु श्रेष्ठः"–इत्यस्मिन् (सं० १.१६१.) सूक्ते त्रयोदश ऋचः शंसनीयाः; तत्र चतुर्थ्या ऋचः प्रथमपादे "चकृवांस ऋभवः"–इतिश्रुतत्वादिद मार्भवम्। "उप नः"–इति (सं० ४.३७.) सूक्ते चतस्रः; तत्र प्रथमपादे "ऋभुक्षाः"–इतिश्रुतत्वादपि आर्भवम्। ऋभवो हि नरा मनुष्याः; अत एव मनुष्यानन्तः प्रवेशयितु मसहमाना अग्निवस्वादयः सोमपानवेलाया ऋभून् निःसारितवन्तः। एतच्च "आर्भवं

आगाद् वृहद् गाय द्युमद्वेद्याथर्वण। स्तुहि देवं सवितारम् ॥ त मु ष्टुह्यन्तः सिन्धुं सूनुं सत्यस्य युवानम्। अद्रोघवाचं सुशेवम् ॥ स घा नो देवः सविता साविषद् वसुपतिः। उभे सुष्टुती सुधातुरिति वैश्वदेवस्य प्रतिपदनुचरौ"–इति आश्व० श्रौ० ८.१.१८ ।

शंसत्यृभवो वै देवेषु"–इत्याद्युपाख्यानेन* तुल्य मवगम्यते। ते च नराः ऋभवः 'शस्यन्ते' कथ्यन्ते अस्मिन् सूक्ते, तं नाराशंसम्, तदेकं लिङ्गम्; तथैव "उप नो वाजाः"–इतिसूक्तस्य तृतीयाया मृचि "त्रुरदायम्"–इति त्रिशब्दः श्रुतः; तदेतत्त्रित्वं द्वितीयं लिङ्गम् ॥

अथ बहुदेवताकं सूक्तद्वयं विधत्ते— "इद मित्था रौद्रं गूर्तवचा, ये यज्ञेन दक्षिणया समक्ता इति वैश्वदेवम्"–इति। "इद मित्था"–इत्येकं सूक्तम् (सं० १०.६१.), "ये यज्ञेन"–इत्यपरम् (सं० १०.६२.) ॥ ८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां द्वितीयाध्याये
(द्वाविंशाध्याये) अष्टमः खण्डः ॥ ८ (१३) ॥

॥ अथ नवमः खण्डः ॥

नाभानेदिष्ठं॑ शंसति॑ नाभानेदिष्ठं वै मानवं ब्रह्मचर्यं वसन्तं॑ भ्रातरो निरभजन्त्सो॑ऽब्रवीदेत्य॑ किं मह्य मभाक्तेत्येत मेवं॑ निष्ठाव मववदितार मित्यब्रुवं॑स्तस्माद्धाप्येतर्हि॑ पितरं पुत्रा निष्ठावो ऽववदितेत्येवाचक्षते॑ स पितर मेत्याब्रवीत्॑ त्वां ह वाव मह्यं तताभाक्षुरिति॑ तं पिताब्रवीन्मा॑ पुत्रक तदादृथा॑ अङ्गिरसो

---

* २भा० १२५पृ० ६ख० द्रष्टव्यः।

वा इमे॑ स्वर्गाय लोकाय सत्र मासत॑ ते षष्ठं षष्ठ मेवाहरागत्य मुह्यन्ति॑ तानेते सूक्ते षष्ठे ऽहनि शंसय॑ तेषां यत्सहस्रं सत्रपरिवेषणं॑ तत्ते स्वर्यन्तो दास्यन्तीति तथेति॑ तानुपैत्प्रतिगृभ्णीत मानवं सुमेधस इति॑ त मब्रुवन्॑ किङ्कामो वदसी॑तीद मेव वः षष्ठ मह॑ः प्रज्ञापयानीत्यब्रवीद॑थ यद्वा एतत्सहस्रं सत्रपरिवेषणं॑ तन्मे स्वर्यन्तो ऽदत्तेति तथेति॑ तानेते सूक्ते षष्ठे ऽहन्यशंसयत्॑ ततो वै ते प्र यज्ञ मजानन्॑ प्र स्वर्गं लोकं॑ तद्यदेते सूक्ते॑ षष्ठे ऽहनि शंसति॑ यज्ञस्य प्रज्ञात्यै॑ स्वर्गस्य लोकस्यानुख्यात्यै॑ तं स्वर्यन्तो ऽब्रुवन्नेतत्ते ब्राह्मण सहस्र मिति॑ तदेनं समा कुर्वाणं॑ पुरुषः कृष्णशवास्युत्तरत॑ उपोत्थायाब्रवीन्मम वा इद मम वै वास्तुह मिति॑ सो ऽब्रवीन्मह्यं वा॑ इद मदुरिति॑ त मब्रवीत्तद्वै नौ तवैव पितरि प्रश्न इति॑ स पितर मैत्॑ तं पिताब्रवीन्ननु ते पुत्रकादू३रित्यदुरेव म इत्यब्रवीत्तत्तु मे पुरुषः कृष्णशवास्युत्तरत॑ उपोदतिष्ठन्मम वा इदं मम वै वास्तुह मित्यादितेति तं पिता ब्रवीत्तस्यैव पुत्रक तत्तत्तु स तुभ्यं दास्यतीति॑* स पुनरेत्याब्रवीत्तव ह वाव किल भगव

---

* "तत्तुभ्यं स दास्यतीति" क; "तत्तु स तुभ्यं दास्यतीति" ग, घ, ञ।

इद मिति मे पिताहेति सोऽब्रवीत्तदहं तुभ्य मेव ददामि य एव सत्य मवादीरिति तस्मादेवं विदुषा सत्य मेव वदितव्यं स एष सहस्रसनिर्मन्त्रो ऽयं नाभानेदिष्ठ उपैनं सहस्रं नमति प्र षष्ठेनाह्ना स्वर्गं लोकं जानाति य एवं वेद ॥ ९ (१४) ॥

पूर्वोक्ते सूक्तद्वये लिङ्गं दर्शयति— “नाभानेदिष्ठं शंसति” –इति। नाभानेदिष्ठाख्यः कश्चिन्महर्षिः, तेन दृष्टम्, पूर्वोक्तं (७१ पृ० ६ पं०) सूक्तद्वयं ‘नाभानेदिष्ठं’ तच्छंसेत्। अतो महर्षिसम्बन्ध एवात्र लिङ्गम् ॥

तदेतत्सूक्तद्वयं प्रशंसितु मुपाख्यान माह— “नाभानेदिष्ठं वै मानवं ब्रह्मचर्यं वसन्तं भ्रातरो निरभजन्त्सोऽब्रवीदेत्य किं मह्यमभाक्तेत्येत मेव निष्ठाव मववदितार मित्यब्रुवंस्तस्माद्धाप्येतर्हि पितरं पुत्रा निष्ठावो ऽववदितेत्येवाचक्षते”–इति। मनोः पुत्रो नाभानेदिष्ठो नाम वालको गुरुगृहे ‘ब्रह्मचर्य्यं वसति’ उपनीतः सन् वेद मध्येतुं तत्र तिष्ठति ; तदानीं तस्य ज्येष्ठभ्रातरो मनोः पितुर्धनं स्वार्थं विभजन्तः तं वालकं ‘निरभजन्’ भागरहित मकुर्वन्। वालोऽयं ब्रह्मचारी वेद मेवाभ्यस्यतु किं तस्य धनेनेति मत्वा भागं न दत्तवन्तः। तदानीं ‘सः’ नाभानेदिष्ठः ‘एत्य’ वेदाभ्यासं कृत्वा समागत्य भ्रातॄनिद मब्रवीत्,— हे भ्रातरः! मह्यं ‘किम् अभाक्त’ किं नाम वस्तु भागत्वेन यूयं पृथक्त्वेन कृतवन्त इति। ते च भ्रातरः ‘एत मेव’ मनुं पितरं हस्तेन प्रदर्श्य हे नाभानेदिष्ठ! वयं न जानीमस्त मेव पृच्छेत्यब्रुवन्। कीदृशं मनुम्? ‘निष्ठावं’

धनविभागादेर्धर्मरहस्यं निःशेषेण स्थितिर्निर्णयो निष्ठा, सा यस्मिन्नस्ति स निष्ठावः ; तादृशं धर्मरहस्यस्य निर्णेतार मित्यर्थः । 'अववदितारं' ज्येष्ठपुत्रस्यैतावत् द्वितीयस्यैतावदन्यस्यैतावत् इत्यवच्छिद्य वदितुं समर्थोऽववदिता तादृशम् । अय मर्थः— अयं मनुः धर्मशास्त्रकर्त्तृत्वाद्धर्मरहस्यनिर्णयवान् पितृत्वेन तवैतावदित्यवच्छिद्य वक्तुं समर्थश्च, तस्मान्मदीयो भागः क इति मनु मेव पृच्छेत्यब्रुवन् । यस्मादस्य भ्रातर एव मुक्तवन्तः, तस्मादिदानी मपि पितरं पुत्रा इत्यनेन प्रकारेण आचक्षते । केन प्रकारेणेति, सोऽभिधीयते— अयं पिता 'निष्ठावः' निर्णयवान्, अस्यैतावदित्यवच्छिद्य वदिता चेति ॥

तत ऊर्ध्वं नाभानेदिष्ठस्य कृत्यं दर्शयति— "स पितर मेत्याब्रवीत्,— त्वां ह वाव मह्यं तताभाक्षुरिति ; तं पिताब्रवीन्मा पुत्रक तदादृथाः,— अङ्गिरसो वा इमे स्वर्गाय लोकाय सत्र मासते, ते षष्ठं षष्ठ मेवाहरागत्य मुह्यन्ति, तानेते सूक्ते षष्ठेऽहनि शंसय ; तेषां यत्सहस्रं सत्रपरिवेषणं, तत्ते स्वर्यन्तो दास्यन्तीति ; तथेति"—इति । 'सः' नाभानेदिष्ठः भ्रातृभिस्तथोक्तः सन् पितरं प्रत्यागत्येद मब्रवीत्,— हे पितर्मह्यं 'त्वां ह वाव' त्वा मेव भ्रातरः सर्वेऽपि 'अभाक्षुः' भाग मकार्षुः, अतो मदीयो भागस्त्वय्यस्ति, तं मे देहीत्यभिप्रायः । ततः 'तं' नाभानेदिष्ठं 'पिता' मनुरेव मब्रवीत्,— हे 'पुत्रक' बालक ! भ्रातृणां वचनं 'मा आदृथाः' तस्मिन्वचने आदरं माकार्षीः । नास्त्येव मद्धस्ते त्वदीयो भागः, सर्वं मपि धनं त्वद्भ्रातृभिर्गृहीतम् । तव तु धनप्राप्त्यर्थं मेक मुपायं कथयिष्यामि,— अङ्गिरोनामका महर्षयः 'इमे' समीपदेशवर्त्तिनः स्वर्गार्थं सत्र मनुतिष्ठन्ति, ते पुनः पुनः सत्र मुप-

क्रम्य, तदा तदा प्राप्तं तत्तत् षष्ठ मेवाहरागत्य तत्र तत्र मन्त्रबाहुल्ये 'मुह्यन्ति' भ्रान्ताः सन्तः सत्रसमाप्ति मप्राप्य सर्वदा क्लिश्यन्ति; 'तान्' महर्षीन् षष्ठेऽहनि त्वं गत्वा 'इद मित्था'-इति, “येन यज्ञ”-इति चैते उभे सूक्ते शंसय ; ततः “तेषाम्” ऋषीणां 'यत्' सहस्रसङ्ख्याकं धनं 'सत्रपरिवेषणं' सत्रार्थं परितः सम्पादित मस्ति, तत्सर्वं मनुष्ठाना दूर्ध्वं मवशिष्टं धनं 'ते' तुभ्य मङ्गिरसो महर्षयः स्वर्गं प्राप्नुवन्तो दास्यन्ति इति । 'तथा' अस्त्विति तत् पितृवचनं नाभानेदिष्ठोऽङ्गीचकार ॥

अङ्गीकारादूर्ध्वं किं कृतवानित्याशङ्क्य तद्वृत्तान्तं दर्शयति— “तानुपैत्प्रतिगृभ्णीत मानवं सुमेधस इति; त मब्रुवन्, किङ्कामो वदसीतीद मेव वः षष्ठ महः प्रज्ञापयानीत्यब्रवीदथ यद्वा एतत्सहस्रं सत्रपरिवेषणं, तन्मे स्वर्यन्तो दत्तेति; तथेति; तानेते सूक्ते षष्ठे ऽहन्यशंसयत्,— ततो वै ते प्र यज्ञ मजानन् प्र स्वर्गं लोकम्” -इति। 'तान्' अङ्गिरसो महर्षीन् 'उपैत्' नाभानेदिष्ठसमीपं प्राप्तवान्, प्राप्य च “प्रतिगृभ्णीत”-इत्यादिमन्त्रपादेनैव महर्षीणा मग्रे किञ्चिद्वचन मुक्तवान्। तस्य पादस्याय मर्थः— हे 'सुमेधसः' शोभनमेधायुक्ता अङ्गिरसः ! 'मानवं' मनोः पुत्रं नाभानेदिष्ठाख्यं मां 'प्रतिगृभ्णीत' यूयं स्वीकुरुतेति। तथा वदन्तं नाभानेदिष्ठं प्रति मुनय इद मब्रुवन्,— हे नाभानेदिष्ठ ! 'किङ्कामः' कीदृगपेक्षया युक्तः सन्नस्मान् प्रत्येवं वदसि ? इति। ततः स नाभानेदिष्ठो ऽब्रवीत्— हे महर्षयः ! 'वः' युष्माक मिद मेव षष्ठ महः 'प्रज्ञापयानि' प्रकर्षेण बोधयामीति; 'अथ' बोधनानन्तरं 'सत्रपरिवेषणं' भवद्भिः सत्रार्थं सम्पादित मनुष्ठाना दूर्ध्वं मवशिष्टं यदेतत्सहस्रसङ्ख्याकं धन मस्ति, तत् सर्वं यूयं 'मे' मह्यं

स्वर्गं प्रति गच्छन्तो दत्तेति। 'तथेति' मुनिभिरङ्गीकृते सति 'तान्' मुनीन्, 'एते' उभे सूक्ते षष्ठे ऽहन्यशंसयत्; तत एव 'ते' मुनयो यज्ञं प्रकर्षेण 'अजानन्' ज्ञातवन्तः; तदनुष्ठानेन स्वर्गं लोक मपि प्राजानन्॥

सूक्तद्वयं प्रशस्य तद्विधिं निगमयति— "तद्यदेते सूक्ते (सं० १०.६१,६२.) षष्ठे ऽहनि शंसति, यज्ञस्य प्रज्ञात्यै, स्वर्गस्य लोकस्यानुख्यात्यै"–इति। यस्मात्सूक्तद्वयशंसनेनाङ्गिरोभिर्यज्ञः स्वर्गश्च प्रज्ञातः, तस्माद्धोता तदुभयं शंसेत्, तच्च यज्ञस्वर्गयोरवगमाय भवति॥

पुनरपि सूक्तयोर्महिमानं दर्शयितु मुपाख्यान मेवाह— "तं स्वर्यन्तो ऽब्रुवन्नेतत्ते ब्राह्मणसहस्र मिति, तदेनं समाकुर्वाणं पुरुषः कृष्णशवास्युत्तरत उपोत्थायाब्रवीन्मम वा इदं मम वै वास्तुह मिति; सो ऽब्रवीन्मह्यं वा इद मदुरिति; त मब्रवीत्तद्वै नौ तवैव पितरि प्रश्न इति; स पितर मैत्तं पिताब्रवीन्ननु ते पुत्रकादू३रित्यदुरेव म इत्यब्रवीत्तत्तु मे पुरुषः कृष्णशवास्युत्तरत उपोदतिष्ठन्मम वा इदं मम वै वास्तुह मित्यादितेति; तं पिताब्रवीत्तस्यैव पुत्रक तत्तत्, स तुभ्यं दास्यतीति; स पुनरेत्याब्रवीत्तव ह वाव किल भगव इद मिति मे पिताहेति; सो ऽब्रवीत्तदहं तुभ्य मेव ददामि य एव सत्य मवादीरिति"–इति। 'तं' नाभानेदिष्ठं 'स्वर्यन्तः' स्वर्गं प्राप्नुवन्तोऽङ्गिरसोऽब्रुवन्,—हे 'ब्राह्मण' नाभानेदिष्ठ! 'एतद्' गोसहस्रं यज्ञभूमावशिष्टं 'ते' तुभ्यं दत्त मिति शेषः। अत्र शाखान्तरानुसारेण गोसहस्र मित्यर्थो लभ्यते। शाखान्तरे चैव माम्नायते—"ते सुवर्गं लोकं यन्तो य एषां पशव आसन् तानस्मा अददुः"–इति (तै० सं० ३.१.९.५.)। 'तद्' गोसहस्रं 'समा-

कुर्वाणं’ सम्यगात्मसात्कुर्वन्तम् ‘एनं’ नाभानेदिष्ठं कश्चित्पुरुषो यज्ञभूमेरुत्तरतः ‘उपोत्थाय’ समीप एवोत्थितो भूत्वेद मब्रवीत्,— कीदृशः पुरुषः ? ‘कृष्णशवासी’ अतिशयेन कृष्णं मलिनं वस्त्रं ‘कृष्णशं’ तद्वस्ते आच्छादयतीति कृष्णशवासी *। अत्रायं मलिनवस्त्रः पुरुषः पशुस्वामी रुद्र इत्यवगन्तव्यम्। तथाच शाखान्तरे पठ्यते— “तं पशुभिश्चरन्तं यज्ञवास्तौ रुद्र आगच्छत्”-इति (तै० सं० ३.१.९.५.)। स रुद्रः किमब्रवीदिति, तदभिधीयते— हे नाभानेदिष्ठ ! ‘इदं’ पशुसहस्रं ममैव। स्वत्वेय मुपपत्तिः। ‘वास्तुहं’ वास्तौ यज्ञभूमौ हीनं कर्मान्ते परित्यक्तं वास्तुहम्, तादृशं सर्वं ममैव स्व मिति सर्वत्र सम्प्रतिपन्नम्। इत्येवं पुरुषेणोक्तः स नाभानेदिष्ठः पुनरेन मब्रवीत्,— हे रुद्र ! मह्य मेवेदं सहस्र मङ्गिरसो दत्तवन्त इति। तं तथा वदन्तं नाभानेदिष्ठं पुनः पुरुषो ऽब्रवीत्,— हे नाभानेदिष्ठ ! ‘तद्वै’ तस्मिन्नेव त्वदीयं मदीय मिति सन्देहे सति ‘नौ’ आवयो रुभयोरपि ‘तवैव पितरि’ मनौ निर्णयार्थं प्रश्नोऽस्त्विति। ततः ‘सः’ नाभानेदिष्ठः पितरं प्रष्टुम् ‘एत्’ आगतवान्। स पिता तेन पृष्टस्त मब्रवीत्,— हे ‘पुत्रक’ बालक ! तुभ्य मङ्गिरसो महर्षयः ‘अदुः’ ननु दत्तवन्तः किम् ? प्लुतिः प्रश्नार्था। एवं पित्रा पृष्टः स नाभानेदिष्ठो ‘मे’ मह्यम् ‘अदुरेव’ दत्तवन्त एवेत्यब्रवीत्। तर्हि कस्तव विचारः ? इत्याशङ्किते स नाभानेदिष्ठ एव मुवाच,— ते महर्षयो दत्तवन्त एव किन्तु तद्गोसहस्रं कश्चित् पुरुषो मलिनवस्त्रः सन् यज्ञभूमेरुत्तरत उत्थाय, ‘इदं’ गोसहस्रं ममैव स्वं, यज्ञवास्तौ हीनत्वादि-

---

* अस्मन्मते तु ‘कृष्णशवासी’-इत्यस्य व्याख्यानं कृष्णवर्णः शवखादकश्च कृष्णशवाशी कश्चिदनार्यः, ‘रुद्रः’ भयानकाकृतिः स्यात्। सशयोरैकत्वं छान्दसम्।

त्यभिधाय 'आदिता' आदानं कृतवान्, अपहृतवानित्यर्थः। तथा ब्रुवन्तं पुत्रं प्रति पिता अब्रवीत्,— हे 'पुत्रक' शिशो! 'तद्' यज्ञवास्तौ हीनं गोसहस्रं तस्यैव रुद्रस्य स्वम्, पशुपतित्वात् यज्ञावशिष्टस्वामित्वाच्च; किन्तु तथा सत्यपि तव हानिर्नास्ति, 'सः' रुद्रः 'तद्' गोसहस्रं तुभ्यं दास्यतीति। यज्ञकाले तत्सर्व मङ्गिरसां धनं भवति, समाप्ते तु यज्ञे यदवशिष्टं तस्य तु रुद्र एव स्वामीति नाङ्गिरसां दातु मधिकारोऽस्तीत्यभिप्रायः। तथा रुद्रवचनं शाखान्तरे एव माम्नायते— "न वै तस्य त ईशत इत्यब्रवीद्यज्ञवास्तौ हीयते मम वै तदिति"–इति (तै॰ सं० ३. १.९.६.)। ततो दास्यतीति वचनं श्रुत्वा 'सः' नाभानेदिष्ठः पुनरपि रुद्रस्य समीप मेत्येद मब्रवीत्,— हे 'भगवन्' पूज्य! रुद्र! 'तव ह वाव किल' तवैव सर्वम् 'इदं' स्व मिति मदीयः पिता प्राहेति। ततः 'सः' रुद्रो ऽब्रवीत्— हे नाभानेदिष्ट! 'तत्' सर्वं तुभ्य मेव ददामि, यस्त्वं सत्य मेवावदीः, न त्वनृत मुक्तवानसि; तस्मात्परितोषात् सत्यवादिने तुभ्य मेव ददामि इति ❋॥

इत्य मुपाख्यानं परिसमाप्य प्रसङ्गात् पुरुषार्थत्वेन सत्यवदनं विधत्ते—"तस्मादेवं विदुषा सत्य मेव वदितव्यम्"–इति। 'एवं विदुषा' सत्यस्य श्रेयोहेतुत्वं जानता॥

उपाख्यानस्य सर्वस्य तात्पर्यं दर्शयति—"स एष सहस्रसनिर्मन्त्रो ऽयन्नाभानेदिष्ठः"–इति। नाभानेदिष्ठेन महर्षिणा दृष्टो यो मन्त्रसमूहः, स एषः 'सहस्रसनिः' सहस्रसङ्ख्याकस्य वस्तुनः सनिर्लाभो यस्मिन्मन्त्रे सोऽयं सहस्रसनिः॥

❋ सं० १०. ६१. ६२. सूक्तयोः सोपक्रमं सायणीयं भाष्यं सर्वं मिहालोच्यम्। शाङ्खा० ब्रा० २८. ४। ता० ब्रा० २०. ९. २।

वेदनं प्रशंसति—"उपैनं सहस्रं नमति प्र षष्ठेनाह्ना स्वर्गं लोकं जानाति य एवं वेद"—इति। 'एनं' वेदितारं सहस्रसङ्ख्याकं धनम् 'उपनमति' प्राप्नोति, स च कालान्तरे षष्ठ महरनुष्ठाय तेन स्वर्गं प्रजानाति ॥ ९ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां द्वितीयाध्याये
(द्वाविंशाध्याये) नवमः खण्डः ॥ ९ (१४) ॥

॥ अथ दशमः खण्डः ॥

तान्येतानि सहचराणीत्याचक्षते॑ नाभानेदिष्ठं वालखिल्या॑ वृषाकपि मेवयामरुतं॑ * तानि सहैव शंसेद्॑ यदेषा मन्तरियात्त॑द्यजमानस्यान्तरियाद्य॑दि नाभानेदिष्ठं रेतो ऽस्यान्तरियाद्य॑दि वालखिल्याः प्राणानस्यान्तरियाद्य॑दि वृषाकपि मात्मान मस्यान्तरियाद्य॑द्येवयामरुतं † प्रतिष्ठाया एनं च्यावयेद्॑ दैव्यै च मानुष्यै च॑ नाभानेदिष्ठेनैव रेतो ऽसिञ्चत्त॑द्वालखिल्याभिर्व्यकरो॑त् सुकीर्त्तिना काक्षीवतेन॑ योनिं व्यहापय॑दुरौ यथा तव शर्मन् मदेमेति॑ तस्मा-

---

* "०मारुतं" क, ङ; अशुद्धः। † "०मारुतं" ङ; अशुद्धः।

ज्यायान्त्सन् गर्भः कनीयांसं सन्तं योनिं न हिनस्ति ब्रह्मणा हि स कॢप्त एवयामरुतैतवै करोति तेनेदं सर्व मेतवै कृत मेति यदिदं किञ्चाहश्च कृष्ण महरर्जुनं चेत्याग्निमारुतस्य प्रतिपदहश्चाहश्चेति पुनरावृत्तं पुनर्निनृत्तं षष्ठे ऽहनि षष्ठस्याह्नो रूपं मध्वो वो नाम मारुतं यजत्रा इति मारुतं बह्वभिव्याहृत्य सन्तो वै बह्वन्तः षष्ठ महः षष्ठे ऽहनि षष्ठस्याह्नो रूपं जातवेदसे सुनवाम सोम मिति जातवेदस्याच्युता स प्रत्नथा सहसा जायमान इति जातवेदस्यं समानोदर्कं षष्ठे ऽहनि षष्ठस्याह्नो रूपं धारयन् धारयन्निति शंसति प्रस्रंसाद्वा अन्तस्य बिभाय तद्यथा पुनराग्रन्थं पुनर्निग्रन्थं मन्तं बध्नीयान्मयूखं वान्ततो धारणाय निहन्यात्तादृक्तद्यद्धारयन् धारयन्निति शंसति सन्तत्यै सन्ततैस्तैरहैरव्यवच्छिन्नैर्यन्ति य एवं विद्वांसो यन्ति ॥ १०(१५)॥

इत्यैतरेयब्राह्मणे पञ्चमपञ्चिकायां द्वितीयोऽध्यायः॥२॥

अथ नाभानेदिष्ठीयेन सूक्तद्वयेन सह पठितव्यानि मन्त्रान्तराणि विधत्ते—“तान्येतानि सहचराणीत्याचक्षते,— नाभानेदिष्ठं वालखिल्या वृषाकपि मेवयामरुतं तानि सहैव शंसेद्”—इति । ‘तान्येतानि’ वक्ष्यमाणानि चतुर्विधमन्त्रजातानि ‘सहचराणि’

प्रयोगकाले सहैव वर्त्तन्ते इत्येवं याज्ञिका आचक्षते । तत्र 'नाभानेदिष्ठ' सूक्तद्वयं यदस्ति (सं० १०.६०,६१.), वालखिल्यैर्महर्षिभिर्दृष्टाः "अभि प्रवः सुराधसम्"–इत्याद्या वालखिल्यनामका मन्त्रा ये सन्ति (सं ८.४९–५९.), वृषाकपिनाममहर्षिणा दृष्टं "वि हि सोतोरसृक्षत"–इति (सं० १०.८६.) सूक्तं यदस्ति, एवयामरुन्नाम्ना महर्षिणा दृष्टं "प्र वो महे मतयो यन्तु विप्लवः"–इति सूक्तं (सं० ५.८६.) यदस्ति ; तानि चत्वारि सहैव शंसेत् ॥

सहशंसनाभावे बाधं दर्शयति— "यदेषा मन्तरियात्तद्यजमानस्यान्तरियात्"–इति । यदि कथञ्चित् 'एषां' चतुर्णां मध्ये एकमपि 'अन्तरियाद्' अन्तरितं लुप्तं कुर्य्यात्तदानीं यजमानस्य सम्बन्धि श्रेयः 'अन्तरियाद्' विनाशयेत् ॥

सामान्याकारेण बाध मुक्त्वा पुनर्विशेषाकारेण बाधं दर्शयति—"यदि नाभानेदिष्ठं, रेतोऽस्यान्तरियाद्; यदि वालखिल्याः, प्राणानस्यान्तरियाद् ; यदि वृषाकपि, मात्मान मस्यान्तरियाद् ; यद्येवयामरुतं, प्रतिष्ठाया एनं च्यावयेद्दैव्यै च मानुष्यै च"–इति । यद्ययं होता नाभानेदिष्ठमन्त्रान्विलोपयेत्, तदानी मस्य यजमानस्य पुत्राद्युत्पादकं रेतो विलोपयेत् । वालखिल्याना मन्तराये यजमानस्य प्राणविच्छेदः । वृषाकपिसूक्तस्यान्तराये यजमानस्य 'आत्मानं' मध्यदेहं विच्छिन्द्यात् । एवयामरुतस्यान्तराये यजमानं दैव्या मानुष्याश्च प्रतिष्ठायाः प्रच्यावयेत् । अविघ्नेन कर्मसमाप्तिर्दैवी प्रतिष्ठा ; तत्साधनभूतधनादिसम्पत्तिर्मानुषी प्रतिष्ठा ॥

अन्तराये बाध मुक्त्वा, तदनुष्ठाने लाभं दर्शयति— "नाभानेदिष्ठेनैव रेतो ऽसिञ्चत्तद्वालखिल्याभिर्व्यकरोत्, सुकीर्तिना काक्षीवतेन योनिं व्यह्वापयदुरौ यथा तव शर्मन्मदेमेति, तस्माज् ज्याया-

न्त्सन् गर्भः कनीयांसं सन्तं योनिं न हिनस्ति ; ब्रह्मणा हि स क्लृप्त एवयामरुतैतवै करोति, तेनेदं सर्व मेतवै कृत मेति यदिदं किञ्च"–इति। अत्र मन्त्रसमूहात् यजमानस्य नूतनं जन्म वर्ण्यते ; यद्वा पुत्रोत्पादनं वर्ण्यते। यन्नाभानेदिष्ठं सूक्तद्वय मस्ति, तेनैव होता रेतः सिक्तवान् भवति। यास्तु वालखिल्या ऋचस्ताभिस्तद्रेतो 'व्यकरोत्' विकृतं गर्भाकार मकरोत्। कक्षीवानित्यभिहितः कश्चिदृषिः, तस्य पुत्रः सुकीर्त्तिनामकः ; तेन दृष्टम् "अप प्राच इन्द्र"–इति (सं० १०.१३१.) सूक्त मपि तन्नामकम्। तच्च वृषाकपिसूक्तात् 'प्रागेव' समीपे शंसनीयम्। तेन सुकीर्त्तिना होता योनिं 'व्यहापयत्' गर्भनिर्गमाय विवृत्त मकरोत्। अत एव तस्या ऋचश्चतुर्थपादे "उरौ यथा"–इत्यादिराम्नायते। तस्याय मर्थः— हे इन्द्र! यथा जनः 'उरौ' विस्तीर्णे 'शर्मन्' शर्मणि सुखहेतौ गृहे विस्रम्भेण तिष्ठति, तथा तव प्रसादाद् वयं विस्तीर्णे योनिप्रदेशे 'मदेम' सङ्कोचाभावेन हृष्यास्म इति*। एष पादो योनिविवृतेर्गमकः। यस्मादनेन विवृत्तिः कृता, तस्माल्लोके जायमानो गर्भो 'ज्यायान् सन्' योनिद्वारापेक्षयात्यन्तं प्रौढः सन्नपि, स्वापेक्षया 'कनीयांसम्' अत्यल्पं सन्तं योनिं 'न हिनस्ति' न विनाशयति। यस्माद् 'ब्रह्मणा' सुकीर्त्तिनामकेन मन्त्रेण 'सः' योनिः 'क्लृप्तः' निर्मितः, तस्मादविनाशो युक्तः। एवयामरुतनामकेन सूक्तेन यजमानम् 'एतवै' सर्वत्र गन्तुं समर्थं करोति। 'यदिदं किञ्च' जगदस्ति, तदिदं सर्वं 'तेन' सूक्तेन 'एतवै कृतं' गन्तुं समर्थं कृतं सत्, पश्चाद् 'एति' गच्छति ; तस्मादिद मेव सूक्तं यजमानस्यापि गमनसामर्थ्यं प्रयच्छति॥

---

* एतेनैव भाष्यकारेणास्य पादस्य संहिताया मन्यविधोऽर्थः कृतः।

आग्निमारुतशस्त्रस्य प्रतिपत्सूक्तं विधत्ते— "अहश्च कृष्ण महरर्जुनं चेत्याग्निमारुतस्य (सं० ६. ९.) प्रतिपदहश्चाहश्चेति पुनरावृत्तं पुनर्निनृत्तं षष्ठे ऽहनि षष्ठस्याह्नो रूपम्"—इति । अहःशब्दोऽत्र पुनः पुनः पठ्यमानत्वात् पुनरावृत्त मित्युच्यते ; तालध्वनिसमानत्वाच्च पुनर्निनृत्त मिति लिङ्गद्वयम् ॥

मरुद्देवताकं सूक्तं विधत्ते— "मध्वो वो नाम मारुतं यजत्रा इति (सं० ७.५७.) मारुतं बह्वभिव्याहृत्य मन्तो वै बह्वन्तः षष्ठ महः षष्ठे ऽहनि षष्ठस्याह्नो रूपम्"—इति । अस्मिन् सूक्ते मरुद्विषय मभिव्याहरणीय मर्थजातं बह्वस्ति, बहुत्वञ्च एकत्वद्वित्वापेक्षया, सङ्ख्याया मवसानत्वादन्तो भवति, तदेतदन्तवत्त्वं लिङ्गम् ॥

अच्युतत्वलिङ्गयुक्ता मृचं विधत्ते— "जातवेदसे सुनवाम सोम मिति (सं० १.९९.) जातवेदस्याच्युता"—इति ॥

जातवेदोदेवताकं सूक्तं विधत्ते— "स प्रत्नथा सहसा जायमान इति (सं० १.९६.) जातवेदस्यं समानोदर्कं षष्ठे ऽहनि षष्ठस्याह्नो रूपम्"—इति । "देवा अग्निम्"—इत्यस्य चतुर्थपादस्य सर्वास्वप्यृक्षु पठितत्वात् समानोदर्कत्वम् ॥

धारयन्नित्येतत्पुनः पुनः पठितस्यानुवादेन तदभिप्रायं सदृष्टान्तं दर्शयति— "धारयन्धारयन्निति शंसति, प्रस्रंसाद्वा अन्तस्य बिभाय ; तद्यथा— पुनराग्रन्थं पुनर्निग्रन्थ मन्तं बध्नीयान्मयूखं वान्ततो धारणाय निहन्यात्तादृक्तद्यद्धारयन्धारयन्निति शंसति सन्तत्यै"—इति । होतास्मिन् सूक्ते चतुर्थेषु पादेषु "धारयन् धारयन्"—इति पुनः पुनः पठित्वा शंसति ; तस्य कोऽभिप्राय इति, सोऽभिधीयते— 'अन्तस्य' शस्त्रस्यावसानप्रदेशस्य 'प्रस्रंसात्' प्रकर्षेण स्रंसनात् शैथिल्यादयं होता 'बिभाय' भीतिं प्राप्तवान् ।

स्रंसनपरिहारार्थं दृष्टान्तो ऽभिधीयते— तद्यथा लोके रज्जुं निर्मिमाणः पुरुषः 'पुनराग्रन्थ'' पुनःपुनराग्रथ्याग्रथ्य 'पुनर्निग्रन्थ'' पुनःपुनर्निग्रथ्यनिर्ग्रथ्य तस्या रज्जोरन्तं बध्नीयात्, दीर्घाया रज्ज्वा अग्रं सूक्ष्मं पुनः पृष्ठतः प्रत्याकृष्य वेष्टनं कृत्वा ग्रथनं नाम, तस्य दृढीभावो निर्ग्रथन मकरोत्। अन्योऽपि दृष्टान्तोऽभिधीयते— यथा वा लोके चर्मकारः आर्द्रस्य चर्मणः सङ्कोचनिवारणाय भूमौ तत्प्रसार्य्य दृढ माकृष्य चर्म्मणोऽन्ते 'मयूखं' शङ्कुं चर्मणो धारणाय 'भूमौ निहन्यात्' दृढं भूमिप्रविष्टं कुर्य्यात् ; होतुः पुनर्धारयन्निति शंसनं यदस्ति, तदेतत्तादृशं पूर्वोक्तदृष्टान्तसमानं द्रष्टव्यम्। तदेतच्छंसनं यज्ञस्य सन्तत्यै भवति ॥

वेदनपूर्वक मनुष्ठानं प्रशंसति — "सन्ततैस्त्र्यहैरव्यवच्छिन्नैर्यन्ति य एवं विद्वांसो यन्ति"—इति पूर्ववद् व्याख्येयम् ॥ अभ्यासो ऽध्यायसमाप्त्यर्थः ॥ १० ॥

इतिश्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां द्वितीयाध्याये
(द्वाविंशाध्याये) दशमः खण्डः ॥ १० (१५) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'नामभाष्ये
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायाः द्वितीयोऽध्यायः ॥

॥ अथ तृतीयाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ यद्वा एति च प्रेति च तत्सप्तमस्याह्नो रूपं यद्वेव प्रथम महस्तदेवैतत्पुनर्यत्सप्तमं यद्युक्तवद्यद्रथवद्यदाशुमद्यत्पिबवद्यत्प्रथमे पदे देवता निरुच्यते यदयं लोको ऽभ्युदितो यज्जातवद्यदनिरुक्तं यत्करिष्यद्यत्प्रथमस्याह्नो रूप मेतानि वै सप्तमस्याह्नो रूपाणि समुद्रादूर्मिर्मधुमाँ उदारदिति सप्तमस्याह्न आज्यं भवत्यनिरुक्तं सप्तमे ऽहनि सप्तमस्याह्नो रूपं वाग्वै समुद्रो न वै वाक् क्षीयते न समुद्रः क्षीयते तद् यदेतत्सप्तमस्याह्न आज्यं भवति यज्ञादेव तद् यज्ञं तन्वते वाच मेव तत्पुनरुपयन्ति सन्तत्यै सन्ततैस्त्र्यहैरव्यवच्छिन्नैर्यन्ति य एवं विद्वांसो यन्त्याप्यन्ते वै स्तोमा आप्यन्ते छन्दांसि षष्ठे ऽहनि तद् यथैवाद आज्येनावदानानि पुनः प्रत्यभिघारयन्त्ययातयामताया एव मेवैतत् स्तोमांश्च छन्दांसि च पुनः प्रत्युपयन्त्ययातयामतायै यदेतत्सप्तमस्याह्न आज्यं भवति तद् त्रैष्टुभं त्रिष्टुप् प्रातःसवन एष

त्र्यहं आ वायो भूष शुचिया उप नः प्रयाभिर्यासि दाश्वांस मच्छा नो नियुद्भिः शतिनीभिरध्वरं प्र सोता जीरो अध्वरेष्वस्थात् ये वायव इन्द्र मादनासो या वां शतं नियुतो याः सहस्रं प्र यद्वां मित्रावरुणा स्पूर्धन्ना गोमता नासत्या रथेना नो देव शवसा याहि शुष्मिन् प्र वो यज्ञेषु देवयन्तो अर्चन् प्र चोदसा धायसा सस्र एषेति प्रउग मेति च प्रेति च सप्तमे ऽहनि सप्तमस्याह्नो रूपं तदु त्रैष्टुभं त्रिष्टुप्प्रातस्सवन एष त्र्यहः आ त्वा रथं यथोतय इदं वसो सुत मन्ध इन्द्र नेदीय एदिहि प्रैतु ब्रह्मणस्पति रग्निर्नेता त्वं सोम क्रतुभिः पिन्वन्त्यपः प्र व इन्द्राय बृहत इति प्रथमेनाह्ना समान आतानः सप्तमे ऽहनि सप्तमस्याह्नो रूपं कया शुभा सवयसः सनीळा इति सूक्तं न जायमानो नशते न जात इति जातवत् सप्तमे ऽहनि सप्तमस्याह्नो रूपं तदु कयाशुभीय मेतद्वै सञ्ज्ञानं सन्तनिसूक्तं यत्कयाशुभीय मेतेन ह वा इन्द्रो ऽगस्त्यो मरुतस्ते समजानत तद्यत्कयाशुभीयं शंसति सञ्ज्ञात्या एव तद्वायुष्यं तद्योऽस्य प्रिय * स्यात्कुर्यादेवास्य कयाशुभीयं

---

* "प्रियः" क, ट।

तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन॑ सवनं दाधारायतनादेवैतेन न प्रच्यवते॑ त्यं सुमेषं महया स्वर्विद मिति सूक्त॑ मत्यन्न वाजं हवनस्यदं रथ मिति॑ रथवत्सप्तमे ऽहनि सप्तमस्याह्नो रूपं॑ तदु जागतं जगत्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति॑ तद्वैतच्छन्दो वहति॑ यस्मिन्निविद्धीयते॑ तस्माज्जगतीषु निविदं दधाति॑ मिथुनानि सूक्तानि शस्यन्ते॑ त्रैष्टुभानि च जागतानि च॑ मिथुनं वै पशवः॑ पशवश्छन्दोमाः पशूना मवरुद्ध्यै॑ त्वा मिद्धि हवामहे॑ त्वं ह्येहि चेरव इति॑ † बृहत्पृष्ठं भवति सप्तमे ऽहनि॑ यदेव षष्ठस्याह्नस्तद्यद्वै रथन्तरं तद्वै रूपं॑ यद् बृहत् तद्वैराजं यद्रथन्तरं तच्छाक्वरं॑ यद् बृहत्तद्रैवतं॑ तद् यद्बृहत्पृष्ठं भवति॑ बृहतैव तद् बृहत्प्रत्युत्तभ्नुवन्त्य॑स्तोमकृन्तत्राय॑ यद्रथन्तरं स्यात्कृन्तत्रं स्यात्तस्माद् बृहदेव कर्त्तव्यं॑ यद्वावानेति धाय्याच्युता॑ ऽभि त्वा शूर नोनुम इति॑ रथन्तरस्य योनि मनु निवर्तयति॑ राथन्तरं ह्येतदहरायतनेन॑ पिबा सुतस्य रसिन इति सामप्रगाथः॑ पिबवान्त्सप्तमे ऽहनि सप्तमस्याह्नो रूपं॑ त्य मू षु वाजिनं देवजूत मिति तार्क्ष्यो ऽच्युतः॑ ॥ १ (१६) ॥

---

† "इति च" क।

द्वादशाहगते नवरात्रे त्रयस्त्र्यहाः। तत्र प्रथमद्वितीयौ त्र्यहावुक्तौ *; तावता पृष्ठ्यः षळहो समाप्तः। यस्तु तृतीयस्त्र्यहस्तत्र यानि त्रीण्यहानि, तानि छन्दोमनामकानि। तत्र प्रथमं नवरात्रापेक्षया सप्तमं यदहरस्ति, तत्र मन्त्रलिङ्गं दर्शयति— "यद्वा एति च प्रेति च तत्सप्तमस्याह्नो रूपं; यद्वेव प्रथम महस्तदेवैतत् पुनर्यत्सप्तमम्"—इति। नवरात्रे प्रथम महर्यादृशलिङ्गोपेतं तदेवैतत् पुनरनुसन्धीयमानं यत्सप्तम महस्तद्भवति॥

तान्यतिदिष्टानि लिङ्गानि दर्शयति— "यद्युक्तवद्यद्रथवद्यदाशुमद्यत्पिबवद्, यत्प्रथमे पदे देवता निरुच्यते, यदयं लोको ऽभ्युदितः"—इति। एतानि प्रथमादह्नोऽत्रातिदिष्टानि लिङ्गानि †॥

नूतन मपि लिङ्गं दर्शयति—"यज्जातवद्यदनिरुक्तम्"—इति। 'जातवत्' 'जनि'धातुयुक्तम्। 'अनिरुक्तम्' अस्पष्टदेवताकम्॥

अतिदिष्टेन लिङ्गजातेन सह सर्वं लिङ्गजात मुपसंहरति— "यत्करिष्यद्यत्प्रथमस्याह्नो रूप मेतानि वै सप्तमस्याह्नो रूपाणि"—इति। भविष्यदर्थवाचिप्रत्ययान्तं धातुमात्रं 'करिष्यत्' इत्युच्यते। एतच्चान्यच्च यत्प्रथमस्याह्नो लिङ्गजात मस्ति, तेन सह सर्वाणि एतानि सप्तमस्याह्नो रूपाणि॥

आज्यशस्त्रं विधत्ते— "समुद्रादूर्मिर्मधुमाँ उदारदिति सप्तमस्याह्न आज्यं भवत्यनिरुक्तं, सप्तमे ऽहनि सप्तमस्याह्नो रूपम्"—इति। निःशेषेण स्पष्ट मुक्तं देवतास्वरूपं 'निरुक्तम्', तद्विपरीतम् 'अनिरुक्तम्'। समुद्रादिसूक्ते (सं० ४. ५८.) न काचिद्देवता

---

* २ भा० ४००० पृ०—३ भा० ९० पृ०।

† २ भा० ४००० पृ० ८ पं०।

विसृष्टा ; तस्मादिदंलिङ्गसद्भावात्सप्तमे ऽहनि योग्यतया सप्तमस्याह्नो निरूपकम् ॥

तदेतत्सूक्तं प्रशंसति—“वाग्वै समुद्रो ; न वै वाक् क्षीयते, न समुद्रः क्षीयते ; तद्यदेतत्सप्तमस्याह्न आज्यं भवति, यज्ञादेव तद्यज्ञं तन्वते ; वाच मेव तत्पुनरुपयन्ति सन्तत्यै”–इति। समुद्रादूर्मिरित्यत्र यः समुद्रः प्रोक्तः, सोऽयं वाक्स्वरूप एव ; तयोर्वाक्समुद्रयो रक्षय्यत्वसाम्यादेकैकस्य वस्तुनः कविभिर्बहुधा वर्ण्यमानत्वात् नास्ति वाचः क्षयः, समुद्रेऽपि जलं न शुष्यति। तस्मात् समुद्रस्य वाग्रूपत्वाद्यदेतत्समुद्रादिति सूक्त मत्राज्य शस्त्रं भवति, तदानीं वाङ्निष्पाद्यमन्त्रात्मकाद् ‘यज्ञादेव’ अनुष्ठानरूपं ‘यज्ञ” ‘तन्वते’ विस्तारयन्ति। तद्विस्तारे च मन्त्राणां बहूनां पठितव्यत्वात् पुनःपुनर्वाच मेव प्राप्नुवन्ति। तच्च यज्ञसन्तत्यै सम्पद्यते ॥ वेदनपूर्वक मनुष्ठानं प्रशंसति—“सन्ततैस्त्र्यहैरव्यवच्छिन्नैर्यन्ति य एवं विद्वांसो यन्ति। पूर्ववद् व्याख्येयम् ॥

अस्मिन्नाज्यशस्त्रे यं घृतस्य नाम गुह्य मिति यो घृतशब्दः श्रुतः, त मभिप्रेत्य तद्दृष्टान्तपूर्वक माज्यशस्त्रं प्रशंसति—“आप्यन्ते वै स्तोमा आप्यन्ते छन्दांसि षष्ठे ऽहनि, तद्यथैवाद आज्येनावदानानि पुनः प्रत्यभिघारयन्त्ययातयामताया, एव मेवैतत्स्तोमांश्च छन्दांसि च पुनः प्रत्युपयन्त्ययातयामतायै यदेतत्सप्तमस्याह्न आज्यं भवति”–इति। त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशाख्या ये स्तोमाः, ते सर्वेऽपि षष्ठेऽहनि ‘आप्यन्ते’ समाप्ताः। गायत्रीत्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्यतिच्छन्दोऽभिधानि सर्वाणि छन्दांसि च समाप्तानि। तथा सति ‘तथैवादः’ वक्ष्यमाणं निदर्शनं तथैव सप्तमस्याह्नः प्रवृत्तिर्द्रष्टव्या। किं निदर्शन मिति,

तदुच्यते— यथा दर्शपूर्णमासादिषु पुरोडाशादिद्रव्याण्यवदाय पश्चात्तान्यवदानस्थानानि आज्यस्थाल्या आज्येन पुनः प्रत्यभिघारयन्ति। किमर्थ मिति, तदुच्यते— 'अयातयामतायै' गतसारत्वपरिहाराय, पुनरपि हविष्ट्वयोग्यतार्थम्। एव मेवैतस्मिन् सप्तमेऽहनि स्तोमान् छन्दांसि च पुनरपि 'प्रत्युपयन्ति' प्रतिपाद्यानुतिष्ठन्ति। तथा सत्यनुष्ठितस्य पुनरनुष्ठानं चर्वितचर्वणसमान मिति 'यातयामत्वं' गतसारत्वं भवेत्। अतो यदेतत्समुद्रादूर्मिरित्यादिकं सप्तमस्याह्न आज्यं भवति, तदेतद् 'अयातयामतायै' पुनरपि सारत्वसिध्यर्थं भवति। तस्मिञ्छस्त्रे "घृतस्य नाम गुह्यम्" –इति (सं० ४.५८.१.) घृतशब्दस्य विद्यमानत्वात् प्रत्यभिघारणसाम्यं भवति। यद्यपि त्रिवृदादयः स्तोमाः सप्तमे ऽहनि पुनर्नानुष्ठीयन्ते, तथापि चतुर्विंशादयश्छन्दोमनामकाः * अनुष्ठास्यन्ते। तस्मादयातयामत्वं स्तोमत्वसाम्येनाभिहितम् ॥

आज्यशस्त्रगतं छन्दः प्रशंसति— "तदु त्रैष्टुभं त्रिष्टुप्-प्रातःसवन एष त्र्यहः"–इति। 'तदु' तदपि "समुद्रादूर्मिः"–इत्यादिकं शस्त्रं त्रिष्टुप्-छन्दस्कम्; प्रातस्सवने त्रिष्टुप्छन्दो यस्मिंस्तृतीयत्र्यहे सोऽयं 'त्रिष्टुप्प्रातस्सवनः'। यथा प्रथमस्य त्र्यहस्य प्रातस्सवने गायत्री, यथा वा मध्यमस्य त्र्यहस्य प्रातस्सवने जगती, एव मुत्तमस्य त्र्यहस्य प्रातस्सवने त्रिष्टुप् अवगन्तव्याः। एतच्छन्दसां विवाहे निरूपितम् † ॥

अथ प्रउगशस्त्रं विधत्ते— "आ वायो भूष शुचिपा उप नः प्रयाभिर्यासि दाश्वांस मच्छा नो नियुद्भिः शतिनीभिरध्वरं प्र

---

* इहैवाग्रे क्रमाद् व्यक्तीभविष्यन्ति।

† २ भा० ३८८ पृ० ५ ख०।

सोता जीरो अध्वरेष्वस्थाद् ये वायव इन्द्र मादनासो या वां शतं नियुतो याः सहस्रं प्र यद्वां मित्रावरुणास्पूर्धन्ना गोमता नासत्या रथेना नो देव शवसा याहि शुष्मिन् प्र वो यज्ञेषु देवयन्तो अर्चन् प्र चोदसा धायसा सस्र एषेति प्रउग मेति च प्रेति च सप्तमे ऽहनि सप्तमस्याह्नो रूपं, तदु त्रैष्टुभं त्रिष्टुप्प्रातस्सवन एष त्र्यहः” –इति। “आ वायो भूष”–इति (सं० ७.९२.१.) प्रथमं यत् प्रतीकं, तस्मिन्नाकारो लिङ्गम्; “प्र याभिः”–इति (सं० ७.९२.३.) द्वितीयं, तत्र प्रशब्दो लिङ्गम् ; “आ नो नियुद्भिः”–इति (सं० ७.९२.५.) तृतीयं, तस्मिन्नाकारः ; “प्र सोता”–इति (सं० ७. ९२.२.) चतुर्थे प्रशब्दः ; “ये वायव इन्द्र”–इति (सं० ७.९२.४.) पञ्चमं, तत्र द्वितीयपादे “आ देवासः”–इत्याकारः ; “या वां शतम्”–इति (सं० ७.९१.६.) षष्ठं, तस्य तृतीयपादादौ आकारः श्रुतः ; “प्र यद्वाम्”-इति सप्तमे (सं० ६.६७.९–११.) प्रशब्दः ; “आ गोमता”–इत्यष्टमे (सं० ७.७२.१–३.) आकारः ; “आ नो देव”–इति (सं० ७.३०.१–३.) नवमे ऽप्याकारः ; “प्र वो यज्ञेषु” –इति (सं० ७.४३.१–३.) दशमे प्रशब्दः ; “प्र चोदसा”–इत्येकादशेऽपि (सं० ७.९५.१–३.) प्रशब्दः। अत्राद्यैः षड्भिर्द्वौ तृचौ*, इतरे पञ्च तृचाः। तदेतत्सर्वं प्रउगशस्त्र मुक्तलिङ्गसद्भावात् सप्तमे ऽहनि योग्यम्। अन्यत्पूर्ववद् व्याख्येयम्॥

शस्त्रक्लृप्तिसमत्वलिङ्गकान् मन्त्रान् विधत्ते — “आ त्वा रथं यथोतय (सं० ८.६८.१.) इदं वसो सुत मन्ध (सं० ८.२.१.) इन्द्र नेदीय एदिहि (सं० ८.५३.५.) प्रैतु ब्रह्मणस्पति (सं० १.

---

* तथा चाश्वलायनः—“आ वायो भूष०—०सहस्र मिति द्व्येकपातिन्यः”–इति ८.९.२।

४०.३.) रग्निर्नेता (सं० ३.२०.४.) त्वं सोम क्रतुभिः (सं० १.९२.२.) पिन्वन्त्यपः (सं० १.६४.६.) प्र व इन्द्राय बृहत (सं० ८.८९.३.) इति प्रथमेनाह्ना समान आतानः सप्तमे ऽहनि सप्तमस्याह्नो रूपम्”–इति ॥

अथ जातलिङ्गकं सूक्तं विधत्ते—“कया शुभा सवयसः सनीळा इति (सं० १.१६५.) सूक्तं, न जायमानो नशते न जात इति जातवत्सप्तमे ऽहनि सप्तमस्याह्नो रूपम्”–इति। अस्य सूक्तस्य नवम्या मृचि “न जायमानः”–इत्यादिकस्तृतीयः पादः, तत्र ‘जात’शब्दोपेतत्वं लिङ्गम् ॥

एतत्सूक्तं प्रशंसति—“तदु कयाशुभीय मेतद्वै सञ्ज्ञानं सन्तनि सूक्तं, यत्कयाशुभीय मेतेन ह वा इन्द्रो ऽगस्त्यो मरुतस्ते समजानत, तद्यत्कयाशुभीयं शंसति सञ्ज्ञात्या एव”–इति। ‘तदु’ तत्सूक्तं ‘कयाशुभ’शब्दोपेतत्वात् कयाशुभीयनामकम्। अस्त्वेवम्, किं तत्? इति चेत्, उच्यते— एतदेव कयाशुभीयनामकं सूक्तं ‘सञ्ज्ञानम्’ परस्परैकमत्यसाधनम्; किञ्चैतत्सूक्तं ‘सन्तनि’ सन्तानकरं प्राणाना मविच्छेदेन दीर्घायुष्यकारणम्। यदेतत्कयाशुभीयसूक्त मस्ति, एतदनुष्ठानेनैवेन्द्रागस्त्यमरुतो ये सन्ति, ‘ते’ सर्वे ‘समजानत’ सञ्ज्ञानं परस्परैकमत्यं प्राप्नुवन्। तथा सत्येतच्छंसनं विप्रतिपन्नाना मैकमत्यार्थं सम्पद्यते ॥

प्रकारान्तरेण प्रशंसति— “तद्वायुष्यं तद्यो ऽस्य प्रिय स्यात्कुर्यादेवास्य कयाशुभीयम्”–इति। ‘तदु’ तत्तु सूक्त मायुष्करम्, सन्तनीतिपूर्वमुक्तत्वात्। तथा सत्यस्य यजमानस्य यः पुत्रादिः प्रियः स्यात्, तस्यायुर्वृद्ध्यर्थं कयाशुभीयसूक्तं कुर्यादेव ॥

पुनरपि छन्दो द्वारा प्रशंसति—“तदु त्रैष्टुभं तेन प्रतिष्ठित-

पदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते"–इति । पूर्ववद् व्याख्येयम् ॥

रथलिङ्गकं सूक्तं विधत्ते — "त्वं सुमेषं महया स्वर्विदं मिति (सं० १.५२.) सूक्त मत्यन्न वाजं हवनस्यदं रथ मिति रथवत्सप्तमे ऽहनि सप्तमस्याह्नो रूपम्"–इति । "त्वं सुमेषम्"–इतिसूक्तस्य "अत्यं न वाजम्"–इति तृतीयः पादः, तत्र रथशब्दः श्रूयते ॥

तस्मिन् सूक्ते निविद्धानं विधत्ते— "तदु जागतं, जगत्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति; तद्वैतच्छन्दो वहति, यस्मिन्निविद्धीयते; तस्माज्जगतीषु निविदं दधाति"–इति । अस्य सूक्तस्य जगतीच्छन्दस्कत्वाज्जागतत्वम्; ताश्च विवाहक्रमेणोत्तरे त्र्यहे माध्यन्दिने सवने निर्वाहकत्वादस्मिन्माध्यन्दिनसवनगते शस्त्रे; तत्सवननिर्वाहकतया जगतीच्छन्दस्कास्वृक्षु निविदं प्रक्षिपेत् ॥

पूर्वोक्तं त्रिष्टुप्छन्दः, इदानी मुच्यमानं जगतीच्छन्दश्च मिलित्वा प्रशंसति— "मिथुनानि सूक्तानि शस्यन्ते, त्रैष्टुभानि च जागतानि च; मिथुनं वै पशवः, पशवश्छन्दोमाः, पशूना मवरुद्ध्यै"–इति । यथा परस्परविलक्षणयोः स्त्रीपुरुषयोर्मेलने मिथुनं भवति, एवं छन्दोद्वयमेलने मिथुनत्वम्; गवाश्वादिपशवश्च मिथुनरूपाः,—चतुर्विंशश्चतुश्चत्वारिंशाष्टाचत्वारिंशाख्याश्छन्दोमाः, पशुसाधनत्वात्पशुरूपाः; तस्माच्छन्दोमयुक्ते ऽस्मिंस्त्र्यहे छन्दोद्वयानुष्ठानं पशुप्राप्त्यै भवति । 'छन्दोभिः' गायत्रीत्रिष्टुब्जगतीभिरक्षरसङ्ख्याद्वारेण उपमीयन्त इति चतुर्विंशादयस्त्रयः 'छन्दोमाः' ॥

तत्र गायत्र्या चतुर्विंशत्यक्षरया सदृशो यश्चतुर्विंशस्तोमः, तस्य प्रतिपादक मष्टभ्यो हिङ्करोतीत्यादिकं छन्दोगब्राह्मणं चतुर्विंश मेतदहरुपयन्तीत्यारम्भणीय मित्यत्रैवोदाहृतम् (२भा० ३०६पृ०) ॥

यच्चतुश्चत्वारिंशस्तोमस्य निरूपकं छन्दोगब्राह्मणम्, तदेव माम्नायते—"पञ्चदशभ्यो हिङ्करोति स तिसृभिः स एकादशभिः स एकया, चतुर्दशभ्यो हिङ्करोति स एकया स तिसृभिः स दशभिः, पञ्चदशभ्यो हिङ्करोति स एकादशभिः स एकया स तिसृभिः"–इति (ता० ब्रा० ३.९–११ ख०)। अस्याय मर्थः—त्रिभिः पर्यायैस्तृचस्यावृत्तौ प्रथमे पर्याये प्रथमाया ऋचस्त्रिरभ्यासः, मध्यमाया ऋच एकादशकृत्वो ऽभ्यासः, उत्तमाया ऋचः सकृत्पाठः ; द्वितीयपर्याये प्रथमायाः सकृत्पाठः, मध्यमायास्त्रिरभ्यासः, उत्तमाया दशकृत्वोऽभ्यासः ; तृतीये पर्याये प्रथमाया एकादशकृत्वो ऽभ्यासः, मध्यमायाः सकृत्पाठः, उत्तमायास्त्रिरभ्यासः ; सोऽयं चतुश्चत्वारिंशः स्तोम इति * ॥

अथाष्टाचत्वारिंशस्तोमस्य ब्राह्मण मेव माम्नायते— "षोडशभ्यो हिङ्करोति स तिसृभिः स द्वादशभिः स एकया, षोडशभ्यो हिङ्करोति स एकया स तिसृभिः स द्वादशभिः, षोड़शभ्यो हिङ्करोति स द्वादशभिः स एकया स तिसृभिरन्तो वा ऽष्टाचत्वारिंशः"–इति (ता० ब्रा० ३.१२,१३.)। अस्याय मर्थः—प्रथमे पर्य्याये प्रथमायास्त्रिरभ्यासः, मध्यमाया द्वादशकृत्वोऽभ्यासः, उत्तमायाः सकृत्पाठः ; द्वितीयपर्याये प्रथमायाः सकृत्पाठः, मध्यमायास्त्रिरभ्यासः, उत्तमाया द्वादशकृत्वो ऽभ्यासः ; तृतीयपर्याये प्रथमाया द्वादशकृत्वोऽभ्यासः, मध्यमायाः सकृत्पाठः, उत्तमायास्त्रिरभ्यास इति। एव मष्टाचत्वारिंशः स्तोम इति † ॥

एवं त्रयश्छन्दोमा अवगन्तव्याः ॥

---

* चतुश्चत्वारिंशाख्यस्य स्तोमस्य तिस्रो विष्टुतयः ; तत्राद्येयम्।

† अष्टाचत्वारिंशाख्यस्य स्तोमस्य द्वे विष्टुती ; तत्राप्याद्येयम्।

अथ बृहत्सामसाध्यपृष्ठस्तोत्रियस्याधारभूतं स्तोत्रियं प्रगाथं तदनुरूपञ्च विधत्ते— "त्वा मिद्धि हवामहे, त्वं ह्येहि चेरव इति बृहत्पृष्ठं भवति सप्तमे ऽहनि"–इति। त्वा मिद्धीत्येकः (सं० ६.४६.१,२.) प्रगाथः, त्वं ह्येहीति (सं० ८.६१.७,८.) द्वितीयः, तदुभयं सप्तमे ऽहनि निष्केवल्यशस्त्रे शंसनीयम्। ननु तच्च युग्म महः सप्तमं, तथा सति रथन्तरपृष्ठं परित्यज्य बृहत्पृष्ठं कि मित्युपादीयते ? इति चेत्, वचनबलादिति ब्रूमः ; "किं हि वचनं न कुर्यान्नास्ति वचनस्यातिभारः"–इतिन्यायात् ॥

बृहत्पृष्ठस्वीकारे काञ्चिदुपपत्ति माह— "यदेव षष्ठस्याह्नस्तद्" –इति। पूर्वस्य षष्ठस्याह्नो यदेव पृष्ठस्तोत्रं, तदेवात्र कृतं भवति। तस्य प्रयोजनं तूपरिष्टाद्वक्ष्यते। ननु षष्ठेऽप्यहनि रैवतं पृष्ठं, न तु बृहदिति चेत्, नैष दोषः ; बृहद्रैवतयोः कार्य्यकारणभावेनैकत्वादित्यभिप्रेत्य बृहच्च वा इद मग्रे रथन्तरं चास्ता मित्यत्र प्रतिपादितम् * ॥

कार्य्यकारणभाव मिह स्मारयति— "यद्वै रथन्तरं, तद्वैरूपं ; यद् बृहत्, तद्वैराजं ; यद्रथन्तरं, तच्छाक्वरं ; यद् बृहत् तद्रैवतम्"–इति। वैरूपशाक्वरयोः रथन्तरजन्यत्वात्तद्रूपत्वम्, वैराजरैवतयोर्बृहज्जन्यत्वात्तद्रूपत्वम्, एवं च सति षष्ठेऽहनि रैवतस्य बृहत्त्वं व्यवहर्त्तुं शक्यते ॥

इदानी मत्र सप्तमे ऽहनि बृहत्पृष्ठस्वीकारे प्रयोजन माह— "तद्यद् बृहत्पृष्ठं भवति, बृहतैव तद् बृहत्प्रत्युत्तम्भुवन्त्यस्तोमकृन्तत्राय"–इति। 'तत्' तस्मात् षष्ठेऽहनि कृतस्य रैवतस्य बृहद्रूपत्वात् कारणात् 'यद्' यत्र सप्तमे ऽहनि बृहत्पृष्ठं क्रियते। तदि-

---

* २ भा० २९५ पृ० २ पं० द्रष्टव्यम्।

दानीं षष्ठे ऽहन्यनुष्ठितेन बृहतैवास्मिन् सप्तमे ऽहनि 'तद्' बृहत्पृष्ठं 'प्रत्युत्तभ्नुवन्ति'। अतीतत्वेन नष्टस्य पुनरुद्धरणं प्रत्युत्तम्भनम्। एतच्च 'अस्तोमकृन्तत्वाय' सम्पद्यते। स्तोमानां त्रिवृत्पञ्चदशादीनां कृन्तत्वं कृन्तनं छेदः, तद्राहित्यम् 'अस्तोमकृन्तत्वं', तदर्थं मत्र स्वीकारः ॥

विपक्षबाधोपन्यासमुखेनैव तदेव स्पष्टयति— "यद्रथन्तरं स्यात्कृन्तत्वं स्यात्"–इति। षष्ठेऽहन्यनुष्ठितस्य बृहतोऽस्मिन् सप्तमे ऽहन्यनुवृत्तिं परित्यज्य युग्मदिनत्व माश्रित्य रथन्तरपृष्ठं स्वीक्रियते, तदानीं षष्ठसप्तमयोरनुवृत्त्यभावात् 'कृन्तत्वं' विच्छेदनं स्यात्। षष्ठे बृहत् कृतं, सप्तमे तन्न कृतम्, किन्तु रथन्तरं कृत मिति विच्छेदः ॥

विपक्षबाध मुपन्यस्य स्वपक्ष मुपसंहरति— "तस्माद् बृहदेव कर्त्तव्यम्"–इति। यस्माद् बृहति कृते विच्छेदः परिक्रियते, तस्मादित्यर्थः ॥

अच्युतत्वलिङ्गयुक्ता मृचं विधत्ते— "यद्वावानेति (सं० १०.७४.६.) धाय्याच्युता"–इति ॥

अथायुग्मदिनत्व मुपजीव्य रथन्तरसम्बन्धात्तदीया मृचं विधत्ते — "अभि त्वा शूर नोनुम इति (सं० ७.३२.२२.) रथन्तरस्य योनि मनु निवर्त्तयति, राथन्तरं ह्येतदहरायतनेन"–इति। नितरां वर्तन मनुष्ठानं निवर्तनं, न तु परित्यागः। 'आयतनेन' अयुग्मत्व-स्थानेन रथन्तरसम्बन्धः ॥

पिबशब्दलिङ्गकं प्रगाथान्तरं विधत्ते—"पिबा सुतस्य रसिन इति (सं० ८.३.१,२.) सामप्रगाथः, पिबवान्सप्तमे ऽहनि सप्तमस्याह्नो रूपम्"–इति ॥

अच्युतत्वलिङ्गकं सूक्तविशेषं विधत्ते—"त्य मू षु वाजिनं देवजूत मिति (सं० १०.१७८.) तार्क्ष्यो ऽच्युतः"—इति ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां तृतीयाध्याये
(त्रयोविंशाध्याये) प्रथमः खण्डः ॥ १ (१६) ॥

॥ अथ द्वितीयः खण्डः ॥

इन्द्रस्य नु वीर्याणि प्र वोच मिति सूक्तं। प्रेति सप्तमे ऽहनि सप्तमस्याह्नो रूपं। तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन। सवनं दाधारायतनादेवैतेन न प्रच्यवते। ऽभि त्यं मेषं पुरुहूत मृग्मिय मिति सूक्तं। यद्वाव प्रेति तदभीति सप्तमे ऽहनि सप्तमस्याह्नो रूपं। तदु जागतं जगत्यो वा। एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति तद्वैतच्छन्दो वहति। यस्मिन्निविद्धीयते। तस्माज्जगतीषु निविदं दधाति। मिथुनानि सूक्तानि शस्यन्ते। त्रैष्टुभानि च जागतानि च। मिथुनं वै पशवः पशवश्छन्दोमाः पशूना मवरुद्ध्यै। तत्सवितुर्वृणीमहे। ऽद्या नो देव सवितरिति। वैश्वदेवस्य प्रतिपदनुचरौ। राथन्तरे ऽहनि सप्तमे ऽहनि सप्तमस्याह्नो रूप। मभि त्वा देव

सवितरिति सावित्रं य॑द्वाव प्रेति तदभीति स॑प्तमे ऽहनि सप्तमस्याह्नो रूपं प्रे॑तां यज्ञस्य शम्भुवेति द्यावापृथिवीयं॑ प्रेति सप्तमे ऽहनि सप्तमस्याह्नो रूपं॑ मयं देवाय जन्मन इत्यार्भवं॑ जातवत् सप्तमे ऽहनि सप्तमस्याह्नो रूपं॑ मा याहि वनसा सहेति॑ द्विपदाः शंसति॑ द्विपा॑द्वै पुरुषश्च॑तुष्पादाः पशवः॑ पशवश्छन्दोमाः पशूना मवरुद्ध्यै॑ त॑द्यद् द्विपदाः शंसति॑ यजमान मेव तद् द्विप्रतिष्ठं॑ चतुष्पात्सु पशुषु प्रतिष्ठापयत्यै॑भिरग्ने दुवो गिर इति वैश्वदेवं॑ मेति सप्तमे ऽहनि सप्तमस्याह्नो रूपं॑ तान्यु गायत्राणि गायत्रतृतीयसवन एष त्र्यहो॑ वैश्वानरो अजीजनदित्या॑ग्निमारुतस्य प्रतिपज्जा॑तवत् सप्तमे ऽहनि सप्तमस्याह्नो रूपं॑ प्र यद्वस्त्रिष्टुभ मिष मिति मारुतं॑ प्रेति सप्तमे ऽहनि सप्तमस्याह्नो रू॑पं जातवेदसे सुनवाम सोम मिति जातवेदस्याच्युता॑ दूतं वो विश्ववेदस मिति जातवेदस्य॑ मनिरुक्तं सप्तमे ऽहनि सप्तमस्याह्नो रूपं ता॑न्यु गायत्राणि गायत्रतृतीयसवन एष त्र्यहः॑ ॥ २ (१७)॥

प्रशब्दलिङ्गकं सूक्तं विधत्ते— “इन्द्रस्य नु वीर्याणि प्रवोच मिति (सं० १.३२.) सूक्तं; प्रेति सप्तमे ऽहनि सप्तमस्याह्नो रूपम्”–इति ॥

तत्रत्यं छन्दः प्रशंसति— "तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते"–इति ॥

अभिशब्द-प्रशब्दयोरुपसर्गत्वसाम्येनार्थैकत्व मभिप्रेत्य, तद्वा शब्दैकत्व मप्यारोप्याभिप्रशब्दलिङ्गकं सूक्तं विधत्ते— "अभि त्यं मेषं पुरुहूत मृग्मिय मिति (सं० १.५१.) सूक्तं; यद्वाव प्रेति तदभीति सप्तमे ऽहनि सप्तमस्याह्नो रूपम्"–इति ॥

अस्मिन् सूक्ते निविद्धानं विधत्ते— "तदु जागतं जगत्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति; तद्वैतच्छन्दो वहति, यस्मिन्निविद्धीयते; तस्माज्जगतीषु निविदं दधाति"–इति ॥

छन्दोद्वयं मिलित्वा प्रशंसति—"मिथुनानि सूक्तानि शस्यन्ते,—त्रैष्टुभानि च जागतानि च; मिथुनं वै पशवः पशवश्छन्दोमाः पशूना मवरुद्ध्यै"–इति ॥

शस्त्रान्तरस्य प्रतिपदनुचरौ विधत्ते— "तत्सवितुर्वृणीमहे (सं० ५.८२.१–३.), ऽद्या नो देव सवितरिति (सं० ५.८२. ४–६.) वैश्वदेवस्य प्रतिपदनुचरौ; राथन्तरे ऽहनि सप्तमे ऽहनि सप्तमस्याह्नो रूपम्"–इति। तत्सवितुरित्यादेः क्वचिद्रथन्तरसामाधारत्व मभिप्रेत्य राथन्तरत्वं लिङ्ग मुक्तम् ॥

अभिशब्द-प्रशब्दयोः पूर्ववदेकत्व मारोप्य प्रशब्दलिङ्गकं तृचात्मकं सूक्तं विधत्ते— "अभि त्वा देव सवितरिति (सं० १.२४.) सावित्रं, यद्वाव प्रेति तदभीति, सप्तमे ऽहनि सप्तमस्याह्नो रूपम्" –इति ॥

आरोपित-प्रशब्दलिङ्गक मुक्त्वा मुख्य-प्रशब्दलिङ्गकं तृचात्मकं सूक्तं विधत्ते— "प्रेतां यज्ञस्य शम्भुवेति (सं० २.४१.) द्यावापृथिवीयं; प्रेति सप्तमे ऽहनि सप्तमस्याह्नो रूपम्"–इति। द्विती-

यस्या मृचि “द्यावा नः पृथिवी”–इत्युक्तत्वादिदं सूक्तं द्यावापृथिवीदेवताकम् ॥

जातलिङ्गकं तृचात्मकं सूक्तं विधत्ते— “अयं देवाय जन्मन इत्यार्भवं (सं० १.२०,) जातवत्सप्तमे ऽहनि सप्तमस्याह्नो रूपम्” –इति। अत्र सूक्ते चतुर्थ्या मृचि “ऋभवो विष्ट्यक्रत”–इतिश्रुतत्वात् अय मपि तृच आर्भवः; “जन्मनः”–इत्युक्तत्वाज्जातवल्लिङ्गम् ॥

अथ पादद्वयोपेता ऋचो विधाय प्रशंसति— “आ याहि वनसा सहेति (सं० १०.१७२.) द्विपदाः शंसति; द्विपाद्वै पुरुषश्चतुष्पादाः पशवः, पशवश्छन्दोमाः, पशूना मवरुद्ध्यै; तद् यद् द्विपदाः शंसति, यजमान मेव तद् द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति”–इति। छन्दोमानां पूर्वोक्तचतुर्विंशादीनां पशुप्राप्तिसाधनत्वात् पशुत्वम् ॥

आकारलिङ्गकबहुदेवताकं सूक्तं विधत्ते— “ऐभिरग्ने दुवो गिर इति (सं० १.१४.) वैश्वदेव मेति सप्तमे ऽहनि सप्तमस्याह्नो रूपम्”–इति ॥

उक्तेषु सूक्तेषु छन्दः प्रशंसति— “तान्यु गायत्राणि गायत्रतृतीयसवन एष त्र्यहः”–इति। ‘तान्यु’ तानि तु सूक्तानि “अद्या नो देव सवितर्”–इत्यारभ्य मध्ये द्विपदा वर्जयित्वा “ऐभिरग्ने”–इत्यन्तानि (१०५–१०६ पृ०) गायत्रीच्छन्दस्कानि वैश्वदेवशस्त्रे ऽभिहितानि। एषु चोत्तमस्त्र्यहो ‘गायत्रतृतीयसवनः’ गायत्रीच्छन्दस्तृतीयसवने यस्य त्र्यहस्य सो ऽयं गायत्रतृतीयसवनः। तदेतच्छन्दोविवाहप्रस्तावे ऽनुसन्धेयम् * ॥

---

* २भा० ३८०, ३८८ पृ० १,५ ख० द्रष्टव्यम।

शस्त्रान्तरस्य जनिधातुलिङ्गयुक्तं प्रतिपदं विधत्ते—"वैश्वानरो अजीजनदित्याग्निमारुतस्य प्रतिपज्जातवत् *, सप्तमे ऽहनि सप्तमस्याह्नो रूपम्"-इति ॥

प्रशब्दलिङ्गकं सूक्तं विधत्ते— "प्र यद्वस्त्रिष्टुभ मिष मिति (सं० ८.७.) मारुतं ; प्रेति सप्तमे ऽहनि सप्तमस्याह्नो रूपम्"-इति । द्वितीयपादे "मरुतो विप्राः"-इतिश्रुतत्वादिदं सूक्तं मरुद्देवताकम् ॥

अच्युतत्वलिङ्गयुक्ता मृचं विधत्ते— "जातवेदसे सुनवाम सोम मिति (सं० १.९९.१.) जातवेदस्याच्युता"-इति ॥

अस्पष्टदेवताकं सूक्तं विधत्ते— "दूतं वो विश्ववेदस मिति (सं० ४.८.) जातवेदस्य मनिरुक्तं सप्तमे ऽहनि सप्तमस्याह्नो रूपम्"-इति । जातवेदःशब्दस्याग्निवाचित्वेऽपि स्पष्टदेवतावाचकत्वस्याभावादनिरुक्तत्वम् ॥

"वैश्वानरो अजीजनत्"-इत्यादिषु "दूतं वः"-इत्यन्तेषु सूक्तेषु (१०६-१०७ पृ०) जातवेदस इत्येतद्वर्जितेषु विद्यमानं छन्दः प्रशंसति— "तान्यु गायत्राणि गायत्रतृतीयसवन एष त्र्यहः"-इति ॥ २ ॥

इति श्रीमत्सायणार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां तृतीयाध्याये
(त्रयोविंशाध्याये) द्वितीयः खण्डः ॥ २ (१७) ॥

---

* वैश्वानरीयतृचसूक्तस्याद्या चातुर्मास्येषु कल्पजा, उत्तरे त्वत्रैव पठिते । 'स विश्वम्'-इति, 'वृषा पावक'-इति च । आश्व० श्रौ० ८. ९. ७. द्रष्टव्यम् ।

॥ अथ तृतीयः खण्डः ॥

यद्वै नेति न प्रेति यत्स्थितं तदष्टमस्याह्नो रूपं यद्वेव द्वितीय महस्तदेवैतत्पुनर्यदष्टमं यदूर्ध्ववद् यत्प्रतिवद् यदन्तर्वद् यद् वृषण्वद् यद् वृधन्वद् यन्मध्यमे पदे देवता निरुच्यते यदन्तरिक्ष मभ्युदितं यद् द्व्यग्नि यन्महद्वद्* यद् द्विहूतवद् यत्पुनर्वद् यत्कुर्वद् यद् द्वितीयस्याह्नो रूप मेतानि वा अष्टमस्याह्नो रूपाण्यग्निं वो देव मग्निभिः सजोषा इत्यष्टमस्याह्न आज्यं भवति द्व्यग्न्यष्टमे ऽहन्यष्टमस्याह्नो रूपं तदु त्रैष्टुभं त्रिष्टुप्प्रातस्सवन एष त्र्यहः कुविदङ्ग नमसा ये वृधासः पीवो अन्नाꣳ रयिवृधः सुमेधा उच्छन्नुषसः सुदिना अरिप्रा उशन्ता दूता न दभाय गोपा यावत्तरस्तन्वो यावदोजः प्रति वां सूर उदिते सूक्तैर् धेनुः प्रत्नस्य काम्यं दुहाना ब्रह्मा ण इन्द्रोप याहि विद्वानूर्ध्वो अग्निः सुमतिं वस्वो अश्रेदु तस्या नः सरस्वती जुषाणेति प्रउगं प्रतिवदन्तर्वद् द्विहूतवदूर्ध्ववदष्टमे ऽहन्यष्टमस्याह्नो रूपं तदु त्रैष्टुभं त्रिष्टुप्प्रातस्सवन एष त्र्यहो विश्वानरस्य वस्पति मिन्द्र इत्सोमपा एक इन्द्र नेदीय एदिह्युत्तिष्ठ

---

* "द्व्यग्न्यन्महद्वद्" क।

ब्रह्मणस्पते ऽग्निर्नेता। त्वं सोम क्रतुभिः पिन्वन्त्यपो। बृहदिन्द्राय गायतेति। द्वितीयेनाह्ना समान आतानो। ऽष्टमे ऽहन्यष्टमस्याह्नो रूपं। शंसा महा मिन्द्रं यस्मिन् विश्वा इति सूक्तं महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं। महश्चित्त्वमिन्द्र यत एतानिति सूक्तम् * महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं। पिबा सोम मभि य मुग्र तर्द्द इति सूक्त। मूर्वं गव्यं महि गृणान इन्द्रेति। महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं। महाँ इन्द्रो नृवदाचर्षणिप्रा इति सूक्तं। महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं। तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन। सवनं दाधारायतनादेवैतेन न प्रच्यवते। त मस्य द्यावापृथिवी सचेतसेति सूक्तं। यदैत्कृखानो महिमान मिन्द्रिय मिति महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं तदु जागतं। जगत्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति तद्वैतच्छन्दो वहति। यस्मिन्निविद्धीयते। तस्माज्जगतीषु निविदं दधाति। मिथुनानि सूक्तानि शस्यन्ते। त्रैष्टुभानि च जागतानि च मिथुनं वै पशवः पशवश्छन्दोमाः पशूना मवरुद्ध्यै। महद्वन्ति सूक्तानि शस्यन्ते। महद्वा अन्तरिक्ष मन्तरिक्षस्याप्त्यै। पञ्च सूक्तानि शस्यन्ते

---

* "एतानि सूक्तानि" क।

पञ्चपदा पङ्क्तिः पाङ्क्तो यज्ञः पाङ्क्ताः पशवः पशवश्छन्दोमाः पशूना मवरुद्ध्या ऽभि त्वा शूर नोनुमो ऽभि त्वा पूर्वपीतय इति रथन्तरं पृष्ठं भवत्यष्टमे ऽहनि यद्वावानेति धाय्याच्युता त्वा मिद्धि हवामह इति बृहतो योनि मनु निवर्तयति बार्हतं ह्येतदहरायतनेनोभयं शृणवच्च न इति सामप्रगाथो यच्चेद मद्य यदु च ह्य आसीदिति बार्हते ऽहन्यष्टमे ऽहन्यष्टमस्याह्नो रूपं त्यमू षु वाजिनं देवजूत मिति तार्क्ष्यो ऽच्युतः ॥ ३ (१८) ॥

सप्तम महरभिधायाष्टमस्याह्नो मन्त्रलिंगानि दर्शयति— "यद्वै नेति न प्रेति, यत्स्थितं, तदष्टमस्याह्नो रूपम्"—इति। आकारस्य च प्रशब्दस्य चालिंगत्वं नकारद्वयेन निषिध्यते। 'यत् स्थितम्' अच्युतत्वेन नियतं तिष्ठतिधातुयुक्तं वा, तदष्टमस्याह्नो निरूपकम् ॥

द्वितीयस्मिन्नहनि प्रोक्तानि लिंगान्यष्टमे ऽहन्यतिदिशति— "यद्वेव द्वितीय महस्तदेवैतत्पुनर्यदष्टमम्"—इति। यल्लिङ्गक मेव द्वितीय महस्तल्लिङ्गक मेवैतत्पुनरपि भवति ॥

यदष्टम महस्तत्पूर्वोक्तलिंगकम्; तानि लिंगान्युपन्यस्यति— "यदूर्ध्ववद्यत्प्रतिवद्यदन्तर्वद्यद् वृषण्वद्यद् वृधन्वद्यन्मध्यमे पदे देवता निरुच्यते यदन्तरिक्ष मभ्युदितम्"—इति ॥

अथ नूतनानि लिङ्गानि दर्शयति— "यद् ह्वग्नि यन्महद्वद्

यद्विहूतवद्यत्पुनर्वद्यत् कुर्वत्"–इति । अग्निशब्दद्वयोपेतं द्व्यग्नीत्युच्यते । महच्छब्दोपेतं महद्वत् । द्वयोर्देवतयोर्हूतमाह्वानं यस्मिन् तादृशं विहूतवत् । पुनःशब्दोपेतं पुनर्वत् । द्वितीयेऽहनि वर्त्तमानार्थवाचिप्रत्ययान्तं कुर्वच्छब्देनोक्तम् ॥

तेन सह सर्वाणि लिंगान्युपसंहरति— "यद्द्वितीयस्याह्नो रूप मेतानि वा अष्टमस्याह्नो रूपाणि"–इति ॥

तत्राज्यशस्त्रं विधत्ते— "अग्निं वो देव मग्निभिः सजोषा इत्यष्टमस्याह्न आज्यं भवति (सं० ७.३.); द्व्यग्न्यष्टमे ऽहन्यष्टमस्याह्नो रूपम्"–इति । द्वावग्निशब्दौ यस्मिन् सूक्ते विद्येते, तत्सूक्तं द्व्यग्नि ; अतो ऽष्टमे ऽहनि योग्यत्वादेतदष्टमस्याह्नो निरूपकम् ॥

तत्रत्यं छन्दः प्रशंसति — "तद् त्रैष्टुभं त्रिष्टुप्प्रातस्सवन एष त्र्यहः"–इति ॥

अथ प्रउगशस्त्रं विधत्ते—"कुविदंग नमसा ये वृधासः, पीवो अन्नाँ रयिवृधः सुमेधा, उच्छन्नुषसः सुदिना अरिप्रा, उशन्ता दूता नदभाय गोपा, यावत्तरस्तन्वो यावदोजः, प्रति वां सूर उदिते सूक्तैर्, धेनुः प्रत्नस्य काम्यं दुहाना, ब्रह्मा ण इन्द्रोप याहि विद्वानूर्ध्वो अग्निः सुमतिं वस्वो अश्रेदुत स्या नः सरस्वती जुषाणेति प्रउगं प्रतिवदन्तर्वद्, विहूतवदूर्ध्ववदष्टमे ऽहन्यष्टमस्याह्नो रूपम्"–इति । "कुविदंग"–इति (सं० ७.९१.१.) प्रथमं प्रतीकम्, "पीवो अन्नान्"–इति (सं० ७.९१.३.) द्वितीयम्, उच्छन्नुषसः"–इति (सं० ७.९०.४.) तृतीयम्, "उशन्ताः"–इति (सं० ७.९१.२.) चतुर्थम्, "यावत्तरः"–इति (सं० ७.९१.४,५.) पञ्चमम्, "प्रति वाम्"–इति (सं० ७.६५.१-२.) षष्ठम्, "धेनुः प्रत्नस्य"–इति (सं० ३.५८.१-२.) सप्तमम्, "ब्रह्मा णः"–इत्यष्टमम् (सं० ७.

२८.१-३.), “ऊर्ध्वो अग्निः”-इति (सं० ७.३९.१-३.) नवमम्, “उतस्या नः”-इति (सं० ७.९५.४-६.) दशमम् । अत्राद्यैस्त्रिभिः प्रतीकैरेकस्तृचः ; चतुर्थी चैका, पञ्चमे द्वे, तदुभयं मिलित्वा द्वितीयस्तृचः ; इतरे पञ्च तृचाः ; एतत्सर्वं प्रउगम् । तत्र दशमे प्रतीके “प्रति स्तोमम्”-इति प्रतिशब्दोपेतं लिंग मस्ति, धेनुः प्रत्नस्येत्यस्य द्वितीयपादे “अन्तः पुत्रः”-इति अन्तःशब्दोपेतं लिंगम्, ऊर्ध्वो अग्निरित्यस्मिन्नूर्ध्वशब्दोपेतं लिंगम् ; अवशिष्टेषु द्वयोराह्वानं लिंगम्,— क्वचिदिन्द्रवाय्वोः क्वचिन्मित्रावरुणयोरिति द्रष्टव्यम् ॥

उक्तमन्त्रगतं छन्दः प्रशंसति— “तदु त्रैष्टुभं त्रिष्टुप्प्रातस्सवन एष त्र्यहः”-इति ॥

अथ मरुत्वतीयशस्त्रे तुल्यशस्त्रक्रमाख्येन लिंगेनोपेतान् मन्त्रान् विधत्ते—“विश्वानरस्य वस्पति (सं० ८.६८.४.) मिन्द्र इत्सोमपा एक (सं० ८.२.४.) इन्द्र नेदीय एदि- (सं० ८.५३.५.) ह्युत्तिष्ठ ब्रह्मणस्पते (सं १.४०.१.) ऽग्निर्नेता (सं० ३.९१.२.) त्वं सोम क्रतुभिः (सं० १.९१.२.) पिन्वन्त्यपो (सं० १.२०.४.) बृहदिन्द्राय गायतेति (सं० ८.८९.१.) द्वितीयेनाह्ना समान आतानोऽष्टमे ऽहन्यष्टमस्याह्नो रूपम्”-इति ॥

महच्छब्दलिंगकं सूक्तं विधत्ते—“शंसा महा मिन्द्रं यस्मिन् विश्वा इति सूक्तं (सं० ३.४९.) महद्वदष्टमेऽहन्यष्टमस्याह्नो रूपम्” -इति । अत्र ‘महाम्”-इत्येष एव महच्छब्दः ॥

पुनरपि महच्छब्दयुक्तं सूक्तान्तरं विधत्ते— “पिबा सोम मभि य मुग्र तर्दः”-इति (सं० ६.१७.) सूक्त मूर्वं गव्यं महि गृणान इन्द्रेति महद्वदष्टमेऽहन्यष्टमस्याह्नो रूपम्”-इति । पिबा

सोम मित्यादिसूक्तस्य “ऊर्वं गव्यम्”–इति द्वितीयः पादः । तत्र “महि”–इत्येष महच्छब्दः ॥

पुनरपि महच्छब्दयुक्तं सूक्तान्तरं विधत्ते—“महश्चित्त्व मिन्द्र यत एतानिति (सं० १.१६९.) सूक्तं, महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपम्”–इति । अत्र “महः”–इत्येष एव महच्छब्दः * ॥

पुनरपि महच्छब्दयुक्तं सूक्तं विधत्ते—“महाँ † इन्द्रो नृवदाचर्षणिप्रा इति (सं० ६.१९.) सूक्तं, महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपम्”–इति । अत्र “महान्”–इत्येव महच्छब्दः ॥

उक्तेषु चतुर्ष्वपि महच्छब्देषु अन्तस्य वैलक्षण्येऽप्यादिभागस्यैकविधत्वात् ‡ महच्छब्दवत्त्वं द्रष्टव्यम् ॥

एतत्सूक्तचतुष्टयगतं छन्दः प्रशंसति— “तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते”–इति ॥

अथान्यन्महच्छब्दोपेतं सूक्तं विधत्ते— “त मस्य द्यावापृथिवी सचेतसेति (सं० १०. ११३.) सूक्तं, यदैत् कृण्वानो महिमान मिन्द्रिय मिति, महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपम्”–इति । त मस्येतिसूक्तस्य “यदैत् कृण्वानः”–इति तृतीयः पादः । तत्र “महिमानं मदेमहि”–इति महच्छब्दः श्रूयते ॥

तस्मिन् सूक्ते निविद्धानं विधत्ते—“तदु जागतं जगत्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति ; तद्वैतच्छन्दो वहति, यस्मिन्निविद्धीयते ; तस्माज्जगतीषु निविदं दधाति”–इति ॥

---

* एतत पङ्क्तित्रयं ११२ पृ० २१ पङ्क्त्यनन्तरं पाठ्यम्, इह तु भ्रमात् मुद्रितम् ।

† “दीर्घादटि समानपादे”–इति (पा० ८. ३. ३.) रुत्वे ऽनुनासिकत्वे (पा० ८. ३. २, ४.) च रूपम् । तदत्र ‘महां’–इति, ‘महाꣳ’–इति, ‘महाँ’–इति च लिपिप्रकारभेदमात्रम्; उच्चारणं त्वेकविध मेव व्यवह्रियते ।

‡ ‘महाम्’, ‘महः’, ‘महि’, ‘महान्’ इति (सं० ३.४९,१.१६९,६.१७,६.१९.) ।

छन्दोद्वयं मिलित्वा प्रशंसति—“मिथुनानि सूक्तानि शस्यन्ते,—त्रैष्टुभानि जागतानि च ; मिथुनं वै पशवः, पशवश्छन्दोमाः, पशूना मवरुद्धै”–इति ॥

उक्तेषु सूक्तेषु महच्छब्दं प्रशंसति—“महद्वन्ति सूक्तानि शस्यन्ते ; महद्वा अन्तरिक्ष मन्तरिक्षस्याप्त्यै”–इति। अन्तरिक्षस्य महत्त्वं विस्तीर्णत्वं प्रसिद्धम् ॥

महच्छब्दयुक्तानां सूक्तानां सङ्ख्यां प्रशंसति— “पञ्च सूक्तानि शस्यन्ते ; पञ्चपदा पङ्क्तिः, पाङ्क्तो यज्ञः, पाङ्क्ताः पशवः, पशवश्छन्दोमाः, पशूना मवरुद्धै”–इति। शंसा महा मिति (सं० ३.४९.१.) प्रथमे सूक्ते महच्छब्दः, महश्चित्त्व मिति (सं० १.१६९.१.) द्वितीये, महि गृणान इति (सं० ६.१७.१.) तृतीये, महाँ इन्द्र इति (सं० ६.१९.१.) चतुर्थे, महिमान मिति (सं० १०.११३.१.) पञ्चमे ; एवं पञ्च सूक्तानि महच्छब्दयुक्तानि शस्यन्ते। पञ्चसङ्ख्यायोगात्पञ्चपादोपेता ‘पङ्क्तिः’ छन्दोरूपा भवति ; यज्ञश्च हविष्पङ्क्त्यादिना ‘पाङ्क्तः’; पशवश्च पङ्क्तिमुखेन ‘पाङ्क्ताः’; छन्दोमानाञ्च पशुसाधनत्वात्पशुत्वम्। अनेन सम्बन्धेन सूक्तपञ्चकं पशुप्राप्त्यै सम्पद्यते ॥

अथ निष्केवल्यशस्त्रस्य रथन्तरसामसाध्यपृष्ठस्तोत्रस्य आधारभूतं स्तोत्रिय मनुरूपञ्च विधत्ते--“अभि त्वा शूर नोनुमो (सं० ८.३२.२२,२३.) ऽभि त्वा पूर्वपीतय इति (सं० १.१९.९,१०.) रथन्तरं पृष्ठं भवत्यष्टमेऽहनि”–इति। यद्यपि युग्मदिनत्वात् न्यायतो बृहत्पृष्ठं प्राप्तम्, तथापि वचनबलाद्रथन्तरपृष्ठत्वं द्रष्टव्यम् ॥

अच्युतत्वलिङ्गयुक्ता मृचं विधत्ते— “यद्वावानेति (सं० १०.७४.६.) धाय्याच्युता”–इति ॥

तस्या उपरि बृहत्सामयोनेः शंसनं विधत्ते— "त्वा मिद्धि हवामह इति (सं० ६.४६.) बृहतो योनि मनु निवर्त्तयति ; बार्हतं ह्येतदहरायतनेन"–इति। अष्टमस्य युग्मदिनत्वात् बृहत्सम्बन्धिस्थानत्वम् ॥

तस्यैव बृहत्सम्बन्धिनं सामप्रगाथं विधत्ते— "उभयं शृणवच्च न इति (सं० ८.६१.१,२.) सामप्रगाथो यच्चेद मद्य यदु च ह्य आसीदिति बार्हते ऽहन्यष्टमे ऽहन्यष्टमस्याह्नो रूपम्"–इति। उभयशब्दस्य तात्पर्य्यं यच्चेद मित्यादिनोच्यते। अथ 'यदिदं' कार्य्य मासीत्, 'ह्यश्च' पूर्वेद्युरपि 'यदु' यदेव कार्यं मासीत्, तदेतदुभय मपि शृणुत मिति तस्य पादस्यार्थः*। युग्मरूपे बार्हते ऽहनि बृहत्सामसम्बद्धः प्रगाथो युक्त एव ॥

अच्युतत्वलिङ्गकं सूक्तविशेषं विधत्ते—"त्य मू षु वाजिनं देवजूत मिति (सं० १०.१७८.) तार्क्ष्यो ऽच्युतः"–इति ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां तृतीयाध्याये
(त्रयोविंशाध्याये) तृतीयः खण्डः ॥ ३ (१८) ॥

---

* "उभयं—स्तोत्रात्मकं शस्त्रात्मकं च"–इति संहिताभाष्ये ऽयमेव सायणः।

॥ अथ चतुर्थः खण्डः ॥

अपूर्व्या पुरुतमान्यस्मा इति सूक्तं महे वीराय तवसे तुरायेति महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं तां सु ते कीर्तिं मघवन् महित्वेति सूक्तं महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं त्वं महाँ * इन्द्र यो ह शुष्मैरिति सूक्तं महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं त्वं महाँ इन्द्र तुभ्यं ह क्षा इति सूक्तं महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते दिवश्चिदस्य वरिमा वि पप्रथ इति सूक्तमिन्द्रं न मह्नेति महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं तदु जागतं जगत्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति तद्वैतच्छन्दो वहति यस्मिन्निविद्धीयते तस्माज्जगतीषु निविदं दधाति मिथुनानि सूक्तानि शस्यन्ते त्रैष्टुभानि च जागतानि च मिथुनं वै पशवः पशवश्छन्दोमाः पशूना मवरुद्ध्यै महद्वन्ति सूक्तानि शस्यन्ते महद्वा अन्तरिक्ष मन्तरिक्षस्याप्त्यै पञ्च पञ्च सूक्तानि शस्यन्ते पञ्चपदा पङ्क्तिः पाङ्क्तो यज्ञः पाङ्क्ताः पशवः पशवश्छन्दोमाः पशूना मवरुद्ध्यै तानि द्वेधा पञ्चान्यानि पञ्चान्यानि दश सम्पद्यन्ते सा दशिनी विरा-

---

* "महा॒ँ" ख ; "महां" ग, घ, ङ । एवं पूर्वत्रोत्तरत्र च सर्वत्रैव ।

ळन्नं। विराळन्नं पशवः। पशवश्छन्दोमाः। पशूना मवरुद्ध्यै। विश्वो देवस्य नेतुस्। तत्सवितुर्वरेण्य। मा विश्वदेवं सत्पति मिति। वैश्वदेवस्य प्रतिपदनुचरौ। बार्हते ऽहन्यष्टमे ऽहन्यष्टमस्याह्नो रूपं। हिरण्यपाणि मूतय इति सावित्रं। मूर्द्धवदष्टमे ऽहन्यष्टमस्याह्नो रूपं। मही द्यौः पृथिवी च न इति। द्यावापृथिवीयं। महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं। युवाना पितरा पुनरित्यार्भवं। पुनर्वदष्टमे ऽहन्यष्टमस्याह्नो रूप। मिमा नु कम्भुवना सीषधामेति। द्विपदाः शंसति। द्विपाद्वै पुरुषश्चतुष्पादाः पशवः। पशवश्छन्दोमाः। पशूना मवरुद्ध्यै। तद्यद् द्विपदाः शंसति। यजमान मेव। तद् द्विप्रतिष्ठं। चतुष्पात्सु पशुषु प्रतिष्ठापयति। देवाना मिद्वो महदिति वैश्वदेवं। महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं। तान्यु गायत्राणि गायत्रतृतीयसवन एष त्र्यह। ऋतावानं वैश्वानरं। मित्याग्निमारुतस्य प्रतिपदग्निर्वैश्वानरो महानिति। महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं। क्रीळं वः शर्द्धो मारुत मिति मारुतं। जम्भे रसस्य वावृध इति। वृधन्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं। जातवेदसे सुनवाम सोम मिति जातवेदस्याच्युता। ऽग्ने मृळ महाँ असीति जातवेदस्यं।

महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं तान्यु गायत्राणि गायत्रतृतीयसवनं एष त्र्यह एष त्र्यहः ॥ ४ (१९) ॥

इत्यैतरेयब्राह्मणे पञ्चमपञ्चिकायां तृतीयोऽध्यायः॥ ३॥

महच्छब्दयुक्तं सूक्तचतुष्टयं विधत्ते—“अपूर्व्या पुरुतमान्यस्मा इति (सं० ६.३२.) सूक्तं, महे वीराय तवसे तुरायेति महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं ; तां सु ते कीर्त्तिं मघवन्महि त्वेति (सं० १०.५४.) सूक्तं, महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं ; त्वं महाँ इन्द्र यो ह शुष्मैरिति (सं० १.६३.) सूक्तं, महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपं ; त्वं महाँ इन्द्र तुभ्यं ह क्षा इति (सं० ४.१७.) सूक्तं ; महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपम्”–इति। अपूर्व्येतिसूक्तस्य द्वितीयपादे “महे वीराय”–इति महच्छब्दः श्रुतः ; इतरस्मिन् सूक्तत्रये प्रथमपादे एव महच्छब्दः स्पष्टः ॥

सूक्तचतुष्टयगतं छन्दः प्रशंसति— “तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते”–इति ॥

यथा मरुत्वतीयशस्त्रे महच्छब्दयुक्तं त्रिष्टुप्छन्दस्कं सूक्तचतुष्टय मुक्त्वा पश्चाज्जगतीच्छन्दस्कं महच्छब्दयुक्तं सूक्तान्तर मुक्तम्, एव मत्र निष्केवल्येऽपि त्रिष्टुप्छन्दस्कं सूक्तचतुष्टय मभिधाय जगतीच्छन्दस्कं सूक्तं विधत्ते— “दिवश्चिदस्य वरिमा वि पप्रथ इति (सं० १.५५.) सूक्त मिन्द्रं न मह्नेति महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपम्”–इति। “दिवश्चिदस्य”–इतिसूक्तस्य इन्द्र मिति द्वितीयपादे “मह्ना”–इति महच्छब्दः श्रुतः ॥

तस्मिन् सूक्ते निविद्धानं विधत्ते— “तदु जागतं जगत्यो वा

एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति; तद्वैतच्छन्दो वहति, यस्मिन्निविद्धीयते ; तस्माज्जगतीषु निविदं दधाति"–इति ॥

छन्दोद्वयं मिलित्वा प्रशंसति —"मिथुनानि सूक्तानि शस्यन्ते,— त्रैष्टुभानि च जागतानि च ; मिथुनं वै पशवः, पशवश्छन्दोमाः, पशूना मवरुद्ध्यै"–इति ॥

सूक्तेषु महच्छब्दपञ्चसङ्ख्याञ्च पूर्ववत्प्रशंसति—"महद्वन्ति सूक्तानि शस्यन्ते ; महद्वा अन्तरिक्ष मन्तरिक्षस्याप्त्यै ; पञ्च पञ्च सूक्तानि शस्यन्ते ; पञ्चपदा पङ्क्तिः, पाङ्क्तो यज्ञः, पाङ्क्ताः पशवः, पशवश्छन्दोमाः, पशूना मवरुद्ध्यै"–इति ॥

शस्त्रद्वयगतानि महच्छब्दयुक्तानि मिलित्वा प्रशंसति—"तानि द्वेधा पञ्चान्यानि पञ्चान्यानि दश सम्पद्यन्ते ; सा दशिनी विराळन्नं, विराळन्नं पशवः, पशवश्छन्दोमाः, पशूना मवरुद्ध्यै"–इति । पूर्वोक्तानि महच्छब्दयुक्तानि सर्वाणि सूक्तानि द्वेधा वियुक्तानि । कथ मिति, तदुच्यते— 'पञ्चान्यानि' मरुत्वतीयशस्त्रगतानि पञ्चसङ्ख्याकानि पृथगेवावस्थितानि ; पुनरपि 'पञ्चान्यानि' निष्केवल्यशस्त्रगतानि पञ्चसङ्ख्याकानि पृथगेवावस्थितानि ; तानि सर्वाणि मिलित्वा दशसङ्ख्याकानि सम्पद्यन्ते । सा 'दशिनी' दशसङ्ख्यासमूहरूपा विराड् भवति ; "दशाक्षरा विराट्"–इतिश्रुतेः । अन्नसाधनत्वाद्विराट्छन्दोऽन्नम् ; तच्चान्नं क्षीरादिरूपं पशुषूत्पन्नत्वात्पशव एव ; ते च पशवश्छन्दोमैश्चतुर्विंशादिभिः स्तोमैस्तद्युक्तैरहोभिर्वा सम्पाद्यत्वाच्छन्दोमस्वरूपाः ; अनेन सम्बन्धेन तत्पञ्चकद्वयं पशुप्राप्त्यै भवति ॥

शस्त्रान्तरस्य प्रतिपदनुचरौ विधत्ते— "विश्वो देवस्य नेतुस्, तत्सवितुर्वरेण्यं, मा विश्वदेवं सत्पति मिति वैश्वदेवस्य प्रतिपद-

नुचरौ; बार्हते ऽहन्यष्टमे ऽहन्यष्टमस्याह्नो रूपम्”–इति । “विश्वो देवस्य”–इत्येका (सं ५.५०.१.), “तत्सवितुर्वरेण्यम्”–इति (सं० ३.६२.१०,११.) द्वे; एतत्त्रयं बृहत्सामसम्बन्धी तृचः शस्त्रस्य प्रतिपत् ; “आ विश्वदेवम्”–इति (सं० ५.८२.७–९.) तृचोऽनुचरः ; तदुभयं बृहत्सामसम्बन्धाद् ‘बार्हतं’ युग्मत्वेन बृहत्सामसम्बन्धिन्यष्टमे ऽहनि योग्यम् ॥

ऊर्द्ध्वलिङ्गोपेतं सवितृदेवताकं सूक्तस्थानीयं चतुर्ऋचं* विधत्ते —“हिरण्यपाणि मूतय इति (सं० १.२२.५–८.) सावित्र मूर्द्ध्ववदष्टमे ऽहन्यष्टमस्याह्नो रूपम्”–इति । द्वितीयपादे “सवितार मुपह्वये”–इतिश्रवणात् सवितृदेवताकं सूक्तम् । ऊर्द्ध्वशब्दस्याश्रवणेऽपि सवितृमण्डलस्योपरिदेशवर्त्तित्वादर्थत ऊर्द्ध्ववत्त्वम् ॥

महच्छब्दोपेतं सूक्तस्थानीयं तृचं† विधत्ते— “मही द्यौः पृथिवी च न इति (सं० १.२२.१३–१५.) द्यावापृथिवीयं, महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपम्”–इति । “मही”–इत्येष एव महच्छब्दः ॥

पुनःशब्दोपेतं सूक्तस्थानीयं तृचं‡ विधत्ते—“युवाना पितरा रित्यार्भवम् (सं० १.२०.४–६.), पुनर्वदष्टमेऽहन्यष्टमस्याह्नो रूपम्” –इति । तृतीयपादे “ऋभवो विष्ट्यक्रत”–इतिश्रवणात् ऋभुदेवताकं सूक्तम् ॥

द्विपदा ऋचो विधाय प्रशंसति—“इमा नु कम् भुवना सीषधामेति द्विपदाः शंसति ; द्विपाद्वै पुरुषश्चतुष्पादाः पशवः ; पशव-

---

* प्रातर्युजित्यादिक मेकविंशत्यृचं सूक्तम्; तस्यैव पञ्चम्यादीनाञ्चतसृणा मिह ग्रहणम् ।

† प्रातर्युजित्यादिक मेकविंशत्यृचं सूक्तम्; तस्यैव त्रयोदश्यादीनां तिसृणा मिह ग्रहणम् ।

‡ अयं देवायेत्यष्टर्चं सूक्तम् ; तस्यैव चतुर्थ्यादीनां तिसृणा मिह ग्रहणम् ।

च्छन्दोमाः, पशूना मवरुद्ध्यै ; तद्यद् द्विपदाः शंसति, यजमान मेव तद् द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति"–इति ॥

महच्छब्दोपेतं बहुदेवताकं सूक्तं विधत्ते—"देवाना मिदवो महदिति (सं० ८.८३.) वैश्वदेवं महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपम्"–इति। महच्छब्दोऽत्र विस्पष्टः ॥

द्विपदाव्यतिरिक्तानां तत्सवितुर्वरेण्य मित्यारभ्य, देवाना मिदवो महदित्यन्तानां छन्दः प्रशंसति—"तान्यु गायत्राणि गायत्रतृतीयसवन एष त्र्यहः"-इति ॥

शस्त्रान्तरस्य प्रतिपदं विधत्ते—"ऋतावानं वैश्वानर मित्याग्निमारुतस्य प्रतिपदग्निर्वैश्वानरो महानिति महद्वदष्टमे ऽहन्यष्टमस्याह्नो रूपम्"–इति। ऋतावान मित्यादिके सूक्तगते * तृचे द्वितीयस्या मृचि "अग्निर्वैश्वानरः"–इति द्वितीयः पादः। तत्र "महान्"-इति महच्छब्दः श्रूयते ॥

वृधशब्दोपेतं सूक्तं विधत्ते—"क्रीळं वः शर्धो मारुत मिति मारुतं; जम्भे रसस्य वावृध इति वृधन्वदष्टमे ऽहन्यष्टमस्याह्नो रूपम्"–इति। क्रीळं व इति (सं० १.३७.) सूक्तस्य पञ्चम्या मृचि "जम्भे रसस्य"-इति पादः श्रूयते। तत्र "वावृधे"–इति वृधिधातुमत्त्वम् ॥

अच्युतत्वलिङ्गा मृचं विधत्ते— "जातवेदसे सुनवाम सोम मिति (सं० १.९९.) जातवेदस्याच्युता"–इति ॥

महच्छब्दयुक्तं जातवेदोदेवताकं सूक्तं विधत्ते— "अग्ने मृळ

● सर्वेष्वेव भाष्यपुस्तकेषु 'सूक्तगते' इति पाठो दृश्यते, परं स नूनं लिपिकरप्रमादप्रवाहजः ; संहितायां कस्मिंश्चिदपि सूक्ते ऽस्य तृचस्यादर्शनात्, स्मृतश्चायं शाखान्तरीयस्तृचः कल्पसूत्रे—"ऋतावानं०—०विराजति"–इति (आश्व० श्रौ० ८.१०.३.)।

महाँ असीति (सं० ४.९.) जातवेदस्त्वं महद्वदष्टमेऽहन्यष्टमस्याह्नो रूपम्”–इति ॥

आग्निमारुतशस्त्रगतेषु सूक्तेषु छन्दः प्रशंसति—“तान्यु गायत्राणि गायत्तृतीयसवन एष त्र्यह एष त्र्यहः”–इति । अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ४ ॥

इतिश्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां तृतीयाध्याये
(त्रयोविंशाध्याये) चतुर्थः खण्डः ॥ ४ (१९) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये ‘वेदार्थप्रकाश’नामभाष्ये
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायाः तृतीयोऽध्यायः ॥

॥ अथ चतुर्थाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ यद्वै समानोदर्कं तन्नवमस्याह्नो रूपं॑ यद्ध्येव तृतीय मह॑स्तदेवैतत् पुनर्यन्नवमं॑ यदश्ववद्यदन्तवद्य॑त् पुनरावृत्तं यत् पुनर्निनृत्तं॑ यद्रतवद्यत् पर्यस्तवद्य॑त् त्रिवद्यदन्तरूपं॑ यदुत्तमे पदे देवता निरुच्यते॑ यदसौ लोको ऽभ्युदितो॑ यच्छुचिवद्यत्सत्यवद्य॑त् क्षेतिवद्यद् गतव॑द्यदोकवद्यत् कृतं यत्तृतीयस्याह्नो रूपं॑ मेतानि वै नवमस्याह्नो रूपा॑ण्यगन्म महा नमसा यविष्ठमिति॑ नवमस्याह्न आज्यं भवति॑ गतवन्नवमे ऽहनि नवमस्याह्नो रूपं॑ तदु त्रैष्टुभं त्रिष्टुप्प्रातस्सवन एष त्र्यहः॑ प्र वीरया शुचयो दद्रिरे ते॑ ते सत्येन मनसा दीध्याना॑ दिवि क्षयन्ता रजसः पृथिव्या॑ मा विश्ववाराश्विना गतं नो॑ ऽयं सोम इन्द्र तुभ्यं सुन्वे॑ आ तु प्र ब्रह्माणो अङ्गिरसो नक्षन्त॑ सरस्वतीं देवयन्तो हवन्त॑ आ नो दिवो बृहतः पर्वतादा॑ सरस्वत्यभि नो नेषि॑ वस्य इति प्रउगं॑ शुचिवत् सत्यवत्॑ क्षेतिवद्गतव-

दोकवन्नवमे ऽहनि नवमस्याह्नो रूपं तदु त्रैष्टुभं त्रिष्टुप्प्रातस्सवन एष त्र्यहस्तं त मिद्राधसे महे त्रय इन्द्रस्य सोमा इन्द्र नेदीय एदिहि प्र नूनं ब्रह्मणस्पतिरग्निर्नेता त्वं सोम क्रतुभिः पिन्वन्त्यपो न किः सुदासो रथ मिति तृतीयेनाह्ना समान आतानो नवमे ऽहनि नवमस्याह्नो रूप मिन्द्रः स्वाहा पिबतु यस्य सोम इति सूक्तं मन्तो वै स्वाहाकारोऽन्तो नवम महर्नवमे ऽहनि नवमस्याह्नो रूपं गायत्साम नभन्यं यथावेरिति सूक्तं मर्चाम तद्वावृधानं स्वर्वदित्यन्तो वै स्वरन्तो नवम महर्नवमे ऽहनि नवमस्याह्नो रूपं तिष्ठा हरी रथ आ युज्यमानेति सूक्त मन्तो वै स्थित मन्तो नवम महर्नवमे ऽहनि नवमस्याह्नो रूप मिमा उ त्वा पुरुतमस्य कारोरिति सूक्तं धियो रथेष्ठा मित्यन्तो वै स्थित मन्तो नवम महर्नवमे ऽहनि नवमस्याह्नो रूपं तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते प्र मन्दिने पितुमदर्चता वच इति सूक्तं समानोदर्कं नवमे ऽहनि नवमस्याह्नो रूपं तदु जागतं जगत्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति तद्वैतच्छन्दो वहति यस्मिन्निविद्धीयते तस्माज्जगतीषु निविदं

दधाति॑ मिथुनानि सूक्तानि शस्यन्ते॑ त्रैष्टुभानि च जागतानि च॑ मिथुनं वै पशवः॑ पशवश्छन्दोमाः॑ पशूना मवरुद्ध्यै॑ पञ्च सूक्तानि शस्यन्ते॑ पञ्चपदा पङ्क्तिः॑ पाङ्क्तो यज्ञ॑ः पाङ्क्ताः पशवः॑ पशवश्छन्दोमा॑ः पशूना मवरुद्ध्यै॑ त्वा मिद्धि हवामहे॑ त्वं ह्येहि चेरव इति॑ बृहत्पृष्ठं भवति॑ नवमे ऽहनि॑ यद्वावानेति धाय्याच्युता॑ ऽभि त्वा शूर नोनुम इति॑ रथन्तरस्य योनि मनु निवर्त्तयति॑ राथन्तरं ह्येतदहरायतने॑ नेन्द्र त्रिधातु शरण मिति सामप्रगाथ॑स्त्रिवान्नवमे ऽहनि नवमस्याह्नो रूपं॑ त्य मू षु वाजिनं॑ देवजूत मिति तार्क्ष्यो ऽच्युतः॑ ॥ १ (२०) ॥

नवमेऽहनि मन्त्रलिङ्गं दर्शयति— "यद्वै समानोदर्कं तन्नवमस्याह्नो रूपम्"—इति । 'समानोदर्कं' तुल्यसमाप्तिकम् ॥

तृतीये ऽहन्युक्तानि लिङ्गान्यस्मिन्नवमे ऽहन्यतिदिशति— "यद्वेव तृतीय महस्तदेवैतत् पुनर्यन्नवमम्"—इति । तृतीय महर्यादृशलिङ्गोपेतं पुनरप्यत्र यन्नवम महस्तदपि तादृशलिङ्गोपेतं द्रष्टव्यम् ॥

तानि लिङ्गान्युपन्यस्यति— "यदश्ववद्यदन्तवद्यत् पुनरावृत्तं यत् पुनर्निनृत्तं यद्रतवद्यत् पर्यस्तवद्यत्त्रिवद्यदन्तरूपं यदुत्तमे पदे देवता निरुच्यते यदसौ लोको ऽभ्युदितः"—इति ॥

अथ नूतनानि लिङ्गानि दर्शयति— "यच्छुचिवद्यत्सत्यवद्यत्

च्चेतिवद्यद्गतवद्यदोकवत्"–इति । शुचिसत्यच्चेतिगतीकशब्दा नवमेऽहनि लिङ्गरूपाः । भूतार्थवाचिप्रत्ययान्तधातुरूपं यदस्ति, तेन सहितं तृतीयेऽहनि विद्यमानं लिङ्गम् ॥

अन्यानि च सर्वाणि लिङ्गानि उपसंहरति—"यत्कृतं यत्तृतीयस्याह्नो रूप मेतानि वै नवमस्याह्नो रूपाणि"–इति ॥

आज्यशस्त्रं विधत्ते— "अगन्म महा नमसा यविष्ठ मिति नवमस्याह्न आज्यं भवति; गतवन्नवमे ऽहनि नवमस्याह्नो रूपम्"–इति। 'गतवद्' गमिधातुयुक्त मित्युक्तम्। अत्र (सं० ७.१२.) च "अगन्म"–इति गमिधातुः श्रूयते ॥

सूक्तगतं छन्दः प्रशंसति— "तदु त्रैष्टुभं त्रिष्टुप्प्रातस्सवन एष त्र्यहः"–इति ॥

प्रउगशस्त्रं विधत्ते— "प्र वीरया शुचयो दद्रिरे ते, ते सत्येन मनसा दीध्याना, दिवि क्षयन्ता रजसः पृथिव्या, मा विश्ववाराश्विना गतन्नो, ऽयं सोम इन्द्र तुभ्यं सुन्व, आ तु प्र ब्रह्माणो अङ्गिरसो नक्षन्त, सरस्वतीं देवयन्तो हवन्त, आ नो दिवो बृहतः पर्वतादा, सरस्वत्यभि नो नेषि वस्य इति प्रउगं; शुचिवत्सत्यवच्चेतिवद्गतवदोकवन्नवमे ऽहनि नवमस्याह्नो रूपम्"–इति। अत्र 'दद्रिरे ते'–इति प्रयोगपाठः*, "प्र वीरया"–इति (सं०७,९०.१–३.) प्रथमं प्रतीकम्, तत्र "शुचयः"–इति शुचिशब्दोपेतं लिङ्गम्; "ते सत्येन"–इति (सं० ७.९०.५–७.) द्वितीयं प्रतीकम्, तत्र सत्यशब्दो लिङ्गम्; "दिवि क्षयन्ता"–इति (सं० ७.६४.१–३.) तृतीयम्, तत्र चेतिधातुर्लिङ्गम्; "आ विश्ववारा"–इति (सं० ७.७०.१–३.) चतुर्थम्, तत्र गतशब्दो लिङ्गम्; "अयं सोमः"–

---

* संहितापाठस्तु "दद्रिरे वां"–इति । 'वां=ते'–इति भाष्यम् । आश्व० श्रौ०८.११.१. द्र० ।

इति (सं० ७.२९.१–३.) पञ्चमम्, तस्मिन् "आ तु प्र याहि हरिवस्तदोकाः"–इति द्वितीयः पादः, तस्मिन् ओकशब्दो लिङ्गम् ; "प्र ब्रह्माणः"–इति (सं० ७.४२.१–३.) षष्ठम्, "सरस्वतीम्"–इति (सं०१०.१७.७.) सप्तमम् ; "आ नो दिवः"–इति (सं० ५.४३.११.) अष्टमम्, अत्र द्वितीयपादे "यजतां गन्तु"–इति गमिधातुः श्रुतः ; "सरस्वत्यभि नः"–इति (सं० ६.६१.१४.) नवमम्, तत्र चतुर्थपादे "अरणानि गन्मा"–इति गमिधातुः श्रुतः । पूर्वोक्तयोः षष्ठसप्तमयोः स्पष्टलिंगाभावेऽपि छत्रिणो गच्छन्तीति न्यायेनेतरसाहचर्याल्लिंगवत्त्वं द्रष्टव्यम् । अत्रान्तिमैस्त्रिभिः प्रतीकैरेकस्तृचः ; इतरे षट् तृचाः । तदेतत्सर्वं प्रउगशस्त्रम् ॥

तत्रत्यं छन्दः प्रशंसति— "तदु त्रैष्टुभं त्रिष्टुप्प्रातस्सवन एष त्र्यहः"–इति ॥

मरुत्वतीयशस्त्रे क्लृप्तिलिंगं दर्शयति— "तं त मिद्राधसे महे (सं० ८.६८.), त्रय इन्द्रस्य सोमा (सं० ८.२.) इन्द्र नेदीय एदिहि (सं० ८.५३.), प्र नूनं ब्रह्मणस्पतिर् (सं० १.४०.), अग्निर्नेता (सं० ३.२०.), त्वं सोम क्रतुभिः (सं० १.९१.), पिन्वन्त्यपो (सं १.६४.), न किः सुदासो रथ मिति (सं० ७.३२.) तृतीयेनाह्ना समान आतानो नवमे ऽहनि नवमस्याह्नो रूपम्"–इति ॥

अन्तलिंगोपेतं सूक्तं विधत्ते— "इन्द्रः स्वाहा पिबतु यस्य सोम इति (सं० ३.५०.) सूक्त मन्तो वै स्वाहाकारोऽन्तो नवम महर्नवमे ऽहनि नवमस्याह्नो रूपम्"–इति । अत्र स्वाहा शब्दो दृश्यते, स च होममन्त्रस्यान्तः ; नवम महर्नवरात्रस्यान्तः ; अतो लिंगसद्भावात् नवमे ऽहन्येतद्युक्तम् ॥

पुनरप्यन्तलिंगोपेतं सूक्तं विधत्ते— “गायत् साम नभन्यं यथा वेरिति (सं० १.१७३.) सूक्त मर्चाम तद्वावृधानं स्वर्वदित्यन्तो वै स्वरन्तो नवम महर्नवमे ऽहनि नवमस्याह्नो रूपम्”-इति। गायदितिसूक्तस्य “अर्चाम”-इति द्वितीयः पादः। तत्र “स्वर्वत्”-इति स्वर्गवाची शब्दः श्रूयते; स्वर्गश्च लोकत्रयस्यान्तः॥

प्रकारान्तरेणान्तवत्सूक्तं विधत्ते— “तिष्ठा हरी रथ आ युज्यमानेति (सं० ३.३५.) सूक्त मन्तो वै स्थित मन्तो नवम महर्नवमे ऽहनि नवमस्याह्नो रूपम्”-इति। तिष्ठेति स्थितिलक्षणो धात्वर्थः श्रूयते; स च गमनस्यान्तः॥

पुनरपि तथाविधं तल्लिङ्गोपेतं सूक्तं विधत्ते— “इमा उ त्वा पुरुतमस्य कारोरिति (सं० ६.२१.) सूक्तं, धियो रथेष्ठा मित्यन्तो वै स्थित मन्तो नवम महर्नवमे ऽहनि नवमस्याह्नो रूपम्”-इति। “इमा उ त्वा”-इतिसूक्तस्य “धियो रथेष्ठाम्”-इति तृतीयः पादः। तत्र स्था मिति स्थितिधात्वर्थो गमनस्यान्तः श्रूयते॥

एतेष्वन्तवत्सु सूक्तेषु छन्दः प्रशंसति— “तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते”-इति।

तुल्यसमाप्तिकं सूक्तं विधत्ते— “प्र मन्दिने पितुमदर्चता वच इति (सं० १.१०१.) सूक्तं समानोदर्कं, नवमे ऽहनि नवमस्याह्नो रूपम्”-इति। अत्र सर्वास्वृक्षु “मरुत्वन्तं सख्याय हवामहे”-इति चतुर्थपादस्यैकत्वात्समानोदर्कत्वम्॥

तस्मिन् सूक्ते निविद्धानं विधत्ते— “तदु जागतं जगत्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति; तद्वैतच्छन्दो वहति, यस्मिन्निविद्धीयते; तस्माज्जगतीषु निविदं दधाति”-इति॥

छन्दोद्वयं मिलित्वा प्रशंसति—"मिथुनानि सूक्तानि शस्यन्ते, त्रैष्टुभानि च जागतानि च ; मिथुनं वै पशवः, पशवश्छन्दोमाः, पशूना मवरुद्ध्यै"–इति । मिथुनस्यैकत्वेऽपि बहुवचनं पूजार्थम् ॥

द्विविधसूक्तगतसङ्ख्यां प्रशंसति—"पञ्च सूक्तानि * शस्यन्ते ; पञ्चपदा पङ्क्तिः, पाङ्क्तो यज्ञः, पाङ्क्ताः पशवः, पशवश्छन्दोमाः, पशूना मवरुद्ध्यै"–इति ॥

निष्केवल्यशस्त्रे बृहत्सामसाध्यपृष्ठस्तोत्रस्याधारभूतं स्तोत्रियं तृचं तदनुरूपञ्च विधत्ते—"त्वा मिद्धि हवामहे (सं० ६.४६.), त्वं ह्येहि चेरव इति (सं० ८.६१.) बृहत्पृष्ठं भवति नवमे ऽहनि"–इति । अयुग्मस्याह्नो राथन्तरत्वेऽपि बृहत्सम्बन्धस्य वाचनिकत्वान्नवमे ऽहनि तद्योग्यता ॥

तृतीयेऽहनि विहितानि अत्र पुनर्विधीयन्ते—"यद्वावानेति (सं० १०.७४.६.) धाय्याच्युतता, ऽभि त्वा शूर नोनुम इति (सं० ७.३२.२२.) रथन्तरस्य योनि मनु निवर्त्तयति ; राथन्तरं ह्येतदहरायतनेनेन्द्र त्रिधातु शरण मिति (सं० ६.४६.९,१०.) सामप्रगाथस्त्रिवान्नवमे ऽहनि नवमस्याह्नो रूपं ; त्य मू षु वाजिनं देवजूत मिति (सं० १०.१७८.) तार्क्ष्यो ऽच्युतः"–इति ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां चतुर्थाध्याये
(चतुर्विंशाध्याये) प्रथमः खण्डः ॥ १ (२०) ॥

---

* 'इन्द्रः स्वाहा', 'गायत्साम', 'तिष्ठा हरी', 'इमा उ त्वा'–इति चत्वारि त्रैष्टुभानि, 'प्र मन्दिने'–प्रत्येकं जागतम् ; सङ्कलनया पञ्च (१२७, १२८ पृ०) ।

॥ अथ द्वितीयः खण्डः ॥

सं च त्वे जग्मुर्गिर इन्द्र पूर्वीरिति सूक्तं गतवन्नवमे ऽहनि नवमस्याह्नो रूपं कदा भुवन् रथक्षयाणि ब्रह्मेति सूक्तं क्षेतिवदन्तरूपं क्षेतीव वा अन्तं गत्वा नवमे ऽहनि नवमस्याह्नो रूपमा सत्यो यातु मघवाँऽ ऋजीषीति सूक्तं सत्यवन्नवमे ऽहनि नवमस्याह्नो रूपं तत्त इन्द्रियं परमं पराचैरिति सूक्तं अन्तो वै परमन्तो नवममहर्नवमे ऽहनि नवमस्याह्नो रूपं तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते ऽहं भुवं वसुनः पूर्व्यस्पतिरिति सूक्तमहं धनानि सञ्जयामि शश्वत इत्यन्तो वै जितमन्तो नवममहर्नवमे ऽहनि नवमस्याह्नो रूपं तदु जागतं जगत्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति तद्वैतच्छन्दो वहति यस्मिन्निविद्धीयते तस्माज्जगतीषु निविदं दधाति मिथुनानि सूक्तानि शस्यन्ते त्रैष्टुभानि च जागतानि च मिथुनं वै पशवः पशवश्छन्दोमाः पशूनामवरुद्ध्यै पञ्च पञ्च सूक्तानि शस्यन्ते पञ्चपदा पङ्क्तिः पाङ्क्तो यज्ञः पाङ्क्ताः पशवः पशवश्छन्दोमाः पशूनामवरुद्ध्यै तानि द्वेधा पञ्चान्यानि पञ्चा-

न्यानि दश सम्पद्यन्ते सा दशिनी विराळन्नं विराळन्नं पशवः पशवच्छन्दोमाः पशूना मवरुद्ध्यै तत्सवितुर्वृणीमहे ऽद्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ राथन्तरे ऽहनि नवमे ऽहनि नवमस्याह्नो रूपं प्र वां महि द्यवी अभीति द्यावापृथिवीयं शुची उप प्रशस्तय इति शुचिवन्नवमे ऽहनि नवमस्याह्नो रूप मिन्द्र इषे ददातु नस्तेनो रत्नानि धत्तनेत्यार्भवं त्रिरासाप्तानि सुन्वत इति त्रिवन्नवमे ऽहनि नवमस्याह्नो रूपं बभ्रुरेको विषु णः सूनरो युवेति द्विपदाः शंसति द्विपाद्वै पुरुषश्चतुष्पादाः पशवः पशवश्छन्दोमाः पशूना मवरुद्ध्यै तद्यद् द्विपदाः शंसति यजमान मेव तद् द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति ये त्रिंशति त्रयस्पर इति वैश्वदेवं त्रिवन्नवमे ऽहनि नवमस्याह्नो रूपं तान्यु गायत्राणि गायत्रतृतीयसवन एष त्र्यहो वैश्वानरो न ऊतय इत्याग्निमारुतस्य प्रतिपदा प्र यातु परावत इत्यन्तो वै परावतोऽन्तो नवम महर्नवमे ऽहनि नवमस्याह्नो रूपं मरुतो यस्य हि क्षय इति मारुतं त्रेतिवदन्तरूपं त्रेतीव वा अन्तं गत्वा नवमे ऽहनि नवमस्याह्नो रूपं जातवेदसे सुनवाम सोम मिति

जातवेदस्याच्युता॑ प्राग्नये वाच मीरयेति जातवेदस्यं॑ समानोदर्कं॑ नवमे ऽहनि नवमस्याह्नो रूपं॑ स नः पर्षदति द्विषः स नः पर्षदति द्विष इति शंसति॑ बहु वा एतस्मिन्नवरात्रे॑ किञ्च किञ्च वारणं क्रियते॑ शान्त्या एव॑ तद्यत्स नः पर्षदति द्विषः॑ स नः पर्षदति द्विष इति शंसति॑ सर्वस्मादेवैनांस्तदेनसः प्रमुञ्चति॑ तान्यु गायत्राणि गायत्रतृतीयसवन एष त्र्यहः॑ ॥ (२) २१ ॥

अथ गमिधातुयुक्तं सूक्तं विधत्ते— "सं च त्वे जग्मुर्गिर इन्द्र पूर्वीरिति (सं० ६.३४.) सूक्तं, गतवन्नवमे ऽहनि नवमस्याह्नो रूपम्"–इति। जग्मुरिति गमिधातुः ॥

क्षेतिधातुलिङ्गकं सूक्तं विधत्ते— "कदा भुवन् रथक्षयाणि ब्रह्मेति (सं० ६.३५.) सूक्तं, क्षेतिवदन्तरूपं ; क्षेतीव वा अन्तं गत्वा नवमे ऽहनि नवमस्याह्नो रूपम्"–इति। कदा भुवन्नित्यत्र "क्षयाणि"–इति क्षेतिधातुरूपं श्रूयते। क्षेतिधातुरूपश्चान्तरूपम्। कथ मेतदिति, तदुच्यते— मार्गस्यान्तं गत्वा 'क्षेतीव वै' क्वचिन्निवसत्येव, अतो निवासार्थवाचिनो क्षेतिधातोरन्तरूपत्वम् ॥

सत्यलिङ्गकं सूक्तं विधत्ते—"आ सत्यो यातु मघवाँऽ ऋजीषीति (सं० ६.१६.) सूक्तं, सत्यवन्नवमे ऽहनि नवमस्याह्नोरूपम्"–इति। सत्यशब्दोऽत्र विस्पष्टः ॥

अन्तलिङ्गोपेतं सूक्तं विधत्ते— "तत्त इन्द्रियं परमं पराचैरिति (सं० १.१०३.) सूक्त मन्तो वै परम मन्तो नवम महर्नवमे

ऽहनि नवमस्याह्नो रूपम्"-इति। "तत्ते"-इतिसूक्ते परमशब्दः उत्कर्षवाची विद्यते; उत्कर्षादधिकस्य कस्यचिदभावात् परमशब्दस्यान्तवाचित्वम् ॥

"सञ्च त्वे"-इत्यादिसूक्तचतुष्टयगतं छन्दः प्रशंसति— "तदु त्रैष्टुभं, तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते"-इति ॥

अन्तलिङ्गक मन्यत् सूक्तं विधत्ते—"अहं भुवं वसुनः पूर्व्यस्पतिरिति (सं० १०.४८.) सूक्त महं धनानि सञ्जयामि शश्वत इत्यन्तो वै जित मन्तो नवम महर्नवमे ऽहनि नवमस्याह्नो रूपम्" -इति। "अहं भुवम्"-इतिसूक्तस्य "अहं धनानि"-इति द्वितीयः पादः। तत्र "जयामि"-इति श्रूयते; जयश्च युद्धस्यान्तः ॥

तस्मिन् सूक्ते निविद्धानं विधत्ते—"तदु जागतं,—जगत्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति; तद्वैतच्छन्दो वहति, यस्मिन्निविद्धीयते; तस्माज्जगतीषु निविदं दधाति"-इति ॥

सूक्तगतं छन्दोद्वयं सूक्तसङ्ख्याञ्च प्रशंसति—"मिथुनानि सूक्तानि शस्यन्ते,— त्रैष्टुभानि च, जागतानि च; मिथुनं वै पशवः, पशवश्छन्दोमाः, पशूना मवरुद्ध्यै; पञ्च पञ्च सूक्तानि शस्यन्ते; पञ्चपदा पङ्क्तिः, पाङ्क्तो यज्ञः, पाङ्क्ताः पशवः, पशवश्छन्दोमाः, पशूना मवरुद्ध्यै; तानि द्वेधा पञ्चान्यानि पञ्चान्यानि दश सम्पद्यन्ते; सा दशिनी विराळन्नं; विराळन्नं पशवः, पशवश्छन्दोमाः, पशूना मवरुद्ध्यै"-इति। मरुत्वतीयनिष्केवल्यशस्त्रद्वयगतसूक्तापेक्षया 'पञ्च पञ्च' इति द्विरुक्तिः ॥

तृतीये ऽहनि विहितौ वैश्वदेवस्य प्रतिपदनुचरावत्रापि विधत्ते—"तत्सवितुर्वृणीमहे (सं० ५.८२.१-३.), ऽद्या नो देव

सवितरिति (सं० ५.८२.४–६.) वैश्वदेवस्य प्रतिपदनुचरौ ; राथन्तरे ऽहनि नवमे ऽहनि नवमस्याह्नो रूपम्"–इति ॥

अन्तलिङ्गकं तृचात्मकं सूक्तं विधत्ते —"दोषो आगादिति* सावित्र मन्तो वै गत मन्तो नवम महर्नवमे ऽहनि नवमस्याह्नो रूपम्"–इति । "आगात्"–इति गमिधात्वर्थः ; गमनञ्च स्थितेरन्तः ; अतोऽन्तवत्त्वं लिङ्गम् ॥

शुचिलिङ्गकं सूक्तस्थानीयं तृचं विधत्ते – "प्र वां महि द्यवी अभीति (सं० ४.५६.५–७.), द्यावापृथिवीयं ; शुची उप प्रशस्तय इति शुचिवन्नवमे ऽहनि नवमस्याह्नो रूपम्"–इति । "महि द्यवी"–इतिश्रवणादिदं द्यावापृथिवीयम् । तस्य तृतीयपादे "शुची उप"–इति शुचिशब्दः श्रूयते ॥

त्रिशब्दोपेतं सूक्तस्थानीयं तृचं विधत्ते—"इन्द्र इषे ददातु नस्तेनो रत्नानि धत्तनेत्यार्भवं, त्रिरा साप्तानि सुन्वत इति त्रिवन्नवमे ऽहनि नवमस्याह्नो रूपम्"–इति । "इन्द्र इषे"–इत्यृगेका (सं० ८.९३.३४.), "तेनो रत्नानि"–इति (सं० १.२०.७,८.) द्वे, त्रितयं मिलित्वा ऋभुदेवताकं सूक्तम् ; "ऋभुक्षण मृभुम्"–इतिश्रवणात् (सं० ८.९३.३४.) । "त्रिरा साप्तानि"–इतिपादे (सं० १.२०.७.) त्रिशब्दः श्रुतः ॥

पादद्वयोपेता ऋचो विधाय प्रशंसति— "बभ्रुरेको विषुणः सूनरो युवेति (सं० ८.२९.१–१०.) द्विपदाः शंसति ; द्विपाद्वै पुरुषश्चतुष्पादाः पशवः, पशवश्छन्दोमाः, पशूना मवरुद्ध्यै ; तद्यद् द्विपदाः शंसति, यजमान मेव तद् द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति"–इति ॥

---

* ७५ पृ० टीप्पन्यां मन्त्रपाठादिकं द्रष्टव्यम् ।

त्रिशब्दोपेतं बहुदेवताकं सूक्तं विधत्ते— "ये त्रिंशति त्रयस्पर इति (सं० ८.२८.) वैश्वदेवं त्रिवन्नवमे ऽहनि नवमस्याह्नो रूपम्"–इति । "त्रिंशति"–इतिश्रवणाद् बहुदेवताकत्वम् । "त्रयः"–इति त्रिशब्दो विस्पष्टः ॥

तत्सूक्तगतं छन्दः प्रशंसति—"तान्यु गायत्राणि गायत्रतृतीयसवन एष त्र्यहः"–इति । 'तान्यु' वैश्वदेवशस्त्रे प्रोक्तानि तान्यपि सूक्तानि ॥

शस्त्रान्तरस्य प्रतिपदं विधत्ते— "वैश्वानरो न ऊतय इत्याग्निमारुतस्य प्रतिपदा प्र यातु परावत इत्यन्तो वै परावतोऽन्तो नवम महर्नवमे ऽहनि नवमस्याह्नो रूपम्"–इति । अत्र सूत्रपठिते * तृचे "परावतः"–इति शब्दो दूरदेशवाची ; स च देशो मार्गस्यान्त इत्यन्तवत्त्वं लिङ्गम् ॥

प्रकारान्तरेणान्तलिङ्गकं सूक्तं विधत्ते— "मरुतो यस्य हि क्षय इति (सं० १.८६.) मारुतं, चेतिवदन्तरूपं ; चेतीव वा अन्तं गत्वा नवमे ऽहनि नवमस्याह्नो रूपम्"–इति । "मरुतः"–इतिश्रवणात् 'मारुतम्', "क्षयः"–इतिश्रवणात् 'चेतिवत्' क्षयतिधातुयुक्तम् । स च धात्वर्थोऽत्र स्वरूपम् । कथ मेतदिति, तदुच्यते— सर्वो हि पुरुषो मार्गस्यान्ते गत्वा 'चेतीव वै' क्वचिन्निवसत्येव ; सोऽय मन्तो लिङ्गम् ॥

अच्युतत्वलिङ्गयुक्ता मृचं विधत्ते—"जातवेदसे सुनवाम सोम मिति (सं० १.९९.१.) जातवेदस्याच्युता"–इति ।

जातवेदोवाचकाग्निशब्दोपेतं सूक्तं विधत्ते— "प्राग्नये वाच

---

* आश्व० श्रौ० ८.११.४ । तत्र "वैश्वानरो न ऊतये"–इति प्रथमा, "वैश्वानरो न आगमत्"–इति द्वितीया, "वैश्वानरो अङ्गिरोभ्यः"–इति तृतीया ।

मीरयेति (सं० १०.१८७.) जातवेदस्यं समानोदर्कं, नवमे ऽहनि नवमस्याह्नो रूपम्"-इति। एतदीयास्वृक्षु "स नः पर्षदति द्विषः"-इतिपादेन समाप्तिदर्शनात् समानोदर्कत्वम् ॥

तस्य पादस्य पुनःपुनरावृत्तिं दर्शयति— "स नः पर्षदतिद्विषः, स नः पर्षदति द्विष इति शंसति ; बहु वा एतस्मिन्नवरात्रे, किञ्च किञ्च वारणं क्रियते, शान्त्या एव ; तद्यत्स नः पर्षदति द्विषः, स नः पर्षदति द्विष इति शंसति, सर्वस्मादेवैनांस्तदेनसः प्रमुञ्चति"-इति। "स नः"-इत्यादिपादस्य सर्वास्वृक्षु पठितस्य सङ्ग्रहार्थं वीप्सारूपेण द्विरुक्तिः। एत मेव पादं पुनः पुनः शंसतीत्यत्र को ऽभिप्राय इति, सोऽभिधीयते— एतस्मिन्नवरात्रे त्रिविधत्र्यहसमष्टिरूपे प्रयोगाधिक्यात्तदा तदा विस्मृत्य कि मपि 'वारणं' वारणीयं निषिद्धानुष्ठानं 'बहु वै' प्रभूत मेव क्रियते, अतः स्वस्य शान्त्यर्थं मेव पुनः पुनः शस्यते। तेन स न इत्यादेः पुनः पुनः शंसनेन, तस्मात् सर्वस्मात् निषिद्धाचरणात् 'एनान्' ऋत्विग्यजमानान् प्रमोचयति। तस्य पादस्याय मर्थः— यस्याग्नेः स्तुतिरूपा वागीर्यते, सोऽग्निः पापरूपान् शत्रूनतिक्रम्य 'नः' अस्मान् 'पर्षद्' विघ्नपरिहारेण कर्मपारं नयत्विति ॥

एतच्छस्त्रगतसूक्तेषु छन्दः प्रशंसति— "तान्यु गायत्राणि गायत्रतृतीयसवन एष त्र्यहः"-इति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां चतुर्थाध्याये
(चतुर्विंशाध्याये) द्वितीयः खण्डः ॥ २ (२१) ॥

॥ अथ तृतीयः खण्डः ॥

पृष्ठ्यं षळह मुपयन्ति यथा वै मुख मेवं पृष्ठ्यः षळहस्तद्यथान्तरं मुखस्य जिह्वा तालु दन्ता एवं छन्दोमा अथ येनैव वाचं व्याकरोति येन स्वादु चास्वादु च वि जानाति तद्दशम महर्यथा वै नासिके एवं पृष्ठ्यः षळहस्तद्यथान्तरं नासिकयोरेवं छन्दोमा अथ येनैव गन्धान्वि जानाति तद्दशम महर्यथा वा अक्ष्येवं पृष्ठ्यः षळहस्तद्यथान्तर मक्ष्णः कृष्ण मेवं छन्दोमा अथ यैव कनीनिका येन पश्यति तद्दशम महर्यथा वै कर्ण एवं पृष्ठ्यः षळहस्तद्यथान्तरं कर्णस्यैवं छन्दोमा अथ येनैव शृणोति तद्दशम महः श्रीर्वै दशम महः श्रियं वा एत आ गच्छन्ति ये दशम महरागच्छन्ति तस्माद्दशम मह रविवाक्यं भवति मा श्रियो ऽववादिष्मेति दुरववदं हि श्रेयसस्ते ततः सर्पन्ति ते मार्जयन्ते ते पत्नीशालां सम्प्रपद्यन्ते तेषां य एता माहुतिं विद्वान्त्स ब्रूयात् समन्वारभध्व मिति स जुहुयादिह रमेह रमध्व मिह धृतिरिह स्वधृतिरग्ने ऽवाट् स्वाहावाळिति स यदिह रमेत्याहास्मिन्नेवैनांस्तल्लोके रमयतीह रमध्व मिति यदाह प्रजा मेवैषु तद्रमयतीह धृतिरिह

स्वधृतिरिति यदाह प्रजां चैव तद्वाचं च यजमानेषु दधात्यग्ने ऽवाळिति रथन्तरं स्वाहावाळिति बृहद्देवानां वा एतन्मिथुनं यद् बृहद्रथन्तरे देवाना मेव तन्मिथुनेन मिथुन मवरुन्धते देवानां मिथुनेन मिथुनं प्र जायन्ते प्रजात्यै प्र जायते प्रजया पशुभिर्य एवं वेद ते ततः सर्पन्ति ते मार्जयन्ते त आग्नीध्रं सम्प्रपद्यन्ते तेषां य एता माहुतिं विद्यात् स ब्रूयात् समन्वारभध्व मिति स जुहुयादुप सृजन् धरुणं मातरं धरुणो धयन् रायस्पोष मिष मूर्ज मस्मासु दीधरत्स्वाहेति रायस्पोष मिष मूर्ज मवरुन्ध आत्मने च यजमानेभ्यश्च यत्रैवं विद्वानेता माहुतिं जुहोति ॥ ३ (२२) ॥

द्वादशाहे प्रायणीयोदयनीयरूप आद्यन्ते ये अहनी, तयोर्मध्ये दशरात्रोऽस्ति ; तस्मिंश्च त्रयो भागाः,— पृष्ठ्यः षडह एको भागः, छन्दोमनामकास्त्रयोऽहर्विशेषाः द्वितीयो भागः, दशम महस्तृतीयो भागः । तस्य भागस्य विधेयतया प्रशंसा कर्त्तव्या । इतरभागयोरपि अत्र या प्रशंसा प्रतीयते, सापि विधेयस्य दशमस्याह्नः प्रशंसार्थ मेव ; तस्मिन्नहनि प्रशंसातिशयस्य गम्यमानत्वात् । तत्र चत्वारो दृष्टान्ता विवक्षिताः । तेषां मध्ये प्रथमेन दृष्टान्तेन प्रशंसति— "पृष्ठ्यं षळह मुपयन्ति ; यथा वै मुख मेवं पृष्ठ्यः षळहस्तद्यथान्तरं मुखस्य जिह्वा तालु दन्ताः, एवं छन्दोमाः ; अथ येनैव वाचं व्याकरोति, येन स्वादु चास्वादु च विजानाति,

तद्दशम महः”–इति। याज्ञिका दशरात्रे पृष्ठ्यं षळह मनुतिष्ठन्ति, स मुखस्थानीयः; मुखस्याभ्यन्तरे जिह्वा तालु दन्ताश्चेति त्रयोऽवयवास्तिष्ठन्ति, तत्स्थानीयास्त्रयश्छन्दोमाः। अथ तद् ‘येन’ विलक्षणेन येनैव वागिन्द्रियेण ‘वाचं व्याकरोति’ शब्द मुच्चारयति। येन च रसनेन्द्रियेण स्वाद्वस्वादुविभागं जानाति, तदिन्द्रियद्वयस्थानीय मेतद्दशम महः॥

द्वितीयेन दृष्टान्तेन प्रशंसति— “यथा वै नासिके एवं पृष्ठ्यः षळहस्तद्यथान्तरं नासिकयोरेवं छन्दोमा, अथ येनैव गन्धान्विजानाति तद्दशम महः”–इति। छिद्रद्वययुक्तत्वेन भागद्वयविवक्षया ‘नासिके’ इति द्विवचनम्। तयोः ‘अन्तरं’ मध्यवर्त्ति छिद्रम्; गन्धग्राहकघ्राणेन्द्रियस्थानीयं दशम महः॥

तृतीयेन दृष्टान्तेन प्रशंसति— “यथा वा अक्ष्येवं पृष्ठ्यः षळहस्तद्यथान्तर मक्ष्णः कृष्ण मेवं छन्दोमा, अथ यैव कनीनिका, येन पश्यति, तद्दशम महः”–इति। अक्षिशब्देन शुक्लमण्डलसहितं सर्वं गोलकं विवक्षितम्। तत्र भागत्रय मारण्यकाण्डे वक्ष्यते— “त्रिवृदिव वै चक्षुः शुक्लं कृष्णं कनीनिका”–इति (२आ० ७.५.५.)। शुक्लमण्डलमध्ये कृष्णमण्डलं, तस्य मध्ये स्वल्पा वर्त्तुलाकारा कनीनिका, तत्रावस्थितेन चक्षुरिन्द्रियेण जनो रूपं पश्यति। तत्र शुक्लमण्डलरूपगोलकस्थानीयः पृष्ठ्यः षळहः, कृष्णमण्डलस्थानीयाः छन्दोमाः, कनीनिकागतेन्द्रियस्थानीयं दशम महः॥

चतुर्थदृष्टान्तेन प्रशंसति— “यथा वै कर्ण एवं पृष्ठ्यः षळहस्तद्यथान्तरं कर्णस्यैवं छन्दोमा, अथ येनैव शृणोति, तद्दशम महः”–इति। कर्णशब्देन शष्कुल्याकारं गोलक मुच्यते। तत्स्थानीयः पृष्ठ्यः षळहः। तस्य कर्णस्य ‘अन्तरं’ यन्मध्यवर्त्ति

छिद्रं तत्स्थानीयाः छन्दोमाः। तच्छिद्रावस्थितेनेन्द्रियेण जनः शब्दं शृणोति, तदिन्द्रियस्थानीयं दशम महः ॥

अथ तस्मिन् दशमेऽहनि कञ्चिन्नियमं विधत्ते—“श्रीर्वै दशम महः,— श्रियं वा एत आ गच्छन्ति, ये दशम महरागच्छन्ति तस्माद्दशम महरविवाक्यं भवति, मा श्रियो ऽववादिष्मेति दुरववदं हि श्रेयसः”–इति। यदेतद्दशम महः, सा ‘श्रीर्वै’ भोग्यवस्तुसमृद्धिस्वरूप मेव; “ऋध्नोति यो द्वादशाहेन यजते”–इतिश्रुत्यन्तरात्*। अतो ये दशम महः ‘आगच्छन्ति’ अनुतिष्ठन्ति, ते श्रिय मेव प्राप्नुवन्ति; यस्मात् श्रीरूप मेतदहः, तस्माद्विवाक्यरहितं भवति; यदि प्रमादान्मन्त्रे ऽन्यत्र वा कश्चित्किञ्चिद्विरुद्ध माचरेत्, तदानीं तद्विरुद्ध मन्येन ‘वाच्यं’ वक्तव्यम्,— अत्र त्वया विरुद्ध मनुष्ठितं, तदेवं सम्यगनुतिष्ठेत्यभिज्ञेन कर्मान्तरे वक्तव्यम्; इह तु तस्य विरुद्धमानवचनस्य निषिद्धत्वादिद महः ‘अविवाक्यम्’। तथा चाश्वलायन आह—“नास्मिन्नहनि केनचित्कस्यचिद्विवाच्य मविवाक्य मित्येतदाचक्षते; संशये बहिर्वेदि स्वाध्यायप्रयोगो ऽन्तर्वेदीत्येके”–इति (श्रौ० ८.१२.१०-१२.)॥

परेण प्रयुज्यमानं विरुद्धं दृष्ट्वापि तन्न ब्रूयादितिनियमस्योपपत्तिरुच्यते—“श्रियो माववादिष्मेति”–इति। दशमस्याह्नः श्रीरूपत्वात्तस्य यदववदनं तत् श्रिया एव भवति। अवमतस्य विरुद्धस्य वदनम् ‘अववदनं’ निन्दा; यदि दशम महः ‘अववादिष्म’ निन्दां कुर्मः, तर्हि श्रिया एव निन्दा सम्पद्यते; अतो वयं श्रियो ‘माववादिष्म’ निन्दा मा कुर्मः इति विवाच्यं परित्यजता मभिप्रायः। लोकेऽपि श्रेयसो विद्यैश्वर्यादिनाधिकस्य पुरुषस्याचरणं ‘दुरववदं

---

* “द्वादशाहं परिभूय सर्वा मृद्धि मार्ध्नोत्”–इति २६६ पृ०।

हि' अववादेन निन्दया रहितम् । अत एव पित्राचार्य्यादीनां निन्दां न कुर्वन्ति, द्वेषिभिः क्रियमाण मपि न शृण्वन्ति । तदेव मविवाच्यत्वधर्मोऽत्र विहितः । यद्वा वाक्यद्वय मिदम्,— दशम महरागच्छन्तीत्यन्तो दशमस्याङ्गो विधिः, तस्मादित्यादिरविवाक्यत्वनियमविधिः । सोऽपि शाखान्तरेऽप्येव माम्नायते—"तस्माद्दशमेऽहन्यविवाक्ये उपहताय न व्युच्यम्"–इति (तै० सं० ७.३.१.२.) ॥

अथैतस्मिन् दशमेऽहनि मानसग्रहाय प्रसर्पणं विधत्ते— "ते ततः सर्पन्ति"–इति । 'ते' अनुष्ठातारः, 'ततः' पत्नीसंयाजान्तानुष्ठानादूर्ध्वं प्राञ्चः उदेत्य मानसाय प्रसर्पेयुः । प्रसर्पणं नाम तदर्थः प्रयत्नः । सर्वेष्वहर्गणेषु कर्मसु अन्तिमादह्नः इतराण्यहानि पत्नीसंयाजान्तानि, अन्तिमं त्वेक मेवोदवसानीयान्तम् । तथा चाश्वलायन आह— "प्रातरनुवाकाद्युदवसानीयान्तान्यन्त्यानि ; पत्नीसंयाजान्तानीतराणि"–इति (श्रौ० ७. १. ४, ५.) । तथा सत्यपि वालस्येतरत्वन्यायेन पत्नीसंयाजान्तत्वे प्राप्ते वचनेन तत ऊर्ध्वं मानसग्रहो विधत्ते । तदर्थं 'प्रसर्पन्ति' सदसो विनिर्गत्य यथायथं मार्गेण गच्छेयुः ॥

गतानां तेषां तीर्थदेशे मार्जनं विधत्ते— "ते मार्जयन्ते"–इति ॥

मार्जनादूर्ध्वं होमार्थं स्थानविशेषप्राप्तिं विधत्ते— "ते पत्नीशालां सम्प्रपद्यन्ते"–इति । पत्नी हि गार्हपत्यस्य समीपेऽवतिष्ठत इति सैव 'पत्नीशाला' ; तत्र गच्छेयुः ॥

गतानां तेषां होमं विधत्ते— "तेषां य एता माहुतिं विद्यात्स ब्रूयात्समन्वारभध्व मिति, स जुहुयात्"–इति । 'तेषां' होमार्थं गार्हपत्यसमीपं गतानां मध्ये 'यः' पुमान् 'एतां' वक्ष्यमाणा माहुतिं

जानाति, 'सः' पुमानितरान् प्रति 'समन्वारभध्वं' यूयं सर्वेऽपि मां स्पृशतेति ब्रूयात्। तैः समन्वारब्धः 'सः' पुमानाहुतिं जुहूयात्॥

तत्र मन्त्रं दर्शयति— "इह रमेह रमध्व मिह धृतिरिह स्वधृतिरग्ने ऽवाट् स्वाहावाळिति"–इति। हे यजमानाः! 'इह' अस्मिन् लोके 'रम' रमणं कुरुत। हे पुत्रपौत्रादिकाः प्रजाः! 'इह' एतेषु यजमानेषु 'रमध्व' क्रीडत, 'इह' यजमानेषु 'धृतिः' अपत्यानां प्रजानां धारण मस्तु। 'इह' यजमानेषु 'स्वधृतिः' वेदशास्त्रादिरूपायाः वाचः स्वाधीनत्वेन धारण मस्तु। हे अग्ने! 'अवाट्' रथन्तररूपेण यज्ञस्य वहनं कुरु। हे 'स्वाहा' देवि! अग्निजाये! 'अवाट्' बृहत्सामरूपेण यज्ञस्य वहनं कुरु। 'इति'-शब्दो मन्त्रसमाप्त्यर्थः॥

यथोक्तं मन्त्रार्थ मभिप्रेत्य क्रमेण मन्त्रावयवानां सर्वेषां तात्पर्यं दर्शयति— "स यदिह रमेत्याहास्मिन्नेवैनांस्तल्लोके रमयतीह रमध्व मिति यदाह प्रजा मेवैषु तद्रमयतीह धृतिरिह स्वधृतिरिति यदाह प्रजां चैव तद्वाचं च यजमानेषु दधात्यग्ने ऽवाळिति रथन्तरं स्वाहावाळिति बृहद्"-इति। 'सः' मन्त्रः इह रमेति भाग माहेति यदस्ति, तेनास्मिन्नेव लोके 'एनान्' यजमानान् रमयति। एव मुत्तरभागा अपि योज्याः॥

बृहद्रथन्तररूपं भागद्वयं विशेषेण प्रशंसति— "देवानां वा एतन्मिथुनं यद्बृहद्रथन्तरे, देवाना मेव तन्मिथुनेन मिथुन मवरुन्धते; देवानां मिथुनेन मिथुनं प्र जायन्ते प्रजात्यै"–इति। यदेतत् अन्त्यमन्त्रद्वयं बृहद्रथन्तररूप मुक्तम्, तदेतद्देवानां सम्बन्धि मिथुनम्। अतस्तद्भागद्वयपाठेन देवसम्बन्धेनैव मिथुनेन मानुषं मिथुनं प्राप्नुवन्ति। ततो देवसम्बन्धिमिथुनानुग्रहेण मानुषमिथुन

सुत्पादयन्ति । ततः सोऽयं मन्त्रो यजमानस्य प्रजोत्पादनाय सम्पद्यन्ते ॥ वेदनं प्रशंसति— "प्र जायते प्रजया पशुभिर्य एवं वेद"–इति ॥

गार्हपत्ये यथा होमो विहितः, तथैवाग्नीध्रीये कञ्चिद्धोमं विधत्ते—"ते ततः सर्पन्ति, ते मार्जयन्ते, त आग्नीध्रं सम्प्रपद्यन्ते; तेषां य एता माहुतिं विद्यात्स ब्रूयात्समन्वारभध्व मिति, स जुहुयात्"–इति । गार्हपत्यस्थानाद् बहिर्निर्गत्य मार्जनं कृत्वा आग्नीध्रीयं प्राप्य, तत्र पूर्ववज्जुहुयात् ॥

तस्मिन् होमे मन्त्र माह— "उप सृजन् धरुणं मातरं धरुणो धयन्, रायस्पोष मिष मूर्जं मस्मासु दीधरत्स्वाहेति"–इति । अत्र देवताया अस्पष्टत्वात् "अनिरुक्तः प्रजापतिः"–इतिश्रुत्यन्तरेण प्रजापतिर्देवता । तस्य मन्त्रस्याय मर्थः—'धरुणः' सर्वस्य जगतो धारयिता प्रजापतिः 'धरुणम्' अस्माकं धर्त्तारं पितरं मातरं च 'उप सृजन्' अस्माभिः संयोजयन्, अनिष्टाद्वा वियोजयन्नस्माभिर्हुत माज्यं 'धयन्' पिबन्, 'रायस्पोषं' धनपुष्टिम्, 'इषम्' अन्नम् 'ऊर्जं' क्षीरादिरसं चास्मासु 'दीधरत्' धारयतु सम्पादयतु । तस्य प्रजापतेरिदं स्वाहुत मस्तु । 'इति'-शब्दो मन्त्रसमाप्त्यर्थः ॥

आहुतिं प्रशंसति—"रायस्पोष मिष मूर्जं मवरुन्ध आत्मने च यजमानेभ्यश्च यत्रैवं विद्वानेता माहुतिं जुहोति"–इति । 'आत्मने' होत्रे ॥ ३ ॥

इतिश्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां चतुर्थोध्याये
(चतुर्विंशाध्याये) तृतीयः खण्डः ॥ ३ (२२) ॥

॥ अथ चतुर्थः खण्डः ॥

ते ततः सर्पन्ति। ते सदः सम्प्रपद्यन्ते। यथायथ मन्य ऋत्विजो व्युत्सर्पन्ति। संसर्पन्त्युद्गातारस्ते सर्पराज्ञ्या ऋक्षु स्तुवत। इयं वै सर्पराज्ञीयं हि सर्पतो राज्ञीयं वा अलोमिकेवाग्र आसीत्सैतं मन्त्र मपश्यदायं गौः पृश्निरक्रमीदिति। ता मयं पृश्निर्वर्ण आविशन्नानारूपो ऽयं यं काम मकामयत। यदिदं किञ्चौषधयो वनस्पतयः सर्वाणि रूपाणि। पृश्निरेनं वर्ण आ विशति नानारूपो ऽयं यं कामं कामयते य एवं वेद। मनसा प्रस्तौति। मनसोद्गायति। मनसा प्रतिहरति। वाचा शंसति। वाक् च वै मनश्च देवानां मिथुनं। देवाना मेव तन्मिथुनेन मिथुन मवरुन्धते। देवानां मिथुनेन मिथुनं प्र जायन्ते प्रजात्यै। प्र जायते प्रजया पशुभिर्य एवं वेदाथ चतुर्होतॄन् होता व्याचष्टे। तदेव तत् स्तुत मनु शंसति। देवानां वा एतद्यज्ञियं गुह्यं नाम। यच्चतुर्होतारस्तद्यच्चतुर्होतॄन् होता व्याचष्टे। देवाना मेव तद्यज्ञियं गुह्यं नाम। प्रकाशं गमयति। तदेनं प्रकाशं गतं प्रकाशं गमयति। गच्छति प्रकाशं य एवं वेद। यं ब्राह्मण मनूचानं। यशो नर्च्छेदिति ह स्माहारण्यं परेत्य दर्भस्तम्बानुद्ग्रथ्य। दक्षि-

स्ततो ब्रह्माण मुपवेश्य॑ चतुर्होतॄन् व्याचक्षीत॑ देवानां वा एतत्प्रियं गुह्यं नाम॑ यच्चतुर्होतारस्तद्॑ यच्चतुर्होतॄन् व्याचक्षीत॑ देवाना मेव तत्प्रियं गुह्यं नाम प्रकाशं गमयति॑ तदेनं प्रकाशं गतं प्रकाशं गमयति॑ गच्छति प्रकाशं य एवं वेद॑ ॥ ४ (२३) ॥

आग्नीध्रीये होमादूर्द्धं कर्त्तव्यानि दर्शयति— "ते ततः सर्पन्ति ; ते सदः सम्प्रपद्यन्ते; यथायथ मन्य ऋत्विजो व्युत्सर्पन्ति ; संसर्पन्त्युद्गातारस्ते सर्पराज्ञ्या ऋक्षु स्तुवते"–इति । 'ते' कृतहोमाः सर्वे 'ततः' आग्नीध्रीयादग्नेः 'सर्पन्ति' निर्गच्छन्ति । निर्गतास्ते सदः प्रविशेयुः । प्रवेशवेलाया मुद्गातृभ्योऽन्य ऋत्विजो 'यथायथं' स्वमार्ग मनतिक्रम्य 'व्युत्सर्पन्ति' विविधं गच्छन्ति ; उद्गातारस्तु 'संसर्पन्ति' सम्भूय गच्छेयुः । गतास्ते सामगाः सर्पराज्ञ्याः सम्बन्धिनीषु ऋक्षु "आयं गौः"–इत्यादिषु स्तोत्रं कुर्य्युः *। सर्पराज्ञीति भूमेरवतारस्वरूपा काचिद्देवता ; तया दृष्टा मन्त्रा अपि सर्पराज्ञीशब्देनोच्यन्ते । अत्र तु 'ऋक्षु'–इति पृथगुपादानात्, 'सर्पराज्ञ्याः'–इतिषष्ठ्यन्तत्वाच्च देवतावाच्येवायं शब्दः † ॥

● आर० आ० ५. ४—६ ऋक्षु आर० गा० ६. २. ८—१० सार्पराज्ञानि (योनिसामानि); उ० आ० ६. १. ११. तृचे ऊह्य० गा० ५. १. ९ (यामं स्तोत्रम्)। "प्रजापतेस्तिस्रः सर्पराज्ञ्याः सर्पाणां वार्बुदस्य वा सर्पस्य"–इति आर्षे० ब्रा० ३. २९ । "तिसृभिः स्तुवन्ति०—० सर्पराज्ञ्या ऋग्भिः स्तुवन्ति०—० स्तुत मनुशंसति"–इति ता० ब्रा० ९. ८. ।

† "आयङ्गौरिति०—० सार्पराज्ञीनामर्षिका, सैव देवता सूर्यो वा"–इति ऋग्भाष्ये सायणः (१०.१८९.) ; "सर्पराज्ञी नाम ब्रह्मवादिनी"–इति तु ताण्ड्यभाष्ये (९.८.७.) ।

एतदेवाभिप्रेत्य तत्सम्बद्धाः ऋचस्ताञ्च देवतां प्रशंसति—"इयं वै सर्पराज्ञीयं हि सर्पतो राज्ञीयं वा अलोमिकेवाग्र आसीत् सैतं मन्त्र मपश्यदायं गौः पृश्निरक्रमीदिति ; ता मयं पृश्निर्वर्ण आविशन्नानारूपो ऽयं यं काम मकामयत, यदिदं किञ्चौषधयो वनस्पतयः सर्वाणि रूपाणि"—इति । या भूमिरस्ति, सेय मेव देवताशरीरं धृत्वा ब्रह्मवादिनी भूत्वा 'सर्पराज्ञी'-शब्देनोच्यते । यस्मादियं पृथिवी 'सर्पतः' सञ्चरतो जङ्गमस्य मनुष्यादेः 'राज्ञी' स्वामिनी ; सर्वेषां मनुष्यादीनां तदाश्रयेणावस्थानात् ; अतः सर्पराज्ञीत्युच्यते *। इय मेव 'अग्रे' ऋगुत्पत्तेः पूर्व मेव 'अलोमिकेव' रोमरहितेवासीत् ; ततो रोमोत्पत्त्यर्थं सा भूमिः साधनभूतम् "आयं गौः"—इति 'मन्त्रम्' अपश्यत् । तन्मन्त्रप्रसादेन 'तां' भूमि मयं दृश्यमानः 'पृश्निर्वर्ण आविशत्' । पृश्निशब्दस्य व्याख्यानं 'नानारूपः' इति, नीलपीतादिरित्यर्थः †। किञ्च लोके ओषधयो वनस्पतयः सर्वाणि अन्यानि रूपाणि तृणादीनि यदिदं किञ्चित् स्थावररूप मस्ति, तन्मध्ये यं काम मसौ भूमि मकामयत, स सर्वोऽप्येनां प्राविशत् ॥

वेदनं प्रशंसति—"पृश्निरेनं वर्ण आ विशति, नानारूपो ऽयं यं कामं कामयते य एवं वेद"—इति । वर्णशब्देन नीलपीतादिवाचिना सर्व मपि भोग्यजात मुपलक्ष्यते ॥

स्तोत्रशस्त्रयोः प्रकारविशेषं विधत्ते— "मनसा प्रस्तौति, मनसोद्गायति, मनसा प्रतिहरति, वाचा शंसति"—इति । उद्गातॄणां मध्ये प्रस्तोतुः प्रस्तावभागः, उद्गातुरुद्गीथभागः प्रतिहर्त्तुः

---

* "सर्पसम्बन्धद्वारा एतन्नाम"—इत्याद्यार्षेयभाष्ये सायणः (३.२९.)।

† निरु० २.४.२ ; १०.४.२. एतदुभयखण्डावेव द्रष्टव्यौ ।

प्रतिहारभागः * । तान् भागान् मनसैव ते ऽनुतिष्ठेयुः ; होता तु वाचा शंसेत् ॥

द्विविध मपि विधिं प्रशंसति—"वाक् च वै मनश्च देवानां मिथुनं, देवाना मेव तन्मिथुनेन मिथुन मवरुन्धते, देवानां मिथुनेन मिथुनं प्र जायन्ते प्रजात्यै ; प्र जायते प्रजया पशुभिर्य एवं वेद"-इति । बृहद्रथन्तरमिथुनवद्व्याख्येयम् (१४२ पृ०)॥

होतुः सर्पराज्ञ्याः शंसनादूर्ध्वं चतुर्होतृमन्त्रान् विधत्ते—"अथ चतुर्होतॄन् होता व्याचष्टे,—तदेव तत् स्तुत मनु शंसति"-इति । चतुर्होतृमन्त्रास्तद्व्याख्यानप्रकारश्चोपरिष्टात् अभिधास्यते । तेन व्याख्यानेन यदुद्गातृभिः स्तुतः, तदेव सर्व मनुशस्तं भवति ॥

त मेतं मन्त्रसमूहं प्रशंसति— "देवानां वा एतद्यज्ञियं गुह्यं नाम यच्चतुर्होतारस्तद्यच्चतुर्होतॄन् होता व्याचष्टे, देवाना मेव तद्यज्ञियं गुह्यं नाम प्रकाशं गमयति"–इति । य एते चतुर्होतृमन्त्राः सन्ति, तदेतन्मन्त्रस्वरूपं देवानां सम्बन्धि यज्ञयोग्यं नाम ; ततो होतृव्याख्याने देवसम्बन्धि योग्यं नाम प्रकाशितं करोति ॥ वेदनं प्रशंसति— "तदेनं प्रकाशं गतं प्रकाशं गमयति, गच्छति प्रकाशं य एवं वेद"–इति । यदुक्तार्थवेदिता होता 'एनं' होतारं 'तत्' देवानां गुह्यं नाम, स्वयं प्रकाशं गतं सत् पश्चात् प्रकाशं गमयति । ततो वेदिता 'प्रकाशं गच्छति' तेन नाम्नानुगृहीतः प्रख्यातो भवतीत्यर्थः । यद्वा तदेन मित्यादिः पूर्वशेषः । 'तद्' देवानां गुह्यं नाम स्वयं प्रकाशं गतं सत् पश्चात् 'एनं' होतारं प्रकाशं गमयति ; गच्छतीत्यादिकैव विद्वत्प्रशंसा ॥

तदेवं क्रत्वङ्गत्वेन चतुर्होतृव्याख्यानं विधाय तत्प्रशंसां कर्त्तुं

---

* १भा० १७८ पृ० † टी० द्र० । पञ्च० सू० १.१.१,२ । छा० उप० २.१—२१ ।

क्रतुनिरपेक्षलौकिककाम्यफलसिद्ध्यर्थं चतुर्होतृव्याख्यानं विधत्ते — “यं ब्राह्मण मनूचानं यशो नर्च्छेदिति ह स्माहारण्यं परेत्य दर्भस्तम्बानुद्ग्रथ्य दक्षिणतो ब्रह्माण मुपवेश्य चतुर्होतॄन् व्याचक्षीत”-इति। साङ्गवेदाध्ययन-तदर्थानुष्ठानशील: ‘अनूचान:’। तादृशं कश्चिद् ब्राह्मणं सभामध्ये वाग्मित्वेन रहितं यदि ‘यशो नर्च्छेत्’ विद्वानय मिति कीर्त्तिं न प्राप्नुयात्, तदानी मयं ब्राह्मणो ग्रामान्निर्गत्य विजन मरण्यदेशं प्राप्य तत्र दर्भस्तम्बाना मग्र मूर्द्ध्वमुखत्वेन ग्रथित्वा स्वस्य दक्षिणपार्श्वे कञ्चिद्वेदविदं विप्र मुपवेश्य तत्सन्निधौ चतुर्होतृनामकान्मन्त्रान् व्याचक्षीत। उच्चैरुच्चारणं ‘व्याख्यानम्’। ‘इति’ एतत्प्रयोगं कश्चिद् ब्रह्मवाद्याह स्मेत्यन्वय:॥

त मिमं यज्ञसंयुक्तं प्रयोगं पूर्ववत्प्रशंसति— “देवानां वा एतद्यज्ञियं गुह्यं नाम यच्चतुर्होतारस्तद्यच्चतुर्होतॄन् व्याचक्षीत देवाना मेव तद् यज्ञियं गुह्यं नाम प्रकाशं गमयति ; तदेनं प्रकाशं गतं प्रकाशं गमयति, गच्छति प्रकाशं य एवं वेद”-इति। पूर्ववद् व्याख्येयम्॥ ४॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां चतुर्थाध्याये
(चतुर्विंशाध्याये) चतुर्थः खण्डः॥ ४ (२३)॥

॥ अथ पञ्चमः खण्डः॥

अथौदुम्बरीं समन्वारभन्त॑ इष मूर्ज मन्वारभ इत्यू॑र्ग्वा अन्नाद्य मुदुम्बरी॑ यद्वैतद्देवा इष मूर्जं व्यभ-

जन्त तत उदुम्बरः समभवत्तस्मात्स त्रिः संवत्सरस्य पच्यते तद्यदौदुम्बरीं समन्वारभन्त इष मेव तदूर्ज मन्नाद्यं समन्वारभन्ते वाचं यच्छन्ति वाग्वै यज्ञो यज्ञ मेव तद् यच्छन्त्यहर्नियच्छन्त्यहर्वै स्वर्गो लोकः स्वर्ग मेव तल्लोकं [*] नियच्छन्ति न दिवा वाचं विसृजेरन्यद्दिवा वाचं विसृजेरन्नहर्भ्रातृव्याय परिशिंष्युर्न नक्तं वाचं विसृजेरन्यन्नक्तं वाचं विसृजेरन् रात्रीं भ्रातृव्याय परिशिंष्युः समयाविषितः सूर्यं [†] स्यादथ वाचं विसृजेरंस्तावन्त मेव तद् द्विषते लोकं परिशिंषन्त्यथो खल्वस्तमित एव वाचं विसृजेरंस्तमोभाज मेव तद् द्विषन्तं भ्रातृव्यं कुर्वन्त्याहवनीयं परीत्य वाचं विसृजेरन्यज्ञो वा आहवनीयः स्वर्गो लोक आहवनीयो यज्ञेनैव तत्स्वर्गेण लोकेन स्वर्गं लोकं यन्ति यदि हीन मकर्म यदत्यरीरिचाम प्रजापतिं तत्पितर मप्येत्विति वाचं विसृजन्ते प्रजापतिं वै प्रजा अनु प्र जायन्ते प्रजापतिरूनातिरिक्तयोः प्रतिष्ठा नैनानूनं नातिरिक्तं हिनस्ति प्रजापतिमेवोनातिरिक्तान्यभ्यत्यर्जन्ति य एवं विद्वांस एतेन वाचं विसृजन्ते तस्मादेवं विद्वांस एतेनैव वाचं विसृजेरन् ॥ ५ (२४) ॥

---

[*] "तं लोकं" क, ग, च, ञ।

[†] "सूर्यः" क।

अथ चतुर्होतृव्याख्यानस्य प्रकारं यज्ञाङ्गं साकल्येनाभिधातुमुपक्रमते— "अथौदुम्बरीं समन्वारभन्ते"–इति। चतुर्होतृव्याख्यानोद्योगानन्तरं येयमौदुम्बरी शाखा सदस्यन्तर्निहिता, तां शाखां सर्वे सम्भूयोपस्पृशेयुः ॥

तत्र मन्त्रं दर्शयति— "इष मूर्ज मन्वारभ इति"–इति। अन्नरूपां रसरूपां वै ता मौदुम्बरीम् 'अन्वारभे' हस्तेन स्पृशामि। 'इति'–शब्दो मन्त्रसमाप्त्यर्थः ॥

मन्त्रार्थं मौदुम्बर्यां दर्शयति— "ऊर्ग्वा अन्नाद्य मुदुम्बरः"–इति। योऽय मुदुम्बरवृक्षः, सोऽयं रसरूपोऽन्नरूपश्च ॥

त मेत मर्थं मुपपादयति— "यद्वैतद्देवा इष मूर्जं व्यभजन्त, तत उदुम्बरः समभवत्, तस्मात्स त्रिः संवत्सरस्य पच्यते"–इति। देवाः पुरा यदेतदन्नं रसरूपं वस्तु क्वचित् भूमावुपविश्य 'व्यभजन्त' एतावदस्यैतावदस्येति विभागं कृतवन्तः। तदानीं तस्माद्भूमौ पतितादन्नरसभेदाद्बीजीभूतादय मुदुम्बरवृक्षः समुत्पन्नः ; तस्मात् संवत्सरस्य मध्ये भोक्तृणा मन्नसिद्ध्यर्थं स वृक्षः 'त्रिः पच्यते' त्रिरित्युपलक्षणम्, बहुकृत्वः फलं गृह्णाति ॥

औदुम्बरीस्पर्श मुपसंहरति— "तद्यदौदुम्बरीं समन्वारभन्त, इष मेव तदूर्जं मन्नाद्यं समन्वारभन्ते"–इति ॥

औदुम्बरीस्पर्शा दूर्ध्वं मौनं विधत्ते— "वाचं यच्छन्ति ; वाग्वै यज्ञो यज्ञ मेव तद्यच्छन्ति"–इति। यज्ञस्योच्चार्यमाणमन्त्रसाध्यत्वाद्वाग्रूपत्वम् ; अतो वाङ्नियमेन यज्ञस्यैव नियमो भवति ॥

मौनस्य कालविशेषं विधत्ते— "अहर्नियच्छन्त्यहर्वै स्वर्गो लोकः, स्वर्गमेव तल्लोकं नियच्छन्ति"–इति। सूर्यास्तमयादर्वाक्

स्वर्गवत्प्रकाशसद्भावेनाह्नः स्वर्गत्वम्। तस्मिन्नहनि वाङ्नियमेन स्वर्ग एव नियतः स्वाधीनो भवति ॥

विधिसिद्ध्यर्थमहनि कतिपयेषु क्षणेषु वाचं नियम्य पश्चात् मौनपरित्यागप्राप्तौ निषेधति— "न दिवा वाचं विसृजेरन्; यद्दिवा वाचं विसृजेरन्नहर्भ्रातृव्याय परिशिंष्युः"-इति। अहनि वाग्विसर्गे सति यजमानाः सर्वेऽप्यहःसम्बन्धं परित्यज्य शत्रवे तदहः 'परिशिंष्युः' दद्युरित्यर्थः ॥

अहनि निषिद्धस्य वाग्विसर्गस्य रात्रौ प्राप्तौ सत्यां तदपि निषेधति— "न नक्तं वाचं विसृजेरन्; यन्नक्तं वाचं विसृजेरन् रात्रीं भ्रातृव्याय परिशिंष्युः"-इति। पूर्ववद् व्याख्येयम् ॥

यद्यहनि रात्रौ च निषेधः, कदा तर्हि वाग्विसर्ग इत्याशङ्क्याह —"समयाविषितः सूर्य्य स्यादथ वाचं विसृजेरंस्तावन्त मेव तद् द्विषते लोकं परिशिंषन्ति"-इति। यदा सूर्य्यः 'समयाविषितः' अस्तमयसमयं प्राप्तः, अर्द्धास्तमितः [*] स्यात्, तदानीं वाग्विसर्गः। तथा सति सम्पूर्णास्तमयपर्य्यन्त मल्प मेव कालं 'द्विषते लोकं' शत्रोः स्थानं 'परिशिंषन्ति' प्रयच्छन्ति। अहो रात्रिश्चेति कालद्वयं स्वार्थं मेव भवति ॥

पक्षान्तरं विधत्ते —"अथो खल्वस्तमित एव वाचं विसृजेरंस्तमोभाज मेव तद् द्विषन्तं भ्रातृव्यं कुर्वन्ति"-इति। 'अथो

---

[*] समयाध्युषित-समयाविषितशब्दौ सन्धिकालपरौ। तत्र समयाध्युषितः प्रातःसन्धिकालः, समयाविषितस्तु सायंसन्धिकाल इति विशेषः। कात्या० श्रौ० ४.१५.१। आश्व० गृ० १.७३। म० सं० २, १५। तै० सं० ६.६.११.६. व्याख्यानं च तस्य १.४.४५.१५। अनु० सू० ३.१२। "समयास्तमिषितः" तै० आ० सा० भा० (ए. सी. मु० ४४२ पृ० १० पं०)।

खलु' अथवेत्यर्थः। सूर्ये साकल्येऽस्तमिते सत्येव पश्चाद्वाग्विसर्गेण यतुं 'तमोभाजम्' अन्धकारमग्नं कुर्वन्ति ॥

वाग्विसर्गस्य देशविशेषं विधत्ते — "आहवनीयं परीत्य वाचं विसृजेरन्, यज्ञो वा आहवनीयः, स्वर्गो लोक आहवनीयो, यज्ञेनैव तत् स्वर्गेण लोकेन स्वर्गं लोकं यन्ति"–इति। सदसो निर्गत्य आहवनीयं परितः प्रदक्षिणीकृत्य तत्र वाग्विसर्गः कर्त्तव्य। आहवनीयस्य यज्ञनिष्पादकद्वारा स्वर्गहेतुत्वेन तदुभयात्मकत्वे सति यज्ञस्वर्गात्मके चाहवनीयेन यजमानाः स्वर्गं प्राप्नुवन्ति ॥

वाग्विसर्गे मन्त्रविशेषं विधत्ते— "यदिहोन मकर्म यदत्यरीरिचाम प्रजापतिं तत्पितर मप्येत्विति वाचं विसृजन्ते"–इति। 'इह' क्रतौ 'यत्' अङ्गम् 'ऊनम्' असम्पूर्णम्, यदपि 'अकर्म' स्वरूपेणैव तदङ्गं न कृतम्, 'यत्' अप्यङ्गम् 'अत्यरीरिचाम' अतिरिक्तं द्विवारं त्रिवारं वा वय मनुष्ठितवन्तः; 'तत्' सर्वं दोषकर मङ्गजातं 'पितरम्' अस्माकं पालकं प्रजापतिम् 'अप्येतु' प्राप्नोतु। 'इति' अनेन मन्त्रेण वाग्विसर्गः कर्त्तव्यः ॥

उक्तमन्त्रं प्रशंसति—"प्रजापतिं वै प्रजा अनु प्र जायन्ते, प्रजापतिरूनातिरिक्तयोः प्रतिष्ठा, नैनानूनं नातिरिक्तं हिनस्ति"–इति। सर्वाः प्रजाः प्रजापति मेवानुप्रजायन्ते; तस्य स्रष्टृत्वात् तदनुरूपैव सर्वोत्पत्तिः। अतः स्रष्टा प्रजापतिरेव न्यूनातिरिक्तदोषयोः 'प्रतिष्ठा' आश्रयः समाधानहेतुः। तस्मादेतन्मन्त्रपाठेन 'एनान्' यजमानान् न्यूनातिरिक्तद्वयदोषो न बाधते ॥

वेदनपूर्वक मनुष्ठानं प्रशंसति— "प्रजापति मेवोनातिरिक्तान्यभ्यत्यर्जन्ति य एवं विद्वांस एतेन वाचं विसृजन्ते"–इति। मन्त्रेण वाग्विसर्गं कुर्वाणा यजमाना ऊनातिरिक्ताङ्गं कृतं दोष

मभिलक्ष्य प्रजापति मेव ‘अभ्यत्यर्जन्ति’ अतिशयेन प्राप्नुवन्ति, स एव समादधातीत्यर्थः ॥

मन्त्रेण वाग्विसर्ग मुपसंहरति— “तस्मादेवं विद्वांस एतेनैव वाचं विसृजेरन्”-इति ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां चतुर्थाध्याये
(चतुर्विंशाध्याये) पञ्चमः खण्डः ॥ ५ (२४) ॥

॥ अथ षष्ठः खण्डः ॥

अध्वर्यो इत्याह्वयते॑ चतुर्हो॑तृषु वदिष्यमाणस्तं॑द्राहावस्व हूप॑ मों होतस्तथा होतरित्य॑ध्वर्युः प्रतिगृणात्यवसिते ऽवसिते॑ दशसु पदेषु॑ तेषां चित्तिः स्रुगासी३त्॑ चित्त माज्य मासी३त्॑ वाग् वेदिरासी३त्॑ आधीतं बर्हिरासी३त्॑ केतो अग्निरासी३त्॑ विज्ञात मग्नीदासी३त्॑ प्राणो हविरासी३त्॑ सामाध्वर्युरासी३त्॑ वाचस्पतिर्होतासी३त्॑ मन उपवक्तासी३त्॑ ते वा एतं ग्रह* मगृह्णात॑ वा॑चस्पते वि॒धे† नाम॑न् विधेम॑ ते॒ नाम॑ वि॒धेस्त्व म॒स्माकं॒ नाम्ना द्यां गच्छ॑ यां दे॒वाः प्रजापतिगृहपतय ऋद्धि मराध्नुवंस्तां॑ ऋद्धिं रात्स्यामो ऽथ प्रजापतेस्तनूरनुद्रवति॑ ब्रह्मोद्यं

---

* “गृह” ख, घ, ङ, ट। † “विधा” क, ङ।

चान्नादा चान्नपत्नी चा॑न्नादा तदग्नि॑रन्नपत्नी तदादित्यो॑ भद्रा च कल्याणी च॑ भद्रा तत्सोमः कल्याणी तत्पशवो॑ ऽनिलयाचापभया चा॑निलया तद्वायु॑र्न ह्येष कदा च नेलयत्य॑पभया तन्मृत्यु॑ः सर्वँ ह्येतस्माद् बीभाया॑ *नाप्ता चानाप्या चा॑नाप्ता तत्पृथिव्यनाप्या तद् द्यौ॑रनाधृष्या चाप्रतिधृष्या चा॑नाधृष्या तदग्निरप्रतिधृष्या तदादित्यो॑ ऽपूर्वा चाभ्रातृव्या चा॑पूर्वा तन्मनो ऽभ्रातृव्या तत्संवत्सर॑ एता वाव द्वादश प्रजापतेस्तन्व॑ एष कृत्स्नः प्रजापतिस्त॑त्कृत्स्नं प्रजापति माप्नोति दशम म॑हरथ ब्रह्मोद्यं वद॑न्त्यग्निर्गृहपतिरिति हैक आहु॑ः सो ऽस्य लोकस्य गृहपति॑र्वायुर्गृहपतिरिति हैक आहु॑ः सोऽन्तरिक्षलोकस्य † गृहपति॑रसौ वै गृहपतिर्यो ऽसौ तप॑त्येष पतिर्ऋतवो गृहा॑ः येषां वै गृहपतिं देवं विद्वा॑न् गृहपतिर्भवति॑ राध्नोति स गृहपती॑ ‡ राध्नुवन्ति ते यजमाना॑ः येषां वा अपहतपाप्मानं देवं विद्वा॑न् गृहपतिर्भवत्य॑प स गृहपति॑ः पाप्मानं हते पते यजमानाः पाप्मानं घ्नते॑ ऽध्वर्यो अरात्स्मारात्स्म॑ ॥६(२५)

॥ इत्यैतरेयब्राह्मणे पञ्चमपञ्चिकायां चतुर्थोऽध्यायः ॥४॥

---

* "विभाया" क । † "ऽन्तरिक्षस्य लोकस्य" क । ‡ "स ह गृहपती" ग ।

चतुर्होतृमन्त्रव्याख्यानार्थं माहावं विधत्ते— "अध्वर्यो इत्याह्वयते चतुर्होतृषु वदिष्यमाणस्तदाहावस्य रूपम्"–इति। चतुर्होतृनामकेषु मन्त्रेषूच्चैरुच्चारणं कर्त्तु मुद्युक्तो होता "हे अध्वर्यो!" इत्याह्वानं कुर्य्यात्। यथा शस्त्रादौ "शोंसावोम्"–इत्याह्वानं करोति, तद्वदत्रापि सम्बोधन मेवाहावस्य स्वरूपम्॥

चतुर्होतृव्याख्यानकाले अध्वर्योः प्रतिगरविशेषं विधत्ते— "ॐ होतस्तथा होतरित्यध्वर्युः प्रतिगृणात्यवसिते ऽवसिते दशसु पदेषु"–इति। हे होतः! 'ॐ' तदभिलषित मस्तु, हे होतः! 'तथा' क्रियता मित्यध्याहारः। अनेन मन्त्रेणाध्वर्युः प्रतिगरं ब्रूयात्। होतुरुत्साहजनकं प्रतिवचनं 'प्रतिगरः'। वक्ष्यमाणेषु होत्रा प्रयोज्येषु दशसङ्ख्याकेषु पदेषु मध्ये एकैकस्मिन् पदे 'अवसिते' समाप्ते सति तदा तदा पुनःपुनरध्वर्य्युरों होतरित्यादिमन्त्रेण प्रतिगरं ब्रूयात्। अवसितशब्दस्य वीप्सा प्रतिपदं प्रतिगरप्रयोगार्थम्॥

तत्र प्रथमं पदं दर्शयति—"तेषां चित्तिः स्रुगासी३त्"–इति। देवकर्त्तृके सत्रे प्रजापतिर्गृहपतिरन्ये देवा यजमानास्ते च मन्त्रान्तरे वक्ष्यन्ते। त एवात्र तेषामितितच्छब्देन परामृश्यन्ते। 'तेषां' प्रजापतिरूपगृहपतियुक्तानां देवतात्मनां यजमानानां मानसे कर्मणि 'चित्तिः स्रुगासी३त्'। "चिती सञ्ज्ञाने"–इति (भ्वा० ३८.) धातोश्चित्तिशब्दनिष्पत्तिः। इदं वस्त्वीदृश मेव न त्वन्यथेति या सम्यग्ज्ञानरूपा मनोवृत्तिः, सा 'चित्तिः'। सैव एतेषां होमसाधनभूतजुहूस्थानीयासीत्। अमूर्त्तायाश्चित्तेर्जुहूरूपत्व माश्चर्य्य मिति द्योतयितुं श्रुतिः। एव मुत्तरत्रापि द्रष्टव्यम्॥

द्वितीयं पदं दर्शयति—"चित्त माज्य मासी३त्"–इति।

पूर्वोक्तायाश्चित्तिरूपायाः वृत्तेराधारभूतं यदन्तःकरणं तत् 'चित्तम्' तदेवाज्यस्थानीय मासीदिति ॥

तृतीयं पदं दर्शयति— "वाग् वेदिरासी३त्"—इति । यद् "वाग्" इन्द्रियम्, तद्वेदिस्थानीय मासीदिति ॥

चतुर्थं पदं दर्शयति—"आधीतं बर्हिरासी३त्"—इति । 'आ' समन्ताद् 'धीतं' मनसा ध्यातं यद्वस्तु, तदेव बर्हिस्थानीय मासीदिति ॥

पञ्चमं पदं दर्शयति— "केतो अग्निरासी३त्"—इति । "कित ज्ञाने"—इति (भ्वा० ९९३.) धातुः । 'चित्तिः' सम्यक् ज्ञानम्, 'केतः' ज्ञानमात्र मिति विशेषः । स च केतोऽग्निस्थानीय आसीदिति ॥

षष्ठं पदं दर्शयति—"विज्ञात मग्नीदासी३त्"—इति । 'विज्ञातं' विशेषेण निश्चितं यद्वस्तु, तत् 'अग्नीत्' आग्नीध्रनामक ऋत्विगासीत् ॥

सप्तमं पदं दर्शयति— "प्राणो हविरासी३त्"—इति । योऽयं प्राणवायुः, स हविःस्थानीय आसीदिति ॥

अष्टमं पदं दर्शयति – "सामाध्वर्युरासी३त्"—इति । यद् गीयमानं 'साम', तदध्वर्युस्थानीय मासीदिति ॥

नवमं पदं दर्शयति –"वाचस्पतिर्होतासी३त्"—इति । योऽयं 'वाचस्पतिः' बृहस्पतिः, सोऽयं होतृस्थानीय आसीदिति ॥

दशमं पदं दर्शयति— "मन उपवक्तासी३त्"—इति । यद्यप्येक मेवान्तःकरणं चित्तशब्देन मनःशब्देन चाभिधीयते, तथाप्यवस्थाविशेषो द्रष्टव्यः । चित्तिकेतादिवृत्तिजनकत्वाकारेण 'चित्तम्' ; वृत्तिरहितस्वरूपावस्थानाकारेण 'मनः' ; तच्चात्र 'उपवक्ता' होतुः समीपस्थो वक्ता मैत्रावरुण आसीदिति ॥

एतेषां दशानां पदाना मेकैकस्मिन् पदे अवसिते सत्यध्वर्युः "ॐ होतः, तथा होतः"-इति प्रतिगरं ब्रूयात्। सोऽयं दशपदात्मकः चतुर्होतृसञ्ज्ञको मन्त्रसङ्घातः * ॥

अथ ग्रहसञ्ज्ञकं मन्त्रं दर्शयति—"ते वा एतं ग्रह मगृह्णत ; वाचस्पते विधे नामन्, विधेम ते नाम, विधेस्त्व मस्माकं नाम्ना द्यां गच्छ, यां देवाः प्रजापतिगृहपतय ऋद्धि मराध्नुवंस्ता मृद्धिं रात्स्यामः"—इति। तेषामितिपदेनोक्ताः प्रजापतिगृहपतियुक्ता देवरूपा ये यजमानाः सन्ति, त एव 'एतं' मानसं ग्रह मगृह्णत। ग्रहणकाले वाचस्पतिं सम्बोध्य ब्रुवते— हे 'वाचस्पते' बृहस्पते ! हे 'विधे' जगतो विधातः ! हे 'नामन्' सर्वस्य नमयितः ! सर्ववशीकारयुक्तेत्यर्थः। तादृशस्य ते 'नाम विधेम' ख्यातिं करवाम। यद्वा 'नाम' अन्नं हविर्लक्षणं 'विधेम' सम्पादयामः। त्व मप्यस्माकं प्रजापतियुक्तानां देवानां विधिः, कीर्त्तिं मन्नञ्च सम्पादय। तेनास्मद्दत्तेन 'नाम्ना' हविर्लक्षणेनान्नेन कीर्त्त्या वा युक्तो द्यां स्वर्गं गच्छ। प्रजापतिर्गृहपतिर्येषां देवानां ते 'प्रजापतिगृहपतयः' तादृशा देवा याम् 'ऋद्धिम्' ऐश्वर्य्यम् अराध्नुवन्, 'ता मृद्धिं' तादृश मैश्वर्य्यं वय मपि यजमाना रात्स्यामः। इत्येष ग्रहमन्त्रः †; त मपि होता पठेत् ॥

मन्त्रान्तराणि विधत्ते— "अथ प्रजापतेस्तनूरनुद्रवति ब्रह्मोद्यं

---

* तैत्तिरीयब्राह्मणेऽपि द्वितीयाष्टकीयो द्वितीयः प्रपाठकः समग्र एवैतद्विषयकः। तैत्तिरीयारण्यके त्विमे दश मन्त्राः समाम्नाताः (३.१.) किञ्चित्पाठभेदेन। तद्भाष्ये त्वेषां सायणीयव्याख्यानानि सुष्ठुतराणीव गम्यन्ते। "चित्त्यादयो दश शरीरगताः पदार्थविशेषाः, स्रुगादयस्तु दश पदार्था होमनिष्पादकाः"—इत्येव तत्सार मिति सङ्क्षेपः।

† तैत्तिरीयारण्यके तु एष एव ग्रहमन्त्रः किञ्चिद्विभिन्नः (३.१.)।

च"-इति। चतुर्होतृग्रहमन्त्रपाठानन्तरं होता प्रजापतितनुसञ्ज्ञकान् मन्त्रान् ब्रह्मोद्यसञ्ज्ञकं मन्त्रञ्च 'अनुद्रवति' अनुक्रमेण ब्रूयात् ॥

द्वादशसङ्ख्याकाः प्रजापतितनुसञ्ज्ञकाः। अन्नादा चेति चशब्दान्तानि द्वादशपदानि प्रजापतेस्तन्वः। तत्र द्वे द्वे पदे उपादीय क्रमेण प्रशंस्येते ॥

तत्र प्रथमं पदयुग्म माह— "अन्नादा चान्नपत्नी चान्नादा तदग्निरन्नपत्नी तदादित्यः"-इति। अन्नादादयः प्रजापतेर्मूर्त्तिविशेषस्य वाचकाः शब्दाः। अन्नादेति यदस्ति, तदय मग्निः; अन्नपत्नीति यदस्ति, तदसावादित्यः; एतदुभयं प्रजापतितनुरूपम् ॥

द्वितीयं युग्म माह— "भद्रा च कल्याणी च; भद्रा तत्सोमः, कल्याणी तत्पशवः"-इति। पूर्ववद् व्याख्येयम् ॥

तृतीयं युग्म माह— "अनिलया चापभया चानिलया तद्वायुर्न ह्येष कदा च नेलयत्यपभया तन्मृत्युः सर्वं ह्येतस्माद् बीभाय" -इति। एष वायुः कदाचिदपि नेलयतीति न हि। इलयतिः गतिकर्मा (चु० १२७.)। 'नेलयति' न गच्छतीति न हि, किन्तु सदा गच्छत्येव। अमु मर्थं मनिलयेतिशब्दो ब्रूते। निलयो निवासः, स नास्ति यस्या वायुमूर्त्तेः सेयम् 'अनिलया'। अपगतं भयं यस्या मृत्युमूर्त्तेः सेयम् 'अपभया'; सर्वं मपि जगत् 'एतस्मात्' मृत्योः 'बीभाय' भीतिं प्राप्नोति, तादृशो मृत्युः कस्मादस्मादन्यस्माद्भीतिं प्राप्नुयात् ॥

अनेन न्यायेन पूर्वोक्ताना मपि मूर्त्तीनां निरुक्तयो द्रष्टव्याः। अन्नपत्नीत्यत्रान्नादाग्निमूर्त्तिः; अन्नस्य पत्नी पालयित्री सूर्य-

मूर्त्तिः । "आदित्याज्जायते वृष्टिः"–इतिन्यायेन (मं० सं० ३. ७६.) पालयितृत्वम् । सोममूर्त्तेः शैत्यहेतुत्वात्, वृष्टिप्रियत्वाच्च भद्रत्वम् । पशुमूर्त्तेः क्षीरादिप्रदानेन कल्याणत्व मिति तासां निरुक्तयः ॥

चतुर्थं पदयुग्म माह—"अनाप्ता चानाप्या चानाप्ता तत्पृथिव्यनाप्या तद् द्यौः"–इति । दूरस्थस्य ग्रामादेः संयोगे सति प्राप्तिरित्युच्यते ; पृथिव्या मेवोत्पन्नस्य मनुष्यादेः दूरवर्त्तित्वपूर्वकः पृथिवीसंयोगो नास्ति, तस्मादसंयोगपूर्वस्य संयोगस्य प्राप्तिशब्दार्थत्वस्याभावात् 'अनाप्ता' भूमिः । उपरि दूरदेशवर्त्तित्वेन प्राप्तु मयोग्यत्वात् द्यौः 'अनाप्या' ॥

पञ्चमं युग्म माह—"अनाधृष्या चाप्रतिधृष्या चानाधृष्या तदग्निरप्रतिधृष्या तदादित्यः"–इति । आगत्य समीपं प्राप्य हस्तस्पर्शेन धर्षितु मभिभवितु मशक्योऽग्निः । आदित्यो यथा न प्रकाशते तथा कश्चित् प्रतिबन्धं कृत्वा धर्षितु मभिभवितु मशक्यः आदित्यः ॥

षष्ठं युग्म माह—"अपूर्वा चाभ्रातृव्या चापूर्वा तन्मनो ऽभ्रातृव्या तत्संवत्सरः"–इति । न विद्यते पूर्वं प्रथमप्रवृत्त मिन्द्रियं यस्या मनोमूर्त्तेः सेयम् 'अपूर्वा' ; सर्व मपीन्द्रियजातं मनसा सङ्कल्पिते विषये पश्चात्प्रवर्तते, अतो नास्त्यन्यस्य पूर्वप्रवृत्तिः । 'संवत्सरः' कालात्मा सर्वं जगज्जरयति, न च तं कालं जरयितुं समर्थः कश्चिदन्योऽस्ति ; तस्मात्संवत्सरमूर्तिर्भ्रातृव्यरहिता द्वादशपदरूपा ॥

प्रजापतितनूरुपसंहरति— "एता वाव द्वादश प्रजापतेस्तन्व एष कृत्स्नः प्रजापतिस्तत्कृत्स्नं प्रजापति माप्नोति दशम महः"–

इति। अन्नादित्यारभ्य अभ्रातृव्येत्यन्ता द्वादशसङ्ख्याका मूर्तयो याः प्रोक्ताः, एता एव प्रजापतेर्जगन्निर्वाहिकास्तन्वः। 'एषः' द्वादशभिस्तनूभिर्युक्तः प्रजापतिः 'कृत्स्नः' सम्पूर्णः। तथा सत्येतत्पदपाठेन कृत्स्नं प्रजापतिरूपं दशम महः प्राप्नोति ॥

ब्रह्मोद्यमन्त्रविधि मनूद्य तन्मन्त्रस्वरूपं दर्शयति— "अथ ब्रह्मोद्यं वदन्त्यग्निर्गृहपतिरिति हैक आहुः, सोऽस्य लोकस्य गृहपतिर्वायुर्गृहपतिरिति हैक आहुः, सोऽन्तरिक्षलोकस्य गृहपतिरसौ वै गृहपतिर्यो ऽसौ तपत्येष पतिर्ऋतवो गृहाः; येषां वै गृहपतिं देवं विद्वान् गृहपतिर्भवति, राध्नोति स गृहपती, राध्नुवन्ति ते यजमानाः; येषां वा अपहतपाप्मानं देवं विद्वान् गृहपतिर्भवत्यप स गृहपतिः पाप्मानं हते पते यजमानाः पाप्मानं घ्नते ऽध्वर्यो अरात्स्मारात्स्म"—इति। 'अथ' द्वादशपदानुद्रवणानन्तरं ब्रह्मोद्यनामकं मन्त्रं वदेयुः। ब्राह्मणाना मुद्यं संवादो 'ब्रह्मोद्यम्'। अग्निरित्यादिकस्तन्मन्त्रः। 'एके' ब्राह्मणा अग्निः 'गृहपतिः' स्वामीत्याहुः। सोऽस्येत्यादिना तन्मत मन्यैर्ब्राह्मणैर्दूष्यते,— 'सः' अग्निः 'अस्य लोकस्य' भूलोकमात्रस्य गृहपतिः, न तु सर्वलोकस्येति दूषणवादिना मपरितोषः। तच्छ्रुत्वा अपरे ब्राह्मणा वायुर्गृहपतिरित्याहुः। तदपि मत मन्यैर्ब्राह्मणैर्दूष्यते,— स वायुरन्तरिक्षलोकमात्रस्य गृहपतिः, न तु सर्वस्य। यो ऽसावादित्यस्तपति सोऽसावेव गृहपतिरिति सर्वैरङ्गीकार्यं मतम्। कथं गृहपतित्व मिति, तदुच्यते— 'एषः' प्रकाशमान आदित्यः पतिः, तेन निष्पाद्या वसन्ताद्यृतवो गृहाः; तस्मादृतुलक्षणानां गृहाणां पतिरित्यय मर्थो नाग्निवाय्वोरस्ति, आदित्ये तु विद्यते, तत्सञ्चारादृतुनिष्पत्तेः। किञ्च 'येषाम्' ऋतूनां गृहरूपाणां

स्वामिन मादित्यं देवं गृहपतित्वेन विद्वान् पुरुषः स्वय मपि गृहपतिर्भवति, स च गृहपतिः 'राध्नोति' सर्वैर्भोगैः समृद्धो भवति । तादृशेन गृहपतिना युक्तास्ते यजमानाः सर्वेऽपि 'राध्नुवन्ति' समृद्धिं प्राप्नुवन्ति । तेषा मृतुग्रहाणां स्वामित्वादादित्यस्य गृहपतित्वं युक्त मित्यर्थः । सत्रे दीक्षिताः सर्वेऽपि यजमानाः, तेषु मुख्यो गृहपतिरिति विवेकः । किञ्च येषा मृतूनां स्वामिन मादित्यदेवम् 'अपहतपाप्मानं' सर्वपापरहितं विद्वान् पुरुषः स्वयं गृहपतिर्भवति, स गृहपतिः पाप्मान मप्यपहते । ये त्वन्ये यजमानास्तेऽपि पाप्मान मपघ्नते । तादृशाना मृतूनां स्वामिनो गृहपतित्वं युक्तम् । हे अध्वर्यो ! वयम् 'अरात्स्म' समृद्धा अभूम ※ ॥

अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां चतुर्थाध्याये
(चतुर्विंशाध्याये) षष्ठः खण्डः ॥ ६ (२५) ॥

※ "प्रजापतिरकामयत"- इत्यारभ्य (२भा० ३६६पृ०), एतावान् ग्रन्थः सत्रेषु विशेषतो द्वादशाहहौत्रप्रयोगविषयः समाम्नातः । कल्पे तु "सत्राणाम्"–इत्युपक्रम्य (७.१.१.) "एतावत् सात्रं हौत्रकर्मान्यत्र महाव्रतात्"–इत्यन्तैः (८.१३-३०.) सूत्रैः सत्रविषय उक्ताः; द्वादशाहप्रयोगा अपि तदन्तर्गता एव। तत्रापि "गार्हपत्ये जुह्वति"–इत्यादिग्रन्थस्तु (८.१३.१—२९.), "ते पत्नीशालां सम्प्रपद्यन्ते"–इत्यादिखण्डत्रयस्य (१३७–१६१ पृ०) व्याख्यानायानुवाद इवेति। सामब्राह्मणे तु "अग्निना पृथिव्यौषधिभिः"–इत्यादिः (१०.१.१.), "देवतासु वा एष प्रतिष्ठितः"–इत्यन्तश्च (१५.१२.८.) विस्तृतग्रन्थो द्वादशाहौद्गात्रविधायक आम्नातः । कात्यायनश्रौतसूत्रेऽपि द्वादशाध्यायीयसूत्रैरेष एव द्वादशाहो वर्णितः । समाम्नातश्च तदाध्वर्यवं शतपथे सामान्यतः, तैत्तिरीयसंहितायाञ्च सप्तमे काण्डे द्वितीयप्रपाठकीयसप्तमाद्यनुवाकेष्विति ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'नामभाष्ये
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायाः चतुर्थाध्यायः ॥

॥ अथ पञ्चमाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ उद्धराहवनीय मित्यपराह्ण आह यदेवाह्ना साधु करोति तदेव तत्प्राङुद्धृत्य तदभये निधत्त उद्धराहवनीय मिति प्रातराह यदेव रात्र्या साधु करोति तदेव तत्प्राङुद्धृत्य तदभये निधत्ते यज्ञो वा आहवनीयः स्वर्गो लोक आहवनीयो यज्ञ एव तत्स्वर्गे लोके स्वर्गं लोकं निधत्ते य एवं वेद यो वा अग्निहोत्रं वैश्वदेवं षोळशकलं पशुषु प्रतिष्ठितं वेद वैश्वदेवेनाग्निहोत्रेण षोळशकलेन पशुषु प्रतिष्ठितेन राध्नोति रौद्रं गविसद्वायव्य मुपावसृष्ट माश्विनं दुह्यमानं सौम्यं दुग्धं वारुण मधिश्रितं पौष्णं समुदयन्त मारुतं विष्यन्दमानं वैश्वदेवं बिन्दुमन्मैत्रं शरोगृहीतं द्यावापृथिवीय मुद्वासितं सावित्रं प्रक्रान्तं वैष्णवं क्रियमाणं बार्हस्पत्य मुपसन्न मग्नेः पूर्वाहुतिः प्रजापते रुत्तरैन्द्रं हुत मेतद्वा अग्निहोत्रं वैश्वदेवं षोळशकलं पशुषु प्रति-

ष्ठितं॑* वैश्वदेवेनाग्निहोत्रेण षोळशकले॑न पशुषु प्रतिष्ठितेन॑ राध्नोति य एवं वेद॑ ॥ १ (२६) ॥

दशम महरविवाक्य मभिधाय द्वादशाहः समापितः ; अथाग्निहोत्र मभिधीयते। तत्राध्वर्युं प्रति यजमानोऽग्न्युद्धरणकर्त्तव्यतां ब्रूयात्। तदाहापस्तवः— "उद्धरेत्येव साय माह यजमान उद्धरेति प्रातः"–इति (श्रौ० ६.१.४.) ॥

तत्र सायङ्कालीनं यजमानकर्त्तव्यं विधत्ते— "उद्धराहवनीय मित्यपराह्ण आह ; यदेवाह्ना साधु करोति, तदेव तत्प्राङुद्धृत्य तदभये निधत्ते"–इति। अग्निहोत्रस्याध्वर्युरेक एव ऋत्विग्भवति। तथा च शाखान्तरे श्रूयते— "तस्मादग्निहोत्रस्य यज्ञक्रतोरेक ऋत्विक्"–इति (तै० ब्रा० २.३.६.)। त मध्वर्युं यजमानः प्रेष्यति। हे अध्वर्यो! आहवनीयाख्यं वह्नि मुद्धरेति ; ज्वलन्त मग्निं गार्हपत्यादुद्धृत्य प्राञ्च मानीयाहवनीयस्थाने निधेहीत्यर्थः। तथा चाश्वलायन आह— "गार्हपत्यादाहवनीयं ज्वलन्त मुद्धरेत्"–इति (श्रौ० २.२.१.)। 'उद्धर आहवनीयम्' –'इति' अमुं प्रैषम् 'अपराह्णे' सायङ्काले सूर्यास्तमयात् प्राग् यजमानो ब्रूयात्। एवं सति अह्ना सर्वेणापि यदेव पुण्यं यजमानः करोति, तत्सर्वं प्राङुधृत्य भयरहिते आहवनीयस्थाने निहितवान् भवति †॥

प्रातःकालीनं यजमानकर्त्तव्यं विधत्ते— "उद्धराहवनीय मिति प्रातराह ; यदेव रात्र्या साधु करोति, तदेव तत्प्राङुधृत्य तदभये निधत्ते"–इति। पूर्ववद् व्याख्येयम् ॥

---

* "प्रतिष्ठितपदं" क।

† उद्धरणप्रकारोद्धरणमन्त्रादिकं सर्व माश्वलायनीयश्रौतसूत्रेषु द्रष्टव्यम् (२. २.) ।

आहवनीयोद्धरणं प्रशंसति— "यज्ञो वा आहवनीयः, स्वर्गो लोक आहवनीयः"–इति। आहवनीयस्य यज्ञनिष्पादनेन स्वर्गहेतुत्वादुभयरूपत्वम्॥ वेदनं प्रशंसति— "यज्ञ एव तत् स्वर्गे लोके स्वर्गं लोकं निधत्ते य एवं वेद"–इति। आहवनीयोद्धरणस्य वेदिता स्वर्गसाधनयज्ञात्मके स्थाने स्वर्गं लोकं स्थापितवान् भवति॥

अथाग्निहोत्रहोमद्रव्यं क्षीरादिरूपं प्रशंसितु मुपक्रमते—"यो वा अग्निहोत्रं वैश्वदेवं षोळशकलं पशुषु प्रतिष्ठितं वेद, वैश्वदेवेनाग्निहोत्रेण षोळशकलेन पशुषु प्रतिष्ठितेन राध्नोति"–इति। 'यः' पुमानग्निहोत्रशब्देन कर्मवाचिनोपलक्षितं होमद्रव्यं वेद, स पुमानग्निहोत्रकर्मणा 'राध्नोति' समृद्धो भवति। कीदृश मग्निहोत्रद्रव्यम्? 'वैश्वदेवं' वक्ष्यमाणा रुद्रादयो विश्वेदेवाः, तेषां सम्बन्धि; 'षोळशकलं' षोड़शावस्थम्। ते चावस्थाविशेषा रौद्रंगवीत्यादिना वक्ष्यन्ते। गवि स्थितत्वादेव पशुषु तत्प्रतिष्ठितम्। अग्निहोत्रेणेत्यत्रापि विशेषणत्रयं द्रव्यद्वारा योजनीयम्॥

होमद्रव्यस्य बहुदेवतासम्बन्धे षोड़शावस्थोपेतत्वं च दर्शयति— "रौद्रं गविसद्, वायव्य मुपावसृष्ट माश्विनं दुह्यमानं, सौम्यं दुग्धं, वारुण मधिश्रितं, पौष्णं समुदयन्तं, मारुतं विष्यन्दमानं, वैश्वदेवं बिन्दुमन्, मैत्रं शरोगृहीतं, द्यावापृथिवीय मुद्वासितं, सावित्रं प्रक्रान्तं, वैष्णवं क्रियमाणं, बार्हस्पत्य मुपसन्न मग्नेः पूर्वाहुतिः, प्रजापते रुत्तरैन्द्रं हुतम्"–इति। होमद्रव्यं क्षीरं 'गवि सत्' गोशरीरे यदा तिष्ठति, तदा 'रौद्र'' रुद्रदेवताकं वेदितव्यम्; 'उपावसृष्ट'' वत्सेन संसृष्टं प्रस्तुतं यदा भवति, तदा वायुदेवताकम्; दुह्यमानत्वदशाया मश्विदेवताकम्; दुग्धत्व-

दशायां सोमदेवताकम्; ‘अधिश्रितं’ पाकार्थं मग्नौ स्थापितं वरुणदेवताकम्; ‘समुदयन्तं’ पात्रमध्ये स्थित्वा सन्तापवशेन सम्यगूर्ध्वदशायां पूषदेवताकम्; ‘विष्यन्दमानम्’ ऊर्ध्वं मुद्गतस्य पात्राद् बहिर्विशेषेण स्यन्दनदशापन्नं मरुद्देवताकम्; ‘बिन्दुमत्’ बुद्बुदवत् विश्वेषां देवानां सम्बन्धि; ‘शरोगृहीतं’ सारप्रचयभावापन्नं* मित्रदेवताकम्; ‘उद्वासितम्’ अग्निस्थानाद् बहिरवस्थापितं द्यावापृथिवीदेवताकम्; ‘प्रक्रान्तं’ होतुं हरणायोपक्रान्तं सवितृदेवताकम्; ‘ह्रियमाणं’ होमस्थाने नीयमानं विष्णुदेवताकम्; ‘उपसन्नं’ नीत्वा वेद्या मासादितं बृहस्पतिदेवताकम्; तेन द्रव्येण या पूर्वाहुतिः, साग्निसम्बन्धिनी; उत्तराहुतिस्तु प्रजापतिसम्बन्धिनी; ‘हुतं’ होमोत्तरकालीन मिन्द्रदेवताकम्। एवं हविषः षोडशावस्थाः तत्तद्देवतासम्बन्धाश्च दर्शिताः† ॥

तत्सर्व मुपसंहरति— “एतद्वा अग्निहोत्रं वैश्वदेवं षोळशकलं पशुषु प्रतिष्ठितम्”—इति। अग्निहोत्रं तदर्थंक्षीरम् ॥

तद्वेदनं प्रशंसति— “वैश्वदेवेनाग्निहोत्रेण षोळशकलेन पशुषु प्रतिष्ठितेन राध्नोति य एवं वेद”—इति ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां पञ्चमाध्याये
(पञ्चविंशाध्याये) प्रथमः खण्डः ॥ १ (२६) ॥

---

* “क्षीरमध्ये घनीभूतं यच्छरः सारं तन्मित्रस्य प्रियम्”—इति तै०ब्रा०सा०भा० २,१,७।

† तैत्तिरीयब्राह्मणेऽप्येता एव षोडशावस्थास्तत्तद्देवताश्चाम्नाताः (२,१,७.)।

॥ अथ द्वितीयः खण्डः ॥

यस्याग्निहोत्र्युपावसृष्टा॑ दुह्यमानोपविशेत्का॑ तत्र प्रायश्चित्तिरिति॑ तामभिमन्त्रयेत॑ यस्मा॑द् भीषा॒ नि॒षी॑दसि॒॑ ततो॑ नो॒ अभ॑यं कृधि॑ पशून्नः सर्वा॑न् गोपा॑य नमो॑ रुद्राय मीळ्हुष इति॑ तामुत्थापये॑दुदस्था॒द्दे॑व्यदि॑ति॒रा॑यु॒र्यज्ञ॒पता॑वधात्॑ इन्द्राय कृणवती भाग॑ं मित्राय वरुणाय चेत्य॑थास्या उदपात्र॑ मूधसि च मुखे चोपगृह्णीया॑दथैनां ब्राह्मणाय दद्यात्सा॑ तत्र प्रायश्चित्ति॑र्यस्याग्निहोत्र्युपावसृष्टा॑ दुह्यमाना वाश्येत॑ का तत्र प्रायश्चित्तिरित्य॑शनायां ह वा एषा॑ यजमानस्य प्रतिख्याय वाश्यते॑ तामन्नमप्यादये॑च्छान्त्यै॑ शान्तिर्वा अन्नं सूयवसाद्भगवती हि भूया इति॑ सा तत्र प्रायश्चित्ति॑र्यस्याग्निहोत्र्युपावसृष्टा॑ दुह्यमाना स्पन्देत॑ का तत्र प्रायश्चित्तिरिति॑ सा यत्तत्र * स्कन्दयेत्त॑दभि॒मृ॑श्य॒ जपे॑द्य॒दद्य॒ दु॒ग्धं पृथि॒वी॒म॑सृप्त॒ यदोष॑धी॒रत्य॑सृ॒पद्य॒दापः॑ पयो गृहेषु पयो अघ्न्यायाम्॑ पयो वत्सेषु पयो अस्तु तन्मयीति॑ तत्र यत्परिशिष्टं स्या॑त्तेन जुहुयाद्य॑द्यलं होमाय स्याद्य॑द्यु वै सर्वं सिक्तं स्या॑दथान्या माहूय तां दुग्ध्वा तेन

---

* "सा तत्र" क ।

जुहुयाद्वा त्वेव श्रद्धायै होतव्यं सा तत्र प्रायश्चित्तिः सर्वं वा अस्य बर्हिष्यं सर्वं परिगृहीतं य एवं विद्वानग्निहोत्रं जुहोति ॥ २ (२७) ॥

अथाग्निहोत्रे वैकल्यनिमित्तं प्रश्नपूर्वकं प्रायश्चित्तं विधत्ते— "यस्याग्निहोत्र्युपावसृष्टा दुह्यमानोपविशेत्का तत्र प्रायश्चित्तिरिति, ता मभिमन्त्रयेत"–इति । अग्निहोत्रार्थं सम्पादिता गौः 'अग्निहोत्री' सा च 'उपावसृष्टा' दोहनार्थं वत्सेन संयोजिता, ऊर्ध्वं दुह्यमाना सती, दोहनमध्ये यद्युपविशेत्, तदानीं शास्त्रीयस्य दोहनस्य विनष्टत्वाद् 'यस्य' यजमानस्य 'तत्र' अग्निहोत्र्युपवेशने प्रायश्चित्तिरपेक्षिता, सा च कीदृशी ? इति प्रश्नः । 'ताम्' अग्निहोत्रीं वक्ष्यमाणेन मन्त्रेणाभिमन्त्रयेतेति प्रायश्चित्तविधिः ॥

तत्र मन्त्रं दर्शयति— "यस्माद् भीषा निषीदसि, ततो नो अभयं कृधि ; पशून् नः सर्वान् गोपाय, नमो रुद्राय मीळ्हुष इति"–इति । हे अग्निहोत्रि ! त्वं 'यस्माद्' विरोधिनः शङ्क्यमानान्मनसा स्मर्यमाणाद् व्याघ्रादेः 'भीषा' भयेन 'निषीदसि' उपविशसि, 'ततः' भयहेतोः सकाशात् 'नः' अस्माकम् अभयं 'कृधि' कुरु । तथा 'नः' अस्माकं सर्वान् पशून् 'गोपाय' रक्ष । 'मीळ्हुषे' सेचनसमर्थाय रुद्राय पशुस्वामिने नमोऽस्तु । 'इति'–शब्दो मन्त्रसमाप्त्यर्थः ॥

अभिमन्त्रणादूर्ध्वं तस्या अग्निहोत्र्या मन्त्रान्तरेणोत्थापनं विधत्ते— "ता मुत्थापयेत्"–इति ॥

तस्मिन्नुत्थापने मन्त्र माह— "उदस्थाद्देव्यदितिरायुर्यज्ञपतावधात्, इन्द्राय कृण्वती भागं मित्राय वरुणाय चेति"–इति ।

‘अदितिः’ अदीना देवी देवतारूपा अग्निहोत्री ‘उदस्थात्’ उत्थितवती । उत्थाय च ‘यज्ञपतौ’ यजमाने आयुः ‘अधात्’ सम्पादितवती । कीदृश्यग्निहोत्री ? इन्द्रमित्रवरुणाना मपेक्षितं हविर्भागं ‘कृण्वती’ सम्पादयन्ती । ‘इति’–शब्दो मन्त्रसमाप्त्यर्थः ॥

उत्थापनानन्तरकर्त्तव्यं दर्शयति— “अथास्या उदपात्र मूधसि च मुखे चोपगृह्णीयादथैनां ब्राह्मणाय दद्यात्सा तत्र प्रायश्चित्तिः” –इति । ‘अस्याः’ अग्निहोत्र्याः, ऊधसि उदकपात्रग्रहणं नाम जलस्योत्क्षेपणं, मुखे गृहीत्वा जलं पाययित्वा, तादृश्या ब्राह्मणाय दानं यदस्ति, सा ‘तत्र’ वैकल्ये प्रायश्चित्तिरवगन्तव्या ॥

अथ दोहनकाले ध्वनिकरणे प्रायश्चित्तं विधत्ते— “यस्याग्निहोत्र्युपावसृष्टा दुह्यमाना वाश्येत, का तत्र प्रायश्चित्ति रित्यशनायां ह वा एषा यजमानस्य प्रतिख्याय वाश्यते, ता मन्न मप्यादयेच्छान्त्यै ; शान्तिर्वा अन्नं सूयवसाद्भगवती हि भूया इति ; सा तत्र प्रायश्चित्तिः”–इति । ‘वाश्येत’ हम्भारवं कुर्वीत, तदानी मेवाग्निहोत्री स्वकीयाम् ‘अशनायां’ क्षुधां यजमानस्य ‘प्रतिख्याय’ प्रख्यापनार्थं ‘वाश्यते’ ध्वनिं करोति । तस्मात् ‘ताम्’ अग्निहोत्रीं वाश्यमाना मन्नम् ‘अप्यादयेत्’ अपिशब्दात् तृणादिक मपि । तच्च भक्षणं क्षुधाशान्त्यै सम्पद्यते । अन्नं शान्तिहेतुरिति प्रसिद्धम् । “सूयवसाद्”–इत्यादिर्मन्त्रः । हे अग्निहोत्रि ! ‘भगवती’ पूज्या त्वं ‘सूयवसात्’ भूयः सुष्ठु यवसं तृणं सूयवसं, तदत्ति भक्षयतीति सूयवसात् ; तादृशी भवेति मन्त्रार्थः । मन्त्रेणान्न मादयेदिति यदस्ति, सैव ‘तत्र’ ध्वनौ प्रायश्चित्तिर्द्रष्टव्या ॥

दोह्यमानस्य क्षीरस्याग्निहोत्र्याः स्थानचलनेन भूमौ पतने प्रायश्चित्तं विधत्ते— “यस्याग्निहोत्र्युपावसृष्टा दुह्यमाना स्पन्देत,

का तत्र प्रायश्चित्तिरिति ; सा तत्र स्कन्दयेत्तदभिमृश्य जपेत्"–इति। 'स्पन्देत' किञ्चिच्चलेत्, 'सा' चलन्ती यदि 'तत्र' भूमौ 'स्कन्दयेत्' ईषत् क्षीरं पातयेत्, 'तत्' क्षीरं हस्तेन स्पृष्ट्वा मन्त्रं जपेत् ॥

तं मन्त्रं दर्शयति—"यदद्य दुग्धं पृथिवी मसृप्त, यदोषधीरत्यसृपद्यदापः ; पयो गृहेषु पयो अघ्न्यायाम्, पयो वत्सेषु पयो अस्तु तन्मयीति"–इति। अथेदानीं यद् 'दुग्धं' क्षीरं पृथिवीम् 'असृप्त' प्राप्नोत्, यच्च 'ओषधीः' पतितं तृणजातम् 'अत्यसृपत्' अतिशयेन प्राप्नोत्, यदपि 'तत्' क्षीरं बिन्दुरूपम् 'आपः' भूमिष्ठं जलं प्राप्नोत् ; आप इति द्वितीयार्थे प्रथमा ; सर्वं मस्मदीयेषु गृहेषु 'अघ्न्यायाम्' अस्मदीयायां धेन्वां, वत्सेषु अस्मदीयेषु, 'मयि' मदुदरे वा 'अस्तु' तिष्ठतु। पृथगन्वयार्थं 'पयः'–शब्दावृत्तिः। 'इति' –शब्दो मन्त्रसमाप्त्यर्थः ॥

उक्तप्रायश्चित्तादूर्ध्वं होमं विधत्ते— "तत्र यत्परिशिष्टं स्यात्, तेन जुहुयाद्यद्यलं होमाय स्याद्"–इति। 'तत्र' दोहनपात्रे 'यत्' क्षीरं भूमौ पतित्वा परिशिष्टं स्यात्, तद्यदि होमाय 'अलं' पर्य्याप्तं भवेत्, तदानीं तेन जुहुयात् ॥

अपर्य्याप्तावुपायान्तर माह— "यद्यु वै सर्वं सिक्तं स्यादथान्या माहूय तां दुग्ध्वा तेन जुहुयादा त्वेव श्रद्धायै होतव्यं ; सा तत्र प्रायश्चित्तिः"–इति। 'यद्यु वै' यदि च 'सर्वं' दुह्यमानं क्षीरं 'सिक्तं' भूमौ पतितं स्यात्, तदानीम् 'अन्यां' काञ्चिद्गाम् 'आहूय' आनीय, तां दुग्ध्वा तदीयेन क्षीरेण जुहुयात्। यद्यन्यापि न लभेत, तदानीमप्यग्निहोत्रं न परित्याज्यं किन्तु 'आ श्रद्धायै होतव्यम्' ; आङोऽत्राभिविधिरर्थः,— आ श्रद्धायाः, श्रद्धासहितं सर्वं वस्तुजातं

'होतव्यं' होमयोग्यम् । अय मर्थः— दधियवाग्वादीनां * मध्ये येन केनापि द्रव्येण होतव्यम्, सर्वालाभे त्वन्ततः श्रद्धा मपि जुहुयात् । "अहं श्रद्धां जुहोमि"–इति सङ्कल्प्य श्रद्धाहोमः। अग्निहोत्रस्य नित्यत्वात् सर्वात्मना परित्यागो न युक्तः इति ॥

वेदनपूर्वक मनुष्ठानं प्रशंसति— "सर्वं वा अस्य बर्हिष्यं, सर्वं परिगृहीतं य एवं विद्वानग्निहोत्रं जुहोति"–इति। विदित्वा अनुष्ठातुः 'अस्य' पुरुषस्य 'सर्वम्' अपि द्रव्यं 'बर्हिष्यं' यज्ञयोग्यम्। अतः सर्वं द्रव्यम् अनेन होमार्थं परिगृहीतं भवति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां पञ्चमाध्याये
(पञ्चविंशाध्याये) द्वितीयः खण्डः ॥ २ (२७) ॥

॥ अथ तृतीयः खण्डः ॥

असौ वा अस्यादित्यो यूपः॑ पृथिवी वेदि॑रोषधयो बर्हिर्वनस्पतय इध्मा॑ आपः प्रोक्षण्यो॑ दिशः परिधयो॑ यद्ध वा अस्य किञ्च नश्यति॑ यन् म्रियते॑ यद-

---

* "पयसा नित्यहोमः। यवागूरोदनो दधि सर्पिर्ग्रामकामान्नाद्यकामेन्द्रियकामतेजस्कामानाम्"–इत्यादिकल्पसूत्राणीहालोच्यानि (आश्व० श्रौ० २.३.१,२.)। "द्वयोः पयसा जुहुयात् पशुकामस्य०—०आज्येन जुहुयात् तेजस्कामस्य०—०दध्नेन्द्रिय कामस्य०—० यवाग्वा ग्रामकामस्य०—०"–इति तै० ब्रा० २.१.५ द्र०।

पाजन्ति॑ सर्वँ हैवैनं तदमुष्मिंल्लोके॑ * यथा बर्हिषि दत्त मागच्छेदेव मागच्छति॑ य एवं विद्वानग्निहोत्रं जुहोत्युभयान्वा एष देवमनुष्यान् विपर्यासं दक्षिणा नयति॑ सर्वँ चेदं यदिदं किञ्च॑ मनुष्यान्वा एष साय माहुत्या॑ देवेभ्यो दक्षिणा नयति॑ सर्वँ चेदं यदिदं किञ्च॑ त एते प्रलीना न्योकस इव शेरे॑ मनुष्या देवेभ्यो दक्षिणा नीता॑ देवान्वा एष प्रातराहुत्या॑ मनुष्येभ्यो दक्षिणा नयति॑ सर्वँ चेदं यदिदं किञ्च॑ त एते विविदाना इवोत्पतन्त्यदो ऽहं करिष्ये॑ ऽदो ऽहं गमिष्यामीति वदन्तो॑ यावन्तं ह वै सर्वँ मिदं दत्त्वा लोकं जयति॑ तावन्तं ह लोकं जयति॑ य एवं विद्वानग्निहोत्रं जुहोत्यग्नये वा एष साय माहुत्याश्विन मुपाकरोति॑ तद्वाक् प्रतिगृणाति॑ वाग् वागित्यग्निना ह्यस्य॑ रात्र्याश्विनं शस्तं भवति॑ य एवं विद्वानग्निहोत्रं जुहोत्यादित्याय वा एष प्रातराहुत्या॑ महाव्रत मुपाकरोति॑ तत्प्राणः प्रतिगृणात्यन्न मन्न मित्यादित्येन ह्यस्याह्ना महाव्रतं शस्तं भवति॑ य एवं विद्वानग्निहोत्रं जुहोति॑ तस्य वा एतस्याग्निहोत्रस्य॑ सप्त च शतानि विंशतिश्च संवत्सरे साय माहुतयः॑ सप्त चो एव शतानि विंशतिश्च॑

---

* "तदमुष्मिंलोके" ख, ग, ट ; "तदमुष्मिल्लोके" घ ।

संवत्सरे प्रातराहुतयस्ता॑वत्यो ऽग्नेर्यजुष्मत्य इष्टकाः॑ संवत्सरेण हास्या॑ग्निना चित्येनेष्टं भवति॑ य एवं विद्वानग्निहोत्रं जुहोति॑ ॥ ३ (२८) ॥

यथा श्रद्धाहोमः पूर्वं मुक्तः, तथा भावनारूपो होमोऽग्निहोत्रप्रशंसार्थं मेव प्रदर्श्यते—"असौ वा अस्यादित्यो यूपः, पृथिवी वेदिरोषधयो बर्हिर्वनस्पतय इध्मा, आपः प्रोक्षण्यो, दिशः परिधयः"–इति । 'अस्य' भावनारूपं यज्ञं कुर्वतः पुरुषस्यासावादित्यो यूपस्थानीयः, पृथिवी वेदिस्थानीया, ओषधयो बर्हिःस्थानीयाः, वनस्पतय इध्मस्थानीयाः, भूमौ विद्यमाना आपः सर्वा अपि संस्कृतप्रोक्षणीस्थानीयाः, प्राच्या दिशः परिधिस्थानीयाः । ईदृशी भावनैवाग्निहोत्रहोमः ; इतरसम्पत्त्यभावेऽपि एतादृशो वा होमः कर्त्तव्यः ॥

ईदृग्भावनायां फलं दर्शयति—"यद्ध वा अस्य किञ्च नश्यति, यन् म्रियते, यदपाजन्ति, सर्वं हैवैनं तदमुष्मिंल्लोके यथा बर्हिषि दत्त मागच्छेदेव मागच्छति य एवं विद्वानग्निहोत्रं जुहोति"–इति । यः पुमानादित्यो यूप इत्यादिकं विद्वान् भावयन्नग्निहोत्रं जुहोति, 'एनं' पुरुषम् 'अमुष्मिन्' स्वर्गे लोके तत्सर्वं मागच्छति । किं कि मिति, तदुच्यते—'अस्य' पुरुषस्य 'यद्ध वै किञ्च' अस्मिंल्लोके यत् कि मपि वस्तु नश्यति, यच्च पुत्रादिकं म्रियते, यदप्यन्यद् 'अपाजन्ति' अपगच्छति, स्वस्माद्वियुक्तं भवति ; तत्सर्वं प्राप्यते । तत्र दृष्टान्तः— यथा 'बर्हिषि' यज्ञे दत्तं वस्तु स्वर्गे यजमान मागच्छेत्, एवं नष्टं मृत मपगतं च सर्वं मागच्छति ※ ॥

※ "ब्रह्मवादिनो वदन्ति०—०बर्हिष्यं दत्तं भवति"–इति तै० ब्रा० २.१.५.१,२ द्र० ।

योऽयं श्रद्धाहोमः पूर्व मुक्तः, तस्यैव पुनरपि यूपवेद्यादिभावनारूप मनुष्ठान मुक्तम्, इदानीं भावनारूपां दक्षिणा माह—"उभयान् वा एष देवमनुष्यान् विपर्यासं दक्षिणा नयति, सर्वं चेदं यदिदं किञ्च"–इति। 'एषः' श्रद्धाहोमस्य कर्त्ता, 'देवान्मनुष्यांश्च, उभयविधान् 'विपर्यासं' विपर्यस्य दक्षिणाः कृत्वा 'नयति' ऋत्विग्भ्यः समर्पयति। यत्र देवानां दक्षिणारूपत्वं, न तत्र मनुष्याणां तद्रूपत्वम्; यत्र तु मनुष्याणां दक्षिणात्वं, न तत्र देवाना मित्येवं विपर्यासः; अनेन विपर्यासेन देवेषु मनुष्येषु च दक्षिणात्वसङ्कल्पः कर्त्तव्यः। न केवलं देवमनुष्याणा मेव दक्षिणात्वम्, किं तर्हि? 'यत्किञ्च इदं' जगदस्ति, तत्सर्व मिदं श्रद्धाहोमीयदक्षिणा नयति; सर्वस्मिन् जगति दक्षिणेय मिति सङ्कल्पः कर्त्तव्यः॥

मनुष्याणां कुत्र दक्षिणात्व मित्याशङ्क्य तद्दर्शयति— "मनुष्यान्वा एष सायमाहुत्या देवेभ्यो दक्षिणा नयति सर्वं चेदं यदिदं किञ्च; त एते प्रलीना न्योकस इव शेरे, मनुष्या देवेभ्यो दक्षिणा नीताः"–इति। येयं श्रद्धाहोमे सायमाहुतिः, तया 'आहुत्या' तदाहुतिनिमित्ते 'देवेभ्यः' ऋत्विक्स्थानीयेभ्यो 'मनुष्यान्' गोसुवर्णस्थानीयान् दक्षिणाः कृत्वा 'नयति' समर्पयति। न केवल मनुष्यान्, किन्तु यत् किञ्चिदिदं जगदस्ति, तत्सर्वं दक्षिणाः कृत्वा समर्पयति। कथं मनुष्याणां रात्रौ दक्षिणात्व मिति, तदुच्यते— 'एते' मनुष्याः यस्मात्सायं देवेभ्यो दक्षिणा नीताः, तस्माद्रात्रौ 'प्रलीनाः' स्व-स्व-व्यापाररहिताः 'न्योकस इव' निवृत्त मोकः स्थानं गृहरूपं येषां ते न्योकसः, मदीयं गृह मित्यभिमानरहिता एव सन्तः 'शेरे' शेरते, सुषुप्तिं गच्छन्तीत्यर्थः। यथा ऋत्विग्भ्यः

समर्पितं गवादिकं दक्षिणाद्रव्यं पराधीनं भवति, एवं रात्रौ मनुष्या देवाधीनत्वात् स्वव्यापाराक्षमाः ; तदिदं पारवश्यं दक्षिणात्वे लिङ्गम् ॥

अथ देवानां दक्षिणात्वं दर्शयति— "देवान्वा एष प्रातराहुत्या मनुष्येभ्यो दक्षिणा नयति सर्वं चेदं यदिदं किञ्च ; त एते विविदाना इवोत्पतन्त्यदो ऽहं करिष्ये ऽदो ऽहं गमिष्यामीति वदन्तः"–इति । 'एषः' अग्निहोमोऽयं 'प्रातराहुत्या' निमित्तभूतया 'मनुष्येभ्यः' ऋत्विक्स्थानीयेभ्यो 'देवान्' गवादिद्रव्यस्थानीयान् दक्षिणाः कृत्वा समर्पयति । यत् किञ्चिदिदं जगदस्ति, तदपि सर्वं दक्षिणात्वेन समर्पयति । अतः 'ते एते' देवाः दक्षिणारूपेण मनुष्यपारवश्यं गताः 'विविदाना इवोत्पतन्ति' स्वस्वामिभूतानां मनुष्याणा मभिप्रायविशेषं जानन्त एवोद्योगं कुर्वन्ति । किं कुर्वन्तः सन्तः ? 'अस्य' मनुष्यस्य 'अदः' कार्यं महं करिष्ये, तस्मात् 'अदः' मनुष्यस्य समीप महं गमिष्यामीति वदन्तः । अहनि देवा मनुष्यैः पूज्यमानास्तत्समीपं गत्वा तदीय मिद मायुरारोग्यादिरूपं कार्य्यं करिष्याम इति वदन्तो ,मनुष्याधीना अवतिष्ठन्ते ; तदिदं देवानां दक्षिणात्वम् । अथवा 'त एते' इति वाच्यं मनुष्यपरत्वेन योजनीयम् । 'त एते' मनुष्याः प्रातःकाले निद्रापारवश्यं परित्यज्य देवतानुग्रहरूपां दक्षिणां गृहीत्वा 'विविदाना इव' विशेषेण स्व-स्व-कार्य्यं जानन्त एव 'उत्पतन्ति' शयनादुत्तिष्ठन्ति ; उत्थाय चाह मिदं सन्ध्यावन्दनं करिष्ये ऽह मिदं राजगृहं गमिष्यामीत्येवं वदन्तो वर्त्तन्ते । तदेव मनुष्याणां स्वातन्त्र्यं देवतारूपदक्षिणाप्रतिग्रहस्य लिङ्गम् ॥

उक्तार्थवेदनपूर्वक मग्निहोत्रानुष्ठानं प्रशंसति— "यावन्तं ह

वै सर्व मिदं दत्त्वा लोकं जयति, तावन्तं ह लोकं जयति य एवं विद्वानग्निहोत्रं जुहोति"-इति। 'इदं सर्वं' स्वकीयं धनं दत्वा तद्दानफलरूपं यावन्तं लोकं पुरुषः प्राप्नोति, तावन्त मेव लोकं श्रद्धाहोमवेदनपूर्वकाग्निहोत्रानुष्ठायी प्राप्नोति * ॥

तदेवं श्रद्धाहोमादिरूपेणाग्निहोत्रं प्रशस्याथ गवामयनसम्पादनेन प्रशंसति—"अग्नये वा एष सायमाहुत्याश्विन मुपाकरोति, तद्वाक् प्रति गृणाति वाग् वागिति"-इति। येय मग्निहोत्रस्य सायमाहुतिरग्निदेवतार्था, तया अग्निहोत्री गवामयनसम्बद्ध माश्विनं शस्त्र मुपाकरोति; सायंहोमः शस्त्रोपक्रम इत्यर्थः। अस्याः सायमाहुतेरग्निर्देवता, आश्विनशस्त्रस्यादावपि "अग्निर्होता गृहपति"-इति (सं० ६.१५.१३.१.) मन्त्रेऽग्निः स्तुतः, तदिदं सादृश्यम्। तत्राहुतिरूपं शस्त्रं 'वाक् प्रतिगृणाति' यथा शस्त्रस्य प्रतिगरः, एव मत्र वाक् शब्दः प्रयुज्यते। तथाग्निहोत्रोद्धरणमन्त्रे "वाचा त्वा होत्रा"-इति वाक् शब्दः प्रयुज्यते, तदिदं प्रतिगरसदृशम्। वाग्वागिति वीप्सा प्रयोगबाहुल्यापेक्षा। गवामयनस्य प्रायणीय महो ऽतिरात्रसंस्थम्; अतिरात्रे चाश्विनं शस्त्रं शस्यते; तेन सायंहोमस्य गवामयनप्रारम्भसादृश्यं प्रतिपादितं भवति † ॥

उक्तार्थवेदनपूर्वक मनुष्ठानं प्रशंसति—"अग्निना हास्य रात्राश्विनं शस्त्रं भवति य एवं विद्वानग्निहोत्रं जुहोति"-इति। 'अस्य' विदित्वानुष्ठातुः सायमाहुतिः देवेनाग्निना रात्रौ विहित माश्विनं शस्त्रं शस्त्रं भवति ॥

---

* "यत् सायं जुहोति०—०हुत मेव तत्"-इति तै० ब्रा० २.१.५.२,३ द्र० ।

† ४ प० २ अ० १ ख० (२ भा० २७८—२८२ पृ०) ।

सायमाहुतिं प्रायणीयातिरात्ररूपेण प्रशस्य प्रातराहुतिं गवामयनगतमहाव्रतरूपेण प्रशंसति— "आदित्याय वा एष प्रातराहुत्या महाव्रत मुपाकरोति, तत्प्राणः प्रतिष्ठणात्यन्न मन्न मिति"–इति। आदित्यार्थं हूयमाना येयं प्रातराहुतिः, तया 'एषः' अग्निहोत्री महाव्रताख्यं गवामयनस्योपान्तिम मह्नः प्रारभते; "तदिदास"–इत्यादित्यदेवताकेन मन्त्रेण (सं० १०.१२०.१.) तस्मिन्नहनि निष्केवल्यशस्त्रप्रारम्भात्। तच्चाहुतिरूपं शस्त्रं प्राणः प्रतिष्ठणाति। कथ मेतदिति, तदुच्यते— "अन्नं पयो रेतो अस्मासु"–इत्यग्निहोत्रे भक्षणमन्त्रः; तेन 'अन्न मिति प्रतिष्ठणाति'–इत्युच्यते। अन्नञ्च प्राणत्वेन संस्तुतम्; "अन्नं प्राणमन्न मपानम्"–इतिश्रुतेः। अन्न मन्न मिति वीप्सा प्रयोगबाहुल्यापेक्षा। तस्मादस्ति महाव्रतस्य प्रातराहुतिगतादित्यसम्बन्धः * ॥

उक्तार्थवेदनपूर्वक मनुष्ठानं प्रशंसति— "आदित्येन ह्यास्याञ्जा महाव्रतं शस्तं भवति य एवं विद्वानग्निहोत्रं जुहोति"–इति। पूर्ववद् व्याख्येयम् ॥

प्रकारान्तरेण गवामयनसाम्यं सम्पाद्य प्रशंसति— "तस्य वा एतस्याग्निहोत्रस्य सप्त च शतानि विंशतिश्च संवत्सरे सायमाहुतयः, सप्त चो एव शतानि विंशतिश्च संवत्सरे प्रातराहुतयस्तावत्यो ऽग्नेर्यजुष्मत्य इष्टकाः"–इति। एकैकस्यां रात्रौ द्वे द्वे आहुती; तथा सति षष्ट्यधिकशतत्रयसङ्ख्याकासु संवत्सरस्य रात्रिषु, तत्सङ्ख्याद्वैगुण्येन विंशत्यधिकसप्तशतसङ्ख्याकाः सायमाहुतयः सम्पद्यन्ते। प्रातराहुतयोऽपि संवत्सरस्यैतावत्य एव। 'सप्त चो'–इत्युकारो निपातो वाक्योपन्यासार्थः। मिलित्वा सर्वाहुतीनां

---

* ४ प० २.८. (२ भा० २१७—२२०पृ०) द्र०।

चत्वारिंशदधिकेन शतचतुष्टयेन युक्ता सहस्रसङ्ख्या सम्पद्यते ; गवामयने चित्यस्याग्नेर्यजुष्मत्यो मन्त्रयुक्ता इष्टका अपि तावत्यः* ; अतोऽग्निहोत्रस्येष्टकासङ्ख्याद्वारा गवामयनसादृश्यम् ॥

एतद्वेदनपूर्वक मनुष्ठानं प्रशंसति — "संवत्सरेण हास्याग्निना चित्येनेष्टं भवति य एवं विद्वानग्निहोत्रं जुहोति"–इति । तस्य विदित्वा अनुष्ठातुः संवत्सरसत्रेण चित्याग्नियुक्तेनेष्टं भवति ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां पञ्चमाध्याये
(पञ्चविंशाध्याये) तृतीयः खण्डः ॥ ३ (२८) ॥

॥ अथ चतुर्थः खण्डः ॥

वृषशुष्मो ह वातावत उवाच जातूकर्ण्यो॑ वक्ता स्मो वा इदं देवेभ्यो॑ यद्धैतदग्निहो॑त्र मुभयेद्युरहूयतान्येद्युर्वाव॑ तदेत॑र्हि हूयत इ॑त्येतदु हैवोवाच॑ कुमारी गन्धर्वगृहीता॑ वक्ता स्मो वा इदं पितृभ्यो॑ यद्धैतदग्निहोत्र मुभयेद्युरहूयता॑न्येद्युर्वा॑व तदेत॑र्हि हूयत इ॑त्येतद्वा अग्निहोत्र॑ मन्येद्युर्हूयते॑ यदस्तमिते सायं जुहो॑त्यनुदिते प्रात॑रथैतदग्निहोत्र॑ मुभये-

---

* "अथ यजुष्मत्यः—दर्भस्तम्बो लोगेष्टकाः पुष्करपर्णं रुक्मपुरुषौ स्रुचौ स्वयमातृण्णा दूर्वेष्टका द्वियजू रेतःसिचौ विश्वज्योतिरृतव्ये अषाढा"–इत्यादयः तै० ब्रा० १०. ४.१.१४—२० । "पयी यजुष्मत्"–इति निरु० ११. ४. ९ ।

द्युर्हूयते यदस्तमिते सायं जुहोत्युदिते प्रातस्तस्मादुदिते होतव्यं चतुर्विंशे ह वै संवत्सरेऽनुदितहोमी गायत्रीलोक माप्नोति द्वादश उदितहोमी स यदा द्वौ संवत्सरावनुदिते जुहोत्यथ हास्यैको हुतो भवत्यथ य उदिते जुहोति संवत्सरेणैव संवत्सर माप्नोति य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यं मेष ह वा अहोरात्रयोस्तेजसि जुहोति योऽस्तमिते सायं जुहोत्युदिते प्रातरग्निना वै तेजसा रात्रिस्तेजस्वत्यादित्येन तेजसा ऽहस्तेजस्वदहोरात्रयोर्हास्य तेजसि हुतं भवति य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यम् ॥ ४ (२९) ॥

अथानुदितहोमनिन्दोदितहोमस्तुतिश्च प्रारभ्यते— "वृषशुष्मो ह वातावत उवाच जातूकर्ण्यो वक्ता स्मो वा इदं देवेभ्यो यद्वैतदग्निहोत्र मुभयेद्युरहूयतान्येद्युर्वाव तदेतर्हि हूयत इति"– इति। वतावतनाम्नो महर्षेरपत्यं 'वातावतः' जतूकर्णस्य पौत्रो 'जातूकर्ण्यः', स च 'वृषशुष्मः' वृषभस्येव शुष्मो बलं यस्य महर्षेः सोऽयं वृषशुष्मः। तादृशो महर्षिः कदाचिदग्निहोत्रिणा मग्रे प्रसङ्गादिद मुवाच— हे अग्निहोत्रिणः! भवदीयम् 'इदम्' आचरणं देवेभ्यो 'वक्ता स्मः' वयं वक्ष्यामः। किं तदाचरणम्? इति, तदुच्यते— 'एतद्' अग्निहोत्रं पुरातनैर्महर्षिभिः 'उभयेद्युरहूयत' दिनद्वये हुत मासीत्। पूर्वदिनस्य रात्रावग्निमुद्दिश्य होमः,

परदिनस्य प्रातः सूर्य्य मुद्दिश्य होमः ; इत्येवं दिनद्वयानुष्ठानं पूर्वैः कृतम् ; तदुल्लङ्घ्य इदानी मेतदग्निहोत्रं मनुष्यैः ‘अन्येद्युः’ अन्यतरस्मिन्नेव दिवसे हूयते ;— अस्तमयादूर्द्ध मग्नये होमः, पुनरपि सूर्य्योदयात् प्रागेव सूर्य्याय होमः ; इत्येव मेकस्या मेव रात्रौ होमद्वय मनुचितं क्रियते। ‘इति’ एतदाचरणं शास्त्रविरुद्धं देवताना मग्रे कथयिष्यामीति वृद्धस्य महर्षेर्वाक्यम् [*] ॥

अस्मिन्नेवार्थे कुमारीवाक्य मप्युदाहरति— “एतदु हैवोवाच कुमारी गन्धर्वगृहीता वक्ता स्मो वा इदं पितृभ्यो यद्वैतदग्निहोत्र मुभयेद्युरहूयतान्येद्युर्वाव तदेतर्हि हूयत इति”—इति। ऋषेः पुत्री काचिद्बाला, तद्गृहस्वामिना गन्धर्वेण कदाचिद्गृहीता सती, प्रसङ्गादेतदेव वाक्य मग्निहोत्रिणा मग्रे उवाच। ‘वक्ता स्मः’ —इत्यादिक मेतद्वाक्यम् ; पितृभ्य इत्येतावानेव विशेषः ॥

ऋषेः कुमार्य्याश्च वाक्यतात्पर्य्यं दर्शयति— “एतद्वा अग्निहोत्र मन्येद्युर्हूयते यदस्तमिते सायं जुहोत्यनुदिते प्रातरथैतदग्निहोत्र मुभयेद्युर्हूयते, यदस्तमिते सायं जुहोत्यनुदिते प्रातः” —इति। इदानीन्तनो यदग्निहोत्रं सूर्य्येऽस्तमिते सायं जुहोति, पुनः सूर्य्येऽनुदिते प्रातर्जुहोति, एवं सति एतदेवाग्निहोत्रहोमद्वयम् ‘अन्येद्युः’ तु एकस्मिन्नेव दिने हूयते; रात्रिमध्ये एव द्विविधहोमनिष्पत्तेः। अथैतद्वैपरीत्येन पुरातनानां शास्त्रज्ञानां यदग्निहोत्रं सूर्य्येऽस्तमिते ऽध्वर्युः सायं जुहोति, परेद्युः प्रातरुदिते सूर्य्ये पश्चाज्जुहोति ; एतदग्निहोत्रं ‘उभयेद्युः’ दिनद्वय एव हूयते ॥

---

[*] “एक एकस्मै प्रब्रूयादिति ह स्माह जातूकर्ण्यः”—इति आर० ५.२.३.६। “जातूकर्ण्यो भारद्वाजात्”—इति शत० ब्रा० १४.५.५.२१ ; ७.३.२७। कातीयश्रौतसूत्रेऽपि जातूकर्ण्यस मतपार्थक्यानि उल्लिखितानि ४.१.२७; १०.२.१७; २५.७.३४ ।

एव मिदानीन्तनाना मेकदिनानुष्ठानरूपां निन्दाम्, पुरातनानां दिनद्वयानुष्ठानरूपां स्तुतिं च प्रदर्श्य, उदिते होमं प्रातःकाले विधत्ते — "तस्मादुदिते होतव्यम्"–इति ॥

प्रकारान्तरेणोदितहोमं प्रशंसति— "चतुर्विंशे ह वै संवत्सरे ऽनुदितहोमी गायत्रीलोक माप्नोति ; द्वादश उदितहोमी ; स यदा द्वौ संवत्सरावनुदिते जुहोत्यथ हास्यैको हुतो भवत्यथ य उदिते जुहोति, संवत्सरेणैव संवत्सर माप्नोति, य एवं विद्वानुदिते जुहोति ; तस्मादुदिते होतव्यम्"–इति । यः पुरुषो ऽनभिज्ञः इदानीन्तनोऽनुदितहोमी, स पुरुषश्चतुर्विंशतिसङ्ख्यापूरके संवत्सरे गायत्रीदेवताया लोक माप्नोति ; तावद्भिः संवत्सरैः गायत्र्यक्षरसङ्ख्यानिष्पत्तेः । उदितहोमी तु द्वादशसङ्ख्यापूरक एव संवत्सरे तं गायत्रीलोकं प्राप्नोति ; तावतैवोक्तसङ्ख्यानिष्पत्तेः । कथ मेतदिति, तदुच्यते— 'सः' अनुदितहोमी यदा द्वौ संवत्सरौ अनुदिते सूर्य्ये प्रातर्जुहोति, 'अथ' तदानीं तस्यानुदितहोमिन एक एव संवत्सरो हुतो भवति ; अस्तमयादूर्द्ध्वं पुनरुदयात् पूर्वं च कालैक्येन होमद्वयनिष्पत्त्यभावात् । अथ तद्विलक्षणेन 'यः' शास्त्राभिज्ञः उदयादूर्द्ध्वं प्रातर्जुहोति, तस्य कालद्वयानुष्ठानसिद्धेः संवत्सरद्वयम् इतरेणानुष्ठितं फल मेकेनैव संवत्सरेणास्य सिध्यति । तस्माद् द्वादशे संवत्सरे द्विगुणसङ्ख्यया गायत्रीलोकप्राप्तिरुपपद्यते । "संवत्सरेण"–इत्यादिकं वाक्यं विद्वत्प्रशंसार्थम् पुनरप्यावर्त्तनीयम् ; —यो विद्वान् जुहोति, स कालद्वयानुष्ठानात् संवत्सरमात्रेण संवत्सरद्वयफलं लभते । तस्मादुदिते सूर्य्ये सति पश्चादेव होतव्यम् ॥

पुनरपि प्रकारान्तरेणोदितहोमं प्रशंसति— "एष ह वा

अहोरात्रयोस्तेजसि जुहोति, योऽस्तमिते सायं जुहोत्युदिते प्रातरग्निना वै तेजसा रात्रिस्तेजस्वत्यादित्येन तेजसाहस्तेजस्वत्”-इति। ‘यः’ सायम्प्रातर्होमी कालभेदेन जुहोति, ‘एषः’ पुमान् अहोरात्रयोः सम्बन्धिनि विविधे तेजसि जुहोति। कथ मेतदिति, तदुच्यते—येयं रात्रिः, सेय मग्निनैव तेजसा युक्ता सती तेजस्विनी भवति। यदिद महस्तदेतदादित्येन तेजसा तेजस्वद् भवति। तस्मात् सायं प्रातः कालद्वये जुह्वतस्तेजोद्वये होमसिद्धिः॥

वेदनपूर्वक मनुष्ठानं होमं प्रशंसति— “अहोरात्रयोर्हास्य तेजसि हुतं भवति य एवं विद्वानुदिते जुहोति”-इति॥

उपपादित मर्थं निगमयति— “तस्मादुदिते होतव्यम्”-इति * ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां पञ्चमाध्याये
(पञ्चविंशाध्याये) चतुर्थः खण्डः ॥ ४ (२९) ॥

॥ अथ पञ्चमः खण्डः ॥

एते ह वै संवत्सरस्य चक्रे यदहोरात्रे॑ ताभ्यामेव तत्संवत्सर मेति॑ स यो ऽनुदिते जुहोति॑ यथैक-

---

* “अग्नये सायं हूयते, सूर्याय प्रातः। आग्नेयी वै रात्रिः, ऐन्द्र महः। यदनुदिते सूर्ये प्रातर्जुहुयात्, उभय मेवाग्नेयं स्यात्। उदिते सूर्ये प्रातर्जुहोति”-इत्यादि चैतत्खण्डान्तम् त० ब्रा० २.१.३. द्र०।

तश्चक्रेण यायात्ता॑दृक्त॑दथ य उदिते जुहोति॑ यथोभयतश्चक्रेण यान्॑ क्षिप्र मध्वानं समश्नुवीत॑ तादृक्त्त॑देषाभियज्ञगाथा गीयते॑ बृहद्रथन्तराभ्या मिद मेति युक्तँ यद्भू॒तं भवि॒ष्यच्चा॑पि स॒र्वँ॑ ताभ्या मियादग्नीनाधाय॑ धीरो दिवैवान्य॑ज्जुहुयान्नक्त मन्यदिति॑ राथन्तरी वै रात्र्यहर्बार्हत॑ मग्निर्वै रथन्तर मादित्यो बृ॑हदेते ह वा एनं देवते॑ ब्रध्नस्य विष्टपं स्वर्गँ लोकं गमयतो॑ य एवं विद्वानुदिते जुहोति॑ तस्मादुदिते होतव्यं॑ तदेषाभियज्ञगाथा गीयते॑ यथा ह वा स्थूरिणैकेन यायाद॑कृत्वान्यदुपयोजनायं॑ एवं य॑न्ति ते बहवो जनासः॑ पुरोदयाज्जुह्वति ये ऽग्निहोत्र मिति॑ तां वा एतां देवतां प्रयतीं॑ सर्वँ मिद मनु प्रैति यदिदं कि॑ञ्चैतस्यै हीदं देवताया॑ अनुचरं सर्वँ यदिदं किञ्च॑ सैषानुचरवती देवता॑ विन्दते ह वा अनुचर॑म् भवत्यस्यानुचरो य एवं वेद॑ स वा एष एकातिथिः॑ स एष जुह्वत्सु वसति॑ तद्यददो गाथा भवत्य॑नेनस मेनसा सो ऽभिशस्ता॑देन॑स्व॒तो वाप॑हरा॒देनः॑ एकातिथि मप सायं रुणद्धि॑ बिसानिस्तेनो अपसो जहारे॑त्येष ह वै स एकातिथिः॑ स एष जुह्वत्सु वस॑त्येतां वाव स देवता मप-

रुणद्धि॑ यो ऽल मग्निहोत्राय सन्नाग्निहोत्रं जुहोति॑ त मेषा देवतापरुद्धापरुण॑द्ध्यस्माच्च लोकादमुष्माच्चोभाभ्यां॑ यो ऽल मग्निहोत्राय सन्नाग्निहोत्रं जुहोति॑ तस्माद्यो ऽल मग्निहोत्राय स्याज्जुहुयात्त॑स्मादाहुर्न॑ साय मतिथिरपरुध्य इ॑त्येतद्ध स्म वै तद्विद्वान्॑ नगरी जानश्रुतेय उदितहोमिन मैकादशाक्षं॑ मानुतन्तव्य मुवाच॑ प्रजाया मेनं विज्ञाता स्मो॑ यदि विद्वान्वा जुहोत्यविद्वान्वेति॑ तस्यो हैकादशाक्षे॑ राष्ट्र मिव प्रजा बभूव॑ राष्ट्र मिव ह वा अस्य प्रजा भवति॑ य एवं विद्वानुदिते जुहोति॑ तस्मादुदिते होतव्य॑म् ॥ ५ (३०) ॥

दृष्टान्तपूर्वक मुदितहोमं पुनः प्रशंसति— "एते ह वै संवत्सरस्य चक्रे यदहोरात्रे, ताभ्या मेव तत् संवत्सर मेति ; स यो ऽनुदिते जुहोति, यथैकतश्चक्रेण यायात्तादृक्तदथ य उदिते जुहोति, यथोभयतश्चक्रेण यान् क्षिप्र मध्वानं समश्नुवीत तादृक्तत्"—इति । ये एव अहोरात्रे विदिते, एते एव रथस्थानीयस्य संवत्सरस्य चक्रस्थानीये ; एवं सति स पुरुषो लौकिकस्ताभ्या मेवाहोरात्रचक्राभ्यां संवत्सररथं प्राप्नोति । एव महोरात्रयोः संवत्सरप्राप्तिसाधनत्वे स्थिते सति, यः पुमानुदयात्प्रागेव प्रातर्जुहोति, तस्य दृष्टान्तो ऽभिधीयते— यथा लोके रथस्य 'एकतः' एकस्मिन्नेव पार्श्वे स्थितेन चक्रेण 'यायात्' मार्गं गच्छेत्, तादृक् 'तत्'

अनुष्ठानं स्यात् । एकं चक्रं यथा गमनक्षमं न भवति, तथैवानुदितहोमः ; एककालमात्रवर्त्तित्वादित्यर्थः । अथोक्तवैलक्षण्येन यः पुमानुदिते जुहोति, तस्य दृष्टान्तोऽभिधीयते— यथा पार्श्वद्वयचक्रयुक्तेन रथेन 'यान्' गच्छन् पुरुषः 'क्षिप्रं' शीघ्रं मार्गं प्राप्नोति, तादृक् 'तत्' कालद्वयानुष्ठान मविघ्नेन फलप्रद मित्यर्थः ॥

उक्तार्थदार्ढ्याय गाथा मुदाहरति— "तदेषाभियज्ञगाथा गीयते"–इति । 'तत्' तस्मिन् कालद्वयहोमविषये काचिद्यज्ञप्रतिपादिका गाथा सर्वैरभितो गीयते । सुभाषितत्वेन सर्वैर्गीयमाना 'गाथा' ॥

तां गाथा मुदाहरति— "बृहद्रथन्तराभ्या मिद मेति युक्तं, यद्भूतं भविष्यच्चापि सर्वम् ; ताभ्या मियादग्नीनाधाय धीरो दिवैवान्यज्जुहुयान्नक्त मन्यदिति"–इति । 'यद्भूतं' जगदस्ति, यच्च भविष्यत्, इदं सर्व मपि बृहद्रथन्तराभ्यां सामभ्यां युक्तं सत् 'एति' प्रवर्त्तते । तस्माद् 'धीरः' बुद्धिमानग्नीनाधाय पश्चात् 'ताभ्यां' बृहद्रथन्तराभ्यां पृष्ठस्तोत्रनिष्पादकाभ्याम् 'इयात्' सोमयाग मनुतिष्ठेत् । प्रतिदिनं च दिवैव 'अन्यत्' सूर्य्यदेवताक मग्निहोत्रं जुहुयात्, 'नक्तं' रात्रौ 'अन्यत्' अग्निदेवताक मग्निहोत्रं जुहुयात् । 'इति'-शब्दो गाथासमाप्त्यर्थः ॥

दिवाहोमं रात्रिहोमं च बृहद्रथन्तरसम्बन्धेन प्रशंसन्नुदितहोमं निगमयति— "राथन्तरी वै रात्रिरहर्बार्हत मग्निर्वै रथन्तर मादित्यो बृहदेते ह वा एनं देवते ब्रध्नस्य विष्टपं स्वर्गं लोकं गमयतो य एवं विद्वानुदिते जुहोति ; तस्मादुदिते होतव्यम्"–इति । सर्वस्य जगतो बृहद्रथन्तराधीनत्वादहोरात्रयोरपि तत्सम्बन्धोऽस्ति । तत्र रात्रौ रथन्तरसामसम्बन्धिनी ; अहस्तु बृहत्सामसम्बन्धि ।

तयोः कालयोरभिमानिन्यौ ये उभे 'देवते' अग्न्यादित्यरूपे, तयोः रथन्तरबृहद्रूपत्वं, तत्सामाभिमानित्वादवगन्तव्यम् । एवं सति 'यः' पुमान् शास्त्ररहस्यं विद्वान् साय मग्निहोत्रं हुत्वा पश्चात्प्रातरुदिते जुहोति, एव मुदितहोमिनं बृहद्रथन्तराभिमानित्यौ देवते 'ब्रध्नस्य' आदित्यस्य 'विष्टपं' स्थानं स्वर्गं लोकं प्रापयतः । तस्मात् कारणात् प्रातरुदिते होतव्यम् ॥

उदितहोमं प्रशस्यानुदितहोमं निन्दितुं गाथा मुदाहरति— "तदेषाभियज्ञगाथा गीयते"—इति । 'तत्' तस्मिन्ननुदितहोमनिन्दारूपेऽर्थे 'एषा' वक्ष्यमाणा गाथा याज्ञिकैः सर्वैः गीयमाना सुभाषितरूपा अभितः सर्वतो 'गीयते' वक्ष्यते ॥

तां गाथा मुदाहरति—"यथाह वास्थूरिणैकेन यायादकृत्वान्यदुपयोजनाय, एवं यन्ति ते बहवो जनासः, पुरोदयाज्जुह्वति येऽग्निहोत्र मिति"—इति । 'अस्थूरि'-नामाश्वो रथवाजी । यथा लोके कश्चिन्मन्दबुद्धिः 'उपयोजनाय' रथे योजयितुम्, 'अन्यदकृत्वा' अश्वान्तर मसम्पाद्य एकेनैव 'अस्थूरिणा' अश्वेन रथयुक्तेन 'यायात्' मार्गं गच्छेत्, एव मेव 'ये' शास्त्ररहस्यानभिज्ञाः सूर्य्योदयात् पुरा अग्निहोत्रं जुह्वति, ते बहवो 'जनासः' पुरुषाः 'यन्ति' गच्छन्ति । एकाश्वयुक्तो रथो यथा मार्गपारं नेतु मसमर्थः, एवं रात्रिरूपे एकस्मिन्नेव काले कृत मग्निहोत्रं फलप्रदं न भवतीत्यर्थः । 'इति'-शब्दो गाथासमाप्त्यर्थः ॥

उदितहोमोत्कर्षार्थं मादित्यदेवतां प्रशंसति— "तां वा एतां देवतां प्रयतीं सर्व मिद मनु प्रैति यदिदं किञ्चैतस्यै हीदं देवताया अनुचरं सर्वं यदिदं किञ्च, सैषानुचरवती देवता"—इति । यत् किञ्चिदिदं स्थावरं जङ्गमरूपं जगदस्ति, तदिदं सर्वम्, 'ता

मेताम्' आदित्यदेवतां 'प्रयतीम्' उदयास्तमयौ गच्छन्तीम् 'अनु' पश्चात् 'प्रैति' प्रवर्त्तते। तथा च शाखान्तरे श्रूयते— "योऽसौ तपन्नुदेति, स सर्वेषां भूतानां प्राणानादायोदेति; असौ योऽस्त मेति, स सर्वेषां भूतानां प्राणानादायास्त मेति"–इति। सूर्य्योदय मनु सर्वेषा मिन्द्रियोदयाद्दिवा सर्वे चेष्टन्ते, सूर्य्यास्तमय मनु सर्वेषा मिन्द्रियाणा मस्तमयाद्रात्रौ सर्वे निद्रां कुर्वन्ति। अनेन प्रकारेण यत् किञ्चिज्जगदस्ति, तत् सर्व मेतस्या आदित्यदेवतायाः 'अनुचरम्' भृत्यस्थानीयम्। अतः 'सैषा' आदित्यदेवता 'अनुचरवती' बहुभृत्योपेता॥

वेदनं प्रशंसति— "विन्दते ह वा अनुचरम्भवत्यस्यानुचरो य एवं वेद"–इति। वेदिता स्वयं धनिको भूत्वा जीवितप्रदानेन अनुचरं लभते। अतोऽस्य सर्वदा 'अनुचरः' भृत्यवर्गो भवत्येव॥

प्रकारान्तरेणादित्यदेवतां प्रशंसति— "स वा एष एकातिथिः, स एष जुह्वत्सु वसति"–इति। 'एषः' आदित्यः स्वयम् 'एकातिथिः'; यथा लोके कश्चिद्वैदेशिको बन्धुरहितः स्वय मेक एव अतिथिर्भूत्वा गृहेषु गच्छति, एवं 'स एषः' आदित्यो 'जुह्वत्सु' अग्निहोत्रिषु प्रातः समागत्य तिष्ठति॥

अस्मिन्नर्थे काञ्चिद्गाथा मुदाहरति— "तद्यददो गाथा भवति"–इति। यदिद मादित्यस्यैकातिथित्वं 'तत्' तस्मिन्नर्थे काचिद् 'गाथा' सर्वैर्गातुं योग्या गीतिर्विद्यते॥

तां गाथा मुदाहरति— "अनेनस मेनसा सोऽभिशस्तादेनस्वतो वाप हरादेनः, एकातिथि मप सायं रुणद्धि, बिसानि स्तेनो अप सो जहारेति"–इति। पुरा कदाचित् सप्तर्षीणां संवादप्रसङ्गे कश्चित्पुरुषो बिसस्तैन्यलक्षण मपवादं प्राप्य तत्परिहारार्थं मृषीणा

मग्रे शपथं चकार, तदीयशपथोक्तिरूपेयं गाथा। 'बिसानि' पद्ममूलानि तेषा मपहर्त्ता, प्रत्यवायपरम्परां प्राप्नोतु ;— पापरहिते पुरुषे विषस्तैन्य मपवादं कृतवतो यः प्रत्यवायः, पापिनः पुरुषस्य सम्बन्धि पापं स्वीकुर्वतो यः प्रत्यवायः, सायङ्काले गृहे समागच्छत एकातिथेर्वैदेशिकस्यापरोधने यः प्रत्यवायः ; सेयं प्रत्यवायपरम्परा बिसस्तैन्ये सति मम भूयादित्येवं शपथः। अक्षरार्थस्तु प्रसिद्धः *, —मादृशः पुरुषः 'स्तेनः' चोरो भूत्वा बिसान्यपजहार चेत्, 'सः' पुमान्, अनेनसम्' पापरहितं पुरुषं श्रोत्रियम् 'एनसा अभिशस्तात्' पापेनाभिशंसन मपवादं कुर्य्यात्। तथैव 'सः' बिसापहारी 'एनस्वतः' पापयुक्तस्य यत् 'एनः' पाप मस्ति, तत् 'अपहरात्' स्वीकुर्य्यात्। तथा स बिसापहारी सायङ्काले गृहे समागत मेकातिथिम् 'अपरुणद्धि' भोजन मदत्त्वा निःसारयेत् ; यद्वा अग्निहोत्रार्थं सायं समागतम् 'एकातिथिं' देवम् 'अपरुणद्धि' होमराहित्येन निराकुर्यात्। 'इति'-शब्दो गाथासमाप्त्यर्थः॥

अस्या गाथाया मेकातिथि मप सायं रुणद्धीत्यस्य भागस्य प्रकृतोपयुक्तत्वात् तस्य तात्पर्य्यं दर्शयति—"एष ह वै स एकातिथिः, स एष जुह्वत्सु वसत्येतां वाव स देवता मप रुणद्धि, यो ऽल मग्निहोत्राय सन्नाग्निहोत्रं जुहोति ; त मेषा देवतापरुद्धापरुणद्ध्यस्माच्च लोकादमुष्माच्चोभाभ्यां यो ऽल मग्निहोत्राय सन्नाग्निहोत्रं जुहोति"—इति। 'एषः' दृश्यमान आदित्य एव गाथाया मुक्तः 'एकातिथिः'। 'स एष' देवः प्रातः काले समागत्य 'जुह्वत्सु' अग्निहोत्रिषु तिष्ठति। एवं सति 'यः' पुमान् अग्निहोत्राय 'अलं' समर्थः सन्नग्निहोत्रं न जुहोति, 'सः' पुमान् 'एताम्'

---

* "अप्रसिद्धः"—इति घ, ङ।

अग्निहोत्रहोमार्थं मागतां देवताम् ‘अपरुणद्धि’ निराकरोति। ‘एषा’ च देवता तेनापरुद्धा सती ‘तं’ नास्तिकं भूलोकस्वर्गलोकाख्या मुभाभ्याम् ‘अपरुणद्धि’ निःसारयति। योऽत्र मित्यादिः पुनरुक्तिरुपसंहारार्था ;— यो न जुहोति, तस्यायं देवताद्रोहः ॥

विपक्षे बाधक मुक्त्वा स्वपक्षं दर्शयति—“तस्माद्यो ऽत्र मग्निहोत्राय स्याज्जुहुयात्”–इति। अग्निहोत्राय ‘अलम्’ आहिताग्नित्वेन समर्थो भवेत्, सोऽवश्यं जुहुयात् ॥

अग्निहोत्रस्यावश्यकत्वे दृष्टान्तरूपविवक्षायां स्मार्त्तं शास्त्रार्थं दर्शयति—“तस्मादाहुर्न साय मतिथिरपरुध्य इति”–इति। यस्माद्देवस्य मनुष्यस्य च अतिथेरपरोधे प्रत्यवायोऽस्ति, तस्माच्छास्त्रज्ञा एव माहुः ;— सायं काले समागतो ऽतिथिः ‘नापरुध्यः’ न निराकरणीय इति। अतो लौकिकातिथिवत् देवतातिथये होतव्य मित्यर्थः ॥

अग्निहोत्रस्यावश्यकर्त्तव्यता मुक्त्वा पुनरपि प्रकारान्तरेणोदितहोमं प्रशंसति— “एतद्ध स्म वै तद्विद्वान्नगरी जानश्रुतेय उदितहोमिन मैकादशाक्षं मानुतन्तव्य मुवाच,— प्रजाया मेनं विज्ञाता स्मो यदि विद्वान्वा जुहोत्यविद्वान्वेति ; तस्यो हैकादशाक्षे राष्ट्र मिव प्रजा बभूव ; राष्ट्र मिव ह वा अस्य प्रजा भवति य एवं विद्वानुदिते जुहोति ; तस्मादुदिते होतव्यम्”–इति। जनश्रुताख्यस्य कस्यचिन्महर्षेः पुत्रो ‘जानश्रुतेयः’ *। स च राजपुरोहितत्वात् नित्यं नगरे वसतीति ‘नगरी’। स महर्षिः तदेतदुदितमाहात्म्यं विद्वान् राजपुत्रं कञ्चित् ‘उदितहोमिनम्’ उद्दिश्य स्वमनस्येव

---

* “उपाविर्जानश्रुतेयः”–इति १ भा० १२१ पृ० ९ पं०। “जानश्रुतिर्ह पौत्रायणः”–इति छा० उप० ४.१.१। “औपाविनैव जानश्रुतेयेन”–इति शत० ब्रा० ५.१.१.५;७।

मुवाच। कीदृश मुदितहोमिनम्? 'ऐकादशाक्षम्' एकादशाक्षनामकस्य राज्ञः पुत्रम्, 'मानुतन्तव्यं' मनुतन्तुनामकस्य राज्ञः पौत्रम् *। त मुद्दिश्य मनसि कि मुवाचेति, तदभिधीयते— अय मैकादशाक्षो राजपुत्रो यदि विद्वान् जुहोति, यदि वा शास्त्रार्थ मविद्वानिति मम संशयो जायते। तथा सति 'प्रजायाम्' एतदीयपुत्रपौत्रादिसन्ततौ पर्य्यालोच्य 'एनम्' ऐकादशाक्षं 'विज्ञाता स्मः' विशेषेण ज्ञास्यामः। यदि प्रजा वर्द्धते, तदानी मयं विद्वान्, अन्यथात्वविद्वानिति। एवं निश्चित्य, यदा तदीयां प्रजा मपश्यत्, तदानीं तस्यापि राजपुत्रस्य 'प्रजा' पुत्रपौत्रादिरूपा 'राष्ट्र मिव बभूव' यथा राष्ट्रं बहुजनाकीर्णं तद्वदिति समृद्धा प्रजासीत्। ऐकादशाक्षस्यापत्य मैकादशाक्षिरिकारान्तः शब्दस्तस्य षष्ठीयम् 'ऐकादशाक्षेः'–इति। 'यः' पुमानेवं विद्वान् प्रातरुदिते जुहोति, अस्य राष्ट्र मिव बहुला प्रजा भवति †। तस्मादुदिते होतव्य मिति ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां पञ्चमाध्याये
(पञ्चविंशाध्याये) पञ्चमः खण्डः ॥ ५ (३०) ॥

---

* "इति ह स्माहतुः सौमापौ मानुतन्तव्यौ"–इति शत० ब्रा० १३.५.३.२। "चिकितगालवकालववमनुतन्तुकुशिकानाम्"–इति आश्व० श्रौ० १२.१४.३।

† शत० ब्रा० २.२.४.१८. द्र०।

॥ अथ षष्ठः खण्डः ॥

उद्यन्नु खलु वा आदित्य आहवनीयेन रश्मीन्त्सन्दधाति स योऽनुदिते जुहोति यथा कुमाराय वा वत्साय वाऽजाताय स्तनं प्रतिदध्यात्तादृक्तदथ य उदिते जुहोति यथा कुमाराय वा वत्साय वा जाताय स्तनं प्रतिदध्यात्तादृक्तत् त मस्मै प्रतिधीयमान मुभयोर्लोकयोरन्नाद्य मनु प्रतिधीयतेऽस्माच्च * लोकादमुष्माच्चोभाभ्यां स योऽनुदिते जुहोति यथा पुरुषाय वा हस्तिने वाऽप्रयते हस्त आदध्यात्तादृक्तदथ य उदिते जुहोति यथा पुरुषाय वा हस्तिने वा प्रयते हस्त आदध्यात्तादृक्तत्त मेष एतेनैव हस्तेनोर्द्ध्वं हृत्वा स्वर्गे लोक आदधाति य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यं मुद्यन्नु खलु वा आदित्यः सर्वाणि भूतानि प्रणयति तस्मादेनं प्राण इत्याचक्षते प्राणे हास्य सम्प्रति हुतं भवति य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्य मेष ह वै सत्यं वदन्त्सत्ये जुहोति योऽस्तमिते सायं जुहोत्युदिते प्रातर्भूर्भुवः स्वरो मग्नि † ज्योतिर्ज्योतिरग्निरिति सायं जुहोति भूर्भुवः स्वरों ‡ सूर्यो ज्योति-

---

* “ऽस्माच” क। † “स्वरो मिति ऽग्नि” क, “स्वरो३मग्नि” ख। ‡ “स्वरों३” ख।

ज्योतिः सूर्य इति प्रातः सत्यं हास्य वदतः सत्ये हुतं भवति य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यं तदेषाभियज्ञगाथा गीयते प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति ये ऽग्निहोत्रं दिवाकीर्त्यमदिवा कीर्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषा मिति ॥ ६ (३१) ॥

प्रकारान्तरेणानुदितहोमनिन्दा मुदितहोमप्रशंसां चाह—"उद्यन्नु खलु वा आदित्य आहवनीयेन रश्मीन्त्सन्दधाति; स यो ऽनुदिते जुहोति,— यथा कुमाराय वा वत्साय वा ऽजाताय स्तनं प्रति दध्यात्तादृक्तदथ य उदिते जुहोति,— यथा कुमाराय वा वत्साय वा जाताय स्तनं प्रति दध्यात्तादृक्तत्; त मस्मै प्रतिधीयमान मुभयोर्लोकयोरन्नाद्य मनु प्रतिधीयते ऽस्माच्च लोकादमुष्माच्चोभाभ्याम्"–इति। आदित्यः स्वय मुद्यन्नेव हव्यार्थी सन्नाहवनीयेन सह स्वकीयान् रश्मीन् 'सन्दधाति' संयोजयति। एवं सति 'यः' पुमान् सूर्योदयात् पूर्वं जुहोति, स मूढ इति शेषः। तत्र दृष्टान्तः— यथा लोके कस्मैचित् 'अजाताय' अनुत्पन्नाय 'स्तनं प्रति दध्यात्' पातुं समर्पयेत्, तादृगेव तद् द्रष्टव्यम्। अथ तद्वैलक्षण्येन 'यः' पुमानुदयादूर्ध्वं जुहोति, स विवेकी। तत्रायं दृष्टान्तः— उत्पन्नाय स्तनप्रदानं यादृशं भवति, तादृगेव तदिति। एवं सति 'अस्मै' सूर्याय प्रति धीयमानं हविः समर्पयेत्। 'तम्' अग्निहोत्रिण मनु लोकद्वयेऽप्यन्नाद्यं सम्पद्यते। लोकयोरित्यस्यैव व्याख्यानम् "अस्माच्च"–इत्यादि; सप्तम्यर्थे पञ्चमी। अस्मिन्नमुष्मिंश्चोभयोर्लोकयोरित्यर्थः॥

पुनरप्यन्येन दृष्टान्तेनानुदितहोमनिन्दा मुदितहोमप्रशंसां च दर्शयति— "स यो ऽनुदिते जुहोति, यथा पुरुषाय वा हस्तिने वा ऽप्रयते हस्त आदध्यात्तादृक्तदथ य उदिते जुहोति, यथा पुरुषाय वा हस्तिने वा प्रयते हस्त आदध्यात्तादृक्तत्; त मेष एतेनैव हस्तेनोर्द्ध्वं हृत्वा स्वर्गे लोक आदधाति, य एवं विद्वानुदित जुहोति ; तस्मादुदिते होतव्यम्"–इति । 'यः' अनुदितहोमी, स मूढः । यथा लोके पुरुषस्य हस्तिनो वा ग्रासार्थम् 'अप्रयते' अप्रसारितहस्ते ग्रासं प्रक्षिपेत्, तादृगेव तत् । उदितहोमन्तु प्रसारितहस्ते ग्रासप्रक्षेपसमानं 'यः' पुमान् विदित्वोदितहोमी स्यात्, 'तं' पुमांसम् 'एषः' आदित्यः 'एतेनैव' हविःस्वीकारार्थं प्रसारितेन हस्तेनैवोर्द्ध्वं 'हृत्वा' नीत्वा स्वर्गे लोके स्थापयति । तस्मादुदयादूर्द्ध्वं होतव्यम् ॥

प्रकारान्तरेणोदितहोमं प्रशंसति—"उद्यन्नु खलु वा आदित्यः सर्वाणि भूतानि प्रणयति, तस्मादेनं प्राण इत्याचक्षते ; प्राणे हास्य सम्प्रति हुतं भवति य एवं विद्वानुदिते जुहोति ; तस्मादुदिते होतव्यम्"–इति । आदित्यः स्वय मुद्यन्नेव सर्वाणि प्राणिनः 'प्रणयति' चेष्टयति ; तस्मात्प्रणयतीतिव्युत्पत्त्यादित्यस्य प्राण इति नाम । एवं सत्युदितहोमी योऽस्ति, तस्य प्राणरूपे आदित्ये 'सम्प्रति' सम्यग्द्रव्यं हुतं भवति । तस्मादुदयादूर्द्ध्वं होतव्यम् ॥

पुनरपि युक्त्यन्तरेण उदितहोमं प्रशंसति— "एष ह वै सत्यं वदन्सत्ये जुहोति, यो ऽस्तमिते सायं जुहोत्युदिते प्रातर् ; भूर्भुवः स्वरो मग्निर्ज्योतिर्ज्योतिरग्निरिति सायं जुहोति, भूर्भुवः स्वरों सूर्यो ज्योतिर्ज्योतिः सूर्य इति प्रातः ; सत्यं हास्य वदतः सत्ये हुतं भवति य एवं विद्वानुदिते जुहोति ; तस्मादुदिते होत-

व्यम्"–इति। सायङ्कालीन मग्निहोत्र मस्तमयादूर्द्ध्वं, प्रातःकालीनं च सूर्य्योदयादूर्द्ध्वं जुहोति, 'एषः' पुमान्वाचा 'सत्यं' यथार्थवादिन मेव मन्त्रं ब्रुवन् 'सत्ये' परमार्थे देवे जुहोति। कथ मिति, तदुच्यते— "भूर्भुवः स्वः"–इत्यादिकः सायङ्कालीनो मन्त्रः। तस्याय मर्थः – भूरादयस्त्रयो लोकाः मदीयहोमम् 'ॐ' अङ्गीकुर्वन्तु; यः 'अग्निः' देवः, स एव 'ज्योतिः' दीपादिरूपः प्रकाशः; यच्च 'ज्योतिः' दीपादिरूपः प्रकाशः, स एव 'अग्निः' देवः; तस्मै देवाय स्वाहुत मिद मस्तु इति। एवं प्रातःकालीनमन्त्रेऽपि द्रष्टव्यम्। भूरादयो लोका मदीयं होमं स्वीकुर्वन्तु; यः 'सूर्य्यः' देवः, स एव 'ज्योतिः' दिवसगतं प्रभारूपम्; यच्चेदं प्रभारूपं 'ज्योतिः' स एव 'सूर्य्यः' देवः; तस्मै स्वाहुत मिद मस्तु। तत्र यो विद्वानेवं जुहोति, तस्य सायङ्कालीनं ज्योतिरग्निः, प्रातःकालीनं ज्योतिः सूर्य्यः, इत्येवं 'सत्यं' परमार्थं 'वदतः' पुरुषस्य 'सत्ये' परमार्थरूपे ऽग्नौ सूर्य्ये च हुतं भवति। तस्मात्प्रातरुदयादूर्द्ध्वं होतव्यम् * ॥

उदितहोमं प्रशस्यानुदितहोमं निन्दितुं गाथा मुदाहरति— "तदेषाभियज्ञगाथा गीयते"–इति ॥

तां गाथा माह— "प्रातः-प्रातरनृतं ते वदन्ति, पुरोदयाज्जुह्वति ये ऽग्निहोत्रं; दिवाकीर्त्य मदिवा कीर्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषा मिति"–इति। 'ये' अग्निहोत्रिणः उदयात् पूर्वं मग्निहोत्रं जुह्वति, 'ते' पुरुषाः 'दिवाकीर्त्यम्' अहनि कीर्त्त-

---

* य० वा० स० ३.९—११ अग्निहोत्रहोममन्त्राः; तत्राद्याविमौ। "प्रदीप्ता मभि जुहोत्यग्निर्ज्योतिरिति"–इति कात्या० श्रौ० ४.१३.१४। तै० ब्रा० २.१.९ अनु० होममन्त्रौ, तत्रैतत्पूर्वं मेव (२ अनु०) तयोर्व्याख्यानानि द्रष्टव्यानि।

नीयं सूर्यम् 'अदिवा' रात्रौ कीर्त्तयन्तः 'प्रातः-प्रातः' प्रतिदिनं प्रातःकाले 'अनृतम्' असत्यं वदन्ति। कथ मसत्यत्व मिति, तदुच्यते—"सूर्य्यो ज्योतिः"–इति हि मन्त्रपाठः, 'तदा' उदयात्पुरा 'एषाम्' अग्निहोत्रिणां सूर्य्यरूपं ज्योतिर्नास्ति; तस्मादसत्यवादिनः *। 'इति'-शब्दो गाथासमाप्त्यर्थः ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां पञ्चमाध्याये
(पञ्चविंशाध्याये) षष्ठः खण्डः ॥ ६ (२१) ॥

॥ अथ सप्तमः खण्डः ॥

प्रजापतिरकामयत॑ प्र जायेय भूयान्त्स्या मिति॑ स तपो ऽतप्यत॑ स तपस्तप्त्वेमांल्लो†कानसृजत॑ पृथिवी मन्तरिक्षं दिव॑ तांल्लोकानभ्यतपत्तेभ्यो ऽभितप्तेभ्यस्त्रीणि ज्योतींष्यजायन्ता॑ग्निरेव पृथिव्या अजायत॑ वायुरन्तरिक्षा॑दादित्यो दिव॑स्तानि ज्योतींष्यभ्यतप॑त्तेभ्यो ऽभितप्तेभ्यस्त्रयो वेदा अजायन्त॑ ऋग्वेद एवाग्नेरजायत॑ यजुर्वेदो वा॑योः सामवेद आदित्यात्॑

---

* "यदनुदिते सूर्यें प्रातर्जुहुयात्, उभय मेवाग्नेयं स्यात्"–इति तै० ब्रा० २.१.२.७। अत एवानुदितहोमिना मनृतवादित्वं बोध्यम्। १८० पृ० २ पं० अपीह द्र०।

† "०माल्लो०" ग, ट; "०मांलो०" घ। एव मिहोत्तरत्रापि नलयोः सन्धौ।

तान्वेदानभ्यतपत्तेभ्यो ऽभितप्तेभ्यस्त्रीणि शुक्राण्यजायन्त भूरित्येव ऋग्वेदादजायत भुव इति यजुर्वेदात् स्वरिति सामवेदात् तानि शुक्राण्यभ्यतपत् तेभ्यो ऽभितप्तेभ्यस्त्रयो वर्णा अजायन्ताकार उकारो मकार इति तानेकधा समभरत्तदेतदो३मिति तस्मादो मो मिति प्रणौत्यो मिति वै स्वर्गो लोक ओ मित्यसौ यो ऽसौ तपति स प्रजापतिर्यज्ञ मतनुत त माहरत्तेनायजत स ऋचैव हौत्र मकरोद्यजुषाध्वर्यवं साम्नोद्गीथं यदेतत् त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्व मकरोत् स प्रजापतिर्यज्ञं देवेभ्यः सम्प्रायच्छत्ते देवा यज्ञ मतन्वत त माहरन्त तेनायजन्त त ऋचैव हौत्र मकुर्वन्यजुषाध्वर्यवं साम्नोद्गीथं यदेवैतत् त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्व मकुर्वंस्ते देवा अब्रुवन् प्रजापतिं यदि नो यज्ञ ऋक्त आर्तिः स्याद्यदि यजुष्टो यदि सामतो यद्यविज्ञाता सर्वव्यापद्वा का प्रायश्चित्तिरिति स प्रजापतिरब्रवीद्देवान् यदि वो यज्ञ ऋक्त आर्तिर्भवति भूरिति गार्हपत्ये जुहवाथ यदि यजुष्टो भुव इत्याग्नीध्रीये ऽन्वाहार्यपचने वा हविर्यज्ञेषु यदि सामतः स्वरित्याहवनीये यद्यविज्ञाता सर्वव्यापद्वा भूर्भुवः

स्वरिति सर्वा अनुद्रुत्याहवनीय एव जुहवाथेत्येतानि ह वै वेदाना मन्तःश्लेषणानि यदेता व्याहृतयस्तद्यथात्मनात्मानं सन्दध्याद्यथा पर्वणा पर्व यथा श्लेष्मणा चर्मण्यं वान्यद्वा विश्लिष्टं संश्लेषयेदेव मेवैताभिर्यज्ञस्य विलिष्टं * सन्दधाति सैषा सर्वप्रायश्चित्तिर्यदेता व्याहृतयस्तस्मादेषैव यज्ञे प्रायश्चित्तिः कर्त्तव्या ॥ ७ (३२) ॥

अथाग्निहोत्रमन्त्रप्रसङ्गाद् बुद्धिस्थस्य सर्वप्रायश्चित्तसम्पादकस्य व्याहृतित्रयस्य सृष्टिं वक्तु मुपक्रमते— "प्रजापतिरकामयत प्रजायेय भूयान्त्स्या मिति ; स तपो ऽतप्यत ; स तपस्तप्त्वेमांल्लोकानसृजत,— पृथिवी मन्तरिक्षं दिवं ; तांल्लोकानभ्यतपत् ; तेभ्योऽभितप्तेभ्यस्त्रीणि ज्योतींष्यजायन्ताग्निरेव पृथिव्या अजायत, वायुरन्तरिक्षादादित्यो दिवस्तानि ज्योतींष्यभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रयो वेदा अजायन्त,— ऋग्वेद एवाग्नेरजायत, यजुर्वेदो वायोः, सामवेद आदित्यात् ; तान्वेदानभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रीणि शुक्राण्यजायन्त,— भूरित्येव ऋग्वेदादजायत, भुव इति यजुर्वेदात्, स्वरिति सामवेदात्"–इति । पुरा प्रजापतिरेको भूत्वा प्रजोत्पादनेन बहुविधः स्या मिति कामयित्वा तत्सिद्ध्यर्थं 'तपः' पर्यालोचनम् 'अकरोत्' इदं वस्त्वीदृश मिति पर्यालोचनरूपं तपः कृत्वा, पर्यालोचितप्रकारेणोत्पद्यता मिति सङ्कल्प्य,

---

* "विश्लिष्ट" क, ङ, ट ।

तेन सङ्कल्पेन लोकत्रय मसृजत। 'तान्' लोकान् पुनरप्यभितः पर्यालोचितवान्,—कि मेषु लोकेषु सारभूतं सम्पादनीय मिति पर्यालोचनम्। तथा पर्य्यालोचितेभ्यो लोकेभ्यः प्रजापतिसङ्कल्पानुसारेणाग्निवाय्वादित्यरूपाणि 'ज्योतींषि' अजायन्त। तत्रापि सारं पर्य्यालोच्य तेभ्यो ज्योतिर्भ्यो वेदत्रय मुत्पादितवान् *। तेभ्यश्च वेदेभ्यो व्याहृतित्रयरूपाणि 'शुक्राणि' ज्योतींषि पापाख्यतमोनिवारणसमर्थानि अजायन्त॥

एवं व्याहृतित्रयस्योत्पत्ति मुक्त्वा प्रणवस्योत्पत्ति माह—"तानि शुक्राण्यभ्यतपत्; तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्ताकार उकारो मकार इति; तानेकधा समभरत्तदेतदो३मिति, तस्मादो मिति प्रणौत्यो मिति वै स्वर्गो लोक ओ मित्यसौ योऽसौ तपति"–इति। 'तानि शुक्राणि' व्याहृतित्रयरूपाणि ज्योतींषि सारोत्पादनाय पर्यालोचितवान्। 'तेभ्यः' पर्य्यालोचितेभ्यः प्रजापतिसङ्कल्पाद्वर्णत्रय मजायत। तच्च त्रय मेकधा संयोजितवान्। तदेकीभूतं वर्णत्रय मो मित्येवं सम्पन्नम्। 'तस्मात्' सर्वसारत्वात् होता यः प्रयोगमध्ये ओ मिति प्रणवं करोति [सर्वप्रयोगसङ्ग्रहार्था वीप्सा], सोऽय मोकारः स्वर्गप्राप्तिहेतुत्वात् तदात्मकः। तथा यः 'असौ' आदित्यस्तपति असावप्योङ्कारस्वरूपः; आदित्यप्राप्तेरप्योङ्कारसाधनत्वात्। ओङ्कारस्य सर्वफलहेतुत्वं कठा आमनन्ति —"एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्"–इति (उप० १. २, १६.)॥

अथ प्रायश्चित्तं विधातु मुपयुक्त मुपाख्यान माह—"स प्रजापतिर्यज्ञ मतनुत; त माहरत्; तेनायजत; स ऋचैव हौत्र

---

* म० सं १.२३. द्र०।

मकरोद् *, यजुषाध्वर्यवं †, साम्नोद्गीथं ‡; यदेतत् त्रय्यै विद्यायै शुक्रं, तेन ब्रह्मत्व मकरोत्"—इति। पुरा प्रजापतिः स्वेच्छया यज्ञम् 'अतनुत' विस्तारितवान्। केन प्रकारेणेति, सोऽभिधीयते— 'तं' यज्ञसाधनसमूहम् आहृत्य तेन साधनेन यागं कृतवान्। वेदत्रयगतैर्मन्त्रैः क्रमेण हौत्राध्वर्यवौद्गात्राणि निष्पाद्य, ततः 'त्रय्यै विद्यायै' वेदत्रयरूपायां विद्यायां यदेतत् 'शुक्रं' सारं व्याहृतित्रयादिरूपं, तेन सारेण ब्रह्मत्वं कृतवान् ॥

अथ ब्रह्मयज्ञवद्देवतायज्ञं दर्शयति—"स प्रजापतिर्यज्ञं देवेभ्यः सम्प्रायच्छत्, ते देवा यज्ञ मतन्वत, त माहरन्त, तेनाजयन्त, त ऋचैव हौत्र मकुर्वन् यजुषा ऽऽध्वर्यवं, साम्नोद्गीथं, यदेवैतत् त्रय्यै विद्यायै शुक्रं, तेन ब्रह्मत्व मकुर्वन्"—इति। पूर्ववाक्यवद् व्याख्येयम् ॥

अथ प्रश्नोत्तराभ्यां प्रायश्चित्तं विधत्ते— "ते देवा अब्रुवन् प्रजापतिं,—यदि नो यज्ञ ऋक्त आर्त्तिः स्याद्यदि यजुष्टो यदि सामतो यद्यविज्ञाता सर्वव्यापद्वा, का प्रायश्चित्तिरिति ; स प्रजापतिरब्रवीद्देवान्,— यदि वो यज्ञ ऋक्त आर्त्तिर्भवति, भूरिति गार्हपत्ये जुहवाथ ; यदि यजुष्टो, भुव इत्याग्नीध्रीये ऽन्वाहार्य्यपचने वा हविर्यज्ञेषु ; यदि सामतः, स्वरित्याहवनीये § ; यद्य-

---

* एतन्नियममूलकान्येवेद माश्वलायनसूत्रम्—"तद्ध ये केचन छान्दोग्ये वा ऽऽध्वर्यवे वा हौत्रामर्शाः समाम्नाता न तान् कुर्यादकृत्स्नत्वाद्धौत्रस्य"—इति श्रौ० ८. १२. २२।

† "अध्वर्युप्रत्ययन्तु व्याख्यानं कामकालदेशदक्षिणानां दीक्षोपसत्प्रसवसंस्थोत्थानाना मेतावत्त्वं हविषा मुख्यैरुपांशुतायां हविषा चानुपूर्वम्"—इति आश्व० श्रौ० ८. १२. २४।

‡ "छन्दोगप्रत्ययं स्तोमः स्तोत्रियः पृष्ठं संस्थेति"—इति आश्व० श्रौ० ८. १२. २३।

§ छान्दोग्येऽप्येव मेव द्रष्टव्यम् (उप० ४. १७. ३.)।

विज्ञाता, सर्वव्यापद्वा भूर्भुवः स्वरिति सर्वा अनुद्रुत्याहवनीय एव जुहवाथेति"–इति। ते देवाः प्रजापतिं प्रत्येव मपृच्छन्,— 'नः' अस्मदीये यज्ञे यदि कदाचित् 'ऋक्तः' ऋङ्मन्त्रात् 'आर्त्तिः' नाशो भवेत्, तथा यजुर्मन्त्रात्साममन्त्राद्वा कदाचिदार्त्तिः स्यात्, एताः सर्वा आर्त्तयो ऽस्माभिर्विज्ञाताः; यदि कदाचिदविज्ञाता काचिदार्त्तिर्भवेत्, यदि वा सर्वथा यद्वेदत्रयमन्त्रनिमित्ता अस्माभिरज्ञाता च सर्वाप्यार्त्तिर्भवेत्, इदानीं प्रायश्चित्तिर्वक्तव्येति देवप्रश्नः। ऋङ्मन्त्रवैकल्ये गार्हपत्ये भूरिति होमः, यजुर्मन्त्रवैकल्ये सत्याग्नीध्रीये धिष्णिये भुव इति होमः। सोऽयं सोमयागे द्रष्टव्यः; हविर्यागे आग्नीध्रीयाभावात्। अग्न्याधेय मग्निहोत्रं दर्शपूर्णमासा वाग्रयणं चातुर्मास्यानि दाक्षायणयज्ञः, कौण्डपायिनामयनं सौत्रामणी वा सप्तमी; त एते हविर्यज्ञाः[*]। तेष्वाग्नीध्रीयाभावात् 'अन्वाहार्य्यपचने' दक्षिणाग्नौ[†] 'जुहवाथ' हे यूयं जुहुत। सामभ्रेषे स्वरित्याहवनीये होमः। यद्यविज्ञातो भ्रेषः, यदि वा वेदत्रयभ्रेषसमुच्चयः, तत्रोभयत्रापि भूर्भुवः स्वरित्येतास्तिस्रो व्याहृतीः सर्वाः 'अनुद्रुत्य' उच्चार्य्य आहवनीय एव जुहुत[‡]॥

अनेनार्थवादेन प्रायश्चित्तविधि मुन्नीय व्याहृतिप्रशंसापूर्वकं तं विधि मुपसंहरति— "एतानि ह वै वेदाना मन्तःश्लेषणानि यदेता व्याहृतयस्तद्यथात्मनात्मानं सन्दध्याद्यथा पर्वणा पर्व यथा

---

[*] "अग्न्याधेय मग्निहोत्रं दर्शपूर्णमासा वाग्रयणं चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः"–इति गौत० ध० सू० ८. १९।

[†] "एतां दर्शपूर्णमासयोर्दक्षिणा मकल्पयन् यदन्वाहार्यम्"–इति शत० ब्रा० १.२.३.५। 'अन्वाहरति यज्ञसम्बन्धि दोषजातं परिहरत्यनेनेति अन्वाहार्यो नाम ऋत्विग्भ्यो देय ओदनः' –इति च तत्र सा० भा०। "अन्वाहार्यं दक्षिणाग्नावधिश्रयति"–इति कात्या०श्रौ०२.५.२७।

[‡] "भूर्भुवः सुवरिति सर्वप्रायश्चित्तानि"–इति तै० आ० ४.२०.१. सा० भा०।

श्लेष्मणा चर्मण्यं वान्यद्वा विश्लिष्टं संश्लेषयेदेव मेवैताभिर्यज्ञस्य विलिष्टं सन्दधाति ; सैषा सर्वप्रायश्चित्तिर्यदेता व्याहृतयस्तस्मादेषैव यज्ञे प्रायश्चित्तिः कर्त्तव्या"–इति। या एता व्याहृतयः सन्ति, 'एतानि ह वै' त्रीण्येव व्याहृतिरूपाणि, वेदानां सम्बन्धीनि 'अन्तःश्लेषणानि' अन्तर्बन्धनसाधनानि। तत्र दृष्टान्तो ऽभिधीयते —यथा लोके 'आत्मनात्मानं सन्दध्यात्' आत्मशब्दः स्वरूपमात्रवाचित्वात् सर्वद्रव्यपरः; एकेन द्रव्येण द्रव्यान्तरं सन्धीयते। एतच्च छन्दोगैर्विस्पष्ट माम्नातम्— "तद्यथा लवणेन सुवर्णं सन्दध्यात्, सुवर्णेन रजतं, रजतेन त्रपु, त्रपुणा सीसं, सीसेन लोहं, लोहेन दारु, दारुणा चर्म"–इति (छा० उप० ४.१७.७.)। क्षारादिना सुवर्णादीनां सन्धानं सुवर्णकारादिषु प्रसिद्धम्। तदेतदभिप्रेत्यात्मनात्मानं सन्दध्यादित्युक्तम्*। यथा च हस्तपादादिष्वेकेन पर्वणा पर्वान्तरं संश्लिष्टम्, यथा च श्लेष्मणा धात्वन्तरं संश्लिष्टम्, चर्मणा 'चर्मण्यं' पादत्राणादिकम्, 'अन्यद्वा' शकटादिषु किञ्चिद्विश्लिष्ट मङ्गम्, चर्म अपि रज्ज्वा संश्लेषयेत्; अनेनैव प्रकारेण 'एताभिः' व्याहृतिभिर्यज्ञस्य विश्लिष्ट मङ्गं संश्लिष्टं भवति। या एता व्याहृतयः, सैषा सर्वस्य वैकल्यस्य प्रायश्चित्तिः ; तस्माद् यज्ञे वैकल्यपरिहारार्थं मेषैव प्रायश्चित्तिः कर्त्तव्या ॥ ७ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां पञ्चमाध्याये
(पञ्चविंशाध्याये) सप्तमः खण्डः॥ ७ (३२) ॥

---

* "सूच्या वासः सन्दधदियात्"–इति २ भा० ७६ पृ० १९ पं०।

॥ अथ अष्टमः खण्डः ॥

तदाहुर्महावदा३ः यदृचैव हौत्रं क्रियते यजुषाऽऽध्वर्यवं साम्नोद्गीथं व्यारब्धा त्रयी विद्या भवत्यथ केन ब्रह्मत्वं क्रियत इति त्रय्या विद्ययेति ब्रूयादयं वै यज्ञो योऽयं पवते तस्य वाक् च मनश्च वर्तन्यौ वाचा च हि मनसा च यज्ञो वर्तत इयं वै वागदो मनस्तद्वाचा त्रय्या विद्ययैकं पक्षं संस्कुर्वन्ति मनसैव ब्रह्मा संस्करोति ते हैके ब्रह्माण उपाकृते प्रातरनुवाके स्तोमभागान् जपित्वा भाषमाणा उपासते तद्धैतदुवाच ब्राह्मण उपाकृते प्रातरनुवाके ब्रह्माणं भाषमाणं दृष्ट्वाऽर्द्धं मस्य यज्ञस्यान्तरगुरिति तद्यथैकपात्पुरुषो यन्नेकतश्चक्रो वा रथो वर्त्तमानो भ्रेषं न्येत्येव मेव स यज्ञो भ्रेषं न्येति यज्ञस्य भ्रेष मनु यजमानो भ्रेषं न्येति तस्माद् ब्रह्मोपाकृते प्रातरनुवाके वाचंयमः स्यादोपांश्वन्तर्यामयोर्होमादुपाकृतेषु पवमानेष्वोदृचोऽथ यानि स्तोत्राणि सशस्त्राणि तेषां वषट्काराद्वाचंयम एव स्यात् तद्यथोभयतःपात्पुरुषो यन्नुभयतश्चक्रो वा रथो वर्त्तमानो न रिष्यत्येव मेव स यज्ञो न रिष्यति यज्ञस्यारिष्टि मनु यजमानो न रिष्यति ॥ ८ (३३) ॥

व्याहृतिहोमप्रसङ्गेन ब्रह्मा बुद्धिस्थः ; तस्य तत्कर्त्तृत्वात् * । तथा चाश्वलायन आह—“जुहोति-जपतीति प्रायश्चित्ते ब्रह्माणम्” –इति (श्रौ० १.१.१६.) । अतः प्रश्नोत्तराभ्यां ब्रह्मत्वं निर्णेतु मुपक्रमते —“तदाहुर्महावदा३ः यदृचैव हौत्रं क्रियते, यजुषाऽऽध्वर्यवं, साम्नोद्गीथं, व्यारब्धा त्रयी विद्या भवत्यथ केन ब्रह्मत्वं क्रियत इति, त्रय्या विद्ययेति ब्रूयात्”–इति । ‘तत्’ तत्र प्रायश्चित्तप्रसङ्गे ‘महावदाः’ ब्रह्मवादिनः ‘आहुः’ चोदयन्ति । महत् प्रौढं वेदं वदन्तीति महावदाः । प्लुतिस्तेषां प्रशंसार्था । ‘यद्’ यस्मात् कारणादृग्यजुस्सामेति हौत्राध्वर्यवौद्गात्राणां ‘त्रयी’ वेदत्रयरूपा विद्या ‘व्यारब्धा’ विविच्य होत्रादिभिः स्वीकृता भवति । अथर्ववेदश्च नात्र मिश्रयितुं शक्यते ; आहवनीयादिकर्त्तव्यस्य तत्राभावात् । अथ तस्मात् कारणात् केन साधनेन ब्रह्मत्वं क्रियते ? इति चोद्यम् । तस्य ‘त्रय्या’ वेदत्रयरूपया विद्यया ब्रह्मत्वं कर्त्तव्यमित्युत्तरं प्रतिब्रूयात् । अत एव सम्प्रदायविदः—

“अथर्ववेत्त्रवान् ब्रह्मा वेदेष्वन्येषु भागवान् ।
तस्माद् ब्रह्माणं धर्मिष्ठ मिति † ह्यारण्यके श्रुतम्”–इति ॥

ब्रह्मणो मनसा वैकल्यराहित्यानुसन्धानं विधत्ते— “अयं वै यज्ञो योऽयं पवते, तस्य वाक् च मनश्च वर्तन्यौ ; वाचा च हि मनसा च यज्ञो वर्तत, इयं वै वागदो मनस्तद्वाचा त्रय्या विद्ययैकं पक्षं संस्कुर्वन्ति, मनसैव ब्रह्मा संस्करोति”–इति । यः ‘अयं’ वायुः ‘पवते’ अन्तरिक्षे सञ्चरति, अयमेव यज्ञस्वरूपो वायुसदृशो यज्ञः ; यथा वायोः सञ्चारमार्गाः, तथा ‘तस्य’ यज्ञस्य वाक्

---

* व्याहृतिहोमकर्त्तृत्वादिति यावत् ।

† “ब्रह्मिष्ठ मिति” घ ।

च मनश्च 'वर्तन्यौ' प्रवृत्तिभागौ। यस्माद् 'वाचा' मन्त्ररूपया 'मनसा' च प्रयोगानुसन्धात्रा यज्ञो वर्तते, तस्मादुभौ मार्गौ; तत्र वाग् 'इयं वै' भूमिस्वरूपैव, मनस्तु 'अदः' स्वर्गरूपम्; 'तत्' तथा सति वाग्रूपया त्रय्या विद्यया होत्रादयो रथस्थानीयस्य यज्ञस्यैकं 'पक्षं' भागं 'संस्कुर्वन्ति' सम्यक् सम्पादयन्ति। ब्रह्मा मनसैव 'संस्करोति' सम्यक् सम्पादयति; अन्यं भाग मिति शेषः। होत्रादिभिर्वाचानुष्ठीयमानेष्वङ्गेषु वैकल्यराहित्यं ब्रह्मा अनुसन्दध्यादित्यर्थः। छन्दोगाश्चैत मर्थं मामनन्ति— "एष एव यज्ञस्तस्य मनश्च वाक् च वर्तनी; तयोरन्यतरां मनसा संस्करोति ब्रह्मा; वाचा होताध्वर्युरुद्गातान्यतराम्"-इति (छान्दो० उप० ४.१६. *)॥

अथ ब्रह्मणो मौनं विधातुं वाग्व्यवहारे बाधं दर्शयति— "ते हैके ब्रह्माण उपाकृते प्रातरनुवाके स्तोमभागान् जपित्वा भाषमाणा उपासते तद्धैतदुवाच ब्राह्मण उपाकृते प्रातरनुवाके ब्रह्माणं भाषमाणं दृष्ट्वा ऽर्द्धं मस्य यज्ञस्यान्तरगुरिति; तद्यथैकपात्पुरुषो यन्नेकतश्चक्रो वा रथो वर्तमानो भ्रेषं न्येत्येव मेव स यज्ञो भ्रेषं न्येति,—यज्ञस्य भ्रेष मनु यजमानो भ्रेषं न्येति"-इति। केषुचिद्यज्ञप्रयोगेषु वर्तमानाः 'ते' वेदत्रयाभिज्ञत्वेन प्रसिद्धाः 'एके ब्रह्माणः' केचिद् ब्रह्मसञ्ज्ञका ऋत्विजो होत्रा पठितव्ये प्रातरनुवाके ऽध्वर्युणा 'उपाकृते' अनुज्ञाते सति, तत ऊर्द्ध्वं "रश्मिरसि क्षयाय त्वा"-इत्यादींस्तोमभागसञ्ज्ञकान्मन्त्रान् (ता० ब्रा० १.९.१.)जपित्वा † मौन मकृत्वा 'भाषमाणाः' वाग्व्यवहारं कुर्वन्तः

---

* "स यत्रोपाकृते प्रातरनुवाके पुरा परिधानीयाया ब्रह्मा व्यववदति, अन्यतरा मेव वर्तनिं संस्करोति, हीयते ऽन्यतरा"-इत्यादिस्तत्खण्डशेषः समग्र एवैतदर्थकः।

† स्तोमभागमन्त्रास्तु तै० सं० ४.४.१.१. आम्नाताः; "तस्माद्वासिष्ठो ब्रह्मा कार्यः, प्रैव

'उपासते' समीपे तिष्ठन्ति । तदानीं कश्चिच्छास्त्राभिज्ञो ब्राह्मण आगत्य कस्मिंश्चिद्यज्ञे प्रातरनुवाकोपाकरणादूर्ध्वं 'भाषमाणं' वाग्व्यवहारं कुर्वन्तं ब्रह्माणं दृष्ट्वा वाक्य मेतदुवाच—"अस्य यज्ञस्यार्द्ध मन्तरगुः"—इति ; ऋत्विग्यजमाना एकं यज्ञभाग मन्तरितं कृतवन्त इति । तथा सति यथा लोके कश्चिदेकपात्पुरुषो द्वितीयं पादं सङ्कुचितं कृत्वा प्रसारितेनैकेनैव पादेन 'यन्' मार्गे गच्छन् 'भ्रेषं' भूमौ पतन् 'न्येति' नितरा मेति ; यथा वा कश्चिद्रथ एकचक्रो भूमौ प्रवर्तमानो भ्रेषं प्राप्नोति ; एव मेव मौनरहितेन ब्रह्मणा युक्तः स यज्ञो भ्रेषं न्येति ; तञ्च यज्ञभ्रेषम् 'अनु' पश्चाद् यजमानो भ्रेषं न्येति * ॥

इत्थं वाग्व्यवहारे बाध मुक्त्वा मौनं विधत्ते—"तस्माद् ब्रह्मोपाकृते प्रातरनुवाके वाचंयमः स्यादोपांश्वन्तर्यामयोर्होमादुपाकृतेषु पवमानेष्वोदृचो † ऽथ यानि स्तोत्राणि सशस्त्राण्या तेषां वषट्काराद्वाचंयम एव स्यात् ; तद्यथोभयतःपात् पुरुषो यन्नुभयतश्चक्रो वा रथो वर्तमानो न रिष्यत्येव मेव स यज्ञो न रिष्यति,—यज्ञस्यारिष्टि मनु यजमानो न रिष्यति"—इति । यस्माद्भाषणे बाधोऽस्ति, 'तस्माद्' ब्रह्मा प्रातरनुवाकोपाकरणादूर्ध्वं 'वाचंयमः' मौनी स्यात् । कियन्तं काल मिति, तदुच्यते—'उपांश्वन्तर्यामयोः' ग्रहयोः 'आ होमाद्' होमसमाप्तिपर्यन्तम् ; तथा पवमान-

---

जायते ; रश्मिरसि क्षयाय त्वा क्षयं जिन्वेत्याह"—इत्यादिभिर्व्याख्याताः तै० सं० ३.५.२.१ । पुनः पञ्चमे ऽस्य रश्मिरसिमन्त्रस्य "रश्मिरित्येवादित्य मसृजत"—इत्यादित्यसृष्टिपरतया व्याख्यानञ्चाम्नातम् (५.३.६.१.) । वा० सं० १५.६. द्र० ।

* "इन्द्रो ह०—० ब्रह्मा वाचंयमो बुभूषेत्"—इति षड्० ब्रा० १.५ द्र० । २.८, ९ द्र० ।

† आ-उत्-ऋचः = ओदृचः ।

स्तोत्रेषु * त्रिष्वप्यध्वर्युणा 'उपाकृतेषु' अनुज्ञातेषु सत्सु 'ओद्दृचः' उत्तमा समाप्तिकालीना येय मृगस्ति, तत्समाप्तिपर्यन्तम्, वाचंयमः स्यादित्यनुवर्तते। 'अथ' अनन्तरं यान्यन्यानि आज्यादिस्तोत्राणि शस्त्रसहितानि सन्ति, तेषाम् 'आ वषट्काराद्' वौषडितिमन्त्रोच्चारणपर्यन्तम्; तत्तत्स्तोत्रप्रारम्भादूर्ध्वं तदा तदा वाचंयम एव स्यात्। तथा सति 'यथोभयतःपात्' पादद्वयोपेतः पुरुषः 'यन्' मार्गे गच्छन् 'न रिष्यति' न विनश्यति; तथा च 'उभयतश्चक्रः' चक्रद्वयोपेतो रथो मार्गे प्रवर्तमानो न विनश्यति; एव मेव मौनिना ब्रह्मणा युक्तः स यज्ञो न विनश्यति। यज्ञस्य 'अरिष्टिं' विनाशाभाव मनु यजमानोऽपि 'न रिष्यति' न विनश्यति ॥ ८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां पञ्चमाध्याये
(पञ्चविंशाध्याये) अष्टमः खण्डः ॥ ८ (३२) ॥

॥ अथ नवमः खण्डः ॥

तदाहुर्यद् ग्रहान्† मे ऽग्रहीष्मा॑चारीन्म आहुतीर्मे ऽहौषीदित्य॑ध्वर्यवे दक्षिणा नीयन्त॑ उद्गासीन्म

---

* वहिष्पवमानम्, माध्यन्दिनपवमानम्, आर्भवपवमान मिति त्रीणि पवमानस्तोत्राणि।

† "गृहान्" घ।

इत्युद्गात्रे ऽन्ववोचन्मे ऽशंसीन्मे ऽयाक्षीन् म इति होत्रे। किं स्विदेव चक्षुषे। ब्रह्मणे दक्षिणा नीयन्ते। ऽकृत्वाहोस्विदेव हरता इति। यज्ञस्य हैष भिषग् यद् ब्रह्मा। यज्ञायैव तद्भेषजं कृत्वा हरत्यथो यद्भूयिष्ठेनैव ब्रह्मणा। छन्दसां रसेनार्त्विज्यं करोति। यद् ब्रह्मा। तस्माद् ब्रह्मार्द्धभाग्घ वा एष इतरेषा मृत्विजामग्र आस। यद् ब्रह्मार्द्ध मेव ब्रह्मण आसार्द्ध मितरेषा मृत्विजां। तस्माद्यदि यज्ञ ऋक्त आर्त्तिः * स्याद्। यदि यजुष्टो यदि सामतो। यद्यविज्ञाता सर्वव्यापद्वा। ब्रह्मण एव निवेदयन्ते। तस्माद्यदि यज्ञ ऋक्त आर्तिर्भवति। भूरिति ब्रह्मा गार्हपत्ये जुहुयाद्यदि यजुष्टो भुव इत्याग्नीध्रीये। ऽन्वाहार्यपचने वा हविर्यज्ञेषु। यदि सामतः स्वरित्याहवनीये। यद्यविज्ञाता सर्वव्यापद्वा। भूर्भुवः स्वरिति सर्वा अनुद्रुत्याहवनीय एव जुहुयात्स। प्रस्तोतोपाकृते स्तोत्र आह ब्रह्मन्स्तोष्यामः प्रशास्तरिति। स भूरिति ब्रह्मा प्रातस्सवने ब्रूयादिन्द्रवन्त † स्तुध्व मिति। भुव इति माध्यन्दिने सवने ब्रूयादिन्द्रवन्त स्तुध्व मिति। स्वरिति तृतीयसवने ब्रूयादिन्द्रवन्त स्तुध्व मिति। भूर्भुवः स्वरित्युक्थ्ये वा ऽतिरात्रे वा ब्रूयादिन्द्रवन्त स्तुध्व मिति। स

---

* "आर्त्ति" ख, ग, घ।

† "इन्द्रवन्तः" क। एव मिहोत्तरत्रापि।

यदाहेन्द्रवन्त स्तुध्व मित्यै॑न्द्रो वै यज्ञ॑ इन्द्रो यज्ञस्य देवता॑ सेन्द्र मेव तदुद्गीथं करोती॑न्द्रान्मा गादिन्द्रवन्त स्तुध्व मित्ये॑वैनांस्तदाह तदाह॑ ॥ ९ (३४) ॥

॥ इत्यैतरेयब्राह्मणे पञ्चमपञ्चिकायां पञ्चमोऽध्यायः ॥५॥

अथ ब्रह्मणः कांश्चित् कर्तव्यविशेषान्विधातुं चोद्य मुद्भावयति— "तदाहुर्यद् ग्रहान्मे ऽग्रहीत्प्राचारीन्म आहुतीर्मे ऽहौषीदित्यध्वर्यवे दक्षिणा नीयन्त उदगासीन्म इत्युद्गात्रे ऽन्ववोचन् मे ऽशंसीन्मे ऽयाक्षीन् म इति होत्रे, किंस्विदेव चक्रुषे ब्रह्मणे दक्षिणा नीयन्ते ऽकृत्वाहोस्विदेव हरता इति"–इति। 'तत्' तस्मिन् ब्रह्मणि चोद्य माहुः । किं चोद्य मिति, तदुच्यते— यजमानेनाध्वर्यवे यदा दक्षिणा 'नीयन्ते' प्रदीयन्ते, तदानीं यजमानस्याय मभिप्रायः— असावध्वर्युः 'मे' मदर्थं 'ग्रहान्' ऐन्द्रवायवादीनग्रहीत्, तथा 'मे' मदर्थं 'प्राचारीत्' ग्रहप्रचारं कृतवान्, तथा 'मे' मदर्थं माहुतीः 'अहौषीत्' हुतवानिति। यदोद्गात्रे दक्षिणा नीयन्ते, तदानी मय मभिप्रायः— असौ उद्गाता 'मे' मदर्थम् 'उदगासीत्' औद्गात्रं कृतवानिति। यदा होत्रे दक्षिणा नीयन्ते, तदानी मय मभिप्रायः— अयं होता 'मे' मदर्थम् 'अन्ववोचत्' पुरोनुवाक्यादीना मनुवचनं कृतवान्, तथा 'मे' मदर्थम् 'अशंसीत्' शंसनं कृतवान्, तथा 'मे' मदर्थम् 'अयाक्षीद्' याज्यां पठितवानिति। एवं तेन तेन कृतं कार्य्यं स्मृत्वा यस्माद् दक्षिणां ददाति, तस्माद् ब्रह्मणेऽपि तत्कृतं कार्य्यं स्मृत्वा दक्षिणा दातव्या। तथा सति 'किंस्विदेव' किं नाम कार्य्यं 'चक्रुषे' कृतवते ब्रह्मणे यजमानेन दक्षिणा

नीयन्ते, 'आहोस्विदकृत्वैव' अथवा कि मपि कार्य्यं मकृत्वैव 'हरते' ब्रह्मा दक्षिणां हरेत् ? एतच्चायुक्त मिति चोद्यम् ॥

तस्योत्तर माह— "यज्ञस्य हैष भिषग्यद् ब्रह्मा ; यज्ञायैव तद्भेषजं कृत्वा हरति"-इति । यो ब्रह्मास्ति, एष यज्ञस्य 'भिषक्' चिकित्सकः । 'तत्' तस्मात् कारणाद् 'यज्ञायैव भेषजं कृत्वा' यज्ञस्याङ्गवैकल्यरोगं शमयित्वा, दक्षिणां हरति ; तस्माद्धोत्रादिवदुपकारित्वादयं दक्षिणाया योग्य एव ॥

पक्षान्तररूपेण ब्रह्मणो दक्षिणाधिक्यं दर्शयति— "अथो यद् भूयिष्ठेनैव ब्रह्मणा छन्दसां रसेनार्त्विज्यं करोति यद् ब्रह्मा ; तस्माद् ब्रह्मार्द्धभाग्घ वा एष इतरेषा मृत्विजा मग्र आस यद् ब्रह्मार्द्ध मेव ब्रह्मण आसार्द्ध मितरेषा मृत्विजाम्"-इति । अपि यो ब्रह्मास्ति, 'भूयिष्ठेनैव' अतिबहुलेनैव 'छन्दसां रसेन' वेदसारभूतेन व्याहृतिप्रणवरूपेण 'ब्रह्मणा' मन्त्रेणैव 'यद्' यस्मात् कारणादार्त्विज्यं करोति, तस्मात् कारणादुपकारबाहुल्यादयं ब्रह्मेति विशिष्टेन नाम्ना व्यवह्रियत इति शेषः । किञ्च यो ब्रह्मास्ति, एषः 'अग्रे' प्रथम मेवेतरेषा मृत्विजाम् 'अर्द्धभाग्घ वै' अर्द्धप्रयोगं भजत्येव ;— वेदत्रये यावान् प्रयोगो विततोऽस्ति, स सर्वोऽपीतरैर्ऋत्विग्भिर्वाचानुष्ठीयते, ब्रह्मणा तु मनसेत्येतावानेव विशेषः, प्रयोगस्तूभयत्र समान एव । अय मेवार्थोऽर्द्ध मेवेत्यादिना स्पष्टीक्रियते । ब्रह्मणो यज्ञस्यार्द्ध मेव मनसानुष्ठीयमानम्, 'इतरेषा मृत्विजां' होत्रादीनां वाचानुष्ठीयमान मर्द्धम् ; तस्मादुपकारबाहुल्यं सिद्धं पूर्ववत् ॥

व्याहृतिप्रायश्चित्त मुक्तं तत्कर्त्तृत्वं ब्रह्मणो विधत्ते— "तस्माद् यदि यज्ञ ऋक्त आर्त्तिः स्याद्यदि यजुष्टो यदि सामतो यद्यविज्ञाता सर्वव्यापद्वा, ब्रह्मण एव निवेदयन्ते ; तस्माद्यदि यज्ञ ऋक्त

आर्त्तिर्भवति, भूरिति ब्रह्मा गार्हपत्ये जुहुयाद्; यदि यजुष्टो भुव इत्याग्नीध्रीये ऽन्वाहार्यपचने वा हविर्यज्ञेषु ; यदि सामतः, स्वरित्याहवनीये ; यद्यविज्ञाता सर्वव्यापद्वा भूर्भुवः स्वरिति सर्वा अनुद्रुत्याहवनीय एव जुहुयात्"–इति । यस्माद् ब्रह्मा यज्ञभार मर्थं वहति, भिषक्त्वेन यज्ञवैकल्यं परिहर्तुञ्च शक्नोति, तस्माद्यदृगादिभ्यः किञ्चित् वैकल्यं भवेत्, तदानी मितरे सर्वेते तस्मै ब्रह्मणे एव तद्वैकल्यं निवेदयन्ते ; 'तस्माद्' इतरैर्निवेदितत्वात् स ब्रह्मा पूर्वोक्तप्रकारेण तत्तत् प्रायश्चित्तं जुहुयात् ॥

ब्रह्मणः कर्तव्यान्तरं दर्शयति—"स प्रस्तोतोपाकृते स्तोत्र आह ब्रह्मन्त्स्तोष्यामः प्रशास्तरिति, स भूरिति ब्रह्मा प्रातस्सवने ब्रूयादिन्द्रवन्त स्तुध्व मिति ; भुव इति माध्यन्दिने सवने ब्रूयादिन्द्रवन्त स्तुध्व मिति ; स्वरिति तृतीयसवने ब्रूयादिन्द्रवन्त स्तुध्व मिति ; भूर्भुवः स्वरित्युक्थ्ये वा ऽतिरात्रे वा ब्रूयादिन्द्रवन्त स्तुध्व मिति"–इति । अध्वर्युणा स्तोत्रे 'उपाकृते' प्रारब्धु मनुज्ञाते सति 'प्रस्तोता' स्तोत्रसाधने साम्नि प्रथमस्य प्रस्तावभागस्य माता प्रस्तोतृनामक ऋत्विक्, ब्रह्माणं प्रत्यनुज्ञा मनेन मन्त्रेण प्रार्थयेत । "ब्रह्मन्"–इत्यादिर्मन्त्रः । हे 'प्रशास्तः' अस्माकं प्रशातनस्य आज्ञापनस्य कर्त्तः ! हे ब्रह्मन् ! त्वदनुज्ञया वयं स्तोष्याम इति । ततस्तेन प्रार्थितो ब्रह्मा 'भूः'–इत्येतां प्रथमां व्याहृति मुक्त्वा, हे उद्गातारः ! 'इन्द्रवन्तः' इन्द्रविषयस्तुतिपराः सन्तः 'स्तुध्वं' स्तोत्रं कुरुतेति ब्रूयाद् । एव मितरत्रापि योज्यम् ॥

ब्रह्मणा प्रयुक्तस्यानुज्ञानमन्त्रस्याभिप्रायं दर्शयति—"स यदाहेन्द्रवन्त स्तुध्व मित्यैन्द्रो वै यज्ञ, इन्द्रो यज्ञस्य देवता, सेन्द्र मेव तदुद्गीथं करोतीन्द्रान्मा गादिन्द्रवन्त स्तुध्व मित्येवैनांस्तदाह तदाह"

–इति । 'सः' ब्रह्मा 'इन्द्रवन्त स्तुध्व मिति' यद्वाक्य माह, तस्याभिप्राय उच्यते — 'यज्ञः' सोमयागः 'ऐन्द्रो वै' इन्द्रसम्बद्ध एव, इन्द्रो हि तस्य यज्ञस्य देवता ; अतः 'तदुद्गीथं' सामगैः क्रियमाण मुद्गानं 'सेन्द्रम्' इन्द्रसहित मेव करोति ; ऐन्द्र मुद्गीतम्, इन्द्रात् 'मा गात्' मापगच्छतु । तस्मात् हे उद्गातारः ! यूयम् 'इन्द्रवन्तः' इन्द्रविषयतां पर्यवेक्षन्तः, एवं भूत्वा स्तुध्वम् । 'इति' अनेनैव प्रकारेण 'एतान्' उद्गातॄन् ब्रह्मा 'तद्' वाक्य माह ॥

अभ्यासोऽध्यायपरिसमाप्त्यर्थः * ॥ ९ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायां पञ्चमाध्याये
(पञ्चविंशाध्याये) नवमः खण्डः ॥ ९ (३४) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'नामभाष्ये
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायाः पञ्चमाध्यायः ॥

---

* अस्मिन्नध्याये नव खण्डाः सन्ति; तत्राद्येषु षट्सु अग्निहोत्र माम्नातम्, तत उत्तर र्त्विक्कार्योपदेशप्रकरण मारभ्य मिति सप्तमाष्टमयोः खण्डयोः ब्रह्मर्त्विक्कार्योपदेशा उक्ताः; ग्रावस्तुदादीनां कार्याण्यपि परस्ताद्वक्ष्यन्ति । आश्वलायनीयद्वितीयाध्यायस्य प्रथमकण्डिकाया मग्न्याधान मुक्त्वा द्वितीयादिषु चतसृषूक्त मग्निहोत्रम् ; ब्रह्मकर्त्तव्योपदेशस्तु "अथ ब्रह्मणः (१.१२.१.)"–इत्याद्युपक्रम्येतः पुरस्तादेवोक्त इति शम् ॥

विश्वे वै पञ्च(१)। गौर्वै दश(२)। यद्वा एति च प्रेति च चत्वारि(३)। यद्वै समानोदर्कं षट्(४)। उद्धराहवनीयं नव(५) ॥ ५ * ॥

विश्वे वै देवा, देवासुरा वै, सञ्च त्वे जग्मु, तद्यन्नु खलु वा चत्वारि ॥ ५ † ॥

॥ इति पञ्चमपञ्चिका समाप्ता ॥

---

* १, ४१, ९१, १२३, १६२ पृ० (५—१०—४—६—९=३४ ख०)।

† १, ६३, १२०, १९१ पृ० (१०—१०—१०—४=३४ ख०) १भा० २२२पृ० † ॐ०।

॥ ऐतरेयब्राह्मणम् ॥

॥ अथ षष्ठपञ्चिका ॥

(तत्र)

॥ प्रथमाध्यायस्य प्रथमः खण्डः ॥

॥ ॐ ॥ देवा ह वै सर्वचरौ सत्रं निषेदुस्ते॑ह पाप्मानं नापजघ्निरे॑ तान्होवाचार्बुदः काद्रवेयः॑ सर्पऋषिर्मन्त्रकृ॑देका वै वो होत्रा ऽकृता॑ तां वो ऽहं करवा॑ण्यथ पाप्मान मपहनिष्यध्व इति॑ ते ह तथेत्यूचु॑स्तेषां ह स्म स मध्यन्दिने॑ मध्यन्दिन एवोपोदासर्पद्॑ ग्रावणो ऽभिष्टौति॑ तस्मान् मध्यन्दिने मध्यन्दिन ए॑वं ग्राव्णो ऽभिष्टुवन्ति॑ तदनुकृति॑ स ह स्म येनोपोदासर्प॑त्तद्धाप्येतर्ह्यर्बुदोदासर्पणी नाम प्रपद॑स्ति तान् ह राजा मदयाञ्चकार॑ ते होचुराशीविषो वै नो राजान मवेक्षते॑ हन्तास्योष्णीषेणाक्ष्यावपिनह्यामेति॑ तथेति॑ तस्य होष्णीषेणाक्ष्यावपिनह्यु॑स्तस्मादुष्णीष मेव पर्य॑स्य ग्राव्णो ऽभिष्टुवन्ति॑ तदनुकृति॑ तान् ह राजा मदया मेव चकार॑ ते होचुः॑ स्वेन वै नो मन्त्रेण ग्राव्णो ऽभिष्टौति॑ हन्तास्यान्या-

भिर्ऋग्भिर्मन्त्र मा पृणचामे॑ति तथे॑ति तस्य हान्याभिर्ऋग्भिर्मन्त्र मापपृचुस्त॑तो हैनां न मदयाञ्चकार॑ तद्यदस्यान्याभिर्ऋग्भि॑र्मन्त्र मापृञ्चन्ति॑ शान्त्या एव॑ ते ह पाप्मान मप जघ्निरे॑ तेषा मन्वपहतिं सर्पाः॑ पाप्मान मप जघ्निरे॑ त एते ऽपह॑तपाप्मानो॑ हित्वा पूर्वां जीर्णां त्वचं॑ नवयैव प्रयन्त्यप पाप्मानं हते य एवं वे॑द ॥ १ ॥

॥ श्रीगणेशाय नमः ॥

अथाग्निहोत्रं पयसः प्रशंसा तद्दोहनापत्तिविनिष्कृतिश्च ।
तस्य प्रशंसाप्युदिते च होमो ब्रह्मर्त्विजो व्याहृतयोऽप्यधीताः ॥ १ ॥

ब्रह्मणः कर्त्तव्यविधानेन ग्रावस्तुद् बुद्धिस्थः; तस्याग्निष्टोमे कर्त्तव्यं * विधातु मुपाख्यान माह— "देवा ह वै सर्वचरौ सत्रं निषेदुस्ते ह पाप्मानं नापजघ्निरे ; तान्होवाचार्बुदः काद्रवेयः सर्प ऋषिर्मन्त्रकृदेका वै वो होत्रा ऽकृता, तां वो ऽहं करवाण्यथ पाप्मान मप हनिष्यध्व इति ; ते ह तथेत्यूचुस्तेषां ह स्म स मध्यन्दिने मध्यन्दिन एवोपोदासर्पद् ग्राव्णो ऽभिष्टौति"—इति । पुरा कदाचिद् देवाः 'सर्वचरु'नामके देशविशेषे † 'सत्रं' किञ्चिदनुष्ठितवन्तः । 'ते' देवास्तेन सत्रेण स्वकीयं 'पाप्मानं' दारिद्र्यहेतुं 'नापजघ्निरे' न नाशितवन्तः । 'तान्' पापक्षयरहितान् देवान् 'अर्बुदः' तन्नामकः कश्चिदृषिरागत्योवाच। कीदृशोऽर्बुदः ?

---

* "एतस्मिन् काले ग्रावस्तुत् प्रपद्यते"—इत्यादि आश्व० श्रौ० ५.१२ ख० द्र० ।

† साङ्ख्या० ब्रा० २९. १. द्रष्टव्यम् ।

'काद्रवेयः' कद्रुनामधारिण्याः स्त्रियाः पुत्रः*, 'सर्पः' सर्पजातीयदेहधारी, 'ऋषिः' अतीन्द्रियार्थद्रष्टा 'मन्त्रकृत्' [करोतिधातुरत्र दर्शनार्थः] मन्त्रस्य "प्रैते वदन्तु प्र वयं वदाम"–इत्यादिसूक्तस्य (सं० १०. ९४. १.) द्रष्टा। तेनार्बुदेन किं मुक्त मिति, तदुच्यते—हे देवाः! 'एका वै वो होत्रा' एकैव होतृवेदोत्पन्ना क्रिया 'वः' युष्माकम् 'अकृता' नानुष्ठिता, तद्वैकल्येन पापक्षयो नासीत्। 'तां' क्रियां 'वः' युष्मदर्थं महं करवाणि, अनन्तरं पाप्मानं यूय मपहनिष्यध्वे। 'इति' एतदृषिवाक्यं देवाः अङ्गीचक्रुः। ततः 'सः' अर्बुदः 'तेषां' देवानां सत्रे प्रतिदिनं मध्यन्दिनसमय एव 'उप' समीपम् उत्सुकः सन्नागच्छत्। आगत्य च ये सोमाभिषवार्थाः 'ग्रावाणः' पाषाणाः† सन्ति, तान् पूर्वोक्तेन सूक्तेन 'अभिष्टौति' अभितः स्तुतिं कृतवान्॥

इदानीं ग्रावस्तुत ऋत्विजः‡ तत्सूक्तेन ग्राव्णा मभिष्टवं विधत्ते— "तस्मान् मध्यन्दिने मध्यन्दिन एव ग्राव्णो ऽभिष्टुवन्ति तदनुकृति"–इति। यस्मादर्बुदेनाभिष्टुतिः कृता, तस्मात्सोमप्रयोगेषु सत्रेषु तत्तन्मध्यन्दिने काले एव "प्रैते वदन्तु"–इतिसूक्तेन ग्राव्णा मभिष्टव मृत्विजः कुर्य्युः। 'तदनुकृति'–इति क्रियाविशेषणम्। 'तस्य' अर्बुदस्य 'अनुकृति' अनुरूपं यथा भवति तथेत्यर्थः॥

---

* "अर्बुदः काद्रवेयो राजेत्याह तस्य सर्पा विशः"–इति शत० ब्रा० १३. ४. ३. ९। "अर्बुदः काद्रवेयस्तस्य सर्पा विशः॰—॰विषविद्यां निगदेत्"–इति चाश्व० श्रौ० १०.७.५।

† निरु० ९. १. ८, ९. द्रष्टव्यम्।

‡ "तस्यर्त्विजः। चत्वारस्त्रिपुरुषाः। तस्य तस्योत्तरे त्रयः। होता मैत्रावरुणो ऽच्छावाको ग्रावस्तुदध्वर्युः प्रतिप्रस्थाता नेष्टोन्नेता ब्रह्मा ब्राह्मणाच्छंस्याग्नीध्रः पोतोद्गाता प्रस्तोता प्रतिहर्त्ता सुब्रह्मण्य इति। एते ऽहीनैकाहैर्याजयन्ति। एत एवाहिताग्नय इष्टप्रथमयज्ञा गृहपतिसप्तदशाः"–इति आश्व० श्रौ० ४. १. ३–८।

अर्बुदस्य वृत्तान्तं लोकप्रसिद्ध्या द्रढयति—“स ह स्म येनोपोदासर्पत्तद्धाप्येतर्ह्यर्बुदोदासर्पणी नाम प्रपदस्ति”–इति। ‘स ह’ स तु अर्बुदाख्यः सर्पदेहो महर्षिः, येन मार्गेण ‘उपोदासर्पत्’ तत्समीपं प्रति विलादुन्नम्यागच्छत्, ‘तद्ध’ तस्मिन्नेव देशे ‘एतर्हि’ इदानी मपि ‘अर्बुदोदासर्पणी’–इत्यनेन नामधेयेन युक्ता ‘प्रपत्’ मार्गोऽस्ति। प्रपद्यते गम्यते अनयेति प्रपत् ॥

अथाभिष्टवकाले ग्रावस्तुत उष्णीषेण नेत्रवेष्टनं विधत्ते—“तान् ह राजा मदयाञ्चकार; ते होचुराशीविषो वै नो राजान मवेक्षते, हन्तास्योष्णीषेणाक्ष्यावपिनह्यामेति; तथेति; तस्य होष्णीषेणाक्ष्यावपिनह्युस्तस्मादुष्णीष मेव पर्यस्य ग्राव्णो ऽभिष्टुवन्ति तदनुकृति”–इति। ग्राव्णा मभिषवार्थ मर्बुदाख्ये सर्परूपे महर्षौ समागते सति तदीयविषदृष्ट्यावलोकितः सोमो ‘राजा’ वल्यात्मकः, स्वय मपि विषयुक्तः सन्, ‘तान्’ समीपवर्तिनो देवान् ‘मदयाञ्चकार’ उन्मत्तान् परवशान् कृतवान्। तदानीं ‘ते’ देवाः परस्पर मिद मूचुः,— ‘आशीविषः’ सर्परूपोऽय मर्बुदो ‘नः’ अस्माकं राजानं विषदृष्ट्या अवेक्षते ‘हन्त’ कष्ट मेतत्सम्पन्नम्; अतस्तत्परिहाराय केनचित् ‘उष्णीषेण’ शिरोवेष्टनसाधनेनाल्पवस्त्रेणास्यार्बुदस्य ‘अक्ष्यावपिनह्याम’ चक्षुषोर्बन्धनं करवाम इति विचार्य त्रिः प्रदक्षिणं तस्य मुख मुष्णीषेण वेष्टयित्वा तदीयचक्षुषोर्बन्धनं कृतवन्तः *। यस्माद्देवैरेवं कृतम्, तस्मादृत्विजोऽपि उष्णीष मेव ‘पर्यस्य’ परितो मुखं वेष्टयित्वा ‘ग्राव्णः’

---

* “अथास्मा अध्वर्युरुष्णीषं प्रयच्छति। तदञ्जलिना प्रतिगृह्य, त्रिः प्रदक्षिणं शिरः समुखं वेष्टयित्वा, यदा सोमांशूनभिषवाय व्यपोहन्त्यथ ग्राव्णोऽभिष्टुयात्”–इति आश्व० श्रौ० ५. १२. ६, ७। पु० १ भा० १७८ पृ० + द्रष्टव्यम्।

सोमाभिषवार्थान् पाषाणानभिष्टुवन्ति। 'तस्य' अर्बुदस्य 'अनुकृति' सादृश्यं यथा भवति तथेत्यनेनाभिप्रायेण वेष्टनम् ॥

अथ ग्रावस्तुतः पूर्वोक्तसूक्तादन्या अप्यृचो विधत्ते— "तान् ह राजा मदया मेव चकार; ते होचुः,—स्वेन वै नो मन्त्रेण ग्राव्णो ऽभिष्टौति, हन्तास्यान्याभिर्ऋग्भिर्मन्त्र मा पृणचामेति ; तथेति ; तस्य हान्याभिर्ऋग्भिर्मन्त्र मापपृचुस्ततो हैनां न मदयाञ्चकार; तद्यदस्यान्याभिर्ऋग्भिर्मन्त्र मापृञ्चन्ति शान्त्या एव"–इति। पुनरपि सोमो 'राजा' 'तान्' देवान् पूर्ववत् 'मदयाञ्चकारैव' ; ततः ते देवाः परस्पर मूचुः,— दृष्टिविषयपरिहारेऽप्ययं सर्पदेह ऋषिः स्वकीयेनैव सूक्तरूपेण मन्त्रेण ग्राव्णो ऽभिष्टौति। अतो मन्त्रसम्बन्धेन विषेणास्माक मुन्मादो जायते, 'हन्त' कष्ट मेतत्। अतो मन्त्रगतविषपरिहाराय 'अस्य' अर्बुदस्य 'मन्त्रं' सूक्तम् 'अन्याभिः' "आप्यायस्व समेतु ते"–इत्यादिभिर्ऋग्भिः * 'आपृणचाम' ["पृची सम्पर्के"–इति (रुधा० २५.) धातुः] सर्वतः सम्पृक्तं करवाम। तदेतत् सर्वे देवा अङ्गीकृत्य तथैव चक्रुः। 'ततः' ऋगन्तरसम्पर्कात् तत्सूक्तगतेऽग्रत्वे सति 'एतान्' देवान् सोमो राजा 'न मदयाञ्चकार' उन्मादं नाकरोत्। तस्मात् कारणादर्बुदस्य 'मन्त्रं' सूक्तम् 'अन्याभिः' "आप्यायस्व"–इत्यादिभिः (सं० १.९१.१६–१८.) अभिष्टवकाले सम्पृक्तं कुर्य्युः ; तच्च शान्त्यर्थ मेव भवति ॥

देवाना मभिष्टवकृतां पापशान्तिं दर्शयति— "ते ह पाप्मान मप जघ्निरे, तेषा मन्वपहतिं सर्पाः पाप्मान मप जघ्निरे, त एते ऽपहतपाप्मानो हित्वा पूर्वां जीर्णां त्वचं नवयैव प्रयन्ति"–इति। 'ते' देवाः अर्बुदानुष्ठितेनाभिष्टवेन दारिद्र्यादिहेतुम् 'पाप्मानं'

---

* "आप्यायस्व समेतु त इति तिस्रः"–इति आश्व० श्रौ० ५.१२.१५।

नाशितवन्तः। 'तेषां' देवानाम् 'अपहतिं' पापविनाशम् 'अनु' पश्चाद् अर्बुदसम्बन्धिनः सर्पाः सर्वेऽपि स्वकीयं पाप्मानं नाशितवन्तः। ते सर्पाः स्वशरीरगतां पूर्वसिद्धां जीर्णां त्वचं हित्वा 'नवयैव' नूतनयैव त्वचा युक्ताः 'प्रयन्ति' सर्वतः प्रसर्पन्ति। 'एते' नूतनत्वग्युक्ताः सर्वा अपहतपाप्मान इत्युच्यन्ते ॥ वेदनं प्रशंसति— "अप पाप्मानं हते य एवं वेद"—इति ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां प्रथमाध्याये
(षड्विंशाध्याये) प्रथमः खण्डः ॥ १ ॥

॥ अथ द्वितीयः खण्डः ॥

तदाहुः कियतीभिरभिष्टुयादिति॑ शतेनेत्याहुः॑ शतायुर्वै पुरु॑षः शतवीर्यः शतेन्द्रि॑य आयुष्येवैनं तद्वीर्य इन्द्रिये दधाति॑ त्रयस्त्रिंशत्या वेत्याहुस्त्र॑यस्त्रिंशतो वै स देवानां॑ पाप्मनो ऽपाहंस्त्र॑यस्त्रिंशद्वै तस्य देवा इत्य॑परिमिताभिरभिष्टुयाद॑परिमितो वै प्रजापतिः॑ प्रजापतेर्वा एषा होत्रा॑ यद् ग्रावस्तोत्रीया॑ तस्यां सर्वे कामा अवरुध्यन्ते॑ स यदपरिमिताभिरभिष्टौति॑ सर्वेषां कामाना मवरुद्ध्यै॑ सर्वान् कामानवरुन्धे य एवं वेद॑ तस्मादपरिमिताभिरेवाभिष्टुया॑त्तदाहुः कथ मभिष्टुयादित्य॑क्षरशा३ः॑

चतुरक्षरशा३॑ः पच्छा३॑ः अर्द्धर्चशा३॑ः ऋक्शा३ः इति॑ तद्यदृक्शो न तदवकल्पते॑ ऽथ यत् पच्छो नो एव तदवकल्पते॑ ऽथ यदक्षरशश्चतुरक्षरशो वि तथा छन्दांसि लुप्येरन्॑ बहूनि तथाक्षराणि हीयेरन्नर्द्धर्चश एवाभिष्टुयात्प्र॑तिष्ठाया एव॑ द्विप्रतिष्ठो वै पुरुषश्च॑तुष्पादाः पशवो॑ यजमान मेव तद् द्विप्रतिष्ठं॑ चतुष्पात्सु पशुषु प्रतिष्ठापयति॑ तस्मादर्द्धर्चश एवाभिष्टुयात्त॑दाहुर्यन्मध्यन्दिने मध्यन्दिन एव॑ ग्राव्णो ऽभिष्टौति॑ कथ मस्येतरयोः सवनयोरभिष्टुतं भवतीति॑ यदेव गायत्रीभिरभिष्टौति॑ गायत्रं वै प्रातस्सवनं॑ तेन प्रातस्सवने॑ ऽथ यज्जगतीभिरभिष्टौति॑ जागतं वै तृतीयसवनं॑ तेन तृतीयसवनं॑ एव मु हास्य मध्यन्दिने मध्यन्दिन एव॑ ग्राव्णो ऽभिष्टुवतः॑॑ सर्वेषु सवनेष्वभिष्टुतं भवति य एवं वेद॑ तदाहुर्यदध्वर्युरेवान्यानृत्विजः सम्प्रेष्यत्य॑थ कस्मादेष एता॑ मसम्प्रेषितः प्रतिपद्यत इति॑ मनो वै ग्रावस्तोत्रीया॑ ऽसम्प्रेषितं वा इदं मनस्त॑स्मादेष एता मसम्प्रेषितः प्रतिपद्यते॑ ॥ २ ॥

अथ प्रश्नोत्तराभ्या मभिष्टवगताना मृचां सङ्ख्यां विधत्ते—“तदाहुः कियतीभिरभिष्टुयादिति, शतेनेत्याहुः ; शतायुर्वै पुरुषः

शतवीर्यः शतेन्द्रिय आयुष्येवैनं तद्वीर्य इन्द्रिये दधाति"–इति। शतसङ्ख्याकासु नाड़ीषु सञ्चारादिन्द्रियाणां तदीयवीर्यस्य च शतसङ्ख्यात्वम्; तत्सङ्ख्याकाना मृचां पाठेन 'एनं' यजमानं दीर्घायुष्यादिगुणयुक्तं करोति॥

पक्षान्तरं विधत्ते— "त्रयस्त्रिंशत्या वेत्याहुस्त्रयस्त्रिंशतो वै स देवानां पाप्मनो ऽपाहंस्त्रयस्त्रिंशद्वै तस्य देवा इति"–इति। अथवा 'त्रयस्त्रिंशत्या' ऋचां त्रयस्त्रिंशत्सङ्ख्यया अभिष्टव इत्याहुः। तत्र हेतुरुच्यते— देवानां सम्बन्धिनी या त्रयस्त्रिंशदस्ति, अस्याः सकाशात् 'सः' अर्बुदः पापानि 'अपाहन्' विनाशितवान्। 'तस्य' 'अर्बुदस्य' समीपस्था देवाः 'त्रयस्त्रिंशद्वै' अष्टौ वसवः, एकादश रुद्राः, द्वादशादित्याः, प्रजापतिश्च, वषट्कारश्चेत्येवं देवसङ्ख्या द्रष्टव्या *॥

पक्षान्तरं विधत्ते— "अपरिमिताभिरभिष्टुयादपरिमितो वै प्रजापतिः; प्रजापतेर्वा एषा होत्रा यद् ग्रावस्तोत्रीया, तस्यां सर्वे कामा अवरुध्यन्ते; स यदपरिमिताभिरभिष्टौति, सर्वेषां कामाना मवरुद्धै"–इति। एतावत्येवेति सङ्ख्यानिर्बन्धरहिताः 'अपरिमिताः'। प्रजापतेरपरिमितमहिमत्वाद् ग्रावस्तोत्रसम्बन्धिन्या होतृवेदोत्पन्नायाः क्रियायाः प्रजापतिसम्बद्धत्वात् अपरिमितत्वं युक्तम्; तस्याश्च क्रियायां सर्वे कामाः स्वाधीना भवन्ति; अतो ऽपरिमिताभिरभिष्टवः सर्वकामप्राप्त्यै सम्पद्यते॥ वेदनं प्रशंसति— सर्वान् कामानवरुन्धे य एवं वेद"–इति॥

---

* पु० १ भा० ३५९,४५६ पृ० द्र०। "तिस्र एव देवता इति नैरुक्ता अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वान्तरिक्षस्थानः सूर्यो द्युस्थानस्तासां महाभाग्यादेकैकस्या अपि बहूनि नामधेयानि"–इत्यादि निरु० ७. २. ११

तृतीयस्य पक्षस्य मुख्यत्वं दर्शयति— "तस्मादपरिमिताभिरेवाभिष्टुयात्"–इति ॥

प्रश्नोत्तराभ्या मभिष्टवे प्रकारविशेषं विधत्ते— "तदाहुः कथ मभिष्टुयादित्यक्षरशा३ः, चतुरक्षरशा३ः, पच्छा३ः अर्द्धर्चशा३ः, ऋक्शा३ः इति ; तद्यदृक्शो न तदवकल्पतेऽथ यत् पच्छो नो एव तदवकल्पतेऽथ यदक्षरशश्चतुरक्षरशो वि तथा छन्दांसि लुप्येरन्, बहूनि तथाक्षराणि हीयेरन्नर्द्धर्चश एवाभिष्टुयात्प्रतिष्ठाया एव"–इति । 'तत्' तत्राभिष्टवे ब्रह्मवादिनः प्रश्न माहुः,—केन प्रकारेणाभिष्टुयादिति । कियन्तः प्रकाराः सम्भाव्यन्त इति चाकाङ्क्षायां ते प्रकारा उपन्यस्यन्ते,— अक्षरशोऽभिष्टुयादित्येकः प्रकारः ; प्रत्यक्षर मवसायावसायाभिष्टुयादित्यर्थः । अक्षरचतुष्टये ऽवसानं द्वितीयः प्रकारः । पादेऽवसानं तृतीयः प्रकारः । अर्द्धर्चे ऽवसानं चतुर्थः । ऋचि समाप्ताया मवसानं पञ्चमः । प्लुतयः सर्वा विचारार्थाः । किं प्रत्यक्षर मवसानम्, उताक्षरचतुष्टयेऽवसानम्, उत पादे पादे ऽवसानम्, आहोस्विदर्द्धर्चे ऽवसानम्, अथवा कृत्स्नाया मृच्यवसानम् ? इति संशयः । तत्र पक्षान्तराणि दूषयित्वार्द्धर्चपक्ष एव स्वीकार्य्यः । कथ मिति, तदुच्यते— यदि ऋक्श इति पक्षः स्यात् ? तत् 'नावकल्पते' न सम्भवति ; अध्ययनवैपरीत्यप्रसङ्गात्,— अध्ययनकाले ऽर्द्धर्चे ऽवसानं कुर्वन्ति, न तु कृत्स्ना मृचं मध्ये ऽवसानरहितां पठन्ति । पादावसानपक्षेऽपि स एव दोषः । एकैकाक्षर–चतुरक्षर–पक्षयोर्दोषान्तर मप्यस्ति,— तथा पक्षद्वयाङ्गीकारे छन्दांसि विलुप्येरन् । कथं विलोप इति, तदुच्यते— तथा सत्यक्षरावसानपक्षे बहून्यक्षराणि 'हीयेरन्' विनश्येयुः ; संहिताकालीनस्य द्वित्वादेरभावात् ; तत-

श्छन्दोभङ्गः। अर्द्धर्चपक्षे तु यथाध्ययन मेवाभिष्टवात् न कोऽपि दोषः; तस्मादय मेव पक्षः सिद्धान्तः। अर्द्धर्चयोः द्वित्वात् पक्षद्वयसादृश्येन प्रतिष्ठार्थं मेतत् सम्पद्यते ॥

इम मर्द्धर्चपक्षं प्रशंसति— "द्विप्रतिष्ठो वै पुरुषश्चतुष्पादाः पशवो यजमान मेव तद् द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति; तस्मादर्द्धर्चश एवाभिष्टुयात्"–इति। अर्द्धर्चयोर्द्वित्वाद्यजमानसाम्यम्, ऋचां पादचतुष्टयोपेतत्वात् पशुसाम्यम् ॥

अथ मध्यन्दिनकालीन मभिष्टवं प्रश्नोत्तराभ्यां प्रशंसति— "तदाहुर्यन्मध्यन्दिने मध्यन्दिन एव ग्राव्णो ऽभिष्टौति, कथ मस्येतरयोः सवनयोरभिष्टुतं भवतीति; यदेव गायत्रीभिरभिष्टौति, गायत्रं वै प्रातस्सवनं तेन प्रातस्सवने, ऽथ यज्जगतीभिरभिष्टौति जागतं वै तृतीयसवनं तेन तृतीयसवने"–इति। 'तत्' तत्राभिष्टवे चोद्य माहुः। यस्मात् कारणादयं ग्रावस्तुत् तत्प्रयोगसम्बन्धिनि 'मध्यन्दिने' एव सवने ग्राव्णा मभिष्टवं करोति, एवं सति केन प्रकारेण 'अस्य' ग्रावस्तुतः प्रातस्सवनतृतीयसवनयोरभिष्टवः सिध्यतीति प्रश्नः। ऋक्षु यद्गायत्री जगती छन्दोद्वयं तद्द्वारान्ययोरपि सवनयोरभिष्टवसिद्धिरित्युत्तरम् ॥ वेदनं प्रशंसति— "एव मु हास्य मध्यन्दिने मध्यन्दिन एव ग्राव्णो ऽभिष्टुवतः सर्वेषु सवनेष्वभिष्टुतं भवति य एवं वेद"–इति। 'एव मु ह' अनेनैव गायत्रीजगतीच्छन्दोद्वारेण ॥

अथ ग्रावस्तुतः सम्प्रेषनिरपेक्षत्वं प्रश्नोत्तराभ्यां दर्शयति— "तदाहुर्यदध्वर्युरेवान्यानृत्विजः सम्प्रेष्यत्यथ कस्मादेष एता मसम्प्रेषितः प्रतिपद्यत इति; मनो वै ग्रावस्तोत्रीया ऽसम्प्रेषितं वा इदं मनस्तस्मादेष एता मसम्प्रेषितः प्रतिपद्यते"–इति। 'तत्'

तत्र ग्रावस्तुद्विषये प्रश्न माहुः । यस्मात् कारणादध्वर्युः सर्वानन्यानृत्विजः सम्प्रेष्यत्येव, न तूदास्ते, तथा सत्यृत्विगन्तरवत् ग्रावस्तुदप्यध्वर्युणा सम्प्रेषणीयः ? तत्र नास्ति । कस्मात् कारणात् असम्प्रेषित 'एषः' ग्रावस्तुत् 'एताम्' ऋचं प्रारभत इति प्रष्टृणा मभिप्रायः । तत्रेद मुत्तरम्— येय मृग् ग्रावस्तोत्रसम्बन्धिनी विद्यते, सेयं मनःस्वरूपा, मनश्चेद मिन्द्रियान्तरेण केनचिदपि असम्प्रेषित मेव प्रवर्त्तते ; तस्मात् 'एषः' ग्रावस्तुत् सम्प्रेषनिरपेक्ष एव 'एतां' स्तोत्रीया मृचं प्रतिपद्यते ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां प्रथमाध्याये
(षड्विंशाध्याये) द्वितीयः खण्डः ॥ २ ॥

॥ अथ तृतीयः खण्डः ॥

वाग्वै सुब्रह्मण्या॑ तस्यै सोमो राजा वत्सः॑ सोमे राजनि क्रीते सुब्रह्मण्या माह्वयन्ति॑ यथा धेनु मुपह्वयेत् तेन वत्सेन॑ यजमानाय सर्वान् कामान् दुह्रे॑ सर्वान् हास्मै कामान् वाग् दुह्रे य एवं वेद॑ तदाहुः किं सुब्रह्मण्यायै सुब्रह्मण्यात्व मिति॑ वागेवेति ब्रूयाद्वाग्वै ब्रह्म च सुब्रह्म चेति॑ तदाहुरथ कस्मादेनं

पुमांसं सन्तं। स्त्री मिवाचक्षत इति। वाग्घि सुब्रह्मण्येति ब्रूयात्। तेनेति तदाहुर्यदन्तर्वेदीतर ऋत्विज आर्त्विज्यं कुर्वन्ति।* बहिर्वेदि सुब्रह्मण्यां। कथ मस्यान्तर्वेद्यार्त्विज्यं कृतं भवतीति। वेदेर्वा उत्कर मुत्किरन्ति। यदेवोत्करे तिष्ठन्नाह्वयतीति ब्रूयात्। तेनेति तदाहुरथ कस्मादुत्करे तिष्ठन्त्सुब्रह्मण्या माह्वयतीत्यृषयो वै सत्र मासत। तेषां यो वर्षिष्ठ आसीत्त। मब्रुवन्त्सुब्रह्मण्या माह्वय। त्वं नो नेदिष्ठाद् देवान् ह्वयिष्यसीति। वर्षिष्ठ मेवैनं तत् कुर्वन्त्यथो वेदि मेव तत् सर्वां प्रीणाति। तदाहुः कस्मादस्या ऋषभं दक्षिणा मभ्याजन्तीति। वृषा वा ऋषभो योषा सुब्रह्मण्या तन्मिथुनं। तस्य मिथुनस्य प्रजात्या इत्युपांशु पात्नीवतस्याग्नीध्रो यजति। रेतो वै पात्नीवत। उपांश्विव वै रेतसः सिक्तिर्नानुवषट् करोति। संस्था वा एषा यदनुवषट्कारो। नेद्रेतः संस्थापयानीत्यसंस्थितं वै रेतसः समृद्धं। तस्मान्नानुवषट्करोति। नेष्टुरुपस्थ आसीनो भक्षयति। पत्नीभाजनं वै नेष्टाऽग्निः पत्नीषु रेतो दधाति प्रजात्या। अग्निनैव तत् पत्नीषु रेतो दधाति प्रजात्यै। प्र जायते प्रजया पशुभिर्य एवं वेद दक्षिणा अनु सुब्रह्मण्या सन्तिष्ठते।

---

* "कुर्वन्तीति" क ।

वाग्वै सुब्रह्मण्यान्नं दक्षिणान्नाद्य एव तद्वाचि यज्ञमन्ततः प्रतिष्ठापयन्ति प्रतिष्ठापयन्ति ॥ ३ ॥

॥ इत्यैतरेयब्राह्मणे षष्ठपञ्चिकायां प्रथमोऽध्यायः ॥१॥

ग्रावस्तुत ऋत्विजः कर्त्तव्य मभिधाय सुब्रह्मण्याख्यस्य ऋत्विजः कर्त्तव्यं निरूपयति—"वाग्वै सुब्रह्मण्या, तस्यै सोमो राजा वत्सः; सोमे राजनि क्रीते सुब्रह्मण्या माह्वयन्ति, यथा धेनु मुपह्वयेत् तेन वत्सेन; यजमानाय सर्वान् कामान् दुहे"—इति। 'सुब्रह्मण्या'-शब्देन "इन्द्रागच्छ हरिव आगच्छ"—इत्यादिर्निगद उच्यते *। सा च सुब्रह्मण्या वागेव, शब्दरूपैव सती धेनुसदृशी। तस्याः सुब्रह्मण्यायाः धेनोः सोमो राजा वत्सस्थानीयः। तस्मात् सोमक्रयादूर्द्धम् ऋत्विजः तत्तत्प्रयोगेषु सुब्रह्मण्या माह्वयेयुः, उक्तनिगदं पठेयुरित्यर्थः। यथा लोके दोहनार्थं कश्चिद्धेनुं तदीयवत्सप्रदर्शनेन समीपं प्रत्याह्वयते, तद्वदेतत् द्रष्टव्यम्। एतेनाह्वानेन यजमानार्थं सर्वान् कामान् 'दुहे' सम्पादयति॥ वेदनं प्रशंसति—"सर्वान् ह्यस्मै कामान् वाग् दुहे य एवं वेद"—इति॥

प्रश्नोत्तराभ्यां सुब्रह्मण्यां प्रशंसति—"तदाहुः किं सुब्रह्मण्यायै सुब्रह्मण्यात्व मिति; वागेवेति ब्रूयाद्,— वाग्वै ब्रह्म च सुब्रह्म चेति"—इति। 'तत्' तत्र सुब्रह्मण्याख्ये निगदरूपे † मन्त्रे नाम-

---

*, † 'सुब्रह्मण्या'–नामा निगदोऽयं यजुर्विशेष एव; मीमांसायां तथैव सिद्धान्तितत्वात् (जै० सू० २.१.३८—४५.)। शतपथब्राह्मणे पठितः, सामान्यतो व्याख्यातश्च (२. १४. २८.)। सामवेदीयषड्विंशब्राह्मणे त्वयं समग्रः पठितोऽक्षरशो व्याख्यातः, सामेति च निर्दिष्टः (१.१,२.)। तथा सामकल्पेषु लाट्यायनकेऽप्ययं प्रपठ्य विहितः (१. ३.), सुब्रह्मण्य-नाम-सामवेदीयर्त्विजा गीयतेऽपि; तस्माद्याज्ञिकैः सामेति च व्यपदिश्यते। तस्य

निमित्तं पृच्छन्ति; वागेवेति तदुत्तरम्; "वाग्वै"–इत्यादि तदुपपादनम्। 'ब्रह्म' वेदो 'वाग्वै' वागात्मक मेव। तस्मिन्नपि वेदे सुष्ठु ब्रह्म सारभूतं वेदवाक्यम्, तद्रूपेयम् वाग् देवता; तस्मात् सारभूतस्य निगदस्य सुब्रह्मण्येति नामधेयम्। पुल्लिङ्गशब्दाभिधेयस्य निगदस्य सुब्रह्मण्येति स्त्रीलिङ्गशब्देनाभिधानं वाग्रूपत्वविवक्षयेति ॥

एत मर्थं प्रश्नोत्तराभ्यां दर्शयति— "तदाहुरथ कस्मादेनं पुमांसं सन्तं स्त्री मिवाचक्षत इति? वाग्घि सुब्रह्मण्येति ब्रूयात्, तेनेति"–इति ॥

पुनरपि प्रश्नोत्तराभ्यां सुब्रह्मण्याह्वानस्य देशविशेषं निरूपयति—"तदाहुर्यदन्तर्वेदीतर ऋत्विज आर्त्विज्यं कुर्वन्ति, बहिर्वेदि सुब्रह्मण्या; कथ मस्यान्तर्वेद्यार्त्विज्यं कृतं भवतीति? वेदेर्वा उत्कर मुत्किरन्ति, यदेवोत्करे तिष्ठन्नाह्वयतीति ब्रूयात्, तेनेति"–इति। अध्वर्युहोतृप्रभृतयः सर्वेऽप्यृत्विजो वेदिमध्ये एवार्त्विज्यं कुर्वन्ति, 'सुब्रह्मण्या' * वेदेर्बहिर्भागे सुब्रह्मण्याख्येन ऋत्विजा हूयते; तथा सति केन प्रकारेण 'अस्य' सुब्रह्मण्य-नाम्न ऋत्विजः वेदिमध्ये आर्त्विज्यं कृतं स्यादिति प्रश्नः। तस्येद मुत्तरम्,—वेदेः सकाशात् 'उत्करम्' उद्धर्तव्यं पांसुम् 'उत्किरन्ति' उद्धृत्य बहिर्देशे वेदेरुत्तर-

---

पाठस्त्वेवम्— "सुब्रह्मण्यो३म्। सुब्रह्मण्यो३म्। सुब्रह्मण्यो३म्। इन्द्रागच्छ हरिव आगच्छ मेधातिथेर्मेष वृषणश्वस्य मेने। गौरावस्कन्दिन्नहल्यायै जार कौशिक ब्राह्मण गौतमब्रुवाण। त्र्यहे सुत्या मागच्छ मघवन् देवा ब्रह्माण आगच्छतागच्छतागच्छत"–इति। तैत्तिरीयारण्यके ऽप्ययं 'ब्रुवाणः'–इत्यन्तो ऽधीयते (१.१२.३,४.)। अस्य च व्याख्यानान्तरं मीमांसाभाष्यवार्त्तिकयोः द्रष्टव्यम् (जै० सू० ९. १. ४२—४४; अधि० १५.)।

* 'सुब्रह्मण्या'–इति सुपां सुलुग् (पा० ७. ३. ३९.) इत्यात्वे रूपम्। अपिवा आवन्तोऽप्ययं दृश्यते,—"सुब्रह्मण्ये सुब्रह्मण्या माह्वय"–इति कात्या० श्रौ० ८. २. १४।

भागे प्रक्षिपन्ति ; तत्र कृतं सुब्रह्मण्याह्वानं वेदिमध्य एव कृतं भवेत्। यस्मादेव कारणादयं सुब्रह्मण्य उत्करदेशे तिष्ठन् सुब्रह्मण्या माह्वयति, 'तेन' कारणेनेत्युत्तरवादिनो वचनम् * ॥

सुब्रह्मण्याह्वानस्योत्करदेशं विधाय पुनः प्रश्नोत्तराभ्यां प्रशंसति— "तदाहुरथ कस्मादुत्करे तिष्ठन्त्सुब्रह्मण्या माह्वयतीत्यृषयो वै सत्र मासत, तेषां यो वर्षिष्ठ आसीत्त मब्रुवन्त्सुब्रह्मण्या माह्वय त्वं नो नेदिष्ठाद् देवान् ह्वयिष्यसीति ; वर्षिष्ठ मेवैनं तत् कुर्वन्त्यथो वेदि मेव तत्सर्वां प्रीणाति"—इति। आहवनीयदेशान् परित्यज्य सुब्रह्मण्याह्वानस्योत्करदेशस्वीकारे किं कारणम् ? इति प्रश्नः। तस्येद मुत्तरम्— ऋषयो हि पुरा सत्र मासत, 'तेषाम्' ऋषीणां मध्ये यो 'वर्षिष्ठः' अतिशयेन वृद्ध आसीत्, तं प्रत्येव मब्रुवन्,— हे महर्षे ! सुब्रह्मण्या माह्वय, 'नः' अस्माकं मध्ये त्व मेव 'नेदिष्ठात्' वयोवृद्धत्वेन देवलोकप्राप्तेः प्रत्यासन्नत्वे सत्यन्तिकतमत्वात् देवान् 'ह्वयिष्यसि' आह्वातुं समर्थोऽसि। एव मृषिभिरुक्तत्वादत्राप्युत्करदेशे तिष्ठन्तं सुब्रह्मण्याह्वानकर्त्तार मेनं 'वर्षिष्ठ मेव' अतिशयेन वृद्ध मेव कुर्वन्ति। उत्करस्य वेदिगतपांसुरूपत्वात् तत्सामीप्ये सति वेदिं 'सर्वां' निरवशेषां 'प्रीणाति' तोषयति॥

अथ सुब्रह्मण्याख्यस्यर्त्विजः समीपे दक्षिणात्वेन वृषभानयनं प्रश्नोत्तराभ्यां निरूपयति— "तदाहुः कस्मादस्मा ऋषभं दक्षिणा मभ्याजन्तीति ; वृषा वा ऋषभो योषा सुब्रह्मण्या, तन् मिथुनं, तस्य मिथुनस्य प्रजात्या इति"—इति। 'तत्' तस्मिन् सुब्रह्मण्यस्य विषये प्रश्न माहुः। 'अस्मै' सुब्रह्मण्याय 'ऋषभं' पुङ्गवं दक्षिणां कृत्वा 'अभ्याजन्ति' समीप मानयन्ति। तत्र किं कारण मिति

---

* "शालायाः पुरस्तादन्तर्वेदिदेशे पत्नीयजमानयोरन्वारम्भयोर्भवति"—इति लाट्या०सू०१.३.१।

प्रश्नाभिप्रायः । तस्येद मुत्तरम्— योऽयं दक्षिणात्वेन नीयमानः ऋषभः, सोऽयं 'वृषा वै' सेचनसमर्थः पुरुषस्वरूप एव ; सुब्रह्मण्या तु स्त्रीलिङ्गशब्दाभिधेयत्वाद्योषिद्रूपा ; तदुभयं मिथुनं भवति । तस्य मिथुनस्य 'प्रजात्यै' प्रजोत्पादनार्थं मृषभानयन मित्युत्तरवादिनो ऽभिप्रायः ॥

सुब्रह्मण्यस्य कर्तव्य मुक्त्वा आग्नीध्रस्यर्त्विजः कर्त्तव्यं विधत्ते— "उपांशु पात्नीवतस्याग्नीध्रो यजति ; रेतो वै पात्नीवत उपांश्विव वै रेतसः सिक्तिः"—इति । पात्नीवताख्यो यो ग्रहविशेषः, तस्य मन्त्रे 'उपांशु' शनैरुच्चार्य आग्नीध्रो यजेत् । योऽयं 'पात्नीवतः' ग्रहः स रेतसः स्वरूपम् ; लोकेऽपि रेतसः 'सिक्तिः' सेचनम् 'उपांश्विव वै' ध्वनि मन्तरेण रहस्येव क्रियते । अतस्तत्साम्यार्थं मुपांशुत्वं युक्तम् ॥

अत्र पात्नीवतग्रहे "सोमस्याग्ने वीहि"—इत्येत मनुवषट्कारं* निषेधति— "नानुवषट् करोति ; संस्था वा एषा यदनुवषट्कारो नेद्रेतः संस्थापयानीत्यसंस्थितं वै रेतसः समृद्धं ; तस्मान्नानुवषट् करोति"—इति । सर्वत्र ग्रहेषु वषट्कारानुवषट्काराभ्यां हूयते ; अत्र तु पात्नीवतग्रहे वषट्कारहोम एक एव, न त्वितरः । तत्र हेतुः "संस्था वै"—इत्यादिः । योऽय मनुवषट्कारोऽस्ति, सोऽयं 'संस्था वै' ग्रहस्य समाप्तिरेव । तथा सति स पात्नीवतग्रहरूपं रेतः 'नेत् संस्थापयानि' सर्वथा समाप्तिं न करवाणीति अभिप्रेत्य तत्समाप्ते भीतो भवेत् । 'असंस्थितम्' असमाप्त मनुपरतं रेतसः सेचनं अपत्योत्पत्त्या समृद्धं भवति ; तस्मादेव नानुवषट् कुर्यात् । तथाच यज्ञगाथां पठन्ति—

---

* १ भा० १६२ पृ० १४ पं०, २ भा० २२ पृ० १७ पं० । आश्व० ५.५.१९ ।

“ऋतुयाजान् द्विदेवत्यान् यश्च पात्नीवतो ग्रहः।
आदित्यग्रहसावित्रौ तान्स्म मानुवषट्कुथाः”—इति * ॥

अथ पात्नीवतग्रहभक्षणे देशं विधत्ते— “नेष्टुरुपस्थ आसीनो भक्षयति; पत्नीभाजनं वै नेष्टा ऽग्निः पत्नीषु रेतो दधाति प्रजात्या अग्निनैव तत् पत्नीषु रेतो दधाति प्रजात्यै”—इति। योऽय माग्नीध्रः पात्नीवतं यजति, सोऽयं नेष्टुः ‘उपस्थे’ समीपे आसीनः शेषं भक्षयेत्। नेष्टृनामक ऋत्विक् ‘पत्नीभाजनं वै’ पत्नीस्थानीयः; “नेष्टः पत्नी मुदानय”—इत्येवं † नेष्टृपत्न्योरानयनद्वारा सम्बन्धश्रवणात्। अतस्तत्समीपे भक्षणे सत्यग्निरूप आग्नीध्रः पत्नीषु रेतः स्थापयति; तच्च प्रजननाय सम्पद्यते। ‘तत्’ तेनानुष्ठानेन यजमानोऽपि ‘अग्निनैव’ अग्न्यनुग्रहेणैव पत्नीषु रेतो ऽवस्थापयति। तदपि ‘प्रजात्यै’ सम्पद्यते। वेदनं प्रशंसति— “प्र जायते प्रजया पशुभिर्य एवं वेद”—इति ॥

अथ सुब्रह्मण्याविषये कञ्चिद्विशेषं विधत्ते— “दक्षिणा अनु सुब्रह्मण्या सन्तिष्ठते; वाग्वै सुब्रह्मण्याऽन्नं दक्षिणाऽन्नाद्य एव तद्वाचि यज्ञ मन्ततः प्रतिष्ठापयन्ति प्रतिष्ठापयन्ति”—इति। दक्षिणासु नीतासु ता दक्षिणाः ‘अनु’ पश्चात् सुब्रह्मण्या ‘सन्तिष्ठते’ समाप्यते। सुब्रह्मण्याया वाग्रूपत्वात् दक्षिणायाश्चान्नरूपत्वात् ‘अन्ततः’ समाप्तिवेलाया मिमं यज्ञं ‘अन्नाद्ये वाचि’ द्वयोरेवैतयोः ‘प्रतिष्ठापयन्ति’ प्रतिष्ठितं कुर्वन्ति ॥

---

* आश्व० श्रौ० ५.५.२१.द्र०।

† तै० सं० ६.५.८.६। “अथ सम्प्रेष्यति— अग्नीन्नेष्टुरुपस्थ मासीद, नेष्टः पत्नी मुदानय, उद्गात्रा सङ्ख्यापय ०—० वृषा वा अग्नीद्, योषा नेष्टा, मिथुन मेवैतत् प्रजननं क्रियते; उदानयति नेष्टा पत्नीं, ता मुद्गात्रा सङ्ख्यापयति”—इति शत० ब्रा० ४.४.२.१७,१८।

अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां प्रथमाध्याये
(षड्विंशाध्याये) तृतीयः खण्डः ॥ ३ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'नामभाष्ये
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायाः प्रथमाध्यायः ॥

॥ अथ द्वितीयाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ देवा वै यज्ञ मतन्वत तांस्तन्वानानसुरा अभ्यायन्यज्ञवेशस मेषां करिष्याम इति तान् दक्षिणत उपायन् यत एषां यज्ञस्य तनिष्ठ ममन्यन्त ते देवाः प्रतिबुध्य मित्रावरुणौ दक्षिणतः पर्यौहंस्ते मित्रावरुणाभ्या मेव दक्षिणतः प्रातःसवनेऽसुररक्षांस्यपाघ्नत तथैवैतद्यजमाना मित्रावरुणाभ्या मेव दक्षिणतः प्रातःसवनेऽसुररक्षांस्यपघ्नते तस्मान् मैत्रावरुणं मैत्रावरुणः प्रातःसवने शंसति मित्रावरुणाभ्यां हि देवा दक्षिणतः प्रातःसवनेऽसुररक्षांस्यपाघ्नत ते वै दक्षिणतोऽपहता असुरा मध्यतो यज्ञं प्राविशंस्ते देवाः प्रतिबुध्येन्द्रं मध्यतोऽदधुस्त इन्द्रेणैव मध्यतः प्रातःसवनेऽसुररक्षांस्यपाघ्नत तथैवैतद्यजमाना इन्द्रेणैव मध्यतः प्रातःसवनेऽसुररक्षांस्यपघ्नते तस्मादैन्द्रं ब्राह्मणाच्छंसी प्रातःसवने शंसतीन्द्रेण हि देवा मध्यतः प्रातःसवनेऽसुररक्षांस्यपाघत ते वै मध्यतोऽपहता असुरा उत्त-

रतो यज्ञं प्राविशंस्ते देवाः प्रतिबुध्येन्द्राग्नी उत्तरतः पर्यौहंस्त इन्द्राग्निभ्या मेवोत्तरतः प्रातःसवने ऽसुररक्षांस्यपाघ्नत तथैवैतद्यजमाना इन्द्राग्निभ्या मेवोत्तरतः प्रातःसवने ऽसुररक्षांस्यपघ्नते तस्मादैन्द्राग्न मच्छावाकः प्रातःसवने शंसतीन्द्राग्निभ्यां हि देवा उत्तरतः प्रातःसवने ऽसुररक्षांस्यपाघ्नत ते वा उत्तरतो ऽपहता असुराः पुरस्तात्पर्यद्रवंस्तमनीकतस्ते देवाः प्रतिबुध्याग्निं पुरस्तात् प्रातःसवने पर्यौहंस्ते ऽग्निनैव पुरस्तात् प्रातःसवने ऽसुररक्षांस्यपाघ्नत तथैवैतद्यजमाना अग्निनैव पुरस्तात् प्रातःसवने ऽसुररक्षांस्यपघ्नते तस्मादाग्नेयं प्रातःसवन मप पाप्मानं हते य एवं वेद ते वै पुरस्तादपहता असुराः पश्चात्परीत्य प्राविशंस्ते देवाः प्रतिबुध्य विश्वान् देवानात्मानं पश्चात्तृतीयसवने पर्यौहंस्ते विश्वैरेव देवैरात्मभिः पश्चात् तृतीयसवने ऽसुररक्षांस्यपाघ्नत तथैवैतद्यजमाना विश्वैरेव देवैरात्मभिः पश्चात्तृतीयसवने ऽसुररक्षांस्यपघ्नते तस्माद् वैश्वदेवं तृतीयसवन मप पाप्मानं हते य एवं वेद ते वै देवा असुरानेव समपाघ्नत सर्वस्मादेव यज्ञात् ततो वै देवा अभवन् परासुरा भवत्यात्मना परास्य द्विषन् पाप्मा भ्रातृव्यो

भवति य एवं वेद ते देवा एवं क्लृप्तेन यज्ञेनापासुरान् पाप्मान मघ्नताजयन्त्स्वर्गं लोक मप ह वै द्विषन्तं पाप्मानं भ्रातृव्यं हते जयति स्वर्गं लोकं य एवं वेद यश्चैवं विद्वान्त्सवनानि कल्पयति ॥ १ (४) ॥

ग्रावस्तोतोष्णीषसमावेष्टितमूर्द्धा
मन्त्रैरन्यैरर्बुदसूक्तं विपृणक्ति ।
कियन्त्यो वाभिष्टवनीयाः कथ मेताः
सुब्रह्मण्याह्वान मितीह प्रवदन्ति ॥ १ ॥

ग्रावस्तुत्-सुब्रह्मण्याख्ययोर्ऋत्विजोः कर्त्तव्य मुक्त्वा मैत्रावरुण-ब्राह्मणाच्छंस्यच्छावाकनाम्नां होत्रकाणां शस्त्राणि विधातु माख्यायिका माह—"देवा वै यज्ञ मतन्वत; तांस्तन्वानानसुरा अभ्यायन् यज्ञवेशस मेषां करिष्याम इति; तान् दक्षिणत उपायन्; यत एषां यज्ञस्य तनिष्ठ ममन्यन्त; ते देवाः प्रतिबुध्य मित्रावरुणौ दक्षिणतः पर्यौहंस्ते मित्रावरुणाभ्या मेव दक्षिणतः प्रातस्सवने ऽसुररक्षांस्यपाघ्नत; तथैवैतद्यजमाना मित्रावरुणाभ्या मेव दक्षिणतः प्रातस्सवने ऽसुररक्षांस्यपघ्नते; तस्मान् मैत्रावरुणं मैत्रावरुणः प्रातस्सवने शंसति; मित्रावरुणाभ्यां हि देवा दक्षिणतः प्रातस्सवने ऽसुररक्षांस्यपाघ्नत"–इति । यदा देवा यज्ञ मकुर्वत, तदा 'तान्' कुर्वाणान् देवान् असुराः अभित आगच्छन् । असुरशब्देन रक्षांस्यप्युपलक्ष्यन्ते । 'एषां' देवानां 'यज्ञवेशसं' यज्ञविघातं करिष्याम इत्यसुराणा मभिप्रायः । 'एषां' देवानां सम्बन्धिनो यज्ञोपलक्षितस्य देवयजनदेशस्य 'यतः' यस्मिन् दक्षिणदेशभागे

'तनिष्टम्' अतिशयेन तनुरूप मत्यन्तदुर्बलं स्थान मिद मित्यसुराः 'अमन्यन्त' सर्वेषा मृत्विजा माहवनीयादिदेशेष्ववस्थितत्वेन सदसो दक्षिणभागे रक्षकाभावात् दुर्बलस्थान मित्यसुराणां बुद्धिरासीत्। 'दक्षिणतः' तस्मिन् सदसो दक्षिणभागे, 'तान्' देवान् असुराः 'उपायन्' प्राप्तवन्तः। 'ते' देवाः तस्कररूपेण समागतान् असुरान् प्रतिबुध्य तस्मिन् दक्षिणतः 'मित्रावरुणौ' द्वौ देवौ 'पर्यौहन्' रक्षकत्वेनावस्थापितवन्तः। ततः 'ते' देवाः मित्रावरुणाभ्या मेव धानुष्काभ्या मत्यन्तशूराभ्यां दक्षिणदेशे प्रातस्सवनकाले तानसुरान् रक्षांसि चापसारयन्ति। तस्मादपसारणार्थं मित्रावरुणदेवताकं शस्त्रम् "आ नो मित्रावरुणा"–इत्यादिकं (सं० ३.६२.१६–१८.) मैत्रावरुणाख्यः ऋत्विक् प्रातस्सवने शंसेत्। यस्माद्देवा मित्रावरुणाभ्या मपसारितवन्तः, तस्मात् मैत्रावरुणं शस्त्रं युक्तम् * ॥

उपाख्यानमुखेन मैत्रावरुणस्य शस्त्रं विधाय तथैव ब्राह्मणाच्छंसिनःशस्त्रं विधत्ते— "ते वै दक्षिणतोऽपहता असुरा मध्यतो यज्ञं प्राविशंस्ते देवाः प्रतिबुध्येन्द्रं मध्यतो दधुस्त इन्द्रेणैव मध्यतः प्रातस्सवनेऽसुररक्षांस्यपाघ्नत ; तथैवैतद्यजमाना इन्द्रेणैव मध्यतः प्रातस्सवने असुररक्षांस्यपघ्नते ; तस्मादैन्द्रं ब्राह्मणाच्छंसी प्रातस्सवने शंसतीन्द्रेण हि देवा मध्यतः प्रातस्सवनेऽसुररक्षांस्यपाघ्नत"–इति। 'ते' दक्षिणदेशादपसारिता असुराः, प्राचीनवंशस्य सदसश्च मध्ये यज्ञभूमिं प्राविशन्। "आ याहि सुषुमा हित"–इत्यादिकं (सं० ८.१७.१–२.) इन्द्रदेवताकं शस्त्रम् †। अन्यत् पूर्ववद् व्याख्येयम् ॥

---

*, † आश्व० श्रौ० ५.१०.२८. द्र०।

इदानी मच्छावाकस्य शस्त्रं विधत्ते—"ते वै मध्यतो ऽपहता असुरा उत्तरतो यज्ञं प्राविशंस्ते देवाः प्रतिबुध्येन्द्राग्नी उत्तरतः पर्यौहंस्त इन्द्राग्निभ्या मेवोत्तरतः प्रातस्सवने ऽसुररक्षांस्यपाघ्नत ; तथैवैतद्यजमाना इन्द्राग्निभ्या मेवोत्तरतः प्रातस्सवने ऽसुररक्षांस्यपघ्नते ; तस्मादैन्द्राग्न मच्छावाकः प्रातस्सवने शंसतीन्द्राग्निभ्यां हि देवा उत्तरतः प्रातस्सवने ऽसुररक्षांस्यपाघ्नत"—इति। "इन्द्राग्नी आगतं सुतम्"—इत्यादिकम् (सं० ३. १२. १–३.) 'ऐन्द्राग्नं' शस्त्रम् *। अन्यत् पूर्ववद् व्याख्येयम् ॥

प्रातस्सवनाभिमानी देवोऽग्निरित्येत मर्थं दर्शयति— "ते वा उत्तरतो ऽपहता असुराः पुरस्तात् पर्यद्रवन्त्समनीकतस्ते देवा प्रतिबुध्याग्निं पुरस्तात् प्रातस्सवने पर्यौहंस्ते ऽग्निनैव पुरस्तात् प्रातस्सवने ऽसुररक्षांस्यपाघ्नत ; तथैवैतद्यजमाना अग्निनैव पुरस्तात् प्रातस्सवने ऽसुररक्षांस्यपघ्नते ; तस्मादाग्नेयं प्रातस्सवनम्"—इति। 'ते' इन्द्राग्निभ्या मुत्तरतो ऽपसारिता असुराः 'समनीकतः' सङ्ग्रामार्थं समीचीनसैन्यैर्युक्ताः, 'पुरस्ताद्' यज्ञभूमेः पूर्वस्यां दिशि 'पर्यद्रवन्' परितः प्राप्ताः । 'ते' देवाः, प्रतिबुध्येत्यादि पूर्ववत् । यस्मात् पूर्वस्यां दिशि रक्षकोऽग्निस्तस्मादिदं प्रातस्सवन मग्निसम्बद्धं द्रष्टव्यम् ॥ वेदनं प्रशंसति— "अप पाप्मानं हते य एवं वेद"—इति ॥

प्रातस्सवनाभिमानिन मग्निं प्रशस्य तृतीयसवनाभिमानिनो विश्वान् देवान् प्रशंसति— "ते वै पुरस्तादपहता असुराः पश्चात्परीत्य प्राविशंस्ते देवाः प्रतिबुध्य विश्वान् देवानात्मानं पश्चात् तृतीयसवने पर्यौहंस्ते विश्वैरेव देवैरात्मभिः पश्चात् तृतीयसवने

---

* आश्व० श्रौ० ५. १०. २८. द्र० ।

ऽसुररक्षांस्यपाघ्नत ; तथैवैतद्यजमाना विश्वैरेव देवैरात्मभिः पश्चात् तृतीयसवने ऽसुररक्षांस्यपघ्नते ; तस्माद् वैश्वदेवं तृतीयसवनम्”–इति । अग्निना प्राच्या दिशो ऽपसारिताः असुरा रक्षांसि च प्रतीच्यां दिशि परितो गत्वा यज्ञभूमिं प्राविशन् । देवाश्च प्रतिबुध्य विश्वान् देवान् तृतीयसवनवेलायां प्रतीच्यां दिशि रक्षार्थं प्रेषितवन्तः । आत्मान मिति विश्वेषां देवानां विशेषणम् ; ये प्रेरका देवाः तेषा मात्मभूतान् स्वशरीरवदत्यन्त माप्तान् विश्वान् देवानित्यर्थः * । तैर्विश्वैर्देवैरितरदेवात्मभूतैरसुराणां तृतीयसवने अपहतत्वादिदं तृतीयसवनं वैश्वदेवम् ॥ वेदनं प्रशंसति—“अप पाप्मानं हते य एवं वेद”–इति ॥

पुनरपि प्रदेशान्तरे प्रवेशशङ्कां वारयितु मसुराणां सर्वात्मना विनाशं दर्शयति— “ते वै देवा असुरानेव मपाघ्नत सर्वस्मादेव यज्ञात्, ततो वै देवा अभवन् परासुराः”–इति । उक्तक्रमेण सर्वतो ऽपसारितेष्वसुरेषु देवाः शत्रुरहिता अभवन्, असुराश्च पराभूताः ॥ वेदनं प्रशंसति— “भवत्यात्मना परास्य द्विषन् पाप्मा भ्रातृव्यो भवति य एवं वेद”–इति । ‘आत्मना’ स्वेनैव रूपेण शत्रुरहितेन सुखी भवति ; द्वेषी तु पाप्मा पराभवति ॥

उपाख्यान मुपसंहरति— “ते देवा एवं क्लृप्तेन यज्ञेनापासुरान् पाप्मान मघ्नताजयन्त्स्वर्गं लोकम्”–इति । ‘एवं’ पूर्वोक्तप्रकारेण क्लृप्तेन मित्रावरुणादिभिर्दक्षिणादिदेशविशेषेषु रक्षितो यो यज्ञस्तेन पापरूपानसुरानपहत्य देवाः स्वर्गं लोकं प्राप्नुवन् ॥ वेदनं तत्पूर्वक मनुष्ठानञ्च प्रशंसति—“अप ह वै द्विषन्तं पाप्मानं भ्रातृव्यं हते ; जयति स्वर्गं लोकं य एवं वेद, यश्चैवं विद्वान्त्सव-

---

* ‘आत्मानम्’–इति पदे शसः (पा० ७.१.३९.) सुः द्रष्टव्यम ।

नानि कल्पयति”–इति। सवनगतानां होत्रकाणां मैत्रावरुणादिशस्त्रसम्पादन मेव सवनकल्पनम् ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां द्वितीयाध्याये
(सप्तविंशाध्याये) प्रथमः खण्डः ॥ १ (४) ॥

॥ अथ द्वितीयः खण्डः ॥

स्तोत्रियं स्तोत्रियस्यानुरूपं कुर्वन्ति॑ प्रातस्सवने ऽहरेव तदह्नो ऽनुरूपं कुर्वन्त्य॑वरेणैव तदह्ना॑पर महरभ्यारभन्ते॑ ऽथ तथा न मध्यन्दिने॑ ग्रीवैं पृष्ठानि॑ तानि तस्मै न तत्स्थानानि॑ यत् स्तोत्रियं स्तोत्रियस्यानुरूपं कुर्युस्त॑यैव विभक्त्या तृतीयसवने॑ न स्तोत्रियं स्तोत्रियस्यानुरूपं कुर्वन्ति॑ ॥ २ (५) ॥

अथ तेषां होत्रकाणा महर्गणेषु शस्त्रेषु प्रकारविशेषं विधत्ते —“स्तोत्रियं स्तोत्रियस्यानुरूपं कुर्वन्ति; प्रातस्सवने ऽहरेव तदह्नो ऽनुरूपं कुर्वन्त्यवरेणैव तदह्नापर महरभ्यारभन्ते”–इति। पृष्ठ्यषड़हादिष्वहर्गणेषु बहून्यहानि विद्यन्ते; तेषु प्रातस्सवने द्वितीयस्याह्नो यः स्तोत्रियस्तृचः, तं तृचं प्रथमेऽहनि स्तोत्रियस्य तृचस्यानुरूपं कुर्युः। सामगा यस्मिंस्तृचे स्तोत्रं कुर्वन्ति, स तृचः ‘स्तोत्रियः’; तस्य स्तोत्रियस्य छन्दोदेवतादिना सदृशोऽन्यो

यस्तृचः, सः ‘अनुरूपः’ *। तथा सति सर्वेष्वहस्सु एकैकस्मिंस्तृचे सामगाः स्तोत्रं कुर्वन्ति, ते सर्वे तृचाः स्तोत्रियाः। तत्र सर्वत्र उत्तरदिनगतं स्तोत्रियम् पूर्वदिने स्तोत्रियस्यानन्तरभाविनमनुरूपं कुर्यात्। अयं च नियमो होत्रकाणां शस्त्रेषु प्रातस्सवने द्रष्टव्यः। एवं सत्युत्तर महरेव पूर्वस्याह्नो ऽनुरूपं कुर्वन्ति। ‘तत्’ तथा सति ‘अवरेणैव’ अतीतेनैव पूर्वेणाह्ना ‘अपरम्’ उत्तर महरभिमुखीकृत्य ‘आरभन्ते’ उपक्रमन्ते॥

माध्यन्दिनसवनेऽप्यस्य न्यायस्य प्रसक्तौ तं निषेधति— “अथ तथा न मध्यन्दिने, श्रीर्वै पृष्ठानि ; तानि तस्मै न तत्स्थानानि, यत् स्तोत्रियं स्तोत्रियस्यानुरूपं कुर्य्युः”–इति। ‘अथ’ प्रातस्सवनानन्तरं माध्यन्दिने ‘तथा न’ तेन पूर्वोक्तप्रकारेण न कुर्य्यादिति शेषः। तत्र हेतुः— श्रीर्वै पृष्ठानीति। यानि मध्यन्दिनसवने पृष्ठस्तोत्राणि, तानि ‘श्रीर्वै’ सम्पद्रूपाण्येव ; श्रीरूपत्वेन सामगैः स्तुतत्वात्। न हि श्रीरूपाणां स्वतन्त्राणा मन्यानुवृत्तित्वलक्षण मनुरूपत्वं युक्तम् ; तस्मात् ‘तानि’ पृष्ठस्तोत्राणि ‘तस्मै’ तस्मिन् माध्यन्दिने सवने ‘तत्स्थानानि’ प्रातस्सवनस्थानानि न भवन्ति, तत्सदृशानि न भवन्तीत्यर्थः। प्रातस्सवने ह्युत्तरदिनगतं स्तोत्रियं पूर्वदिनगतस्तोत्रियस्यानुरूपं कुर्वन्ति। ‘यत्’ यस्मात् कारणादत्रापि तथा कुर्य्युः, तादृशं कारणं नास्ति ; तुल्यच्छन्दस्त्वादीनामभावात्। ‘तस्मात्’ पृष्ठस्तोत्राणां पूर्वोत्तरदिनेषु सादृश्याभावात् प्रातस्सवनन्यायोऽत्र न घटते॥

माध्यन्दिनसवनन्यायं तृतीयसवनेऽतिदिशति—“तयैव विभक्त्या तृतीयसवने न स्तोत्रियं स्तोत्रियस्यानुरूपं कुर्वन्ति”–इति।

---

* २ भा० २०, १११, ११२, १६२ पृ० द्र०।

विभक्तिशब्दः प्रकारवाची ; तेनैव माध्यन्दिनोक्तप्रकारेण तृतीयसवनेऽप्युत्तरदिनगतं स्तोत्रियं पूर्वदिनगतस्य स्तोत्रियस्यानुरूपं न कुर्वन्ति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां द्वितीयाध्याये
(सप्तविंशाध्याये) द्वितीयः खण्डः ॥ २ (५) ॥

॥ अथ तृतीयः खण्डः ॥

अथात आरम्भणीया एवं॑ ऋजुनीति नो वरुण इति मैत्रावरुणस्य॑ मित्रो नयतु विद्वानिति॑ प्रणेता वा एष होत्रकाणां॑ यन् मैत्रावरुणस्त॑स्मादेषा प्रणेतृमती भवती॑न्द्रं वो विश्वतस्परीति ब्राह्मणाच्छंसिनो हवामहे जनेभ्य इ॑तीन्द्र मेवैतयाहरहर्निह्वयन्ते॑ न हैषां विह्वे ऽन्य इन्द्रं वृङ्क्ते॑ यत्रैवं विद्वान् ब्राह्मणाच्छंस्येता॑ महरहः शंसति॑ यत् सोम आ सुते नर इत्यच्छावाकस्ये॑न्द्राग्नी अजोहवुरि॑तीन्द्राग्नी एवैतयाहरहर्निह्वयन्ते॑ न हैषां विह्वे ऽन्य इन्द्राग्नी वृङ्क्ते॑ यत्रैवं विद्वानच्छावाक॑ एता महरहः

शंसति॑ ता वा एताः स्वर्गस्य लोकस्य ना॑वः सम्पारिण्यः॑ स्वर्गं मेवैताभिर्लोक मभि सन्तरन्ति॑ ॥ ३(६) ॥

होत्रकाणां स्तोत्रियानुरूप मुक्त्वा आरम्भणीया ऋचो विधत्ते —"अथात आरम्भणीया एव"—इति। 'अथ' स्तोत्रियानुरूपानन्तरम्, यस्मात् शस्त्रस्योत्तरभाविन आरम्भो युक्तः, 'अतः' अस्मात् कारणात् 'आरम्भणीयाः' ऋचो विधीयन्ते। 'एव'कारो ऽहर्गणेषु चोदकप्राप्ताया ऋचो व्यावृत्त्यर्थः ॥

तत्र मैत्रावरुणाख्यस्य होत्रकस्य आरम्भणीयां दर्शयति— "ऋजुनीती नो वरुण इति मैत्रावरुणस्य, मित्रो नयतु विद्वानिति; प्रणेता वा एष होत्रकाणां यन्मैत्रावरुणस्तस्मादेषा प्रणेतृमती भवति"—इति। "ऋजुनीती"—इत्यस्या मृचि (सं० १. ९०. १.) मित्रो नयत्विति द्वितीयः पादः। तत्र नयत्विति प्रणेतृवाचकं पदं दृश्यते, मैत्रावरुणश्च होत्रकाणां प्रणेता 'प्रवर्त्तकः'; तस्मादृगेषा प्रणेतृवाचकशब्दवती भवति। तच्च युक्त मित्यर्थः ॥

अन्यस्य आरम्भणीयां विधत्ते— "इन्द्रं वो विश्वतस्परीति ब्राह्मणाच्छंसिनो हवामहे जनेभ्य इतीन्द्र मेवैतयाहरहर्निह्वयन्ते" —इति। "इन्द्रं वः"—इत्यस्या मृचि (सं० १.७.१०.) हवामह इति द्वितीयः पादः। तत्राह्वानवाचिनः शब्दस्य विद्यमानत्वात् 'एतया' ऋचा प्रतिदिन मिन्द्रं नितरा माहूयन्ते ॥ वेदनं प्रशंसति— "न हैषां विहवे ऽन्य इन्द्रं वृङ्क्ते, यत्रैवं विद्वान् ब्राह्मणाच्छंस्येता महरहः शंसति"—इति। 'एवं विद्वान्' इन्द्राह्वानप्रतिपादिकेय मृगिति विद्वान्, यत्र शंसति, तस्मिन् 'एषां' यजमानानां सम्बन्धिनि 'विहवे' विशेषेणाह्वानयुक्ते यज्ञे 'अन्यः'

कश्चिच्छत्रुः इन्द्रं 'न ह' नैव 'वृङ्क्ते' वर्जयति, एतदीये यज्ञे इन्द्रागमनं निराकर्त्तुं न शक्नोतीत्यर्थः ॥

अन्यस्यारम्भणीयां विधत्ते — "यत् सोम आ सुते नर इत्यच्छावाकस्येन्द्राग्नी अजोहवुरितीन्द्राग्नी एवैतयाहरहर्निह्वयन्ते ; न हैषां विहवेऽन्य इन्द्राग्नी वृङ्क्ते यत्रैवं विद्वानच्छावाक एता महरहः शंसति"–इति । "यत्सोमः"–इत्यस्या मृचि (सं० ७, ९४.१०.) इन्द्राग्नी इति द्वितीयः पादः । अजोहवुरिति होमार्थ आह्वानार्थो वा धातुः * । अन्यत् पूर्ववद् व्याख्येयम् ॥

उक्ताना मारम्भणीयाना मृचां त्रयं प्रशंसति—"ता वा एताः स्वर्गस्य लोकस्य नावः सम्पारिण्यः, स्वर्ग मेवैताभिर्लोक मभि सन्तरन्ति"–इति । 'ताः' पूर्वोक्ताः "ऋजुनीती", "इन्द्रं वो", "यत् सोम"–इत्येतास्तिस्रः स्वर्गप्राप्तये नौस्थानीयाः, सम्यक् पारं नयन्तीति 'सम्पारिण्यः' । यथा नावा नदीं तरति, तथा 'एताभिः' ऋग्भिः स्वर्गम् 'अभि'-लक्ष्य नदीस्थानीयं प्रौढं मार्गं सम्यक् तरन्ति ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां द्वितीयाध्याये
(सप्तविंशाध्याये) तृतीयः खण्डः ॥ ३ (६) ॥

---

* "ह्वेञ् स्पर्द्धायां शब्दे च"–इति भ्वा० १००८, "हु दानादानयोः"–इति जु० १ ।

॥ अथ चतुर्थः खण्डः ॥

अथातः परिधानीया एव॑ ते स्याम देव वरुणेति॑ मैत्रावरुणस्येषं स्वश्च धीमहीत्य॑यं वै लोक॑ इष मित्यसौ लोकः॑ स्वरित्युभावेवैतया लोकावारभन्ते॑ व्यन्तरिक्ष मतिरदिति ब्राह्मणाच्छंसिनो॑ विवत्तृचं स्वर्ग मेवैभ्य॑ एतया लोकँ विवृणोति॑ मदे सोमस्य रोचना॑ इन्द्रो यदभिनद्वल मिति॑ सिषासवो वा एते यद्दीक्षितास्त॑स्मादेषा वलवती भवत्युद्गा आजदङ्गिरोभ्य आविष्कृण्वन् गुहा सतीः॑ अर्वाञ्चं नुनुदे वल मिति॑ सनि मेवैभ्य एतयावरुन्ध॑ इन्द्रेण रोचना दिव इति स्वर्गो वै लोक॑ इन्द्रेण रोचना दिवो दृळ्हानि दृंहितानि च॑ स्थिराणि न पराणुद इति॑ स्वर्ग एवैतया लोके ऽहरहः प्रतितिष्ठन्तो यन्त्या॑हं सरस्वतीवतोरित्यच्छावाकस्य॑ वाग्वै सरस्वती॑ वाग्वतोरिति हैतदाहेन्द्राग्न्योरवो वृण इ॑त्येतद्ध वा इन्द्राग्न्योः प्रियं धाम यद्वागिति॑ प्रियेणैवैनौ तद्धाम्ना समर्द्धयति॑ प्रियेण धाम्ना समृद्ध्यते य एवं वे॑द ॥ ४ (७) ॥

होतृकाणां शस्त्रारम्भणसाधनभूता ऋचो विधाय समाप्तिसाधनभूता ऋचो विधत्ते— "अथातः परिधानीया एव"–इति ।

'अथ' शस्त्रप्रारम्भानन्तरं यस्मात् 'परिधानं' समापन मपेक्षितम्, तस्मात् परिधानीया ऋचो विधीयन्ते; एवकारः प्रकृतव्यावृत्त्यर्थः॥

एकस्य होत्रकस्य परिधानीयां विधत्ते—"ते स्याम देव वरुणेति मैत्रावरुणस्येषं स्वश्च धीमहीत्ययं वै लोक इष मित्यसौ लोकः स्वरित्युभावेवैतया लोकावारभन्ते"–इति। "ते स्याम"–इत्यस्या मृचि (सं० ७. ६६. ९.) इषं स्वश्चेति तृतीयः पादः। तत्र इष मित्यनेन पदेनाभीष्टत्वादयं लोको विवक्षितः, स्वरित्यनेन पदेन 'असौ' स्वर्गो लोकः। तथा सति लोकद्वयं 'धीमहि' ध्यायेमेति मन्त्रे ऽभिधानात् 'एतया' ऋचा द्वावपि लोकौ 'आरभन्ते' प्राप्नुवन्ति॥

अन्यस्य परिधानीयां विधत्ते—"व्यन्तरिक्ष मतिरदिति ब्राह्मणाच्छंसिनो विवत्तृचं स्वर्गं मेवैभ्य एतया लोकं विवृणोति"–इति। यस्मिंस्तृचे "व्यन्तरिक्षम्"–इत्यृगेषा (सं० ८. १४. ७.) श्रूयते, सोऽयं विशब्दयुक्तत्वात् 'विवत्तृच'-शब्देनाभिधीयते। तेन तृचेन साध्यो यः स्वर्गो लोकः, तम् 'एतया' व्यन्तरिक्ष मित्यृचा यजमानेभ्यो 'विवृणोति' विवृतद्वारं करोति। तस्या मृचि द्वितीय-तृतीयपादौ पठति—"मदे सोमस्य रोचना, इन्द्रो यदभिनद्वल मिति"–इति। तस्या ऋचो ऽय मर्थः— इन्द्रो देवः सोमस्य 'रोचना' रुचिं प्राप्येति शेषः। ततो 'मदे' हर्षे सति अन्तरिक्षं 'व्यतिरत्' विशेषेण यजमानानां गमनयोग्य मकरोत्। 'यद्' यस्मात् कारणात् वलनामान मसुरम् 'अभिनत्' विदारितवान्, तस्मादन्तरिक्षमार्गः सुगमः॥

अत्र वलभेदन मभिप्रेत्य ता मृचं प्रशंसति— "सिषासवो वा एते यद् दीक्षितास्तस्मादेषा वलवती भवति"–इति। ये

दीक्षिताः सन्ति, ते 'सिषासवः' लुब्धकामाः फलार्थिनः। तस्मात् कारणाद्गेषा 'वलवती' वलनामकासुरभेदप्रतिपादिका कर्त्तव्या भवति। यद्यपीय मृक् परिधानीया न भवति, तथापि एतदादिके तृचेऽन्तिमाया ऋचः परिधानीयत्वात् तत्प्रदर्शनाय तृच उपक्रान्तः॥

तस्मिन् प्रथमा मृच मनूद्य व्याख्याय, द्वितीया मृच मनूद्य व्याचष्टे—"उद्गा आजदङ्गिरोभ्य आविष्कृण्वन् गुहा सतीः, अर्वाञ्चं नुनुदे वल मिति (ऋ० ८.१४.८.); सनि मेवैभ्य एतयावरुन्धे"—इति। 'अङ्गिरोभ्यः' महर्षिभ्यः 'सतीः' विद्यमानाः गाः 'उदाजत्' ऊर्द्धं प्रेरितवान्। किं कुर्वन्? 'गुहा' वलस्यासुरस्य सम्बन्धि गूढं स्थानम् 'आविष्कृण्वन्' प्रकटीकुर्वन् 'अर्वाञ्चम्' अतिनीचं वलनामक मसुरं 'नुनुदे' विनाशितवान्। अय मर्थः—वलनामा कश्चिदसुरो महर्षीणां गाः अपहृत्य कस्मिंश्चिद् बिले ऽवस्थाप्य पाषाणेन बिलद्वार माच्छाद्यावस्थितः। तं वृत्तान्त मिन्द्रो ऽवगत्य, गुहाद्वार मुद्घाट्य, वलनामान मसुर मपनुद्य, तत्रावस्थिता महर्षीणां गाः बिलादुद्धृत्य, महर्षिभ्यो दत्तवानिति। अय मर्थः शाखान्तरे विस्पष्ट माम्नायते—"इन्द्रो वलस्य बिल मपौर्णोत्, स य उत्तमः पशुरासीत्, तं पृष्ठं प्रति सङ्गृह्योदक्खिदत्, तꣳसहस्रं पशवो ऽनूदायन्त्स उन्नतोऽभवत्"—इति (तै० सं० २. १. ५. १.) *। 'एतया' तृचगतया द्वितीयर्चा 'सनि मेव' लाभ मेवैभ्यः 'अवरुन्धे' सम्पादयति †॥

अथ तृतीया मृचं परिधानीयां विवक्षुः प्रथम पाद मनूद्य

---

* "असुराणां वै वलस्तमसा प्रावृतो ऽश्मापिधान आसीत्"—इति ता० ब्रा० १९. ७. १।

† इह वलविलशब्दावुभावेवान्त्यस्थादिः ख-ग-पुस्तकयोः; वर्ग्यादिः घ-पुस्तके।

व्याचष्टे—"इन्द्रेण रोचना दिव इति (सं० ८. १४. ९.); स्वर्गो वै लोक इन्द्रेण रोचना दिवः"–इति। 'दिवः' स्वर्गविशेषाः 'इन्द्रेण' देवेन 'रोचना' रोचमानाः दीप्तियुक्ताः, कृता इति शेषः। अनेन पादेन स्वर्गलोकवर्णनं विवक्षितम्; इन्द्रेणेत्यादिकस्यार्थस्य तत्र विद्यमानत्वात् ॥

द्वितीयतृतीयपादावनुवदति— "दृळ्हानि दृंहितानि च, स्थिराणि न पराणुद इति"–इति। तस्मिन् स्वर्गे यानि 'दृळ्हानि' प्रकाशरूपाणि नक्षत्राणि, यानि च पूर्वं मदृढान्यपि 'दृंहितानि' इन्द्रेण दृढीकृतानि, तानि सर्वाण्यपि स्थिराणि कृत्वा 'न पराणुदे' इन्द्रो न विनाशितवान्। "स्वर्ग एवैतया लोके ऽहरहः प्रतितिष्ठन्तो यन्ति"-इति। अस्यामृचि स्थिराणां स्वर्गस्थानानां नक्षत्रादिशरीराणां श्रूयमाणत्वादेतयर्चा परिधाने सति प्रतिदिनं स्वर्ग एव लोके प्रतिष्ठां प्राप्नुवन्तो 'यन्ति' वर्त्तन्ते ॥

अन्यस्य परिधानीयां विधत्ते— "आहं सरस्वतीवतोरित्यच्छावाकस्य; वाग्वै सरस्वती, वाग्वतोरिति हैतदाहेन्द्राग्न्योरवो वृण इत्येतद्ध वा इन्द्राग्न्योः प्रियं धाम यद्वागिति, प्रियेणैवैनौ तद् धाम्ना समर्द्धयति"–इति। आह मित्यादिः प्रथमः पादः, इन्द्राग्न्योरित्यादिः द्वितीयः पादः। तस्यार्द्धर्चस्याय मर्थः—'अहम्' अनुष्ठाता 'सरस्वतीवतोः' सरस्वतीयुक्तयोरिन्द्राग्न्योर्देवयोः सम्बन्धि यत् 'अवः' सुरक्षितं स्थान मस्ति, तत् 'आवृणे' सर्वतः प्रार्थयति। अत्र प्रथमपादे सरस्वतीशब्देन वेदशास्त्रस्वरूपा वागेव विवक्षिता; अतः 'सरस्वतीवतोरिति' एवंरूपो मन्त्रो 'वाग्वतोरिति' एत मेवार्थ माह। द्वितीयपादे त्ववःशब्देन सुरक्षित मिन्द्राग्निदेवतयोः यत् प्रियं धाम विवक्षितं, तद् वाग्रूप मेव; वाग्व्यवहारे तयो-

रत्यन्तप्रीतिमत्त्वात्। तस्मादेता मृचं * पठन्नेव त्विन्द्राग्नी प्रियेणैव 'धाम्ना' स्थानेनैव 'समर्द्धयति' समृद्धौ करोति॥ वेदनं प्रशंसति— "प्रियेण धाम्ना समृद्ध्यते य एवं वेद"—इति॥ ४॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां द्वितीयाध्याये
(सप्तविंशाध्याये) चतुर्थः खण्डः॥ ४ (७)॥

॥ अथ पञ्चमः खण्डः ॥

उभय्यः परिधानीया भवन्ति होत्रकाणां॑ प्रातःसवने च माध्यन्दिने चा॑हीनाश्चैकाहिकाश्च॑ तत ऐकाहिकाभिरेव॑ मैत्रावरुणः परिदधाति॑ तेनास्माल्लोकान्न प्रच्यवते॑ऽहीनाभिरच्छावाकः॑ स्वर्गस्य लोकस्याप्त्या॑ उभयीभिर्ब्राह्मणाच्छंसी॑ तेनो स उभौ व्यन्वारभमाण ए॑तीमं चामुं च लोक॑ मथो मैत्रावरुणं चाच्छावाकं चा॑थो अहीनं चैकाहं चा॑थो संवत्सरं चाग्निष्टोमं॑ चैव मु स उभौ व्यन्वारभमाण ए॑त्यथ तत ऐकाहिका एवं॑ तृतीयसवने होत्रकाणां॑ परिधानीया भवन्ति॑ प्रतिष्ठा वा एकाहः॑ प्रतिष्ठाया मेव तद्यज्ञ मन्ततः प्रतिष्ठापयन्त्य॑नवानं प्रातःसवने

---

* "आहं सरस्वतीवतोरिन्द्राग्न्योरवो वृणे। याभ्यां गायत्र मृच्यते"—इति सं० ८. ३८. १०।

यजेदेकां ह न स्तोम मतिशंसेत् तद्यथाभिह्रेषते * पिपासते क्षिप्रं प्रयच्छेत्तादृक्तद्यथो क्षिप्रं देवेभ्यो ऽन्नाद्यं सोमपीथं प्रयच्छानीति क्षिप्रं हास्मिंल्लोके † प्रतितिष्ठत्यपरिमिताभिरुत्तरयोः सवनयोरपरिमितो वै स्वर्गो लोकः स्वर्गस्य लोकस्याप्त्यै कामं तद्धोता शंसेद्यद्धोत्रकाः पूर्वेद्युः शंसेयुर्यद्वा होता तद्धोत्रकाः प्राणो वै होताङ्गानि होत्रकाः समानो वा अयं प्राणोऽङ्गान्यनु सञ्चरति तस्मात् तत्कामं होता शंसेद् यद्धोत्रकाः पूर्वेद्युः शंसेयुर्यद्वा होता तद्धोत्रकाः सूक्तान्तैर्होता परिदधदेत्यथ समान्य एव तृतीयसवने होत्रकाणां परिधानीया भवन्त्यात्मा वै होताङ्गानि होत्रकाः समाना वा इमेऽङ्गाना मन्तास्तस्मात्समान्य एव तृतीयसवने होत्रकाणां परिधानीया भवन्ति भवन्ति ॥ ५ (८) ॥

॥ इत्यैतरेयब्राह्मणे षष्ठपञ्चिकायां द्वितीयोऽध्यायः ॥२॥

अथ परिधानीयां स्तोतु मुपक्रमते— "उभय्यः परिधानीया भवन्ति होत्रकाणां,— प्रातस्सवने च माध्यन्दिने चाहीनाश्चैकाहिकाश्च"—इति । 'होत्रकाणां' मैत्रावरुणब्राह्मणाच्छंस-

---

* "हैषते" ग ।

† "हास्मिंलोके", "हास्मिन् लोके", "हास्मिल्लोके"—इति पाठाश्च पूर्वपूर्ववत् ।

च्छावाकानां [*] सवनद्वये परिधानीया द्विविधा भवन्ति। कथम्? तदुच्यते—'अहीनाः' अहर्गणेषु विहिताः, 'ऐकाहिकाः' एकाहे प्रकृतिरूपे विहिताः; इत्येवं द्वैविध्यम् [†] ॥

तत्र होत्रकविशेषस्य परिधानीयाविशेषं दर्शयति— "तत्र ऐकाहिकाभिरेव मैत्रावरुणः परिदधाति; तेनास्माल्लोकान्न प्रच्यवते"–इति। ततस्तासूभयविधासु मैत्रावरुणाख्यर्त्विगैकाहिकाभिरेव परिदध्यात्। "ते स्याम देव वरुण"–इति (सं० ७.६६.९.) प्रकृतौ प्रातस्सवने मैत्रावरुणस्य परिधानीया विहिता [‡]; माध्यन्दिनसवने "नू ष्टुत इन्द्र नू गृणानः"–इत्येषा (सं० ४.१६.२१.) विहिता [§]। अहीने विकृतिरूपे ऽपि सवनद्वये तदेव परिधानीयाद्वयं मैत्रावरुणस्य द्रष्टव्यम्। कथ मिति, तदुच्यते— अहर्गणस्य प्रातस्सवने हि मैत्रावरुणस्य "प्रति वां सूर उदिते"–इत्यस्य (सं० ७.६६.७–९.) पर्य्यायतृचस्यान्त्या, "ते स्याम देव वरुण"–इत्येषा (सं० ७. ६६.९.) परिधानीया; ऐकाहिकापि सैव परिधानीया भवति। तथाहि प्रकृतौ मैत्रावरुणस्य "प्र मित्रयोर्वरुणयोरिति नवायातं मित्रावरुणेति याज्या"–इति-

---

[*] 'अस्मिन् शास्त्रे मुख्यवर्जिता द्वादशर्त्विजो होत्रका इत्युच्यन्ते'–इति आश्व० श्रौ० १. २.२६. वृ०। मुख्यास्तु चत्वारः— होता, अध्वर्युः, ब्रह्मा, उद्गाता चेति (आश्व० श्रौ० ४. १. ४.)। एवं आश्व० श्रौ० ५. ६. १७. द्रष्टव्यम्। तत्र च होत्रकेषु त्रयः शस्त्रिणः। १ भा० ४४९ पृ० २ पं०, २ भा० २४२ पृ० १९ पं०, आश्व० श्रौ० ५. १०. १०. द्र०।

[†] "यस्मिन्त्स्तुवीरन् स स्तोत्रियः। यस्मिन्नृच्छः सोऽनुरूपः। एकस्तोत्रियेष्वहःसु यो ऽन्यो ऽन्तरः सो ऽनुरूपो न चेत् सर्वो ऽहर्गणः षडहो वा। ऐकाहिकस्तथा सति"–इति आश्व० श्रौ० ६. २. ५—८।

[‡] आश्व० श्रौ० ७. २. १२। २४३ पृ० ३ पं०।

[§] आश्व० श्रौ० ७. २. ९।

सूत्रकारवचनात् (आश्व० श्रौ० ५. १०. २८.) नवाना मन्त्या सैवेति ऐकाहिकाभिरेव मैत्रावरुणः परिदधातीत्येतदुपपन्नं भवति। तथा माध्यन्दिनसवनेऽपि "आ सत्यो यातु"–इत्यहीनसूक्त मिति (सं० ४. १६. १.) वक्ष्यति*। याहीनसूक्तान्त्या, साहीनस्य तत्र परिधानीया। अहीनसूक्तान्तं हि माध्यन्दिनसवने मैत्रावरुणशस्त्रम्। तस्य "नू ष्टुत इन्द्र नू गृणानः"–इत्येषान्त्या (सं० ४. १९. ११.)। तथा प्रकृतावपि सैव परिधानीया; तथाहि— "कया नश्चित्र आ भुवत्, कया त्वं न ऊत्या, कस्त मिन्द्र त्वा वसुं, सद्यो ह जात, एवा त्वा मिन्द्रोशन्नु षु णः सुमना उपाक इति याज्या"–इतिसूत्रकारवचनात् (आश्व० श्रौ० ५. १६. १.) "एवा त्वा मिन्द्र वज्रिन्नत्र"–इत्येतस्यैकादशर्चस्य (सं० ४. १९. १–११.) अन्त्या "नू ष्टुत इन्द्र नू गृणानः"–इत्येषैवेति† मैत्रावरुणस्य प्रातस्सवने माध्यन्दिनसवने च ऐकाहिकाभिः परिधान मुपपन्नं भवति। ऐकाहिकाभिरेवेत्येवकारोऽन्यत्र शङ्काव्यावृत्त्यर्थः। या ऐकाहिकाः परिधानीयास्ता एवाहर्गणे मैत्रावरुणस्य परिधानीया, न त्वन्या इत्यर्थः। यद्यपि मैत्रावरुणस्य प्रकृतौ सवनयोरुभयोः द्वे एव परिधानीये, तथापि प्रयोगबहुत्वापेक्ष मैकाहिकाभिरिति बहुवचनम्॥

मैत्रावरुणस्य प्रकृतिविकृत्योः परिधानीया मेका मुक्ता, अच्छावाकस्य प्रकृतिविलक्षणं सवनद्वये परिधानीयाद्वयं दर्शयति —"अहीनाभिरच्छावाकः स्वर्गस्य लोकस्याप्त्यै"–इति। योऽय मच्छावाकः, सोऽय महीनगताभिर्ऋग्भिः परिदध्यात्; न त्वैकाहिकाभिः। तथाहि —"आहं सरस्वतीवतोरित्यच्छावाकस्य"–इति

---

* ४ अ० २ ख० (आश्व० श्रौ० ७. ४, ९)।

† ऋगेषा बहुषु सूक्तेषु श्रुतेति धेयम्।

पूर्वस्मिन् खण्डे (२४२ पृ०) विहितत्वात् प्रातस्सवने एषा अहर्गणसम्बन्धिनी परिधानीया। ऐकाहिके तु “गोमद्धिरण्यवद्”-इत्येषैव (सं० ७. ९४. ९.) परिधानीया [*]। माध्यन्दिने त्वच्छावाकस्य “नूनं सा ते”-इत्यहर्गणगता (सं० २. ११. २१.) परिधानीया [†]; एकाहे तु “शुनं हुवेम”-इति (सं० ३. ३०. २२.) माध्यन्दिने परिधानीया [‡]। एवं सति अच्छावाकस्यैकाहिकपरिधानीयापरित्यागेनोपरितनस्याहर्गणस्य सम्बन्धिन्याः परिधानीयायाः स्वीकारः, उपरि च स्वर्गलोकप्राप्तैव सम्पद्यते ॥

अथ ब्राह्मणाच्छंसिनः परिधानीयां दर्शयति – “उभयीभिर्ब्राह्मणाच्छंसी; तेनो स उभौ व्यन्वारभमाण एतीमं चामुं च लोकमथो मैत्रावरुणं चाच्छावाकं चाथो अहीनं चैकाहं चाथो संवत्सरं चाग्निष्टोमं चैव मु स उभौ व्यन्वारभमाण एति”-इति। योऽयं ब्राह्मणाच्छंसी, सोऽय मुभयविधाभिरैकाहिकाभिरहीनगताभिश्च ऋग्भिः परिदध्यात्। प्रातस्सवने प्रकृतौ “स न इन्द्रः शिवः सखा”-इति (सं० ८. ९३. ३.) परिधानीया [§]; विकृतौ तु “इन्द्रेण रोचना दिवः”-इति पूर्वखण्डेऽभिहिता (२४२ पृ०)। माध्यन्दिनसवने प्रकृतौ विकृतौ च “एवेदिन्द्रं वृषणं वज्रबाहुम्”-इत्येकैव (सं० ७. २३. ६.) परिधानीया [‖]। एवं च सत्यस्य ब्राह्मणाच्छंसिनः प्रातस्सवनेऽच्छावाकसाम्य माध्यन्दिने सवने

---

[*] “इयं वामस्य मन्मन इति नव (सं० ७.९४.१-९.)”-इति आश्व० श्रौ० ५.१०.२८।

[†] “नूनं सा त इत्यन्त मुत्तमम्”-इति आश्व० श्रौ० ७. ४. १०।

[‡] “इच्छन्ति त्वा (सं० ३. ३०. १—२२.)”-इति आश्व० श्रौ० ७. ५. २०।

[§] “उद्घेदभीति तिस्रः (सं० ८. ९३. १-३.)”-इति आश्व० श्रौ० ५. १०. २८।

[‖] “उदु ब्रह्माणि (सं० ७.२३. १—६.)”-इति आश्व० श्रौ० ७. ४. ९।

मैत्रावरुणस्यास्यं सम्पन्नम् । 'तेनो' तेनैव, ऐकाहिकाहीनगतोभयविधशंसनेनैव 'सः' ब्राह्मणाच्छंसी भूलोकः स्वर्गलोकः 'उभौ' अपि 'व्यन्वारभमाणः' विविधं स्पृशन् 'एति' गच्छति, वर्त्तत इत्यर्थः । प्रातस्सवने प्रकृतिविकृत्योः परिधानीयाविलक्षणत्वात् लोकद्वयस्य पृथगेव स्पर्शः ; माध्यन्दिनसवने प्रकृतिविकृत्योः परिधानीयैक्याल्लोकद्वयस्य सह स्पर्शः ; इत्येवं विविधस्पर्शो 'व्यन्वारम्भण'-शब्देन विवक्षितः । 'अथो' अपि चायं ब्राह्मणाच्छंसी मैत्रावरुणं चाच्छावाकम् 'उभौ' ऋत्विजौ 'व्यन्वारभमाण एति' विविध मुपस्पृशन् वर्त्तते । कथ मिति, तदुच्यते — यथा मैत्रावरुणस्य प्रकृतिविकृत्योः परिधानीयैक्यम्, तथा ब्राह्मणाच्छंसिनोऽपि माध्यन्दिनसवने तदैक्यम् । यथाच्छावाकस्य प्रकृतिविकृत्योः परिधानीया-वैलक्षण्यम्, एवं ब्राह्मणाच्छंसिनः प्रातस्सवने तद्वैलक्षण्य मिति । यथा मैत्रावरुणाच्छावाकविषयोऽयं विविधस्पर्शः, तथैवाहीनैकाहविषयेऽपि विविधः स्पर्श ऊहनीयः । कथ मिति, तदुच्यते— प्रातस्सवने अहीनैकाहयोर्वैलक्षण्येन स्पर्शः, माध्यन्दिने सवने सादृश्येन स्पर्शः, इति उभयविधत्वम् । तथा संवत्सरं गवामयनमूलं प्रकृतिपूर्व मग्निष्टोमं च विविधं स्पृशति ; अहीनैकाहस्पर्शवदेतदुभयस्पर्शस्य योजनीयत्वात् ॥

इत्थं होत्रकाणां सवनद्वयगताः परिधानीयाः प्रशस्य तृतीयसवनगताः परिधानीयाः प्रशंसति— "अथ तत ऐकाहिका एव तृतीयसवने होत्रकाणां परिधानीया भवन्ति, प्रतिष्ठा वा एकाहः, प्रतिष्ठाया मेव तद्यज्ञ मन्ततः प्रतिष्ठापयन्ति"—इति । एकाहे मूलप्रकृतौ ज्योतिष्टोमे होत्रकाणां या एव परिधानीयाः, ता एवाहर्गणे तृतीयसवने द्रष्टव्याः । तथाहि—"आवां राजाना

विति नित्य मैकाहिकम्"–इतिवचनात् मैत्रावरुणस्य "आवां राजानौ"–इति- (सं० ७. ८४. १.) -सूक्तस्यान्त्या परिधानीया भवति। तथा ब्राह्मणाच्छंसिनोऽपि "अच्छाम इन्द्र मिति नित्य मैकाहिकम्"–इतिवचनात् (आश्व० श्रौ० ८. ३. ३४.) "अच्छाम इन्द्रम्"–इति- (सं० १०. ४३. १.) -सूक्तस्यान्त्या परिधानीया भवति। तथाच्छावाकस्य "ऋतुर्जनित्रीति नित्यान्यैकाहिकानि"–इतिवचनात् (आश्व० श्रौ० ८.४.३.) "सं वां कर्मणा"–इति- (सं० ६. ६९. १.) -सूक्तस्यान्त्या परिधानीया भवति। योऽय मैकाहः, स मूलप्रकृतित्वात् 'प्रतिष्ठा' सर्वासां विकृतीना माधारः। अतस्तेनैकाहिकापरिधानीयाशंसनेन यज्ञम् 'अन्ततः' अवसानकाले 'प्रतिष्ठायां' सर्वाधारे प्रतिष्ठापयन्ति ॥

इत्थं परिधानीयाः प्रशस्य प्रातस्सवनगतानां याज्यादीनां मध्ये अवसानाभावं विधत्ते— "अनवानं प्रातःसवने यजेद्"–इति। 'अनवानम्' अनुच्छ्वासम्, उच्छ्वासो मध्ये यथा न भवति तथा याज्यां पठेत् * ॥

स्तोमवृद्धौ नियमविशेषं विधत्ते—"एकां द्वे न स्तोम मतिशंसेत्; तद्यथाभिहेषते पिपासते क्षिप्रं प्रयच्छेत्, तादृक्तद्यथो क्षिप्रं देवेभ्योऽन्नाद्यं सोमपीथं प्रयच्छानीति; क्षिप्रं हास्मिंल्लोके प्रतितिष्ठति"–इति। त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशादयः स्तोमा विहिताः। विहितस्य सप्तदशस्तोमस्य विवृद्ध्या अष्टादशादयः स्तोमा निष्पाद्यन्ते। तथाहि विहितस्यैकविंशस्य विवृद्ध्या द्वाविंशादयः स्तोमाः सम्पाद्यन्ते। अनेनैव दृष्टान्तेन शंसनेऽप्या-

---

* १ भा० ३६७ पृ०, २ भा० १६० पृ०। आश्व० श्रौ० ५. १. ४, ५।

धिक्यं प्रसक्तम् ; “यथा वाव स्तोत्र मेवं शस्त्रम्”–इतिन्यायात् * । सन्ति तत्र प्राकृताः स्तोमाः ; स्तोमे वर्द्धमाने सति तां स्तोमगता मृक्सङ्ख्या मतिक्रम्य शंसनं तदतिशंसनं यदा क्रियते, तदानी मेकस्या द्वयोर्वा ऋचोरभ्यनुज्ञाने त्वधिकाना मृचा * * * । अक्षरार्थस्तु— यदा ‘स्तोम मतिशंसेत्’ स्तोमसङ्ख्या मतिक्रम्य शंसनं कुर्य्यात्, तदानी मेकां द्वे नातिक्रम्य शंसेत्, किं त्वेकयैव वा द्वाभ्या मेव वातिशंसेत् । तथाच सूत्रकार आह— “अतिशंसन मेकया द्वाभ्यां वा प्रातस्सवने”–इति (आश्व० श्रौ० ६. १२. ४.) † । ततोऽधिकानां शंसनाभावे युक्तिर्दृष्टान्तमुखेनोच्यते, अत्रायं दृष्टान्तो ऽवगन्तव्यः । यथा लोके ‘अभिहेषते’ घासार्थ माभिमुख्येन ‘हेषा’-शब्दं कुर्वते ऽश्वाय वा, ‘पिपासते’ अत्यन्ततृषार्त्ताय पुरुषाय वा ‘अन्नाद्यं’ पानीयं क्षिप्रं प्रयच्छेत्, तादृगेव ‘तत्’ ऋग्बाहुल्याभावेनातिशंसनम् । ‘अथो’ अपि च क्षिप्र मेव देवेभ्यः सोमपानरूप मन्नाद्यं प्रयच्छतीत्यभिप्रेत्य ऋग्बाहुल्येन विलम्ब मकृत्वा एकया द्वाभ्यां वा अतिशंसनं कुर्य्यात् । तथा सति ‘क्षिप्रं’ शीघ्र मेवास्मिन् लोके प्रतिष्ठितो भवति ॥

सवनान्तरयोरुक्तवैपरीत्यं विधत्ते—“अपरिमिताभिरुत्तरयोः सवनयोरपरिमितो वै स्वर्गो लोकः स्वर्गस्य लोकस्याप्त्यै”–इति ‡ । इयत्य एवेत्येवं नियमरहिताभिर्बह्वीभिर्ऋग्भिरतिशंसनं सवनद्वये कुर्य्यात्; स्वर्गलोकस्येयत्तारहितत्वात्, तस्य लोकस्य प्राप्त्यर्थ मिद मतिशंसनं सम्पद्यते ॥

---

* १ भा० ४५१ पृ० १ पं० । “यद्वाव स्तोत्रं तच्छस्त्रं, यासु ह्येव स्तुवते ता एवानुशंसति”–इति शत० ब्रा० ८.१.३.४ । “स्तोत्र मग्रे शस्त्रात्”–इति च आश्व० श्रौ० ५.१०.१ ।

†, ‡ “अपरिमिताभिरुत्तरयोः सवनयोः”–इति च तदुत्तरसूत्रम् । साङ्ख्या० श्रौ० १२.२.१६ ।

यत्रातिशंसनं कर्त्तव्यं भवति, तत्र तदर्थ मृचा मागमनं कर्त्तव्यम् ; तासा मृचां देशविशेषं दर्शयति—"कामं तद्धोता शंसेद्यद्धोत्रकाः पूर्वेद्युः शंसेयुर्यद्वा होता तद्धोत्रकाः ; प्राणो वै होताङ्गानि होत्रकाः ; समानो वा अयं प्राणोऽङ्गान्यनुसञ्चरति ; तस्मात्तत्कामं होता शंसेद्धोत्रकाः पूर्वेद्युः शंसेयुर्यद्वा होता तद्धोत्रकाः"–इति । अहर्गणेषु वर्तमानदिनात् 'पूर्वेद्युः' मैत्रावरुणादयो 'होत्रकाः' 'यत्' सूक्तं शंसेयुः, तदेव सूक्तं परेद्युर्होता 'कामम्' अविशङ्कयैव शंसेत् ; — यदि होतुरतिशंसनं प्रसक्तम्, तदानीं पूर्वेद्युर्होत्रकैः शस्तात् सूक्तादृच आनेतव्याः ; यदि तु होत्रकाणा मतिशंसनं प्रसक्तम्, तदानीं पूर्वेद्युर्होता यत् सूक्तं शंसति, तस्मात् सूक्ताद्धोत्रकैरपेक्षिता ऋच आनेतव्याः । होतुः प्राणस्थानीयत्वाद्धोत्रकाणां हस्तपादाद्यवयवस्थानीयत्वात् परस्परसूक्तादृगानयने सत्ययं प्राणः सर्वेष्ववयवेषु पक्षपात मन्तरेण तुल्य एवानुसञ्चरति । "तस्मात्तत्कामम्"–इति उक्तार्थोपसंहारः ॥

इत्थं परिधानीयाप्रसङ्गेन बुद्धिस्थयाज्याया अनवानत्व मतिशंसनं च निर्णीय, अथ प्रकृत मेव परिधानीयास्तुति मनुसरति—"सूक्तान्तैर्होता परिदधदेत्यथ समान्य एव तृतीयसवने होत्रकाणां परिधानीया भवन्त्यात्मा वै होताङ्गानि होत्रकाः समाना वा इमेऽङ्गाना मन्तास्तस्मात् समान्य एव तृतीयसवने होत्रकाणां परिधानीया भवन्ति भवन्ति"–इति । सूक्ताना मन्तिमा ऋचः 'सूक्तान्ताः' ताभिर्ऋग्भिर्होता 'परिदधत्' शस्त्रसमापनं कुर्वन् अतिवर्त्तते । 'अथ' होतुरनन्तरं होत्रकाणा मुच्यते,— तेषां तृतीयसवने परिधानीयाः 'समान्यः' तुल्या एव भवन्ति । एकाहे याः परिधानीयाः, ता एवाहर्गणेषु भवन्ति । तथाच पूर्व मुक्तम् —

"ऐकाहिका एव तृतीयसवने"–इति (२५१ पृ०), तदेवात्र होत्रा सह प्रशंसार्थ मनूद्यते । योऽयं होता, सोऽयम् 'आत्मा वै' देह एव; होत्रकास्तु हस्तपादाद्यवयवाः, तेषां च हस्तादीनामन्ताः 'समानाः' तुल्या एव दृश्यन्ते । दक्षिणहस्तस्यान्तो यादृशः, पञ्चाङ्गुल्युपेतः, तादृश एव वामहस्तस्यान्तोऽपि । एवं पादयोः, स्तनकर्णादियुग्मयोस्तुल्यान्तत्वं द्रष्टव्यम् । "तस्मात् समान्य एव"–इत्युपसंहारः ॥

पदाभ्यासोऽध्यायसमाप्त्यर्थः ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां द्वितीयाध्याये
(सप्तविंशाध्याये) पञ्चमः खण्डः ॥ ५ (८) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'नामभाष्ये
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायाः द्वितीयाध्यायः ॥

॥ अथ तृतीयाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ॐ॥ आ त्वा वहन्तु हरय इति प्रातःसवनं उन्नीयमानेभ्यो ऽन्वाह वृषण्वतीः पीतवतीः सुतवतीर्मद्वती रूपसमृद्धा ऐन्द्रीरन्वाहैन्द्रो वै यज्ञो गायत्रीरन्वाह गायत्रं वै प्रातःसवनं नव न्यूनाः प्रातःसवने ऽन्वाह न्यूने वै रेतः सिच्यते दश मध्यन्दिने ऽन्वाह न्यूने वै रेतः सिक्तं मध्यं स्त्रियै * प्राप्य स्थविष्ठं भवति नव न्यूनास्तृतीयसवने ऽन्वाह न्यूनाद्वै प्रजाः प्र जायन्ते तद्यदेतानि केवलसूक्तान्यन्वाह यजमानमेव तद्गर्भं भूतं प्र जनयति यज्ञाद्देवयोन्यै ते हैके सप्त-सप्तान्वाहुः सप्त प्रातःसवने सप्त माध्यन्दिने सप्त तृतीयसवने यावत्यो वै पुरोनुवाक्यास्तावत्यो याज्याः सप्त वै † प्राञ्चो यजन्ति सप्त वषट् कुर्वन्ति तासामेताः पुरोनुवाक्या इति वदन्तस्तत् तथा न कुर्याद्यजमानस्य ह ते रेतो विलुम्पन्त्यथो यजमानमेव यजमानो हि सूक्तं नवभिर्वा एतं मैत्रावरुणो

---

* "स्त्रियं" क ।

† "वै" क–पुस्तके नास्ति ।

ऽस्माल्लोकादन्तरिक्षलोक मभि प्र वहति॑ दशभिरन्तरिक्षलोकादमुं लोक॑ मध्यन्तरिक्षलोको हि ज्येष्ठो᳚ नवभिरमुष्माल्लोकात् स्वर्गं लोक मभि॑ न ह वै ते यजमानं॑ स्वर्गं लोक मभि वोळ्हु मर्हन्ति॑ ये सप्त-सप्तान्वाहु॑स्तस्मात् केवलश एव सूक्तान्यनुब्रूयात्॑ ॥ १ (९) ॥

प्रातस्सवने होत्रकशस्त्राण्यनुरूपो
यस्मिन्नेव स्तुवते स्तोत्रिय एषः ।
आरम्भाद्या आहवनीयाः परिधानीया
वृद्धे स्तोमे स्यादतिशंसार्थस्तृचश्च ॥ १ ॥

अथोन्नीयमानसूक्तानि * विधातु मुपक्रमते—“आ त्वा वहन्तु हरय इति प्रातस्सवन उन्नीयमानेभ्यो ऽन्वाह ; वृषण्वतीः पीतवतीः सुतवतीर्मद्वती रूपसमृद्धाः”–इति । यदा चमसा ‘उन्नीयन्ते’ सोमेन पूर्यन्ते, तदानी मध्वर्युणा प्रेषितो मैत्रावरुणः “आ त्वा वहन्तु”–इति (सं० १. १६. १—९.) सूक्त मनुब्रूयात् । तस्मिन् सूक्ते स्थिता ऋचो वृषशब्देन पीतशब्देन सुतशब्देन मदशब्देन च युक्ताः । तत्र द्वितीयपादे “वृषणं सोमपीतये”–इति वृषशब्द-पीतशब्दौ विद्येते ; चतुर्थ्यां मृचि “सुते हि त्वा हवामहे”–इतिश्रवणात् सुतशब्दो विद्यते ; अष्टमाया मृचि “इन्द्रो मदाय गच्छति”–इति मदशब्दो विद्यते । यद्यप्येते शब्दाः सर्वास्वृक्षु न

---

* “उन्नीयमानेभ्यो ऽन्वाहा त्वा वहन्त्वसावि देव मिहोपयातेत्यनुसवनम्”–इति आश्व० श्रौ० ५. ५. १. । तानि च सूक्तानीह प्रथमतृतीयचतुर्थखण्डैर्विधीयन्ते ।

सन्ति, तथापि क्वचिच्छ्रवणात् सर्वा अपि छत्रिन्यायेन तैः शब्दैर्युक्ता भवन्ति। वर्षणक्षम इन्द्रः सोमं पीत्वा माद्यतीत्यस्यार्थस्योक्तशब्दचतुष्टयेन प्रतीयमानत्वात् विवक्षितार्थानुकूल्येन रूपसमृद्धत्वम् ॥

देवताद्वारा ता ऋचः प्रशंसति— "ऐन्द्रीरन्वाहैन्द्रो वै यज्ञः"—इति। "इन्द्र त्वा सूरचक्षसः"—"इन्द्रं सुखतमे रथे"—इतिश्रवणात् [*] इन्द्रदेवताका ऋचः; सोमयागश्चेन्द्रदेवताकः [†]; अतस्तत्र ता युज्यन्ते ॥

छन्दोद्वारा प्रशंसति— "गायत्रीरन्वाह; गायत्रं वै प्रातस्सवनम्"—इति। प्रातस्सवनस्य गायत्रीच्छन्दस्कत्वात् तच्छन्दस्का ऋचः तत्र योग्याः ॥

ऋक्सङ्ख्याद्वारा प्रशंसति— "नव न्यूनाः प्रातस्सवनेऽन्वाह; न्यूने वै रेतः सिच्यते"—इति। मध्यन्दिनसवने दशसङ्ख्याका वक्ष्यन्ते (२ ख०); तां सङ्ख्या मपेक्ष्यात्र या नव सङ्ख्याकास्ता एकयर्चा न्यूनाः; लोकेऽपि 'न्यूने' स्वल्पे गर्भस्थाने रेतः सिच्यते। अतो न्यूनत्व मत्र युक्तम् ॥

अथ माध्यन्दिने सवने "असावि देवङ्गोऋजीक मन्धः"—इत्येतत्सूक्तगता दशसङ्ख्याका ऋचो (सं० ७. २१. १—१०.) विधत्ते —"दश मध्यन्दिनेऽन्वाह; न्यूने वै रेतः सिक्तं मध्यं स्त्रियै प्राप्य स्थविष्ठं भवति"—इति। लोके स्वल्पे गर्भस्थाने सिक्तं रेतः स्त्रीशरीरस्य [‡] मध्यस्थानं प्राप्य गर्भरूपेण 'स्थविष्टम्' अतिस्थूलं

---

[*] सं० १. १६. १, २। "द्विदेवत्यैश्चरन्ति"—इत्यादिः आश्व० श्रौ० ५. ५. १. द्र०।

[†] "इन्द्रः सोमस्य काणुका"—इति सं० ८. ७७. ४। निरु० ५. २. ६।

[‡] मूले 'स्त्रियै'—इति पद मस्ति; तस्यैवार्थोऽयम्। षष्ठ्यर्थे चतुर्थी (पा० २. ३. ६२. वा०)।

भवति। अतो रेतस्सेकस्थानीयायाः ऋचो गर्भस्थानीयायाः सङ्ख्याधिक्यं युक्तम्[*] ॥

तृतीयसवने "इहोपयात शवसो नपातः"–इत्येतत्सूक्तगता नवसङ्ख्याका ऋचो (सं० ४. ३५. १–९.) विधत्ते— "नव न्यूनास्तृतीयसवने ऽन्वाह; न्यूनाद्वै प्रजाः प्र जायन्ते"–इति। पूर्ववद् दशसङ्ख्यापेक्षयात्र न्यूनत्वम्। लोके हि 'न्यूनाद्' अल्पाद् योनिद्वारात् प्रौढ़ाः प्रजा उत्पद्यन्ते; अतो गर्भोत्पादनार्थं मत्र न्यूनत्वं युक्तम्[†] ॥

एतेषु सूक्तेषु मतद्वय मस्ति। सम्पूर्णसूक्तानुवन मित्येकं मतम्, प्रतिसूक्तं सप्ताना मेवर्चा मनुवचनत्व मिति द्वितीयं मतम्। तत्र प्रथमं मतं प्रशंसति— "तद्यदेतानि केवलसूक्तान्यन्वाह, यजमान मेव तद्गर्भं भूतं प्र जनयति यज्ञाद्देवयोन्यै"–इति। 'केवल'-शब्दः सम्पूर्णवाची। तदनुवचनेन सम्पूर्णगर्भं प्राप्तं यजमान मेव यज्ञरूपाद् 'देवयोन्यै' देवसम्बन्धियोनिस्थानादुत्पादयति। अतः सम्पूर्णानुवचनं युक्तम् ॥

द्वितीयं मतं दर्शयति—"ते हैके सप्त-सप्तान्वाहुः,—सप्त प्रातस्सवने, सप्त माध्यन्दिने, सप्त तृतीयसवने, यावत्यो वै पुरोनुवाक्यास्तावत्यो याज्याः; सप्त वै प्राञ्चो यजन्ति, सप्त वषट् कुर्वन्ति, तासा मेताः पुरोनुवाक्या इति वदन्तः"–इति। 'ते' प्रसिद्धा ऋत्विजः 'एके' केचित् तत्तद्यज्ञेषु यथोक्तसूक्तगता ऋचः प्रतिसूक्तं सप्तसङ्ख्याका एवान्वाहुः, न तु सम्पूर्णसूक्तानि। तस्यैव व्याख्यानं "सप्त प्रातस्सवने"–इत्यादि। "यावत्यः"–इत्यादिना तदीया

---

[*] द्वितीयतृतीययोः खण्डयोः द्रष्टव्यम् (आश्व० श्रौ० ५. ५. १४.)।

[†] द्वितीयचतुर्थयोः खण्डयोः द्रष्टव्यम् (आश्व० श्रौ० ५. ५. १४.)।

युक्तिरुच्यते। पुरोनुवाक्यानां याज्यानां च सङ्ख्या प्रायेण समानैव दृश्यते। तथा सत्यत्र 'सप्त' सप्तसङ्ख्याका ऋत्विजः— होता, मैत्रावरुण, ब्राह्मणाच्छंसी, नेष्टा, पोता, आग्नीध्रः, अच्छावाकश्चेत्येते [*] प्राङ्मुखाः 'यजन्ति' याज्याः पठन्ति। तस्यैव व्याख्यानं "सप्त वषट् कुर्वन्ति"-इति। 'तासां' सप्तभिः पठ्यमानानां याज्यानाम् 'एताः' सूक्तगताः सप्तसङ्ख्याका ऋचः पुरोनुवाक्या भवन्तीति। एके तादृशीं युक्तिं वदन्तः सप्त-सप्तान्वाहुरित्यन्वयः॥

तदिदं मतं दूषयति— "तत् तथा न कुर्याद्; यजमानस्य ह ते रेतो विलुम्पन्त्यथो यजमान मेव; यजमानो हि सूक्तम्"-इति। सप्त-सप्तेति यन्मतम्, तत्तथा न कुर्यात्। 'ते' सप्तसङ्ख्यावादिनः सम्पूर्णसूक्ताभावाद्यजमानस्य प्रजोत्पादकं 'रेतः' विनाशयन्ति। 'अथो' अपिच यजमान मेव विनाशयन्ति। सूक्तस्य यजमानरूपत्वेन सम्पूर्णसूक्तविलोप एव यजमानविलोपः॥

परमते दोषं दर्शयित्वा स्वमते गुणं दर्शयति— "नवभिर्वा एतं मैत्रावरुणो ऽस्माल्लोकादन्तरिक्षलोक मभि प्र वहति; दशभिरन्तरिक्षलोकादमुं लोक मभ्यन्तरिक्षलोको हि ज्येष्ठो नवभिरमुष्माल्लोकात् स्वर्गं लोक मभि"-इति। प्रथमसूक्तगताभिर्ऋग्भिः 'नवभिः' [†] 'एतं' यजमानं भूलोकादन्तरिक्षलोकम् 'अभि'लक्ष्य नयति। द्वितीयसूक्तगताभिः 'दशभिः' [‡] ऋग्भिरन्तरिक्षलोकाद्

---

[*] "आग्नीध्रीयं पूर्वम्। सिकतास्वोपरि रौद्रेणेति सर्वत्र। षट् सदसि। प्रत्यङ्मुखो द्वार मपरेण होतुः। दक्षिणपूर्वेणौदुम्बरीं मैत्रावरुणस्य। होतृधिष्ण्य मुत्तरेण चतुरः समान्तरान् ब्राह्मणाच्छंसि-पोतृ-नेष्ट्रच्छावाकानाम्"-इति कात्या० श्रौ० ८, ६, १९—२१।

[†] प्रातस्सवने "आ त्वा वहन्तु"-इति नवर्चं सूक्तं विहितम् प्रथमखण्डे (२५७पृ०)।

[‡] माध्यन्दिने सवने "असावि देवम्"-इति दशर्चं सूक्तं विधास्यते तृतीयखण्डे।

'अमुं लोकं' नाकपृष्ठाख्यं लोकम् 'अभि'लक्ष्य नयति। अन्तरिक्षस्य यः समीपवर्त्ती स्वर्गभागः, स नाकपृष्ठाख्यो लोकः; स च प्रवृद्धादन्तरिक्षाद्* 'ज्येष्ठः' अतिप्रवृद्धः; तं दशभिः प्राप्य तस्मान्नाकपृष्ठाख्याद् 'अमुष्मात्' स्वर्गाल्लोकादुपरितनं बहुभोगयुक्तं 'स्वर्गं लोकं' तृतीयसूक्तगताभिः 'नवभिः'† ऋग्भिर्यजमानमभि वहति ॥

स्वमते गुणान् दर्शयित्वा तद्राहित्यं परमते दर्शयति— "न ह वै ते यजमानं स्वर्गं लोक मभि वोळ्हु मर्हन्ति, ये सप्त-सप्तान्वाहुः"–इति। 'ये' पूर्वपक्षिणः प्रतिसूक्तं सप्तसङ्ख्याका एवान्वाहुः, 'ते' सङ्ख्यान्यूनत्वात् पूर्वोक्तरीत्या स्वर्गं प्रति यजमानं वोढुं नार्हन्ति ॥

स्वमतं निगमयति— "तस्मात् केवलश एव सूक्तान्यनुब्रूयात्"–इति। 'केवलशः' प्रतिसूक्तं सम्पूर्ण मेवेत्यर्थः ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां तृतीयाध्याये
(अष्टाविंशाध्याये) प्रथमः खण्डः ॥ १ (८) ॥

॥ अथ द्वितीयः खण्डः ॥

अथाह यदैन्द्रो वै यज्ञो ऽथ कस्माद् द्वावेव प्रातःसवने प्रस्थितानां प्रत्यक्षादैन्द्रीभ्यां यजती

---

* अन्तरिक्षशब्द इह सर्वत्र दीर्घमध्यः ख-ग पुस्तकयोः।

† तृतीयसवने "इहोपयात"–इति नवर्चं सूक्तं विधास्यते चतुर्थखण्डे।

होता चैव ब्राह्मणाच्छंसी॑ चेदं ते सोम्यं मध्विति होता यजती॑न्द्र त्वा वृषभं वय मिति ब्राह्मणाच्छंसी॑ नानादेवत्याभिरितरे॑ कथं तेषा मैन्द्र्यो भवन्तीति॑ मित्रं वयं हवामह इति मैत्रावरुणो यजति॑ वरुणं सोमपीतय इति॑ यद्वै किञ्च पीतवत् पदं॑ तदैन्द्रं रूपं तेनेन्द्रं प्रीणाति॑ मरुतो यस्य हि क्षय इति पोता यजति॑ स सुगोपातमो जन इ॑तीन्द्रो वै गोपा॑स्तदैन्द्रं रूपं तेनेन्द्रं प्रीणात्य॑ग्ने पत्नीरिहावहेति नेष्टा यजति॑ त्वष्टारं सोमपीतय इ॑तीन्द्रो वै त्वष्टा॑ तदैन्द्रं रूपं तेनेन्द्रं प्रीणात्यु॑क्षान्नाय वशान्नायेत्याग्नीध्रो यजति॑ सोमपृष्ठाय वेधस इ॑तीन्द्रो वै वेधा॑स्तदैन्द्रं रूपं तेनेन्द्रं प्रीणाति॑ प्रा॒त॒र्याव॑भि॒राग॑तं दे॒वेभि॑र्जेन्यावसू॑ इ॒न्द्राग्नी सोमपीतय इति॑ स्वयं समृद्धाच्छावाक॑स्यैव सु हैता ऐन्द्र्यो भवन्ति॑ यन्नानादेवत्या॑स्तेनान्या देवताः प्रीणाति॑ यदु गायत्र्यस्तेनाग्नेय्य॑ एतदु हैताभिस्त्रय मुपाप्नोति॑ ॥ २ (१०) ॥

अथ प्रस्थितयाज्याविषयं चोद्य मुद्भावयति— "अथाह यदैन्द्रो वै यज्ञो ऽथ कस्माद् द्वावेव प्रातस्सवने प्रस्थितानां प्रत्यक्षादैन्द्रीभ्यां यजतो होता चैव ब्राह्मणाच्छंसी चेदं ते सोम्यं

मध्विति होता यजतीन्द्र त्वा वृषभं वय मिति ब्राह्मणाच्छंसी, नानादेवत्याभिरितरे; कथं तेषा मैन्द्र्यो भवन्तीति?"—इति। 'अथ' उन्नीयमानसूक्तनिर्णयानन्तरं कश्चिद् ब्रह्मवादी चोद्यमाह। यस्मात् कारणात् यज्ञः 'ऐन्द्रो वै' इन्द्रदेवताक एव। तथैवं सति सर्वेषा मृत्विजा मिन्द्रदेवताका एव याज्या अपेक्षिताः; अत्र तु प्रस्थितसोमानां यागे प्रातस्सवनकालीने होतृब्राह्मणाच्छंसिनौ द्वावेव 'प्रत्यक्षात्' श्रोत्रप्रत्यक्षेण वा श्रूयमाणाभ्या मिन्द्रदेवताकाभ्या मृग्भ्यां यजतः; न त्वितरे। "इदं ते सोम्यम्"—इति (सं० ८. ६५. ८.) होतुर्याज्या। तस्यास्तृतीयपादे "जुषाण इन्द्र"—इति प्रत्यक्ष एवेन्द्रशब्दः श्रूयते; "इन्द्र त्वा वृषभं वयम्"—इति (सं० ३. ४०. १.) ब्राह्मणाच्छंसिनो याज्या; तत्र स्पष्ट एवेन्द्रशब्दः। 'इतरे' पञ्चर्त्विजो 'नानादेवत्याभिः' ऋग्भिर्यजन्ति; तेषा मृत्विजां ता ऋचः कथ मिन्द्रदेवताका भवन्ति? इति चोद्यम्। तत्र पञ्चाना मृत्विजां याज्यास्विन्द्रदेवताकत्वं सम्पादनीयम्॥

तत्रैकस्यां याज्यायां तत् सम्पादयति—"मित्रं वयं हवामह इति मैत्रावरुणो यजति; वरुणं सोमपीतय इति, यद्वै किञ्च पीतवत् पदं, तदैन्द्रं रूपं, तेनेन्द्रं प्रीणाति"—इति। मैत्रावरुणस्य "मित्रं वयम्"—इति (सं० १. २३. ४.) येयं याज्या, तस्या द्वितीयपादे वरुण मित्यादिकं 'पीतवत्' पिबतिधातुयुक्तं यत् किञ्चित् पद मस्ति, तदिन्द्रसम्बन्धि रूपम्; इन्द्रस्य सोमपानप्रियत्वात्। 'तेन' हि पीतवत्पदेनेन्द्रं परितोषयति॥

पोतुर्याज्याया ऐन्द्रत्वं दर्शयति— "मरुतो यस्य हि क्षय इति पोता यजति; स सुगोपातमो जन इतीन्द्रो वै गोपास्तदैन्द्रं रूपं,

तेनेन्द्रो प्रीणाति"–इति। "मरुतः"–इत्यस्यां (सं० १.८६.१.) याज्यायां तृतीयपादे 'गोपा'शब्देनेन्द्रो ऽभिधीयते। गोप्तृत्वं रक्षकत्व मिन्द्रसम्बन्धि रूपम्, तेनेन्द्रस्य प्रीतिः ॥

नेष्टुर्याज्याया ऐन्द्रत्वं सम्पादयति— "अग्ने पत्नीरिहावहेति नेष्टा यजति ; त्वष्टारं सोमपीतय इतीन्द्रो वै त्वष्टा, तदैन्द्रं रूपं, तेनेन्द्रं प्रीणाति"–इति। "अग्ने पत्नीः"–इत्यस्या याज्यायाः (सं० १. २२. ९.) तृतीयपादे यस्त्वष्टा, स एवेन्द्रः, शत्रूणां तनूकरणादिन्द्रस्य त्वष्टृत्वम् ॥

आग्नीध्रस्य याज्याया ऐन्द्रत्वं सम्पादति— "उक्षान्नाय वशान्नायेत्याग्नीध्रो यजति ; सोमपृष्ठाय वेधस इतीन्द्रो वै वेधास्तदैन्द्रं रूपं, तेनेन्द्रं प्रीणाति"–इति। "उक्षान्नाय"–इतियाज्यायाः द्वितीयपादे यो वेधाः ; स एवेन्द्रः, इन्द्रस्य जगद्व्यवस्थाविधायकत्वेन वेधःशब्दवाच्यत्वात् ॥

अच्छावाकस्य याज्यायाः ऐन्द्रत्वं सम्पादयति— "प्रातर्यावभिरागतं देवेभिर्जेन्यावसू, इन्द्राग्नीः सोमपीतय इति स्वयं समृद्धाच्छावाकस्य"–इति। हे इन्द्राग्नी! 'जेन्यावसू' जेन्यं जेतव्यं वसु धनं ययोस्तौ तादृशौ भूत्वा 'प्रातर्यावभिः' प्रातस्सवनगामिभिः 'देवेभिः' देवैः सह 'सोमपीतये' सोमपानार्थम् 'आगतम्' आगच्छतम्। अस्या मृचि 'इन्द्राग्नी'–श्रवणेऽपि इन्द्रशब्दस्य प्रत्यक्षस्य विद्यमानत्वात् स्वय मेवेन्द्रत्वाय 'समृद्धा' सम्पूर्णा ; न त्वैन्द्रत्वं सम्पादनीय मस्ति (सं० ८. ३८. ७.) ॥

ऋचां सम्पादित मैन्द्रत्वं निगमयति—"एव मु हैता ऐन्द्री भवन्ति"–इति ॥

तास्वृक्षु देवतान्तरप्रीतिं दर्शयति— "यन्नानादेवत्यास्तेनान्या

देवताः प्रीणाति"—इति। मित्रावरुणौ मरुतो ऽग्निर्वेधा इन्द्राग्नी इत्येताभिः ‘नानादेवताभिः’ युक्ता ऋचः इति यदस्ति, तेनेन्द्रव्यतिरिक्ता देवतास्तोषयति ॥

तत्रत्यं छन्दः प्रशंसति— "यदु गायत्र्यस्तेनाग्नेय्यः"—इति। अग्निगायत्र्योः प्रजापतिमुखजत्वसम्बन्धात् * गायत्रीच्छन्दस्कां तासा मग्निदेवताकत्वं सम्पद्यते ॥

उक्तां प्रशंसां निगमयति— "एतदु हैताभिस्त्रय मुपाप्नोति" —इति। ‘एताभिः ऋग्भिः’ ‘एतदु ह’ पूर्वोक्त मेव ‘त्रयं’ त्रिविधदेवतासम्बन्धत्वं प्राप्नोति। तत्र तत्र प्रतीयमाननानाविधदेवताकत्वं, पूर्वोक्तरीत्या सम्पादित मैन्द्रत्वं, गायत्रीद्वारेणाग्नेयत्वं चेति त्रयं वेदितव्यम् ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां तृतीयाध्याये
(अष्टाविंशाध्याये) द्वितीयः खण्डः ॥ २ (१०) ॥

॥ अथ तृतीयः खण्डः ॥

असावि देवं गोऋजीक मन्ध इति मध्यन्दिन॑ उन्नीयमानेभ्यो ऽन्वाह॑ वृषण्वतीः पीतवतीः॑ सुतवतीर्मद्वती रूपसमृद्धा॑ ऐन्द्रीरन्वाहै॑न्द्रो वै यज्ञ॑स्त्रिष्टुभो ऽन्वाह॑ त्रैष्टुभं वै माध्यन्दिनं सवनं॑ तदा-

---

* तै० सं० १. १. ४ (१ भा० १९५०)।

हुर्यत्तृतीयसवनस्यैवं रूपं मद्वदथ कस्मान् मध्यन्दिने मद्वतीरनु चाह यजन्ति चाभिरिति माद्यन्तीव वै मध्यन्दिने देवताः स मेव तृतीयसवने मादयन्ते तस्मान् मध्यन्दिने मद्वतीरनु चाह यजन्ति चाभिस्ते वै खलु सर्व एव माध्यन्दिने प्रस्थितानां प्रत्यक्षादैन्द्रीभिर्यजन्त्यभितृण्वतीभिरेके पिबा सोम मभि य मुग्र तर्द इति होता यजति स ईं पाहि य ऋजिषी तरुत्र इति मैत्रावरुणो यजत्येवा पाहि प्रतथा मदन्तु त्वेति ब्राह्मणाच्छंसी यजत्यर्वाङेहि सोम कामं त्वाहुरिति पोता यजति तवायं सोमस्त्व मेह्यर्वाङिति नेष्टा यजतीन्द्राय सोमाः प्र दिवो विदाना इत्यच्छावाको यजत्यापूर्णो अस्य कलशः स्वाहेत्याग्नीध्रो यजति तासा मेता अभितृण्वत्यो भवन्तीन्द्रो वै प्रातःसवने न व्यजयत स एताभिरेव माध्यन्दिनं सवन मभ्यतृणद्यदभ्यतृणत्तस्मादेता अभितृण्वत्यो भवन्ति ॥ ३ (११) ॥

अथ माध्यन्दिने उन्नीयमानसूक्तं विधत्ते— "असावि देवं गोऋजीक मन्ध इति मध्यन्दिन उन्नीयमानेभ्यो ऽन्वाह ; वृषण्वतीः पीतवतीः सुतवतीर्मद्वती रूपसमृद्धाः"–इति । माध्यन्दिने सवने अध्वर्युणा प्रेषितो "असावि देवम्"–इत्यादिकं (सं० ७. २१. १.) सूक्त मनुब्रूयात् । तत्रत्या ऋचः वृष-पीत-सुत-मद-शब्दोपेताः ।

पूर्वत्र “दश मध्यन्दिने ऽन्वाह”-इति सङ्ख्यैवोक्ता, न तु सूक्तं दर्शितम् (२५८ पृ०); अत्र त्वसावि देव मिति सूक्तं प्रदर्श्यते । अस्य सूक्तस्य द्वितीयस्या मृचि “वृषणो वृषा च”-इति वृषणच्छब्दः श्रुतः । तृतीयस्या मृचि “रथ्यो धेना”-इति धेनाशब्दः पिबतिधात्वर्थः, तेन पीतवत्त्वम् ; “धेट् पाने”-इति (भ्वा० ८०२.) हि धातुः । “असावि”-इति सुनोतिधातोः (स्वा० १.) श्रूयमाणत्वात् सुतवत्त्वम् । प्रथमाया ऋचो ऽवसाने “अन्धसो मदेषु”-इति मद्वत्त्वं श्रुतम् । रूपसमृद्धत्वं पूर्ववद्योज्यम् ॥

देवताद्वारा छन्दोद्वारा च ता ऋचः प्रशंसति— “ऐन्द्रीरन्वाहैन्द्रो वै यज्ञस्त्रिष्टुभोऽन्वाह त्रैष्टुभं वै माध्यन्दिनं सवनम्”-इति । द्वितीयपादे “अन्यस्मिन्निन्द्र”-इतिश्रवणादैन्द्रत्वम् । एव मृगन्तरेष्वप्युदाहरणीयम् ॥

माध्यन्दिनसवनस्य त्रैष्टुभत्वं प्रसिद्धम्, मद्वतीरिति यदुक्तं, तस्याक्षेप मुद्भावयति—“तदाहुर्यत् तृतीयसवनस्यैव रूपं मद्वदथ कस्मान् मध्यन्दिने मद्वतीरनु चाह यजन्ति चाभिरिति”-इति । तृतीयसवने सर्वेषां देवानां सोमपानादूर्ध्वं हर्षसम्भवान् मद्वत्त्वं तृतीयसवनस्यैव रूपम् । तथा सति मध्यन्दिने सवने मद्वतीना मृचा मनुवचनम् ‘आभिः’ मद्वतीभिर्यजनं च कस्मात् कारणादिति चोद्यम् ॥

तस्योत्तर माह— “माद्यन्तीव वै मध्यन्दिने देवताः स मेव तृतीयसवने मादयन्ते; तस्मान् मध्यन्दिने मद्वतीरनु चाह यजन्ति चाभिः”-इति । माध्यन्दिने सवनेऽपि देवानां सोमपानसद्भावात्ताः माद्यन्त्येव ; तृतीयसवने तु निरवशेषाणां देवानां सोमपानसम्पत्त्या ‘सम्मादयन्ते’ सम्भूय हृष्यन्तीत्येतावानेव विशेषः । तस्मात् ‘मोदस्य’ हर्षस्य माध्यन्दिनसवनेऽपि सद्भावात्, तत्र

'महतीः' ऋचो मैत्रावरुणोऽन्वाह। होत्रादयश्च सप्तर्त्विजः 'आभिः' महतीभिर्यजन्ति॥

अथ ताः प्रस्थितयाज्या विधत्ते— "ते वै खलु सर्व एव माध्यन्दिने प्रस्थितानां प्रत्यक्षादैन्द्रीभिर्यजन्ति"–इति। 'ते' होत्रादयः सप्तर्त्विजः सर्वेऽपि 'माध्यन्दिने' सवने प्रस्थितसोमानां सम्बन्धिनीभिः 'प्रत्यक्षात्' प्रत्यक्षेण पठ्यमानेनैवेन्द्रशब्देन प्रयुक्ताभिरिन्द्रदेवताकाभिः ऋग्भिर्यजेयुः। तेषु सप्तस्वृक्षु मध्ये होतृ-मैत्रावरुण-ब्राह्मणाच्छंसिनां त्रयाणां सम्बन्धिनीषु याज्यासु न केवल मैन्द्रत्वं किन्तु अभितृण्णवत्त्वम्॥

अपरं विशेषं दर्शयति—"अभितृण्णवतीभिरेके"–इति। अभिपूर्वस्य तृदिधातो रूपं यास्वस्ति, ताः 'अभितृण्णवत्यः'॥

तत्र होतुर्याज्यां दर्शयति— "पिबा सोम मभि य मुग्र तर्द इति (सं॰ ६. १७. १.) होता यजति"–इति। तत्राभिशब्दस्य तर्दशब्दस्य च विद्यमानत्वात् अभितृण्णवत्त्वम्॥

मैत्रावरुणस्य याज्यां दर्शयति— "स ईम्पाहि य ऋजीषी तरुत्र इति (सं॰ ६. १७. १.) मैत्रावरुणो यजति"–इति। "स ईम्पाहि"–इत्यस्या ऋचश्चतुर्थपादे अभितृण्णवत्त्वम्॥

ब्राह्मणाच्छंसिनो याज्यां दर्शयति— "एवा पाहि प्रत्नथा मन्दतु त्वेति (सं॰ ६. १७. ३.) ब्राह्मणाच्छंसी यजति"–इति। "एवा पाहि"–इत्यस्या ऋचि चतुर्थपादे "अभि गा इन्द्र तृन्धि"–इतिश्रवणादभितृण्णवत्त्वम्। एतांस्त्रीनृत्विजो ऽभिप्रेत्याभितृण्णवतीभिरेक इत्युक्तम् (१० पं॰)॥

पोतुर्याज्यां दर्शयति— "अर्वाङेहि सोमकामं त्वाहुरिति (सं॰ १. १०४. ९.) पोता यजति"–इति॥

नेष्टुर्याज्यां दर्शयति— "तवायं सोमस्त्व मेह्यर्वाङिति (सं० ३. ३५. ६.) नेष्टा यजति"–इति ॥

अच्छावाकस्य याज्यां दर्शयति— "इन्द्राय सोमाः प्र दिवो विदाना (सं० ३. ३६. २.) इत्यच्छावाको यजति"–इति ॥

आग्नीध्रस्य याज्यां दर्शयति—"आ पूर्णो अस्य कलशः स्वाहेत्याग्नीध्रो (सं० ३. ३२. १५.) यजति"–इति ॥

उक्तानां सप्तानां याज्यानां मध्ये "पिबा सोमम्", "स ईम्पाहि", 'एवा पाहि"–इति तिस्र ऋचो ऽभितृण्णवत्त्वेन प्रशंसति— "तासा मेता अभितृण्णवत्यो भवन्तीन्द्रो वै प्रातस्सवने न व्यजयत ; स एताभिरेव माध्यन्दिनं सवन मभ्यतृणद्यदभ्यतृणत्तस्मादेता अभितृण्णवत्यो भवन्ति"–इति । अभिपूर्वतर्दनधातुयुक्तत्वादभितृण्णवत्त्वं यथा भवति तथैव धात्वर्थसम्भवादप्यभितृण्णवत्त्वं द्रष्टव्यम् । कथ मेतदिति, तदुच्यते— इन्द्रः पुरा प्रातस्सवने समाप्ते सति तावता 'न व्यजयत' विजयं न प्राप्तवान् ; माध्यन्दिनसवनस्य गुरुत्वेन गलितत्वात् । तदानी मिन्द्रस्तस्य माध्यन्दिनसवनस्य स्थितिसिद्ध्यर्थम् "पिबा सोम"–इत्यादिभिस्तिसृभिः ऋग्भिर्माध्यन्दिनसवनम् 'अभितः' प्रथमतृतीययोर्मध्ये 'अतृणत्' तर्दन मकरोत्, दृढबन्धेन स्थितिं कृतवानित्यर्थः । 'तस्मात्' तर्दनस्यार्थस्य युक्तत्वादेतासां तिसृणा मभितृण्णवत्त्वम् ॥३॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां तृतीयाध्याये
(अष्टाविंशाध्याये) तृतीयः खण्डः ॥ ३ (११) ॥

॥ अथ चतुर्थः खण्डः ॥

इहोपयात शवसो नपात इति॑ तृतीयसवन उन्नीयमानेभ्यो ऽन्वाह॑ वृषण्वतीः पीतवतीः॑ सुतवतीर्मद्वती रूपसमृद्धास्ता ऐन्द्रार्भव्यो भवन्ति॑ तदाहुर्यन्नार्भवीषु स्तुवते॑ ऽथ कस्मादार्भवः पवमान इत्याचक्षत इति॑ प्रजापतिर्वै पित ऋभून्॑ मर्त्यान्त्सतो ऽमर्त्यान् कृत्वा॑ तृतीयसवन आभजत्॑ तस्मान्नार्भवीषु स्तुवते॑ ऽथार्भवः पवमान इत्याचक्षते॑ ऽथाह यद्यथाच्छन्दसं॑ पूर्वयोः सवनयोरन्वाह॑ गायत्रीः प्रातःसवने॑ त्रिष्टुभो माध्यन्दिने॑ ऽथ कस्माज्जागते सति तृतीयसवने॑ त्रिष्टुभो ऽन्वाहेति॑ धीतरसं वै तृतीयसवन॑ मथैतद्धीतरसं॑ शुक्रियं छन्दो यत् त्रिष्टुप्॑ सवनस्य सरसताया इति ब्रूयादथो इन्द्र मेवैतत्सवने ऽन्वा भजती॑त्यथाह यदैन्द्रार्भवं वै तृतीयसवन॑ मथ कस्मादेष एव तृतीयसवने॑ प्रस्थितानां प्रत्यक्षा॑दैन्द्रार्भव्या यजती॑न्द्र ऋभुभिर्वाजवद्भिः समुक्षित मिति होतैव॑ नानादेवत्याभिरितरे॑ कथं तेषा मैन्द्रार्भव्यो भवन्तीती॑न्द्रावरुणा सुतपाविमं सुत मिति मैत्रावरुणो यजति॑ युवो रथो अध्वरं देववीतय इति॑ बहूनि वा ह तदृभूणां रूप॑ मिन्द्रस्य सोमं

पिबतं बृहस्पत इति ब्राह्मणाच्छंसी यजत्या॑वां विशन्त्विन्दवः स्वाभुव इति॑ बहूनि वा ह तदृभूणां रूप॑ मा वो वहन्तु सप्तयो रघुष्यद इति पोता यजति॑ रघुपत्वानः प्र जिगात बाहुभिरिति॑ बहूनि वा ह तदृभूणां रूप॑ ममेव नः सुहवा आ हि गन्तनेति नेष्टा यजति॑ गन्तनेति बहूनि वा ह तदृभूणां रूप॑ मिन्द्राविष्णू पिबतं मध्वो अस्येत्यच्छावाको यजत्या॑ वा मध्वांसि मदिराण्यग्मन्निति॑ बहूनि वा ह तदृभूणां रूप॑ मिमं स्तोम मर्हते जातवेदस इत्याग्नीध्रो यजति॑ रथ मिव सम्महेमा मनीषयेति॑ बहूनि वा ह तदृभूणां रूप॑ मेव मु हैता ऐन्द्रार्भव्यो भवन्ति॑ यन्नानादेवत्या॑स्तेनान्या देवताः प्रीणाति॑ यदु जगत्प्रासाहा॑ जागतं वै तृतीयसवनं॑ तृतीयसवनस्यैव समृद्ध्यै॑ ॥ ४ (१२) ॥

अथ तृतीयसवने उन्नीयमानं सूक्तं विधत्ते— "इहोपयात शवसो नपात इति (सं० ४. ३५. १–९.) तृतीयसवन उन्नीयमानेभ्यो ऽन्वाह; वृषण्वतीः पीतवतीः सुतवतीर्मद्वती रूपसमृद्धास्ता ऐन्द्रार्भव्यो भवन्ति"—अध्वर्युणा चमसोन्नयनकाले प्रेषितो मैत्रावरुणः "इहोपयात"—इति सूक्त मनुब्रूयात्। तत्रत्या ऋचो वृष-पीत-सुत-मद-शब्दोपेताः। "आ तक्षत वृषणः"—इति 'वृषन्'-शब्दः। "सु षुतस्य पीतिः"—इति सुनोतिधातुना पिबतिधातुना

च योगः। "अनु वो मदासः"-इति मदिधातुयोगः। तत्रत्या ऋचः 'ऐन्द्रार्भव्यः' इन्द्रश्च ऋभवश्च तासां देवताः; "सौधन्वना ऋभवः"-"गन्त्विन्द्रम्"-इति तत्र श्रवणात्॥

ऋभुदेवताप्रसङ्गेन तृतीयसवनगते पवमानस्तोत्रे किञ्चिच्चोद्य मुद्भावयति—"तदाहुर्यन्नार्भवीषु स्तुवते ऽथ कस्मादार्भवः पवमान इत्याचक्षत इति"-इति। 'तत्' तस्मिन्नृभुसम्बन्धविषये चोद्य माहुः। यस्मात् कारणादृभुदेवतास्वृक्षु सामगास्तृतीयसवने पवमानस्तोत्रेण न स्तुवते, किन्तु "स्वादिष्ठया मदिष्ठया"-इत्यन्यदेवताकास्वेव स्तुवते *। अथैवं सति कस्मात् कारणात् पवमानस्तोत्रस्यार्भवत्व माचक्षते? इति चोद्यम्॥

तस्योत्तर माह—"प्रजापतिर्वै पित ऋभून् मर्त्यान्त्सतो ऽमर्त्यान् कृत्वा तृतीयसवन आभजत्; तस्मान्नार्भवीषु स्तुवते ऽथार्भवः पवमान इत्याचक्षते"-इति। पुरा प्रजापतिः पिता भूत्वा 'मर्त्यान्' मनुष्यान् सतः ऋभून् 'अमर्त्यान्' देवान् कृत्वा तृतीयसवने 'आभजत्' भागिनः अकरोत्। तदिद मुपाख्यानम् "आर्भवं शंसति"-इत्यत्र प्रदर्शितम् †। एवं च सति ऋभूणां स्तोत्रदेवतात्वाभावाद् 'आर्भवीषु' ऋक्षु उद्गातारो न स्तुवते; 'अथ' अपि ऋभूणां तृतीयसवनसम्बन्धसद्भावात् तृतीयसवनगतस्य पवमानस्तोत्रस्याप्यार्भवत्वं व्यवहरन्ति॥

प्रासङ्गिकं परिसमाप्य प्रकृत एव सूक्ते चोद्य मुद्भावयति—"अथाह यद्यथाच्छन्दसं पूर्वयोः सवनयोरन्वाह,—गायत्रीः प्रातस्सवने त्रिष्टुभो माध्यन्दिने, ऽथ कस्माज्जागते सति तृतीयसवने

---

* उ० आ० १ १ १५; ता० ब्रा० ८. ४. ५ (२ भा० ६२ पृ०)।

† ३ प० २ अ० ६ ख० (२ भा० १३५ पृ०)।

त्रिष्टुभो ऽन्वाहेति"–इति । 'अथ' उन्नीयमानसूक्तविधानानन्तरं तत्र कश्चिद् ब्रह्मवादी चोद्य माह । 'यद्' यस्मात् कारणात् 'यथाच्छन्दसं' तत्र-तत्रोचितं छन्दोऽनतिक्रम्य सवनद्वये गायत्रीः त्रिष्टुभश्च क्रमेणान्वाह, तृतीयसवनं तु जागतम् । तथा सति जगती मतिक्रम्य "इहोपयात"–इत्याद्यास्त्रिष्टुभः कस्मादनुब्रूते ? इति चोद्यम् ॥

तत्रोत्तरं दर्शयति— "धीतरसं वै तृतीयसवन मथैतदधीतरसं शुक्रियं छन्दो यत् त्रिष्टुप्, सवनस्य सरसताया इति ब्रूयादथो इन्द्र मेवैतत्सवने ऽन्वाभजतीति"–इति । यदेतत् तृतीयसवनं, तदेतद् 'धीतरसं' तदीयो रसो गायत्र्या पीतः सोमाहरणकाले पद्भ्यां सवनद्वयं मुखेन तृतीयसवनं च गृहीत्वा तत्रत्यं रसं गायत्री पीतवती । तथाचान्यत्र श्रूयते— "पद्भ्यां द्वे सवने समगृभ्णान्, मुखेनैकं ; यन् मुखेन समगृभ्णात्, तदधयत् ; तस्माद् द्वे सवने शुक्रवती प्रातस्सवनं माध्यन्दिनञ्च, तस्मात् तृतीयसवन ऋजीष मभिषुण्वन्ति ; धीत मिव हि मन्यन्ते"–इति (तै० सं० ६. १. ७. ४.) । तत्रैव त्रिष्टुप् छन्दो यदस्ति, एतद् 'अधीतरसम्' अपीतरसम् ; माध्यन्दिनसवनसम्बन्धित्वात् । अत एतत् शुक्रियो रसः तदुपेतं 'शुक्रियम्' । अतो ऽस्य तृतीयसवनस्य सरसत्वार्थं त्रिष्टुभोऽन्वाहेत्युत्तरं ब्रूयात् । 'अथो' अपि च तेन सरसत्वेनेन्द्र मेव तृतीयसवनं भागवन्तं करोति ; त्रिष्टुप्छन्दसः ऐन्द्रत्वात् । तेनैन्द्रार्भवत्वं युक्तम् ॥

उक्तं चोद्यं समाधाय प्रस्थितयाज्याविषये चोद्य मुद्भावयति— "अथाह यदैन्द्रार्भवं वै तृतीयसवन मथ कस्मादेष एव तृतीयसवने प्रस्थितानां प्रत्यक्षादैन्द्रार्भ्या यजतीन्द्र ऋभुभिर्वाजवद्भिः समु-

च्चित मिति होतैव, नानादेवत्याभिरितरे ; कथं तेषा मैन्द्रार्भव्यो भवन्तीति"–इति । 'अथ' उन्नीयमानसूक्तकथनानन्तरं कश्चिद् ब्रह्मवादी चोद्य माह । 'यद्' यस्मात् कारणात् तृतीयसवनम् 'ऐन्द्रार्भवम्', तच्च पूर्व मुपपादितम् (२७१ पृ०) ; एवं सत्येक एव होता प्रस्थितसोमानां 'प्रत्यक्षात्' प्रत्यक्षेण, मुख्येनैवेन्द्रशब्देन ऋभुशब्देन च युक्तयर्चा यजति । "इन्द्र ऋभुभिः"–इत्याद्या (सं० ३. ६०. ५.) सेय मृगवगन्तव्या । होतैव तया यजति ; न त्वितरे षडृत्विजः ; ते तु नानाविधदेवताकाभिर्वक्ष्यमाणाभिर्ऋग्भिर्यजन्ति । तस्मात् कारणादेतत् कथं सम्पन्नम् ? किञ्च तेषां षण्णा मृत्विजां सम्बन्धिन्यो याज्याः कथ मैन्द्रार्भव्यो द्विविधदेवताका भवन्ति ? इति चोद्यम् ॥

तत्र होतुर्याज्याया मैन्द्रार्भवत्वेन परितोषात्तां तथैवाङ्गीकृत्येतरेषां याज्यासु क्रमेण ऐन्द्रार्भवत्वं दर्शयितुं कामः प्रथमतो मैत्रावरुणस्य याज्यायां तद्दर्शयति— "इन्द्रावरुणा सुतपाविमं सुत मिति मैत्रावरुणो यजति ; युवो रथो अध्वरं देववीतय इति बहूनि वा ह तदृभूणां रूपम्"–इति । "इन्द्रावरुणा"–इत्यस्यां याज्यायां (सं० १. १७. ८.) "युवो रथो"–इत्यस्मिन् पादे "देववीतये"–इति पदं विद्यते । देवानां वीतिः प्राप्तिः देववीतिरिति तस्य समासः । तस्य समासे षष्ठीबहुवचनान्तेन शब्देन बहून्येव रूपाणि प्रतीयन्ते । तत्र बहुत्व मृभूणां स्वरूपम् ; मनुष्यरूपाणा मृभुशब्दवाच्यानां महर्षीणां बहुत्वात् । तस्मादर्थतः ऋभुसद्भावादिन्द्रशब्दस्य च साक्षात् श्रवणादिय मैन्द्रार्भवी ॥

ब्राह्मणाच्छंसिनो याज्याया मार्भवत्वं सम्पादयति— "इन्द्रश्च सोमं पिबतं बृहस्पत इति ब्राह्मणाच्छंसी यजत्या वां विशन्त्विन्दवः

स्वाभुव इति बहूनि वा ह तदृभूणां रूपम्"–इति । "इन्द्रम्"–इत्यादियाज्यायाम् (सं० ४. ५०. १०.) "आ वां विशन्तु"–इत्यस्मिन् पादे "विशन्तु"–इत्यादीनि बहुवचनान्तानि पदानि श्रूयन्ते, तैरभिधेयं बहुत्व मृभूणां स्वरूपम् ॥

पोतुर्याज्याया मार्भवत्वं दर्शयति— "आ वो वहन्तु सप्तयो रघुष्यद इति पोता यजति ; रघुपत्वानः प्र जिगात बाहुभिरिति बहूनि वा ह तदृभूणां रूपम्"–इति । "आ वो वहन्तु"–इतियाज्यायां (सं० १. ८५. ६.) "रघुपत्वानः"–इत्यस्मिन् पादे बहुवचनान्तैः पादैरभिधेयं बहुत्व मृभूणां स्वरूपम् ॥

नेष्टुर्याज्याया मार्भवत्वं दर्शयति— "अमेव नः सुहवा आ हि गन्तनेति नेष्टा यजति ; गन्तनेति बहूनि वा ह तदृभूणां रूपम्"–इति । "अमेव नः"–इतियाज्यायां (सं० २. ३६. ३.) तस्मिन्नेव पादे "गन्तन"–इतिपदस्य गच्छतेत्यर्थे सति लोण्मध्यमपुरुष-बहुवचनान्तेन प्रतीतं बहुत्व मृभूणां स्वरूपम् ॥

अच्छावाकस्य याज्याया मार्भवत्वं दर्शयति— "इन्द्राविष्णू पिबतं मध्वो अस्येत्यच्छावाको यजत्या वा मन्धांसि मदिराण्यग्मन्निति बहूनि वा ह तदृभूणां रूपम्"–इति । "इन्द्रा विष्णू"–इत्यस्यां याज्यायाम् (सं० ६. ६८. ७.) "आ वाम्"–इत्यस्मिन् पादे बहुवचनान्तैः "अन्धांसि"–इत्यादिभिः पदैः प्रतीतं बहुत्व मृभूणां स्वरूपम् ॥

आग्नीध्रस्य याज्याया मार्भवत्वं दर्शयति—"इमं स्तोम मर्हते जातवेदस इत्याग्नीध्रो यजति ; रथ मिव सम्महेमा मनीषयेति बहूनि वा ह तदृभूणां रूपम्"–इति । "इमं स्तोमम्"–इत्यस्यां याज्यायां (सं० १. ९४. १.) "रथ मिव"–इत्यस्मिन् पादे "महेमा"

–इत्युत्तमपुरुषबहुवचनान्तेन पदेन प्रतीयमानं बहुत्व मृभूणां स्वरूपम् ॥

उक्त मर्थ मुपसंहरति— "एव मु हैता ऐन्द्रार्भव्यो भवन्ति"–इति। उक्तेन प्रकारेण याज्यास्वृभुसम्बन्धसम्पादनादिन्द्रसम्बन्धस्य च साचादेव श्रुतत्वादेता ऋच ऐन्द्रार्भव्यः सम्पद्यन्ते ॥

इन्द्रस्यर्भूणां चोक्तसम्बन्धेन प्रीतिः सिद्धत्वादितरदेवताना मपि ताभिर्याज्याभिः प्रीतिं दर्शयति—"यन्नानादेवत्यास्तेनान्या देवताः प्रीणाति"–इति। इन्द्रवरुणबृहस्पत्यादिनानाविधदेवतायुक्ता ऋच इति यदस्ति, 'तेन' कारणेन 'अन्याः' इन्द्रादृभुभ्यश्च व्यतिरिक्ता देवतास्तोषयति ॥

याज्यास्ववस्थितं छन्दः प्रशंसति— "यदु जगत्प्रासाहा जागतं वै तृतीयसवनं तृतीयसवनस्यैव समृद्ध्यै"–इति। जगच्छब्देन जगतीच्छन्दो ऽभिधीयते, प्रासाहशब्दो बाहुल्यवाची ; जगत्यः प्रासाहाः बहुला यासूक्तासु प्रस्थितयाज्यासु ता 'जगत्प्रासाहाः' ; तृतीयसवनञ्च जागत मिति प्रसिद्धम्। अतो 'यदु' यदेव जगतीबाहुल्यं, तेन तृतीयसवनस्य समृद्धिर्भवति* ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां तृतीयाध्याये
(अष्टाविंशाध्याये) चतुर्थः खण्डः ॥ ४ (१२) ॥

---

* "इदन्ते सौम्यं०—० उचान्नाय वशान्नायेति प्रातस्सवनिक्यः प्रस्थितयाज्याः (२ख०), पिबा सोम मभि ०—० आ पूर्णो अस्य कलशः स्वाहेति माध्यन्दिन्यः (३ख०), इन्द्र ऋभुभिः ०—० इमं सोम मर्हते जातवेदस इति तार्त्तीयसवनिक्यः (४ख०)"–इति आश्व०

॥ अथ पञ्चमः खण्डः ॥

अथाह यदुक्थिन्यो ऽन्या होत्रा॑ अनुक्था अन्याः॑ कथ मस्यैता॑ उक्थिन्यः सर्वाः समाः समृद्धा भवन्तीति॑ यद्देवैनाः सम्प्रगीर्य॑ होत्रा इत्याचक्षते॑ तेन समा यदुक्थिन्यो ऽन्या होत्रा॑ अनुक्था अन्या॑स्तेनो विषमा॑ एव नु हास्यैता उक्थिन्य॑: सर्वाः समाः समृद्धा भवन्त्य॑थाह शंसन्ति प्रातःसवने॑ शंसन्ति माध्यन्दिने होत्रका॑: कथ मेषां तृतीयसवने शस्तं भवतीति॑ यदेव माध्यन्दिने द्वे द्वे सूक्ते॑ शंसन्तीति ब्रूयात्तेनेत्य॑थाह यद् द्व्युक्थो होता॑ कथं होत्रका द्व्युक्था भवन्तीति॑ यदेव द्विदेवत्याभिर्यजन्तीति ब्रूयात्तेनेति॑ ॥ ५ (१३) ॥

होत्रकाणां प्रस्थितयाज्याः सवनत्रये ऽभिधाय परस्परं साम्यं वैषम्यञ्च विवेक्तुं प्रश्न मुद्भावयति— "अथाह यदुक्थिन्यो ऽन्या होत्रा, अनुक्था अन्याः, कथ मस्यैता उक्थिन्यः सर्वाः समाः समृद्धा भवन्तीति"–इति। होत्रकाणां याज्याकथनानन्तरं कश्चिद् ब्रह्मवादी चोद्य माह। होत्रकाणां क्रियाः 'होत्रा'शब्देन विवक्षिताः। तासु 'अन्याः' काश्चित् क्रियाः 'उक्थिन्यः' शस्त्रयुक्ताः,

---

श्रौ० ५. ५. १८, १९। इह चैताः २६३—२७६ पृष्ठेषु विहिता द्रष्टव्याः। ता एवेताः 'प्रस्थितयाज्याः'–इत्युच्यन्ते। "होता यक्षत्०—० इति प्रेषितः प्रेषितो होतानुसवनं प्रस्थितयाज्याभिर्यजति, नामादेश मितरे, प्रशास्ता ब्राह्मणाच्छंसी पोता नेष्टा ऽऽग्नीध्रो ऽच्छावाकश्च"–इति आश्व० श्रौ० ५. ५. १५—१७।

'अन्याः' इतराः क्रियाः 'अनुक्थाः' शस्त्ररहिताः। मैत्रावरुणो ब्राह्मणाच्छंस्यच्छावाक इत्येतेषां त्रयाणां शस्त्रसद्भावादेतदीयाः क्रियाः 'उक्थिन्यः', नेष्टृपोत्रादीनां शस्त्रराहित्यात् तदीयाः क्रियाः 'अनुक्थाः' *। एवं वैषम्ये स्पष्टे सति 'अस्य' यज्ञस्य यजमानस्य वा सम्बधिन्यः 'एताः' होत्राः सर्वाः 'उक्थिन्यः' शस्त्रयुक्ता भूत्वा 'समाः' वैषम्यरहिताः अत एव 'समृद्धाः' सम्पूर्णाः कथं भवन्ति ? इति चोद्यम् ॥

तस्योत्तर माह – "यदेवैनाः सम्प्रगीर्य होत्रा इत्याचक्षते, तेन समाः"–इति। 'यदेव' यस्मादेव कारणात् 'एनाः' मैत्रावरुणादिक्रियाः पोतृनेष्ट्रादिक्रियाश्च 'सम्प्रगीर्य' सम्भूय प्रकर्षेणोक्त्वा 'होत्रा'–इतिशब्देन याज्ञिका आचक्षते, तेन समाः। यथा लोके छत्रयुक्तान् तद्रहितांश्च सम्भूय छत्रिण इत्येकेनैव शब्देन व्यवह्रियन्ते, एव मत्रापि शस्त्रयुक्ता मैत्रावरुणादयः, शस्त्ररहिताः पोतृनेष्ट्रादयश्च सम्भूय एकेनैव होत्राशब्देन व्यवह्रियन्ते। अतः शस्त्रिभिः समभिव्याहारात् अशस्त्रिणा मप्युपचरितं शस्त्रित्वम् ; 'तेन' व्यवहारैक्येन समा भवन्ति ; न चैतावता स्वाभाविकं शस्त्रित्वाशस्त्रित्ववैषम्य मपगच्छति ॥

तदेतद् वैषम्यं दर्शयति— "यदुक्थिन्यो ऽन्या होत्रा अनुक्था अन्यास्तेनो विषमाः"–इति। 'उ'-शब्दोऽपिशब्दार्थः। 'तेन' उक्थित्वानुक्थित्वधर्मद्वयेन विषमा अपि भवन्ति ॥

सत्यपि वैषम्ये औपचारिकोक्थित्वेन साम्यं यदुपपादितम्, तदुपसंहरति—"एव मु हास्यैता उक्थिन्यः सर्वाः समाः समृद्धा भवन्ति"–इति ॥

---

* १ भा० ४४९ पृ०, आश्व० श्रौ० ५, १०. १०) मैत्रावरुणः=प्रशास्ता।

होत्रकेषु चोद्यान्तर मुद्भावयति—“अथाह शंसन्ति प्रातस्सवने, शंसन्ति माध्यन्दिने होत्रकाः ; कथ मेषां तृतीयसवने शस्तं भवतीति”–इति । अग्निष्टोमे मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकानां सवनद्वये शंसनं विहितम्, तद्दृष्टान्तेन तृतीयसवनेऽपि शंसन मपेक्षितम् ; तच्च न विहितम् । तथा सति कथ मेषां तृतीयसवने ‘शस्तं भवति’ शंसनं सिध्यति ? इति चोद्यम् ॥

तस्योत्तरं दर्शयति—“यदेव माध्यन्दिने द्वे द्वे सूक्ते शंसन्तीति ब्रूयात्तेनेति”–इति । मैत्रावरुणस्य “सद्यो ह जातो वृषभः कनीनः”–इत्येकं (सं० ३. ४८.) सूक्तम्, “एवा त्वा मिन्द्र वज्रिन्”–इति (सं० ४. १९.) द्वितीयम् ; ब्राह्मणाच्छंसिनः “इन्द्रः पूर्भिद्”–इत्येकं (सं० ३. ३४.) सूक्तम्, “उदु ब्रह्माणि”–इति (सं० ७. २३.) द्वितीयम् ; अच्छावाकस्य “भूयः”–इत्येकम् (सं० ६. ३०.), “इम मू षु”–इति (सं० ३. ३६.) द्वितीयम् । एव मेते त्रयो माध्यन्दिने सवने प्रत्येकं द्वे द्वे सूक्ते शंसति * । तत्रैकं माध्यन्दिनसवनार्थं द्वितीयन्तु तृतीयसवनार्थं मित्युपचारेण तत्रापि शंसनं सिध्यतीत्युत्तरं ब्रूयात् ॥

तेष्वेव चोद्यान्तर मुद्भावयति—“अथाह यद् द्व्युक्थो होता, कथं होत्रकाः द्व्युक्था भवन्तीति”–इति । ‘अथ’ तृतीयसवने शंसनसम्पादनानन्तरं पुनरपि ब्रह्मवादी चोद्यान्तर माह । ‘यद्’ यस्मात् कारणाद्धोता ‘द्व्युक्थः’ द्वे उक्थे शस्ते यस्यासौ द्व्युक्थः । प्रातस्सवने आज्य-प्रउगे द्वे, माध्यन्दिनसवने मरुत्वतीय-निष्केवल्ये द्वे, तृतीयसवने वैश्वदेवाग्निमारुते द्वे । एवं स्थिते होतृदृष्टान्तेन होत्रकाणा मपि उक्थद्वयोपेतत्व मपे-

---

* सूचितञ्चैतत्सर्वं माश्वलायनेन होत्रकाणा मिति कण्डिकायाम् (५. १६.) ।

च्छितम्, न चोक्थद्वयं विहित मस्ति ; अतस्तत् केन प्रकारेण सिध्यति ? इति चोद्यम् * ॥

तस्योत्तर माह— "यदेव द्विदेवत्याभिर्यजन्तीति ब्रूयात, तेनेति"–इति। प्रस्थितयाज्यानां श्रूयमाणदेवतया सम्पाद्यमानदेवतया च द्विदेवत्यत्वम् †; तादृशीभिर्ऋग्भिर्यस्मात् यजन्ति, तेन द्विशस्त्रत्वम्; तत्रैका देवता याज्यार्था, इतरा द्वितीया शस्त्रार्थेत्येव मुत्तरं ब्रूयात् ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां तृतीयाध्याये
(अष्टाविंशाध्याये) पञ्चमः खण्डः ॥ ५ (१३) ॥

॥ अथ षष्ठः खण्डः ॥

अथाह यदेता॑स्तिस्र उक्थिन्यो हो॑त्राः कथ मितरा उक्थिन्यो भवन्ती॑त्याज्य मेवाग्नीध्रीयाया॑ उक्थं मरुत्वतीयं पोत्रीयायै॑ वैश्वदेवं नेष्ट्रीयायै॑ ता वा एता हो॑त्रा एवं न्यङ्गा एव भवन्त्य॑थाह यदेकप्रैषा अन्ये होत्रका॑ अथ कस्माद् द्विप्रैषः पोता॑ द्वि-

---

* आज्यप्रउगादीनि षट् शस्त्राणि पुरस्ताद् द्रष्टव्याणि,— २प० ५अ० ४ख०, ३प० १अ० १ख०, २प० २अ० ३ख०, ३प० २अ० १०ख०, ३प० ३अ० ७ख०, ३प० ३अ० ४ख० (१भा० ४४५ पृ०—२भा० १८० पृ०)।

† इन्द्रः श्रूयमाणदेवता, ऋभवश्च सम्पाद्यमानाः (२७४–२७६ पृ० द्र०।

प्रैषो नेष्टेति यन्नादो गायत्री सुपर्णी भूत्वा सोम माहरत्तदेतासां होत्राणा मिन्द्र उक्थानि परिलुप्य होत्रे प्रददौ यूयं माभ्यह्वयध्वं यूय मस्यावेदिष्टेति ते होचुर्देवा वाचेमे होत्रे प्रभावयामेति तस्मात्ते द्विप्रैषे भवत ऋचाग्नीध्रीयाम् प्रभावयाञ्चक्रुस्तस्मात् तस्यैकयर्चा भूयस्यो याज्या भवन्त्यथाह यद्धोता यक्षद्धोता यक्षदिति मैत्रावरुणो होत्रे प्रेष्यत्यथ कस्मादहोतृभ्यः सद्भ्यो होत्राशंसिभ्यो होता यक्षद्धोता यक्षदिति प्रेष्यतीति प्राणो वै होता प्राणः सर्व ऋत्विजः प्राणो यक्षत् प्राणो यक्षदित्येव तदाहाथाहास्त्युद्गातॄणां प्रैषा३: नाँ३ इति* अस्तीति ब्रूयाद्यदेवैतत्प्रशास्ता जपं जपित्वा स्तुध्व मित्याह स एषां प्रैषो ऽथाहास्त्यच्छावाकस्य प्रवरा३: नाँ३ इति† अस्तीति ब्रूयाद्यदेवैन मध्वर्युराहाच्छावाक वदस्व यत्ते वाद्य मित्येषो ऽस्य प्रवरो ऽथाह यदैन्द्रावरुणं मैत्रावरुणस्तृतीयसवने शंसत्यथ कस्मादस्याग्नेयौ स्तोत्रियानुरूपौ भवत इत्यग्निना वै मुखेन देवा असुरानुक्थेभ्यो निर्जघ्नुस्तस्मादस्याग्नेयौ स्तोत्रियानुरूपौ भवतो ऽथाह यदैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसी तृतीयसवने शंस-

---

*, † "नाँ इति" ख, ग, घ, ङ; "नां इति" च।

त्यैन्द्रावैष्णव मच्छावाकः कथ मेनयोरैन्द्राः * स्तोत्रियानुरूपा भवन्तीतीन्द्रो ह स्म वा असुरानुक्थेभ्यः प्रजिगाय सोऽब्रवीत् कश्चाहञ्चेत्यहञ्चाहञ्चेति ह स्म देवता अन्ववयन्ति स यदिन्द्रः पूर्वः प्रजिगाय तस्मादेनयोरैन्द्राः † स्तोत्रियानुरूपा भवन्ति यदहञ्चाहञ्चेति ह स्म देवता अन्ववयुस्तस्मान्नानादेवत्यानि शंसतः ॥ ६ (१४) ॥

सर्वत्र होत्रकशब्दस्य व्यवहारसाम्येन शस्त्ररहिताना मप्युपचरित मुक्थित्व मित्युक्तम्; इदानीं प्रकारान्तरेण तेषा मुक्थित्वं सम्पादयितुं प्रश्न मुद्भावयति— “अथाह यदेतास्तिस्र उक्थिन्यो होत्राः, कथ मितरा उक्थिन्या भवन्तीति”—इति। ‘अथ’ द्वितीयशस्त्रसम्पादनानन्तरं ब्रह्मवादी चोद्य माह। ‘यद्’ यस्मात् कारणात् ‘एताः’ पूर्वोक्ताः ‘होत्राः’ मैत्रावरुणादीनां क्रियास्तिस्रः ‘उक्थिन्यः’ शस्त्रोपेताः, तद्दृष्टान्तेन ‘इतराः’ पोत्रादीनां क्रिया अपि शस्त्रयुक्ता इति वक्तव्यम्। न चात्र शस्त्रं विहितम्, अतः कथ मेता उक्थिन्यः? इति प्रश्नः॥

तत्रोत्तर माह—“आज्य मेवाग्नीध्रीयाया उक्थं, मरुत्वतीयं पोत्रीयायै, वैश्वदेवं नेष्ट्रीयायै; ता वा एता होत्रा एवं न्यङ्गा एव भवन्ति”—इति। होतुः प्रातस्सवने यत् प्रथमम् ‘आज्य’’शस्त्रं तदेव ‘आग्नीध्रीयायै’ आग्नीध्रेण क्रियमाणायाः क्रियायाः ‘उक्थं’ शस्त्रम्। एवं मरुत्वतीयवैश्वदेवयोरपि योज्यम्। तथा सति ताः

---

*, † ग-ङ-च-पुस्तकेष्विह विसर्गो नास्ति।

एवैताः 'होत्राः' होत्रकाणां क्रियाः 'एवम्' उक्तेन प्रकारेण 'व्यङ्गाः' तत्तच्चिह्ना एव भवन्ति। अग्नि माग्नीध्रो यजति *, आज्यशस्त्रं चाग्नेयम्; पोता मरुतो यजति † मरुत्वतीये च मारुतानि सूक्तानि शंसति; "अग्ने पत्नीरिहावह"–इति (सं० १. २२. ६.) नेष्टा यजति ‡, तत्र "देवाना मुशतीः"–इत्यत्र "देवानाम्"–इति श्रवण मस्ति। एवं त्रयाणा मपि आग्नीध्र-पोतृ-नेष्टॄणा माग्नेयत्व–मारुतत्व–वैश्वदेवत्व–चिह्नानि विद्यन्ते। तस्मादाज्यादिभिरुक्थैरितरेषा मुक्थित्वम्॥

तेषा मेव होत्रकाणा मृतुयाजेषु § कस्यचिद् विशेषस्य प्रश्न मवतारयति— "अथाह यदेकप्रैषा अन्ये होत्रका अथ कस्माद् द्विप्रैषः पोता द्विप्रैषो नेष्टेति"–इति। प्रैषसूक्ते ‖ ये ये प्रैषा उक्ताः, तेषु प्रैषेषु एकैक एव प्रैषो नेष्टृ-पोतृ-व्यतिरिक्तानां होत्रकाणाम्; पोतुर्नेष्टुश्च द्वौ द्वौ प्रैषौ। तथा च यज्ञसम्प्रदायविदः पठन्ति— "हो-पो-ने-ऽग्नीद्-ब्र-प्र-हो-पो-ने-ऽच्छा-ऽध्वर्यु-गृहपतीति च"-इति। अस्याय मर्थः— तत्र नाम्ना माद्यचरेणैते क्रतुपुरुषा निर्दिश्यन्ते। तथाच होता, पोता, नेष्टा, आग्नीध्रः, ब्राह्मणाच्छंसी, प्रशास्ता, होता, पोता, नेष्टा, अच्छावाकः, अध्वर्युर्गृहपतिश्च क्रमेणोक्ताः। एतेषां प्रैषसूक्ते द्वादश प्रैषाः क्रमेण सन्ति। तथा सति पोतुर्द्वि-

---

*, †, ‡ २६३, २६४ पृ० द्र०।

§ २ भा० २४२ पृ० 'ऋतुयाजाः षळृचः'–इति द्रष्टव्यम्।

‖ अस्ति पञ्चाध्यायात्मक ऋक्परिशिष्टः। तत्र पञ्चमः प्रैषाध्यायः। स एव 'प्रैष-समाम्नायः'–इति, 'प्रैषग्रन्थः'–इति चोच्यते। तस्मिंश्च पञ्च सूक्तानि। तदीय-पञ्चमे सूक्ते सुत्यायां सवनीय प्रैषा उक्ताः। तत्रैवेत्यर्थः। तदुक्त माश्वलायनेन—"ऋतुयाजैश्चरन्ति, तेषां प्रैषाः, पञ्चमं प्रैषसूक्तम्"–इति आश्व० श्रौ० ५. १०. १—३। 'प्रैषसमाम्नाये यत् पञ्चमं प्रैषसूक्तं तदेषां प्रैषा भवन्ति'–इति तद्वृत्तिः।

तीयोऽष्टमश्च द्वौ प्रैषौ ; नेष्टुस्तृतीयो नवमश्च द्वौ प्रैषौ । "होता यक्षन् मरुतः पोत्रात्"–इत्येकः (प० ५. ५. १०.) प्रैषः, "होता यक्षद्देवं द्रविणोदां पोत्रादृतुभिः"–इति (प० ५. ५. १६.) द्वितीयः ; एतौ द्वौ पोतुः प्रैषौ । "होता यक्षद् ग्रावो नेष्टा"–इति (प० ५. ५. ११.) एकः, "होता यक्षद्देवं द्रविणोदां नेष्ट्रात्"–इति (प० ५. ५. १७.) द्वितीयः ; एतौ द्वौ नेष्टुः प्रैषौ । इतरेषा माग्नीध्राच्छावाकादीना मेकैक एव प्रैषः । तथा सति पोतृनेष्ट्रोः द्विः-प्रैषत्वे किं कारणम् ? इति प्रश्नः ॥

तस्योत्तर माह—"यत्रादो गायत्री सुपर्णी भूत्वा सोम माहरत्, तदेतासां होत्राणा मिन्द्र उक्थानि परिलुप्य होत्रे प्रददौ ; यूयं माभ्यह्वयध्वं, यूय मस्यावेदिष्टेति ; ते होचुर्देवा वाचेमे होत्रे प्रभावयामेति ; तस्मात्ते द्विप्रैषे भवत ऋचाग्नीध्रीयां प्रभावयाञ्चक्रुस्तस्मात् तस्यैकयर्चा भूयस्यो याज्या भवन्ति"–इति । 'यत्र' यस्मिन् काले अदो गायत्री त्रिष्वपि छन्दःसु या शौर्ययुक्ताभूत् [असौ गायत्री सुपर्णी भूत्वा द्युलोकात् सोम माहरत्,— सोऽयं वृत्तान्तः पूर्वं मेवाम्नातः *], 'तत्' तस्मिन् काले केनापि निमित्तेन क्रुद्धः इन्द्रः 'एतासां' होत्राणाम् 'उक्थानि' शस्त्राणि परिलुप्य होत्रे प्रददौ । होत्राशब्दः स्त्रीलिङ्गोऽपि पुरुषान् होत्रकानभिधत्ते । पोतृनेष्ट्राग्नीध्राणां होत्रकाणा माज्य-मरुत्वतीय-वैश्वदेव-शस्त्राणि पूर्वं मासन्, तानि क्रुद्ध इन्द्रस्तेभ्यो निवार्य्य होत्रे दत्तवान् । ततो होता प्रतिसवनं शस्त्रद्वययुक्तो बभूव । गायत्र्या सोमे ऽपहृते सति शोकाभिभूत मिन्द्रं सान्त्वयितु मृत्विजाभिमानिन्यो देवताः सर्वा उपतस्थिरे, पोतृनेष्ट्रा-

---

* ३ प० ३ अ० १,२ ख० (२ भा० ११५—१२२ पृ०)।

ग्नीध्रदेवास्तु नागताः ; तदिदं कोपकारणम् । स च कुपित इन्द्रः शस्त्राणि निवार्य्य पुनरप्येव मुवाच,— हे गर्वाधिकाः पोत्रादयो यूयं 'मा आभ्यह्वयध्वम्' "शोंसावोम्"–इत्याह्वान मपि मा कुरुत, दूरे युष्माकं शस्त्राणि ; यतो यूयम् 'अस्य' मम सान्त्वनं 'मा अवेदिष्ट' न ज्ञातवन्तः । निषेधार्थो मा-शब्दोऽत्रानुवर्त्तनीयः । 'इति' एव मिन्द्रेणोक्ते सति तत्समीपवर्त्तिनः 'ते' देवा इन्द्रं सम्प्रार्थ्यैव मूचु,— 'इमे होत्रे' एतौ पोतृनेष्टारौ शस्त्रशून्यावतिभीतौ येन केनापि प्रकारेणानुग्रहणीयौ । तस्माच्छस्त्राभावेऽपि 'वाचा' अधिकप्रैषरूपया 'प्रभावयाम' प्रकर्षेण भावितौ तोषितौ करवामेति । 'तस्मात्' कारणात् 'ते होत्रे द्विप्रैषे भवतः' तौ होत्रकौ पोतृनेष्टारौ प्रैषद्वययुक्तौ भवतः । तथैव 'आग्नीध्रीयाम्' आग्नीध्रक्रियाम् 'ऋचा' कयाचिदधिकया 'प्रभावयाञ्चक्रुः' प्रभूतां कृतवन्तः । यस्मादेवं 'तस्मात्', 'तस्य' आग्नीध्रस्य एकयर्चा याज्या 'भूयस्यः' अत्यन्त मधिका भवन्ति । सप्ताना मपि होत्रकाणां प्रस्थितयाज्यास्तिस्र एव भवन्ति, आग्नीध्रस्य "ऐभिरग्ने सरथम्"–इत्येषा (सं० ३. ६. ९.) अधिका । सा च पात्नीवतग्रहवर्त्तिनी * । तथा च सम्प्रदायविद आहुः—

"तिस्रः प्रस्थितयाज्यास्तु सप्ताना मभवन् खलु ।
अग्नीधस्तिसृभिः सार्द्धं मैभिरग्ने चतुर्थ्यभूत् ॥"–इति ।

यद्यप्याग्नीध्रविषये ब्रह्मवादिना प्रश्नो न कृतः, तथापि पोतृनेष्टृभ्यां समानयोगक्षेमत्वेन तद्वृत्तान्तोऽप्यभिहितः ॥

होत्रकविषये प्रश्नान्तर मुद्भावयति— "अथाह यद्धोता यक्षद्धोता यक्षदिति मैत्रावरुणो होत्रे प्रेष्यत्यथ कस्मादहोतृभ्यः

---

* "पात्नीवतस्य यजत्यैभिरग्ने सरथं याह्यर्वाङित्युपांश्वेव"–इति आश्व० श्रौ० ५,१९.७ ।

सद्भ्यो होत्राशंसिभ्यो होता यक्षद्धोता यक्षदिति प्रेष्यतीति''-इति। 'अथ' द्विप्रैषत्वनिमित्तकथनानन्तरं ब्रह्मवादिनां प्रश्नमाह। 'मैत्रावरुणः' सर्वेषां होत्रादीनां प्रैषकर्त्ता *; स च प्रैषसूक्तगतेषु सर्वेष्वपि मन्त्रेषु आदौ "होता यक्षद्"-इत्येव तत्र तत्र पठति †। तत्र 'होत्रे' होतृकार्य्यार्थं तेन मन्त्रेण यत् प्रेष्यति, तदुक्तम्; मन्त्रादाववस्थितस्य होतृशब्दस्य तद्वाचकत्वात्; ये तु 'अहोतारः' होतृव्यतिरिक्ताः सन्तो 'होत्राशंसिनः' होत्रा होता तमाशंसन्ति तेषां होतृनामरहितानां प्रैषेषु तत्र तत्र "होता यक्षद्"-इति 'कस्मात्' कारणाद्धोतृशब्दं प्रयुङ्क्ते? इति प्रश्नः॥

तस्योत्तर माह — "प्राणो वै होता, प्राणः सर्व ऋत्विजः, प्राणो यक्षत्प्राणो यक्षदित्येव तदाह"-इति। योऽयं मुख्यो होता, स प्राणस्वरूप एव; मृतदेहस्य होतृत्वाभावात्। तथान्येषा मपि सर्वेषा मृत्विजां प्राणस्वरूप एव। तथा सति प्राणविवक्षया प्रयुक्तो होतृशब्दः सर्वेषूपपद्यते। "होता यक्षद्धोता यक्षद्"-इत्युक्ते 'प्राणो यक्षत्प्राणो यक्षद्"-इत्येव मैत्रावरुणो ब्रूते। तस्मादुक्तः सर्वेषु होतृशब्दप्रयोगः॥

उद्गातृविषये प्रश्नोत्तरे दर्शयति—"अथाहास्त्युद्गातॄणां प्रैषा३ः नाँ३ इति? अस्तीति ब्रूयाद्; यदेवैतत्प्रशास्ता जपं जपित्वा स्तुध्व मित्याह, स एषां प्रैषः"-इति। होत्रादयो मैत्रावरुणेन

---

* "तेन तेनैव प्रेषितः प्रेषितः स स यथाप्रैषं यजति"-इति आश्व० श्रौ० ५.८.४।

† तद्यथा—"होता यक्षद्०—०होतर्यज। होता यक्षद्०—०पोतर्यज। होता यक्षद्०—० नेष्टर्यज। होता यक्षद्०—० अग्नीद्यज। होता यक्षद्०—० ब्रह्मन्यज। होता यक्षन्०—० प्रशास्तर्यज। होता यक्षद्०—० होतर्यज। होता यक्षद्०—० पोतर्यज। होता यक्षद्०—० नेष्टर्यज। होता यक्षद्०—० अच्छावाक यज। होता यक्षद्०—०अध्वर्यू यजतम्। होता यक्षद्०—० गृहपते यज"-इति प० ५. ५. ९—२०।

प्रेषिताः स्व-स्व-व्यापारं कुर्वन्तीति तद्दृष्टान्तेनोद्गातॄणा मपि प्रेषितत्वं युक्तम्, न चोद्गातृप्रैषाः प्रैषसूक्ते समाम्नाताः; तस्मादेषां प्रैषोऽस्ति न वेति संशयः। प्लुतिद्वयं विचारार्थम्। नकारस्य सानुनासिकत्वं छान्दसम् *। अत्र प्रैषोऽस्तीत्येव मुत्तरं ब्रूयात्। प्रकर्षेण सर्वानृत्विजः 'शास्ति' प्रैषमन्त्रेण तत्तद्व्यापारे प्रवर्त्तयतीति 'प्रशास्ता' मैत्रावरुणः †; स च "स्तुत देवेन सवित्रा"–इत्यादिमन्त्रजपं ‡ जपित्वा, अनन्तरं "स्तुध्वम्"–'इति' यदेवैतद्वचनं प्राह, स एव 'एषाम्' उद्गातॄणां प्रैषः॥

अच्छावाकविषये प्रश्नोत्तरे दर्शयति— "अथाहास्त्यच्छावाकस्य प्रवरा३ः नाँ३ इति? अस्तीति ब्रूयाद्; यदेवैन मध्वर्युराहाच्छावाक वदस्व यत्ते वाद्य मित्येषो ऽस्य प्रवर."–इति। अच्छावाकव्यतिरिक्तानां वषट्कर्त्तॄणां 'प्रवरः' प्रकर्षेण वरणमस्ति। तथा च सूत्रकार आह—"प्रवृताहुतीर्जुह्वति वषट्कर्त्तारोऽन्येऽच्छावाकात्"–इति (आश्व॰ श्रौ॰ ५.३.१२.)। सूत्रान्तरेऽप्येव मुक्तम्— "यथाप्रवृतं § प्रवृतहोमौ जुह्वति"–इति (कात्या॰ श्रौ॰ ९. ८. १६.)। अतोऽन्येषां प्रवरसद्भावोऽवगतः, अच्छावाकस्य नावगतः; न्यायेन त्वितरदृष्टान्तेन प्रवरो ऽपेक्षितः; अतो ऽस्ति नवेति संशयः। तत्रास्तीत्युत्तरं ब्रूयात्। यद्यप्यन्येषा

---

* "अणो ऽप्रगृह्यस्यानुनासिकः"–इति पा॰ ८. ४. ५७।

† "मित्रावरुणौ प्रशास्तारौ प्राशस्त्रात्"–इति कात्या॰ श्रौ॰ ९. ८. १०। अत एव ऋत्विङ्नामपरिगणनसूत्रेषु प्रशास्तेति न दृश्यते, दृश्यते मैत्रावरुण इति (आश्व॰ श्रौ॰ ४. १. ६; कात्या॰ श्रौ॰ ७. १. ६; आप॰ श्रौ॰ १०. १. ९.)।

‡ "मन्त्रं जपन्"–इति दृश्यमानसर्वभाष्यपुस्तकेषु।

§ "यथाप्रवृत मिति। प्रथमं होता, ततो ऽध्वर्युः, ततः प्रतिप्रस्थाता, प्रशास्ता, ब्राह्मणाच्छंसी, पोता, नेष्टा, आग्नीध्रः, यजमान इति च तट्टीकायां याज्ञिकदेवः।

मिव स्पष्टः प्रवरो नास्ति, तथापि पुरोडाशशकलं प्रत्त मिड़ामिवोद्यम्यासीन मच्छावाकम्, अच्छावाक ! यत्ते 'वाद्यं' वक्तव्य मस्ति, तद्वदस्व इति *, सोऽय मच्छावाकसम्बोधनेन प्रवरसमानत्वात् प्रवर इत्युच्यते ॥

इत्थ मग्निष्टोमसंस्थे होत्रकविषयव्यापारं परिसमाप्याधुना उक्थसंस्थेष्वहस्सु प्रश्नोत्तरे दर्शयति— "अथाह यदैन्द्रावरुणं मैत्रावरुणस्तृतीयसवने शंसत्यथ कस्मादस्याग्नेयौ स्तोत्रियानुरूपौ भवत इत्यग्निना वै मुखेन देवा असुरानुक्थेभ्यो निर्जघ्नुस्तस्मादस्याग्नेयौ स्तोत्रियानुरूपौ भवतः"-इति। 'अथ' अच्छावाकप्रवरसम्पादनानन्तरं ब्रह्मवादी प्रश्न माह। मैत्रावरुणस्तृतीयसवने "इन्द्रावरुणा युवम्"-इत्यादिक मैन्द्रावरुणं (सं० ७. ८२.) सूक्तं शंसति। तस्य शस्त्रादौ "एह्यू षु"-इत्याग्नेयः (सं० ६. १६. १६-१८.) स्तोत्रियः, "आग्निरगामि"-इत्याग्नेयोऽनुरूपः (सं० ६. १६. १९-२१.) ; तदेतद् व्यधिकरणत्वाद् अयुक्तम् ; ऐन्द्रावरुणाभ्यां स्तोत्रियानुरूपाभ्यां भवितव्यम् ? इति प्रश्नः। अग्निनेत्यादिना तस्योत्तरम्। यदा देवा असुरानुक्थेभ्यो 'निर्जघ्नुः' निःशेषेण हतवन्तः, दूरे अपसारितवन्तः ; तदानी मग्निः 'मुखं' प्रधानभूतं कृत्वा तन्मुखेन निस्सारितवन्तः। एतच्च "अग्निष्टोमं वै देवा अश्रयन्त"-इत्यादौ विस्पष्ट मुदीरितम् †। 'तस्मात्' असुरनिस्सारणेऽग्नेर्मुख्यत्वादाग्नेयौ स्तोत्रियानुरूपौ युक्तौ ॥

ब्राह्मणाच्छंस्यच्छावाकविषयप्रश्नोत्तरे दर्शयति— "अथाह

---

* तथाहि सूत्रम्—"पुरोडाशशकलं प्रत्त मिडा मिवोद्यम्याच्छावाक वदस्वेत्युक्तो ऽच्छावो अग्नि मवस इति तृच मन्वाह"-इति आश्व० श्रौ० ५. ७. २।

† ३ प० ५अ० ५ख० (२भा० २३५ पृ०)।

यदैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसी तृतीयसवने शंसत्यैन्द्रावैष्णव मच्छावाकः, कथ मेनयोरैन्द्राः स्तोत्रियानुरूपा भवन्तीतीन्द्रो ह स्म वा असुरानुक्थेभ्यः प्रजिगाय ; सो ऽब्रवीत्,— कश्चाहञ्चेत्यहञ्चाहञ्चेति ह स्म देवता अन्ववयन्ति ; स यदिन्द्रः पूर्वः प्रजिगाय, तस्मादेनयोरैन्द्राः स्तोत्रियानुरूपा भवन्ति ; यदहञ्चाहञ्चेति ह स्म देवता अन्ववयुस्तस्मान्नानादेवत्यानि शंसतः"–इति । तृतीयसवने ब्राह्मणाच्छंसिनः "प्र मंहिष्ठाय"–इत्यैन्द्राबार्हस्पत्यं (सं० १. ५७.) शस्त्रम् । तस्यादौ स्तोत्रियानुरूपावैन्द्रौ,—"वय मु त्वा"–इति (सं० ८. २. १६–१८.) स्तोत्रियः, "यो न इदम्"–इत्यनुरूपः (सं० ८. २१. ९, १०.)। तथा अच्छावाकस्य "ऋतुर्जनित्री"–इत्यादिक मैन्द्रावैष्णवं (सं० २. १३.) शस्त्रम् । तस्याद्यावैन्द्रौ स्तोत्रियानुरूपौ,—"अधाहीन्द्र गिर्वणः"–इति (सं० ८. ९८. ७–९.) स्तोत्रियः, "इयन्त इन्द्र गिर्वणः"–इत्यनुरूपः (सं० ८. १३. ४–६.)। तदेतद् वैयधिकरण्य मुपजीव्य पूर्ववत् प्रश्नः । इन्द्रो हेत्यादिक मुत्तरम् । इन्द्रः स्वयम् 'उक्थेभ्यः' शस्त्रेभ्यः सकाशादसुरान् 'प्रजिगाय' प्रकर्षेण जितवान्, प्राद्रावदित्यर्थः । तदानी मिन्द्र इतरान् देवान् प्रति सहाय मपेक्षमाणो युष्माकं मध्ये कश्चाहञ्चोभौ युद्धार्थं गच्छाव इत्यब्रवीत् । तदानीं देवानां मध्ये एकैको ऽहं चाहं च तव सहायभूत इत्युक्त्वा देवतास्त मिन्द्रम् 'अन्ववयन्ति' तस्य पृष्ठतो गच्छन्ति । यस्मात् स इन्द्रः सर्वेषां देवानां मध्ये स्वयं पूर्वगामी सन्नसुरान् प्रजिगाय, 'तस्मात्' 'एनयोः' ब्राह्मणाच्छंस्यच्छावाकशस्त्रयोरप्यैन्द्रा स्तोत्रियानुरूपा युज्यन्ते । 'यदु' यदप्येतदस्ति, अहं चाहञ्च तव सहायभूत इति ब्रुवत्यो देवता इन्द्रम् 'अन्ववयुः' अन्वगच्छन्, 'तस्मात्' कारणाद्

देवतान्तराणा मपीन्द्रवत्पूज्यत्वात् नानादेवताकानि सूक्तानि ब्राह्मणाच्छंस्यच्छावाकौ शंसतः ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां तृतीयाध्याये
(अष्टाविंशाध्याये) षष्ठः खण्डः ॥ ६ (१४) ॥

॥ अथ सप्तमः खण्डः ॥

अथाह यद्वैश्वदेवं वै तृतीयसवन॑मथ कस्मादेतान्यैन्द्राणि जागतानि सूक्ता॑नि तृतीयसवन आरम्भणीयानि शस्यन्त इ॑तीन्द्र मेवैतैरारभ्य यन्तीति ब्रूया॑दथो यज्जागतं वै तृतीयसवनं॑ तज्जगत्काम्यै॑व तद्यत् किञ्चात ऊर्द्धं छन्दः शस्यते॑ तद्ध सर्वं जागतं भ॑वत्येतानि चेदैन्द्राणि जागतानि सूक्ता॑नि तृतीयसवन आरम्भणीयानि शस्यन्ते॑ ऽथैतत्* त्रैष्टुभ॑ मच्छावाकोऽन्ततः शंसति॑ सं वां कर्मणेति॑ यदेव पनाय्यं कर्म॑ तदेतदभिवदति॑ स मिषेत्यन्नं वा इषो॑† ऽन्नाद्यस्यावरुद्ध्या॑ अरिष्टैर्नः पथिभिः पारयन्तेति॑ स्वस्तिताया एवैतदहरहः शंसत्य॑थाह यज्जागतं वै

---

* "शस्यन्तेऽथ" क।

† "इको" क।

तृतीयसवनं॑ मथ कस्मादेषां त्रिष्टुभः॑ परिधानीया भवन्तीति॑ वीर्यं वै त्रिष्टुब्॑ वीर्य एव तदन्ततः प्रतितिष्ठन्तो यन्ती॑य मिन्द्रं वरुण मष्टमे गीरिति मैत्रावरुणस्य॑ बृहस्पतिर्नः परिपातु पश्चादिति ब्राह्मणाच्छंसिन॑ उभा जिग्यथुरित्यच्छावाकस्यो॑भौ हि तौ जिग्य॑तुर्न पराजयेथे न पराजिग्य इति॑ न हि तयोः कतरश्चन पराजिग्य॑ इन्द्रश्च विष्णो यदपस्पृधेथां॑ त्रेधा सहस्रं वि तदैरयेथा मिती॑न्द्रश्च ह वै विष्णुश्चासुरैर्युयुधाते॑ तान् ह स्म जित्वोचतुः॑ कल्पामहा इति॑ ते ह तथेत्यसुरा ऊचुः॑ सोऽब्रवीदिन्द्रो यावदेवायं विष्णुस्त्रिर्विक्रमते॑ तावदस्माक॑ मथ युष्माक मितरदिति॑ स इमांल्लोकान् * विचक्रमे॑ऽथो वेदानथो वाचं॑ तदाहुः किं तत् सहस्र मिती॑मे लोका इमे वेदा॑ अथो वागिति ब्रूया॑दैरयेथा मैरयेथा मित्य॑च्छावाक उक्थ्ये ऽभ्यस्यति॑ स हि तत्रान्यो भवत्य॑ग्निष्टोमे होता ऽतिरात्रे॑ च स हि तत्रान्यो भवत्य॑भ्यस्येत् † षोळशिनीं॑३ ‡ नाभ्यस्ये३त् इति॑ अभ्यस्येदित्या॑हुः कथ मन्येष्वहःस्वभ्यस्यति॑ कथ मत्र नाभ्यस्येदिति॑ तस्मादभ्यस्येत्॑ § ॥ ७ (१५) ॥

---

* "इमान् लोकान्" क, "इमाल्लोकान्" च। † "भवत्यभ्यसी३त्" क।

‡ "षोळशिनीँ ३" ख, ग; "षोळशिनी३" घ, च। § "तस्मादभ्यसी३त्" क।

अथ तेषा मेव शस्त्राणां छन्दोदैवतविषये प्रश्नोत्तरे दर्शयति—“अथाह यद् वैश्वदेवं वै तृतीयसवन मथ कस्मादेतान्यैन्द्राणि जागतानि सूक्तानि तृतीयसवन आरम्भणीयानि शस्यन्त इतीन्द्र मेवैतैरारभ्य यन्तीति ब्रूयादथो यज्जागतं वै तृतीयसवनं तज्जगत्काम्यैव; तद्यत् किञ्चात ऊर्ध्वं छन्दः शस्यते, तद्ध सर्वं जागतं भवत्येतानि चेदैन्द्राणि जागतानि सूक्तानि तृतीयसवन आरम्भणीयानि शस्यन्ते”—इति। ‘अथ’ ऐन्द्रावरुणादिशस्त्रेष्वैन्द्रस्तोत्रियानुरूपवर्णनानन्तरम्, ब्रह्मवादी प्रश्न माह। तृतीयसवनं वैश्वदेवं बहुदेवताकं यस्मात्, तस्माद् वैश्वदेवान्येव सूक्तानि तत्रोचितानि; अथैवं सति तानि परित्यज्य कस्मात् कारणादेतान्यारम्भणीयानि सूक्तान्यैन्द्राणि शस्यन्ते? सति चैन्द्रत्वे त्रिष्टुभो युक्तत्वात् तत्परित्यागेन जागतानि कस्मात् शस्यन्ते? “चर्षणीधृतम्”—इति (सं० ३. ५१.) मैत्रावरुणस्य सूक्तम्, “प्र मंहिष्ठाय”—इति (सं० १. ५७.) ब्राह्मणाच्छंसिनः सूक्तम्, “ऋतुर्जनित्री”—इत्यच्छावाकस्य (सं० २. १३.) सूक्तम्। एतेषु सूक्तेष्वैन्द्रप्रश्नोत्तर मुच्यते। ऐन्द्रत्वे सत्येतैः सूक्तैरिन्द्र मेवारभ्य प्रवृत्ता भवन्ति; इन्द्रो हि प्रारब्धस्याविघ्नेन समाप्तिकारीत्युत्तरं ब्रूयात्। ‘अथो’ अपि च त्रिष्टुप्परित्यागेन जागतसूक्त मिति यदस्ति, तत् तृतीयसवनस्य जागतत्वात् ‘जगत्काम्यैव’ जगत्कामनयैव प्रवृत्तिः कृता भवति। अपि च तथा सत्यत ऊर्ध्वं मन्यदपि यत् किञ्चित् छन्दः शस्यते, तत् सर्वं जगतीच्छन्दस्क मेव सम्पद्यते॥

आरम्भणीयाना मैन्द्राणां सूक्तानां जागतत्वाद्यस्य छन्दोन्तरस्य जागतत्वं सम्पद्यते, तच्छन्दोन्तरं दर्शयति—“अथैतत् त्रैष्टुभ मच्छावाकोऽन्ततः शंसति, सं वां कर्मणेति; यदेव पनाय्यं

कर्म, तदेतदभिवदति"–इति । आरम्भणीयशंसनादूर्द्ध्व मच्छावाकः 'अन्ततः' शस्त्रस्यान्ते "सं वां कर्मणा"–इत्येतत् सूक्तं (सं० ६.६९.) त्रिष्टुप्छन्दस्कं शंसेत्। अत्रेन्द्राविष्णू सम्बोध्य 'वां' युवा मनेन कर्मणा 'संहिनोमि' सम्यक् प्रीणयामि, इत्येतदुच्यते। तस्य च कर्मशब्दस्यार्थो यदेवेत्यादिना अभिधीयते। पनतिधातुस्तुत्यर्थे वर्त्तते; "पण व्यवहारे स्तुतौ च, पन च"–इति (भ्वा० ४३९, ४४०.) वैयाकरणैर्धातुषु पठ्यमानत्वात्। तथा सति 'पनाय्यं' स्तुत्यं सोमपानाख्यं कर्म; तदयं मन्त्रो ऽभिवदति * ॥

सं वां कर्मणेत्येतत्प्रथमपादस्य पूर्वभागं व्याख्यायोत्तरभागमनूद्य व्याचष्टे—"स मिषेत्यन्नं वा इषोऽन्नाद्यस्यावरुद्ध्यै"–इति। 'इषा' अन्नेन 'युवाम्' इन्द्राविष्णू 'संहिनोमि'–इत्यन्वयः। अत्रान्नमेवेषेत्यस्य शब्दस्यार्थः। इषशब्दस्येषा इति प्रथमाबहुवचनम्। तस्मादन्नवाचित्वे सति एतच्छंसन मन्नाद्यस्य प्राप्तये भवति ॥

अस्या ऋचश्चतुर्थपाद मनूद्य व्याचष्टे— "अरिष्टैर्नः पथिभिः पारयन्तेति स्वस्तिताया एवैतदहरहः शंसति"–इति। सः अस्मान् 'अरिष्टैः' हिंसारहितैः 'पथिभिः' स्वर्गमार्गैः 'पारयन्ता' कर्मणः पारं फलरूपं नयन्तौ, इन्द्राविष्णू इत्यर्थः। एतस्य पादस्य शंसनं 'स्वस्तिताया एव' क्षेमार्थ मेव भवति। तस्मादच्छावाकः 'एतद्' वचनं अहर्गणेषु प्रतिदिनं शंसति ॥

परिधानीयानां छन्दसि प्रश्नोत्तरे दर्शयति—"अथाह यज्ञागतं वै तृतीयसवन मथ कस्मादेषां त्रिष्टुभः परिधानीया भवन्तीति; वीर्य्यं वै त्रिष्टुब् वीर्य एव तदन्ततः प्रतितिष्ठन्तो यन्ति"

---

* "सं वां कर्मणा स मिषा हिनोमीन्द्राविष्णू अपसस्पारे अस्य।
जुषेथां यज्ञं द्रविणं च धत्त मरिष्टैर्न पथिभिः पारयन्ता ॥"–इति सं० ६. ६९. १ ।

–इति। तृतीयसवनस्य जागतत्वेन परिधानीया अपि जगत्य एव युक्ताः; एतत्परित्यागेन त्रिष्टुभां स्वीकारे प्रतिदिनं किं कारणम्? इति प्रश्नः। वीर्य्यं मित्याद्युत्तरम्। त्रिष्टुभो वीर्य्यस्वरूपत्वात् तया परिधाने सति शस्त्रस्यान्ते वीर्य एव प्रतिष्ठिताः सन्तो 'यन्ति' वर्त्तन्ते॥

होत्रकाणां त्रयाणा मुक्तास्त्रिष्टुभः परिधानीया उदाहृत्य प्रदर्शयति— "इय मिन्द्रं वरुण मष्टमे गीरिति (सं० ७.८४.५.) मैत्रावरुणस्य, बृहस्पतिर्नः परिपातु पश्चादिति (सं० १०. ४२. ११.) ब्राह्मणाच्छंसिन, उभा जिग्यथुरित्यच्छावाकस्य (सं० ६. ६९. ८.)"–इति॥

तदिद मन्तिमोदाहरणं व्याचष्टे—"उभौ हि तौ जिग्यतुः"–इति। याविन्द्राविष्णू 'तावुभौ' 'जिग्यतुः' युद्धे जयं प्रापतुरिति प्रसिद्धम्॥

ऋचः पूर्वार्द्धे "उभा जिग्यथुः"–इत्यमु मंशं व्याख्यायांशान्तरव्याख्यानं पठति— "न पराजयेथे न पराजिग्य इति"–इति। तस्यार्द्धस्य "कतरश्च नैनोः"–इत्ययं शेषो ब्राह्मणेनानुदाहृतोऽप्यर्थावबोधाय द्रष्टव्यः [*]। तस्य च सर्वस्याय मर्थः— हे 'इन्द्राविष्णू' युवां 'न पराजयेथे' कदाचिदपि पराजयं न प्राप्तवन्तौ। 'एनोः' एनयोः इन्द्राविष्ण्वोर्मध्ये 'कतरश्चन' एकोऽपि 'न पराजिग्ये' पराजयं न प्राप। एकैकस्यापि यदा पराजयो नास्ति, तदानी मुभयोर्मिलितयोर्नास्तीति किमु वक्तव्य मिति॥

उक्तस्यार्द्धस्य तात्पर्य्यं दर्शयति—"न हि तयोः कतरश्चन पराजिग्ये"–इति॥

---

[*] "उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः"–इति ऋक्पूर्वार्द्धः।

उत्तरार्द्धं पठति—"इन्द्रश्च विष्णोर्यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथा मिति"–इति। 'यत्' यदा हे विष्णो! त्वञ्च इन्द्रश्च युवां उभौ 'अपस्पृधेथां' स्पर्द्धा मसुरैः सह युद्धं कृतवन्तौ, 'तत्' तदानीं सहस्रं 'त्रेधा' विभज्य 'ऐरयेथां' तं तं भागं तस्मै तस्मै स्वामिने समर्पितवन्तौ ॥

तस्य तात्पर्य्यं दर्शयितु मितिहास माह— "इन्द्रश्च ह वै विष्णुश्चासुरैर्युयुधाते; तान् ह स्म जित्वोचतुः,—कल्पामहा इति; ते ह तथेत्यसुरा ऊचुः; सोऽब्रवीदिन्द्रो यावदेवायं विष्णुस्त्रिर्विक्रमते तावदस्माक मथ युष्माक मितरदिति; स इमाँल्लोकान्विचक्रमे ऽथो वेदानथो वाचं; तदाहुः किं तत् सहस्र मितीमे लोका इमे वेदा अथो वागिति ब्रूयाद्"–इति। योऽय मिन्द्रो यश्च विष्णुस्तावुभावसुरैः सह 'युयुधाते' युद्धं कृतवन्तौ। ततस्तावसुरान् जित्वा तैः सहेद मूचतुः,— हे असुराः! वयं सर्वे 'कल्पामहै' विभागं करवामहा इति। असुरास्तथेत्यङ्गीचक्रुः। तदानी मसुरैः सह इन्द्र एव मब्रवीत,—'अयं' विष्णुः 'यावद्' वस्तूद्दिश्य 'त्रिर्विक्रमते' वस्तुजाते पादत्रयं प्रक्षिपति, 'तावद्' वस्तु सर्व मस्माकं भवतु; अथ 'इतरत्' अवशिष्टं युष्माक मस्त्विति। एव मसुरैः सह समयं कृत्वा स विष्णुः 'इमान् लोकान्' त्रीनपि एकेन पादेन 'विचक्रमे' विक्रान्तवान्, लोकत्रयस्योपरि एक मेव पादं प्रक्षिप्तवान्। 'अथो' तदनन्तरं 'वेदान् विचक्रमे' सर्वेषां वेदाना मुपरि एकं पादं प्रक्षिप्तवान्। 'अथो' तदनन्तरं 'वाचं विचक्रमे' सर्वस्या वाच उपरि तृतीयं पादं प्रक्षिप्तवान्। एवं पादत्रयेणाक्रान्तं सर्व मिन्द्राविष्णवोर्भाग आसीत्। एवं विभागे व्यवस्थिते सति 'तत्' तन्मन्त्रार्थे ब्रह्मवादिनः प्रश्न माहुः। त्रेधा

सहस्र मिति मन्त्रे यदुक्तं, तत्र सहस्रशब्देन कि मुच्यते ? इति। इम मित्यादिकं तदुत्तरम्। य इमे त्रयो लोकाः, ये चेमे वेदाः, या चेयं वाक्, तदेतदपरिमितत्वस्योपलक्षकेण सहस्रशब्देन विवक्षित मित्युत्तरं ब्रूयात्। यद्यप्ययं मन्त्रस्तैत्तिरीयाणां सप्तमे काण्डे ऽतिरात्रस्य यागे * दक्षिणारूपगोसहस्रविषयत्वेन उदाहृतः †, तथाप्यत्र सहस्रशब्दः सर्वजगद्विषयत्वेन श्रुत्यैव व्याख्यायत इत्युभयार्थत्व मस्तु ॥

यदुक्त माश्वलायनेन उत्तमे शस्त्रे परिधानीयाया उत्तमे वचने उत्तमं चतुरक्षरं द्विरुक्त्वा प्रणुयादिति ‡, त मेव चतुरक्षराभ्यासं विधत्ते—"ऐरयेथा मैरयेथा मित्यच्छावाक उक्थ्ये ऽभ्यस्यति ; स हि तत्रान्त्यो भवति"–इति। उक्थ्यनामके क्रतावच्छावाकः "ऐरयेथाम्"–इति चतुरक्षरभागं द्विरभ्यस्येत्। 'स हि' भागः 'तत्र' अच्छावाकशस्त्रे ऽन्त्यो भवति ॥

अच्छावाकस्याभ्यासं विधाय होतुरभ्यासं विधत्ते—"अग्निष्टोमे होतातिरात्रे च ; स हि तत्रान्त्यो भवति"–इति। अहर्गणेषूक्थ्यसंस्थायां यथा अच्छावाकस्यान्तिमे शस्त्रे ऽभ्यासः। तथाग्निष्टोमसंस्थाया मतिरात्रसंस्थायां होतान्तिमे शस्त्रेऽन्तिमं

---

* "त्रेधा विभक्तं वै त्रिरात्रे"–इति (ए. सो. मु. तै० सं० ६ भा० १८४ पृ० ९ पं०) श्रवणात्त्ववगम्यते त्रिरात्रयागे इति ; तदिह लेखकप्रमादप्रवाहेन भवितव्यम्, अपिवात्रातिरात्रप्रक्रम इति अतिरात्रस्येतेत्रवागमल्लेखन्यग्रे सायणस्येति।

† "सोमो वै सहस्र मविन्दत्०—०उभा जिग्यथुर्न पराजयेथे०—०सहस्रं वि तदैरयेथाम्०—०सहस्रतम्या वै यजमानः सुवर्गं लोक मेति०—० ता मग्नीधे वा ब्रह्मणे वा होत्रे वोद्गात्रे वाध्वर्यवे वा दद्यात्, सहस्र मस्य सा दत्ता भवति०—०देवान् गच्छति"–इति तै० सं० ७. १. ६, ७ अनु०।

‡ "उत्तमान्युत्तमे, चतुरक्षराणि त्वच्छावाकः"–इति तत्सूत्रम् (६. ४. ५, ६.)।

चतुरक्षरभाग मभ्यस्येत् । 'स हि' होता 'तत्र' उभयत्र 'अन्त्यः' शंसिता भवति । अग्निष्टोमे "यज्जरित्रे–यज्जरित्रोम्"–इति चतुरक्षराभ्यासः * ; अतिरात्रे तु "धेहि चित्रं–धेहि चित्रोम्"–इति चतुरक्षराभ्यासः † ॥

षोडशिसंस्थायां विचारपूर्वकं चतुरक्षराभ्यासं विधत्ते—"अभ्यस्येत् षोळशिनीं३ नाभ्यस्ये३त् इति ? अभ्यस्येदित्याहुः ; कथ मन्येष्वहस्स्वभ्यस्यति, कथ मत्र नाभ्यस्येदिति, तस्मादभ्यस्येत्"–इति । विचारार्थं प्लुतिद्वयम् । तत्राभ्यस्येदिति निर्णय माहुः । तत्रेय मुपपत्तिः— इतरेष्वहस्सु चतुरक्षरभाग मभ्यस्यात्रैव परित्यागे कारणं नास्तीति । तस्मादित्युपसंहारः । "सख्युः पदे–सख्युः पदोम्"–इति चतुरक्षराभ्यासो द्रष्टव्यः ‡ ॥ ७ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां तृतीयाध्याये
(अष्टाविंशाध्याये) सप्तमः खण्डः ॥ ७ (१५) ॥

---

* "एवा न इन्द्रो मघवा०—० साहिनं यज्जरित्रे (सं० ४. १७. २०.)"–इत्येषैवर्क् अग्निष्टोमीयशस्त्रपरिधानीया । अतोऽस्या अन्त्याक्षरचतुष्टयस्याभ्यासः । "एवा न इन्द्रो मघवा विरप्शीत्युत्तमया परिदधाति"–इत्याम्नातं पुरस्तात् (२ भा० १७३ पृ० १६ पं०) । "'एवा न इन्द्रो मघवा विरप्शीति परिदध्यात्'–इति च आश्व० श्रौ० ५. २०. ६ ।

† "बृहस्पते अति०—० द्रविणं धेहि चित्रम्'–इति सं० २. २३. १५ । "बृहस्पते अति यदर्यो अर्हादित्येतया परिदध्यात्"–इति पु० २भा० २९९पृ० ८ पं० । "बृहस्पते०—० दिति परिधानीया"–इति च आश्व० श्रौ० ६. ५. १९ ।

‡ "उद्यद् ब्रध्नस्य०—० सप्त सख्युः पदे"–इति सं० ८. ६९. ७ । उद्यद् ब्रध्नस्य विष्टपमित्युत्तमया परिदधाति"–इति पु० २भा० २६० पृ० ९ पं० । "उद्यद्०—० मिति परिधानीया"–इति च आश्व० श्रौ० ६. २. १२ ।

॥ अथ अष्टमः खण्डः ॥

अथाह यन्नाराशंसं वै तृतीयसवन॑ मथ कस्मादच्छावाकोऽन्तत॑ः शिल्पेष्वनाराशंसीः शंसतीति॑ विकृतिर्वै नाराशंसं॑ किमिव च वै किमिव च रेतो विक्रियते॑ तत्तदा विकृतं प्रजातं भवत्य॑थैतन् मृद्विव छन्द॑ः शिथिरं यन्नाराशंस॑ मथैषोऽन्त्यो यदच्छावाक॑स्तद् दृळ्हतायै॑ दृळ्हे प्रतिष्ठास्याम इति॑ तस्मादच्छावाकोऽन्तत॑ः शिल्पेष्वनाराशंसीः शंसति॑ दृळ्हतायै॑ दृळ्हे प्रतिष्ठास्याम इति॑ दृळ्हे प्रतिष्ठास्याम इति॑ ॥ ८ (१६) ॥

॥ इत्यैतरेयब्राह्मणे षष्ठपञ्चिकायां तृतीयोऽध्यायः ॥ ३ ॥

अच्छावाकविषये पुनरपि प्रश्न मुत्थापयति — "अथाह यन्नाराशंसं वै तृतीयसवन मथ कस्मादच्छावाकोऽन्ततः शिल्पेष्वनाराशंसीः शंसतीति ?"–इति। 'अथ' चतुरुत्तराभ्यासकथनानन्तरं ब्रह्मवादी प्रश्न माह। 'यद्' यस्मात् कारणात् तृतीयसवनं 'नाराशंसं वै' नरा मनुष्याः ऋभवोऽङ्गिरसो वा यत्र शस्यन्ते, तत् नाराशंसम्; तत्सम्बन्धिनि तृतीयसवने सति कस्मात् कारणादच्छावाकोऽन्ततः तृतीयसवनं शिल्पाख्येषु * शस्त्रेषु नाराशंस-

---

* "अत ऊर्ध्वं मनुरूपेभ्यो विकृतानि शिल्पानि शंसेयुः"–इति आश्व० श्रौ० ८. २. २। 'वालखिल्यादीनि शिल्पसंज्ञकानि'–इति तद्वृत्तौ नारायणः। तानि च शिल्पानि द्विवि-

सम्बन्धिरहिता ऋचः शंसति,— "ऋतुर्जनित्री"-इत्यादिकम् (सं० २.१३.१–१३.) मच्छावाकः शंसति †; न च तत्र नराः शस्यन्ते, तत् कथ मुपपादितम् ? इति प्रश्नः ॥

तस्योत्तर माह—"विकृति वैं नाराशंसं, कि मिव च वै कि मिव च रेतो विक्रियते, तत् तदा विकृतं प्रजातं भवत्यथैतन् मृद्विव च्छन्दः शिथिरं यन्नाराशंस मथैषोऽन्त्यो यदच्छावाकस्तद् दृळ्हतायै दृळ्हे प्रतिष्ठास्याम इति"–इति। गर्भाशये निषिक्तस्य रेतसो 'विकृतिर्वैं' विकारपरिणामैव 'नाराशंसं' सवनम्, अहः-परिणामक्रमेणैव भवति। लोकेऽपि निषिक्तं रेतः 'कि मिव च वै कि मिव च' क्रमेण किञ्चित् किञ्चिदेव विक्रियते। तथा च गर्भोपनिषदि— "एकरात्रोषितं कललं भवति, सप्तरात्रोषितं बुद्बुदं भवति, अर्द्धमासाभ्यन्तरेण पिण्डो भवति"–इत्यादि। 'तत्' तादृशक्रमेण विक्रियमाणं रेतो यदा साकल्येन 'विकृतं' विवृद्धं भवति, तदा 'प्रजातं भवति' पुत्रादिरूपेणोत्पद्यते। तस्मात् नाराशंसे तृतीयसवने विकारस्थानीयो ऽन्तिमो भागः, तत्र सम्पूर्णतयोत्पत्त्यर्थं मनाराशंसीना मृचां शंसन मित्यभिप्रायः। अथान्यदपि कारण मस्ति। 'यत् नाराशंसं छन्दः' मनुष्यशंसनसम्बन्धि छन्दोऽस्ति, तत् 'मृद्विव' मार्द्दवोपेत मिव। तस्यैव व्याख्यानं

धानि, विकृतान्यविकृतानीति। विहरण-न्यूङ्ख-निनर्द्दादीनि विकृतानि; वालखिल्यादीन्यविकृतानि। एतत्सूत्रे विकृताना मेव ग्रहणम्; विकृतानीतिवचनात्। इत उत्तरम् "ऊर्द्ध्वं मारम्भणीयाभ्यः प्रकृत्या शिल्पानि शंसेयुः (४.७.)"-इति सूत्रे ऽविकृताना मेव; प्रकृत्येतिवचनात्। "नित्यशिल्पन्विद महः (४.५.)"-इत्यादौ तूभयविधशिल्पानां ग्रहणं भवति; विशेषतो निर्द्देशाभावात्।

† "ऋतुर्जनित्रीति नित्यान्यैकाहिकानि"-इति आश्व० श्रौ० ८.४.३।

'शिथिरम्'-इति, शिथिल मदृढ मित्यर्थः । अस्यापि च योऽच्छावाकोऽस्ति, 'एषोऽन्त्यः' ऋत्विक् ; न ह्येतदीयशंसनस्योपरि किञ्चिदन्यच्छंसन मस्ति । अतोऽन्तिमत्वात् दृढः । तस्मात् 'दृळ्हतायै' दार्ढ्यार्थं 'दृळ्हे' स्थाने प्रतिष्ठास्यामः 'इति' अनेनाभिप्रायेण तासा मनाराशंसीना मृचां शंसन मित्यर्थः ॥

उपपादित मर्थ मुपसंहरति—"तस्मादच्छावाकोऽन्ततः शिल्पेष्वनाराशंसीः शंसति दृळ्हतायै, दृळ्हे प्रतिष्ठास्याम इति, दृळ्हे प्रतिष्ठास्याम इति"-इति ॥ अभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥ ८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां तृतीयाध्याये
(अष्टाविंशाध्याये) अष्टमः खण्डः ॥ ८ (१६) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'नामभाष्ये
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायाः तृतीयाध्यायः ॥

॥ अथ चतुर्थाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ॐ॥ यः* श्वः† स्तोत्रियस्त मनुरूपं कुर्वन्ति॑ प्रातःसवने ऽहीनसन्तत्यै॑ यथा वा एकाहः सुत॑ एव महीनस्त॑द्यथैकाहस्य सुतस्य॑ सवनानि सन्तिष्ठमानानि यन्त्॑येव मेवाहीनस्याहानि सन्तिष्ठमानानि यन्ति॑ तद्यच्छ्वः‡ स्तोत्रिय मनुरूपं कुर्वन्ति॑ प्रातस्सवने ऽहीनसन्तत्या॑ अहीन मेव तत्सन्तन्वन्ति॑ ते वै देवाश्च ऋषयश्चाद्रियन्त॑ समानेन यज्ञं सन्तनवामेति॑ त एतत् समानं यज्ञस्यापश्यन्त्स॑मानान् प्रगाथान्त्स॑मानीः प्रतिपदः॑ समानानि सूक्ता॑न्योकस्सारी वा इन्द्रो॑ यत्र वा इन्द्रः पूर्वं गच्छत्यै॑व तत्रापरं गच्छति॑ यज्ञस्यैव सेन्द्रतायै॑ ॥ १ (१७) ॥

उन्नीयमानसूक्तानि तथा प्रस्थितयाज्यकाः ।
प्रश्नोत्तराभ्यां सम्प्रोक्ताः प्रयोगस्य च निर्णयः ॥ १ ॥

अथाहर्गणेषु होत्रकाणां माध्यन्दिनीयशस्त्रक्लृप्तिर्वक्तव्या; तत्र प्रथमं तावत् सर्वत्र विहित मर्थं मनूद्य प्रशंसति— "यः श्वः स्तोत्रियस्त मनुरूपं कुर्वन्ति प्रातस्सवने ऽहीनसन्तत्यै"-इति ।

---

*, †, ‡ ग-ङ-च-पुस्तकेष्विहेह विसर्गो नास्ति ।

अहर्गणेषु ‘श्वः’ परेद्युर्यस्मिंस्तृचे सामगाः स्तोत्रं कुर्वन्ति, तं स्तोत्रियं पूर्वेद्युर्होतारः शस्त्रेष्वनुरूपं कुर्वन्ति। एतच्च प्रातस्सवने एव *। तच्चानुरूपकरण महीनस्य सन्तत्यै सम्पद्यते। अह्नां समूहरूपः क्रतुरहीनः, स चैकैकस्मिन्नहनि विच्छिन्नो मा भूदित्यहर्द्वयसन्धानार्थं भविष्यत्यहनि स्तोत्रियस्य भूतेऽहनि अनुरूपत्वकरण मह्नां भेदेऽपि फलैक्यात् समूहप्रयोग एक एव ; ततः सन्ततिरपेक्षिता। अय मर्थः सप्तविंशाध्याये व्याख्यातः—“स्तोत्रियं स्तोत्रियस्यानुरूपं कुर्वन्ति प्रातस्सवने ऽहरेव तदह्नोऽनुरूपं कुर्वन्ति”–इति (२३७ पृ०)। तस्य व्याख्यान मिदम्—“श्वः स्तोत्रियः”–इति ॥

अभिप्रेतविशेषस्य विधानादहर्भेदेऽपि प्रयोगैक्येन सान्तत्यं दृष्टान्तेनोपपादयति— “यथा वा एकाहः सुत एव महीनस्तद्यथैकाहस्य सुतस्य सवनानि सन्तिष्ठमानानि यन्त्येव मेवाहीनस्याहानि सन्तिष्ठमानानि यन्ति; तद्यच्छ्वः स्तोत्रिय मनुरूपं कुर्वन्ति, प्रातस्सवने ऽहीनसन्तत्या अहीन मेव तत् सन्तन्वन्ति”–इति। एकस्मिन्नेवाहनि निष्पन्नो ज्योतिष्टोमः ‘एकाहः’। स यथा ‘सुतः’ सोमाभिषवेण कृत्स्नो निष्पादितः, एवम् ‘अहीनः’ अहर्गणोऽपि सोमाभिषवेण निष्पाद्यते। तावेव दृष्टान्तदार्ष्टान्तिकौ तद्यथेत्यादिना स्पष्टीक्रियते। ‘तत्’ तस्यैकाहस्य ‘सुतस्य’ सोमाभिषवयुक्तस्यैव सतः क्रतोरवयवभूतानि प्रातर्माध्यन्दिनतृतीयसवनानि ‘सन्तिष्ठमानानि’ पृथक् पृथक् समाप्तियुक्तानि ‘यन्ति’ यजमाना

---

* “हौत्रकाणाम्”–इत्युपक्रम्याश्वलायनीये श्रौते स्तोत्रियानुरूपाणां दश युगलानि प्रदर्शितम्—“स्तोत्रियानुरूपाणां यद्यनुरूपे स्तुवीरन्त्स्तोत्रियोऽनुरूपः”–इति ७. ४. ५। पुरस्तादपि (२४८ पृ०) स्तोत्रियादिकथा द्रष्टव्या।

अनुतिष्ठन्ति; एव मेवाहीनस्याहर्गणस्य एकस्यैव सतः क्रतो रवयवभूतानि अहानि पृथक् पृथक् समाप्तियुक्तानि यजमाना अनुतिष्ठन्ति। तथा सति यद्युत्तरदिनसम्बन्धिनं 'स्तोत्रियं' तृचं पूर्वदिने प्रातस्सवने 'अनुरूपं' तृचं कुर्वन्ति, तदानीं महर्गणस्यैकस्य क्रतोः 'सन्ततिः' मध्ये विच्छेदराहित्यं भवति। तस्मादन्यदिने गतस्यान्यदिने प्रयोगेण 'अहीनं' क्रतुं सन्ततं कुर्वन्ति॥

अथ माध्यन्दिनीयशस्त्रक्लृप्तिं विधातु माख्यायिका माह—"ते वै देवाश्च ऋषयश्चाद्रियन्त समानेन यज्ञं सन्तनवामेति ; त एतत् समानं यज्ञस्यापश्यन्त्समानान् प्रगाथान्त्समानीः प्रतिपदः समानानि सूक्तानि"–इति। 'ते वै' प्रसिद्धाः, वस्वादयो 'देवाश्च', विश्वामित्रप्रभृतयः 'ऋषयश्च', 'आद्रियन्त' मनस्येव मादर मकुर्वन्त। कीदृश आदरः ? सोऽभिधीयते—'समानेन' सर्वेष्वेकविधानेन प्रयोगेण "यज्ञम्' अहीनं 'सन्तनवाम' सन्ततं करवाम 'इति' मनसि विचार्य्य 'ते' द्विविधा देवा ऋषयश्च 'एतद्' वक्ष्यमाणं मन्त्रजातं 'यज्ञस्य' अहीनस्य 'समानं' सर्वेष्वहस्सु सदृश मपश्यन्। किं किं सदृश मिति, उच्यते— ये कद्वत्सञ्ज्ञकाः प्रगाथाः, याश्च 'प्रतिपदः' आरम्भणीया ऋचः, यानि चाहीनसूक्तानि *; तेषां सर्वेषा महस्सु, सर्वेषु समानत्व मपश्यन्॥

साम्ये तत्प्रयोजनं दृष्टान्तेन दर्शयति—"ओकस्सारी वा इन्द्रो यत्र वा इन्द्रः पूर्वं गच्छत्यैव तत्रापरं गच्छति यज्ञस्यैव सेन्द्रतायै"–इति। 'ओकांसि' स्थानानि गृहाणि, तेषु सरति सर्वदा सञ्चरतीति 'ओकस्सारी' मार्जारः। 'वै'-शब्द उपमार्थः। यथा मार्जारः

---

* "ऊर्ध्वं स्तोत्रियानुरूपेभ्यः०—० कद्वन्तः प्रगाथाः। ०—० कद्वद्भ्यः आरम्भणीयाः। ऊर्ध्व मारम्भणीयाभ्यः०—०अहीनसूक्तानि षडहस्तोत्रियानावपत्सु"–इति आश्व० श्रौ०७,४.६–११।

पूर्वस्मिन् दिने येषु गृहेषु सञ्चरति, तेष्वेव गृहेषु परेद्युरपि सञ्चरति ; एव मय मिन्द्रोऽप्यवगन्तव्यः। स चेन्द्रो 'यत्र वै' येषु स्थानेषु 'पूर्वम्' अहः गच्छति, 'तत्र' तेष्वेव स्थानेषु 'अपरम्' अहरागच्छत्येव ; अतो ऽहीनस्य 'यज्ञस्य' सर्वस्यापि सेन्द्रत्वार्थं पूर्वोक्तं समानत्व मादरणीयम् ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां चतुर्थाध्याये
(एकोनत्रिंशाध्याये) प्रथमः खण्डः ॥ १ (१७) ॥

॥ अथ द्वितीयः खण्डः ॥

तान् वा एतान्त्सम्पातान् |विश्वामित्रः प्रथम मपश्यत् |तान् विश्वामित्रेण दृष्टान् |वामदेवो ऽसृज|तैवा त्वा मिन्द्र वज्रिन्नत्र |यन्न इन्द्रो जुजुषे यच्च वष्टि |कथा महा मवृधत् कस्य होतुरिति |तान् क्षिप्रं समपत|द्यत् क्षिप्रं समपतत् | तत् सम्पातानां सम्पातत्वं |स हेक्षाञ्चक्रे विश्वामित्रो |यान् वा अहं सम्पातानपश्यं | तान् वामदेवो ऽसृष्ट | कानि न्वहं सूक्तानि | सम्पातांस्तत्प्रतिमान्त्सृजेयेति | स एतानि सूक्तानि |सम्पातांस्तत्प्रतिमानसृजत |सद्यो ह जातो

वृषभः कनीन। इन्द्रः पूर्भिदातिरद्दास मर्कैरिमा मू षु प्रभृतिं सातये धा। इच्छन्ति त्वा सोम्यासः सखायः। शासद्वह्निर्दुहितुर्नप्त्यङ्गादभि तष्टेव दीधया मनीषा मिति। य एक इद्धव्यश्चर्षणीना मिति भरद्वाजो। यस्तिग्मशृङ्गो वृषभो न भीम। उदु ब्रह्माण्यैरत श्रवस्येति वसिष्ठो। ऽस्मा इदु प्र तवसे तुरायेति नोधास्त। एते प्रातस्सवने। षळहस्तोत्रियाञ्छस्त्वा। माध्यन्दिने ऽहीनसूक्तानि शंसन्ति। तान्येतान्यहीनसूक्तान्या। सत्यो यातु मघवाँ ऋजीषीति। सत्यवन् मैत्रावरुणो। ऽस्मा इदु प्र तवसे तुरायेन्द्राय ब्रह्माणि राततमा। इन्द्र ब्रह्माणि गोतमासो अक्रन्निति। ब्रह्मण्वद् ब्राह्मणाच्छंसी। शासद्वह्निर्जनयन्त वह्नि मिति। वह्निवदच्छावाकस्तदाहुः कस्मादच्छावाको वह्निवदेतत् सूक्त। मुभयत्र शंसति। पराञ्चिषु चैवाहःस्वभ्यावर्तिषु चेति। वीर्यवान् वा एष बह्वृचो। वह्निवदेतत् सूक्तं वहति ह वै वह्निर्धुरो यासु युज्यते। तस्मादच्छावाको। वह्निवदेतत् सूक्त। मुभयत्र शंसति। पराञ्चिषु चैवाहःस्वभ्यावर्तिषु च। तानि पञ्चस्वहःसु भवन्ति। चतुर्विंशे ऽभिजिति विषुवति विश्वजिति महाव्रते। ऽहीनानि ह वा एतान्यहानि न ह्येषु किञ्चन हीयते।

पराञ्चीनि ह वा एतान्यहान्यनभ्यावर्तीनि तस्मादेनान्येतेष्वहःसु शंसन्ति यदेनानि शंसन्त्यहीनान्त्स्वर्गांल्लोकान्त्सर्वरूपान्त्सर्वसमृद्धानवाप्नवामेति यद्वेवैनानि शंसन्तीन्द्र मेवैतैर्निह्वयन्ते यथर्षभं वाशितायै यद्वेवैनानि शंसन्त्यहीनस्य सन्तत्या अहीन मेव तत् सन्तन्वन्ति ॥ २ (१८) ॥

अथ सम्पातनामकानि सूक्तान्याख्यायिकया दर्शयति—"तान् वा एतान्त्सम्पातान् विश्वामित्रः प्रथम मपश्यत् ; तान् विश्वामित्रेण दृष्टान् वामदेवो ऽसृजतैवा त्वा मिन्द्र वज्रिन्नत्र, यन्न इन्द्रो जुजुषे यच्च वष्टि, कथा महा मवृधत् कस्य होतुरिति; तान् क्षिप्रं समपतद् ; यत् क्षिप्रं समपतत् ; तत् सम्पातानां सम्पातत्वम्" –इति । 'तान् वै' शास्त्रप्रसिद्धानेव 'एतान्' अत्रैवोदाहरिष्यमाणान् सम्पातनामकान् सूक्तविशेषान् 'विश्वामित्रः' महर्षिः 'प्रथमं' सृष्ट्यादौ ईश्वरानुग्रहेण 'अपश्यत्' मनसा वेदमध्ये ज्ञातवान् । विश्वामित्रेण दृष्टा ये सूक्तविशेषाः, तानधीत्य 'वामदेवः' महर्षिः 'असृजत' स्वकीयत्वेन लोके प्रकटीकृतवान् । ते सूक्तविशेषा उदाह्रियन्ते । "एवा त्वाम्"–इत्येकं (सं० ४. १९.) सूक्तम्, "यन्न इन्द्रः"–इति (सं० ४. २२.) द्वितीयम्, "कथा महाम्"–इति (सं० ४. २३.) तृतीयम् । 'तान्' त्रीन् सूक्तविशेषान् वामदेवः 'क्षिप्रं समपतत्' कालविलम्बे सति विश्वामित्र आगत्य स्वकीयत्वं प्रकटीकरिष्यतीति भीत्या स्वयं शीघ्र मेव 'समपतत्' सम्यगध्येतॄन् शिष्यान् प्राप्तवान्, स्वकीयत्वप्रसिद्ध्यर्थं बहून्

शिष्यान् सहसाध्यापयामासेत्यर्थः । 'तत्' तेषु सूक्तेषु 'यद्' यस्मात् कारणात् क्षिप्रं समपतत्, 'तत्' तस्मात् कारणात्, सम्यक् पतनं प्रकटीकरण मेषां सूक्ताना मिति व्युत्पत्त्या सम्पातं नाम सम्पन्नम् ॥

अथ सूक्तान्तराणां सृष्टिं दर्शयति— "स हैक्षाञ्चक्रे विश्वामित्रो यान्वा अहं सम्पातानपश्यं, तान् वामदेवो ऽसृष्ट, कानि न्वहं सूक्तानि सम्पातांस्तत्प्रतिमान्त्सृजेयेति ; स एतानि सूक्तानि सम्पातांस्तत्प्रतिमानसृजत; सद्यो ह जातो वृषभः कनीन, इन्द्रः पूर्भिदातिरद्दास मर्कैं, रिमा मू षु प्रभृतिं सातये धा, इच्छन्ति त्वासोम्यासः सखायः, शासद्वह्निर्दुहितुर्नप्त्यङ्गा, दभितष्टेव दीधया मनीषा मिति"–इति । वामदेववृत्तान्त मवगत्य स विश्वामित्रः 'ईक्षाञ्चक्रे' मनस्येवं विचारितवान्, 'यान्' सम्पातानह मीश्वरानुग्रहेण दृष्टवानस्मि, तान् अयं वामदेवः 'असृष्ट' गुरुद्रोहभीतिरहितः सन् स्वकीयत्वेन लोके प्रकटीकृतवान् । इतः परं केषाञ्चित् सूक्तानां मदीयत्वप्रसिद्धिरपेक्षिता ; अतोऽहं कानि नाम सूक्तानि 'तत्प्रतिमान्' पूर्वसूक्तसदृशान् सम्पातान् कृत्वा 'सृजेय' लोके प्रकटीकरवाणि ? 'इति' विचार्य्य विश्वामित्रः 'एतानि' वक्ष्यमाणानि सूक्तानि पूर्वसूक्तसदृशान् सम्पातान् कृत्वा 'असृजत' प्रकटीकृतवान् । तेषु "सद्यो ह जातः"–इत्येकं (सं० ३. ४८.) सूक्तम्, "इन्द्रः पूर्भित्"–इति (सं० ३. ३४.) द्वितीयम्, "इमा मू षु"–इति (सं० ७. ९३.) तृतीयम्, "इच्छन्ति त्वा"–इति (सं० ३. ३०.) चतुर्थम्, "शासद्वह्निः"–इति (सं० ३. ३१.) पञ्चमम्, 'अभितष्टेव'–इति (सं० ३. ३८.) षष्ठम् *। एतानि सूक्तानि विश्वामित्रसम्बन्धित्वेन प्रसिद्धान्यभवन् ॥

---

* आश्व० श्रौ० ७. ५. २० द्रष्टव्यम् ।

अथ भरद्वाजवसिष्ठनोधसां त्रयाणा मृषीणां सम्बन्धीनि सूक्तानि दर्शयति — "य एक इद्धव्यश्चर्षणीना मिति भरद्वाजो, यस्तिग्मशृङ्गो वृषभो न भीम, उदु ब्रह्माण्यैरत श्रवस्येति वसिष्ठो, ऽस्मा इदु प्र तवसे तुरायेति नोधाः"—इति। भरद्वाजो "य एक इद्"—इति (सं० ६. २२.) एकं सूक्त मसृजत। वसिष्ठो "यस्तिग्मशृङ्गः"— "उदु ब्रह्माणि"—इति सूक्तद्वयम् (सं० ७. १९,२३.) असृजत। नोधाः "अस्मा इदु प्र तवसे"—इत्येकं (सं० १. ६१.) सूक्त मसृजत। एतेषां सर्वेषां सूक्तानां तत्र तत्र विनियोगो वक्ष्यते ॥

इदानी महीनसूक्तानि विधत्ते— "त एते प्रातस्सवने षळहस्तोत्रियाञ्छस्त्वा माध्यन्दिने ऽहीनसूक्तानि शंसन्ति"—इति। 'ते' प्रसिद्धाः 'एते' प्रयोगकाले सन्निहिता होत्रकाः, अहर्गणेषु प्रातस्सवने षळहसम्बन्धिनः 'स्तोत्रियान्' तृचान्, "आ नो मित्रावरुणा"— "मित्रं वयम्"—इत्यादीन् सूत्रकारपठितान् तृचान् * शस्त्वा, 'माध्यन्दिने' सवने त्वहीनसूक्तानि शंसेयुः ॥

कान्यहीनसूक्तानीत्याशङ्क्योदाहरति— "तान्येतान्यहीनसूक्तान्या सत्यो यातु मघवाँ ऋजीषीति सत्यवन् मैत्रावरुणो, ऽस्मा इदु प्र तवसे तुरायेन्द्राय ब्रह्माणि राततमा इन्द्र ब्रह्माणि गोतमासो अक्रन्निति ब्रह्मण्वद् ब्राह्मणाच्छंसी, शासद्वह्निर्जनयन्त वह्निमिति वह्निवदच्छावाकः"—इति। 'तानि' पूर्ववाक्ये विहितानि अहीनसूक्तान्येतान्युदाह्रियन्ते,—"आ सत्यो यातु"—इति (सं० ४. १६.) 'सत्यवत्' सत्यशब्दोपेतं सूक्तं मैत्रावरुणः शंसेत्।

---

* "आ नो मित्रावरुणा, मित्रं वयं हवामहे, मित्रं हुवे पूतदक्ष, मयं वां मित्रावरुणा, पुरुरुणा चिद्ध्यस्ति, प्रति वां सूर उदित इति षड़हस्तोत्रिया मैत्रावरुणस्य"—इति आश्व० श्रौ० ७. २. २। 'षडहशब्देन पृष्ठ्याभिप्लवौ उच्येते'—इति तत्र ना० वृ०।

“अस्मा इत्”–इति (सं० १. ६१.) सूक्तम् । तस्य “इन्द्राय ब्रह्माणि”–इति चतुर्थः पादः । तत्र ब्रह्माणीतिश्रुतत्वात् इदं सूक्तं ‘ब्रह्मण्वत्’ ब्रह्मशब्दोपेतम् । तथा तत्रैव सूक्ते “इन्द्र ब्रह्माणि” –इतिश्रुतत्वादिन्द्रब्रह्मण्वत् । तदेतदुभयं ब्राह्मणाच्छंसी शंसेत् । “शासद्वह्निः”–इति (सं० ३. ३१.) सूक्तं ‘वह्निवत्’ वह्निशब्दोपेतम् ; तस्मिन् सूक्ते “जनयन्त वह्निम्”–इतिश्रुतत्वात् । तदेतदच्छावाकः शंसेत् ॥

अथाच्छावाकविषयं प्रश्न मुद्भावयति— “तदाहुः कस्मादच्छावाको वह्निवदेतत् सूक्त मुभयत्र शंसति,—पराञ्चिषु चैवाहस्स्वभ्यावर्तिषु चेति ?”–इति । गवामयने हि द्विविधान्यहानि,—आवृत्तिरहितानि तत्सहितानि च । तत्र वक्ष्यमाणानि चतुर्विंशादीन्यावृत्तिरहितानि; अभिप्लवषडहगतानि पृष्ठ्यषडहगतानि चावृत्तिसहितानि, तयोः षडहयोरसकृदनुष्ठानस्य विहितत्वात् । एवं सति ‘पराञ्चिषु’ आवृत्तिरहितेषु चतुर्विंशादिष्वहस्सु वह्निवत् सूक्त मच्छावाकः शंसति, तथैव ‘अभ्यावर्त्तिषु’ षडहगतेष्वहस्सु च तं सूक्तं शंसति । तत्र उभयत्र शंसने किं कारणम् ? इति प्रश्नः ॥

तस्योत्तर माह— “वीर्यवान् वा एष बह्वृचो वह्निवदेतत् सूक्तं, वहति ह वै वह्निर्धुरो यासु युज्यते; तस्मादच्छावाको वह्निवदेतत् सूक्त मुभयत्र शंसति,—पराञ्चिषु चैवाहस्स्वभ्यावर्तिषु च”–इति । ‘एषः’ अच्छावाको ‘बह्वृचः’ बहूना ऋचा मनेनाधीतत्वात् तादृशः । अच्छावाकत्वं पूर्वत्रैव माम्नातम् —“तस्माद्यो ब्राह्मणो वीर्य्यवान्स्यात् , सोऽस्याच्छावाकीयां कुर्य्यात्”–इति * ।

---

* १भा० ४४६ पृ० १६ पं० ।

बह्वृचत्वादेवायं 'वीर्य्यवान्' शक्तिमान्, यज्ञभारं वोढुं शक्तः ; सूक्तं चैतद्वह्निशब्दोपेतत्वात् तस्य योग्यम् ; लोकेऽपि 'वह्निः' वोढाश्वो वलीवर्दो वा 'यासु' रथशकटसम्बन्धिनीषु धुर्षु 'युज्यते' वध्यते, ता धुरो वहत्येव। 'तस्माद्' यज्ञभारं वोढुं समर्थत्वादच्छावाकः 'उभयत्र' द्विविधेष्वप्यहस्सु वह्निवत् सूक्तं शंसति ॥

तत्रावृत्तिरहितेष्वहस्सु पूर्वोक्तसूक्तानां शंसनं प्रशंसति— "तानि पञ्चस्वहस्सु भवन्ति,—चतुर्विंशेऽभिजिति विषुवति विश्वजिति महाव्रते ; ऽहीनानि ह वा एतान्यहानि, न ह्येषु किञ्चन हीयते ; पराञ्चीनि ह वा एतान्यहान्यनभ्यावर्तीनि ; तस्मादेनान्येतेष्वहस्सु शंसन्ति"–इति। गवामयने चतुर्विंशाख्य मारम्भणीयं द्वितीय महः, महाव्रताख्य मुपान्त्य महः, विषुवदाख्यं मध्यवर्त्ति प्रधानमहः, अभिजिद्विश्वजिदाख्ये विषुवत उभयभागवर्त्तिनी द्वे अहनी। एतेषु 'पञ्चस्वहस्सु' 'तानि' पूर्वोक्तानि अहीनसूक्तानि होत्रकाः शंसन्ति। एतेषा मङ्गा महीनत्वात्तानि सूक्तानि तत्र योग्यानि। यस्मादेतेष्वहस्सु कि मप्यङ्गं न हीयते, तस्मादेतान्यहीनानि; किञ्चैतान्यहीनानि 'पराञ्चीनि' सकृदेव प्रयोज्यत्वात्। तेष्वहस्सु सामर्थ्यातिशयाय तानि सूक्तानि शंसेयुः ॥

प्रकारान्तरेण सूक्तानि प्रशंसति— "यदेनानि शंसन्त्यहीनान्त्स्वर्गांल्लोकान्त्सर्वरूपान्त्सर्वसमृद्धानवाप्नवामेति"–इति। 'ये' स्वर्गलोकाः 'अहीनाः' भोग्यैर्वस्तुभिर्हीना न भवन्ति, अत एव 'सर्वसमृद्धाः', उत्तममध्यमाधमकर्मफलरूपत्वात् 'सर्वरूपाः' बहुविधा भवन्ति; तांल्लोकान् प्राप्नवामेत्यनेनाभिप्रायेण तानि (३०८पृ०) सूक्तानि शंसेयुः ॥

पुनरपि प्रकारान्तरेण प्रशंसति— "यदेवैनानि शंसन्तीन्द्र मेवैतैर्निह्वयन्ते यथऋषभं वाशितायै"—इति । 'एनानि' सूक्तानि यदा शंसन्ति, तदानी मेतैरिन्द्र मेव 'निह्वयन्ते' नितरा माह्वयन्ति, गर्भग्रहण मिच्छन्ती धेनुः 'वाशिता', तदर्थ ऋषभं पुङ्गवं यथाह्वयति तद्वदिन्द्राह्वानं द्रष्टव्यम् ॥

पुनरपि प्रकारान्तरेण सूक्तानि प्रशंसति— "यद्वेवैनानि शंसन्त्यहीनस्य सन्तत्या, अहीन मेव तत् सन्तन्वन्ति"—इति । 'यद्व उ एव' यस्मादेव कारणात् 'एनानि' सूक्तानि सर्वेष्वहस्सु शंसन्ति, तस्मादेव कारणादेतत् शंसनम् 'अहीनस्य' अहर्गणस्य सन्तत्यर्थं सम्पद्यते । 'तत्' तेन शंसनेन 'अहीन मेव' अहर्गण मेव 'सन्तन्वन्ति' सन्ततं कुर्वन्ति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां चतुर्थाध्याये
(एकोनत्रिंशाध्याये) द्वितीयः खण्डः ॥ २ (१८) ॥

॥ अथ तृतीयः खण्डः ॥

ततो वा एतांस्त्रीन्त्सम्पातान्॑ मैत्रावरुणो विपर्यास॑ मेकैक महरहः शंसत्येवा त्वा मिन्द्र वज्रिन्नत्रेति प्रथमेऽहनि॑ यन्न इन्द्रो जुजुषे यच्च वष्टीति द्वितीये॑ कथा महा मवृधत् कस्य होतुरिति तृतीये॑ त्रीनेव सम्पातान् ब्राह्मणाच्छंसी॑ विपर्यास

मेकैक महरहः शंसतीन्द्रः पूर्भिदातिरद्दास मर्कैरिति प्रथमे ऽहनि य एक इद्धव्यश्चर्षणीना मिति द्वितीये यस्तिग्मशृङ्गो वृषभो न भीम इति तृतीये त्रीनेव सम्पातानच्छावाको विपर्यास मेकैक महरहः शंसतीमा मू षु प्रभृतं सातये धा इति प्रथमे ऽहनीच्छन्ति त्वा सोम्यासः सखाय इति द्वितीये शासद्वह्निर्दुहितुर्नप्त्यं गादिति तृतीये तानि वा एतानि नव त्रीणि चाहरहःशस्यानि तानि द्वादश सम्पद्यन्ते द्वादश वै मासाः संवत्सरः संवत्सरः प्रजापतिः प्रजापतिर्यज्ञस्तत् संवत्सरं प्रजापतिं यज्ञ माप्नुवन्ति तत् संवत्सरे प्रजापतौ यज्ञे ऽहरहः प्रतितिष्ठन्तो यन्ति तान्यन्तरेणावाप मावपेरन्नन्यूङ्खा विराजो वैमदीश्चतुर्थे ऽहनि पङ्क्तीः पञ्चमे पारुच्छेपीः षष्ठे ऽथ यान्यहानि महास्तोमानि स्युः को अद्य नर्यो देवकाम इति मैत्रावरुण आवपेत वनेन वा यो न्यधायि चाकन्निति ब्राह्मणाच्छंस्यायाह्यर्वाङुप बन्धुरेष्ठा इत्यच्छावाक एतानि वा आवपनान्येतैर्वा आवपनैर्देवाः स्वर्गं लोक मजयन्नेतैर्ऋषयस्तथैवैतद् यजमाना एतैरावपनैः स्वर्गं लोकं जयन्ति ॥ ३ (१९) ॥

अथ पूर्वोक्तानां सम्पातसूक्तानां विनियोगं दर्शयति— "ततो वा एतांस्त्रीन्त्सम्पातान् मैत्रावरुणो विपर्यास मेकैक महरहः शंसति"–इति । 'ततो वै' तस्मादेव पूर्वोक्तात् चतुर्विंशादेरहः-पञ्चकादन्यत्र षड़हेष्विति शेषः । तेषु मैत्रावरुणः त्रीन् सम्पाताख्यान् सूक्तविशेषान् 'विपर्यासं' विपर्यस्य शंसेत् । स एव विपर्यास एकैक महरह इत्यनेन स्पष्टीक्रियते । प्रतिदिन मेकैकं सूक्त मित्यर्थः ॥

तदेवोदाहृत्य प्रदर्शयति— "एवा त्वा मिन्द्र वज्रिन्नत्रेति (सं० ४. १९.) प्रथमेऽहनि, यन्न इन्द्रो जुजुषे यच्च वष्टीति (सं० ४. २२.) द्वितीये, कथा महा मवृधत् कस्य होतुरिति (सं० ४. २३.) तृतीये"–इति ॥

मैत्रावरुणवद् ब्राह्मणाच्छंसिनोऽपि सूक्तत्रयस्य विपर्यासेन शंसनं दर्शयति— "त्रीनेव सम्पातान् ब्राह्मणाच्छंसी विपर्यास मेकैक महरहः शंसतीन्द्रः पूर्भिदातिरद्दास मर्कैरिति (सं० ३. ३४.) प्रथमेऽहनि, य एक इद्धव्यश्चर्षणीना मिति (सं० ६. २२.) द्वितीये, यस्तिग्मशृङ्गो वृषभो न भीम इति (सं० ७. १९.) तृतीये"–इति ॥

तथाच्छावाकस्यापि सूक्तत्रयस्य विपर्यासेन शंसनं दर्शयति— "त्रीनेव सम्पातानच्छावाको विपर्यास मेकैक महरहः शंसतीमा सू षु प्रभृतं सातये धा इति (सं० ३. ३६.) प्रथमेऽहनीच्छन्ति त्वा सोम्यासः सखाय इति (सं० ३. ३०.) द्वितीये, शासद्वह्निर्दुहितुर्नप्त्यं गादिति (सं० ३. ३१.) तृतीये"–इति ॥

उक्तानां सूक्तानां मिलित्वा सङ्ख्यां दर्शयति— "तानि वा एतानि नव"–इति ॥

दिनविशेषेण सूक्तविशेषान् विधाय प्रतिदिनं शंसनीयानि सूक्तानि विधत्ते— "त्रीणि चाहरहः शस्यानि"-इति। यानि प्रतिदिनं शंसनीयानि त्रीणि सूक्तानि, तान्युपरितनखण्डे "सद्यो ह जातः इत्यादिना (३१६पृ०) स्पष्टीकरिष्यन्ते॥

दिनविशेषगतानि प्रतिदिनगतानि च मिलित्वा प्रशंसति— "तानि द्वादश सम्पद्यन्ते; द्वादश वै मासाः संवत्सरः, संवत्सरः प्रजापतिः, प्रजापतिर्यज्ञस्तत् संवत्सरं प्रजापतिं यज्ञ माप्नुवन्ति; तत् संवत्सरे प्रजापतौ यज्ञे ऽहरहः प्रतितिष्ठन्तो यन्ति"-इति। 'तानि' पूर्वोक्तानि नव त्रीणि च मिलित्वा द्वादश सम्पद्यन्ते। अतो मास-संवत्सर-तन्निमातृप्रजापति-द्वारा प्रजापतिसृष्टत्वेन प्रजापतिरूपो यो यज्ञस्तादृशं संवत्सरात्मकं प्रजापतिरूपं यज्ञ मनुष्ठातारः प्राप्नुवन्ति। 'तत्' तेन शंसनेन संवत्सरात्मकप्रजापतिरूपे यज्ञे प्रतिदिनं प्रतिष्ठिताः सन्तो ऽनुतिष्ठन्ति॥

अथ पृष्ठ्यषडहस्य उत्तरस्मिंस्त्र्यहे कासाञ्चिदृचा मावापं विधत्ते— "तान्यन्तरेणावाप मावपेरन्"-इति। यानि विपर्यासेन शंसनीयानि नव सङ्ख्याकानि सूक्तान्युक्तानि, यानि च प्रतिदिनं शंसनीयानि त्रीण्युक्तानि, 'तान्यन्तरेण' तेषा मुभयविधाना मन्तराले स्थाने किञ्चिदावपनीय ऋक्समूह मावपेरन्॥

कस्मिन् दिने का ऋच आवपनीया इत्याशङ्क्य तत् सर्वं विविच्य दर्शयति—"अन्यूङ्खा विराजो वैमदीश्चतुर्थे ऽहनि, पङ्क्तीः पञ्चमे, पारुच्छेपीः षष्ठे"-इति। उच्चारणविशेषोपेताः ओकाराः 'न्यूङ्खाः', ते च पूर्व मेव "मुखतो मध्यन्दिने न्यूङ्खयन्ति"-इत्यत्राभिहिताः (२४ पृ०) *; ता अनर्हन्तीति 'अन्यूङ्खाः'; 'विराजः' विराट्छन्दस्का ऋचः; ताः पृष्ठ्यषडहस्य चतुर्थेऽहन्यावपनीयाः।

“न ते गिरो अपि मृष्ये”–इत्याद्याश्चतस्र ऋचः (सं० ७.२२.५–८.), “प्र वो महे महिवृधे भरध्वम्”–इत्याद्यास्तिस्रः (सं० ७. ३१. १०–१२.); एताः सप्त विराजः त्रयाणां होत्रकाणां त्रयस्तृचा भवन्ति। प्रथमा मारभ्यैकस्तृचो मैत्रावरुणस्य, तृतीया मारभ्यैकस्तृचो ब्राह्मणाच्छंसिनः, पञ्चमी मारभ्यैकस्तृचो ऽच्छावाकस्य। तदेवं सप्तस्वृक्षु त्रयस्तृचा विभज्य प्रक्षेपणीयाः। सोऽयं विराजां प्रक्षेपः एकः पक्षः। वैमदीरावपन्निति पक्षान्तरम्। विमदाख्येन महर्षिणा दृष्टा वैमद्यः। ताश्च “यजामह इन्द्रम्”–इत्याद्याः सप्तर्चः (सं० १०. २३.१–७.)। ता अपि पूर्ववत् त्रयस्तृचाः कर्त्तव्याः। पञ्चमे ऽहनि “यच्चिद्धि सत्य सोमपाः” –इत्याद्याः पङ्क्तिच्छन्दस्काः सप्तर्चः (सं० १. २९.१–७.)पूर्ववदावपनीयाः। तथा षष्ठेऽहनि परुच्छेपेन दृष्टा “इन्द्राय हि द्यौः” –इत्याद्याः सप्तर्चः (सं० १. १३१. १–७.) पूर्ववदावपनीयाः॥

स्तोमवृद्धावतिशंसनार्थान्यावपनीयानि सूक्तानि दर्शयति—“अथ यान्यहानि महास्तोमानि स्युः, को अद्य नर्यो देवकाम इति मैत्रावरुण आवपेत; वने न वायो * न्यधायि चाकन्निति ब्राह्मणाच्छंस्यायाह्यर्वाङुप वन्धुरेष्ठा इत्यच्छावाकः”–इति। ‘अथ’ पूर्वोक्तविराडाद्यावापकथनानन्तरम्, अन्य आवाप उच्यत इति शेषः। यान्यहानि ‘महास्तोमानि’ सप्तदशैकविंशादिस्तोमेभ्यो ऽधिकैश्चतुर्विंशादिस्तोमैर्युक्तानि स्युः, तेष्वहस्सु, स्तोमसङ्ख्या मतिक्रम्याधिकाना मृचां शंसनं कर्त्तव्यम्। तत्र मैत्रावरुणः “को अद्य”–इति (सं० ४. २५.) सूक्त मावपेत। ब्राह्मणाच्छंसी

---

* “वायः—वेः पुत्रः।०—०। वेति च य इति च चकार शाकल्यः, उदात्तं त्वेव माख्यात मभविष्यदसुसमाप्तश्चार्थः”–इति निरु० ६. ५. ५।

“वने न”–इति (सं०. १० २९.) सूक्त मावपेत । अच्छावाकः “आयाहि”–इति (सं. ३. ४३.) सूक्त मावपेत ॥

तेषां सूक्तानां प्रशंसां दर्शयति— “एतानि वा आवपनान्येतैर्वा आवपनैर्देवाः स्वर्गं लोक मजयन्नेतैर्ऋषयस्तथैवैतद्यजमाना एतैरावपनैः स्वर्गं लोकं जयन्ति”–इति । कोऽद्येत्यादीनि सूक्तानि ‘आवपनानि’ आवापयोग्यानि, एतैर्देवानां स्वर्गजयाद्यजमानाना मपि तैः स्वर्गजयो भवति ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां चतुर्थाध्याये
(एकोनत्रिंशाध्याये) तृतीयः खण्डः ॥ ३ (१९) ॥

॥ अथ चतुर्थः खण्डः ॥

सद्यो ह जातो वृषभः कनीन इति मैत्रावरुणः॑ पुरस्तात् सूक्ताना महरहः शंसति॑ तदेतत् सूक्तं स्वर्ग्यं॑ मेतेन वै सूक्तेन देवाः स्वर्गं लोक मजयन्ने॑तेन ऋषय॑स्तथैवैतद्यजमाना॑ एतेन सूक्तेन स्वर्गं लोकं जयन्ति॑ तदु वैश्वामित्रं॑ विश्वस्य ह वै मित्रं विश्वामित्र आस॑ विश्वं हास्मै मित्रं भवति य एवं वेद॑ येषां चैवं विद्वानेतन् मैत्रावरुणः॑ पुरस्तात् सूक्तानह

महरहः शंसति तदृषभवत् पशुमद्भवति पशूना मवरुद्ध्यै तत् पञ्चर्चं भवति पञ्चपदा पङ्क्तिः पङ्क्तिर्वा अन्न मन्नाद्यस्यावरुद्ध्या उदु ब्रह्माण्यैरत श्रवस्येति ब्राह्मणाच्छंसी ब्रह्मण्वत् समृद्धं सूक्त महरहः शंसति तदेतत् सूक्तं स्वर्ग्य मेतेन वै सूक्तेन देवाः स्वर्गं लोक मजयन्नेतेन ऋषयस्तथैवैतद्यजमाना एतेन सूक्तेन स्वर्गं लोकं जयन्ति तदु वासिष्ठ मेतेन वै वसिष्ठ इन्द्रस्य प्रियं धामोपागच्छत् स परमं लोक मजयदुपेन्द्रस्य प्रियं धाम गच्छति जयति परमं लोकं य एवं वेद तद्वै षळृचं षड्वा ऋतव ऋतूना माप्त्यै तदुपरिष्टात् सम्पातानां शंसत्याप्त्वैव तत् स्वर्गं लोकं यजमाना अस्मिंल्लोके * प्रतितिष्ठन्त्यभि तष्टेव दीधया मनीषा मित्यच्छावाकोऽहरहः शंसत्यभिवत् तद्वै रूपं मभि प्रियाणि मर्मृशत् पराणीति यान्येव पराण्यहानि तानि प्रियाणि तान्येव तदभिमर्मृशतो यन्त्यभ्यारभमाणाः परो वा अस्माल्लोकात् स्वर्गो लोकस्त मेव तदभिवदति कवीँ रिच्छामि † सन्दृशे सुमेधा इति ये वै तेन ऋषयः पूर्वे

---

* "अस्मिन् लोके" ख, "अस्मिल्लोके" ग, "अस्मिंलोके" घ, ङ, च।

† "ऋच्छामि" ङ, च।

प्रेतास्ते वै कवयस्ता॑नेव तदभ्यतिवदति॑ तदु वैश्वामित्रं॑ विश्वस्य ह वै मित्रं॑ विश्वामित्र आस॑ विश्वं हास्मै मित्रं भवति य एवं वेद॑ तदनिरुक्तं प्राजापत्यं शंस॑त्यनिरुक्तो वै प्रजापतिः॑ प्रजापतेराप्त्यै॑ सकृदिन्द्रं निराह॑ तेनैन्द्राद्रूपान्न प्रच्यवते॑ तद्वै दशर्चं दशाक्षरा विराळन्नं॑ विराळन्नाद्यस्यावरुद्ध्यै॑ यदेव दशर्चा३म्॑* दश वै प्राणाः॑ प्राणानेव तदाप्नुवन्ति॑ प्राणानात्मन् दधते॑ तदुपरिष्टात् सम्पातानां शंस॑त्याप्त्यैव तत् स्वर्गं लोकं॑ यजमाना अस्मिंल्लोके † प्रतितिष्ठन्ति॑ ॥ ४ (२०) ॥

एवं तावत् प्रसक्तानुप्रसक्तं परिसमाप्याधुना प्रस्तुत मारभते— "सद्यो ह जातो वृषभः कनीन इति (सं० ३. ४८.) मैत्रावरुणः पुरस्तात् सूक्ताना महरहः शंसति"–इति। पूर्वञ्च (३१४ पृ०) त्रीणि चाहरहःशस्यानीति यदुक्तं, तस्यैवैतद् व्याख्यानं सद्योहजात इत्यादिकम् । मैत्रावरुणः स्वकीयस्य सूक्तस्य पुरस्तात् प्रतिदिनं शंसेत् । सूक्ताना मिति बहुवचनं व्यत्ययेन द्रष्टव्यम् ॥

उक्तं सूक्तं प्रशंसति— "तदेतत् सूक्तं स्वर्ग्यं मेतेन वै सूक्तेन देवाः स्वर्गं लोक मजयन्नेतेन ऋषयस्तथैवैतद्यजमाना एतेन सूक्तेन स्वर्गं लोकं जयन्ति"–इति। 'स्वर्ग्यं' स्वर्गाय हितम् । अन्यत् पूर्ववद् व्याख्येयम् ॥

ऋषिसम्बन्धेन पुनः प्रशंसति— "तदु वैश्वामित्रं विश्वस्य ह

---

* "दशर्चां३" क, दशर्चा३" ङ, च। † "अस्मिन् लोके" क, ङ, च।

वै मित्रं विश्वामित्र आस"–इति । 'तद्' तत्तु सूक्तं विश्वामित्रेण दृष्टत्वात् 'वैश्वामित्रम्' । विश्वस्य मित्र मिति निरुक्त्या विश्वामित्रशब्दोऽभूत् * ॥

वेदनं तत्पूर्वं मनुष्ठानञ्च प्रशंसति— "विश्वं हास्मै मित्रं भवति य एवं वेद, येषां चैवं विद्वानेतन् मैत्रावरुणः पुरस्तात् सूक्ताना महरहः शंसति"–इति ॥

वृषभः कनीन इति योऽयं वृषभशब्दस्तदन्तर्गतं वकारव्यतिरिक्त मृषभशब्द मुपजीव्य प्रशंसति— "तदृषभवत् पशुमद्भवति पशूना मवरुद्ध्यै"–इति । 'तत्' सूक्त मृषभशब्दोपेतम् , ऋषभस्य च पशुत्वात् सूक्तं पशुमद्भवति । अतः पशूनां प्राप्त्यै सम्पद्यते ॥

ऋक्सङ्ख्या मुपजीव्य प्रशंसति— "तत् पञ्चर्चं भवति, पञ्चपदा पङ्क्तिः, पङ्क्तिर्वा अन्न मन्नाद्यस्यावरुद्ध्यै"–इति । ऋग्गतया पञ्चसङ्ख्यया पादपञ्चकोपेतपङ्क्तिच्छन्दःस्वरूपत्वम् ; अन्नञ्च पञ्चसङ्ख्योपेतत्वात् पङ्क्तिरेव,—प्राश्यं, पेयं, खाद्यं, लेह्यं, निगीर्यमिति । एव मन्नप्राप्त्यै सम्पद्यते ॥

ब्राह्मणाच्छंसिनः सूक्तं विधत्ते— "उदु ब्रह्माण्यैरत श्रवस्येति (सं० ७. २३.) ब्राह्मणाच्छंसी ब्रह्मण्वत् समृद्धं सूक्त महरहः शंसति"–इति । ब्रह्माणीति ब्रह्मशब्दयोगादिदं सूक्तं ब्रह्मण्वत् 'समृद्धम्' समृद्धिकारणम् ॥

तस्य प्रशंसां दर्शयति— "तदेतत् सूक्तं स्वर्ग्य मेतेन वै सूक्तेन देवाः स्वर्गं लोक मजयन्नेतेन ऋषयस्तथैवैतद् यजमाना एतेन सूक्तेन स्वर्गं लोकं जयन्ति"–इति ॥

---

* "विश्वामित्र ऋषिः सुदासः पैजवनस्य पुरोहितो बभूव ; विश्वामित्रः सर्वमित्रः" –इति निरु० २. ७. २। "मित्रे चर्षौ"–इति पा० ६. ३. १३०।

पुनरप्यृषिसम्बन्धेन प्रशंसति— "तदु वासिष्ठमेतेन वै वसिष्ठ इन्द्रस्य प्रियं धामोपागच्छत्, स परमं लोक मजयत्"–इति ॥

वेदनं प्रशंसति— "उपेन्द्रस्य प्रियं धाम गच्छति, जयति परमं लोकं य एवं वेद"–इति ॥

ऋक्सङ्ख्या मुपजीव्य प्रशंसति— "तद्वै षळृचं षड्वा ऋतव ऋतूना माप्त्वैव"–इति ॥

तस्य सूक्तस्य स्थानं विधत्ते— "तदुपरिष्टात् सम्पातानां शंसत्याप्त्वैव तत् स्वर्गं लोकं यजमाना अस्मिंल्लोके प्रतितिष्ठन्ति"–इति। सम्पातसूक्तस्योपरिष्टात् तत् सूक्तं शंसेत्। तेन शंसनेन 'स्वर्गलोक माप्त्वैव' देहपातादूर्द्ध्वभाविनीं स्वर्गप्राप्तिं सम्पाद्यैवेदानी मस्मिन् लोके यजमानाः प्रतिष्ठिता भवन्ति ॥

अच्छावाकस्य सूक्तं विधत्ते— "अभितष्टेव दीधया मनीषा मित्यच्छावाको ऽहरहः शंसत्यभिवत् तत्यै रूपम्"–इति। अभितष्टेत्यादिकं (सं० ३. ३८.) सूक्त मच्छावाकः प्रतिदिनं शंसेत्। तच्च 'अभिवत्' अभिशब्दोपेतम्। अभिशब्दस्य चाभितः सर्वत इत्यस्मिन्नर्थे वर्त्तमानत्वात् सूक्तं 'तत्यै' सन्तत्यै, विच्छेदराहित्यस्वरूपं भवति ॥

तस्या ऋचस्तृतीयपाद मनूद्य व्याचष्टे— "अभि प्रियाणि मर्मृशत् पराणीति; यान्येव पराण्यहानि, तानि प्रियाणि; तान्येव तदभिमर्मृशतो यन्त्यभ्यारभमाणाः; परो वा अस्माल्लोकात् स्वर्गो लोकस्त मेव तदभिवदति"–इति। अनया ऋचा (सं०३.३८.१.) विश्वामित्रः प्रजापतिं तुष्टाव। तथा सत्यस्य पादस्यायमर्थः— 'पराणि' उत्तराणि कर्माणि प्रजापतेः प्रियाणि 'अभि मर्मृशत्' सर्वतः पुनः पुनः स्पृशन्नहं वर्त्ते इति। यान्येवेत्यादिकं तद्-

व्याख्यानम् । वर्त्तमानादह्नः 'पराणि' उत्तराणि यान्येवाहानि सन्ति, तानि देवस्य प्रियाणि ; अतस्तेन पादपाठेन तान्येव 'अभिमर्मृशतः' अभितः पुनः पुनः स्पृशन्तः । तस्यैव व्याख्यान मभ्यारभमाणा इति । तादृशा यजमाना 'यन्ति' वर्त्तन्ते । किञ्चास्माल्लोकात् परः स्वर्गो लोकः, त मेव लोकं 'तत्' तेन परशब्देनाभिवदति ॥

चतुर्थपाद मनुवदति—"कवीँ रिच्छामि सन्दृशे सुमेधा इति" —इति । 'सुमेधाः' शोभनया मेधया युक्तोऽहं 'सन्दृशे' सम्यग्दर्शनाय 'कवीन्' महर्षीन् इच्छामि ॥

त मेव पादं व्याचष्टे—"ये वै ते न ऋषयः पूर्वे प्रेतास्ते वै कवयस्तानेव तदभ्यतिवदति"—इति । 'नः' अस्माकं सम्बन्धिनः पूर्वे ऋषयः ये, 'ते' प्रसिद्धाः 'प्रेताः' परलोकं गताः, त एवात्र 'कवयः' कविशब्देन विवक्षिताः । अतस्तानेव 'अभि'लक्ष्य तेन पादेन 'अतिवदति' अतिशयेन ब्रूते ॥

ऋषिसम्बन्धेन प्रशंसति— "तदु वैश्वामित्रं, विश्वस्य ह वै मित्रं विश्वामित्र आस ; विश्वं हास्मै मित्रं भवति य एवं वेद"—इति । पूर्ववद् व्याख्येयम् ॥

अस्पष्टदेवताक मुपजीव्य प्रशंसति— "तदनिरुक्तं प्राजापत्यं शंसत्यनिरुक्तो वै प्रजापतिः, प्रजापतेराप्त्यै"—इति । 'तत्' सूक्तम् 'अनिरुक्तम्' न हि तत्र काञ्चिद्देवतां विस्पष्टं निरुच्यते ; अतः प्रजापतिदेवताकम्, तत् शंसेत् । प्रजापतिश्च सृष्टेः पूर्वं मूर्त्तिराहित्यात् 'अनिरुक्तः', अतः सूक्तं प्रजापतिप्राप्त्यै सम्पद्यते ॥

सूक्तस्य प्राजापत्यत्वे सत्यैन्द्रत्वं प्रच्यवेतेत्याशङ्क्याह—"सकृदिन्द्रं निराह, तेनैन्द्राद्रूपान्न प्रच्यवते"—इति । कस्याञ्चिदृचि "शुनं

हुवेम मघवान मिन्द्रम्"–इति सकृदिन्द्रं निब्रूते, तेन कारणेनैन्द्रसम्बन्धिस्वरूपादपि प्रच्युतिर्नास्ति ॥

ऋक्सङ्ख्या मुपजीव्य प्रशंसति– "तद्वै दशर्चं, दशाक्षरा विराळन्नं विराळन्नाद्यस्यावरुद्ध्यै"–इति ॥

पुनरप्यृक्सङ्ख्या मुपजीव्य प्रशंसति— "यदेव दशर्चा३म्, दश वै प्राणाः, प्राणानेव तदाप्नुवन्ति, प्राणानात्मन् दधते"–इति । 'यदेव' यस्मादेव कारणादिदं सूक्तं 'दशर्चा३म्' [प्लुतिः प्राणसादृश्येनाश्चर्यार्था । पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, इन्द्रियरूपाः प्राणा दशैव । यद्वा प्राणापानादयः पञ्च वायवो नागकूर्मादयश्च पञ्च वायव इति दश प्राणाः ।] अतस्तच्छंसनेन प्राणानेव प्राप्य, तान् प्राणान् स्वात्मन्येव स्थापयन्ति ॥

तस्य सूक्तस्य स्थानं विधत्ते— "तदुपरिष्टात् सम्पातानां शंसत्याप्त्वैव तत् स्वर्गं लोकं यजमाना अस्मिंल्लोके प्रतितिष्ठन्ति"–इति ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां चतुर्थाध्याये
(एकोनत्रिंशाध्याये) चतुर्थः खण्डः ॥ ४ (२०) ॥

॥ अथ पञ्चमः खण्डः ॥

कस्त मि॑न्द्र॒ त्वा व॑सुं॒॑ कन्नव्यो॑ अत॒सीनां क॑दू न्वस्या कृत मिति॑ कद्वन्तः प्रगाथा॑ आरम्भणीया

अहरहः शस्यन्ते॑ को वै प्रजापतिः॑ प्रजापतेराप्त्यै॑ यदेव कद्वन्ता३ः॑ * अन्नं वै क मन्नाद्यस्यावरुद्ध्यै॑ यद्वेव कद्वन्ता३ः॑ † अहरहर्वा एते शान्तान्यहीनसूक्तान्युपयुञ्जाना यन्ति॑ तानि कद्वद्भिः प्रगाथैः शमयन्ति॑ तान्येभ्यः शान्तानि कं भवन्ति॑ तान्येनाञ्छान्तानि॑ स्वर्गं लोक मभि वहन्ति त्रिष्टुभः सूक्तप्रतिपदः शंसेयुस्ता॑ हैके पुरस्तात्प्रगाथानां शंसन्ति॑ धाय्या इति वदन्तस्तत् तथा न कुर्य्यात्॑ क्षत्रं वै होता विशो होत्राशंसिनः॑ क्षत्रायैव तद् विशं प्रत्युद्यामिनीं कुर्युः॑ पापवस्यसं त्रिष्टुभो म इमाः॑ सूक्तप्रतिपद इत्येव विद्यात्॑ तद्यथा समुद्रं प्रप्लवेरन्नेवं हैव ते प्रप्लवन्ते॑ ये संवत्सरं वा द्वादशाहं वासते॑ तद्यथा सैरावतीं नावं पारकामाः समारोहेयुरेव मेवैतास्त्रिष्टुभः समारोहन्ति॑ न ह वा एतच्छन्दो गमयित्वा॑ स्वर्गं लोक मुपावर्त्तते॑ वीर्यवत्तमं हि॑ ताभ्यो न व्याह्वयीत॑ समानं हि च्छन्दो॑ऽथो नेद्धाय्याः करवाणीति॑ यदेनाः शंसन्ति॑ प्रज्ञाताभिः सूक्तप्रतिपद्भिः॑ सूक्तानि समारोहामेति॑ यदेवैनाः शंसन्तीन्द्र मेवैताभिर्निह्वयन्ते॑ यथर्षभं वाशितायै॑ यद्वेवैनाः शंसन्त्यहीनस्य सन्तत्यै॑ अहीन मेव तत् सन्तन्वन्ति ॥ ५ (२१) ॥

---

*, † "कद्वन्ता३" ख।

अथ त्रीन् प्रगाथान् विधत्ते— "कस्त मिन्द्र त्वा वसुं, कन्नव्यो अतसीनां, कदू न्वस्या कृत मिति कद्वन्तः प्रगाथा आरम्भणीया अहरहः शस्यन्ते"-इति। "कस्तम्"-इत्यादिरेकः (सं० ७. ३२. १४, १५.) प्रगाथः, "कन्नव्यः"-इति (सं० ८. ३. १३, १४.) द्वितीयः, "कदू नु"-इति (सं० ८. ६६. ९, १०.) तृतीयः। यद्यपि प्रथमे कच्छब्दो नास्ति, तथापि छत्रिन्यायेन साहचर्याद्वा सर्वे कद्वन्तः, 'प्रगाथाः' ऋग्द्वयात्मकाः ; ते च वैकृतारम्भहेतुत्वात् 'आरम्भणीयाः' ते च प्रतिदिनं शंसनीयाः ॥

प्रथमं प्रगाथं शंसति— "को वै प्रजापतिः, प्रजापतेराप्त्यै"-इति। प्रथमस्यादौ श्रूयमाणस्य क-शब्दस्य प्रजापतिरर्थः ; अतो ऽयं प्रजापतिप्राप्त्यै सम्पद्यते ॥

सर्वान् प्रगाथान् प्रशंसति— "यदेव कद्वन्ता३ः अन्नं वै क मन्नाद्यस्यावरुद्ध्यै"-इति। 'यदेव' यस्मादेव, कारणादेते प्रगाथाः कद्वन्ताः [प्लुतिः प्रशंसार्था] ; कच्छब्दैकदेशरूपं यत्कं, तदन्न मेव ; कशब्दस्य सुखवाचित्वादन्नस्यापि सुखहेतुत्वात् ; अतो ऽन्नप्राप्त्यै तत् सम्पद्यते ॥

पुनरपि प्रकारान्तरेण प्रशंसति— "यद्वेव कद्वन्ता३ः अहरहर्वा एते शान्तान्यहीनसूक्तान्युपयुञ्जाना यन्ति ; तानि कद्भिः प्रगाथैः शमयन्ति ; तान्येभ्यः शान्तानि कं भवन्ति ; तान्येनाञ्छान्तानि स्वर्गं लोक मभि वहन्ति"-इति। 'यद्वेव' पुनरपि यस्मादेव कारणात् एते प्रगाथाः कद्वन्तः शस्यन्ते [प्लुतिः पूर्ववत्], तस्मादेव कारणात् प्रतिदिनम् 'एते' यजमानाः 'शान्तानि' सर्वोपद्रवशमकरणानि अहीनसूक्तान्युपयुञ्जानाः 'यन्ति' वर्त्तन्ते। कथं सूक्तानां शान्तत्व मिति, तदुच्यते—'तानि'

सूक्तानि 'कद्वद्भिः' सुखवाचकशब्दोपेतैः प्रगाथैर्यजमानाः 'शमयन्ति' शान्तानि कुर्वन्ति । 'तानि' च सूक्तानि शान्तानि भूत्वा 'एभ्यः' यजमानेभ्यः 'कं भवन्ति' सुखकारणानि भवन्ति । 'तानि' सूक्तानि शान्तानि भूत्वा 'एनान्' यजमानान् स्वर्गं लोकम् 'अभिवहन्ति' प्रापयन्ति ॥

कद्वत्-प्रगाथेभ्य ऊर्ध्वम् "अप प्राच इन्द्र"—इत्याद्याः त्रिष्टुप्छन्दस्का ऋचः (३२८ पृ०) प्रतिदिनं शंसनीयसूक्तादित्वेन विधत्ते—"त्रिष्टुभः सूक्तप्रतिपदः शंसेयुः"—इति ॥

अत्र कश्चित् पूर्वपक्षमुद्भावयति—"ता हैके पुरस्तात् प्रगाथानां शंसन्ति, धाय्या इति वदन्तः"—इति । यथा होतुर्निष्केवल्यशस्त्रे प्रगाथात् पुरस्तात् धाय्या भवन्ति, तद्वत् "अप प्राचः"—इत्याद्यास्त्रिष्टुभोऽपि धाय्यास्तस्मात् पूर्वोक्तानां कद्वत्-प्रगाथानां पुरस्तात् शंसितुं योग्या इति वदन्तः केचिद्याज्ञिकाः 'ताः' ऋचः तेषां पुरस्तात् शंसन्ति ॥

तं पूर्वपक्षं निराचष्टे— "तत् तथा न कुर्य्यात्"—इति ॥

तस्मिन् पक्षे दोषं दर्शयति—क्षत्रं वै होता, विशो होत्राशंसिनः; क्षत्रायैव तद् विशं प्रत्युद्यामिनीं कुर्युः पापवस्यसम्"—इति । निष्केवल्यस्य शंसको यो होतास्ति, असौ 'क्षत्रं वै' क्षत्रियो राजैव । होतृत्वे समुत्पन्नाः क्रिया होत्राः, ताः शंसतीति मैत्रावरुणादयो 'होत्राशंसिनः', ते च 'विशः' राष्ट्रवर्त्तिन्यः ; प्रजाः 'तत्' तथा सति, होतृदृष्टान्तेन प्रगाथेभ्यः पूर्वं त्रिष्टुभः शंसने सति, तां 'विशं' प्रजां 'क्षत्रायैव' राज्ञ एव 'प्रत्युद्यामिनीं' प्रतिकूलोद्योगयुक्तां कुर्युः । तच्च 'पापवस्यसम्' अतिशयेन पापरूपम् ; स्वामिना राज्ञा सह मात्सर्यस्य स्वामिद्रोहरूपत्वात् ॥

परपक्षं दूषयित्वा स्वपक्षं निगमयति—"त्रिष्टुभो म इमाः सूक्तप्रतिपद इत्येव विद्यात्"–इति। 'इमाः' "अप प्राचः"–इत्याद्याः (३२८पृ०) त्रिष्टुभ ऋचः 'मे' मम शंसितुः 'सूक्तप्रतिपदः' अहरहःशंसनीय सूक्तप्रारम्भरूपाः इत्येव निश्चिनुयात् ; न पुनः प्रगाथेभ्यः पुरस्तात् त्रिष्टुभा मवस्थानं युक्तम् ॥

सूक्तप्रतिपत्पक्षे गुणं दर्शयति— "तद्यथा समुद्रं प्रप्लवेरन्नेवं हैव ते प्रप्लवते, ये संवत्सरं द्वादशाहं वासते,; तद्यथा सैरावतीं नावं पारकामाः समारोहेयुरेव मेवैतास्त्रिष्टुभः समारोहन्ति"–इति। 'तत्' तस्मिन्नभिहितेऽर्थे दृष्टान्तोऽभिधीयते,— यथा लोके समुद्रं प्रप्लवेरन्। 'प्रप्लवः' परतीरगमनम्। स्वल्पेषु नदीतड़ागादिषु परतीरगमनं सुशकं भवति, समुद्रस्य तु तद्दुःशकम् ; तथा संवत्सरसत्रस्य द्वादशाहस्य वानुष्ठातॄणां 'प्रप्लवः' पारगमनं समापनमत्यन्तदुःशकम् ; प्रयोगस्यातिबहुलत्वात्। 'तत्' तथा सति, यथा लोके समुद्रस्य परतीरगमनकामाः पुरुषाः 'सैरावतीं नावं समारोहेयुः' इरा अन्नम्, तत्समूहः ऐरम्, तेन सह वर्त्तत इति 'सैरं' नौस्थं वस्तुजातम्, तादृशं सैरं यस्यां नाव्यस्ति, सेयं नौः सैरावती। समुद्रपारगमनस्य चिरकालसाध्यत्वात्, तावतः कालस्य पर्य्याप्तेनान्नेन सह सर्वं मपेक्षितं वस्तुजातं तस्यां नावि सम्पाद्य पश्चान्नाविकास्तां नाव मारोहेयुः, एव मेवानुष्ठातारः तथाविध-नौसदृशा एतास्त्रिष्टुभः समारोहन्ति। सर्ववस्तुसमृद्धा नौरिवैतास्त्रिष्टुभः पारं नेतुं समर्था इत्यर्थः ॥

तदेव सामर्थ्यं स्पष्टीकरोति— "न ह वा एतच्छन्दो गमयित्वा स्वर्गं लोक मुपावर्त्तते ; वीर्यवत्तमं हि"–इति। समुद्रं वाहुभ्या मुडुपेन वाप्लवनं पारगमनक्षमं न भवति, सैरावत्या तु

नावा पार मवश्यं प्राप्यते ; एव मेव त्रिष्टुप् छन्दो यजमानान् स्वर्गं लोकं गमयित्वा नैवोपावर्त्तते, किन्तु सर्वथा स्वर्गं गमयत्येव। यस्मादेतच्छंसन मतिशयेन वीर्यवत्, तस्मादुशक्तं पारगमयितृत्वम्। एवंविधास्त्रिष्टुभो यदि सूक्तप्रतिपदः स्युः, तदानीं सूक्तच्छन्दसोऽपि त्रिष्टुप्त्वात् तत्साहाय्येन वीर्य्यवत्तमत्व मुपपद्यते। प्रगाथानां तु त्रिष्टुप्त्वाभावात् तेभ्यः पुरस्तात् शंसने वीर्यवत्तमत्वं न सिध्येदित्यभिप्रायः ॥

एताभ्यस्त्रिष्टुब्भ्यः पूर्वं शोंसावो मिति व्याहाव मितरदृष्टान्तेन प्रसक्तं प्रतिषेधति — "ताभ्यो न व्याह्वयीत; समानं हि च्छन्दो ऽथो नेद्धाय्याः करवाणीति"–इति। ताभ्यस्त्रिष्टुब्भ्यः पूर्वं शोंसावो मिति व्याहावं न कुर्यात् ※। यस्मात् सूक्तैः सहैतासां छन्दः समानम्, तस्मात् सूक्तान्तर्भूताना मृगन्तराणा मिवैतासां व्याहावो नास्ति। यदि धाय्यादृष्टान्तेन व्याहावः क्रियेत, तदानी मेता अपि धाय्याः क्रियेरन्, अहं तु तासां धाय्यात्वं 'नेत् करवाणि' सर्वथा न करवाणीत्यभिप्रेत्य धाय्यारूपाङ्गीतः सन् व्याहावं न कुर्यात् ॥

उक्तास्त्रिष्टुप्छन्दस्का ऋचः प्रशंसति— "यदेनाः शंसन्ति, प्रज्ञाताभिः सूक्तप्रतिपद्भिः सूक्तानि समारोहामेति"–इति। 'एनाः' ऋचो यदा शंसन्ति, तदानीं महानौस्थानीयानां त्रिष्टुप्छन्दस्कानां समारोहणम् 'एताभिः' सूक्तप्रतिपद्भिः प्रज्ञाताभिर्भविष्यतीति शंसितॄणा मभिप्रायः। यथा प्रौढायाः नावः समारोहणं यत्र क्वापि कर्त्तुं न शक्यते, किन्तु निश्रेण्यादिसाधनेनैव कर्त्तुं शक्यते, तद्वदत्रापि द्रष्टव्यम् ॥

※ २ भा० ८६ पृ० २२ पं० व्याहावव्याख्यानं कृतं द्रष्टव्यम्।

पुनरपि प्रकारद्वयेन प्रशंसति— "यदेवैनाः शंसन्तीन्द्र मेवैताभिर्निर्ह्वयन्ते यथर्षभं वाशितायै, यद्देवैनाः शंसन्त्यहीनस्य सन्तत्या अहीन मेव तत् सन्तन्वन्ति"–इति। "अप प्राच इन्द्र"–इतिश्रुतत्वादिन्द्राह्वानं भवति। अन्यत् पूर्ववद् व्याख्येयम् ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां चतुर्थाध्याये
(एकोनत्रिंशाध्याये) पञ्चमः खण्डः ॥ ५ (२१) ॥

॥ अथ षष्ठः खण्डः ॥

अप प्राच इन्द्र विश्वाँ अमित्रानिति मैत्रावरुण॑ः पुरस्तात् सूक्ताना महरहः शंसत्य॑पापाचो अभिभूते नुदस्व॑ अ॒पोदी॑चो॒ अप॑ शूराधरा॒च॑ उरौ यथा तव शर्मन् मदेमे॑त्यभयस्य रूप॑ मभय मिव हि यन्निती॑च्छति ब्रह्मणा ते ब्रह्मयुजा युनज्मीति॑ ब्राह्मणाच्छंस्यहरहः शंसति॑ युनज्मीति युक्तवती॑ युक्त इव ह्यहीनो ऽहीनस्य रूप॑ मुरुं नो लोक मनु नेषि विद्वानि॑त्यच्छावाको ऽहरहः शंसत्य॑नु नेषीत्येतीव ह्यहीनो ऽहीनस्य रूपं॑ नेषीति सत्रायणरूपं॑ ता वा एता अहरहः शस्यन्ते॑ समानीभिः परिदध्युरो॑कः-

सारौ हैषा मिन्द्रो यज्ञं भवती᳚३॑ * यथर्षभो वाशिता॑ यथा वा गौः प्रज्ञातं गोष्ठ॑मेवं हैषा मिन्द्रो यज्ञ मैव गच्छति॑ न शुनंहुवीययाहीनस्य परिदध्यात्॑ क्षत्रियो ह राष्ट्राच्च्यवते॑ यो हैव परो भवति॑ त मभि ह्वयति॑ ॥ ६ (२२) ॥

यदुक्तं त्रिष्टुभः सूक्तप्रतिपदः शंसेयुरिति (३२५ पृ०), तत्रस्थास्त्रिष्टुभः उदाहृत्य प्रदर्शयति— "अप प्राच इन्द्र विश्वाँ अमित्रानिति मैत्रावरुणः पुरस्तात् सूक्ताना महरहः शंसति"–इति। "अप प्राचः"–इत्येता मृचं (सं० १०. १३१. १.) मैत्रावरुणः प्रतिदिनं स्वकीयसूक्तादौ शंसेत्। हे इन्द्र ! 'विश्वान् अमित्रान्' सर्वानपि शत्रून् 'प्राचः' प्राङ्मुखान् कृत्वा 'अप नुदस्व'–इतिवक्ष्यमाणेनान्वयः। सोऽयं प्रथमपादस्यार्थः ॥

अवशिष्टं पादत्रयं पठति— "अपापाचो अभिभूते नुदस्व, अपोदीचो अप शूराधराच, उरौ यथा तव शर्मन्मदेमेति"–इति। हे 'अभिभूते' शत्रु मभिभवितुं समर्थ ! 'अपाचः' दक्षिणान् शत्रून् प्रत्यङ्मुखांश्च कृत्वा अप नुदस्व। तथैव 'उदीचः' उदङ्मुखान् कृत्वा अप नुदस्व। हे शूर ! 'अधराचः' अधोमुखान् कृत्वा अप नुदस्व। 'उरौ' विस्तीर्णे 'तव शर्मन्' त्वत्सम्बन्धिनि गृहे 'यथा मदेम' येन प्रकारेण हृष्टा भवेम तथा कुर्विति शेषः ॥

ऋचस्तात्पर्यं दर्शयति— "अभयस्य रूप मभय मिव हि यन्निनीच्छति'–इति। एतत् मन्त्रवाक्य मभयस्य स्वरूपम् ; शत्रु-

---

* "भवतीं३" ख, घ, च।

निराकरणस्य स्वकीयहर्षस्य चात्र प्रार्थ्यमानत्वात् । भयरहित मेक स्थान मयं मैत्रावरुणो 'यन्' प्राप्नुवन् 'इच्छति' प्राप्तु मपेक्षते । तस्माद्योग्येय मृक् ॥

ऋगन्तरं ब्राह्मणाच्छंसिनो विधत्ते— "ब्रह्मणा ते ब्रह्मयुजा युनज्मीति ब्राह्मणाच्छंस्यहरहः शंसति ; युनज्मीति युक्तवती ; युक्त इव ह्यहीनो ऽहीनस्य रूपम्"–इति । अस्या मृचि (सं० ३.३५.४.) युनज्मीतिश्रवणादिय मृग् युजिधात्वर्थवती । अहीनो ऽहर्गणस्य 'युक्त इव' अङ्गां परस्परसम्बन्धवानेव ; अतो युजिधात्वर्थयुक्तं मन्त्रवाक्य महीनस्य रूपम् ॥

अनुकूल मृगन्तर मच्छावाकस्य विधत्ते— "उरुं नो लोक मनुनेषि विद्वानित्यच्छावाको ऽहरहः शंसत्यनुनेषीत्येतीव ह्यहीनो ऽहीनस्य रूपम्"–इति । अत्र (सं० ६. ४७. ८.) यदेतदनुनेषीति पद मस्ति, तस्यार्थः एतीव ह्यहीन इत्यनेनोच्यते । अय महर्गणः 'एतीव' प्रवर्तत एव । 'अनुषेति' अनुक्रमेण 'नय' प्रवर्तयेति । एव मुच्यमानत्वात् प्रवर्तमानस्याहीनस्येदं वाक्य मनुरूपम् ॥

अनुनेषीतिपदस्याभिप्राय मुक्त्वा तन्मध्यगतस्य नेषीत्येतस्यार्थं माह— "नेषीति सत्रायणरूपम्"–इति । सत्रस्यायन मनुष्ठानं 'सत्रायणं', 'नेषि' नय, अनुष्ठापयेति तस्यार्थः ; अत एतत् पदं सत्रायणस्यानुकूलम् ॥

उदाहृतास्तिस्र ऋच उपसंहरति— "ता वा एता अहरहः शस्यन्ते"–इति * ॥

अथ परिधानीया ऋचः स्तोतु मुपक्रमते—"समानीभिः परि-

---

* "अप प्राचः ०—० कद्वद्य आरम्भणीयाः"–इति आश्व० श्रौ० ७, ४, ७ ।

दध्युः"–इति । 'समानीभिः' एकविधाभिः ऋग्भिर्मैत्रावरुणादयो होतकाः 'परिदध्युः' शस्त्रसमाप्तिं कुर्य्युः । "नू ष्टुत"–इति मैत्रावरुणस्य परिधानीया (सं० ४. १९. ११.) । "एवेदिन्द्रम्"–इति (सं० ७. २३. ६.) ब्राह्मणाच्छंसिनः परिधानीया । "नूनं सा ते"–इति (सं० २. ११. २१.) अच्छावाकस्य परिधानीया * । अनेन सूक्तसामान्यादेताः समान्य इत्युच्यन्ते ॥

दृष्टान्तद्वयेन परिधानीयाः शंसति—"ओकस्सारी हैषा मिन्द्रो यज्ञं भवतीँ३ यथर्षभो वाशितां यथा वा गौः प्रज्ञातं गोष्ठ मेवं हैषा मिन्द्रो यज्ञ मेव गच्छति"–इति । 'ओकस्सारी ह' मार्जार इवेन्द्रः 'एषां' यजमानानां यज्ञं 'भवतीँ' पुनः पुनः प्राप्नोति । सानुनासिका प्लुतिः पूजार्था । यथा 'वाशितां' गर्भार्थिनीं गा मृषभो गच्छति ; यथा वा गौः 'प्रज्ञातं' प्रतिदिनगमनेनात्यन्तं परिज्ञातं गोष्ठं प्राप्नोति ; एव मेवाय मिन्द्रः 'एषां' यजमानानां यज्ञ मागच्छत्येव । अतस्तदागमनार्थं समान्यः परिधानीया इत्यर्थः ॥

समानीभिः परिदध्युरिति यदुक्तम् तत्र "अभितष्टेव"–इत्यच्छावाकस्याहरहःशस्यं सूक्तम् (सं० ३. ३८. १-१०.) † ; तस्मिन् अन्त्या "शुनं हुवेम"–इत्येषा (१०.) ; तया परिधानप्राप्तौ निषेधति—"न शुनंहुवीययाहीनस्य परिदध्यात् ; क्षत्रियो ह राष्ट्राच्यवते यो हैव परो भवति त मभि ह्वयति"–इति । शुनं हुवेमेति यस्या मृचि श्रूयते सा 'शुनंहुवीया' ; अहर्गणस्य शस्त्रे तया न परिदध्यात् । परिधाने हि 'क्षत्रियः' राजा स्वकीयाद्राष्ट्रात् च्यवते ; यस्तु 'परः' तदीयः शत्रुर्भवति, तम् 'अभि'लक्ष्य 'ह्वयति'

---

*, † पृ० २४६—२५५ पृ० ६. २. ५ ; आश्व० श्रौ० ७. ४. ८—१० ।

आह्वानं करोति ; हुवेमेत्यन्याह्वानस्य प्रतीयमानत्वात् । अत एव सूत्रकारो ब्राह्मणान्तर माश्रित्य "नूनं सा ते"–इत्येतां (सं० २. ११. २१.) परिधानीया मुक्तवान् * ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां चतुर्थाध्याये
(एकोनत्रिंशाध्याये) षष्ठः खण्डः ॥ ६ (२२) ॥

॥ अथ सप्तमः खण्डः ॥

अथातो ऽहीनस्य युक्तिश्च विमुक्तिश्च॑ व्यन्तरिक्ष मतिरदित्यहीनं युङ्क्त॑ एवेदिन्द्र मिति विमुञ्चत्या॑हं सरस्वतीवतो॑र्नूनं सा त इत्यहीनं युङ्क्ते॑ ते स्याम देव॑ वरुण॑ नू ष्टुत इति विमुञ्च॑त्येष ह वा अहीनं तन्तु मर्हति॑ य एन᳚ योक्तुं च विमोक्तुं च वेद॑ तद्यच्चतुर्विंशे ऽहन् युज्यन्ते॑ सा युक्ति॑रथ यत्

---

* "उदु ब्रह्माण्यभितष्टेवेतीतरावहरहःशस्ये, नूनं सा त इत्यन्त मुत्तमम्"–इति आश्व० श्रौ० ७. ४. ९, १०। यद्यपीह ब्राह्मणे शुनंहुवीयायाः परिधानीयात्वनिषेधमात्रं श्रूयते, न तु "नूनं सा ते"–इत्यस्या विधिरपि ; तथापि तद्विधिर्ब्राह्मणान्तरादेवावगम्य इत्यभिप्रायः। तच्च ब्राह्मणान्तर मिहैवोत्तरखण्डे द्रष्टव्यम् "नूनं सा त इत्यहीनं युङ्क्ते"– इति। किञ्च अभितष्टीयं सूक्तं यद्यपि संहितायां दशर्चं माम्नातम्, पर मिह नून मित्येतस्या आगमादेकादशर्चत्वेन तच्छंसनविधिः सम्पन्नः। अत एवाचाश्वलायनवृत्तौ नारायण आह— 'ऋगागमे ऽप्युद्धाराभावादधिकेयं भवति'–इति।

पुरस्तादुदयनीयस्यातिरात्रस्य विमुच्यन्ते॑ सा विमुक्तिस्त॑द्यच्चतुर्विंशे ऽहन्नैकाहिकाभिः परिदध्युर॑त्राहैव यज्ञं संस्थापयेयुर्ना॑हीनकर्म कुर्युरथ॑ यदहीनपरिधानीयाभिः परिदध्यु॑र्यथा श्रान्तो विमुच्यमान उत्कृत्येतैवं॑ यजमाना उत्कृत्येर॑न्नुभयीभिः परिदध्युस्त॑द्यथा दीर्घाध्व उपविमोकं यायात्॑ तादृक्तत् सन्ततो हैषां यज्ञो भवतीँ३॑ व्यूमुञ्चन्त एकां द्वे न द्वयोः सवनयोः॑ स्तोम मतिशंसेद्दीर्घारण्यानि ह वै भवन्ति॑ यत्र बह्वीभिः स्तोमो ऽतिशस्यते॑ ऽपरिमिताभिस्तृतीयसवने॑ ऽपरिमितो वै स्वर्गो लोकः॑ स्वर्गस्य लोकस्याप्त्यै॑ सन्ततो ह्यस्याभ्यारब्धो॑ विस्रस्तो ऽहीनो भवति॑ य एवं विद्वानहीनं तनुते॑ ॥ ७ (२३) ॥

एवं तावत् शस्त्रिणां होत्रकाणां प्रातस्सवने माध्यन्दिने च शस्त्राणि उक्तानि ; तेषां च परिधानीयाः पूर्व मेव “उभय्यः परिधानीयाः”–इत्यत्र (२४६ पृ०) ऐकाहिका अहीनाश्च विमृष्टाः । अथेदानीं कतमास्ता इति विविनक्ति—“अथातो ऽहीनस्य युक्तिश्च विमुक्तिश्च”–इति । ‘अथ’ परिधानीयाकथनानन्तरं यतस्तद्विवेको ऽपेक्षितः, अतः कारणात् ‘अहीनस्य’ अहर्गणस्य युक्तिश्च विमुक्तिश्च विवेकायोभे, वक्ष्येते इति शेषः । ‘युक्तिः’ योगः, स्वाधीनत्वेन क्रतोः सम्पादनम् ; ‘विमुक्तिः’ विमोचनं, स्वाधीनतया निर्बन्धपरित्यागः ; तदेतदुभयं परिधानीयावशेन सम्पद्यते ॥

तत्र ब्राह्मणाच्छंसिनः परिधानीया मुपजीव्य क्रतोर्योगविमोकौ दर्शयति — "व्यन्तरिक्ष मतिरदित्यहीनं युङ्क्त एवेदिन्द्रमिति विमुञ्चति"–इति। प्रातस्सवने ब्राह्मणाच्छंसिनो "व्यन्तरिक्षम्"–इति (सं० ८. १. ७-९.) पर्यासस्तृचः *, तस्य "इन्द्रेण रोचना दिवः"–इति ऋगुत्तमा (९.); तया यत् परिधानं, तेन 'अहीनं' क्रतुं 'युङ्क्ते' स्वाधीनतया निबध्नाति। माध्यन्दिने सवने तु "एवेदिन्द्रम्"–इति (सं० ७. २३. ६.) परिधानीया †; तया 'विमुञ्चति' स्वाधीनतया निगृहीत महीनक्रतुं विस्रम्भव्यवहाराय निग्रहपरित्यागेन विमुञ्चति; स्वाधीनो हि क्रतुरवश्यं फलं दास्यतीति युक्तो बन्धविमोकः॥

अथाच्छावाकस्य परिधानीयया योगविमोकौ दर्शयति—"आहं सरस्वतीवतोर्नूनं सा त इत्यहीनं युङ्क्ते"–इति। अयं योगो विमोकस्याप्युपलक्षणार्थः। "आहम्"–इति (सं० ८. ३८. १०.) प्रातस्सवने परिधानीया ‡; तया क्रतोर्योगो भवति। "नूनं सा ते"–इति (सं० २. ११. २१.) माध्यन्दिने सवने परिधानीया §; तया क्रतोर्विमोको भवति॥

अथ मैत्रावरुणस्य परिधानीयया योगविमोकौ दर्शयति—"ते स्याम देव वरुण, नू ष्टुत इति विमुञ्चति"–इति। अत्र विमोको योगस्याप्युपलक्षणार्थः। "ते स्याम"–इति (सं० ७. ६६. ९.) प्रातस्सवने परिधानीया ‖; तया अहीनस्य क्रतोर्योगः।

---

*, ‡, ‖ पु० ६. २. ४। "ऊर्द्ध्वं मावापात् प्रति वां सूर उदिते (सं० ७. ६६. ७.), व्यन्तरिक्ष मतिरत् (सं० ८. १४. ७.), श्यावाश्वस्य सुन्वतः (सं० ८. ३८. ८.) इति तृचाः पर्यासाः"–इति आश्व० श्रौ० ७, २. १२। सूक्तानां पर्यासानां वा अन्त्या एव परिधानीयाः।

†, § आश्व० श्रौ० ७. ४. ९। पु० ६. २. ५. २४८ पृ० द्र०।

“नू ष्टुत”-इति (सं० ४. १६. २१.) माध्यन्दिने सवने परिधानीया * ; तया क्रतोर्विमोकः ॥

यद्यपि तृतीयसवने विमोको वक्तुं युक्तः, तथाप्यग्निष्टोमसंस्थेऽहनि होत्रकाणां तृतीयसवने शस्त्राभावात् सर्वेष्वहस्सु अनुगत्यर्थं माध्यन्दिने सवने विमोकोऽभिहितः ॥

यथोक्तयोगविमोकज्ञानं प्रशंसति—“एष ह वा अहीनं तन्तु मर्हति य एनं योक्तुं च विमोक्तुं च वेद”–इति । ‘यः’ पुमानुक्तप्रकारेण ‘एनम्’ अहीनं प्रातस्सवनपरिधानीयया योक्तुं माध्यन्दिनपरिधानीयया विमोक्तुञ्च जानाति, एष एव पुमानहर्गणं तन्तुं विस्तारयितु मर्हति । यथोक्तपरिधानीयानभिज्ञस्य नास्ति तत्राधिकार इत्यर्थः । एव मेकैक महरपेक्ष्य योगविमोकावुक्तौ ॥

अथाहस्समूह मपेक्ष्य योगविमोकौ दर्शयति— “तद्यच्चतुर्विंशेऽहन् युज्यन्ते, सा युक्तिरथ यत् पुरस्तादुदयनीयस्यातिरात्रस्य विमुच्यन्ते, सा विमुक्तिः”–इति । गवामयनस्य संवत्सरसत्रस्य आद्यन्ते अहनी अतिरात्रसंस्थे । तत्रोपक्रमगतस्य प्रायणीयातिरात्रस्यानन्तरभाविनि चतुर्विंशाख्ये आरम्भणीयेऽहनि परिधानीयाभिः सर्वेऽहर्विशेषा युज्यन्ते । सोऽयं गवामयनस्य योगः । अथोदयनीयस्यातिरात्रस्य पुरस्ताद् वर्त्तमाने महाव्रतीयेऽहनि परिधानीयाभिः सर्वेऽप्यहर्विशेषा विमुच्यन्त इति यदस्ति, सेयं गवामयनस्य विमुक्तिः ॥

तत्र योगविमोकहेतूनां परिधानीयाना मेकैकविधत्वं निन्दित्वा उभयविषयत्वं दर्शयति— “तद्यच्चतुर्विंशेऽहन्नैकाहिकाभिः परिदध्युरत्राहैव यज्ञं संस्थापयेयुर्नाहीनकर्म कुर्युरथ यद-

---

* आश्व० श्रौ० ७. ४. १० । पु० ६. २. ५. २४९ पृ० द्र० ।

हीनपरिधानीयाभिः परिदध्युर्यथा श्रान्तो विमुच्यमान उत्कृत्येतैवं यजमाना उत्कृत्येरन्नुभयीभिः परिदध्युः"–इति। 'अहन्' अहनि चतुर्विंशाख्ये यदि 'ऐकाहिकाभिः' प्रकृतिभूते एकाहे ज्योतिष्टोमे विद्यमानाभिः परिधानीयाभिः परिदध्युः, तदानीम् 'अत्रैव' चतुर्विंशाख्ये द्वितीयस्मिन् अहन्येव यज्ञं गवामयनं 'संस्थापयेयुः' समाप्तिं कुर्य्युः। अत्राहेत्यहशब्दः खेदे; कष्ट मेतत्। अत्रैव समाप्तौ 'अहीनकर्म' कृत्स्नाहर्गणकर्तव्यं न कुर्युः। एतदेव कष्टम्। 'अथ' पूर्वोक्तवैपरीत्येन ऐकाहिकाः परिधानीयाः परित्यज्य यद्यहीनपरिधानीयाभिरेव सर्वे होत्रकाः परिदध्युः, इदानीं यथा लोके रथशकटादौ युक्तो ऽश्ववलीवर्दादिः कियद् दूरं गत्वा श्रान्तः सन् यदि न विमुच्येत, तदानीम् 'उत्कृत्येत' उच्छिद्येत; तथैव यजमाना 'उत्कृत्येरन्' विनश्येयुः। सर्वेषां होत्रकाणा मैकाहिकस्वीकारे समाप्त्यभावः, अहीनगतस्वीकारे यजमानोच्छेदः, इति दोषद्वयपरिहारार्थम् 'उभयीभिः' ऐकाहिकाभिरहीनगताभिश्च परिधानीयाभिः परिदध्युः। तत्र प्रकारविशेषः पूर्वं मेवोक्तः,— मैत्रावरुण ऐकाहिकाभिरेव सवनद्वये परिदध्यात्; अच्छावाको ऽहीनगताभिरेव सवनद्वये परिदध्यात्; ब्राह्मणाच्छंसी तु प्रातस्सवने अहीनगताभिः परिदध्यात्, माध्यन्दिनसवने चैकाहिकाभिरिति निर्णयः। अस्य निर्णयस्य पूर्वं मेव सिद्धत्वेऽपि (२४९,२५० पृ०) प्रकारान्तरेण प्रशंसार्थ मत्र पुनरभिधानम्॥

तदेतदुभयीभिः परिधानं दृष्टान्तेन प्रशंसति— "तद्यथा दीर्घाध्व उपविमोकं यायात् तादृक्तत्"–इति। लोके यथा वा 'दीर्घाध्वे' दूरमार्गे गच्छन् पुरुषः 'उपविमोकं' रथशकटादौ

योजित मश्वबलीवर्दादिकं तत्र तत्र उपविमुच्योपविमुच्य 'यायात्' श्रान्तिपरिहारेण शनैर्गच्छेत्, तादृगेव 'तत्' उभयविधपरिधानौ ; यथा मार्गे वहनश्रमः विमोकेन निवर्तते, एव महीनगताभिरापादितः श्रमः ऐकाहिकाभिर्निवर्तते ॥

उभयविधपरिधाने दोषं परिहृत्य गुणं दर्शयति— "सन्ततो हैषां यज्ञो भवतीँ३ व्यूमुञ्चन्तः"—इति । 'एषाम्' उभयविधपरिधानयुक्तानां पुरुषाणां यज्ञः 'सन्ततः' विच्छेदरहितो भवति । सानुनासिका प्लुतिः प्रशंसार्था । विशब्दादुपरितन उकार एवकारार्थं, तस्य दीर्घश्छान्दसः । यजमानाः श्रमं विमुञ्चन्त एव ॥

अथ स्तोमातिशंसने कञ्चिद्विशेषं दर्शयति— "एकां द्वे न द्वयोः सवनयोः स्तोम मति शंसेद्"—इति । यदा सामगैर्विवृद्धः स्तोमः क्रियते, तदानीं होत्रकाः स्तोमसङ्ख्या मतिलङ्घ्य शंसनीयम्, तत्र 'द्वयोः' प्रातर्माध्यन्दिनयोः सवनयोः 'एकाम्' ऋचं वा 'द्वे' ऋचौ वातिक्रम्य न शंसेत्, किन्त्वेकया द्वाभ्यां वातिशंसेत् । पूर्वत्रायं नियमः प्रातस्सवन एवोक्तः, उत्तरयोस्तु सवनयोरपरिमिताभिः अतिशंसन मुक्तम् *; तथा सति माध्यन्दिने सवने पूर्वोत्तरविरोधः प्रसज्येतेति चेत्, तर्हि तत्रैकया द्वाभ्या मपरिमिताभिर्विकल्पोऽस्तु † ॥

बहुभिरतिशंसने बाध माह— "दीर्घारण्यानि ह वै भवन्ति, यत्र बह्वीभिः स्तोमो ऽतिशस्यते"—इति । यथा दीर्घेष्वरण्येषु गच्छतः पुरुषस्य विश्रामस्थानाभावात् महाप्रयासः, तथा बह्वीभिरतिशंसनं दुःखहेतुरित्यर्थः ॥

---

* "एकां द्वे न स्तोम मति शंसेत्०—०अपरिमिताभिरुत्तरयोः"—इति २५२,२५३पृ० ।

† "श्रुतिद्वैधं तु यत्र स्यात् तत्र धर्मावुभावपि"—इति म० सं० २. १४ ।

माध्यन्दिनसवन इव तृतीयसवने पच्चान्तर मस्तीति शङ्कां वारयितुं पूर्वोक्त मेवापरिमितत्वं पुनरप्यभिधत्ते— "अपरिमिताभिस्तृतीयसवने ऽपरिमितो वै स्वर्गो लोकः स्वर्गस्य लोकस्याप्त्यै" -इति। 'अपरिमिताभिः' नियतपरिमाणरहिताभिः। स्वर्गस्य भोगबाहुल्यादपरिमितत्वम् ॥

वेदनपूर्वक मनुष्ठानं प्रशंसति— "सन्ततो हास्याभ्यारब्धो ऽविस्रस्तो ऽहीनो भवति य एवं विद्वानहीनं तनुते"-इति। 'यः' पुमानुक्तप्रकारेणातिशंसनं जानन् अहीन मनुतिष्ठति, 'अस्य' पुरुषस्य 'अभ्यारब्धः' आभिमुख्येनोपक्रान्तोऽहर्गणः 'सन्ततः' नैरन्तर्येण वर्त्तमानः, कदाचिदपि 'अविस्रस्तः' विनाशरहितो भवति ॥ ७॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां चतुर्थाध्याये
(एकोनत्रिंशाध्याये) सप्तमः खण्डः ॥ ७ (२३) ॥

* * *

॥ अथ अष्टमः खण्डः ॥

देवा वै वलि गाः पर्यपश्यंस्ता यज्ञेनैवेप्संस्ताः षष्ठेनाह्नाप्नुवंस्ते प्रातःसवने नभाकेन वल मनभयंस्तं * यदनभया३न् अश्रथयन्नेवैनं तत् त उ तृतीयसवने वज्रेण वालखिल्याभिर्वाचःकूटेनैकपदया वलं विरुज्य गा उदाजंस्तथैवैतद्यजमानाः प्रात-

---

* "मनभयँस्तं" ख, ग, ङ।

स्सवने नभाकेन वलं नभयन्ति तं यन्नभयन्तौँ३ * अययन्त्येवैनं तत् तस्माद्धोत्रकाः प्रातस्सवने नाभाकांस्तृचाञ्छंसन्ति यः ककुभो निधारय इति मैत्रावरुणः पूर्वीष्ट इन्द्रोप मातय इति ब्राह्मणाच्छंसी ता हि मध्यमस्वराणा मित्यच्छावाकस्त उ तृतीयसवने वज्रेण वालखिल्याभिर्वाचःकूटेनैकपदया वलं विरुज्य गा आप्नुवन्ति पच्छः प्रथमं षड् वालखिल्यानां सूक्तानि विहरत्यर्द्धर्चशो द्वितीयमृक्शस्तृतीयं स पच्छो विहरन् प्रगाथे प्रगाथ एवैकपदां दध्यात्स वाचःकूटस्ता एताः पञ्चैकपदास्तस्मो दशमादह्न एका महाव्रतादथाष्टाक्षराणि माहानामनानि पदानि तेषां यावद्भिः सम्पद्येत तावन्ति शंसेन्नेतराण्याद्रियेताथार्द्धर्चशो विहरंस्ताश्चैवैकपदाः शंसेत्तानि चैवाष्टाक्षराणि माहानामनानि पदान्यथ ऋक्शो विहरंस्ताश्चैवैकपदाः शंसेत्तानि चैवाष्टाक्षराणि माहानामनानि पदानि स यत् प्रथमं षड् वालखिल्यानां सूक्तानि विहरति प्राणञ्च तद्वाचं च विहरति यद् द्वितीयं चक्षुश्च तन्मनश्च विहरति यत् तृतीयं श्रोत्रं च तदात्मानं च विहरति तदुपाप्तो विहारे काम उपाप्तो वज्रे वालखिल्यासूपाप्तो

---

* "यन्नभयन्तीं३" ग, च।

वाचःकूट एकपदाया सुप्राप्तः प्राणकॢप्ता मविहृतानेव चतुर्थं प्रगाथाञ्छंसति पशवो वै प्रगाथाः पशूनामवरुद्ध्यै नाचैकपदां व्यवदध्याद्यदचैकपदां व्यवदध्याद् वाचःकूटेन यजमानात्पशून्निर्हण्याद् य एनं तत्र ब्रूयाद् वाचःकूटेन यजमानात्पशून्निरवधीरपशुमेन मकरिति शश्वत् तथा स्यात्तस्मात्तचैकपदान्न व्यवदध्याद् द्वावेवोत्तमे सूक्ते पर्यस्यति स एव तयोर्विहारस्तदेतत् सौबलाय सर्पिर्वात्सिः शशंस स होवाच भूयिष्ठानहं यजमाने पशून् पर्यग्रहैष मकनिष्ठा उ मा मागमिष्यन्तीति तस्मै ह यथा महद्भ्य ऋत्विग्भ्य एवं निनाय तदेतत्पशव्यञ्च स्वर्ग्यञ्च शस्त्रं तस्मादेतच्छंसति ॥ ८ (२४) ॥

अथ पृष्ठ्यस्य षडहस्य षष्ठेऽहनि शिल्पाख्यशस्त्रकॢप्तिसूक्तं विधातु माख्यायिका माह—"देवा वै वले गाः पर्यपश्यंस्ता यज्ञेनैवेप्संस्ताः षष्ठेनाह्नाप्नुवंस्ते प्रातस्सवने नभाकेन वल मनभयंस्तं यदनभया३न् अश्लथयन्नेवैनं तत्, त उ तृतीयसवने वज्रेण वालखिल्याभिर्वाचःकूटेनैकपदया वलं विरुज्य गा उदाजन्"–इति। वलनामकः कश्चिदसुरप्रभुः, तदीयभृत्याः बृहस्पतिप्रमुखानां देवानां गा अपहृत्य वलस्य गृहे स्थापितवन्तः। देवाश्च केनचिद्दूतमुखेन 'वले' वलस्य गृहे अवस्थापिता गाः 'पर्यपश्यन्' ज्ञातवन्तः। ज्ञात्वा च सामभेदादीन् लौकिकोपायान् परित्यज्य

'यज्ञेनैव' उपायेन 'ऐप्सन्' आप्तु मिच्छां कृतवन्तः। कृत्वा च पृष्ठ्यषडहस्य यत् षष्ठ महः, तदहरनुष्ठाय तत्सामर्थ्येन 'ताः' गाः प्राप्नुवन्। 'ते' देवाः प्रातस्सवने नभाकनाम्ना महर्षिणा, तद्दृष्टेन मन्त्रेण वा, वलनामक मसुरम् 'अनभयन्' [नभतिधातुर्हिंसार्थः] ताड़ितवन्त इत्यर्थः। 'तं' प्रतिबन्धकारणं वलनामान मसुरं यद्यपि 'अनभयन्' ताडितवन्तः [श्रुतिस्ताड़नप्रशंसार्था] तदानी मेव गोग्रहणं 'अश्रथयन्नेव' रक्षणार्थप्राकारद्वारोद्घाटनेन निरोधं शिथिलीकृतवन्तः ; यद्वा वलनामान मसुर मेव वलक्षय मापाद्य शिथिलीकृतवन्तः। 'ते उ' पुनरपि ते देवाः तृतीयसवने वज्ररूपेणावस्थिताभिः 'वालखिल्याभिः' ऋग्भिः 'वाचःकूटेनैकपदया' वलं 'विरुज्य' विशेषेण भग्नं कृत्वा स्वकीया गाः 'उदाजन्' तदीयाद् दुर्गादुन्नमितवन्तः। वाचःकूटशब्देन विहृतो मन्त्रविशेष उच्यत इत्युपरिष्टाद् दर्शयिष्यति ; स एव वाचःकूट एकपदा भवति ॥

अथ नभाकेन दृष्टान् तृचान् विधत्ते— "तथैवैतद्यजमानाः प्रातस्सवने नभाकेन वलं नभयन्ति; तं यन्नभयन्तीँ ३ श्रथयन्त्येवैनं तत्; तस्माद्धोत्रकाः प्रातस्सवने नाभाकांस्तृचाञ्छंसन्ति"—इति। यथा देवा नभाकेन वलं हिंसितवन्तः, तथैवैतस्मिन् षष्ठेऽहनि यजमानाः प्रातस्सवने नभाकनाम्ना महर्षिणा दृष्टेन मन्त्रेण 'वलं' वलनामकासुरवत् प्रतिबन्धकं पाप्मानं 'नभयन्ति' हिंसन्ति। 'तं' वलं 'यद्' यदा नभयन्ति [श्रुतिः पूर्ववत्], 'तत्' तदैनं 'श्रथयन्ति' शिथिलं कुर्वन्ति। 'तस्मात्' कारणात् मैत्रावरुणादयो 'होत्रकाः' प्रातस्सवने 'नाभाकान्' नभाकेन दृष्टान् तृचान् शंसेयुः॥

तांस्तृचानुदाहरति— "यः ककुभो निधारय इति मैत्रा-

वरुणः, पूर्वीष्ट इन्द्रोप मातय इति ब्राह्मणाच्छंसी, ता हि मध्यम्भराणा मित्यच्छावाकः”–इति। “यः ककुभः”–इत्येकस्तृचः (सं० ८. ४१. ४–६.), “पूर्वीष्टे”–इति (सं० ८. ४०. ९–११.) द्वितीयः, “ता हि”–इति (सं० ८. ४०. ३–५.) तृतीयः ; मैत्रावरुणादयः क्रमेण शंसेयुः [*] ॥

तांस्तृचान् विधाय शिल्पस्वरूपं विधत्ते — “त उ तृतीयसवने वज्रेण वालखिल्याभिर्वाचःकूटेनैकपदया वलं विरुज्य गा आप्नुवन्ति”–इति। ‘त उ’ ते तु मैत्रावरुणादयः ‘वलं’ प्रतिबन्धकं पाप्मानं वैरिणं वज्ररूपेण वालखिल्येन विनाश्य गोप्राप्तौ विघ्नरहिताः सन्तो गाः प्राप्नुवन्ति। ‘वालखिल्याभिर्वाचःकूटेनैकपदया’–इति, एतावता शिल्पस्वरूप मभिहितम् [†] ॥

तदेतद्विशदयति— “पच्छः प्रथमं षड् वालखिल्यानां सूक्तानि विहरत्यर्द्धर्चशो द्वितीय मृक्शस्तृतीयं, स पच्छो विहरन् प्रगाथे प्रगाथ एवैकपदां दध्यात् स वाचःकूटः”–इति। वालखिल्यनामकाः केचन महर्षयः, तेषां सम्बन्धीन्यष्टसूक्तानि विद्यन्ते ; तानि वालखिल्यनामके ग्रन्थे समाम्नायन्ते [‡]। तेष्वादौ यानि षट् सूक्तानि,

---

[*] “महावालभिदं चेच्छंसेदूर्द्ध मनुरूपेभ्य आरम्भणीयाभ्यो वा नाभाकांस्तृचानावपेरन् गायत्रीकारम्”–इत्यादि आश्व० श्रौ० ७, २. १६,१७।

[†] पु० २९८ पृ० ‘*’ द्रष्टव्यम्।

[‡] अध्यापक-मोक्षमूलर-मुद्रितपुस्तके अष्टममण्डलीय-षष्ठानुवाकात्परस्तात् वालखिल्यनामकान्येकादश सूक्तानि मुद्रितानि दृश्यन्ते। वस्तुतस्तु यस्याः संहिताया मण्डलकृतो विभागः, न तत्र वालखिल्याना मृचां सन्निवेशः ; ता मेव संहिता मवलम्ब्य सायणाचार्येण भाष्य मकारि। अतएवेहोक्तं “वालखिल्यनामके ग्रन्थे”–इति। अष्टकविभक्तसंहितायां तु षष्ठाष्टकस्य चतुर्थाध्याये चतुर्दशाद्याः सप्तदश वर्गा वालखिल्यीया एवेति न तत्र वालखिल्याख्यः कश्चन पृथक् ग्रन्थ इति। अथ यदुक्त मारण्यकभाष्ये ‘संहिताया माम्नातानि’–इति (५, २. ४. २.), तदपि वालखिल्यसंहितेति पृथक् ग्रन्थ इत्यभिप्रायेणैव।

तानि प्रथमं 'पच्छः' पादशो विहरेत् । ततो द्वितीयस्या मावृत्ता वर्द्धर्चशो विहरेत् । तृतीयस्या मावृत्तौ ऋक्शो विहरेत् । यदा पच्छो विहरति, तदानी मेकैकस्मिन् प्रगाथे एकैका मेकपदां दध्यात् । स प्रगाथैकपदयोः समूहो 'वाचःकूटः'–इत्यनेन शब्देनाभिधीयते । त मिमं विहारप्रकार माश्वलायन आह—"षट् सूक्तानि व्यतिमर्शं पच्छो विहरेद्, व्यतिमर्श मर्द्धर्चशो, व्यतिमर्श मृक्शः, प्रगाथान्तेषु चानुपसन्तान मृगावान मेकपदाः शंसेत्"–इति (श्रौ० ८. २. १९, २०)। तेषु षट्सूक्तेषु प्रथमसूक्तादावृग्द्वय मेव माम्नातम्—

"अभि प्र वः सुराधस मिन्द्र मर्च यथा विदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति * (१)
शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
गिरे रिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः † (२)"–इति ।

द्वितीयसूक्तेऽपि ऋग्द्वय मेव माम्नातम्—

"प्र सु श्रुतं सुराधस मर्चा शक्र मभिष्टये ।
यः सुन्वते स्तुवते काम्यं वसु सहस्रेणेव मंहते ‡ (१)
शतानीका हेतयो अस्य दुष्टरा इन्द्रस्य समिषो महीः ।
गिरिर्न भुज्मा मघवत्सु पिन्वते यदीं सुता अमन्दिषुः § (२)"–इति ।

तत्र प्रथमसूक्तगत मेकं पादं च संयोजयेत् । सोऽयं विहारः । अस्मिन् विहारे 'व्यतिमर्शः' नाम कश्चिद्विशेषः । स च यथाक्रमं परित्यज्य प्रकारान्तरेण योजने सति सम्पद्यते । प्रथमसूक्तस्य प्रथमाया मृचि प्रथमपाद मुक्त्वा द्वितीयसूक्तस्य द्वितीयाया मृचि (यद्) द्वितीयपादं तेन संयोजयेत् । तद्यथा—

---

*, †, ‡, § एषु स्थानेषु 'ओम्'–इति अन्तपदं भाष्यपुस्तकेषु ।

“अभि प्र वः सुराधस मिन्द्रस्य समिषो महीः”–इति ।

द्वितीयसूक्तस्य द्वितीयस्या मृचि प्रथमपाद मुक्त्वा प्रथमसूक्तस्य प्रथमाया मृचि (यत्) द्वितीयपादं तेन संयोजयेत् । तद्यथा—

“शतानीका हेतयो अस्य दुष्टरा इन्द्र मर्च यथा विदोम्”–इति ।

अथ प्रथमसूक्तस्य प्रथमाया मृचि तृतीयपाद मुक्त्वा द्वितीयसूक्तस्य द्वितीयस्या मृचि (यत्) चतुर्थपादं तेन संयोजयेत् । तद्यथा—

“यो जरितृभ्यो मघवा पुरूवसुर्यदीं सुता अमन्दिषुः”–इति ।

द्वितीयसूक्तस्य द्वितीयस्या मृचि तृतीयपाद मुक्त्वा प्रथमसूक्तस्य प्रथमाया मृचि (यत्) चतुर्थपादं तेन संयोजयेत् । तद्यथा—

“गिरिर्न भुज्मा मघवत्सु पिन्वते सहस्रेणेव शिक्षतोम्”–इति ।

तदिदं पादयोर्विहृत मृग्द्वय मेकः प्रगाथः सम्पद्यते । तस्य प्रगाथस्यान्ते “इन्द्रो विश्वस्य गोपतिः”–इत्येता मेकपदां सन्दध्यात् । सोऽयं समूहो वाचःकूटसञ्ज्ञकः । अनेनैव न्यायेन सर्वेषु सूक्तेषु सर्वास्वृक्षु बुद्धिमता पादशो व्यतिमर्शविहरण मुन्नेयम् ।

अथार्द्धर्चशो विहार उच्यते । प्रथमसूक्तस्य प्रथमाया मृचि प्रथमार्द्धर्चं मुक्त्वा द्वितीयसूक्तस्य द्वितीयस्या मृचि (यत्) उत्तरार्द्धं तेन संयोजयेत् । तद्यथा—

“अभि प्र वः सुराधस मिन्द्र मर्च यथा विदे ।
गिरिर्न भुज्मा मघवत्सु पिन्वते यदीं सुता अमन्दिषोम्”–इति ।
एवं सर्व मुन्नेयम् ।

ऋक्शो विहरेत् । तत्र प्रथमसूक्तस्य प्रथमा मृच मुक्त्वा तया सह द्वितीयसूक्तस्य द्वितीया मृचं योजयेत् । एवं सर्वत्रोहनीयम् * ॥

---

* एष विहारो महावलभिन्नामकः ; अन्यविधावपि विहारौ आश्वलायनेनैवाभिहितौ “अथ वालखिल्या विहरेत् ०—० इति नु हौगिडनो”–इति (८. २. ३—१७.) ।

अथ प्रगाथान्तेषु प्रक्षेपणीया एकपदा दर्शयति — "ता एताः पञ्चैकपदाश्चतस्रो दशमादह्न एका महाव्रताद्"–इति । या एकपदा ऋचः प्रक्षेप्तव्याः, ता एता एकपदाः पञ्चसङ्ख्याकाः । तासु चतस्र एकपदाः श्रुत्यन्तरेषु दशमेऽहनि पठिताः [*] । तस्माद्दशमादह्नस्ताश्चतस्र आनेतव्याः । तासु "इन्द्रो विश्वस्य गोपतिः"–इत्येषा प्रथमा, "इन्द्रो विश्वस्य भूपतिः"–इत्येषा द्वितीया, "इन्द्रो विश्वस्य चेतति"–इत्येषा तृतीया, "इन्द्रो विश्वस्य राजति"–इत्येषा चतुर्थी; अथावशिष्टा श्रुत्यन्तरेषु महाव्रते श्रुता [†], सा च "इन्द्रो विश्वं विराजति"–इत्येतादृशी ; तस्मात् महाव्रतादानेतव्या । ता एताः पञ्च एकपदाः पञ्चसु प्रगाथेषु प्रक्षिपेत् ॥

अवशिष्टेषु प्रगाथेषु प्रक्षेपणीयान् पादान् दर्शयति — "अथाष्टाक्षराणि माहानामनानि पदानि; तेषां यावद्भिः सम्पद्येत, तावन्ति शंसेन्नेतराण्याद्रियेत"–इति । अथ पञ्चसु प्रगाथेषु पञ्चानामेकपदानां प्रक्षेपादनन्तरं 'माहानामनानि' महानामशब्देन "विदा मघवन्"–इत्यादयो महानाम्नीसञ्ज्ञकाः (ऐ० आ० ४.) विधीयन्ते, तेषां महानाम्ना मृचां सम्बन्धीन्यष्टाक्षराणि पदानि "प्र चेतन प्र चेतया"–इत्येवमादीनि यानि सन्ति, तेषां मध्ये यावद्भिः अष्टाक्षरैः पादैरवशिष्टेषु प्रगाथेषु प्रक्षेपः सम्पद्येत, तावन्त्यष्टाक्षराणि पदानि शंसेत् [‡] ; इतराण्यष्टाक्षराणि पदानि महानामसम्बन्धीनि 'नाद्रियेत' न प्रक्षिपेत् ॥

---

[*] एताश्चतस्रः शाखान्तरीया इति कल्पे प्रपठ्य विहिताः (आश्व० श्रौ० ८, २. २१.)।

[†] ऐ० आ० ५. ३. १. २। "इत्येता मेकपदां शाखान्तरगतां पठेत्"–इति तत्र सा० भा०। "एकां महाव्रतादाहरेत्"–इति आश्व० श्रौ० ८. २. २२।

[‡] "त्रयोविंशति मष्टाक्षरान् पादान् महानाम्नीभ्यः सपुरीषाभ्यः"–इति आश्व० श्रौ० ८.२.२३।

एवं पच्छः शंसने प्रक्षेपणीय मभिधायार्द्धर्चशो विहरणे प्रक्षेपणीयं दर्शयति— "अथार्द्धर्चशो विहरंस्ताश्चैवैकपदाः शंसेत्; तानि चैवाष्टाक्षराणि माहानामनानि पदानि"–इति। यथा पच्छो विहरणे प्रगाथान्ते प्रक्षेपः, एव मर्द्धर्चशो विहरणेऽपि योजनीयम्॥

तदृक्शो विहरणेऽपि प्रक्षेपं विधत्ते—"अथ ऋक्शो विहरंस्ताश्चैवैकपदाः शंसेत्; तानि चैवाष्टाक्षराणि माहानामनानि पदानि"–इति। पूर्ववत्प्रगाथान्ते प्रक्षेपः॥

यदुक्तं पच्छोऽर्द्धर्चश ऋक्श इति पर्यायत्रयेण विविधं विहरणम्, तदेतत् प्रशंसति—"स यत्प्रथमं षड् वालखिल्यानां सूक्तानि विहरति, प्राणञ्च तद्वाचं च विहरति; यद् द्वितीयं, चक्षुश्च तन्मनश्च विहरति; यत् तृतीयं, श्रोत्रं च तदात्मानं च विहरति; तदुपाप्तो विहारे काम उपाप्तो वज्रे वालखिल्यासूपाप्तो वाचःकूट एकपदाया मुपाप्तः प्राणक्लृप्ताम्"–इति। 'सः' अनुष्ठाता 'प्रथमं' प्रथमे पर्य्याये वालखिल्यानां षट् सूक्तानि विहरतीति यदस्ति, तेन प्रथमेन पच्छो विहरणेन प्राणं वाचं 'विहरति' मिश्रीकरोति। द्वितीयपर्य्याये अर्द्धर्चशो विहरणेन चक्षुर्मनसोर्मिश्रीकरणम्। तृतीयपर्य्याये ऋक्शो विहरणेन श्रोत्रेन्द्रियजीवात्मनोर्मिश्रीकरणम्। 'तत्' तथा सति विहरणे यः 'कामः' फलविशेषः, स 'उपाप्तः' प्राप्तो भवति। तथा वज्ररूपासु वालखिल्यासु यः कामः, सोऽपि प्राप्तः। तथा वाचःकूटरूपाया मेकपदायां यः कामः, सोऽपि प्राप्तः। तथा प्राणवागादीनां क्लृप्तां विहरणे यः कामः, सोऽपि प्राप्तो भवति॥

चतुर्थपर्य्याये विहार मन्तरेण यथापाठं शंसनं विधत्ते—

"अविहृतानेव चतुर्थे प्रगाथाञ्छंसति; पशवो वै प्रगाथाः, पशूना मवरुद्धै"-इति । प्रगाथानां पशुप्राप्तिहेतुत्वात् पशुत्वम् ॥

विहरणशंसनवदत्राप्येकपदाप्रक्षेपप्रसक्तौ निषेधति—"नात्रैकपदां व्यवदध्याद्"-इति । एकपदायाः प्रक्षेपे प्रगाथद्वयस्य मध्ये व्यवधानं स्यात्, तन्न कुर्य्यात् ॥

तत्करणे बाधं दर्शयति – "यदत्रैकपदां व्यवदध्याद्, वाचःकूटेन यजमानात् पशून्निर्हण्याद्; य एनं तत्र ब्रूयाद्, वाचःकूटेन यजमानात्पशून्निरवधीरपशु मेन मकरिति शश्वत् तथा स्यात्"-इति । यदि 'अत्र' चतुर्थपर्याये एकपदाव्यवधानं कुर्यात्, तदानीं वाचःकूटरूपेण एकपदासहितप्रगाथेन वज्रेण पूर्वं विद्यमानान् पशून् यजमानादस्मात् 'निर्हण्यात्' निःशेषेण विनाशयेत् । एवं सति यः कोऽपि विरोधी समागत्य 'एनं' शंसितारं तत्र शंसनकाले 'ब्रूयात्' शपेत् । कीदृशः शाप इति सोऽभिधीयते— हे शंसितः ! त्वं वाचःकूटेन वज्रेण यजमानात् पशून् 'निरवधीः' निःसार्य्य हतवानसि । 'एनं' यजमानम् 'अपशुं' पशुरहितम् 'अकः' कृतवानसीति । तदानीं 'शश्वत्' अवश्यं 'तथा स्यात्' पशुरहित एव स्यात् ॥

विपक्षे बाध मुक्त्वा स्वपक्ष मुपसंहरति—"तस्मात् तत्रैकपदां न व्यवदध्यात्"-इति ॥

वालखिल्यानां षट्सूक्तेषु विहार मुक्त्वा अवशिष्टयोः सप्तमाष्टमयोः सूक्तयोः* विपर्य्यासेन शंसनं विधत्ते —"द्व्रवोत्तमे सूक्ते पर्य-

---

* मुद्रिते शाकलसंहितापुस्तके तु वालखिल्याना मेकादश सूक्तानि दृश्यन्ते । विरोधस्त्वेष शाखाभेदकृत इत्यपनेतव्यः । अपि वा अष्टावेव वालखिल्यानि, तदितराणि त्रीणि तु खिलसूक्तान्येवेति स्यात् समाधेयम् ।

स्यति, स एव तयोर्विहारः"–इति। ये द्वे उत्तमे सूक्ते, ते विपर्यस्येदेव; न तु विहरेत्। अष्टमं सूक्त मादौ पठित्वा पश्चात् सप्तमस्य पाठो विपर्यासः। 'तयोः' द्वयोः सूक्तयोः (सं० ८. ६. ५५ ५६.) 'सः' एष विपर्य्यस्तपाठ एव विहारस्थानीयः॥

शिल्पनामकं शस्त्रं निरूप्य प्रशंसति—"तदेतत्सौबलाय सर्पिर्वात्सिः शशंस; स होवाच— भूयिष्ठानहं यजमाने पशून् पर्यग्रहैष मकनिष्ठा उ मा मागमिष्यन्तीति; तस्मै ह यथा महद्भ्य ऋत्विग्भ्य एवं निनाय; तदेतत्पशव्यञ्च स्वर्ग्यञ्च शस्त्रं; तस्मादेतच्छंसति"–इति। 'सौबल'नामकः कश्चिद्यजमानः, तस्मै वत्सस्य पुत्रः 'सर्पिः' –इत्येतन्नामक ऋत्विक्, 'तदेतत्' शिल्पशस्त्रं शशंस च। शंसनादूर्द्ध्वमेव मुवाच,— अह मस्मिन् सौबलनामके 'यजमाने' 'भूयिष्ठान्' अतिशयेन प्रभूतान् पशून् 'पर्य्यग्रहैषम्' परितः सम्पादितवानस्मि। तस्माद् 'अकनिष्ठा उ' श्रेष्ठा एव पशवो मा मागमिष्यन्ति। ततः सौबलो यजमानः यथा 'महद्भ्य ऋत्विग्भ्यः' होत्रध्वर्यूद्गातृब्रह्मभ्यो दक्षिणां दत्तवान्, अथापि शिल्पशंसिने होत्रकायापि बह्वी उत्तमाः गाः दक्षिणात्वेन निनाय। तस्मादेतत् शिल्पशस्त्र मिह लोके पशुसाधनं परलोके स्वर्गसाधनञ्च। तस्मात् 'एतत्' शिल्पं शंसेत्॥ ८॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां चतुर्थाध्याये
(एकोनत्रिंशाध्याये) अष्टमः खण्डः॥ ८ (२४)॥

॥ अथ नवमः खण्डः ॥

दूरोहणं रोहति॑ तस्योक्तं ब्राह्मणं॑ मैन्द्रे पशुकामस्य रोहे॑ दैन्द्रा वै पशवस्त॑ज्जागतं स्या॑ज्जागता वै पशव॑स्तन्महासूक्तं स्याद्भूयिष्ठेष्वेव तत् पशुषु॑ यजमानं प्रतिष्ठापयति॑ द्वौ रोहेत्त॑न्महासूक्तं च जागतं चैन्द्रावरुणं॑ प्रतिष्ठाकामस्य रोहे॑देतद् देवता वा एषा होचैत॑त्प्रतिष्ठा यदैन्द्रावरुणं॑ तदेनत्स्वाया मेव प्रतिष्ठाया॑ मन्ततः प्रतिष्ठापयति॑ यदेवैन्द्रावरुणा३इ॑ एषा ह वा अत्र निवि॑न्निविदा वै कामा आप्यन्ते॑ स यद्यैन्द्रावरुणे रोहेत्॑ सौपर्णं रोहेत्त॑दुपाप्त ऐन्द्रावरुणे॑ काम उपाप्तः सौपर्णे॑ ॥ ९ (२५) ॥

शिल्पशंसन मभिधाय शंसनान्तर मभिधत्ते— "दूरोहणं रोहति, तस्योक्तं ब्राह्मणम्"–इति । दुःशकं रोहण मुच्चारणं यस्य शंसनस्य, तत् 'दूरोहणम्', तत् 'रोहति' शंसेदित्यर्थः । 'तस्य' दूरोहणस्य विधायकं ब्राह्मणं पूर्व मेव विषुवदहःप्रसङ्गे "आहूय दूरोहणम्"-इत्यत्राभिहितम् * । अत एव पूर्वाचार्या आहुः—

"स्वर्गो वै लोक इत्यादि पूर्वं विषुवति क्रतौ ।
दूरोहणब्राह्मणन्तु प्रागवोचाम वै स्फुटम् ।
समरूपा हंसवती दूरोहण मितीरितम्"–इति ।

हंसवती पच्छः, अर्द्धर्चशः, त्रिपदां, ऋक्शो ऽनवानम्,

---

* २ भा० ३५६ पृ० ४. २. ७. द्रष्टव्यम् ।

पुनरपि त्रिपदा, अर्द्धर्चशः, पच्छ इति सप्तभिः प्रकारैः पठनमिति दूरोहणम् *। तदेतत् 'पूर्वं' तार्क्ष्यसूक्ते ऽभिहितम् †, इदानीं फलविशेषाय ऐन्द्रे सूक्ते तद् विधत्ते— "ऐन्द्रे पशुकामस्य रोहेदैन्द्रा वै पशव."–इति। इन्द्रदेवताके कस्मिंश्चित् सूक्ते पशुप्राप्त्यर्थं दूरोहणं 'रोहेत्' शंसेत्। इन्द्रस्य वृष्टिद्वारा पशुपोषकत्वात् पशव ऐन्द्राः॥

तस्मिन् सूक्ते छन्दोविशेषं विधत्ते — "तज्जागतं स्याज्जागता वै पशवः"–इति। सोमाहरणप्रसङ्गे जगत्या पशूनामानीतत्वात् ‡ 'तत्' सूक्तं 'जागतम्'॥

तस्य सूक्तस्य कञ्चिद्विशेषं विधत्ते —"तन्महासूक्तं स्याद् भूयिष्ठेष्वेव तत् पशुषु यजमानं प्रतिष्ठापयति"–इति। द्विविधं सूक्तं क्षुद्रं महच्च। अत एवारण्यकाण्डे वक्ष्यति— "ते क्षुद्रसूक्ताश्चाभवन् महासूक्ताश्च"–इति (२. २. २. ५.)। महासूक्तलक्षणं पूर्वाचार्यैरुक्तम्—"दशर्चताया अधिकं महासूक्तं विदुर्बुधाः"–इति। तेन महासूक्तेन 'भूयिष्ठेषु' अत्यन्तप्रभूतेष्वेव पशुषु यजमानं प्रतिष्ठापयति॥

विवक्षितं सूक्तविशेषं दर्शयति— "बरौ रोहेत्तन्महासूक्तं च जागतञ्च"–इति। बरुर्नाम कश्चित् महर्षिः, तेन दृष्टं सूक्तमपि बरुशब्देनोच्यते। तस्मिन् सूक्ते 'रोहेत्' दूरोहणं शंसेत्। "प्र ते महे"–इत्यादिकं (सं० १०. ९६.) बरुनामकं सूक्तम्। तच्च त्रयोदशर्चत्वान्महासूक्तं, जगतीच्छन्दस्कञ्च॥

---

* "हंसः शुचिषदिति पच्छोऽर्द्धर्चशस्त्रिपदा चतुर्थ मनवान सुत्वा प्रणुत्यावस्येत् पुनस्त्रिपदार्द्धर्चशः पच्छ एव सप्तम मेतद् दूरोहणम्"–इति आश्व० श्रौ० ८. २. १४, १५।

† २ भा० ३४६पृ० ४. ३. ६. द्रष्टव्यम्।

‡ २भा० ११५—१३०पृ० सोमाहरणकथा, तत्र ११७पृ० द्रष्टव्यम्।

फलान्तराय सूक्तान्तरं विधत्ते — "ऐन्द्रावरुणे प्रतिष्ठाकामस्य रोहेदेतद्देवता वा एषा होत्रैतत्प्रतिष्ठा यदैन्द्रावरुणा ; तदेनत्स्वायामन्ततः प्रतिष्ठापयति"–इति । यथा पशुकामस्य सप्तरूपहंसवत्यात्मकं दूरोहणम् ऐन्द्रसूक्ते रोहेत्, तथैव प्रतिष्ठाकामस्यैन्द्रावरुणके सूक्ते शंसेत् । शंसितुर्मैत्रावरुणस्य होत्रकस्य क्रिया 'होत्रा'; एषा चैतद्देवताका 'एतत्प्रतिष्ठा' इन्द्रावरुणदेवताकसमाप्तियुक्ता । यस्मादैन्द्रावरुणा, याज्येति शेषः । "इन्द्रावरुणा मधुमत्तमस्य"–इति (सं ६. ६८. ११.) याज्याया इन्द्रावरुणदेवताकत्वात् समाप्तेरिन्द्रावरुणसम्बन्धः । तथा सति 'एनद्' दूरोहणं 'स्वाया मेव प्रतिष्ठायां' स्वस्योचिताया मेव समाप्तौ 'अन्ततः' शस्त्रान्ते प्रतिष्ठापयति ॥

पुनरपि सूक्तं प्रशंसति — "यदेवैन्द्रावरुणा३इ एवा ह वा अत्र निविन्निविदा वै कामा आप्यन्ते, स यदैन्द्रावरुणे रोहेत्, सौपर्णे रोहेत्तदुपाप्त ऐन्द्रावरुणे काम उपाप्तः सौपर्णे"–इति । 'यद्' यस्मात् कारणादैन्द्रावरुणे सूक्ते दूरोहणं रोहति, तस्मात् स्वाया मेव प्रतिष्ठापयतीति पूर्वत्रान्वयः । यद्वा ऐन्द्रावरुणे सूक्ते दूरोहण मिति यदस्ति, एषैव दूरोहणक्रिया अत्र 'निवित्' [इवशब्दोऽत्र लुप्तो द्रष्टव्यः] निवित्सदृशीत्यर्थः । तथाच दूरोहणरूपया 'निविदा' सर्वे कामाः प्राप्यन्ते । 'सौपर्णे' सूक्ते दूरोहणं रोहेदिति पक्षान्तरम् । खिलेषु * समाम्नातम् "इमानि वां भागधेयानि"–इति

---

* "यदा उर्वरयोरसम्भिन्नं भवति, खिल इति वै तदाचक्षते"–इति शत० ब्रा० ८. ३. ४. १ । "पूर्वत्रानुक्तं वक्तव्यत्वेन परिशिष्टं खिल मिति हि खिललक्षणम्"–इति शत० ब्रा० १४. ८. १. १. सु० प्र० ।

† मुद्रितशाकलसंहिताया मेतत् सूक्तं वालखिल्येष्वन्त्य मेकादश ।

(सं० ८. ५९. १) सूक्तं सौपर्णम् ; "इमानि वेति सप्तर्चं सौपर्णं खैलिकं * विदुः"—इति । यद्वा "प्र धारा यन्त्विति (आश्व० सू० ३. १२. १४.) गृह्योक्तं सूक्तं सौपर्णम् । ऐन्द्रावरुणे सौपर्णे वा दूरोहणशंसनेन तत्रोभयत्र यः कामः सम्भावितः, सः 'उपाप्तः' प्राप्तो भवति ॥ ९ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां चतुर्थाध्याये
(एकोनत्रिंशाध्याये) नवमः खण्डः ॥ ९ (२५) ॥

॥ अथ दशमः खण्डः ॥

तदाहुः संशंसेत् षष्ठे ऽहा३न्॑ न संशंसे३त् इति॑ संशंसे॑दित्याहुः कथ मन्येष्वहस्सु संशंसति॑ कथ मत्र न संशंसेदित्य॑थो खल्वाहु॑र्नैव संशंसे॑त् स्वर्गो वै लोकः षष्ठ मह॑रसमायी वै स्वर्गो लोकः॑ कश्चिद्वै स्वर्गे लोके समेतीति॑ स यत्संशंसे॑त्समानं तत्कुर्या॑दथ यन्न संशंसतीँ३॑ † तत्स्वर्गस्य लोकस्य रूपं॑ तस्मान्न संशंसेद् यदेव न संशंसतीँ३॑ ‡ आत्मा वै स्तोत्रियः॑ प्राणा वालखिल्या॑ः स यत्संशंसे॑देताभ्यां देवताभ्यां॑ यजमानस्य प्राणान् वीया॑द्य एनं तत्र ब्रूया॑देताभ्यां देवताभ्यां यजमानस्य प्राणान् व्यगा॑त्प्राण एनं हास्यतीति

---

* वालखिल्यसूक्तान्यपि खिलविशेषाण्येव । शत० ब्रा० ८. ३. ४. १. द्र० ।

†, ‡ "०तीँ" क, ग, घ, च ।

शश्वत्तथा स्यात्त॑स्मान्न संशंसेत्॑ स यदीच्छेता॑शंसिषं वालखिल्या हन्त पुरस्ता॑द् दूरोहणस्य संशंसानीति॑ नो एव तस्याशा मिया॑त्तं यदि दर्प एव विन्दे॑दुपरिष्टाद्दूरोहणस्यापि॑ बहूनि शतानि शंसे॑द्यो तत् कामाय तथा कुर्या॑दत्रैव तदुपाप्त॑ मैन्द्रो वालखिल्या॑स्तासां द्वादशाक्षराणि पदानि॑ तत्र स काम उपाप्तो य ऐन्द्रे जागते॑ ऽथेद मैन्द्रावरुणं सूक्त॑ मैन्द्रावरुणी परिधानीया॑ तस्मान्न संशंसे॑त्तदाहुर्यथा वाव स्तोत्र मेवं शस्त्रं॑ विहृता वालखिल्याः शस्यन्ते॑ विहृतांस्तो॑त्राँ३ अविहृताँ३ इति॑ विहृत मिति ब्रूया॑दष्टाक्षरेण द्वादशाक्षर मिति॑ तदाहुर्यथा वाव शस्त्र मेवं या॑ज्या तिस्रो देवताः शस्यन्ते॑ ऽग्निरिन्द्रो वरुण इ॑त्यथैन्द्रावरुण्या यजति॑ कथ मग्निरनन्तरित इति॑ यो वा अग्निः स वरुण॑स्तदप्येतदृषिणोक्तं॑ त्व मग्ने वरुणो जायसे यदिति तद्यदेवैन्द्रावरुण्या यजति॑ तेनाग्निरनन्तरितो ऽनन्तरितः॑ ॥ १० (२६) ॥

॥ इत्यैतरेयब्राह्मणे षष्ठपञ्चिकायां चतुर्थोऽध्यायः ॥ ४ ॥

अत्र किञ्चिद् विचार मुद्भावयति— "तदाहुः संशंसेत् षष्ठे ऽहा३न् न शंसे३त् ? इति"—इति । 'तत्' तत्र सौपर्णे सूक्ते दूरोहणे शस्ते सति पश्चाद् ब्रह्मवादिनो विचार माहुः । यान्यैकाहिकानि

तदूर्ध्वं शंसनीयानि सन्ति, तान्यत्र षष्ठेऽहनि अत्रत्यैः सम्भूय किं शंसेत्, किं वा सम्भूय न शंसेदिति विचारः। श्रुतिर्विचारार्था ॥

तत्र प्रथमं पक्षं दर्शयति— "संशंसेदित्याहुः"–इति। सम्भूय शंसेदित्येवं केचिद्याज्ञिका इत्याहुः। तत्रोपपत्तिं पृच्छति— "कथम्?"–इति। उत्तर माह— "अन्येष्वहस्सु संशंसति, कथ मत्र न संशंसेदिति"–इति। इतरेषु पञ्चस्वहस्सु मैत्रावरुणः सम्भूय शंसति। तथा सत्यहस्सामान्यादत्रापि कथं न संशंसेत्? तत्परित्यागो न युक्तः, किन्तु तदनुष्ठान मेव युक्त मित्येकः पक्षः ॥

पक्षान्तरं दर्शयति— "अथो खल्वाहुर्नैव संशंसेत्"-इति। अहरन्तरवत् सम्भूय शंसनं कर्त्तव्य मित्यपरे कथयन्ति ॥

तत्रोपपत्ति माह— "स्वर्गो वै लोकः षष्ठ महरसमायी वै स्वर्गो लोकः कश्चिद्वै स्वर्गं लोके समेतीति; स यत् संशंसेत्समानं तत्कुर्यादथ यन्न संशंसती३ तत्स्वर्गस्य लोकस्य रूपं; तस्मान्न संशंसेद्यदेव न संशंसती३"–इति। यदिदं षष्ठ महः, तदेतत् स्वर्गलोक एव; प्रयोगबाहुल्येन दुस्साधनत्वात्। तदेवासमायीत्यादिना स्पष्टीक्रियते। बहुभिः सम्भूतैः 'एतुं' गन्तुं योग्यः 'समायी' ["इण् गतौ"–इत्यस्माद्धातोरयं शब्दो निष्पन्नः] उक्तविपरीतो बहुभिर्गन्तु मशक्यः 'असमायी'; तादृशो हि स्वर्गो लोकः। 'कश्चिदेव' पुण्यकृत् स्वर्गं लोकं 'समेति' समीचीनं भोगं प्राप्नोति, न तु सर्वैः; स्वर्गहेतोः पुण्यस्य दुर्लभत्वात्। एवं सति मैत्रावरुणो यदि षष्ठेऽहनि शिल्पेनान्यानि सूक्तानि सम्भूय शंसेत्, तदानी मीदृशं स्वर्गरूप मुत्तमं षष्ठ महरितरैरहोभिः समानं कुर्यात्; तेषु शंसनीयाना मस्मिन्नपि शंसनात्। अथ तद्वैपरीत्येन यदि षष्ठेऽहनि न संशंसति [पूजार्था प्लुतिः] 'तत्' एतद्-

संशंसनं स्वर्गलोकरूपत्वात् पूज्यम्; तस्मात् सम्भूय न संशंसेत्। न संशंसतीति यदेवास्ति, तदेवातिपूज्यत्वम्। पूजार्थेयं स्तुतिः॥

इत्थं द्वितीयपक्ष मुपपाद्य पुनरपि प्रथमपक्षे दोषान्तर माह— “आत्मा वै स्तोत्रियः प्राणा वालखिल्याः स यत्संशंसेदेताभ्यां देवताभ्यां यजमानस्य प्राणान्वीयाद् य एनं तत्र ब्रूयादेताभ्यां देवताभ्यां यजमानस्य प्राणान् व्यगात्प्राण एनं हास्यतीति शश्वत्तथा स्यात्; तस्मान्न संशंसेत्”–इति। अत्र संशंसनवादी प्रष्टव्यः,— किं वालखिल्याभ्यः पूर्व मैकाहिकस्य शंसनं, किं वोपरिष्टात्? इति। तत्र प्रथमपक्षे दूषण मुच्यते,— योऽय मत्र शिल्पशंसने ‘स्तोत्रियः’ सामसाध्यस्य स्तोत्रस्याधारभूतस्तृचोऽस्ति, सोऽयम् ‘आत्मा वै’ जीवस्थानीय एव। ‘वालखिल्याः’ ऋचः प्राणस्थानीयाः। तथा सति ‘सः’ मैत्रावरुणो यदि ‘संशंसेत्’ तदानीम् ‘एताभ्याम्’ इन्द्रावरुणदेवताभ्यां ‘यजमानस्य’ स्तोत्रियस्थानीयस्य ‘प्राणान्’ वालखिल्यस्थानीयान् ‘वीयात्’ विमतान् कुर्यात्, इन्द्रावरुणौ क्रुद्धौ यजमानस्य प्राणान् विनाशयेताम्। एवं सति ‘यः’ कश्चित् मैत्रावरुणस्य विरोधी समागत्य ‘एनं’ मैत्रावरुणं ‘तत्र’ तस्मिन् संशंसने ‘ब्रूयात्’ शपेत्। केन प्रकारेणेति, तदुच्यते —‘एताभ्याम्’ इन्द्रावरुणदेवताभ्यां यजमानस्य प्राणानसौ मैत्रावरुणो ‘व्यगात्’ विगतान् कृतवान्। तस्मात्प्राणः ‘एनं’ मैत्रावरुणं यजमानं वा ‘हास्यति’ परित्यजतीति। तदानीं तस्य शापेन ‘शश्वत्’ अवश्यं ‘तथा स्यात्’ प्राणवियोगो भवेत्। तस्मात् मैत्रावरुणो न संशंसेत्॥

एवं वालखिल्याभ्यः पूर्वं शंसने दोष मभिधायोर्द्ध्व मपि तत्संशंसने दोष माह— “स यदीचेताशंसिषं वालखिल्या हन्त पुर-

स्ताद्दूरोहणस्य संशंसानीति, नो एव तस्याशा मियात्"–इति। 'सः' मैत्रावरुणो यदि मनस्येवम् 'ईक्षेत' विचारयेत्। कथ मिति, तदुच्यते– 'वालखिल्याः' अत्यन्तदुःसाध्याः, अहम् 'अशंसिषं' शंसितवानस्मि, 'हन्त' महाहर्षः सम्पन्नः; इतः परं दूरोहणस्य पुरस्तात् ऐकाहिकं सम्भूय शंसानीति। तदानीं तस्य शंसनस्य पूर्ववत् प्राणवियोगहेतुत्वात् 'तस्य' पक्षस्याशा मपि 'नो एवेयात्' सर्वथा न प्राप्नुयादेव; मानसो विचारोऽपि न कर्त्तव्यः, दूरे तत्संशंसन मित्यर्थः॥

इदानीं स्थानविशेषेण तत्संशंसन मङ्गीकरोति— "तं यदि दर्प एव विन्देदुपरिष्टाद् दूरोहणस्यापि बहूनि शतानि शंसेद्यस्यो तत्कामाय तथा कुर्यात्तत्रैव तदुपाप्तम्"–इति। तं मैत्रावरुणं यदि 'दर्प एव विन्देत्' गर्वोऽवश्यं लभेत [अत्यन्तदुःशंसं शिल्प मह मशंसिषं, किं नाम मया शंसितु मशक्य मित्येतादृशो दर्पः] तदानीं तस्य मैत्रावरुणस्यौत्सुक्यानुसारेण दूरोहणस्योपरिष्टाद् बहून्यपि शस्त्राणां शतानि शंसेत्। अस्त्येव तदानीं शंसनस्यानुज्ञा। 'यस्यो' यस्यैव फलस्य 'कामाय' प्राप्तये 'तद्' बहुविधं शंसनम् 'अत्रैव' स्थाने तथा कुर्यात्, 'तत्' फलम् 'उपाप्तं' प्राप्तं भवति। एवं तावदैकाहिकानां सूक्ताना मशंसनं शंसनं वेति पक्षद्वय मप्यभिहितं भवति॥

तत्र कस्य शंसन मङ्गीकृतं, कस्य वा निषिद्धम्? इत्यपेक्षाया मुभयं विविच्य दर्शयति— "ऐन्द्रो वालखिल्यास्तासां द्वादशाक्षराणि पदानि; तत्र स काम उपाप्तो य ऐन्द्रे जागतेऽथेद मैन्द्रावरुणं सूक्त मैन्द्रावरुणी परिधानीया; तस्मान्न संशंसेत्"–इति। "चर्षणी धृतम्"–इत्यादिकं (सं० ३. ५१.), यदेतदैन्द्रं

सूक्त मैकाहिकम्, तदेतन्निराकृत्य यत्सूक्तान्तरम् "आ वां राजानौ" –इति (सं० ७. ८४.), ऐन्द्रावरुण मैकाहिकम्, तदेतदङ्गीक्रियते । याः 'वालखिल्याः' ऋचस्ताः 'ऐन्द्र्यः' इन्द्रदेवताकाः । तासां मध्ये यानि द्वादशाक्षराणि 'पदानि' पादा विद्यन्ते, बृहती-सतोबृहतीद्वयात्मकेषु प्रगाथेषु बृहत्यास्तृतीयपादौ द्वौ द्वादशाक्षरौ, सतोबृहत्या आद्यस्तृतीयश्चोभौ पादौ द्वादशाक्षरौ ; तेषां पादाना मक्षरसङ्ख्यया जागतत्व मस्ति । एवं सत्यैकाहिके जागते "चर्षणी धृतम्"–इत्यस्मिन्नैन्द्रे सूक्ते 'यः' कामो ऽपेक्षितः, स कामः 'तत्र' तेष्विन्द्रदेवताकवालखिल्यागतेषु द्वादशाक्षरपादेषु 'उपाप्तः' लब्धो भवति । तस्माच्चर्षणी धृत मित्येतदैकाहिक मैन्द्रं सूक्त मत्र परित्याज्यम् । आ वां राजानावित्येतदैन्द्रावरुणं सूक्तम् ; तत्रेयम् "इन्द्रं वरुणम्"–इति (सं० ७.८४.५.) परिधानीयाप्यैन्द्रावरुणी । तथा सत्येतस्य सूक्तस्यानुकूलतया तदेव शंसेत्, तस्मादन्यत् न संशंसेत् । अन्यशब्दोऽत्राध्याहर्त्तव्यः । अत एव सूत्रकारः ऐन्द्रावरुणं सूक्त मङ्गीचकार— "आ वां राजानाविति नित्य मैकाहिकम्"–इति (आश्व० श्रौ० ८.२.१६.) । इत्थं शिल्पाख्यं शस्त्रं व्यवस्थाप्य तस्योपरि सूक्तान्तर मप्यङ्गीकृतम् ॥

इदानीं शस्त्र मेवोपजीव्य स्तोत्रे कञ्चिद्विचार मुद्भावयति— "तदाहुर्यथा वाव स्तोत्र मेवं शस्त्रं; विहृता वालखिल्याः शस्यन्ते, विहृतांस्तोत्राँ३ अविहृताँ३ ? इति"–इति । स्तोत्रशस्त्रयोः सादृश्यस्यापेक्षितत्वात् शस्त्रगतासु वालखिल्यनामकास्वृक्षु विहरणं दृष्ट्वा सामगानां स्तोत्रेऽपि संशयो जायते, कि मिदं स्तोत्रं विहृत माहोस्विद् अविहृतम् ? इति । प्लुतिद्वयं विचारार्थम् ॥

तस्मिन् विचारे निर्णय माह— "विहृत मिति ब्रूयादष्टाक्ष-

रेण द्वादशाक्षर मिति"–इति। "अग्ने त्वं नो अन्तम:"–इत्यादिषु द्विपदासु सामगाः स्तुवते *। तत्र चाद्याः पादा अष्टाक्षराः; द्वितीयाः पादा द्वादशाक्षराः; एवं तत्र छन्दो विहृत मित्युत्तरं ब्रूयात् ॥

अथ शस्त्र मुपजीव्य याज्यायां चोद्य मुद्भावयति— "तदाहुर्यथा वाव शस्त्र मेवं याज्या; तिस्रो देवताः शस्यन्ते ऽग्निरिन्द्रो वरुण इत्यथैन्द्रावरुण्या यजति, कथ मग्निरनन्तरित इति" –इति। 'तत्' तत्र शस्त्रयाज्यायां चोद्य माहुः। शस्त्रस्य तदीयाज्यायाश्च सादृश्य मपेक्षितम्। शस्त्रे च तिस्रो देवताः शस्यन्ते, — अग्निरिन्द्रो वरुणश्चेति। तत्र स्तोत्रियानुरूपयोरग्निर्देवता, वालखिल्यास्विन्द्रो देवता, "आ वां राजानौ"–इति सूक्ते (सं० ७. ८४.) इन्द्रो वरुणश्च। एवं सति याज्याया मपि देवतात्रय मपेक्षितम्, तत्तु नास्ति; "इन्द्रावरुणा मधुमत्तमस्य"–इति याज्याया मिन्द्रावरुणयोरुभयोरपि प्रतिपादितत्वेनाग्नेः परित्यक्तत्वात्। कथ मत्राग्निः 'अनन्तरितः' परित्यक्तो भवेदिति चोद्यम् ॥

तस्योत्तर माह— "यो वा अग्निः स वरुणस्तदप्येतदृषिणोक्तं,— त्व मग्ने वरुणो जायसे यदिति; तद्यदैन्द्रावरुण्या यजति, तेनाग्निरनन्तरितो ऽनन्तरितः"–इति। अग्निवरुणयोरत्यन्तभेदो नास्ति; परस्पर मतिप्रियत्वेनैकत्वोपचारात्। 'तत्' एकत्वम्

---

* "अग्ने त्वं नः"–इति द्वे, "तं त्वा शोचिष्ठ"–इत्येका (सं० ५. २४. १, २२४.); एवं मिलितो द्वैपदस्तृचः स्तोत्रियः (उ० आ० ४. १. २२.)। अत्र द्वे सामनी अधीयेते (ऊ० गा० ३. २. १८; १२. २. १५.)। तयोराद्यं 'गूर्द्द' नाम दशरात्रे, अपरं 'सत्रासाहीयं' त्वेकाहे इति विशेषः। इह खलु गूर्दस्यैव ग्रहणम् "गूर्द्दो भवति"–इत्यादि हि तद्ब्राह्मणम् (ता० ब्रा० १३. १३. ४, ५,)।

'ऋषिणा' मन्त्रेणाप्युक्तम् । "त्व मग्ने"-इत्यादिको मन्त्रः (सं० ५. ३. १.*) । हे अग्ने ! त्वं वरुणो भूत्वा 'जायसे' प्रादुर्भवसीति मन्त्रार्थः । तथा सत्यैन्द्रावरुण्या यजतीति यदेवास्ति, 'तेन' अग्नेर्वरुणे एवान्तर्भावात् अथ मग्निः 'अनन्तरितः' अपरित्यक्तः । अभ्यासोऽध्यायसमाप्त्यर्थः ॥ १० ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां चतुर्थाध्याये
(एकोनत्रिंशाध्याये) दशमः खण्डः ॥ १० (२६) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'नामभाष्ये
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायाः चतुर्थाध्यायः ॥

---

* संहिताया मेतन्मन्त्रस्य व्याख्याने सायणाचार्येणैषा श्रुतिस्तत्रोद्धृता,—"ते देवा बिभ्यतीऽग्निं प्राविशन् (तै० सं० ६.२.२.६.)"-इति । वस्तुतोऽग्नेः सर्वदेवताकत्व मनेकत्र विश्रुतम् । निरु० "अथापि ब्राह्मणं भवति,—अग्निः सर्वा देवता इति (१भा० २५१ पृ० १६पं०) । तस्योत्तरा भूयसे निर्वचनाय,— इन्द्रं मित्रं वरुण मग्नि माहुः०—० (ऋ० सं० १६४.४६.) । इम मेवाग्निं महान्त मात्मान मेक मात्मानं बहुधा मेधाविनो वदन्ति"-इत्यादि ३भा० ३८७—३९० पृ० । ततः ४१६, ४२९ पृ० । ४भा० ७४ पृ० "॥" टिप्पनी चैतदर्थिका । पुनस्तत्परिशिष्टेऽपि ४भा० ४०८ पृ० । "अग्निः सर्वा देवता इति । तस्योत्तरा भूयसे निर्वचनाय,—जातवेदसे सुनवाम ०—० (ऋ० सं० १. ९९. १.)"-इति ४भा० ४०८—४१०पृ० ।

॥ अथ पञ्चमाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ शिल्पानि शंसन्ति देवशिल्पान्येतेषां वै शिल्पाना मनुकृतीह शिल्प मधिगम्यते हस्ती कंसो वासो हिरण्य मश्वतरीरथः शिल्पं शिल्पं हास्मिन्नधिगम्यते य एवं वेद यदेव शिल्पानीँ३ * आत्मसंस्कृतिर्वाव शिल्पानि छन्दोमयं वा एतैर्यजमान आत्मानं संस्कुरुते नाभानेदिष्ठं शंसति रेतो वै नाभानेदिष्ठो रेतस्तत् सिञ्चति त मनिरुक्तं शंसत्यनिरुक्तं वै रेतो गुहा योन्यां सिच्यते स रेतो मिश्रो भवति च्मया रेतः सञ्जग्मानो निषिञ्चदिति रेतः समृद्ध्या एव तं स नाराशंसं शंसति प्रजा वै नरो वाक् शंसः प्रजास्वेव तद्वाचं दधाति तस्मादिमाः प्रजा वदन्त्यो जायन्ते तं हैके पुरस्ताच्छंसन्ति पुरस्तादायतना वागिति वदन्त उपरिष्टादेक उपरिष्टादायतना वागिति वदन्तो मध्य एव शंसेन् मध्यायतना वा इयं वागुपरिष्टान्नेदीयसीवोपरि-

---

* "शिल्पानीं" क, ग, घ, च।

ष्टाग्नेद्दीयसोत्र वा इयं वाक्तं होता रेतोभूतं सिक्त्वा मैत्रावरुणाय सम्प्रयच्छत्येतस्य त्वं प्राणान् कल्पयेति ॥ १ (२७) ॥

स्तोत्रियस्यानुरूपत्वं सम्पाताश्च प्रगाथकाः ।
त्रिष्टुभोऽथाहीनयुक्तिमोकौ शिल्पञ्च वर्णितम् ॥

अथ पृष्ठ्यषड़हस्य षष्ठेऽहनि शिल्पनामकानि शस्त्राणि विधत्ते— "शिल्पानि शंसति"–इति * ॥

शिल्पत्वं लौकिकनिदर्शनेन प्रशंसति— "देवशिल्पान्येतेषां वै शिल्पाना मनुकृतीह शिल्प मधिगम्यते,— हस्ती कंसो वासो हिरण्य मश्वतरीरथः शिल्पम्"–इति । शिल्पशब्दश्च आश्चर्यकरं कर्म ब्रूते । तत्र शिल्पं द्विविधम्—देवशिल्पं मानुषशिल्पञ्चेति । नाभानेदिष्ठादीनि यानि शिल्पानि सन्ति, तानि देवानां प्रीतिहेतुत्वाद्देवशिल्पानीत्युच्यन्ते । 'एतेषाम्' एव देवशिल्पानाम् अनुकृति' सदृशरूपम् 'इह' मनुष्यलोके शिल्पम् 'अधिगम्यते' प्रतीयते । हस्तीत्यादिना तदेवोदाह्रियते । लोके शिल्पिनः कर्मकाराः मृद्दार्वादिभिः हस्तिसदृश माकारं निर्मिमीते । तथान्यैः शिल्पिभिः 'कंसः' दर्पणादि निर्मीयते । अपरैर्वासो विविधं निर्मीयते । अन्यैः सुवर्णमयं कटकमुकुटादि निर्मीयते । अपरैश्चाश्वतरीरथो निर्मीयते । गर्दभाश्वाभ्या मुत्पन्नो ऽश्वतरजातिः, तद्युक्तो रथो ऽश्वतरीरथः । तदेतत्सर्वं मस्माभिरधिगम्यमानं मानुषशिल्प मेतद्दृष्ट्वा नाभानेदिष्ठादि 'शिल्पम्' आश्चर्यंकर मिति निश्चेतव्यम् ॥

---

* वालखिल्याना मष्टसूक्ताना मेव पाठप्रकारैः शिल्पत्व मभिहितम् (३४२—३४८, पृ०) ।

वेदनं प्रशंसति— "शिल्पं ह्यस्मिन्नधिगम्यते य एवं वेद"-इति। 'अस्मिन्' वेदितरि 'शिल्प" कौशलं नानाविधं प्राप्यते ॥

सानुनासिकप्लुतेन शिल्पानां पूज्यत्वं दर्शयति— "यद्देव शिल्पानीँ३"-इति। यस्मान्नाभानेदिष्ठादीनि शिल्पशब्दवाच्यानि, तस्मात् सुवर्णाभरणादिवत् पूज्यानीत्यर्थः ॥

प्रकारान्तरेण शिल्पानि प्रशंसति— "आत्मसंस्कृतिर्वाव शिल्पानि छन्दोमयं वा एतैर्यजमान आत्मानं संस्कुरुते"-इति। वक्ष्यमाणानि नाभानेदिष्ठादिशिल्पानि 'आत्मसंस्कृतिः' जीवात्मनः संस्करणानि ; तस्मादेतैर्यजमानो जीवात्मानं 'छन्दोमयं' वेदमयो यथा भवति तथा संस्कुरुते ॥

होतुः शिल्पं विधत्ते— "नाभानेदिष्ठं शंसति"-इति। नाभानेदिष्ठाख्येन महर्षिणा दृष्टम् "इद मित्था"-इत्यादि सूक्तं 'नाभानेदिष्ठम्' (सं० १०.६१.१-२७.) ; तद्धोता शंसेत् * ॥

तत् प्रशंसति – "रेतो वै नाभानेदिष्ठो रेतस्तत्सिञ्चति"-इति। एतैः सूक्तैर्यजमानस्यात्मसंस्कारो वेदमयजन्मरूपो योऽभिहितः, स एव क्रमेणोपवर्ण्यते। तत्र नाभानेदिष्ठाख्यः सूक्तविशेषो यजमानोत्पादकरेतःस्थानीयः ; 'तत्' तेन सूक्तेन होता रेतः सिञ्चति ॥

तस्मिन् सूक्ते देवताविशेषवाचिनः पदस्य विस्पष्टप्रतीत्यभावाद्यदनिरुक्तत्व मस्ति, तत्प्रशंसति—"त मनिरुक्तं शंसत्यनिरुक्तं वै रेतो गुहा योन्यां सिच्यते"-इति। 'तं' नाभानेदिष्ठं सूक्तविशेषम् 'अनिरुक्तम्' अस्पष्टदेवताकं शंसेत्। लोके ततः 'अनिरुक्तम्' अस्पष्ट मेव 'गुहा' गोप्ये अन्तःस्थाने योन्यां सिच्यते ॥

---

* "उद्धृत्य चोत्तमं सूक्तं त्रीणि"-इत्यादीनि आश्व० श्रौ० ८. १. १९—२४ ।

नाभानेदिष्ठाख्येन सिक्तरेतसा यजमानस्य सम्बन्धं मन्त्रलिङ्गदर्शनेन दृढयति—"स रेतो मिश्रो भवति; च्मया रेतः सञ्जग्मानो निषिञ्चदिति रेतःसमृद्ध्या एव"—इति। 'सः' यजमानो नाभानेदिष्ठेन रेतसा मिश्रितो भवति। तस्मिन्नर्थे "च्मया"—इत्यादिकस्तत्सूक्तगतः कश्चिदेकपादः प्रमाणम्। प्रजापतिर्यदा स्वां दुहितरं दिव मुषसं वा 'अधिष्कन्' अध्यस्कन्दत्, तदानी मेव 'च्मया' भूम्या स्वदुहित्रा 'सञ्जग्मानः' सङ्गं प्राप्तोऽस्मिंल्लोके रोहितो भूतो मृश्यो भूतो 'रेतो नि षिञ्चत्' रेतो निषिक्तवानिति *। अतः सूक्ते रेतस्सेकलिङ्ग मस्ति। तस्मादिदं सूक्तं रेतःसमृद्ध्यर्थं मेव सम्पद्यते ॥

तस्य नाभानेदिष्ठस्य सूक्तान्तरसाहित्यं विधत्ते—"तं स नाराशंसं शंसति; प्रजा वै नरो वाक् शंसः, प्रजास्वेव तद्वाचं दधाति; तस्मादिमाः प्रजा वदन्त्यो जायन्ते"—इति। 'तं' नाभानेदिष्ठाख्यं सूक्तविशेषं नाराशंसाख्यसूक्तसहितं होता शंसेत्। 'नराः' अङ्गिरसो महर्षयः, मनुष्यजातावुत्पन्नत्वात्; ते शस्यन्ते यस्मिन् "ये यज्ञेन"—इतिसूक्तविशेषे (सं० १०. ६२. १–११.) सोऽयं 'नाराशंसः', तेन सहितम् "इद मित्था रौद्रम्"—इत्येतन्नाभानेदिष्ठं सूक्तं शंसेत् †। तत्र मनुष्यरूपाः प्रजा एव नरशब्देनाभिधीयन्ते, शंसशब्देन च वागुच्यते; तथा सति नराशंसशब्देन प्रजास्वेव वाचमवस्थापयति; तस्मात् कारणादिमाः प्रजाः 'वदन्त्यः' वाग्व्यवहारं कुर्वन्त्य उत्पद्यन्ते ॥

अत्रेदं चिन्तनीयम्— कि मिदं नाराशंससूक्तं नाभानेदिष्ठसूक्तस्य पुरस्तात् पठनीयम्, उतोपरिष्टात्, अथवा मध्ये ? इति ॥

---

* २ भा० १४९ पृ० ३. ३. ९. द्र०। † आश्व० श्रौ० ८. १. २१।

तत्र प्रथमपक्षं दर्शयति— "तं हैके पुरस्ताच्छंसन्ति, पुरस्तादायतना वागिति वदन्तः"–इति। मनुष्यशरीरस्य 'पुरस्तात्' पूर्वभागे 'आयतनं' स्थानं यस्या वाचः, सेयं वाक् 'पुरस्तादायतना' 'इति' एव सुपपत्तिं वदन्तः केचिद् याज्ञिका नाभानेदिष्ठस्य पुरस्तान्नाराशंसं शंसन्ति ॥

द्वितीयं पक्षं दर्शयति— "उपरिष्टादेक उपरिष्टादायतना वागिति वदन्तः"–इति। शरीरस्य पूर्वभागेऽपि 'उपरिष्टात्' मूर्द्धनि 'आयतनं' वक्त्रादिरूपं स्थानं यस्या वाचः, सेयम् 'उपरिष्टादायतना वाक्' इति युक्तिं वदन्तः केचिदन्ये याज्ञिकाः नाभानेदिष्ठस्योपरिष्टान्नाराशंसं शंसन्ति ॥

तृतीयं पक्षं दर्शयति— "मध्य एव शंसेन्मध्यायतना वा इयं वाग्"–इति। शरीरस्याधोभागः पादरूपोऽपि वाच आयतनं न भवति, ऊर्द्ध्वभागः ललाटादिरपि वाचो नायतनम्, किन्त्वाधारादिर्वक्त्रान्तो मध्यभागः आयतनं यस्या वाचः, सेयं 'मध्यायतना'; तस्मान्नाभानेदिष्ठसूक्तस्य मध्य एव नाराशंससूक्तं शंसेत्। एवकारेण पूर्वोक्तौ पक्षौ व्यावर्त्तेते ॥

मध्यभागेऽपि स्थानविशेषं दर्शयति— "उपरिष्टान्नेदीयसी वोपरिष्टान्नेदीयसीव वा इयं वाग्"–इति। उपरिष्टान्नाभानेदिष्ठसूक्तस्यावसानभागो 'नेदीयान्' अत्यन्तसमीपवर्त्ती यस्य सूक्तस्य मध्यभागस्य, स मध्यभागः 'उपरिष्टान्नेदीयान्' 'इव'शब्द एवकारार्थः, तथाविध एव मध्यभागे नाराशंसं संशंसेत्। "इद मित्था"–इत्येतं नाभानेदिष्ठं सूक्तं सप्तविंशत्यृगात्मकम्, तत्रावसाने द्वे ऋचाववशिष्य पञ्चविंश्य ऊर्द्ध्व मेव नाराशंसं सूक्तं शंसेत्। तथा चाश्वलायन आह— "इद मित्था रौद्र मिति प्रागुपोत्तमाया ये

यज्ञेनेत्यावपते"–इति (श्रौ० ८. १. २१, २२.)। वागपि 'उपरिष्टान्नेदीयसि' अत्यन्तसमीपवर्त्तिन्येव शरीरमध्यभागे ताल्वोष्ठादौ वर्तते। तस्मात् सूक्तस्योक्तस्थानं युक्तम् * ॥

होतुः शंसन मुपसंहरन् मैत्रावरुणशस्त्रं प्रस्तौति—"तं होता रेतोभूतं सिक्त्वा मैत्रावरुणाय सम्प्रयच्छत्येतस्य त्वं प्राणान् कल्पयेति"–इति। उक्तशंसनेन होता 'तं' यजमानं 'रेतोभूतः' रेतःप्राप्तो यथा भवति तथा सिक्त्वा तस्मै मैत्रावरुणाय सम्प्रयच्छति। तदा केनाभिप्रायेणेति सोऽभिधीयते-- हे मैत्रावरुण! त्वम् 'एतस्य' यजमानस्य रेतोरूपस्य प्राणान् सम्पादय 'इति' अनेनाभिप्रायेण यजमानं तस्मै प्रयच्छति ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां पञ्चमाध्याये
(त्रिंशाध्याये) प्रथमः खण्डः ॥ १ (२७) ॥

॥ अथ द्वितीयः खण्डः ॥

वालखिल्याः शंसति॑ प्राणा वै वालखिल्याः॑ प्राणानेवास्य तत्कल्पयति॑ ता विहृताः शंसति॑

---

* नाभानेदिष्ठस्य वर्णनं पुरस्ताद् द्रष्टव्यम् (७७—८५ पृ०)।

विहृता वा इमे प्राणा॑ः प्राणेनापानो ऽपानेन व्याना॑ः स पच्छः प्रथमे सूक्ते विहरत्यर्धर्चशो द्वितीये॑ ऋक्शस्तृतीये॑ स यत् प्रथमे सूक्ते विहरति॑ प्राणञ्च तद्वाचं च विहरति॑ यद् द्वितीये॑ चक्षुश्च तन्मनश्च विहरति॑ यत्तृतीये॑ श्रोत्रं च तदात्मानं च विहरति॑ ते हैके सह बृहत्यौ॑ सह सतोबृहत्यौ विहरन्ति तदुपाप्तो विहारे कामो॑ नेत्तु प्रगाथाः कल्पन्ते॑ ऽतिमर्शमेव विहरे॑त्तथा वै प्रगाथाः कल्पन्ते॑ प्रगाथा वै वालखिल्या॑स्तस्मादतिमर्शमेव विहरे॑द्यदेवातिमर्शाँ३॑ आत्मा वै बृहती प्राणाः सतोबृहती॑ स बृहतीमशंसीत् स आत्मा॑थ सतोबृहतीं॑ ते प्राणा॑ अथ बृहती॑मथ सतोबृहतीं॑ तदात्मानं॑ प्राणैः परिबृहन्नेति॑ तस्मादतिमर्शमेव विहरे॑द्यद्वेवातिमर्शाँ३॑ आत्मा वै बृहती पशवः सतोबृहती॑ स बृहतीमशंसीत्॑ स आत्मा॑थ सतोबृहतीं॑ ते पशवो॑ऽथ बृहती॑मथ सतोबृहतीं॑ तदात्मानं पशुभिः परिबृहन्नेति॑ तस्मादतिमर्शमेव विहरे॑द् द्वे एवोत्तमे सूक्ते पर्यस्यति॑ स एव तयोर्विहारस्त॑स्य मैत्रावरुणः॑ प्राणान् कल्पयित्वा॑ ब्राह्मणाच्छंसिने सम्प्रयच्छ॑त्येतं त्वं प्रजनयेति॑ ॥ २ (२८) ॥

होतुः शिल्पशस्त्र मुक्त्वा मैत्रावरुणस्य शिल्पशस्त्रं विधत्ते— "वालखिल्याः शंसति; प्राणा वै वालखिल्याः, प्राणानेवास्य तत्कल्पयति"–इति। वालखिल्याख्यैर्मुनिभिर्दृष्टाः "अभि प्र वः सुराधसम्"–इत्यादिके (सं० ६ अष्ट० ३ अ०) अष्टके स्थिता ऋचो वालखिल्याभिधाः; ता एव वालखिल्याख्ये ग्रन्थे समाम्नाताः* ताः सर्वा मैत्रावरुणः शंसेत्। वालखिल्यानां शिल्पानां प्राणरूपत्वेन तच्छंसने सति 'अस्य' रेतोरूपस्य यजमानस्य प्राणानेव सम्पादयति॥

इतरशस्त्रवदत्रापि यथापाठशंसनप्रसक्तौ विशेषं विधत्ते—"ता विहृताः शंसति; विहृता वा इमे प्राणाः, प्राणेनापानो ऽपानेन व्यानः"–इति। 'ताः' वालखिल्या ऋचो 'विहृताः' परस्परव्यतिषक्ताः शंसेत्; प्राणाश्चेमे शरीरे 'विहृता वै' परस्परव्यतिषक्ता एव वर्तन्ते। ऊर्द्ध्वगामिना प्राणवायुना निरोधात् अपानवायुर्व्यतिषक्तः, तेन चापानवायुना तद्वायुद्वयमध्यवर्त्ती व्यानो व्यतिषक्तः; "अथ यः प्राणापानयोः सन्धिः स व्यानः"–इतिश्रुत्यन्तरात् (छा० उप० १. ३. ३.)॥

व्यतिषङ्गप्रकारं विधत्ते — "स पच्छः प्रथमे सूक्ते विहरत्यर्द्धर्चशो द्वितीये ऋक्शस्तृतीये"–इति। वालखिल्याना मष्टसु सूक्तेषु सप्तमाष्टमे सूक्ते परित्यज्य यान्यवशिष्टानि षट् सूक्तानि, तेषु त्रीणि युग्मानि। तत्र प्रथमयुग्मगते द्वे सूक्ते 'सः' मैत्रावरुणः 'पच्छो विहरेत्' प्रथमसूक्तगतं पादं द्वितीयसूक्तगतेन पादेन योजयेत्। द्वितीययुग्मगते द्वे सूक्ते 'अर्द्धर्चशो विहरेत्' तस्मिन्

---

* अष्टाष्टकविभक्तायां वाष्कलसंहितायां वालखिल्यानां षष्ठाष्टकान्तर्गतत्वेऽपि सायणव्याख्यातायां दाशतय्यां शाकलसंहितायां तेषा मनन्तर्भावाद् ग्रन्थान्तरस्थत्वम्।

युग्मे एकसूक्तगत मर्द्धर्चं द्वितीयसूक्तगतेनार्द्धर्चेन योजयेत्। तृतीययुग्मगते द्वे सूक्ते 'ऋक्शो विहरेत्' तस्मिन् युग्मे एकसूक्तगता मृचं द्वितीयसूक्तगतयर्चा योजयेत्। तदुक्त माश्वलायनेन—"अथ वालखिल्या विहरेत्, तदुक्तं षोडशिना; सूक्तानां प्रथमद्वितीये पच्छस्तृतीयचतुर्थे ऽर्द्धर्चश ऋक्शः पञ्चमषष्ठे"—इति (श्रौ० ८. २. ३-६.)। यद्यपि पूर्वाध्याये "पच्छः प्रथमं षड्वालखिल्यानां सूक्तानि विहरत्यर्द्धर्चशो द्वितीय मृक्शस्तृतीयम्" –इति विहारो ऽभिहितः (३४२ पृ०), तथाप्यत्रास्ति विशेषः। तत्र हि षण्णा मपि सूक्तानां पादविहारः, अर्द्धर्चविहार; ऋग्विहार इति त्रिरावृत्तिरभिहिता; अत्र तु प्रथमयुग्मे पादविहारः, द्वितीययुग्मे ऽर्द्धर्चविहारः, तृतीययुग्मे ऋग्विहार इति। तत्रापि सकृदेव पादादिविहारः, न त्वावृत्तिः; तथा वाचः सहभावाभावाभ्या मप्यस्ति विशेषः। अत एवोभयत्र नामभेदोऽस्ति,—महावालभिद्विहार इति पूर्वस्य नामधेयम्, हौण्डिनो विहार इति एतस्य नामधेयम्। अत एव सूत्रकारो नामधेयद्वयं दर्शयति—"इति नु हौण्डिनावथ महावालभिद्"–इति (आश्व० श्रौ० ८. २. १७, १८.) हुण्डिनाख्येन महर्षिणा दृष्टौ द्वौ विहारौ, महावालभिदाख्येन महर्षिणा दृष्ट एको विहारः ❋॥

अत्रोक्तौ हौण्डिनविहारौ प्रशंसति— "स यत्प्रथमे सूक्ते विहरति प्राणञ्च तद्वाचं च विहरति, यद् द्वितीये चक्षुश्च तन्मनश्च विहरति, यत्तृतीये श्रोत्रञ्च तदात्मानं च विहरति"–इति। पूर्ववद् व्याख्येयम् (३४६ पृ०)॥

योऽय मत्रोक्तो हौण्डिनविहारस्तस्यापि मतभेदेन द्वौ प्रकारौ;

❋ पु० ३४४पृ० "❋" टिप्पनी द्रष्टव्या।

तत्र प्रथमप्रकार मुपन्यस्य, तत्र किञ्चिदपरितोषं दर्शयति--"ते हैके सह बृहत्यौ सह सतोबृहत्यौ विहरन्ति, तदुपाप्तो विहारे कामो नेत्तु प्रगाथाः कल्पन्ते"--इति। याः [षट्त्रिंशदक्षरा बृहती, चत्वारिंशदक्षरा सतोबृहती] वालखिल्यसूक्तेषु प्रथमा बृहती द्वितीया सतोबृहती, तृतीया बृहती, चतुर्थी सतोबृहती, इत्येवं मणिप्रवालन्यायेन एकान्तरिताः पठिताः, तत्र प्रथमाद्ययुजो बृहत्यः, द्वितीयचतुर्थ्यादियुजः सतोबृहत्यः। एवं सति प्रथमसूक्ते द्वितीयसूक्ते चादिभूते द्वे बृहत्यौ सह विहरेत्, तदनन्तरभाविन्यौ द्वे सतोबृहत्यौ सह विहरेत्। इत्थं विहारं 'ते' प्रसिद्धाः याज्ञिकाः केचिदिच्छन्ति। तस्मिन् पक्षे विहारस्य विद्यमानत्वात् विहारनिमित्तो यः कामः स उपाप्तो भवेदेव, किन्तु प्रगाथाः 'नेत् कल्पन्ते' नैव सम्पद्यन्त इति। परिभवद्योतनार्थो नेच्छब्दः। छन्दोद्वयं मिलित्वा एकः प्रगाथो भवति। स्वाध्यायपाठे प्रगाथानां विद्यमानत्वात् विहारोऽपि प्रगाथान्त एवापेक्षितः। ते न केवलबृहतीभ्यां केवलसतोबृहतीभ्यां वा सम्पद्यन्ते, किन्तु छन्दोद्वयेन सम्पद्यन्ते। प्रग्रथनेन द्वयोर्ऋचोर्वा बृहतीत्वसम्पादनार्थं प्रगाथाश्रयणम्। तच्च छन्दोद्वये सुकरम्। तथाहि— प्रथमा बृहती यथापाठ मेव पठितव्या, ततोऽष्टाक्षरचतुर्थपादं द्विरावर्त्य च सतोबृहत्याः प्रथमार्द्धगतेन द्वादशाक्षरपादेनाष्टाक्षरपादेन च द्वितीया बृहती सम्पद्यते; त मप्यष्टाक्षरपादं द्विरभ्यस्य सतोबृहत्या उत्तरार्द्धगतेन द्वादशाक्षरपादेनाष्टाक्षरपादेन च तृतीया बृहती सम्पद्यते। अतः प्रगाथेषु छन्दोद्वय मपेक्षितम्; केवलयोर्बृहत्योः सतोबृहत्योर्वा यथोक्तप्रग्रथनासम्भावात् ॥

इत्थं होड्डिनविहारे प्रथमप्रकारं निराकृत्य द्वितीयं च प्रकारं

विधत्ते —"अतिमर्शं मेव विहरेत्; तथा वै प्रगाथाः कल्पन्ते; प्रगाथा वै वालखिल्यास्तस्मादतिमर्शं मेव विहरेद्यदेवातिमर्शाँ३"–इति। 'अतिमर्शम्' अतिमृश्यातिमृश्य, प्रथमसूक्तस्य प्रथमाया मृचि प्रथमपाद मुक्त्वा तदनन्तरभावि सर्वं मतिलङ्घ्य द्वितीयसूक्ते द्वितीयस्या मृचि द्वितीयपादेन योजयेत्; सोऽय मतिलङ्घ्य मृश्यमानत्वादतिमर्श इत्युच्यते। तत्र बृहतीपाद-सतोबृहतीपादयोर्मिश्रणरूपो विहारो भवति। एवकारेण पूर्वोक्तविहारो व्यावर्त्यते। स तु केवलबृहत्योः केवलसतोबृहत्योः सम्पद्यते, न तु मिलितयोः; अतो न तत्र प्रगाथभावः। इह तु 'तथा' सति, अतिमृश्य मेलने सति, छन्दोद्वयसम्बन्धात् प्रगाथाः सम्पद्यन्ते। या वालखिल्या ऋच आम्नातास्ताः प्रगाथरूपादय एव; तस्माद्विहारेऽपि प्रगाथरूपत्वं युक्तम्। तस्मादित्युपसंहारः। यदेवातिमृश्य विहरणं तत् पूज्य मिति प्लुतेरर्थः॥

अथ छन्दोद्वयं तदीय मतिमर्शनं च प्रशंसति— "आत्मा वै बृहती, प्राणाः सतोबृहती, स बृहती मशंसीत्, स आत्माथ सतोबृहतीं ते प्राणा अथ बृहती मथ सतोबृहतीं तदात्मानं प्राणैः परिबृहन्नेति; तस्मादतिमर्शं मेव विहरेत्"–इति। पूर्वोदाहृतं यदेवेति वाक्य मत्र योजनीयम्। अतिमृश्यातिमृश्य पूज्यं विहरणं यदस्ति, तस्मिन् विहरणे सा बृहती 'आत्मा वै' मध्यदेह एव; या तु सतोबृहती, सा प्राणाः; तथा सति 'सः' मैत्रावरुणो यदादौ बृहतीः 'अशंसीत्' शंसनं कृतवात्, 'सः' बृहतीशंसनरूपः 'आत्मा' मध्यदेहः सम्पद्यते। 'अथ' अनन्तरं सतोबृहती मशंसीत्, 'ते' सतोबृहतीरूपाः प्राणाः सम्पद्यन्ते। 'अथ' पुनरपि बृहतीं, तत ऊर्ध्वं सतोबृहतीं बहुकृत्वः शंसति। 'तत्' तेन

व्यतिषक्तशंसनेन 'आत्मानं' मध्यदेहं 'प्राणैः' वायुविशेषैः 'परिबृहन्' परितो वर्द्धयन् 'एति' गच्छति ॥

पुनरपि व्यतिषङ्ग मनूद्य प्रकारान्तरेण प्रशंसति— 'यद्वेवातिमर्शाँ३ आत्मा वै बृहती, पशवः सतोबृहती स बृहती मशंसीत्; स आत्माथ सतोबृहतीं ते पशवोऽथ बृहती मथ सतोबृहतीं, तदात्मानं पशुभिः परिबृहन्नेति; तस्मादतिमर्श मेव विहरेत्"–इति। यदेवातिमृश्यातिमृश्य पूज्यं शंसन मस्ति, तत्र बृहती यजमानः, सतोबृहती पशुरूपा। अन्यत् सर्वं पूर्ववद् व्याख्येयम् ॥

इत्थं षसां सूक्तानां विहरण मुक्त्वा सप्तमाष्टमयोर्विपर्यासं विधत्ते—"द्वेएवोत्तमे सूक्ते पर्यस्यति, स एव तयोर्विहारः"–इति। अष्टमं सूक्त मादौ पठित्वा पश्चात् सप्तमं सूक्तं पठेदित्येव मन्तिमं सूक्तं विपर्यस्येदेव, न तु पादार्द्धर्चादि व्यतिषङ्गं कुर्यात्, 'सः' विपर्यास एव तयोर्विहार इत्युच्यते ॥

मैत्रावरुणस्य शस्त्र मुपसंहरन् ब्राह्मणाच्छंसिनः शस्त्रं प्रस्तौति— "तस्य मैत्रावरुणः प्राणान् कल्पयित्वा ब्राह्मणाच्छंसिने सम्प्रयच्छत्येतं त्वं प्रजनयेति"–इति। 'तस्य' होतृशस्त्रेण निष्पन्नस्य रेतोरूपस्य यजमानदेहस्य मैत्रावरुणः स्वकीयेन शस्त्रेण प्राणवायून् सम्पाद्य, तं प्राणविशिष्टं यजमानदेहं ब्राह्मणाच्छंसिने सम्प्रयच्छति। हे ब्राह्मणाच्छंसिन्! 'एतं' यजमानदेहं त्वं 'प्रजनय' उत्पादयेति तस्याभिप्रायः ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां पञ्चमाध्याये
(त्रिंशाध्याये) द्वितीयः खण्डः ॥ २ (२८) ॥

॥ अथ तृतीयः खण्डः ॥

सुकीर्तिं शंसति॑ देवयोनिर्वै सुकीर्तिस्तद्यज्ञाद्देवयोन्यै॑ यजमानं प्रजनयति॑ वृषाकपिं शंसत्यात्मा॑ वै वृषाकपिरा॑त्मान मेवास्य तत् कल्पयति॑ तं न्यूङ्खय॑त्यन्नं वै न्यूङ्ख॑स्तदस्मै जातायान्नाद्यं प्रतिदधाति॑ यथा कुमाराय स्तनं॑ स पाङ्क्तो भवति॑ पाङ्क्तो ऽयं पु॑रुषः पञ्चधा विहितो॑ लोमानि त्वङ् मांस मस्थि मज्जा॑ स यावानेव पुरुष॑स्तावन्तं यजमानं संस्करोति॑ तं ब्राह्मणाच्छंसी जनयित्वा॑ऽच्छावाकाय सम्प्रय॑च्छत्येतस्य त्वं प्रतिष्ठां कल्पयेति॑ ॥ ३ (२९) ॥

ब्राह्मणाच्छंसिनः शस्त्रं विधत्ते— "सुकीर्तिं शंसति ; देवयोनिर्वै सुकीर्तिस्तद्यज्ञाद्देवयोन्यै यजमानं प्रजनयति"–इति। "अप प्राचः"–इत्यादि सूक्तं (सं० १०. १३१. १–७.) सुकीर्त्तिशब्देनोच्यते। तत् सूक्तं ब्राह्मणाच्छंसी शंसेत् *। सुकीर्त्तेर्देवप्रियत्वात् देवयोनित्वम्। तस्य देवयोनिरूपात् सुकीर्त्यात्मकत्वात्, यज्ञावयवाद्यजमानं ब्राह्मणाच्छंसी 'प्रजनयति' उत्पादयति ॥

तस्यैव सूक्तान्तरं विधत्ते— "वृषाकपिं शंसत्यात्मा वै वृषाकपिरात्मान मेवास्य तत् कल्पयति"–इति। "वि हि सोतोरसृक्षत"–इत्यादिकं सूक्तं (सं० १०. ८६. १–२३.) वृषाकपिना दृष्टत्वात् तच्छब्देनाभिधीयते †। तस्य वृषाकपिसूक्तस्य जीवात्म-

---

* "सुकीर्तिं ब्राह्मणाच्छंसी"–इति आश्व० श्रौ० ८. ४. ९।

† "वृषाकपिञ्च पङ्क्तिशंसम्"–इति आश्व० श्रौ० ८. ४. ९।

स्थानीयत्वात्। तेन 'अस्य' यजमानदेहस्य जीवात्मान मेव सम्पादयति ॥

तस्य सूक्तस्य मध्ये न्यूङ्खं विधत्ते — "तं न्यूङ्खयत्यन्नं वै न्यूङ्खस्तदस्मै जातायान्नाद्यं प्रतिदधाति, यथा कुमाराय स्तनम्"–इति। 'तं' वृषाकपिं 'न्यूङ्खयति' न्यूङ्खयुक्तं कुर्यात्। ह्रस्वैस्त्रयोदशभिरोकारैर्युक्ता दीर्घास्त्रय ओकारा मिलित्वा न्यूङ्खा भवन्ति। एतच्च पूर्व मेवोक्तम् (२१, २४ पृ०) न्यूङ्खस्यान्नसाधनत्वेनान्नरूपत्वात् तेन न्यूङ्खेन 'अस्मै' यजमानायोत्पन्नाय अन्नाद्यं समर्पयति;— यथोत्पन्नाय कुमाराय माता स्तनं प्रयच्छति, तद्वत् ॥

सूक्तगतं छन्दः प्रशंसति— "स पाङ्क्तो भवति; पाङ्क्तोऽयं पुरुषः,—पञ्चधा विहितो लोमानि त्वङ् मांस मस्थि मज्जा; स यावानेव पुरुषस्तावन्तं यजमानं संस्करोति"-इति। 'सः' वृषाकपिनामकः सूक्तविशेषः पङ्क्तिच्छन्दोयुक्तो भवति, पुरुषोऽपि लोमादिभिः पञ्चधा सृष्टत्वात् पञ्चसङ्ख्यायोगेन 'पाङ्क्तः'। तथा सति 'सः' पुरुषः स्वकीयैरवयवैर्यावानेव भवति, तावन्तं सर्व मपि यजमान मनेन संस्करोति ॥

ब्राह्मणाच्छंसिनः शस्त्र मुपसंहरन् अच्छावाकस्य शस्त्रं प्रस्तौति— "तं ब्राह्मणाच्छंसी जनयित्वाच्छावाकाय सम्प्रयच्छत्येतस्य त्वं प्रतिष्ठां कल्पयेति"-इति। 'तं' यजमानं ब्राह्मणाच्छंसी स्वकीयेन शस्त्रेणोत्पाद्य प्रतिष्ठासम्पादनार्थ मच्छावाकाय सम्प्रयच्छति। हे अच्छावाक! 'एतस्य' यजमानस्य त्वं प्रतिष्ठां सम्पादयेति ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां पञ्चमाध्याये
(त्रिंशाध्याये) तृतीयः खण्डः ॥ ३ (२८) ॥

॥ अथ चतुर्थः खण्डः ॥

एवयामरुतं शंसति प्रतिष्ठा वा एवयामरुत्प्रतिष्ठा मेवास्य तत् कल्पयति तं न्यूङ्खयत्यन्नं वै न्यूङ्खो ऽन्नाद्य मेवास्मिंस्तद्दधाति स जागतो वातिजागतो वा सर्वं वा इदं जागतं वातिजागतं वा स उ मारुत आपो वै मरुत आपो ऽन्न मभिपूर्व मेवास्मिंस्तदन्नाद्यं दधाति तान्येतानि सहचराणीत्याचक्षते नाभानेदिष्ठं वालखिल्या वृषाकपि मेवयामरुतं तानि सह वा शंसेत् सह वा न शंसेद् यदेनानि नाना शंसेद्यथा पुरुषं वा रेतो वा विच्छिन्द्यात् तादृक्तत्तस्मादेनानि सह वा शंसेत् सह वा न शंसेत् स ह बुलिल आश्वतर आश्विर्वैश्वजितो होता सन्नीक्षाञ्चक्र एषां वा एषां शिल्पानां विश्वजिति सांवत्सरिके द्वे मध्यन्दिन मभि प्रत्येतोर्हन्ताह मित्थं मेवयामरुतं शंसयानीति तद्ध तथा शंसयाञ्चकार तद्ध तथा शस्यमाने गौश्ल आजगाम स होवाच होतः कथा ते शस्त्रं विचक्रं प्लवत इति किं ह्यभूदित्येवयामरुदय मुत्तरतः शस्यत इति स होवाचैन्द्रो वै मध्यन्दिनः कथेन्द्रं मध्यन्दिनान्निनीषसीति नेन्द्रं मध्यन्दिनान्निनीषामीति होवाच छन्दस्त्विद ममध्यन्दिनसाच्चायं जागतो वाति-

जागतो वा सर्वं वा इदं जागतं वातिजागतं वा स उ मारुतो मैव शंसिष्टेति स होवाचारमाच्छावाकेत्यथ हास्मिन्ननुशासन मीषे स होवाचैन्द्र मेष विष्णुं न्यङ्गं शंसत्वथ त्व मेतं होतरुपरिष्टाद्रौद्र्यै धाय्यायै पुरस्तान्मारुतस्याप्यस्याथा इति तद्ध तथा शंसयाञ्चकार तदिद मप्येतर्हि तथैव शस्यते ॥ ४ (३०) ॥

अच्छावाकस्य शस्त्रं विधत्ते—“एवयामरुतं शंसति ; प्रतिष्ठा वा एवयामरुत्प्रतिष्ठा मेवास्य तत् कल्पयति”–इति। “प्र वो महे मतयः”–इत्यादिकं (सं० ५. ८७. १–९.) सूक्तम् ‘एवयामरुत्’–शब्देनोच्यते। तत् सूक्त मच्छावाकः शंसेत्। तच्च ‘प्रतिष्ठा वै’ प्रतिष्ठारूपत्वात्। तेन यजमानस्य प्रतिष्ठा मेव सम्पादयति * ॥

तस्मिन् सूक्ते न्यूङ्खं विधत्ते—“तं न्यूङ्खयत्यन्नं वै न्यूङ्खोऽन्नाद्य मेवास्मिंस्तद्दधाति”–इति। पूर्ववद् व्याख्येयम् ॥

सूक्तगतं छन्दः प्रशंसति— “स जागतो वातिजागतो वा, सर्वं वा इदं जागतं वातिजागतं वा”–इति। सूक्तविशेषो द्वादशाक्षरपादत्वात् जगतीच्छन्दस्को भवति, चतुर्थपादे षोडशाक्षरत्वात् अतिच्छन्दस्त्वादतिजगतीच्छन्दस्कोऽपि भवति। ‘सर्वम्’ अप्येतत् प्राणिजातं जगच्छब्दाभिधेयत्वात् जागत मतिजागतं वा भवति। अतः सर्वरूपत्वेन छन्दोद्वयं प्रशस्तम् ॥

देवताद्वारेण सूक्तं प्रशंसति— “स उ मारुत आपो वै मरुत

---

* “एवयामरुदुक्तो वृषाकपिना”–इति आश्व० श्रौ० ८. ४, २।

आपो ऽन्न मभिपूर्वं मेवास्मिंस्तदन्नाद्यं दधाति"–इति। 'स उ' सोऽपि सूक्तविशेषो 'मारुतः' मरुद्देवताकः। मरुतश्च वृष्टिद्वारेण 'आपो वै' आप एव। अपां चान्नहेतुत्वादन्नत्वम् 'अभिपूर्वमेव' उक्तानुपूर्व्येव वायुसम्पादितजलद्वारा यजमाने अन्नाद्यं स्थापयति॥

होत्रादिभिः प्रयोज्याना मुक्तानां चतुर्णां शिल्पाना मेकस्मिन्नहनि प्रयोगसहभावं विधत्ते— "तान्येतानि सहचराणीत्याचक्षते,—नाभानेदिष्ठं वालखिल्या वृषाकपि मेवयामरुतं; तानि सह वा शंसेत्, सह वा न शंसेत्"–इति। नाभानेदिष्ठादीनि चत्वारि शिल्पानि यान्युक्तानि, तानि एतानि 'सहचराणि' एकस्मिन्नहनि सह वर्तन्ते 'इति' एव मभिज्ञा आचक्षते *। तस्माद्यस्मिन्नहनि शंसनीयानि, तस्मिन् चत्वार्य्यपि शंसेत्; यस्मिन्न शंसनीयानि, तस्मिंश्चत्वार्य्यपि परित्यजेत्॥

विपक्षे बाधक मुक्त्वा स्वपक्ष मुपसंहरति—"यदेनानि नाना शंसेद् यथा पुरुषं वा रेतो वा विच्छिन्द्यात्, तादृक्तत्; तस्मादेनानि सह वा शंसेत्, सह वा न शंसेत्"–इति। तदेकस्मिन् अहनि 'एनानि' चत्वारि शिल्पानि 'नाना शंसेत्' नाना विच्छिद्य विच्छिद्य अवशिष्ट महरन्तरे शंसेत्, तदानीं लोके यथा सम्पूर्णगर्भादुत्पन्नं 'पुरुषं वा', तत्कारणं 'रेतो वा', 'विच्छिन्द्याद्' विवासयेत्, तादृशं तद्भवेत्। 'तस्मात्' कारणादेतेषां चतुर्णां साहित्य मेव; न तु परस्परवियोगः कर्तव्यः॥

अथ शिल्पेष्वेव कञ्चिद्विशेषं वक्तु माख्यायिका माह—"स ह बुलिल आश्वतर आश्विर्वैश्वजितो होता सन्नीक्षाञ्चक्र एषां वा

---

* "तान्येतानि सहचराणीत्याचक्षते"–इत्युक्तं पुरस्तादपि (८५पृ०)।

एषां शिल्पानां विश्वजिति सांवत्सरिके द्वे मध्यन्दिन मभि प्रत्येतोर्हन्ताह मित्थ मेवयामरुतं शंसयानीति ; तद्ध तथा शंसयाञ्चकार"–इति। 'ह'-शब्द ऐतिह्यद्योतनार्थः *। 'सः' प्रसिद्धः बुलिलनामको महर्षिः, 'आश्वतरः' अश्वतरनाम्नो महर्षेर्गोत्रे समुत्पन्नः, 'आश्विः' अश्वनाम्नो महर्षेः पुत्रः †, कदाचित् 'वैश्वजितः' विश्वजिद्यागसम्बन्धी होता सन्, स्वमनसि 'ईक्षाञ्चक्रे' विचारितवान्। सांवत्सरिके गवामयनाख्यसंवत्सरसत्रसम्बन्धिनि 'विश्वजिति' विषुवतोऽह्नः ऊर्द्ध मुत्तरपक्षगते विश्वजिन्नामके‡ चतुर्थेऽहनि 'एषां' होत्रमैत्रावरुणादीनां सम्बन्धीनि शस्त्राणि शिल्पनामकानि चत्वारि सन्ति, 'एषां शिल्पानां' मध्ये द्विशिल्पे मैत्रावरुण-ब्राह्मणाच्छंसिनोः सम्बन्धिनी, मध्यन्दिनसवनम् 'अभि'लक्ष्य 'प्रत्येतोः' प्रत्येतुं, कुशलोऽस्मीति शेषः। 'हन्त' हृष्टोऽह मेवयामरुतं शंसयानीत्येवं महर्षिर्विचारितवान्। अय मर्थः। तृतीयसवनगतान्येतानि शिल्पशस्त्राणि तान्यन्येष्वहस्सु सम्भवन्ति, विश्वजिति त्वग्निष्टोमे तृतीयसवने होत्रकाणां शस्त्राभावात् मैत्रावरुण-ब्राह्मणाच्छंसिनोः सम्बन्धि शस्त्रद्वयं माध्यन्दिने सवने समानेतुं तावदच्छावाक मस्मिन् मध्यन्दिने एवयामरुतं शंसयानि। तथा सति ततः पूर्वभाविनोः मैत्रावरुणब्राह्मणाच्छंसि-

---

* 'इतिह'–इति निपातसमुदायः; ततो ञ्य रूपम् ऐतिह्यम् (पा० ५. ४. २३.)। "स्मृतिः प्रत्यक्ष मैतिह्य मनुमानश्चतुष्टयम्"–इति तै० आ० १. २. १। 'ऐतिह्यम्—इतिहासपुराणमहाभारतब्राह्मणादिकम्'–इति तद्भाष्ये सायणः।

† बुडिल इति वाजसनेयिच्छान्दोग्यब्राह्मणयोः पाठः (शत० ब्रा० ४. ६. १. ९ ; १०. ६. १. १ ; १४. ८. १५. ११ ; छा० उप० ५. ११. १।

‡ विश्वजित्परिचयः पूर्वत्र विस्पष्टः (३१०पृ०)।

शस्त्रयोरर्थात् माध्यन्दिने सवने समाकर्षणं भवति । 'इति' इत्थं बुलिलः स्वमनसि विचार्य 'तत्र' तस्मिन् एव माध्यन्दिने सवने, तथा स्वविचारितक्रमेण 'एवयामरुतं' सूक्तम् अच्छावाकं 'शंसयाञ्चकार' बलादाज्ञाप्य शंसनं कारितवान् ॥

तत्र दोषं कथामुखेनोद्भावयति— "तत्र तथा शस्यमाने गौश्ल आजगाम; स होवाच,— होतः कथा ते शस्त्रं विचक्रं प्लवत इति ?"–इति । 'तत्र' तस्मिन्नेव माध्यन्दिने सवने 'तथा' तेन क्रमेण बुलिलप्रेरितेनाच्छावाकेनैवयामरुन्नामके शस्त्रे शस्यमाने सति, तदानीं गौश्लनामकः कश्चित् * महर्षिरागत्य बुलिलनामकं होतारं प्रत्येव मुवाच । हे होतः! 'ते' त्वदीय मच्छावाकप्रयुक्त मेवयामरुन्नामकं शस्त्रं 'प्लवते' विनश्यति । तत्र दृष्टान्तः— 'विचक्रं' चक्ररहितं शकट मिव । अश्रूयमाणोऽपि इवशब्दोऽत्राध्याहर्त्तव्यः । अतः 'कथा' तदेतत् सर्वं कथं घटते ? इत्याक्षेपः ॥

तत ऊर्द्ध्वं बुलिलस्य वचनं दर्शयति— "किं ह्यभूदिति ?"–इति । अत्राच्छावाकेन शस्यमाने सति किं वा दूषण मभूत् ? नास्ति कश्चिदपि दोष इत्यर्थः ॥

तत ऊर्द्ध्वं गौश्लेनोक्तं दोषं दर्शयति— "एवयामरुदय मुत्तरतः शस्यत इति ; स होवाचैन्द्रो वै मध्यन्दिनः ; कथेन्द्रं मध्यन्दिनान्निनीषसीति ?"–इति । होतुर्धिष्ण्यादुत्तरतो ह्यच्छावाकस्य धिष्ण्यम्; तत्समीपे ऽवस्थितेनाच्छावाकेनैवयामरुन्नामको

---

* गौश्लः गौश्रः अभिन्नः । साङ्ख्या० ब्रा० १६.९; २३.४ । स च गुश्रेरपत्यम् । गुश्रिः कुश्रिश्च स्यादभिन्नः । स त्वेकः "कुश्रिर्यज्ञवचसः"–इति शत० ब्रा० १०.६.५.९; अथापरः "कुश्रिर्वाजश्रवसः"–इति शत० ब्रा० १४.९.४.३३; १०.५.४.१ ।

यः शस्त्रविशेषः, स पठनीय इति तस्याशय इत्युक्त्वा, पुनरपि 'सः' गौश्ल एव मुवाच । 'मध्यन्दिनः' तत्सवनीयः 'ऐन्द्रः' इन्द्रदेवताकः ; तथा सति हे होतः ! त मेत मिन्द्र मस्मात् माध्यन्दिनसवनात् 'कथा निनीषसि' केन प्रकारेणापनेतु मिच्छसि ? सैव मपनयनेच्छैव त्वदीयाच्छावाकशंसने दोष इति गौश्लस्याभिप्रायः ॥

त मभिप्राय मजानतो बुलिलस्य वाक्यं दर्शयति— "नेन्द्रं मध्यन्दिनान्निनीषामीति होवाच"–इति । अस्मात् माध्यन्दिनसवनात् तत्स्वामिन मिन्द्र मपनेतु महं नेच्छामि ; तद्विरुद्धस्य कस्यचिदपि अननुष्ठितत्वात् । 'इति' एवं बुलिल उक्तवान् ॥

ततो विरुद्धार्थानुष्ठानप्रदर्शनार्थं गौश्लस्य वाक्यं दर्शयति— "छन्दस्त्विद ममध्यन्दिनसाच्ययं जागतो वातिजागतो वा सर्वं वा इदं जागतं वातिजागतं वा ; स उ मारुतो मैव शंसिष्टेति"–इति । हे होतः ! त्वं स्वमनसेन्द्र मपनेतुं नेच्छसि, किन्त्विदं छन्दो ऽच्छावाकेन प्रयुज्यमानं शस्त्रगतम् 'अमध्यन्दिनसाचि' मध्यन्दिनसवनसम्बन्धार्हं न भवति। कथ मिति चेत्, तदुच्यते— 'अयं' सूक्तविशेषो 'जागतो वातिजागतो वा' द्वादशाक्षरपादेन षोडशाक्षरपादेन चोपेतत्वात् । सर्वं चेदं जागत मतिजागतं च मन्त्रजातं जागते तृतीयसवने एव योग्यम्, न तु त्रैष्टुभे मध्यन्दिने सवने ; 'स उ' सोऽपि सूक्तविशेषो 'मारुतः' मरुद्देवताको न चैन्द्रः । अतोऽपि कारणात् तृतीयसवने एव योग्यम् । तस्मादय मच्छावाको 'मैव शंसिष्ट' शंसनं सर्वथा मा करोत्विति दोषं दर्शितवान् ॥

तत ऊर्ध्वं बुलिलकृत्यं दर्शयति—"स होवाचारमाच्छावाके त्वम् त्यथ हास्मिन्ननुशासन मीषि"-इति । हे अच्छावाक ! त्वम्

'आरम' शंसनादुपरतो भव । 'इति' एवं बुलिल उवाच । 'अथ' अनन्तर मिद मप्युवाच—'हा' कष्टं सम्पन्नम् ! इतः पर महम् 'अस्मिन्' गौश्ले गुरौ 'अनुशासनम्' अनुष्ठेयोपदेशनम् 'इषे' इच्छामि । एतस्मादवगत्य सर्वं मनुष्ठास्यामीति तस्याभिप्रायः ॥

अथ गौश्लस्योपदेशवाक्यं दर्शयति— "स होवाचैन्द्र मेष विष्णुन्यङ्गं शंसत्वथ त्वमेतं होतरुपरिष्टाद्रौद्र्यै धाय्यायै पुरस्तान्मारुतस्याप्यस्याथा इति"–इति । 'सः' गौश्ल एव मुवाच,— 'एषः' अच्छावाकः 'ऐन्द्रम्' इन्द्रदेवताकं 'विष्णुन्यङ्गं'* विष्णुलिङ्गोपेतं शंसतु । एवयामरुतं त्यक्त्वा "द्यौर्न य इन्द्र"–इति प्रत्येवयामरुन्नामकं†. यदैन्द्रं सूक्त मस्ति (सं॰ ६. २०. १–१३.), तस्मिन् सूक्ते द्वितीयस्या मृचि चतुर्थपादे एव माम्नायते—"हन्नृजीषिन् विष्णुना सचानः"–इति ; अत इदं विष्णुचिह्नोपेतं सूक्तं शंसतु । हे 'होतः' बुलिल ! त्वम् 'एतम्' एवयामरुतं‡ त्वदीयशस्त्रे 'अस्याथाः' प्रक्षिपेः । तत्र स्थानविशेष उच्यते— तृतीयसवने "शन्नः करति"–इति (सं॰ १. ४३. ६.) रुद्रदेवताका येयं धाय्या, तस्या उपरिष्टात्, मारुतसूक्तस्य§ पुरस्तात्, तयोरुभयोर्मध्ये प्रक्षेपस्थानम् । एवं गौश्लउपदेशः ॥

अथानुष्ठानं दर्शयति— "तद्ध तथा शंसयाञ्चकार ; तदिद मप्येतर्हि तथैव शस्यते"–इति । 'तद्ध' गौश्लेन यदुक्तं तत् सर्वं, तथैव बुलिलः 'शंसयाञ्चकार' माध्यन्दिनसवनेऽच्छावाकं प्रति

---

* "विष्णुन्यङ्गम्"–इति ख-पाठ एव भाष्यसम्मतो गम्यते ।

† "प्रत्येवयामरुदित्येतदाचक्षते"–इति आश्व॰ श्रौ॰ ८. ४. ११ ।

‡ एवयामरुतं= प्रत्येवयामरुतं ।

§ "प्र वो महे"–इत्येवयामरुतसूक्तं मेव मारुतं सूक्तम् । ३७५पृ॰ २१पं॰ द्र॰ ।

एवयामरुच्छंसने प्रेषितवान्, स्वयं तृतीयसवने आग्निमारुतशस्त्रमध्ये धाय्यामारुतसूक्तयोर्मध्ये एवयामरुतं प्रक्षिप्य शंसनं कृतवान्। तस्मादिदानी मपि तदिदं सर्वं होतृकैस्तथैव शस्यते ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां पञ्चमाध्याये
(त्रिंशाध्याये) चतुर्थः खण्डः ॥ ४ (३०) ॥

॥ अथ पञ्चमः खण्डः ॥

तदाहुर्यदस्मिन् विश्वजित्यतिरात्र॑ एवं षष्ठेऽहनि॑ कल्पते यज्ञः॑ कल्पते यजमानस्य प्रजातिः॑ कथ मत्राशस्त एवं॑ नाभानेदिष्ठो भवत्य॑थ मैत्रावरुणो वालखिल्याः शंसति॑ ते प्राणा रेतो वा॑ अग्रे ऽथ प्राणा॑ एवं ब्राह्मणाच्छंस्यशस्त एव॑ नाभानेदिष्ठो भवत्य॑थ वृषाकपिं शंसति॑ स आत्मा रेतो वा अग्रे ऽथात्मा॑ कथ मत्र यजमानस्य प्रजातिः कथं प्राणा अविक्लृप्ता भवन्तीति॑ यजमानं ह वा एतेन॑ सर्वेण यज्ञक्रतुना संस्कुर्वन्ति॑ स यथा गर्भो योन्या मन्त॑रेवं सम्भवञ्छेते न वै सकृदेवाग्रे सर्वः सम्भवत्य॑केकं वा अङ्गं॑ सम्भवतः सम्भवतीति॑ सर्वाणि चेत्समाने ऽहन् क्रियेरन् कल्पत एव यज्ञः॑ कल्पते यजमानस्य प्रजाति॑रथैतं होतेवया-

मरुतं॑ तृतीयसवने शंसति॑ तद्धास्य प्रतिष्ठा॑ तस्या मेवै॑नं तदन्ततः प्रतिष्ठापयति॑ ॥ ५ (३१) ॥

संवत्सरसत्रे यदहरग्निष्टोमसंस्थं विश्वजिदाख्य मस्ति, तत्र शिल्पानां शस्त्राणां क्लृप्तिः पूर्वत्राभिहिता (३६०—३८० पृ०); तत्र किञ्चिच्चोद्य मुद्भावयन्ति—"तदाहुर्यदस्मिन् विश्वजित्यतिरात्र एवं षष्ठे ऽहनि कल्पते यज्ञः, कल्पते यजमानस्य प्रजातिः ; कथ मत्राशस्त एव नाभानेदिष्ठो भवत्यथ मैत्रावरुणो वालखिल्याः शंसति ; ते प्राणा, रेतो वा अग्रे ऽथ प्राणा एवं ब्राह्मणाच्छंस्यशस्त एव नाभानेदिष्ठो भवत्यथ वृषाकपिं शंसति ; स आत्मा, रेतो वा अग्रे ऽथात्मा ; कथ मत्र यजमानस्य प्रजातिः, कथं प्राणा अविक्लृप्ता भवन्तीति"—इति। द्विविधो हि विश्वजित्,— अतिरात्रसंस्थोऽग्निष्टोमसंस्थश्च। तत्रातिरात्रसंस्थः स्वतन्त्र एकाहः। तत्र तृतीयसवने होत्रकाणां शस्त्राणि विद्यन्ते। तथा सति पूर्वोक्तक्रमेण होता नाभानेदिष्ठं शस्त्वा रेतः सिञ्चति, मैत्रावरुणो वालखिल्याः शस्त्वा प्राणानवस्थापयति ,ब्राह्मणाच्छंसी सुकीर्त्तिं शस्त्वा प्रजनयति, अच्छावाक एवयामरुतं शस्त्वा प्रतिष्ठां करोतीत्ययं क्रम उपपन्नः। एवं पृष्ठ्यषळहस्य यदहः षष्ठ मस्ति, तस्याप्युक्तसंस्थत्वेन तृतीयसवने होत्रकशस्त्रसद्भावात् पूर्वोक्ता यजमानोत्पत्तिरुपपद्यते। यथा विश्वजिदतिरात्रे षष्ठेऽहनि च शस्त्ररूपो यज्ञः 'कल्पते' उपपद्यते, तदनुसारेण यजमानस्य 'प्रजातिः' जनन मप्युपपद्यते। तथा संवत्सरसत्रगते ऽग्निष्टोमसंस्थे विश्वजित्यहनि तदुपपादयितुं न शक्यते। तथाहि— तत्राग्निष्टोमसंस्थे विश्वजिति होता नाभानेदिष्ठो माध्यन्दिनसवने

शस्त एव भवति; तृतीयसवने वैश्वदेवशस्त्रे शस्यमानत्वात्। अथैवं सति मैत्रावरुणो वालखिल्याः प्रथमं शंसति; तृतीयसवने होत्रकाणां शस्त्राभावेऽपि माध्यन्दिने सवने तेषां शस्त्राणां बुलिलाख्येन महर्षिणा समाकृष्टत्वात्। 'ते' च वालखिल्यात्मकाः प्राणा इत्युक्तम् (३६५ पृ०)। लोके तु रेत एव 'अग्रे' प्रथमं सिक्तं भवति, पश्चात् सिक्ते रेतसि प्राणानां प्रवृत्तिरिति क्रमः। इह तु नाभानेदिष्ठराहित्येन रेतःसेको नास्ति, वालखिल्यानां सद्भावेन प्राणा विद्यन्ते, कथ मेतदुपपद्यते? इत्येकं चोद्यम्। एवं चोद्यान्तर मस्ति। ब्राह्मणाच्छंसी मध्यन्दिने वृषाकपिं शंसति। 'सः' वृषाकपिर्यजमानस्य प्रजायमानस्य 'आत्मा' देहः। अत्रापि नाभानेदिष्ठो ऽशस्त एव भवति, अतो रेतो नास्ति। लोके तु रेत एवाग्रे सिच्यते, 'अथ' पश्चादात्मदेहो जायते; अतो लोकवैपरीत्ये सति कथ मत्र यजमानस्य 'प्रजातिः' जन्म? इति द्वितीयं चोद्यम्। यजमानस्य जन्मसम्भवे वालखिल्यरूपाः 'प्राणाः' 'अविक्लृप्ताः' विशेषेण स्थानक्लृप्तिरहिताः 'कथं भवति' केन प्रकारेण वर्त्तन्ते? 'इति' एवं ब्रह्मवादिनश्चोद्य माहुः॥

तस्य परिहारं दर्शयति—"यजमानं ह वा एतेन सर्वेण यज्ञक्रतुना संस्कुर्वन्ति; स यथा गर्भो योन्या मन्तरेवं सम्भवञ्छेते; न वै सकृदेवाग्रे सर्वः सम्भवत्येकैकं वा अङ्गं सम्भवतः सम्भवतीति"—इति। इह 'यज्ञक्रतु'शब्देन तत्साधनभूतः शिल्पसमूहो विवक्षितः। 'एतेन' सर्वेणापि शिल्पसमूहेन यजमानं 'संस्कुर्वन्ति' प्राणप्राप्तर्हता संस्कारः, स एव चात्र क्रियते; न तु यजमानस्य मरणजन्मबहुभिः शिल्पैः क्रमेण संस्कारे दृष्टान्तः। यथा योन्याम् 'अन्तः' मध्ये 'सः' प्रसिद्धो गर्भो भवति, एव मयं यजमानः

क्रमेण 'सम्भवन्' संस्कृताकारेणोत्पद्यमानः 'शेते' अवतिष्ठते। लोकेऽपि गर्भः 'अग्रे' प्रथमं रेतस्सेककाले एव 'सर्वः' सम्पूर्णाङ्गः सकृदेव 'न वै सम्भवति' नैवोत्पद्यते ; किन्तु 'सम्भवतः' उत्पद्यमानस्य पुरुषस्य एकैक मङ्गं क्रमेण 'सम्भवति' निष्पद्यते। तथा च गर्भोपनिषद्यामाम्नातम्— "एकरात्रोषितं कललं भवति, सप्तरात्रोषितं बुद्बुदं भवति"–इत्यादि। अतो गर्भवत्क्रमेण संस्कारो युक्त इत्यर्थः ॥

उक्त मेवोत्तरं पुनरपि विस्पष्टयति—"सर्वाणि चेत्समाने ऽहन् क्रियेरन्, कल्पत एव यज्ञः, कल्पते यजमानस्य प्रजातिरथैतं होतैवयामरुतं तृतीयसवने शंसति ; तद्यास्य प्रतिष्ठा, तस्या मेवैनं तदन्ततः प्रतिष्ठापयति"–इति। 'सर्वाणि' शिल्पशस्त्राण्येकस्मिन्नेवाहनि क्रियेरन्। तदानीं तावतैवायं यज्ञो यजमानसंस्कारे हेतुः शिल्पसमूह उपपद्यते। यजमानस्य 'प्रजातिः' जननोपचार उपपद्यते। अतः सर्वशस्त्रानुष्ठान मेव संस्कारसाधनम्, न तु होतुः शस्त्रस्य प्रथमभावित्वादिक्रमविशेषः संस्कारोपयोगी। नन्वत्र सर्वशस्त्रानुष्ठानं नास्ति माध्यन्दिनसवने ; एवयामरुन्नाम्नः सूक्तस्याच्छावाकेनाननुष्ठानात्। नायं दोषः। तत्र तदभावेऽपि तृतीयसवने होतुरेवयामरुच्छस्त्र मस्ति, 'तत्' तथा सति यजमानस्य सर्वशस्त्रानुष्ठानेन या प्रतिष्ठा अपेक्षिता, तस्या मेव प्रतिष्ठायाम्, 'एनं' यजमानं तत् 'अन्ततः' शस्त्राणा मन्ते प्रतिष्ठापयति ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां पञ्चमाध्याये
(त्रिंशाध्याये) पञ्चमः खण्डः ॥ ५ (३१) ॥

THE MIRZAPUR PHOENIX UNION LIBRARY
12, E... Street, Calcutta
191

॥ अथ षष्ठः खण्डः ॥

छन्दसां वै षष्ठेनाह्नाप्तानां॑ रसो ऽत्यनेदत्स॑ प्रजापतिरबिभेत्॑ पराङयं छन्दसां॑ रसो लोकानत्येष्यतीति॑ तं परस्ताच्छन्दोभिः पर्यगृह्णान्ना॑राशंस्या गायत्र्या॑ रैभ्या त्रिष्टुभः॑ पारिक्षित्या जगत्याः॑ कारव्ययानुष्टुभस्त॑त्पुनश्छन्दस्सु रस मदधात्॑ सरसैर्हास्य छन्दोभिरिष्टं भवति॑ सरसैश्छन्दोभिर्य॑ज्ञं तनुते य एवं वेद॑ नाराशंसीः शंसति॑ प्रजा वै नरो वाक् शंसः॑* प्रजास्वेव तद्वाचं दधाति॑ तस्मादिमाः प्रजा वदत्यो॑ जायन्ते य एवं वेद॑ यदेव नाराशंसी३ः शंसन्तो वै देवाश्च ऋषयश्च॑ स्वर्गं लोक मायंस्त॑थैवैतद्यजमानाः॑ शंसन्त एव स्वर्गं लोकं यन्ति॑ ताः प्रग्राहं शंसति॑ यथा वृषाकपिं वार्षाकपं हि॑ वृषाकपेस्तन्न्याय मेति॑ तासु न न्यूङ्खये॑न्नीवीव नर्दे॑त् स हि तासां न्यूङ्खो॑ रैभीः शंसति॑ रेभन्तो वै देवाश्च ऋषयश्च॑ स्वर्गं लोक मायंस्त॑थैवैतद्यजमाना॑ रेभन्त एव स्वर्गं लोकं यन्ति॑ ताः प्रग्राहं शंसति॑ यथा वृषाकपिं वार्षाकपं हि॑ वृषाकपेस्तन्न्याय मेति॑ तासु न न्यूङ्खये॑न्नीवीव नर्दे॑त् स हि तासां न्यूङ्खः॑ पारिक्षितीः शंसत्य॑ग्निर्वै॑ परिक्षिद॑ग्नि-

---

* "वाक्छंसः" ङ।

हीमाः प्रजाः परिक्षेत्यग्निं हीमाः प्रजाः परिक्षियन्त्यग्नेरेव सायुज्यं सरूपतां सलोकता मश्नुते य एवं वेद यद्वेव पारिक्षिती३ः संवत्सरो वै परिक्षित् संवत्सरो हीमाः प्रजाः परिक्षेति संवत्सरं हीमाः प्रजाः परिक्षियन्ति संवत्सरस्यैव सायुज्यं सरूपतां सलोकता मश्नुते य एवं वेद ताः प्रग्राहं शंसति यथा वृषाकपिं वार्षाकपं हि वृषाकपेस्तन्न्याय मेति तासु न न्यूङ्खयेन्नीवीव नर्देत् स हि तासां न्यूङ्खः कारव्याः शंसति देवा वै यत्किञ्च कल्याणं कर्माकुर्वंस्तत्कारव्याभिरवाप्नुवंस्तथैवैतद्यजमाना यत्किञ्च कल्याणं कर्म कुर्वन्ति तत्कारव्याभिराप्नुवन्ति ताः प्रग्राहं शंसति यथा वृषाकपिं वार्षाकपं हि वृषाकपेस्तन्न्याय मेति तासु न न्यूङ्खयेन्नीवीव नर्देत् स हि तासां न्यूंखो दिशांक्लृप्तीः शंसति दिश एव तत् कल्पयति ताः पञ्च शंसति पञ्च वा इमा दिशश्चतस्रस्तिरश्च्या * एकोर्द्ध्वा तासु न न्यूंखयेन्नैवैव च निनर्दैन्नेदिमा दिशो न्यूंखयानीति ता अर्द्धर्चशः शंसति प्रतिष्ठाया एव जनकल्पाः शंसति प्रजा वै जनकल्पा दिश एव तत कल्पयित्वा तासु प्रजाः प्रतिष्ठापयति

---

* "०स्तिरश्च" क, ख, ग।

तासु न न्यूंखये॑न्नैवैव च निनर्दे॑न्नेदिमाः प्रजा न्यूंखयानीति॑ ता अर्द्धर्चश: शंसति॑ प्रतिष्ठाया एवे॑न्द्रगाथाः शंसती॑न्द्रगाथाभिर्वै देवा॑ असुरानभिगाया॑थैनानत्यायं॑स्तथैवैतद्यजमाना॑ इन्द्रगाथाभिरेवाप्रियं भ्रातृव्य॑ मभिगायाथैन मति यन्ति॑ ता अर्द्धर्चशः शंसति॑ प्रतिष्ठाया एव॑ ॥ ६ (३२) ॥

पूर्वत्र ब्राह्मणाच्छंसिनः शिल्पे शस्त्रे 'सुकीर्त्तिं शंसति', 'वृषाकपिं शंसति' इति यत्सूक्तद्वयं विहितम् (३७२ पृ०), तत ऊर्द्ध्वं कुन्तापाख्यं सूक्तं खिले कुन्तापनामके ग्रन्थे समाम्नातं त्रिंशदृचं * वक्तव्य मिति तदितिहास माह— "छन्दसां वै षष्ठेनाह्नाप्तानां रसो ऽत्यनेदत्, स प्रजापतिरबिभेत्पराङ्यं छन्दसां रसो लोकानत्येष्यतीति ; तं परस्ताच्छन्दोभिः पर्यगृह्णान्नाराशंस्या गायत्र्याः, रैभ्या त्रिष्टुभः, पारिक्षित्या जागत्याः, कारव्ययानुष्टुभस्तत्पुन-

---

* अस्ति चतुरध्यायात्मकः खिलरूप ऋक्परिशिष्टो ग्रन्थः। तत्राद्यो निविदध्यायः, कुन्तापाध्यायो द्वितीयः, पुरोरुगध्यायस्तृतीयः, ततः प्रैषाध्यायो ऽन्तिमः। तत्र कुन्तापाध्याये त्वादौ नाराशंस्यस्तिस्रः, अथ रैभ्यस्तिस्रः, अथ पारिक्षित्यश्चतस्रः, अथ कारव्याश्चतस्रः, अथ दिशांक्लृप्तयः पञ्च, अथ जनकल्पाः षट्, अथेन्द्रगाथाः पञ्चेति त्रिंशत्सङ्ख्याका ऋचः सन्ति ; एतावदेव कुन्तापसूक्तम् ; ततश्चैतशप्रलापनामपदसप्ततिः, अथ प्रवह्लिका ऋचः षट्, अथ आजिज्ञासेन्या ऋचश्चतस्रः, अथ पदत्रयात्मकः प्रतिराधः, अथातिवाद एकः, अथ सप्तदशपदात्मको देवनीथः, अथ भूतेच्छदस्तिस्रः, अथाहनस्या ऋच अष्टाविति पञ्चदशविधा मन्त्राः समाम्नाताः। त एवेहेत आरभ्याध्यायसमाप्तिं यावत् पञ्चसु खण्डेषु क्रमाद् विधीयन्ते। तत्रास्मिन् खण्डे त्विन्द्रगाथान्तानां कुन्तापसूक्तीयाना मेवर्चां विधानम्, अत उच्यते त्रिंशदृच मिति।

ञ्छन्दस्सु रस मदधात्"-इति। पृष्ठ्यषळहस्य सम्बन्धिनां षष्ठेनाह्ना प्राप्तानां गायत्र्यादीनां छन्दसां 'रसः' सारः 'अत्यनेदत्' अतिक्रम्यागच्छत्। तदानीं 'सः' प्रजापतिः 'अबिभेत्' भीतवान्। केनाभिप्रायेणेति, सोऽभिधीयते— अयं छन्दसां रसः 'पराङ्' परावृत्य लोकान् 'अत्येष्यति' अतिक्राम्य गमिष्यति 'इति' अनेनाभिप्रायेण। ततो भीतः प्रजापतिः 'तं' रसं 'परस्तात्' परभागे 'छन्दोभिः' गायत्र्यादिभिः 'पर्य्यगृह्णात्' परितो निरुद्धवान्। गायत्र्यादीनां मध्ये कस्याः सम्बन्धि रसं कया पर्य्यगृह्णादिति, तदुच्यते— गायत्र्याः सम्बन्धि रसं नाराशंस्या पर्य्यगृह्णात्। नराशंसशब्दो यस्या ऋग्जातावस्ति, सेयं 'नाराशंसी'। तथा त्रिष्टुभः सारं 'रैभ्या' रेभशब्दोपेतया ऋग्जात्या पर्य्यगृह्णात्। जगत्याः सारं 'पारिक्षित्या' परिक्षिच्छब्दोपेतया ऋग्जात्या पर्य्यगृह्णात्। अनुष्टुभः सारं 'कारव्यया' कारुशब्दोपेतया ऋग्जात्या पर्य्यगृह्णात्। 'तत्' तस्मात्परिग्रहादूर्द्ध्वं पुनः 'छन्दस्सु' गायत्र्यादिषु 'तं' रसम् 'अदधात्' अवस्थापितवान्॥

वेदनं प्रशंसति—"सरसैर्हास्य छन्दोभिरिष्टं भवति, सरसैश्छन्दोभिर्यज्ञं तनुते, य एवं वेद"-इति। 'अस्य' वेदितुः दर्शपूर्णमासादिकं सारयुक्तैर्गायत्र्यादिभिरिष्टं भवति, अथ अग्निष्टोमादिकं प्रौढ़यज्ञं वेदिता सारयुक्तैश्छन्दोभिः 'तनुते' विस्तारयति॥

इदानीं कुन्तापसूक्तगता ऋचो विधत्ते—"नाराशंसीः शंसति; प्रजा वै नरो वाक् शंसः, प्रजास्वेव तद्वाचं दधाति ; तस्मादिमाः प्रजा वदन्त्यो जायन्ते य एवं वेद; यदेव नाराशंसी३:"-इति। "इदं जनाः"-इत्याद्यास्तिस्रर्चो नाराशंस्यः (ऋ०पं०२.१.१-३.); तत्र "नराशंसस्तविष्यते"-इति नराशंसशब्दस्य श्रुतत्वात्। तास्ति-

स्तृचो ब्राह्मणाच्छंसी शंसेत्[*]। तत्र नर इत्यनेन प्रजा विवक्षिता, शंस इत्यनेन वाक् विवक्षिता। अतस्तच्छंसनेन प्रजास्वेव वाच मवस्थापयति। 'तस्मात्' कारणादिमाः प्रजा लोके 'वदत्यः' वाग्व्यवहारयुक्ता उत्पद्यन्ते। य एवं वेद, तस्य वाचः व्यवहारक्षमाः प्रकाशयन्त इति शेषः। नाराशंसीरिति यदेवास्ति, तत् पूज्य मिति श्रुतेरभिप्रायः॥

ता ऋचः पुनः प्रशंसति—"शंसन्तो वै देवाश्च स्वर्गं लोक मायंस्तथैवैतद्यजमानाः शंसन्त एव स्वर्गं लोकं यन्ति"-इति। स्पष्टोऽर्थः॥

तच्छंसने किञ्चिद्विशेषं विधत्ते—"ताः प्रगाहं शंसति, यथा वृषाकपिं; वार्षाकपं हि वृषाकपेस्तन्न्याय मेति"-इति। 'ताः' नाराशंसीस्तिस्तृचः 'प्रगाहं' पादे पादे प्रगृह्य, अवसाय शंसेत्; यथा वृषाकपिसूक्तं पादे पादे विगृह्य शंसति, तद्वदेतत्[†]। वृषाकपिसूक्ते प्रग्रहविधिरर्थसिद्धो द्रष्टव्यः। 'हि' यस्मात् कारणात् इद मृचां शंसनं 'वार्षाकपं' वृषाकपिसम्बन्धं कर्त्तव्यम्, 'तत्' तस्मात्कारणात् 'वृषाकपेः' एतन्नामकस्य सूक्तस्य 'न्यायं' प्रकारम् 'एति' प्राप्नोति। विग्रह एवात्र तन्न्यायः[‡]॥

---

[*] नाराशंस्यादीना मिन्द्रगाथान्तानां त्रिंशदृचां कुन्तापसूक्त मिति समाख्या। "तस्माद् (वृषाकपेः) ऊर्ध्वं कुन्तापम्"-इति आश्व० श्रौ० ८. ३. ७।

[†] "तस्य (कुन्तापस्य) आदितश्चतुर्दश (कारव्यान्ताः) विग्राहं निनर्द्यं शंसेत्"-इति आश्व० श्रौ० ८. ३. ८। इह त्वित उत्तर मेव निनर्दं विधास्यति।

[‡] "अथ वृषाकपिं शंसेद् यथा होतान्यायाच्चतुर्थे"-इति आश्व० श्रौ० ८. ३. ४। आन्याद्यधर्मास्तु अर्द्धर्चशंसनम्, विग्राहः, त्रिरभ्यासः, न्यूङ्खः, निनर्दः, प्रतिगरश्चेति षट् (७. ११.१-२१)। अर्द्धर्चशंसनातिदेशं वारयितुं तत्र उक्तम् "पत्तिशंसन्त्विह"-इति (५)।

वृषाकपिसूक्ते न्यूङ्खनिनर्दावपि विद्येते, अतोऽत्रापि तदुभयप्राप्तौ न्यूङ्खं निराकृत्य इतरं विधत्ते— "तासु न न्यूङ्खयेन्नीवीव नर्देत्, स हि तासां न्यूङ्खः"–इति। 'तासु' नाराशंसीषु न्यूङ्खं न कुर्य्यात्, किन्तु 'नीवीव नर्देदेव' विशेषेण निनर्द मेव कुर्यात्। 'सः' एव निनर्दः 'तासां' नाराशंसीनां न्यूङ्खस्थानीयः। तृतीयपादस्य द्वितीयस्वरे त्रयोदशभिरोकारैस्तत्र चावसानं कृत्वा त्रयाणां त्रिमात्राणा मोकाराणा मुच्चारणं न्यूङ्खः (२१,२४ पृ०)। तृतीयपादस्य प्रथमाक्षर मनुदात्तत्वेन द्वितीयाक्षर मुदात्तत्वेनोच्चारयेदिति यदस्ति, सोऽयं निनर्दः * ॥

ऋगन्तराणि विधत्ते—"रैभीः शंसति"–इति। रेभशब्दोपेता ऋचो रैभ्यः। "वच्यस्व रेभ वच्यस्व"-इत्याद्यास्तिस्रः (ऋ० प० २. २. १–३.), ताः शंसेत्॥

ता ऋचः प्रशंसति—"रेभन्तो वै देवाश्च ऋषयश्च स्वर्गं लोक मायंस्तथैवैतद्यजमाना रेभन्त एव स्वर्गं लोकं यन्ति"–इति। 'रेभन्तः' शब्दं कुर्वन्तः, कीर्त्तिं कुर्वन्त इत्यर्थः॥

विग्रहादिकं विधत्ते—"ताः प्रगाहं शंसति, यथा वृषाकपिं; वार्षाकपं हि वृषाकपेस्तन्न्याय मेति; तासु न न्यूङ्खयेन्नीवीव नर्देत्स हि तासां न्यूङ्खः"–इति॥

पूर्ववत् ऋगन्तराणि विधत्ते—"पारिक्षितीः शंसति"–इति। परिक्षिच्छब्दोपेताः "राज्ञो विश्वजनीनस्य"–इत्याद्याश्चतस्र ऋचः

---

* "तृतीयेषु पादेषूदात्त मनुदात्तपरं यत् प्रथमं तन्निनर्देत्। तदपि निदर्शनायोदाहरिष्यामः—'इदं जना उपश्रुत। नराशंसस्तविष्यते। षष्टिं सहस्रा नवतिश्च कौरम आरुश मेषु दद्महो३म्'–इति"–इति आश्व० श्रौ० ८. ३. ९, १०। इह षकारो ऽनुदात्तः, टिकार उदात्तः, अन्यदेकश्रुतिः।

पारिक्षित्य: ; तासु "परिक्षित: क्षेम मकरत्"–इतिपरिक्षिच्छब्दस्य श्रुतत्वात्। ता ऋच: शंसेत् ॥

ताः प्रशंसति— "अग्निर्वै परिक्षिदग्निर्हीमा: प्रजा: परिक्षेत्यग्निं हीमा: प्रजा: परिक्षियन्ति"–इति। तास्वृक्षु परिक्षिच्छब्देनाग्निरेवाभिधीयते। अग्निर्हीमा: सर्वा: प्रजा: दाहपाकादिना परिपालयन् 'क्षेति' निवसति, प्रजाश्चेमा अग्निं परित: सेवमाना: 'क्षियन्ति' निवसन्ति; अत: कर्त्तरि कर्मणि वा व्युत्पत्त्या अय मग्नि: परिक्षिद्भवति ॥

वेदनं प्रशंसति—"अग्नेरेव सायुज्यं सरूपतां सलोकता मश्नुते य एवं वेद"–इति। सहवास-समानरूप-समानलोकत्वानि वेदिता प्राप्नोति ॥

तासा मृचां स्तुतेन पूज्यत्वं दर्शयति—"यदेव पारिक्षितीर:" –इति ॥

प्रकारान्तरेण ता: प्रशंसति— "संवत्सरो वै परिक्षित्, संवत्सरो हीमा: प्रजा: परिक्षेति; संवत्सरं हीमा: प्रजा: परिक्षियन्ति"–इति। अग्निवाक्यवद् व्याख्येयम् ॥

वेदनप्रशंसां प्रग्राहविधिं च दर्शयति—"संवत्सरस्यैव सायुज्यं सरूपतां सलोकता मश्नुते य एवं वेद; ता: प्रग्राहं शंसति, यथा वृषाकपिं; वार्षाकपं हि वृषाकपेस्तन्न्याय मेति; तासु न न्यूंख येन्नीवीव नर्दंत्स हि तासां न्यूङ्ख."–इति। पूर्ववद् व्याख्येयम् ॥

ऋगन्तराणि विधत्ते— "कारव्या: शंसति"–इति। कारुशब्दोपेता: 'कारव्या:', "इन्द्र: कारु मबूबुधद्"–इत्याद्यास्तस्र: (ऋ० प० २. ४. १–४.), ता: शंसेत् ॥

ता: प्रशंसति— "देवा वै यत् किञ्च कल्याणं कर्माकुर्वं-

स्तत् कारव्याभिरवाप्नुवंस्तथैवैतद्यजमाना यत्किञ्च कल्याणं कर्म कुर्वन्ति, तत्कारव्याभिराप्नुवन्ति”–इति । ‘कल्याणं’ काम्यफलार्थं कर्म कृतवतां कारव्याभिर्ऋग्भिस्तत्फलप्राप्तिर्भवति ॥

विग्रहादिकं विधत्ते—“ताः प्रगाहं शंसति, यथा वृषाकपिं ; वार्षाकपं हि वृषाकपेस्तन्न्याय मेति ; तासु न न्यूङ्खयेन्नीवीव नर्देत्स हि तासां न्यूङ्खः”–इति । पूर्ववद् व्याख्येयम् * ॥

ऋगन्तराणि विधत्ते-- “दिशांक्लृप्तीः शंसति ; दिश एव तत्कल्पयति”–इति । “यः सभेयो विदथ्यः”–इत्याद्या ऋचः (ऋ० प० २. ५. १–५.) दिशांक्लृप्तीः शंसेत् । प्राच्यादिदिग्वत्त्वात्, “ते देवाः प्रागकल्पयन्”–इति क्लृपिधातुश्रवणाच्च दिशांक्लृप्तित्वम् ; तच्छंसनेन दिश एव ‘कल्पयति’ स्वप्रयोजनक्षमाः करोति ॥

तासामृचां सङ्ख्यां दर्शयति— “ताः पञ्च शंसति ; पञ्च वा इमा दिशश्चतस्रस्तिरश्च्य एकोर्द्ध्वा”–इति । दिशांक्लृप्तिसञ्ज्ञकास्ता ऋचः पञ्च शंसेत् । अर्यमा उपलभ्येत्याद्या दिशः पञ्चसङ्ख्याका एव ; ऐन्द्री, यामी, वारुणी, सौमी, चेत्येवं ‘तिरश्च्यः’ तिर्यगवस्थिता दिशश्चतस्रः, ऊर्द्ध्वा चैका ; इत्थं पञ्च सङ्ख्या प्रपद्यते ॥

न्यूङ्खनिनर्दौ निषेधति— “तासु न न्यूङ्खयेन्नैवेव च निनर्देन्नेदिमा दिशो न्यूंखयानीति”–इति । ‘तासु’ दिशांक्लृप्तिषु न्यूंखं न कुर्यात्, तथा निनर्दमपि नैव कुर्यात् । ‘एव’, ‘च’ इति पदद्वयं विषययोः समुच्चयार्थम् । न्यूंखवर्ज्जने कोऽभिप्रायः, सोऽभिधीयते— इमा दिशो ‘नेत् न्यूंखयानि’ नैव चालयानि ‘इति’ अनेनाभिप्रायेण । न्यूंखनिनर्दयोरभिधानादेव वर्ज्जनसिद्धौ निषेधो नित्यानुवादः, पूर्वमन्त्रदृष्टान्तेन शङ्कितयोर्निषेधार्थौ वा ॥

---

* “चतुर्दश्याम् (कारव्यचतुर्थ्याम्) एकेन द्वाभ्यां च विग्रहः”–इति आश्व० श्रौ० ८.३.१२ ।

शंसने निषेधं दर्शयति— "ता अर्द्धर्चशः शंसति, प्रतिष्ठाया एव"–इति। पूर्वासा मृचां पादे पादे अवसाय शंसन मुक्तम्, तासु दिशांक्लृप्तीरर्द्धर्चे ऽर्द्धर्चे ऽवसाय शंसेत्। अर्द्धर्चस्य प्रत्यृचं द्वित्वात्तच्छंसनं प्रतिष्ठायै सम्पद्यते * ॥

ऋगन्तराणि विधत्ते— "जनकल्पाः शंसति; प्रजा वै जनकल्पा, दिश एव तत्कल्पयित्वा तासु प्रजाः प्रतिष्ठापयति"–इति। "योऽनाक्ताक्षः"–इत्याद्याः षडृचो जनकल्पाभिधाः (ऋ० प० २. ६. १–६.), ताः शंसेत्। अनाक्ताक्ष इत्यादिना पुरुषविशेषानुपन्यस्यते †, ताः कल्पेषु ‡ कल्पशब्दाभिधानादेव 'जनकल्पाः'; तासां प्रजारूपत्वात्, पूर्वोक्तदिग्रूपाभिर्ऋग्भिर्दिश सम्पाद्य 'तासु' दिक्षु प्रजाः प्रतिष्ठापयति ॥

पूर्ववत् न्यूङ्खनिनर्दनिषेध मर्द्धर्चेऽवसानं च दर्शयति— "तासु न न्यूङ्खयेन्नैवैव च निनर्देन्नेदिमाः प्रजा न्यूङ्खयानीति; ता अर्द्धर्चशः शंसति प्रतिष्ठाया एव"–इति ॥

ऋगन्तराणि विधीयन्ते— "इन्द्रगाथाः शंसतीन्द्रगाथाभिर्वै देवा असुरानभिगायाथैनानत्यायंस्तथैवैतद्यजमाना इन्द्रगाथाभिरेवाप्रियं भ्रातृव्य मभिगायाथैन मति यन्ति"–इति। "यदिन्द्रो दाशराज्ञे"–इत्याद्याः पञ्चर्चं इन्द्रगाथाभिधाः (ऋ० प० २. ७. १–५.), ताः शंसेत्। इन्द्रो गाथ्यते कथ्यते यास्वृक्षु ताः 'इन्द्रगाथाः', ताभिर्देवा असुरानभिगाय योद्धु माभिमुख्येन प्राप्य युद्धेनैनान् 'अत्यायन्' अतिक्रान्तवन्तः, जयं प्राप्ता इत्यर्थः। देववद् यजमाना अपि एताभिर्वैरिणं जयन्ति ॥

---

* "शीषोऽर्द्धर्चशः"–इति आश्व० श्रौ० ८. ३. १३।

†, ‡ जनकल्पाभिधासु ऋक्षु द्रष्टव्यम्।

पूर्ववदर्द्धर्चेऽवसानं विधत्ते — "ता अर्द्धर्चशः शंसति, प्रतिष्ठाया एव"–इति ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां पञ्चमाध्याये
(त्रिंशाध्याये) षष्ठः खण्डः ॥ ६ (३२) ॥

॥ अथ सप्तमः खण्डः ॥

ऐतशप्रलापं शंस॑त्यैतशो ह वै मुनिर॑ग्नेरायुर्ददर्श॑ यज्ञस्यायातयाम मिति हैक आहु॑ः सोऽब्रवीत्पुत्रान् पुत्रका॑ अग्नेरायुरदर्शं॑ तदभिलपिष्यामि॑ यत् किञ्च वदामि॑ तन्मे मा परिगातेति॑ स प्रत्यपद्यतैता॑ अश्वा आप्लवन्ते॑ प्रतीपं प्रातिसत्वन मिति॑ तस्याभ्यग्निरैतशायन एत्या॑काले ऽभिहाय॑ मुख मप्यगृह्णा॑ददृपन्नः पितेति॑ तं होवाचापेह्य लसो ऽभू॑र्यो मे वाच मवधीः॑ शतायुं गा मकरिष्यं॑ सहस्रायुं पुरुषं॑ पापिष्ठां ते प्रजां करो॑मि यो मेत्थ मसक्था इति॑ तस्मादाहुरभ्यग्नय ऐतशायना॑ और्वाणां पापिष्ठा इति॑ तं हैके भूयांसं शंस॑न्ति स न निषेधेद्यावत्कामं शंसे॑त्येव ब्रूया॑दायुर्वा ऐतशप्रलाप॑

आयुरेव तद्यजमानस्य प्रतारयति य एवं वेद यदेवैतशप्रलापा३ः छन्दसां हैष रसो यदैतशप्रलापश्छन्दस्स्वेव तद्रसं* दधाति सरसैर्हास्य छन्दोभिरिष्टं भवति सरसैश्छन्दोभिर्यज्ञं तनुते य एवं वेद यदेवैतशप्रलापा३ः अयातयामा वा अक्षितिरैतशप्रलापो ऽयातयामा मे यज्ञे ऽसदक्षितिर्मे यज्ञे ऽसदिति तं वा एत मैतशप्रलापं शंसति पदावग्राहं यथा निविदं तस्योत्तमेन पदेन प्रणौति यथा निविदः प्रवह्लिकाः शंसति प्रवह्लिकाभिर्वै देवा असुरान् प्रवह्ल्याथैनानत्यायंस्तथैवैतद्यजमानाः प्रवह्लिकाभिरेवाप्रियं भ्रातृव्यं प्रवह्ल्याथैन मति यन्ति ता अर्द्धर्चशः शंसति प्रतिष्ठाया एवाजिज्ञासेन्याः शंसत्याजिज्ञासेन्याभिर्वै देवा असुरानाज्ञायाथैनानत्यायंस्तथैवैतद्यजमाना आजिज्ञासेन्याभिरेवाप्रियं भ्रातृव्य माज्ञायाथैन मति यन्ति ता अर्द्धर्चशः शंसति प्रतिष्ठाया एव प्रतिराधं शंसति प्रतिराधेन वै देवा असुरान्प्रतिराध्याथैनानत्यायंस्तथैवैतद्यजमानाः प्रतिराधेनैवाप्रियं भ्रातृव्यं प्रतिराध्याथैन मति यन्त्यतिवादं शंसत्यतिवादेन वै देवा असुरानत्युद्याथैनानत्यायंस्तथैवैतद्यजमाना अतिवादेनैवाप्रियं

---

* "तद्वाचं" क ।

भ्रातृव्य मत्युद्या॑र्थेन मति यन्ति॑ त मर्द्धर्चशः शंसति॑ प्रतिष्ठाया एव॑ ॥ ७ (३३) ॥

कुन्तापनामकं त्रिंशदृचं सूक्तं विधायैतशप्रलापनामकं सप्ततिसङ्ख्याकं पदसमूहं (ऋ० प० २. ८. १–७०.) विधत्ते—"ऐतशप्रलापं शंसति"–इति। ऐतशाख्येन मुनिना दृष्टः 'ऐतशः', अनन्विताना मर्थानां वचसां लापः 'प्रलापः'; तं ब्राह्मणाच्छंसी शंसेत् ॥

त मैतशप्रलापं स्तोतु माख्यायिका माह— "ऐतशो ह वै मुनिरग्नेरायुर्ददर्श, यज्ञस्यायातयाम मिति हैक आहुः; सोऽब्रवीत् पुत्रान्,— पुत्रका अग्नेरायुरदर्शं, तदभिलपिष्यामि, यत्किञ्च वदामि, तन्मे मा परिगातेति, स प्रत्यपद्यतैता अश्वा आप्लवन्ते, प्रतीपं प्रातिसत्वन मिति"–इति। ऐतशनामकः कश्चित् मुनिः 'अग्नेरायुः'–इत्येतन्नामकं मन्त्रकाण्डं ददर्श। पूर्ववदग्नेः प्रियत्वात् तस्य काण्डस्याग्नेरायुरिति नाम सम्पन्नम्। 'एके' याज्ञिकाः 'यज्ञस्यायातयामम्'–इति तस्य मन्त्रकाण्डस्य नामधेय माहुः। पुनः-पुनः-पठितैः सार्थकैर्मन्त्रजातैरलसो यज्ञो गतसारोऽभूत्, तस्य यज्ञस्यालस्यपरिहारेण सारोत्पादनादसम्बद्धप्रलापरूपस्य मन्त्रकाण्डस्य 'अयातयामम्'–इति नाम सम्पन्नम्। 'सः' मुनिरैतशः स्वकीयान् 'पुत्रान्' प्रत्येव मब्रवीत्,— हे 'पुत्रकाः' कुत्सिताः पुत्राः! अह मग्नेरायुरित्येतन्नामकं मन्त्रकाण्डं दृष्टवानस्मि, तदहं भवता मग्रे अभिलपिष्यामि। तस्मिन् सङ्गतार्थस्य कस्याप्यभावात् यत् किञ्चिद्वाङ्मात्रं वदामि, 'तत्' मे वचनं यूयं 'मा परिगाता' अस्य वचनस्य निन्दां मा कुरुत। एवं

पुत्रान् मन्त्रयित्वा ‘सः’ मुनिः ‘प्रत्यपद्यत’ प्रलापं प्रारब्धवान्। सप्ततिसङ्ख्याकपदरूपे तस्मिन् “एता अश्वा आप्लवन्ते”-इति प्रथमं पदम्, “प्रतीपम्प्रातिसत्वनम्”-इति द्वितीयं पदम्। ‘इति’शब्दः प्रदर्शनार्थः, इत्यादिकं सप्ततिपदसमूह मुक्तवान् * ॥

तदीयपुत्रवृत्तान्तं दर्शयति— “तस्याभ्यग्निरैतशायन एत्याकाले ऽभिहाय मुख मप्यगृह्णाददृपन्नः पितेति”-इति। तस्य मुख मित्यन्वयः। ऐतशस्य पुत्रः ‘ऐतशायनः’, स च ‘अभ्यग्निः’ -इति एतन्नामकः, एतादृशः सः प्रत्यपलपन्तं पितरं दृष्ट्वा सहसा समेत्य, तदानीम् ‘अकाले’ प्रलापसमाप्तिकालाभावेऽपि ‘अभिहाय’ आभिमुख्येनोत्थाय तस्य पितुर्मुख मपि ‘अगृह्णात्’ हस्तेनाच्छादितवान्। केनाभिप्रायेणेति, सोऽभिधीयते—‘नः’ अस्माकं पिता तदानीम् ‘अदृपत्’ दर्पं प्राप्तः, उन्मत्त इत्यभिप्रायेण ॥

अथ मुनेर्वृत्तान्त माह —“तं होवाचापेह्यलसो ऽभूर्यो मे वाच मवधीः, शतायुं गा मकरिष्यं, सहस्रायुं पुरुषं, पापिष्ठां ते प्रजां करोमि, यो मेत्थ मसक्था इति”-इति। ‘तम्’ अभ्यग्निनामकं पुत्रं मुखपिधाने प्रवृत्तं पिता एव मुवाच। हे पुत्र! त्वम् ‘अपेहि’ अस्माद् देशादपागच्छ, ‘अलसोऽभूः’ मद्वाक्यं श्रोतु मालस्ययुक्तस्त्व मभूः। यस्त्वं मे मदीयां वाचम् ‘अवधीः’ मुखपरिधानेन विनाशितवानसि; अह मुन्मत्त इति तव बुद्धिः; न त्वह मुन्मत्तः, किन्तु मन्त्रकाण्ड मीदृशम्। सामर्थ्यन्तु मदीयं शृणु,— अल्पायुष्यं गां ‘शतायुं’ शतसंवत्सरायुष्कम् ‘अकरिष्यं’ कर्त्तुं शक्नोमि, तथा शतायुं पुरुषं ‘सहस्रायुं’ सहस्रसंवत्सरायुष्कं कर्त्तुं

---

* “एता अश्वा आप्लवन्त इति सप्ततिपदानि”-इत्यादीनि आश्व० श्रौ० ८.३.१४—१७। ‘सप्ततिपदं शाखान्तरे क्वचित् षट्सप्ततिपदानि सन्तीति प्रदर्शनार्थम्’-इति तद्वृत्तौ।

शक्नोमि। अतो मा मवजानतस्ते 'प्रजां' पुत्रादिरूपां 'पापिष्ठाम्' अतिशयेन दारिद्र्यादिहेतुयुक्तां करोमि। यस्त्वं मा मित्थम् 'असक्थाः' अभिभूतवानसि, तस्मात्तव शापो युक्त इत्येवं पितोवाच ॥

पितुः शापं लोकप्रसिद्ध्या दृढयति—"तस्मादाहुरभ्यग्नय ऐतशायना और्वाणां पापिष्ठा इति"-इति। यस्मात् पित्रा शापो दत्तः, 'तस्मात्' कारणात् तद्वृत्तान्ताभिज्ञा जना एव माहुः,—'और्वाणाम्' और्वगोत्रोत्पन्नानां पुरुषाणां मध्ये 'ऐतशायनाः' ऐतशस्य मुनेः सम्बन्धिनः 'अभ्यग्नयः' अभ्यग्निप्रमुखाः पुरुषाः 'पापिष्ठाः' अत्यन्तपापयुक्ता इति * ॥

ऐतशप्रलापस्य बाहुल्यं विधत्ते—"तं हैके भूयांसं शंसन्ति"-इति। 'तम्' ऐतशप्रलाप मभिज्ञाः केचिद्याज्ञिकाः अतिशयेन बहुलं शंसन्ति। तथाचाश्वलायन आह— "सप्ततिं पदान्यष्टादश वा"-इति (श्रौ० ८. ३. १४, १५.)॥

तत्र किञ्चिन्नियमं विधत्ते — "स न निषेधेद्यावत्कामं शंसेत्येव ब्रूयादायुर्वा ऐतशप्रलापः"-इति। 'सः' यजमान औत्सुक्येनैतशप्रलापं शंसन्तं ब्राह्मणाच्छंसिनं 'न निषेधेत्' माभूदयं प्रलाप इति निषेधं न कुर्यात्, किन्तु 'यावत्कामं' त्वदीयेच्छानुसारेण शंस इत्येव ब्रूयात्। अय मैतशप्रलापः आयुःस्वरूपः; तस्मादत्र प्रवर्त्तमानस्य निषेधनं न युक्तम् ॥

वेदनं प्रशंसति—"आयुरेव तद्यजमानस्य प्रतारयति य एवं वेद"-इति ॥

प्लुतेन पूज्यत्वं दर्शयति— "यद्देवैतशप्रलापा३ः"-इति ॥

---

* "तस्मादैतशायना आजानेय्याः सन्तो भृगूणां पापिष्ठाः"-इति साङ्ख्या० ब्रा० ३०.५।

प्रकारान्तरेण प्रशंसति— "छन्दसां हैष रसो यदैतशप्रलापश्छन्दस्स्वेव तद्रसं दधाति"–इति । योऽय मैतशप्रलापः, स एषः 'छन्दसां' वेदानां मध्ये 'रसः' सारः ; अत एव तच्छंसनेन 'छन्दस्सु' वेदेष्वेव रस मवस्थापयति॥

वेदनं प्रशंसति— "सरसैर्हास्य छन्दोभिरिष्टं भवति, सरसैश्छन्दोभिर्यज्ञं तनुते य एवं वेद"–इति । पूर्ववद् व्याखेयम् ॥

पुनरपि प्लुतेन पूज्यत्वं दर्शयति— "यद्वैवैतशप्रलापा३ः"–इति । 'उ' अपिचेत्यर्थः ॥

प्रकारान्तरेण प्रशंसति— "अयातयामा वा अक्षितिरैतशप्रलापोऽयातयामा मे यज्ञेऽसदक्षितिर्मे यज्ञेऽसदिति"–इति । योऽय मैतशप्रलापः, स 'यातयामत्वम्' असारत्वं, तद्वैपरीत्यात् 'अयातयामः' सारयुक्त इत्यर्थः । अत एव 'अक्षितिः' अक्षयफलहेतुः । तस्मान्मे यज्ञे प्रयोगोऽयम् 'अयातयामा' स्वतः सरसः अस्तु, तथा मे यज्ञे प्रयोगोऽयम् 'अक्षितिः' रसवदक्षय्यफलहेतुत्व मभिप्रेत्य शंसेत् ॥

तत्रैकस्मिन् पदेऽवसानं विधत्ते— "तं वा एत मैतशप्रलापं शंसति, पदावग्राहं यथा निविदम्"–इति । पदे पदे अवगृह्य यथा निविदं शंसति, तथैवैतशप्रलापं पदे पदे अवगृह्यावगृह्य शंसेत् ॥

अन्ते प्रणवं विधत्ते— "तस्योत्तमेन पदेन प्रणौति, यथा निविदः"–इति । निविदः पदानां शंसने चरमे पदे यथा प्रणवं करोति । तद्वदत्राप्युत्तमे पदे प्रणवं कुर्यात् ॥

ऐतशप्रलापं विधाय प्रवह्लिकाख्या ऋचो विधत्ते— "प्रवह्लिकाः शंसति ; प्रवह्लिकाभिर्वै देवान् असुरान् प्रवह्लयाथैना

नत्यायंस्तथैवैतद्यजमानाः प्रवह्लिकाभिरेवाप्रियं भ्रातृव्यं प्रवह्लयाथैन मति यन्ति”–इति। “विततौ किरणौ द्वौ”–इत्याद्याः षड्नुष्टुभः (ऋ० प० २.९.१–६.) प्रवह्लिकाख्याः। पुरा किलैताभिः ऋग्भिर्देवाः असुरान् ‘प्रवह्ल्य’ अमनस्कं प्रिय मुक्त्वा, ततस्तानसुरानतिक्रम्यागच्छन्। प्रवह्लनं निर्हृदयं सान्त्ववचन मित्युक्तवान्। अमनःपूर्वकेण प्रियवचनेन विरोधिनो ऽसुरान् वञ्चयित्वा तदीयदेश मतिक्रम्य गतवन्त इत्यर्थः। देवदृष्टान्तेन यजमानाना मपि तथैव भवति * ॥

तास्वृक्षु अर्द्धर्चे अवसानं विधत्ते— “ता अर्द्धर्चशः शंसति, प्रतिष्ठाया एव”–इति। अर्द्धर्चयोर्द्वित्वात् पादद्वयसाम्येन प्रतिष्ठात्वम् ॥

शाखान्तरगताः प्रवह्लिकाख्या ऋचो विधाय तथैव शाखान्तरगता आजिज्ञासेन्या ऋचो विधत्ते— “आजिज्ञासेन्याः शंसत्याजिज्ञासेन्याभिर्वै देवा असुरानाज्ञायाथैनानत्यायंस्तथैवैतद्यजमाना आजिज्ञासेन्याभिरेवाप्रियं भ्रातृव्य माज्ञायाथैन मति यन्ति; ता अर्द्धर्चशः शंसति, प्रतिष्ठाया एव”–इति। आकारोऽत्र अवशब्दार्थे वर्तते; आज्ञातु मवज्ञातु मिच्छा ‘आजिज्ञासा’, ता मर्हन्तीति तत्साधनीभूता ऋचः ‘आजिज्ञासेन्याः’ आज्ञायासुराणा मवज्ञां कृत्वेत्यर्थः। अन्यत्पूर्ववद् व्याख्येयम्। “इहेत्थ प्रागपागुदग्”–इति शाखान्तरपठितास्चतस्र ऋच आजिज्ञासेन्याः (ऋ० प० २. १०. १–४.) ॥

तासां शंसनं विधाय प्रतिराधाख्यस्य मन्त्रस्य शंसनं विधत्ते— “प्रतिराधं शंसति; प्रतिराधेन वै देवा असुरान् प्रतिराध्याथैना-

---

* ''आश्व० श्रौ० ८. ३. १८।

न्त्यायंस्तथैवैतद्यजमानाः प्रतिराधेनैवाप्रियं भ्रातृव्यं प्रतिराध्याथैन मति यन्ति"–इति। सूत्रे "भुगित्यभिगत इति त्रीणि पदानि"–इत्यादिना (आश्व० श्रौ० ८. ३. २२.) योऽयं मन्त्र उक्तः, सोऽयं 'प्रतिराधः' (ऋ० प० २. ११. १.)। विरोधिनां राधं समृद्धिं प्रतिबध्नाति, प्रतिराधत्वम्; 'असुरान् प्रतिराध्य' तदीयां समृद्धिं प्रतिबध्येत्यर्थः॥

प्रतिराधाख्यं शाखान्तरगतं मन्त्रं विधाय *, अतिवादाख्यं शाखान्तरगत मेव † मन्त्रं विधत्ते—"अतिवादं शंसत्यतिवादेन वै देवा असुरानत्युद्याथैनानत्यायंस्तथैवैतद्यजमाना अतिवादेनैवाप्रियं भ्रातृव्य मत्युद्याथैन मति यन्ति; त मर्धर्चशः शंसति प्रतिष्ठाया एव"–इति। "वीमे देवा अक्रंसत"–इत्याद्यनुष्टुप् शाखान्तरपठिता अतिवाद इत्युच्यते (ऋ० प० २. १२. १.)। विरोधिनां सत्कार मतिलङ्घ्याधिक्षेपरूपो वादः 'अतिवादः', तत्सामर्थ्यसाधनत्वात् ऋगप्यतिवाद इत्युच्यते। 'अत्युद्य' अतिक्रम्योक्त्वा, अधिक्षिप्येत्यर्थः। अन्यत् पूर्ववद् व्याख्येयम् ‡ ॥ ७ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां पञ्चमाध्याये
(त्रिंशाध्याये) सप्तमः खण्डः ॥ ७ (३२) ॥

---

*, † शाखान्तरगतमन्त्रस्य विधाने तत्स्वरूपज्ञानायैतद्ब्राह्मणे एव तत्पाठस्याप्यौचित्यम्, तथा पठ्यते चेह सर्वत्रैव। दृश्यते चानयोः पाठः परिशिष्टग्रन्थे कुन्तापाध्याये। आश्वलायनेनापि नायं प्रपठ्य विहितः, प्रत्युत प्रतीकग्रहणत एव (आश्व० श्रौ० ८. ३. २२, २३)। तदिमौ मन्त्रौ न शाखान्तरीयावित्यस्माकम्।

‡ "वीमे देवा अक्रंसतेत्यनुष्टुप्"–इति आश्व० श्रौ० ८. ३. २३, २४।

॥ अथ अष्टमः खण्डः ॥

देवनीथं शंसत्यादित्याश्च ह वा अङ्गिरसश्च स्वर्गे लोकेऽस्पर्द्धन्त वयं पूर्व एष्यामो वय मिति ते हाङ्गिरसः पूर्वे श्वः सुत्यां स्वर्गस्य लोकस्य ददृशुस्तेऽग्निं प्रजिघ्युरङ्गिरसां वा एको ऽग्निः परेह्यादित्येभ्यः श्वः सुत्यां स्वर्गस्य लोकस्य प्रब्रूहीति ते हादित्या अग्नि मेव दृष्ट्वा सद्यः सुत्यां स्वर्गस्य लोकस्य ददृशुस्तानेत्याब्रवीच्छ्वः सुत्यां वः स्वर्गस्य लोकस्य प्रब्रूम इति ते होचुरथ वयं तुभ्यं सद्यः सुत्यां स्वर्गस्य लोकस्य प्रब्रूमस्त्वयैव वयं होत्रा* स्वर्गं लोक मेष्याम इति स तथेत्युक्त्वा प्रत्युक्तः पुनराजगाम ते होचुः प्रावोचा३ः इति प्रावोच मिति होवाचाथो मे प्रति प्रावोचन्निति नो हि न प्रत्यज्ञास्था३ः इति प्रति वा अज्ञास मिति होवाच यशसा वा एषो ऽभ्येति य आर्त्विज्येन तं यः प्रतिरुन्धेद्यशः स प्रतिरुन्धेत् तस्मान्न प्रत्यरौत्सीति यदि त्वस्मादपोज्जिगांसेद्यज्ञेनास्मादपोदियात् यदि त्वयाज्यः† स्वय मपोदितं तस्मात् ॥ ८ (३४) ॥

---

* "होत्राः"-इति सविसर्गपाठः क-ख-ङ-पुस्तकेषु।

† अत्र विसर्गाभावः कादिषु षट्सु पुस्तकेषु।

अथ देवनीथाख्यं सप्तदशानां पदानां समूहं विधत्ते—"देवनीथं शंसति"–इति। सूत्रकारेण "आदित्या ह जरितरङ्गिरोभ्यो दक्षिणा मनयन्निति सप्तदश पदानि"–इति (आश्व० श्रौ० ८. ३. २५.) योऽयं पदसमूहो ऽभिहितः, स 'देवनीथः' (ऋ० प० २. १३. १–१७.); देवलोकनयनहेतुत्वात्॥

तं प्रशंसितु माख्यायिका माह—"आदित्याश्च ह वा अङ्गिरसश्च स्वर्गे लोके ऽस्पर्द्धन्त,— वयं पूर्व एष्यामो वय मिति; ते हाङ्गिरसः पूर्वे श्वः सुत्यां स्वर्गस्य लोकस्य ददृशुस्ते ऽग्निं प्रजिघ्युरङ्गिरसां वा एको ऽग्निः परेह्यादित्येभ्यः श्वः सुत्यां स्वर्गस्य लोकस्य प्रब्रूहीति; ते हादित्या अग्नि मेव दृष्ट्वा सद्यः सुत्यां स्वर्गस्य लोकस्य ददृशुस्तानेत्याब्रवीच्छ्वः सुत्यां वः स्वर्गस्य लोकस्य प्रब्रूम इति; ते होचुरथ वयं तुभ्यं सद्यः सुत्यां स्वर्गस्य लोकस्य प्रब्रूमस्त्वयैव वयं होत्रा स्वर्गं लोक मेष्याम इति; स तथेत्युक्त्वा प्रत्युक्तः पुनराजगाम"–इति। अदितेः पुत्राः 'आदित्याः' देवाः, 'अङ्गिरसः' महर्षयः; ते द्विविधाः स्वर्गे लोके सति परस्पर मस्पर्द्धन्त। तत्रादित्या एव मुक्तवन्तः,— वय मेव 'पूर्वे' प्रथमं प्रवृत्ताः सोमयाग मनुष्ठाय स्वर्गं मेष्याम इति। तथा अङ्गिरसोऽपि वय मेव 'पूर्वे' प्रथमं प्रवृत्ताः स्वर्गं गमिष्याम इत्यवोचन्। तदानीं 'ते' अङ्गिरसो महर्षयः 'पूर्वे' प्रथमं प्रवृत्ताः सन्तः स्वर्गस्य लोकस्य निमित्तभूतां 'सुत्यां' सोमाभिषवं 'श्वो ददृशुः' परेद्युः करिष्याम इति निश्चितवन्तः। निश्चित्य च 'ते' अङ्गिरसः आदित्यानां समीपे स्वकीय मग्निं 'प्रजिघ्युः' प्रहितवन्त इत्यर्थः। अङ्गिरसा मेव महर्षीणां मध्ये अग्निनामको महर्षिरेकोऽस्ति, तं प्रत्येव मुक्तवन्तः। हे अग्ने! त्वं 'परेहि' परागच्छ। आदित्यानां समीपे

गत्वा 'श्वः सुत्यां' परेद्युरस्माभिः करिष्यमाणं सोमयागं, स्वर्गस्य लोकस्य निमित्तभूतम्, आदित्येभ्यः प्रब्रूहि । हे आदित्याः ! परेद्युरङ्गिरसः सुत्यां करिष्यन्ति, यूय मागत्यार्त्विज्यं कुरुतेति कथयेत्यर्थः । 'ते' त्वादित्या दूरादागच्छन्त मग्निं दृष्ट्वैव तदभिप्राय मवगत्य भविष्यतस्तदीययज्ञात् पूर्व मेव स्वर्गस्य लोकस्य साधनभूतां 'सद्यः सुत्याम्' अद्यतनसोमयागं कर्मविशेषं 'ददृशुः' निश्चितवन्तः । तदानी मग्निः 'तान्' आदित्यान् 'एत्य' प्राप्येदं वचन मब्रवीत्,— हे आदित्याः ! स्वर्गस्य लोकस्य साधनभूतां मङ्गिरोभिः करिष्यमाणां श्वः सुत्यां 'वः' युष्मभ्यं 'प्रब्रूमः' अहं प्रब्रवीमि— यूय मागत्यार्त्विज्यं कुरुतेति । ततः 'ते' आदित्या अग्नि मूचुः । 'अथ' तद्वचनश्रवणानन्तरं वयं तुभ्यं ब्रूमः,— स्वर्गस्य लोकस्य साधनभूता सुत्या अस्माभिः सद्यः क्रियते ; तस्मादिदानी मागतेन त्वयैव 'होत्रा' आर्त्विज्यं कुर्वता सह वयं प्रथमतः स्वर्गं लोक मेष्याम इति । सोऽग्निस्तथेत्युक्त्वा 'प्रत्युक्तः' तैरादित्यैरुक्तं प्रतिवचनं प्राप्तः, स्वकीयाना मङ्गिरसां समीप माजगाम ॥

अङ्गिरसा मग्नेश्च परस्परं संवादं दर्शयति—"ते होचुः प्रावोचा३ः इति; प्रावोच मिति होवाचाथो मे प्रति प्रावोचन्निति ; नो हि न प्रत्यज्ञास्था३ः इति ; प्रति वा अज्ञास मिति होवाच"— इति । 'ते' चाङ्गिरसस्त मग्नि मूचुः,— हे अग्ने ! त्व मादित्याना मग्रे कि मस्मदीय मभिप्रायं प्रावोचाः ? इति । प्लुतिः प्रश्नार्था । सोऽग्निस्त मभिप्रायं प्रावोच मित्युक्त्वा पुनरप्येतदुवाच,—'अथ' अनन्तरं 'मे' मम 'प्रति प्रावोचन्' त आदित्याः प्रत्युत्तर मेव मुक्तवन्त इति । तदीया मुक्ति मनूदितवान् । ता मुक्तिं श्रुत्वा ते ऽङ्गिरस एवं पप्रच्छुः,— हे अग्ने ! 'नो हि न प्रत्यज्ञास्था३ः ?'

प्रतिज्ञान मार्त्विज्याङ्गीकारः, तन्निषेधो ऽनङ्गीकारः, तस्यापि निषेधः अवश्याङ्गीकारः ; किं मदीय मार्त्विज्यं परिहृत्य अङ्गीकृतवानसि ? प्लुतिः प्रश्नार्था । ततोऽग्निः अहं तत् 'प्रत्यज्ञास मेव' प्रतिज्ञा मङ्गीकारं कृतवानेवेत्युक्तवान् ॥

अङ्गिरसा मनभीष्टस्यापि स्वकीयार्त्विज्यस्याङ्गीकारे युक्तिं दर्शयति—"यशसा वा एषो ऽभ्येति, य आर्त्विज्येन ; तं यः प्रतिरुन्धेद् यशः स प्रतिरुन्धेत् ; तस्मान्न प्रत्यरौत्सीति"—इति । 'यः' पुमानार्त्विज्येन चरति, एष पुरुषो यशसैव युक्तः 'अभ्यैति' अभितः सञ्चरति । आर्त्विज्य मत्यन्तं यशस्कर मित्यर्थः । 'यः' पुमान् परेण प्रार्थित मार्त्विज्यं परित्यज्य 'तं' तदीययागं 'प्रतिरुन्धेत्' यागस्य प्रतिरोधं कुर्यात् , स पुमान् स्वकीयं यश एव 'प्रतिरुन्धेत्' विनाशयेत् । 'तस्मात्' कारणादहं 'न प्रत्यरौत्सि' तदीययज्ञस्य प्रतिरोधं न कृतवानस्मि, किन्त्वार्त्विज्यं मयाङ्गीकृत मिति ॥

तर्हि कीदृशे विषये परिहर्त्तव्य मार्त्विज्य मित्याशङ्क्य परिहारयोग्यं विषयं दर्शयति—"यदि त्वस्मादपोज्जिगांसेद्यज्ञेनास्मादपोदियाद् ; यदि त्वयाज्यः, स्वय मपोदितं तस्मात्"—इति । पूर्वत्रार्त्विज्यं परिहर्त्तु मशक्य मित्युक्तम्, तद्वैलक्षण्यार्थः 'तु'-शब्दः । यदि कथञ्चिद् 'अस्माद्' आर्त्विज्यात् 'अपोज्जिगांसेत्' अपेत्योद्गन्तु मिच्छेत्, तदानीं 'यज्ञेन' स्वकीयेन निमित्तभूतेन 'अस्माद्' आर्त्विज्याद् 'अपोदियात्' अपक्रम्योद्गच्छेद् । यस्मिन् दिने त्वं यज्ञं करिष्यसि, तस्मिन्नेवाह मपि करिष्यामीत्युक्त्वा तदार्त्विज्यं परिहर्त्तुं शक्यम् । एककालीनस्वकीयानुष्ठान मेकं परिहारनिमित्तम् । निमित्तान्तर मप्युच्यते— 'यदि तु' यदि कथञ्चिद् 'अयाज्यः' यागार्थी पुरुषः शास्त्रनिषेधाद्यष्टु मयोग्यः स्यात्,

तादृशादयाज्यात् पुरुषात् स्वकीय मार्त्विज्यं 'स्वय मपोदितं' शास्त्रेणैव निषिद्धम्; तादृशे विषये नास्त्यार्त्विज्यपरिहारे दोष इत्यर्थः ॥ ८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां पञ्चमाध्याये
(त्रिंशाध्याये) अष्टमः खण्डः ॥ ८ (३४) ॥

॥ अथ नवमः खण्डः ॥

ते हादित्यानङ्गिरसो ऽयाजयंस्ते॑भ्यो याजयद्भ्य॑ इमां पृथिवीं पूर्णां॑ दक्षिणाना मददुस्तां॑नियं प्रतिगृहीतातपत्तां॑न्यवृञ्जन्त्सा॑ (हि *) सिंही भूत्वा॑ विजृम्भती जनानचरत्त॑स्याः शोचत्या इमे प्रदरा॑ः प्रादीर्यन्त॑ ये ऽस्या इमे प्रदरा॑ः समेव हैव ततः पुरा॑ तस्मादा॑हुर्न निवृत्तदक्षिणां प्रतिगृह्णीया॑न्नेन्मा शुचा विद्धा शुचा विध्या॑दिति॑ यदि त्वेनां प्रतिगृह्णीयाद॑प्रियायैनां भ्रातृव्याय दद्यात्प॑रा हैव भवत्य॑थ योऽसौ तपतीँ३॑ एषो ऽश्वः श्वेतो रूपं कृत्वा॑श्वाभिधान्यपिहितेना॑त्मना प्रतिचक्राम इमं वो नयाम इति॑ स एष देवनीथो ऽनूच्यत॑ आदित्या ह जरित-

---

* "हि" नास्ति क-पुस्तकादन्यत्र।

रङ्गिरोभ्यो दक्षिणा मनयन् । तां ह जरितर्न प्रत्यायन्निति न हि त इमां प्रत्यायंस्ता मु ह जरितः प्रत्यायन्निति प्रति हि तेऽमु मायंस्तां ह जरितर्न प्रत्यगृभ्णन्निति न हि त इमां प्रत्यगृभ्णंस्ता मु ह जरितः प्रत्यगृभ्णन्निति प्रति हि तेऽमु मगृभ्णन्नहा नेतसन्न विचेतनानीत्येष ह वा अह्नां विचेतयिता जज्ञा नेतसन्न पुरोगवास इति दक्षिणा वै यज्ञानां पुरोगवी यथा ह वा इद मनो पुरोगवं रिष्यत्येवं हैव यज्ञो ऽदक्षिणो रिष्यति तस्मादाहुर्दातव्यैव यज्ञे दक्षिणा भवत्यप्यल्पिकाप्युत श्वेत आशु पत्वा । उतो पद्याभिर्जविष्ठः । उतेमाशु मानं पिपर्ति । आदित्या रुद्रा वसवस्त्वेळते । इदं राधः प्रतिगृभ्णीह्यङ्गिर इति प्रतिग्रह मेव तद्राधस ऐच्छन्निदं राधो बृहत्पृथु । देवा ददत्वा वरम् । तद्वो अस्तु सुचेतनम् । युष्मे अस्तु दिवे दिवे । प्रत्येव गृभायतेति प्रत्येवैन मेतदजगृभैषं तं वा एतं देवनीथं शंसति पदावग्राहं यथा निविदं तस्योत्तमेन पदेन प्रणौति यथा निविदः ॥ ८ (३५) ॥

योऽयं देवनीथः पूर्व मुक्तः, तस्य स्तुत्यर्थकथापि पूर्वं कियत्यपि दर्शिता; तं कथाशेषं देवनीथप्रतिपाद्यावगतिकामाय दर्शयति— “ते हादित्यानङ्गिरसो ऽयाजयंस्तेभ्यो याजयद्भ्य इमां पृथिवीं

पूर्णां दक्षिणाना मददुस्तानियं प्रतिगृहीतातपत्तान्यवृञ्जन्त्सा सिंही भूत्वा विजृम्भन्ती जनानचरत्; तस्याः शोचत्या इमे प्रदराः प्रादीर्यन्त; ये ऽस्या इमे प्रदराः, समेव हैव ततः पुरा"–इति। अङ्गिरसां मध्ये य एकोऽग्निः, सोऽय मादित्यानां यागे आर्त्विज्य मङ्गीचकार। त मङ्गीकार मनुसरन्तस्ते सर्वे अङ्गिरसो गत्वा तानादित्यानयाजयन्। याजयद्भ्यः 'तेभ्यः' अङ्गिरोभ्य ऋत्विग्भ्यः आदित्याः इमां पृथिवीं 'पूर्णां' चतुःसागरपरिवेष्टिताम् 'अददुः' दत्तवन्तः। कदा? दक्षिणाकाले इति शेषः। मध्यन्दिने हि सवने दक्षिणा नीयन्ते, तस्मिन् काले दक्षिणार्थं दत्ता च 'इयं' पृथिवी तैरङ्गिरोभिः प्रतिगृहीता सती, 'तान्' परिगृहीतॄन् 'अतपत्' तापयुक्तानकरोत्। तदानी मङ्गिरसः 'तां' पृथिवीं 'न्यवृञ्जन्' नितरां वर्जितवन्तः। तैरङ्गिरोभिः परित्यक्ता सा पृथिवी सिंहरूपयुक्ता भूत्वा 'विजृम्भन्ती' शिरः कम्पयन्ती, वेगेन धावन्ती, पुरतोऽवस्थितान् 'जनान्' 'अचरत्' अभक्षयत्। तदानीं भीत्या सर्वेषु जनेषु पलायितेषु 'शोचत्याः' क्षुधाग्निना सन्तापयुक्तायाः 'तस्याः' भूमेः 'इमे' अस्माभिर्दृश्यमानाः 'प्रदराः' रेखाकारा विदारणविशेषाः 'प्रादीर्यन्त' प्रकर्षेणाभवन्। 'अस्याः' भूमेः सम्बन्धिनो य इमे प्रदराः, सर्वैर्जनैस्तत्र तत्र दृश्यन्ते; ते सर्वे परितो भूमेरुपरि विदारणेन निष्पन्नाः; 'ततः' शोकात पुरा भूमिः समतलैवासीत्। 'इव-ह-एव'–इति निपातत्रयस[illegible]वधारणार्थः। तदानीं समतलत्वेन [illegible] विदारणरूपः कि[illegible]दा न कोऽप्यासीदित्यर्थः॥

अङ्गिरसां भूमिपरित्यागप्रसङ्गेन किञ्चिच्छास्त्रज्ञानं वचन मुदाहरति— "तस्मादाहुर्न निवृत्तदक्षिणां प्रतिगृह्णीयान्नेत्मा

शुचा विद्धा शुचा विध्यादिति"—इति। यस्मादङ्गिरोभिर्भूरूपदक्षिणा सर्वात्मना परित्यक्ता, तस्मादन्येऽपि शास्त्रज्ञा एव माहुः— 'निवृत्तदक्षिणां' केनापि कारणेन परित्यक्तां दक्षिणां पुनर्न प्रतिगृह्णीयात्। गोभूहिरण्यरूपादिदक्षिणा ऋत्विग्भिः स्वीकृता सती यदि किञ्चिद्दोषं दृष्ट्वा परित्यजेत्, तदानीं पुनरपि द्रव्यलोभेन तत्प्रतिग्रहं न कुर्यात्। केनाभिप्रायेणेति, सोऽभिधीयते— इयं दक्षिणा 'शुचा' शोकोपलक्षितेन दोषेण विद्धा सती, सा मपि 'शुचा' शोकोपलक्षितदोषेण विध्यात्; मैवं विध्यत्विति भीतो न प्रतिगृह्णीयात् ॥

प्रमादात्पुनः प्रतिग्रहे कर्त्तव्यं दर्शयति — "यदि त्वेनां प्रतिगृह्णीयादप्रियायैनां भ्रातृव्याय दद्यात्परा हैव भवति"—इति। पुनःप्रतिग्रहपक्षे प्रतिगृहीतां दुष्टां दक्षिणा मत्यन्तविरोधिने शत्रवे छद्मना दद्यात्। ततः शत्रुः पराभवत्येव ॥

प्रासङ्गिकं परिसमाप्य दक्षिणान्तरं दर्शयन्नुपाख्यानस्य देवनीथोपयोग माह —"अथ योऽसौ तपतीँ३ एषो ऽश्वः श्वेतो रूपं कृत्वाश्वाभिधान्यपिहितेनात्मना प्रतिचक्रम इमं वो नयाम इति; स एष देवनीथो ऽनूच्यते"—इति। 'अथ' अङ्गिरोभिः पृथिवीरूपदक्षिणायां परित्यक्तायां ततोऽनन्तरम्, अदितिपुत्राणां यजमानानां सङ्कल्पवशात् 'योऽसौ' मण्डलमध्ये सूर्य्यस्तपति, एषः 'प्रतिचक्रमे' सम्मुख माजगामेत्यर्थः। सानुनासिका प्लुतिः पूजार्था। 'असौ' मण्डलवर्त्ती पुरुषः तेजसा तपन्नपि भूमिवच्चित्तपीड़ातुल्यं सन्तापं न करोति, तस्मादस्य पूज्यत्वम्। सूर्य्यः केन रूपेणागच्छतीति, तद्रूप मुच्यते— लोके श्वेतोऽश्वो यादृग्रूपवान्, तादृशं रूपं कृत्वा, ततः 'अश्वाभिधान्यपिहितेन' अश्वस्य

बन्धनार्था रज्जुः 'अश्वाभिधानी', तया अपिहित आच्छादित आत्मा अश्वदेहः, तेन देहेन युक्तः सन्नागत इत्यर्थः। स्वसङ्कल्पितं त मश्वरूपं सूर्यं दृष्ट्वा, त आदित्या एव मब्रुवन्, हे अङ्गिरसः! 'वः' युष्माकम् 'इमम्' अश्वं नयामः दक्षिणात्वेन समर्थयामः। 'इति' यस्यां कथायां यो वृत्तान्तो ऽभिहितः, स एष देवनीथो भूत्वा वेदेनानूच्यते॥

तस्य देवनीथस्य सप्तदश पदानि ; तेषु प्रथमं पद माह—"आदित्या ह जरितरङ्गिरोभ्यो दक्षिणा मनयन्"–इति। आदित्याख्या यजमानाः पुरा 'जरितृभ्यः' स्तोतृभ्यः अङ्गिरोभ्यः भूरूपां दक्षिणाम् 'अनयन्' दत्तवन्तः॥

द्वितीयं पद मनूद्य व्याचष्टे—"तां ह जरितर्न प्रत्यायन्निति ; न हि त इमां प्रत्यायन्"–इति। 'जरितः!' जरितारः स्तोतारो अङ्गिरसः 'तां ह' तां तु पृथिवीरूपां दक्षिणां 'न प्रत्यायन्' नैव प्रतिगृहीतवन्तः। अस्मिन् पदे प्रोक्ताः 'ते' अङ्गिरसः 'इमां' भूमिं न प्रतिगृहीतवन्त इत्यर्थः। प्रसिद्ध इति 'ह'-शब्देन द्योतयति॥

तृतीयं पद मनूद्य व्याचष्टे—"ता मु ह जरितः प्रत्यायन्निति ; प्रति हि ते ऽमु मायन्"–इति। 'ता मु ह' ता मादित्यरूपां दक्षिणां 'जरितः प्रत्यायन्' स्तोतारः प्रतिगृहीतवन्तः। अस्मिन् (तस्मिन्?) पदे प्रोक्ताः 'ते' अङ्गिरसः 'अमुम्' आदित्यं प्रत्यायन्। निषेधोऽर्थः प्रसिद्धः (भूप्रतिग्रहनिषेधोऽर्थसिद्धः?)॥

द्वितीयपदार्थवैशद्याय प्रवृत्तं चतुर्थं पद मनूद्य व्याचष्टे—"तां ह जरितर्न प्रत्यगृभ्णन्निति ; न हि त इमां प्रत्यगृभ्णन्"–इति। पूर्ववद् व्याख्यानयोरर्थः स्पष्टः॥

तृतीयपदार्थवैशद्याय पञ्चमं पद मनूद्य व्याचष्टे—"ता मु ह जरितः प्रत्यगृभ्णन्निति ; प्रति हि ते ऽमु मगृभ्णन्"–इति । पूर्वपदवद् व्याख्यानयोरर्थौ विस्पष्टः ॥

षष्ठं पद मनूद्य व्याचष्टे— "अहा नेत सन्नविचेतनानीत्येष ह वा अह्नां विचेतयिता"–इति । हे अङ्गिरसः ! अयं सूर्यः सन् युष्माकं समीपेऽस्ति, तस्माद् 'अविचेतनानि' विशेषप्रकाशरहितानि 'अहा' तमोयुक्तान्यहानि 'नेत' न गच्छत । 'एषः' आदित्योऽह्नां विचेतयिता ॥

सप्तमं पद मनूद्य व्याचष्टे—"जज्ञा नेत सन्नपुरोगवास इति ; दक्षिणा वै यज्ञानां पुरोगवी, यथा ह वा इद मनो पुरोगवं रिष्यत्येवं हैव यज्ञो ऽदक्षिणो रिष्यति ; तस्मादाहुर्दातव्यैव यज्ञे दक्षिणा भवत्यप्यल्पिकापि"–इति । हे 'जज्ञाः' ज्ञानयुक्ताः, अङ्गिरसः ! अय मादित्यः सन् भवत्समीपे वर्त्तते, तस्माद् 'अपुरोगवासः' मार्गप्रदर्शकेन पुरोगामिना रहिता यूयं 'नेत' न गच्छत । अस्मिन् पदे पुरोगन्त्वर्थपेक्षा दर्शिता । यज्ञानां तु दक्षिणैव पुरोगवी । अत्र दृष्टान्तः— यथा ह वा इदम् 'अनो ऽपुरोगवं' बलीवर्दरहितं शकटं 'रिष्यति' विनश्यति । 'एवं हैव' अनेनैव प्रकारेण 'अदक्षिणः' दक्षिणारहितो यज्ञः 'रिष्यति' विनश्यति । तस्मात्कारणाद् याज्ञिका एव माहुः—द्रव्यहीनेनापि यजमानेन 'अल्पिकापि' अत्यन्तस्वल्पापि दक्षिणा यज्ञे दातव्या भवति ॥

अष्टमं पद माह—"उत श्वेत आशुपत्वा"–इति । 'उत' अपि तु हे अङ्गिरसः ! युष्माकं मयं श्वेतरूपोऽश्व आदित्यः 'आशुपत्वा' शीघ्रगामी ; तस्मादस्ति पुरोगन्तेत्यर्थः ॥

नवमं पद माह— "उतो पद्याभिर्जविष्ठः"–इति । 'उतो'

अपि च 'पद्याभिः' पादविक्षेपैर्हेतुभिः 'जविष्ठः' अयं सूर्य्योऽतिशयेन वेगवान् ॥

दशमं पद माह—"उते माशु मानं पिपर्त्ति"–इति। 'उत' अपि च 'ईम्' ईदृशं 'मानं' सत्कारम् 'आशु पिपर्त्ति' असौ सूर्य्यः शीघ्रं पूरयति ॥

एकादशं पद माह—"आदित्या रुद्रा वसवस्त्वेळते"–इति। हे सूर्य्य! आदित्याद्या देवगणाः 'त्वा' त्वाम् 'ईळते' स्तुवन्ति ॥

द्वादशं पद मनूद्य व्याचष्टे—"इदं राधः प्रति गृभ्णीह्यङ्गिर इति; प्रतिग्रह मेव तद्राधस ऐच्छन्"–इति। हे 'अङ्गिर' जातावेकवचनम्; अङ्गिरोऽभिधमहर्षिजाते! 'इदम्' अस्माभिर्दीयमानं 'राधः' सर्वसुखसाधक मादित्यरूपं धनम् 'प्रति गृभ्णीहि' दक्षिणारूपेण प्रतिगृहाणेति यदस्ति, तेन पदेन 'राधसः' सुखसाधनस्यादित्यस्य 'प्रतिग्रह मेव' स्वीकार मेव 'ऐच्छन्' अङ्गिरस इच्छन्ति स्म ॥

त्रयोदश पद माह— "इदं राधो बृहत्पृथु"–इति। 'इदम्' अस्माभिर्दीयमानं 'राधः' सुखसाधक मादित्यरूपं 'बृहद्' गुणैः प्रवृद्धम्, 'पृथु' स्वरूपेण विस्तृतम् ॥

चतुर्दशं पद माह— "देवा ददत्वा वरम्"–इति। 'देवाः' इन्द्राद्याः 'आ' समन्ताद् 'वरं' श्रेष्ठ मादित्यरूपं 'ददतु' प्रयच्छन्तु ॥

पञ्चदशं पद माह— "तद्वो अस्तु सुचेतनम्"–इति। हे अङ्गिरसः! 'वः' युष्माकं 'तत्' आदित्यस्वरूपं 'सुचेतनं' सुष्ठु प्रकाशक मस्तु ॥

षोडशं पद माह— "युष्मे अस्तु दिवे-दिवे"–इति। हे

अङ्गिरसः ! ‘दिवे-दिवे’ प्रतिदिनं तदादित्यस्वरूपं ‘युष्मे’ युष्मास्वेव तिष्ठताम् ॥

सप्तदशं पद मनूद्य व्याचष्टे— “प्रत्येव गृभायतेति ; प्रत्येवैन मेतदजग्रभैषम्”—इति *। हे अङ्गिरसः ! ‘प्रतिगृभायतैव’ अवश्य मादित्यरूपां दक्षिणां प्रतिगृह्णीतेति यत्पद मस्ति, ‘एतत्’ एतेन पदेन अङ्गिरसः एत मादित्यं दक्षिणारूपं ‘प्रत्यग्रभैषन्नेव’ अवश्यं प्रत्यग्रहीषुः ॥

देवनीथाख्यस्य पदसमूहस्य सप्तदशानि पदानि व्याख्याय तच्छंसनप्रकारविशेषं विधत्ते— “तं वा एतं देवनीथं शंसति, पदावग्राहं यथा निविदं ; तस्योत्तमेन पदेन प्रणौति यथा निविदः”—इति । ‘तं वा’ आदित्याह जरितरित्यादिकं प्रत्येव गृभायतेत्यन्तम्, ‘एतम्’ इदानी मुक्तं ‘देवनीथं’ निविद्दृष्टान्तेन ‘पदावग्राहं शंसति’ यथा निविदः पदे-पदे ऽवगृह्यावगृह्य शंसनम्, तद्वदत्राप्यवगन्तव्यम् । यथा च निविद उत्तमेन पदेन ‘प्रणवः’ ओँकारः, एव मत्रापि अन्तिमे पदे प्रणवो द्रष्टव्यः ॥ ९ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां पञ्चमाध्याये
(त्रिंशाध्याये) नवमः खण्डः ॥ ९ (३५) ॥

---

* यदिहेमानि देवनीथाख्यसप्तदशपदानि प्रपठ्य विहितानि, ततो ऽवगम्यते यस्याः शाखाया एतद्ब्राह्मण मैतरेयकं नाम, न तस्या मिमानि पठितानीति ; अस्मद्दृष्टसंहितापरिशिष्टे तु पठितान्येव । आश्वलायनेनापि प्रतीकग्रहणमात्रेणैवेमानि विहितानि (श्रौ॰ ८. ३. २५.) ।

॥ अथ दशमः खण्डः ॥

भूतेच्छदः शंसति भूतेच्छद्भिर्वै देवा असुरानुपासचन्तोतेव युद्धेनोतेव मायया तेषां वै देवा असुराणां भूतेच्छद्भिरेव भूतं छादयित्वाथैनानत्यायंस्तथैवैतद्यजमाना भूतेच्छद्भिरेवाप्रियस्य भ्रातृव्यस्य भूतं छादयित्वाथैन मति यन्ति ता अर्द्धर्चशः शंसति प्रतिष्ठाया एवाहनस्याः शंसत्याहनस्याद्वै रेतः सिच्यते रेतसः प्रजाः प्र जायन्ते प्रजाति मेव तद्दधाति ता दश शंसति दशाक्षरा विराळन्नं विराळन्नाद्रेतः सिच्यते रेतसः प्रजाः प्र जायन्ते प्रजाति मेव तद्दधाति ता न्यूङ्खयत्यन्नं वै न्यूङ्खो ऽन्नाद्रेतः सिच्यते रेतसः प्रजाः प्र जायन्ते प्रजाति मेव तद्दधाति दधिक्राव्णो अकारिष मिति दाधिक्रीं शंसति देवपवित्रं वै दधिक्रा इदं वा इदं व्याहनस्यां वाच मवादीत् तद्देवपवित्रेण वाचं पुनीते सानुष्टुब् भवति वाग्वा अनुष्टुप् तत्स्वेन छन्दसा वाचं पुनीते सुतासो मधुमत्तमा इति पावमानीः शंसति देवपवित्रं वै पावमान्य इदं वा इदं व्याहनस्यां वाच मवादीत्तद्देवपवित्रेणैव वाचं पुनीते ता अनुष्टुभो भवन्ति वाग्वा अनुष्टुप् तत्स्वेनैव छन्दसा वाचं पुनीते ऽव द्रप्सो

अंशुमती मतिष्ठदित्यैन्द्राबार्हस्पत्यं तृचं शंसति विशो अदेवीरभ्याचरन्तीर्बृहस्पतिना युजेन्द्रः ससाह इत्यसुरविशं ह वै देवानभ्युदाचार्य आसीत् स इन्द्रो बृहस्पतिनैव युजासुर्यं वर्ण मभि दासन्त मपाहंस्तथैवैतद्यजमाना इन्द्राबृहस्पतिभ्या मेव युजासुर्यं वर्ण मभि दासन्त मप घ्नते तदाहुः संशंसेत् षष्ठऽहा३न् न संशंसे३त् इति संशंसेदित्याहुः कथ मन्येष्वहःसु संशंसति कथ मत्र न संशंसेदित्यथो खल्वाहुर्नैव संशंसेत् स्वर्गो वै लोकः षष्ठ महरसमायी वै स्वर्गो लोकः कश्चिद्वै स्वर्गे लोके समेतीति स यत्संशंसेत् समानं तत्कुर्यादथ यन्न संशंसती३ तत् स्वर्गस्य लोकस्य रूपं तस्मान्न संशंसेद्यदेव न संशंसतीँ३ एतानि वा अत्रोक्थानि नाभानेदिष्ठो वालखिल्या वृषाकपिरेवयामरुत् स यत्संशंसेदपैव स एतेषु कामं राध्नुयादैन्द्रो वृषाकपिः सर्वाणि छन्दास्यैतशप्रलापस्तत्र स काम उपाप्तो य ऐन्द्रे जागतेऽथैन्द्र मैन्द्राबार्हस्पत्यं सूक्त मैन्द्राबार्हस्पत्या परिधानीया तस्मान्न संशंसेन्न संशंसेत् ॥ १० (३६) ॥

॥ इत्यैतरेयब्राह्मणे षष्ठपञ्चिकायां पञ्चमोऽध्यायः ॥५॥

अथ त्व मिन्द्र शर्मणियाद्यास्तिस्रोऽनुष्टुभो विधत्ते—"भूतेच्छदः शंसति"-इति। 'भूते' भूतिर्वैरिणा मैश्वर्यं छादयन्ति तिरस्कुर्वन्तीत्युदाहृता अनुष्टुभो 'भूतेच्छदः'॥

ताः प्रशंसति—"भूतेच्छद्भिर्वै देवा असुरानुपासचन्तोतेव युद्धेनोतेव मायया, तेषां वै देवा असुराणां भूतेच्छद्भिरेव भूतं छादयित्वाथैनानत्यायंस्तथैवैतद्यजमाना भूतेच्छद्भिरेवाप्रियस्य भ्रातृव्यस्य भूतं छादयित्वाथैन मति यन्ति"-इति। भूतेच्छन्नामधेयाभिरनुष्टुब्भिर्देवा असुरान् युद्धेन च मायया च 'उपासचन्त' समीपे समवेताः। 'उतेव'-इति निपातसमूहः समुच्चयार्थः। छद्मयुद्धेनासुरान् विनाशयितुं समागता इत्यर्थः। आगत्य च देवाः 'तेषाम्' असुराणां 'भूतम्' ऐश्वर्यं एताभिर्ऋग्भिराच्छाद्य, अनन्तरम् 'एनाम्' अतिक्रम्यागच्छन्। तथैवैतद्यजमाना अपि कुर्वन्ति *॥

तासा मृचा मर्द्धर्चावसानं विधत्ते— "ता अर्द्धर्चशः शंसति, प्रतिष्ठाया एव"-इति॥

अथ शाखान्तरे समाम्नाताः "यदस्या अंहुभेद्याः"-इत्याद्या ऋचः (ऋ० प० २.१५.१-८.) विधत्ते—"आहनस्याः शंसति"-इति। 'आहनस्याः' आहननं स्त्रीपुरुषयोः परस्परसंयोगः, तद्वत्प्रजोत्पत्तिहेतुत्वात् ऋचोऽप्याहनस्याः †॥

ता ऋचः प्रशंसति— "आहनस्याद्वै रेतः सिच्यते, रेतसः प्रजाः प्र जायन्ते; प्रजाति मेव तद्दधाति"-इति। आहनस्यं मिथुन मित्युक्तम्, स्पष्ट मन्यत्॥

---

* "त मिन्द्र शर्मरिणेति भूतेच्छदस्तिस्र एता अनुष्टुभः"-इति आश्व० श्रौ० ८. ३. २७।

† "यदस्या अंहुभेद्या इत्याहनस्याः"-इति आश्व० श्रौ० ८. ३. २८।

ऋक्सङ्ख्यां प्रशंसति—“ता दश शंसति; दशाक्षरा विराळन्नं विराळन्नाद्रेतः सिच्यते; रेतसः प्रजाः प्र जायन्ते; प्रजाति मेव तद्दधाति”–इति। स्पष्टोऽर्थः * ॥

षोड़शौकारान् विधत्ते— “ता न्यूङ्खयत्यन्नं वै न्यूङ्खो ऽन्नाद्रेतः सिच्यते, रेतसः प्रजाः प्र जायन्ते; प्रजाति मेव तद्दधाति”–इति। ‘ताः’ ऋचो ‘न्यूङ्खयति’ ओकारविशिष्टाः कुर्वन्ति †। न्यूङ्खस्यान्नहेतुत्वादन्नत्वम् ॥

ऋगन्तरं विधत्ते— “दधिक्राव्णो अकारिष मिति (सं० ४. ३९. ६.) दाधिक्रीं शंसति; देवपवित्रं वै दधिक्रा, इदं वा इदं व्याहनस्यां वाच मवादीत्, तद्देवपवित्रेण वाचं पुनीते”–इति। दधिक्रेतिशब्दयुक्तत्वादियं ‘दाधिक्री’। दधिक्राख्या देवता। ‘देवपवित्रं’ देवानां शोधकं वाक्यम्। तथा सति ‘व्याहनस्यां वाचं’ विशिष्टमैथुनयुक्तां तदङ्गभूतां वाचं यदवादीत् [इद मिति तस्य ग्राम्यवाक्यजातस्य विस्पष्टत्वेनाभिधानम्], ‘तत्’ सर्वं ग्राम्यवाक्यजात मसत्य मपि ‘वाचं’ वाचोच्चारित मनेन देवपवित्रेण ‘पुनीते’ शुद्धं करोति ॥

तस्या ऋचि छन्दः प्रशंसति— “सानुष्टुब् भवति ‡; वाग्वा अनुष्टुप्, तत् स्वेन छन्दसा वाचं पुनीते”–इति। वाग्देवतायाः

---

* यद्यप्यस्मद्दृष्टे ऋक्परिशिष्टे ऽष्टावेवाहनस्याः, पर मैतरेयकं नाम ब्राह्मणं यस्याः संहितायाः, तस्या दशैव स्युः। आश्वलायनेन तु आहनस्यानां विधान मुक्त्वा तत उत्तरं ताभिः सह शंसनीये ऽपरे ऽपि ऋचौ विहिते (८.३.२९,३०.), ते एव नवमदशमी आश्वलायनसंहितादीना मिति धेयम्।

† आश्व० श्रौ० ८. ३. ३१ सू० द्रष्टव्यम्।

‡ “दधिक्राव्णो अकार्षं मित्यनुष्टुप्”–इति आश्व० श्रौ० ८. ३. ३२।

अनुष्टुप्छन्दोऽभिमानित्वाद्वाचोऽनुष्टुप्त्वम्। अतस्तच्छन्दो वाचः स्वकीयं, तेन वाचं शोधयति ॥

ऋगन्तराणि विधत्ते— "सुतासो मधुमत्तमा इति पावमानीः शंसति"–इति। "सुतासः"–इत्याद्यास्तिस्रः (सं० ९. १०१. ४.) शुद्धिहेतुत्वात् पावमान्यः [*] ॥

ता ऋचः प्रशंसति— "देवपवित्रं वै पावमान्य इदं वा इदं व्याहनस्यां वाचमवादीत्तद्देवपवित्रेणैव वाचं पुनीते; ता अनुष्टुभो भवन्ति; वाग्वा अनुष्टुप्, तत्स्वेनैव छन्दसा वाचं पुनीते"–इति। पूर्ववद् व्याख्येयम् ॥

अन्यासामृचां तृचं विधत्ते—"अव द्रप्सो अंशुमतीमतिष्ठदित्यैन्द्राबार्हस्पत्यं तृचं (सं० ८. ९६. १३. [†]) शंसति"–इति ॥

इन्द्राबृहस्पतिदेवताकत्वं दर्शयितुं तृचस्यान्तिममर्धर्चं पठति —"विशो अदेवीरभ्याचरन्तीर्बृहस्पतिना युजेन्द्रः ससाह इति"–इति। 'अदेवीः' देवविरुद्धाः 'अभि' सर्वतः 'आचरन्तीः', 'विशः' आसुरीः प्रजाः सर्वाः 'युजा' सहकारिणा 'बृहस्पतिना' युक्तः 'इन्द्रः' 'ससाहे' तिरस्कृतवानित्यर्थः ॥

अस्यार्धर्चस्यार्थं प्रशंसति— "असुरविशं ह वै देवानभ्युदाचार्यमासीत्; स इन्द्रो बृहस्पतिनैव युजासुर्यं वर्णमभिदासन्तमपाहंस्तथैवैतद्यजमाना इन्द्राबृहस्पतिभ्यामेव युजासुर्यं वर्णमभिदासन्तमप घ्नते"–इति। 'असुरविशम्' असुरप्रजाः सैन्यरूपाः 'देवान्' इन्द्रादीन् 'अभि' लक्ष्य 'उदाचार्यं' उल्लङ्घनरूपमाचरणं कृत्वा तिरस्कृत्य 'आसीत्' देवसमीपे अवस्थिता। तदानीं 'सः' इन्द्रो

---

[*] "सुतासो मधुमत्तमा इति च तिस्रः"–इति आश्व० श्रौ० ८. ३. २२।

[†] "अव द्रप्सो अंशुमतीमतिष्ठदिति तिस्रः"–इति आश्व० श्रौ ८. ३. ३३।

बृहस्पतिनैव 'युजा' सहकारिणा युक्तः सन्, 'असुर्यम्' असुरसैन्यं 'वर्णं' विचित्रपताकादियुक्तम् 'अभिदासन्तं' देवोपक्षयहेतुम् 'अपाहन्' विनाशितवान्। देववद् यजमाना अपि तृचप्रतिपाद्याभ्याम् 'इन्द्राबृहस्पतिभ्याम्' एव युक्ताः 'असुर्यं वर्णं' बाधकं विचित्रम्. 'अभिदासन्तम्' उपक्षयहेतुं पापं विनाशयन्ति ॥

अथात्र प्र मꣳहिष्ठायेत्यादिना (सं० १. ५७. १.) प्राकृतेन वैकृतानां सम्भूय शंसनं विचार्य, पूर्वोत्तरपक्षाभ्यां निश्चिनोति— "तदाहुः संशंसेत् षष्ठेऽहा३न्, न संशंसे३त्? इति; संशंसेदित्याहुः; कथ मन्येष्वहस्सु संशंसति, कथ मत्र न संशंसेदित्यथो खल्वाहुर्नैव संशंसेत्, स्वर्गो वै लोकः षष्ठ महरसमायी वै स्वर्गो लोकः, कश्चिद्वै स्वर्गे लोके समेतीति; स यत्संशंसेत्समानं तत् कुर्यादथ यन्न संशंसतौँ३, तत् स्वर्गस्य लोकस्य रूपं; तस्मान्न संशंसेद्यदेव न संशंसताँ३"–इति। पूर्वाध्यायस्यान्तिमखण्डवद् व्याख्येयम् * ॥

संशंसनपक्षे दोषान्तरं दर्शयति— "एतानि वा अत्रोक्थानि नाभानेदिष्ठो वालखिल्या वृषाकपिरेवयामरुत् स यत्संशंसेदपैव स एतेषु कामं राध्नुयात्"–इति। नाभानेदिष्ठादीनि चत्वारि शिल्पानि यानि सन्ति, एतान्येवात्र षष्ठेऽहनि 'उक्थानि' प्रधानशस्त्राणि। तथा सति 'सः' पुमान् यदि प्राकृतेन "प्र मꣳहिष्ठाय"–इत्यनेन सम्भूय शंसेत्, तदानीं 'सः' पुरुषः 'एतेषु' प्रधानशस्त्रेषु 'कामं' फलम् 'अप राध्नुयाद्' विनाशयेत् ॥

एवं तर्हि प्र मꣳहिष्ठायेत्येतस्मिन्नैन्द्रे लभ्यः कामोऽत्र न लभ्येतेत्याशङ्क्याह— "ऐन्द्रो वृषाकपिः, सर्वाणि छन्दांस्यैतशप्रलापस्तत्र

---

* प०६. अ०४. ख०१०. ३५२, ३५३. ३५४ पृ० द्र० ।

स काम उपाप्तो य ऐन्द्रे जागते ऽथैन्द्र मैन्द्राबार्हस्पत्यं सूक्त मैन्द्राबार्हस्पत्या परिधानीया ; तस्मान्न संशंसेन्न संशंसेत्”–इति । ब्राह्मणाच्छंसिना शंसितव्यो योऽयं ‘वृषाकपिः’ सोऽय मैन्द्रः, ऐतशप्रलापश्च सर्वच्छन्दस्थानीयः ; तथा सति “प्र मꣳहिष्ठाय”–इत्यादिके इन्द्रदेवताके जगतीच्छन्दस्के यः कामोऽस्ति, स कामः ‘तत्र’ वृषाकपौ ऐतशप्रलापे च प्राप्तो भवति । ‘अथ’ अपि चेदम् “अव द्रप्सः”–इत्यादिकं (सं० ८. ९६. १३.) सूक्त मैन्द्राबार्हस्पत्यम्, अन्तिमा * परिधानीया चैन्द्राबार्हस्पत्या †; तत्रोभयत्रेन्द्रनिमित्तः काम उपाप्तो भवति । तस्मात् कारणात् प्राकृत मत्र सम्भूय न संशंसेत् । अभ्यासोऽत्राध्यायसमाप्त्यर्थः ॥ १० ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायां पञ्चमाध्याये
(त्रिंशाध्याये) दशमः खण्डः ॥ १० (३६) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये ‘वेदार्थप्रकाश’नामभाष्ये
ऐतरेयब्राह्मणस्य षष्ठपञ्चिकायाः पञ्चमाध्यायः ॥

---

* “तत्रत्यान्तिमा” झ ।

† “अच्छा न इन्द्र मिति (सं० १०. ४३. १.) नित्य मैकाहिकम्”–इति आश्व० श्रौ० ८. ३. ३४ ।

देवा ह वै त्रीणि(१)। देवा वै यज्ञं पञ्च(२)। आ त्वा वहन्त्वष्टौ(३)। यः प्लवः स्तोत्रियो दश(४)। शिल्पानि दश(५)॥ ६ *॥

देवा ह वा, असावि देवं, कस्त मिन्द्र, तदाहुर्यदास्मिन्, विश्वजिति षट्॥ ६ †॥

॥ इति षष्ठपञ्चिका समाप्ता॥

---

* २१३, २९१, २५७, ३०१, ३६० पृ० (३—५—८—१०—१०=३६ ख०)।

† २१९, २६५, ३२२, ३८१ पृ० (१०–१०–१०–६ = ३६ ख०) १ भा० २३२पृ० † द्र०।

[illegible] PHŒNIX UNION LIBRARY
12, Kalidas Sinha's Lane,
Calcutta.

BIBLIOTHECA INDICA :

A

Collection Of Oriental Works

PUBLISHED BY

THE ASIATIC SOCIETY OF BENGAL.

NEW SERIES, NOS. 895, 898, 903, 926, 930, 1145, 1146 & 1147.

THE AITAREYA BRAHMANA

OF THE RIG-VEDA,

WITH THE

COMMENTARY OF SAYANA ACHARYA.

EDITED BY

ACARYA SATYAVRATA SAMASRAMI,

Associate Member of the Asiatic Society of Bengal; Editor, Author, Commentator, Annotator, Compiler, Translator, & Publisher of differeut Vedic Works &c. &c.

VOL. IV.

CALCUTTA :
Printed by H. V. Chatterji, SATYA PRESS.
1906.

॥ ऐतरेयब्राह्मणम् ॥

(ऋग्वेदस्य)

भगवत्सायणाचार्यकृत-'वेदार्थप्रकाश'-नामभाष्ययुतम् ।

वङ्गदेशीयास्यायितिकसमितेरनुमत्या व्ययेन च,

सामश्रमिश्रीसत्यव्रतशर्म्मणा

यथामति संशोध्य सटीक्य च सम्पादितम् ।

॥ चतुर्थभागः ॥

(सप्तमाष्टमपञ्चिकात्मकः)

कलिकाता-राजन्वत्याम्
१८६२-संवत्समायां सत्ययन्त्रेण यत्नतो मुद्रितम् ॥

॥ अथ सङ्केताक्षर सूची ॥

अ० चि०	अभिधानचिन्तामणिः ।
आर्षानु० ···	आर्षानुक्रमणी ।
गो० ब्रा०···	गोपथब्राह्मणम् ।
प्रा० त० ···	प्रायश्चित्ततत्त्वम् ।
बृ० दे० ···	बृहद्देवता ।
ब्रह्माण्ड पु०	ब्रह्माण्डपुराणम् ।
भ० पु० ···	भविष्यपुराणम् ।
मार्क० पु०	मार्कण्डेयपुराणम् ।
लीला० ···	लीलावती ।
वा० ब्रा०	वाजसनेयब्राह्मणम् ।
शां० भा० ···	शाङ्करभाष्यम् ।

॥ अथ परिच्छेदसूची ॥

॥ अथ सप्तमपञ्चिका ॥

(२१) अथ प्रथमाध्यायः (सत्रिणां कार्यशेषवर्णनम्) ··· १
तत्र प्रथमः खण्डः (उपव्रतीयस्य पशोर्विभागः ··· १
(२२) अथ द्वितीयाध्यायः (सत्रिणां प्रायश्चित्तानि) ··· ८
तत्र प्रथमः खण्डः (आहिताग्नेर्मरणे प्रायश्चित्तानि) ८
अथ द्वितीयः खण्डः (अग्निहोत्रीदोहनप्रायश्चित्तानि)१४
अथ तृतीयः खण्डः (सान्नाय्यप्रायश्चित्तानि) ··· १६
अथ चतुर्थः खण्डः (अग्निहोत्रप्रायश्चित्तानि) ··· १९
अथ पञ्चमः खण्डः (अग्न्यपराधप्रायश्चित्तानि) २५
अथ षष्ठः खण्डः (अग्निदाहादौ प्रायश्चित्तानि) २८

अथ सप्तमः खण्डः (अश्रुविसर्जनादिप्रायश्चित्तानि) ३२

अथ अष्टमः खण्डः (आहिताग्नेः प्रायश्चित्तानि) ३५

अथ नवमः खण्डः (अपत्नीकाग्निहोत्रविचारः) ४४

अथ दशमः खण्डः (पौर्णमास्यादिविचारः) ... ४७

अथैकादशः खण्डः (अग्निहोत्रप्रायश्चित्तशेषाः) ५१

(३३) अथ तृतीयाध्यायः (राजसूये शौनःशेपाध्यायः) .. ५९

तत्र प्रथमः खण्डः (हरिश्चन्द्रोपाख्यानम्) ... ५९

अथ द्वितीयः खण्डः (,,) ... ६७

अथ तृतीयः खण्डः (,,) ... ७१

अथ चतुर्थः खण्डः (,,) ... ७९

अथ पञ्चमः खण्डः (,,) ... ८६

अथ षष्ठः खण्डः (,,) ... ९४

(३४) अथ चतुर्थाध्यायः (राजसूये याजमानाध्यायः) ... १०३

तत्र प्रथमः खण्डः (क्षत्रियस्य यज्ञाधिकारः) १०३

अथ द्वितीयः खण्डः (देवयजनयाचनम्) ... १०७

अथ तृतीयः खण्डः (इष्टापूर्त्तस्यापरिज्यानिः) ११०

अथ चतुर्थः खण्डः (तत्प्रशंसा) ... ११२

अथ पञ्चमः खण्डः (आहवनीयोपस्थानम्) ... ११६

अथ षष्ठः खण्डः (उत्तरोपस्थानम्) १२०

अथ सप्तमः खण्डः (दीक्षाया आवेदनम्) ... १२३

अथ अष्टमः खण्डः (यजमानभागप्राशनम्) ... १२६

(३५) अथ पञ्चमाध्यायः (राजसूये फलचमाध्यायः) ... १३१

तत्र प्रथमः खण्डः (विश्वन्तरोपाख्यानम्) ... १३१

अथ द्वितीयः खण्डः (,,) ... १३५

अथ तृतीयः खण्डः (क्षत्रियस्य हेयभक्ष्यास्त्रयः) १३७

अथ चतुर्थः खण्डः (क्षत्रियस्य भक्षो न्यग्रोधः) १४२

अथ पञ्चमः खण्डः (न्यग्रोधवर्णनम्) १४४

अथ षष्ठः खण्डः (औदुम्बरादिप्रशंसा) ... १४७

अथ सप्तमः खण्डः (फलचमसोन्नयादिप्रयोगः) १५२

अथ अष्टमः खण्डः (नाराशंसचमसस्य प्रयोगः) १५६

॥ अथ अष्टमपञ्चिका ॥

(३६) अथ प्रथमाध्यायः (राजसूये स्तोत्रशस्त्राध्यायः) ... १६४

तत्र प्रथमः खण्डः (प्रातस्सवनतृतीयसवनयोः) १६४

अथ द्वितीयः खण्डः (मरुत्वतीये निविद्धानीयं) १६८

अथ तृतीयः खण्डः (निष्केवल्ये निविद्धानीयं) १७४

अथ चतुर्थः खण्डः (माध्यन्दिनसवने) ... १७६

(३७) अथ द्वितीयाध्यायः (राजसूये पुनरभिषेकाध्यायः) १८२

तत्र प्रथमः खण्डः (अभिषेकसाधनानि) ... १८२

अथ द्वितीयः खण्डः (आसन्द्यारोहणप्रकारः) १८६

अथ तृतीयः खण्डः (अभिषेकप्रकारः) ... १९१

अथ चतुर्थः खण्डः (अभिषेकसाधनप्रशंसा)... १९८

अथ पञ्चमः खण्डः (आसन्द्या अवरोहप्रकारः) २०३

अथ षष्ठः खण्डः (दिगुपस्थानादि) २०९

अथ सप्तमः खण्डः (प्रपदमन्त्रादि) २११

(३८) अथ तृतीयाध्यायः (राजसूये ऐन्द्राभिषेकाध्यायः) २२३
तत्र प्रथमः खण्डः (ऐन्द्राभिषेकस्तुतिः) … २२३
अथ द्वितीयः खण्डः (ऐन्द्राभिषेकप्रकारः) … २२९
अथ तृतीयः खण्डः (ऐन्द्राभिषेकफलश्रुतिः) २३०
(३९) अथ चतुर्थाध्यायः (राजसूये अभिषेकाध्यायः) … २३७
तत्र प्रथमः खण्डः (शपथप्रकारोपदेशः) … २३७
अथ द्वितीयः खण्डः (चतुर्विधसम्भाराः) … २४०
अथ तृतीयः खण्डः (आसन्द्यादिसम्भाराः)… २४३
अथ चतुर्थः खण्डः (राजाभिषेकमन्त्रः) … २४८
अथ पञ्चमः खण्डः (अभिमन्त्रणादि) … … २४९
अथ षष्ठः खण्डः (अभिषेकदक्षिणादानादि) २५२
अथ सप्तमः खण्डः (महाभिषेकप्रशंसा) … २५७
अथ अष्टमः खण्डः (तत्रैव गाथोदाहृतिः) … २६३
अथ नवमः खण्डः (तत्रैव श्लोकोदाहृतिः) … २६७
(४०) अथ पञ्चमाध्यायः (राजसूये पुरोहिताध्यायः) … २७२
तत्र प्रथमः खण्डः (पुरोहितविधिः) … … २७६
अथ द्वितीयः खण्डः (पुरोहितप्रशंसा) … २७८
अथ तृतीयः खण्डः (तत्रैव मन्त्रोदाहरणम्) २८१
अथ चतुर्थः खण्डः (पौरोहित्ये योग्यायोग्यौ) २८५
अथ पञ्चमः खण्डः (ब्रह्मणः परिमरः) … २९०

॥ अथ याज्ञिकशब्दसूची ॥

शब्दः ... पृष्ठा

अग्निष्टोमः ४३

अग्निष्टोमसंस्थः ... १८०, १८१

अग्निहोत्रम् ४२, ४३

अग्निहोत्रहवणी २४, १०५

अग्निहोत्री १५

अग्न्याधेयम् ४२, ४३

अच्छावाकः ४

अजीतपुनर्वण्यम् ११४

अञ्जस्सवः ८८, ८९

अतिरात्रः ४३

अत्यग्निष्टोमः ४३

अद्रयः १५०

अधिश्रितम् १०

अधिषवणं (चर्म) १५०

अधिषवणे (फलके) ... १५०

अध्वर्युः ४

अनज्ञापुरुषः ४२

अनुख्याता १२१

अनुचरः (राथन्तरः) ... १६६

अनुमतिः ४९

अनुरूपम् १७१

अनूचानः १३४

अनूबन्ध्या ... १११, ११५, १२२, १८३

शब्दः ... पृष्ठा

अन्वाहार्यपचनः ५५, २७६

अपयत्यः २००

अपराजिता ... २०८, २११

अपरिज्यानिः ११५

अपाम्पतिः २००

अप्तोर्यामः ४३

अप्रतिरथं (सूक्तं) २१२

अप्सुमती २१

अभिमन्त्रणम् ... १८८, २४८, २५१

अभिमर्शः १५५

अभिमर्शनम् १५९

अभिवत् ... १७१, १७५

अभिषिञ्चनम् १९३

अभिषेकः २४९

अभिषेचनीयः ... ७८, ८१, ८८

अभ्युत्क्रोशनम् २४७

अरणी ३२

अवभृथः ८९, १८२

अव्रतः ४८

अव्रत्यम् २४

अशान्ता १९५

अष्टका ४२, ४३

अष्टाकपालः ... ... २७—४१

शब्दः ... ... पृष्ठा
अष्टातयानि १८५
असर्वपृष्ठाः १७९
असर्वस्तोमाः १७९
असुरयज्ञः २५
अहुतात् १२८
अहुतादः १०४

आखयाता १०१
आग्निवती २७
आग्नीध्रः ४
आग्नेयः (निगदः)... ... ५
आग्नेयी २७
आग्रयणम् ४२
आग्रयणस्थाली १५१
आग्रहायणी ४३
आतपवर्षाः ... १८४, २००, २४५
आत्रेयः ४
आदित्यस्थाली १५१
आधवनीयः १५१
आप्तोर्यामः ४२
आप्यायनम् १५४, १६०
आप्रीणनम ८१
आप्लावनम् ५७
आमावास्यम् ४२
आरोहणम् १८९, १९०, २२५, २२६
आश्वयुजी ४३
आश्विनी ३९
आसन्दी १५०, १८४, २००, २२६ २४५

शब्दः ... ... पृष्ठा
आस्तरणम् १८४
आहवनीयः ५६, २७६
आहिताग्निः ... ९—१३, ३५

इड़ापात्री २४६
इन्द्रनिहवः १६८
इन्द्राभिमन्त्रणम् २२८
इन्द्राभिषेकः २२९
इन्द्राभ्युत्क्रोशनम् २२७
इष्टम् १११
इष्टापूर्त्तम् १११

उक्थम् (द्विविधं)... ... १६७
उक्थ्यः ४२
उक्थ्यसंस्थः १७९
उक्थ्यस्थाली १५१
उग्रवत्सहस्वत् १७१
उत्सर्जनम् ८२
उदञ्चनम् ५१
उदवसानीया १२१, १८३
उदुम्बरशाखा १८४, २४५
उद्गाता ४
उद्वान् १६८
उद्वासनम् १३, ५७
उन्नयनम् २१
उन्नेता ४
उपगाता ४
उपचारहोमः २७८

शब्दः ... पृष्ठा

उपद्रष्टा १२३
उपरवाः १५०
उपला १०५
उपवसथः १०
उपवासः ४८
उपविगुल्फनम् ३
उपश्रोता १२३
उपस्थम् (आसनं) २०६
उपस्थानम् १०९, ११७, १२१, १२२
उपाकरणम् ८१
उपाधिः ४३
उपावसृष्टा १५
उभयसामा १६६
उलूखलम् १०५
उल्मुकमोचनम् ३२

ऊर्णापवित्रे १५०

ऋक्प्रतिगरः १००

एकविंशः (स्तोमः)... ... ... १८०

ऐकाहिकम् १६५
ऐकाहिकाः १७८
ऐन्द्रः २२५
ऐन्द्री २१४

ओजस्वत १७१

शब्दः ... पृष्ठा

ओजस्वत्यः २००

औदुम्बरी १८४, २४५
औपासनः (अग्निः) ... २१४

कपालम् १०५
करम्भः ३
कलिः ७५
कुहूः ५०
कूप्याः २००
कृतम् ७६
कृष्णाजिनम् १०५
क्षत्रायुधानि १०५
क्षत्रिययज्ञः १७६, १७९
क्षामवती २९
क्षेमः १९०

गाथा ९१
गाथाप्रतिगरः १००
गार्हपत्यः ५६, २७६
गृहपतिः ४
गृह्यः २१४
गौल्गुल्व्याः २०१
गौरिवीतं (सूक्तं)... ... १७१
ग्रहोक्थम् १६७
ग्रावस्तुत् ४
ग्रावाणः १५१

घृतम् २००

शब्दः ... पृष्ठा
चमसः १८४
चमसाः (दश) १५१, २५४
चमसाप्यायनम् १५५
चमसासादनम् १५८
चमसास्तरणम् १८७
चमसोन्नयनम् १५२
चातुर्मास्यानि ४२, ४३
चैत्री ४३

ज्योतिष्टोमः १८०, १८१

तनुमती ४०
तपस्वञ्जनद्वत्पावकवती ... ३५
तोक्मानि १८४, २००
त्रयोदशकपालः ४१
त्रिवृत् (ब्रह्म) १८०
त्रेता ७६
दर्शपूर्णमासौ ४२
दशपेयः ७८
दशापवित्रम् १५१
दीक्षावेदनम् १२४
दीक्षितः १२४
दृषत् १०५
दैवपुरोहितः २८२
दैवयजनम् १०८
दैवयजनयाच्ञा: १०८
दैवसोमः ५१
द्रोणकलशः १५०

शब्दः ... पृष्ठा
द्वादशकपालः ३८
द्वापरः ७६

धानाः २
धाय्या १७३
धाराग्रहाः १५०
ध्रुवस्थाली १५१
ध्रुवा १२७

नवान्नप्राशनम् ३५
नवेष्टिः ४२
नाराशंसचमसः... ... १५८
निगदः ४
नियोजनम् ८१
निरूढपशुबन्धः ४३
निर्दशः ६९
निविद्धानीयम् १७५
निवेश्यः २००
निष्कः २५४
निष्कैवल्यम् १७२
नेष्टा ४

पञ्चदशः (वज्र)... ... १८०
पञ्चमानवाः २७१
पञ्चमीनिः २७७, २७९
पत्नौ ४
पथिकृती ३४
पयः २००

शब्दः ... पृष्ठा
पयस्या २
परिप्लवा १५१
परिसरः २९१
परित्रापः २
पर्णशरः १२
पर्य्यग्निकरणम् ८१
पवमानः १६
पवमानीक्थम् १९७
पवित्रवती ३९
पशुबन्धः ४२
पशुयज्ञः ४२
पाकयज्ञसंस्थाः ४३
पाकयज्ञाः ४२
पात्री २४५, २४६
पादावनेजनम् २८९
पादावनेजनी २९०
पाद्यम् २८९
पार्वणः ४३
पितृयज्ञः ४२
पिष्टपात्री २४६
पुनरभिषेकः १८३
पुरोडाशः २, २७
पुरोडाशपात्री २४६
पुरोधा २७५
पुरोधातारः (त्रयः) ... २८७
पुरोनुवाक्या २७
पुरोहितः २७६
पुरोहिताः (त्रयः) ... २८७

शब्दः ... पृष्ठा
पुरोहितायतम् १२८
पूतभृत् १५१
पूर्त्तम् १११
पोता ४
पौर्णमास्यम् ४३
प्रतिगरिता १०१
प्रतिपत् (राथन्तरी) ... १६६
प्रतिपत् (बार्हती) ... १७२
प्रतिप्रस्थाता ४
प्रतिवेशः १५०
प्रतिहर्त्ता ४
प्रत्यभिमर्शः १५५, १६०
प्रत्यवरोहणम् २०५
प्रपदग ... २१४, २१७, २१९
प्रपदमन्त्रः ... २१६, २१७, २१८
प्रप्लावनम् ५७
प्रस्तोता ४
प्रायश्चित्तिः १३
प्रुष्वाः २००
[illegible]
फलके १५०
फलचमसः ... १३२, १५३, १६०
फलचमसीनयनम् १५३

बहस् २६४, २६९
बलिः ४२
बृहत्पृष्ठः १६६, १६७
बृहत्पृष्ठम् १७२

शब्दः	पृष्ठा
ब्रह्मणः परिमरः	२९३
ब्रह्मणी द्वारः (मट्)	२९८
ब्रह्मभागप्राशनम्	१२९
ब्रह्मा	४, १२८
ब्राह्मणः	१०४
ब्राह्मणायुधानि	१०५
ब्राह्मणस्पत्यः (प्रगाथः)	१६८
ब्राह्मणाच्छंसी	४
भायप्राशनम्	१२९
भारद्वाजम्	१७५
भिषक्	१२९
भंशनम्	२३
मधु	२००
मरीच्यः	२००
मरुत्वतीयः (प्रगाथः)	१९९
मरुत्वदिष्टिः	३४
महाभिषेकः	२१५, २५५, २५९—२६३
माध्यन्दिनपवमानः	१६६
मुसलम्	१०५
मैध्यः	६९, २५९—२६२, २६४, २६९
मैत्रावरुणः	४
यजमानभागः	१२७, १२९
यजमानभागप्राशनम्	१२९
यज्ञक्रतुः	७७
यज्ञगाथा	४२, २५९

शब्दः	पृष्ठा
यज्ञवेशसः	१३६
यज्ञायुधानि	१०५
यज्ञायुधी	१०६
याचनम् (यजुषा)	१०९
याज्या	२७
योगः	१९०
योगक्षेमः	१९०, २०८
राका	४९
राजन्यः	१०४
राजसूयः	७७
राथन्तरः (अनुचरः)	१६६
राथन्तरी (प्रतिपत्)	१६३
लोक्यम्	४६
वरः	२०६, २०७
वरुणेष्टिः	३९
वाजपेयः	४३
विकश्यपम्	१३२
विविचीष्टिः	२८
विशसनम्	८१
विश्वापर्णम्	१२२
विष्टरः	२८८
वीतीष्टिः	२७
वृन्दम्	३६९
वृषाकपिः	२००
वैमन्त्यः	२००

शब्दः पृष्ठा
वैश्याः १७४
वैश्वानरेष्टिः ३८
वैष्णवारुणी २२
व्यापन्नानि २१
व्याहृतयः १९५
व्रतपतीष्टिः ३४
व्रतप्रदः ४
व्रतभृदिष्टिः ३४
व्रत्यानि ३

शपथः २३९, २७२
शमिता ४
शम्या १०५
शस्त्राणि (द्वादश) ... ३, १८१
शान्तिवाचनम् ... २०२
शापनम् २३८
शासं (सूक्तं) ... २१२
शुचीष्टिः ३१
शूद्रः १०५
शूर्पम् १०५
शौद्रन्यायः ९१
शौनःशेपम् ९९
श्राद्धम् ४३
श्रावणी ४२
श्लोकः ... २६२, २६४, २६९
श्वःसुत्या (निगदः) ... ५

षोड़शिमान् ४२

शब्दः पृष्ठा
षोड़शी ४२
संवर्गेष्टिः ४१
संस्था ८८
सदस्यः ४
सप्तदशः (विशः) ... १८०
समारोपणम् ३२
समिदाधानम् २०७
समिष्टयजूंषि ... १११, ११५, १२२
सम्प्रत्तिः ६२
सम्भाराः ... १८४, २४१, २४५
सवनीयपशुः ३, ८१
सान्नाय्यम् १०, १७
सामप्रगाथः १७४
सारस्वत्यः २००
सिनीवाली ५०
सुत्याः ४३
सुत्यादिनानि ३
सुब्रह्मण्या ४
सुरभिमदिष्टिः ... ५०
सुराकंसम २०२, २५४
सुराभिमन्त्रणम ... २५६
सूर्यत्वचसः २००
सोमपीथः १३२, १३६, १४५, २५५
सोमसंस्थाः ४२
सौत्रामणी ४२
सौपर्णं (सूक्तं) ... २१२
स्खलनम् २३

शब्दः … पृष्ठा
स्तुतशस्त्राणि (त्रिंशत्) … १७९, १८०
स्तोत्राणि (द्वादश) … १८१
स्तोमाः (षट्) … १७८
स्थाली … … १५१
स्थालीपाकः … … ४२
स्फ्यः … … १०५
स्यन्दमानाः … … २००
स्रुक् … … २४

हविर्यज्ञसंस्थाः … … ४३

शब्दः … पृष्ठा
हविर्यज्ञाः … … ४२
हिरण्यकशिपुः … … १००
हिरण्यवदिष्टिः … … ३९
हुतात् … … १२८
हुतादः … … १०४
होता … … ४
होतुः शस्त्राणि (षट्) … ३
होत्रकाः … … ३
होत्रकाणां शस्त्राणि (षट्) ३
होत्राः … … १७८

॥ अथेहालोच्यस्थानसूची ॥

पृ०	पं०	पृ०	पं०	पृ०	पं०	पृ०	पं०	पृ०	पं०
२	२	२	९	९	२०	२०	९	३७	२०
४४	१०	४८	२	५१	१७	५२	१६	५९	५
५९	१८	५९	१९	६०	१	७२	११	७२	१८
७२	११	८६	१६	८७	७	८७	११	८७	१२
९४	९	९४	११	१०३	५	१०३	११	१०३	१२
११६	८	१२४	५	१३१	५	१३२	१९	१३७	१८
१३७	२१	१३८	५	१३८	११	१४१	२	१५३	५
१५८	६	१८२	९	१८७	१३	१९९	३क	१९९	३ख
१९९	१६	२०९	९	२१६	१	२२४	१६	२३०	१५
२३१	१	२३१	७	२३१	१३	२३१	२०	२३७	९
२४५	३	२५१	१	२५२	११	२५२	१२	२५२	१४
२५२	१५	२५३	२	२५३	१०	२५३	११	२५३	११
२५६	२२	२५८	१३	२५९	३	२६१	१७	२६४	२३
२६५	१३	२६८	५	२६८	१०	२६९	१३	२६९	१५
२७०	१३	२७०	१५	२७४	५	२७४	१७	२७५	६
२७८	१९	२८५	१८	२९०	१०	— २९२	१८.		

THE MIRZAPUR PHOENIX UNION LIBRARY
15, Bali... Lane
Calcutta

अथ

॥ ऐतरेयब्राह्मणम् ॥

॥ अथ सप्तमपञ्चिका ॥

(तत्र)

॥ खण्डैकात्मकः प्रथमाध्यायः ॥

॥ ॐ ॥ अथातः पशोर्विभक्तिस्तस्य विभागं वक्ष्यामो हनू सजिह्वे प्रस्तोतुः श्येनं वक्ष उद्गातुः कण्ठः काकुद्रः प्रतिहर्तुर्दक्षिणा श्रोणिर्होतुः सव्या ब्रह्मणो दक्षिणं सक्थि मैत्रावरुणस्य सव्यं ब्राह्मणाच्छंसिनो दक्षिणं पार्श्वं सांस मध्वर्योः सव्य मुपगातॄणां सव्योंसः प्रतिप्रस्थातुर्दक्षिणं दोर्नेष्टुः सव्यं पोतुर्दक्षिण * ऊरुरच्छावाकस्य सव्य आग्नीध्रस्य दक्षिणो बाहुरात्रेयस्य सव्यः सदस्यस्य सदञ्चानूकञ्च गृहपतेर्दक्षिणौ पादौ गृहपतेर्व्रतप्रदस्य सव्यौ पादौ गृहपतेर्भार्यायै व्रतप्रदस्यौष्ठ एनयोः साधारणो भवति तं गृहपतिरेव प्रशिंष्याज्जाघनीं पत्नीभ्यो हरन्ति तां ब्राह्मणाय दद्युः स्कन्ध्याश्च मणिकास्तिस्रश्च कीकसा ग्रावस्तुतस्तिस्रश्चैव

---

* "०र्दक्षिणा" ग, घ ।

कीकसा॑ अर्द्धञ्च वैकर्त्तस्योन्नेतु॑ रर्द्धञ्चैव वैकर्त्तस्य॑ क्लोमा च शमितु॑स्तद् ब्राह्मणाय दद्या॑द्यद्यब्राह्मण: * स्या॑च्छिर: सुब्रह्मण्यायै॑ य: श्वस्सुत्यां प्राह॑ तस्याजिन मिळा सर्वेषां॑ होतुर्वा॑ ता वा एता:॑ षट्त्रिंशत मेकपदा यज्ञं॑ वहन्ति॑ षट्त्रिंशदक्षरा वै बृहती॑ बार्हता: स्वर्गा लोका:॑ प्राणांश्चैव तत्॑ स्वर्गांश्च लोकानाप्नुवन्ति॑ प्राणेषु चैव तत्॑ स्वर्गेषु च लोकेषु॑ प्रतितिष्ठन्तो यन्ति॑ स एष: स्वर्ग्य: पशुर्य॑ एन मेवं विभजन्त्य॑थ ये ऽतो ऽन्यथा॑ तद्यथा सेळगा † वा पापकृतो वा॑ पशुं विमथ्नीरंस्तादृक्त॑त्तां वा एतां पशोर्विभक्तिं॑ श्रौत ऋषिर्देवभागो विदाञ्चकार॑ ता मु हाप्रोच्यैवास्मा॑ल्लोकादुच्चक्रा॑मत्ता मु ह गिरिजाय॑ बाभ्रव्यायामनुष्य: प्रोवाच॑ ततो हैना मेतदर्वाङ्॑ मनुष्या अधीयते ऽधीयते॑ ॥ १ ॥

॥ इत्यैतरेयब्राह्मणे सप्तमपञ्चिकायां प्रथमोऽध्याय: ॥

॥ श्रीगणेशाय नम: ॥

वर्णितं शस्त्रजातन्तु होतृहोत्रकगोचरम् ।
पशोरुपव्रतीयस्य विभागस्त्वथ कथ्यते ॥

आश्वलायन: सत्रिणां धर्मेष्वेव माह— "सुत्यासु हविरुच्छिष्टभक्षा एव स्यु:, धाना: करम्भ: परिवाप: पुरोळाश: पयस्येति ।

---

* ख-घ-ङ-च-पुस्तकेषु एवमादिषु विसर्गो लुप्त: ।

† "शैलगा" क, ख, घ, ङ।

तेषां यद्यत् कामयेरंस्तत् तदुप वि गुल्फयेयुः"–इति (श्रौ॰ १२, ८.३२,३३.)। प्राणधारणाय यथा पर्य्याप्यते, तथा हविःशेषस्याधिक्येन सम्पादनम् 'उपविगुल्फनम्' । एवं बहुविधान् हविःशेषभक्षानुक्त्वा पुनरप्यन्त एव सुवाच— "अपि वान्यत्र सिद्धं गार्हपत्ये पुनरधिश्रित्योपव्रतयेरन्नन्यान् वा पथ्यान् भक्षाना मूलफलेभ्य एतेन वर्त्तयेयुः पशुना च"–इति (श्रौ॰१२.८.३८–४१. *) 'अन्यत्र सिद्धं' गृहे पक्व मन्नं पुनरपि गार्हपत्ये सकृदवस्थाप्य 'उपव्रतयेरन्' उपभुञ्जीरन्। 'अन्यान् वा' लड्डुक-मण्डकादीन् 'भक्षान्' 'पथ्यान्' अजीर्णादिदोषरहितान्, मूलफलपर्य्यन्त मिच्छया स्वीकुर्युः। 'एतेन' सुत्यादिनेषु सन्निहितेन सवनीयपशुना च 'वर्त्तयेयुः' जीवनरूपां वृत्तिं सम्पादयेयुः। इत्येवं सवनीयपशुरूपस्य हविषः शेषभक्षणेन सत्रिणां जीवन मप्यभिहितम्। तस्मिन् पशौ कस्य को विभाग इति जिज्ञासायां तद्विभागकथनं प्रतिजानीते— "अथातः पशोर्विभक्तिस्तस्य विभागं वक्ष्यामः"–इति। 'अथ' होतृ-होत्रक-शस्त्रनिर्णयानन्तरम्†, यतः शस्त्राद्यनुष्ठायिनां सत्रिणां जीवनोपायो ऽपेक्षितः, 'अतः' कारणात् सवनीयस्य 'पशोः' विभक्तिः कथ्यते। विभक्तिशब्दस्यैव व्याख्यानं तस्येत्यादि ॥

---

* "तेषां व्रत्यानि,— पयो दीक्षासु, व्यतिनीय काल मुपसदां चतुर्थ मेकस्या दुग्धेन, तावदेव त्रिभिः स्तनैस्तावद् द्वाभ्या मेकेन तावदेव। सुत्यासु॰—॰गुल्फयेयुः। आशिरदुघो दध्ययं, सौम्यं वा विगुल्फं निवर्त्तयेयुरिति शौनको यावच्छरावं मन्येरन्। वैश्वदेव मेके, बार्हस्पत्य मेके, सर्वान् वानुसवनम्। अपि वा॰—॰पशुना च"–इति तदाद्यन्तपाठः (१–४१.)।

† २भा॰ १८४पृ॰ द्वादश शस्त्राणि— 'आज्यप्रउगे, निष्केवल्यमरुत्वतीये, वैश्वदेवाग्निमारुते इति होतुः शस्त्राणि षट्; तथा होत्रकाणा मपि षट्'–इति। 'प्रशास्ता ब्राह्मणाच्छंस्यच्छावाक इति शस्त्रिणो होत्रकाः'–इति आश्व॰ श्रौ॰ ५. १०. १०। विशेषतस्तु ३भा॰ २४८पृ॰ ॥ टीप्पन्यां द्रष्टव्यम्।

वक्ष्याम इति प्रतिज्ञातो यो विभागस्तं दर्शयति— "हनू सजिह्वे प्रस्तोतुः, श्येनं वक्ष उद्गातुः, कण्ठः काकुद्रः प्रतिहर्त्तुर्, दक्षिणा श्रोणिर्होतुः, सव्या ब्रह्मणो, दक्षिणं सक्थि मैत्रावरुणस्य, सव्यं ब्राह्मणाच्छंसिनो, दक्षिणं पार्श्वं सांस मध्वर्योः, सव्य मुपगातॄणां, सव्योऽंसः प्रतिप्रस्थातुर्, दक्षिणं दोर्नेष्टुः, सव्यं पोतुर्, दक्षिण ऊरुरच्छावाकस्य, सव्य आग्नीध्रस्य, दक्षिणो बाहुरात्रेयस्य, सव्यः सदस्यस्य, सदं चानूकं च गृहपतेर्, दक्षिणौ पादौ गृहपतेर्व्रतप्रदस्य, सव्यौ पादौ गृहपतेर्भार्यायै व्रतप्रदस्यौष्ठ एनयोः साधारणो भवति, तं गृहपतिरेव प्रशिंष्याज्जाघनीं पत्नीभ्यो हरन्ति, तां ब्राह्मणाय दद्युः; स्कन्ध्याश्च मणिकास्तिस्रश्च कीकसा ग्रावस्तुतस्, तिस्रश्चैव कीकसा अर्द्धं च वैकर्त्तस्योन्नेतुरर्द्धं चैव वैकर्त्तस्य, क्लोमा च शमितुस्तद्ब्राह्मणाय दद्याद्यद्यब्राह्मणः स्याच्छिरः सुब्रह्मण्यायै, यः श्वःसुत्यां प्राह तस्याजिन मिळा सर्वेषां होतुर्वा"–इति। जिह्वया सहितं हनुद्वयं प्रस्तोतुर्भागः। श्येनाकारं वक्ष उद्गातुर्भागः*। यः कण्ठः, यश्च 'काकुद्रः' काकुदं, तदुभयं प्रतिहर्त्तुर्भागः। श्रोणिः ऊरुमूलं, तदुभयं दक्षिण-सव्यरूपं क्रमेण होतुर्ब्रह्मणोर्भागः। ऊर्वधोभागः 'सक्थि', तच्चोभयं क्रमेण मैत्रावरुण-ब्राह्मणाच्छंसिनोर्विभागः। दक्षिणांसेन युक्तं दक्षिणं पार्श्वं मध्वर्योर्भागः। सव्यं पार्श्वमात्र मुपगातॄणां भागः। सव्यः अंसः प्रतिप्रस्थातुर्भागः। 'दोः' बाहुः, तच्चोभयं क्रमेण नेष्टृ-पोत्रोर्भागः। ऊरुद्वयं क्रमेण अच्छावाकाग्नीध्रयोर्भागः। सक्थिशब्देन अधोभागस्याभिहितत्वात् ऊर्द्ध्वभाग ऊरुशब्देन विवक्षितः। बाहुद्वयं क्रमेण आत्रेय-सदस्ययो-

---

* 'श्येन मस्य वक्षः'–इत्यादि १भा० २७२पृ० द्र०।

भागः । दोर्बाहुशब्दयोरर्थैक्येऽप्यधोभागोर्द्ध्वभागाभ्यां भेदो द्रष्टव्यः । सदानूकशब्दौ पूर्वाचार्यैर्व्याख्यातौ—

“अनूकं मूत्रवस्तिः स्यात्, सास्नेत्येके वदन्ति च ।
सदन्तु पृष्ठवंशः स्यादेतद् गृहपतेर्द्वयम्”–इति ।

यः पुमान् गृहपतेर्व्रतप्रदो भोजनदायी, तस्य दक्षिणौ पादौ भागः । गृहपतेर्या भार्या, तस्यै च व्रतप्रदो यः पुमान्, तस्यैव सव्यौ पादौ भागः । अत्र पुरोवर्त्तिनोः पादयोर्बाहुत्वेनाभिहितत्वात्, पाश्चात्याविव पादशब्देन विवक्षितौ । तत्रैकस्मिन्नपि दक्षिणे पादे द्विवचन मवयवापेक्षम् । एव मुत्तरत्रापि । योऽय मोष्ठः, सोऽयम् ‘एनयोः’ व्रतप्रदयोः ‘साधारणः’ भागो भवति । ‘तं’ भागं गृहपतिरेव ‘प्रशिंष्यात्’ तव अयं तव अय मिति विभज्य प्रदद्यात् । ‘जाघनीं’ पुच्छं पत्नीभ्यो ‘हरन्ति’ दद्युः ; ताश्च पत्न्यः ‘तां’ जाघनीं ब्राह्मणाय कस्मै चित् दद्युः । स्कन्धे भवाः ‘स्कन्ध्याः’, मणिसदृशा मांसखण्डा ‘मणिकाः’, एकस्मिन् पार्श्वे स्थिता मांसशलाकास्तिस्रः ‘कीकसाः’ ; मणिकाः कीकसाश्चेत्युभयं ग्रावस्तुतो भागः । इतरपार्श्वे स्थिताः तिस्रः कीकसाः ; ‘वैकर्त्तः’ प्रौढो मांसखण्डः, तस्यार्द्धं पूर्वोक्तकीकसात्रयं चोन्नेतुर्भागः । यत्तु वैकर्त्तस्येतरदर्द्धं, यश्च हृदयपार्श्ववर्त्ती क्लोमशब्दाभिधो मांसखण्डः, तदुभयं शमितुर्भागः । अयं शमिता यदि अ-ब्राह्मणः स्यात्, तदा स्वेन स्वीकृतं तदुभय मन्यस्मै ब्राह्मणाय दद्यात् । यच्छिरोऽस्ति, तत् सुब्रह्मण्याभिधानर्त्विजे दद्यात् । श्वस्सुत्येति निगदनाम *, तां चाग्नीध्रो ब्रूते । तथा चाश्वलायन आह—

---

* “आग्नेयी निगदस्तत्र गौतमीय मम आगच्छ रोहिताभ्यां बृहद्भानो धूमकेतो जातवेदो विचर्षण आङ्गिरस ब्राह्मणाङ्गिरसब्रुवाणेति प्राक् सुत्यादेशात्”–इति लाट्या० श्रौ० १.४ ।

"आग्नीध्रः खस्सुत्यां प्राह"–इति (श्रौ०१२.९.१४.)। 'अजिनं' चर्म, तस्याग्नीध्रस्य भागः। 'इळा' सवनीयपशोः सम्बन्धी योऽय मिळाभागः, स सर्वेषां साधारणः; यद्वा होतुरसाधारणः * ॥

उक्तानां पशुविभक्तीनां सङ्ख्यां प्रशंसति— "ता वा एताः षट्त्रिंशत मेकपदा यज्ञं वहन्ति; षट्त्रिंशदक्षरा वै बृहती, बार्हताः स्वर्गा लोकाः; प्राणांश्चैव तत् स्वर्गांश्च लोकानाप्नुवन्ति; प्राणेषु चैव तत् स्वर्गेषु च लोकेषु प्रतितिष्ठन्तो यन्ति"–इति। 'ता वै' हन्वादय इळान्ताः श्रुत्या उक्ताः, अस्माभिरपि दृश्यमानाः 'षट्त्रिंशतं' षट्त्रिंशत्-सङ्ख्याकाः 'एकपदाः' हनुः जिह्वेत्येव मेकैकेन पदेन अभिधीयमानाः पशुविभक्तयो 'यज्ञं वहन्ति' यज्ञस्य निर्वाहं कुर्वन्ति। सङ्ख्या चेयं पूर्वाचार्यैर्व्याख्याता—

"तत्र पादौ द्वौ तौ द्वावन्यौ द्वात्रिंशदेव हि।
हन्वादि इळान्त मुक्तं षट्त्रिंशद्भक्तयः पशोः"–इति।

अतः सङ्ख्यासाम्यादियं विभक्तिः बृहतीरूपा; स्वर्गलोकाश्च बृहत्या सम्पादयितुं शक्यत्वात् 'बार्हताः'। 'तत्' तेन पशुविभागेन सत्रिणः प्राणान् स्वर्गलोकानपि प्राप्नुवन्ति। पश्ववयवानां प्राणाधारत्वात् तेन विभागेन सत्रिणो ऽस्मिन् जन्मनि प्राणेषु प्रतिष्ठिता वर्त्तन्ते, जन्मान्तरेषु बृहतीद्वारा स्वर्गेषु लोकेषु प्रतिष्ठिता वर्त्तन्ते ॥

पशुं प्रशंसति— "स एषः स्वर्ग्यः पशुर्य एन मेवं विभजन्ति"–इति। 'ये' सत्रिणः 'एनं' पशुं 'एवम्' उक्तेन प्रकारेण विभक्तं

'परसम्बोधनार्थमन्त्रा निगदाः'–इति निगदमन्त्रलक्षणम्। तद्विचारस्तु मीमांसायां द्रष्टव्यः। जै० द० २.१. ३८–४५ सू०, १३ अधि०।

* ऋत्विजां परिचयः आश्व० श्रौ० ४.१. ३–८, ३भा० २१५पृ० † द्रष्टव्यः।

कुर्वन्ति, तेषां सत्रिणां स एषः पशुः 'स्वर्ग्यः' स्वर्गाय हितो भवति * ॥

प्रकारान्तरेण विभागं निन्दति— "अथ येऽतोन्यथा तद्यथा सेळगा वा पापकृतो वा पशुं विमथ्नीरंस्तादृक्तत्"-इति । 'अथ' उक्तविभागप्रशंसानन्तरम्, इतरनिन्दोच्यत इति शेषः । 'ये' सत्रिणः 'अतः' पूर्वोक्तविभागात् 'अन्यथा' प्रकारान्तरेण, विभजन्त इत्यनुवर्त्तते ; 'तत्' तेषां निदर्शन मुच्यते । इळाशब्देन अन्न मुच्यते, तेन सह वर्त्तत इति 'सेळः' अन्नबहुलो देशः, तं गच्छन्तीति 'सेळगाः', विहितकर्माननुष्ठायिनः केवलोदरपोषणपरायणा इत्यर्थः ; 'पापकृतः' प्रतिषिद्धकर्मकारिणः ; ते च द्विविधाः यथा पशुं 'विमथ्नीरन्' केवलं मांसभक्षणार्थ मेव हन्युः ; तादृगेव 'तत्' अन्यथा विभजनं द्रष्टव्यम् ॥

उक्तं पशुविभागं तद्द्रष्टृमहर्षिद्वारा प्रशंसति— "तां वा एतां पशोर्विभक्तिं श्रौत ऋषिर्देवभागो विदाञ्चकार ; ता मु हाप्रोच्यैवास्माल्लोकादुच्चक्रामत्"-इति । 'ता मेतां' पूर्वोक्तां पशुविभक्तिं श्रुतनामकस्य † मुनेः पुत्रो देवभागाख्यो महर्षिः 'विदाञ्चकार' ज्ञातवान् । 'ता मु ह' ता मेव स्वेन ज्ञातां विभक्तिम् 'अप्रोच्यैव' रहस्यविद्येति मत्वा कस्मै चिदप्यकथयित्वैव अस्मात् लोकात् 'उच्चक्रामत्' उत्क्रान्तवान्, मृत इत्यर्थः ॥

कथं तर्हि तत्सम्प्रदायः ? इत्याशङ्क्याह— "ता मु ह गिरिजाय बाभ्रव्यायामनुष्यः प्रोवाच, ततो हैना मेतदर्वाङ् मनुष्या अधीयतेऽधीयते"-इति । 'ता मु ह' ता मेव पशु-

---

* 'श्वःसुत्यायां पशुं०—०अशितव्यं चैव लीप्सितव्यं च'-इति १भा० २५२पृ० ।

† 'श्रुतर्षिं'-इति ऋ० सं० १०, ४७, ३ ; तै० ब्रा० २, ५, ६, १ ।

विभक्तिम् 'अमनुष्यः' मनुष्यव्यतिरिक्तः, कश्चिद् गन्धर्वादिः 'बाभ्रव्याय' बभ्रोरपत्याय गिरिजनामकाय * महर्षये प्रोवाच । 'एतदर्वाङ् मनुष्याः' एतस्माद् गिरिजाख्यात् महर्षेरर्वाचीनाः सर्वे मनुष्याः 'ततः' तस्य गिरिजाख्यस्य सकाशात् 'एनां' पशुविभक्तिमधीयते । पदाभ्यासोऽध्यायसमाप्त्यर्थः ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां प्रथमाध्याये
(एकत्रिंशाध्याये) प्रथमः खण्डः † ॥ १ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमार्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'–नामभाष्ये
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायाः प्रथमोऽध्यायः ॥

---

* "गिरिना एवयामरुत्"–इति ऋ० सं० ५. ८७. १ ।

† एष खण्डस्तद्धृतो यथावदाश्वलायनीयश्रौतसूत्रे (१२. ९. १--१८.) ।

॥ अथ द्वितीयाध्यायः ॥

(तत्र)

॥ प्रथमः खण्डः ॥

तदाहुर्य आहिताग्निरुपवसथे म्रियेत कथ मस्य यज्ञः स्यादिति नैनं याजयेदित्याहुरनभिप्राप्तो हि यज्ञं भवतीति तदाहुर्य आहिताग्निरधिश्रिते ऽग्निहोत्रे सान्नाय्ये वा हविष्षु वा म्रियेत का तत्र प्रायश्चित्तिरित्यचैवैनान्यनुपर्यादध्याद् यथा सर्वाणि सन्दह्येरन्त्सा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निरासन्नेषु हविष्षु म्रियेत का तत्र प्रायश्चित्तिरिति याभ्य एव तानि देवताभ्यो हवींषि गृहीतानि भवन्ति ताभ्यः स्वाहेत्येवैनान्याहवनीये सर्वहुन्ति जुहुयात्सा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निः प्रवसन्म्रियेत कथ मस्याग्निहोत्रं स्यादित्यभिवान्यवत्सायाः पयसा जुहुयादन्यदिवैतत्पयो यदभिवान्यवत्साया अन्यदिवैतदग्निहोत्रं यत्प्रेतस्यापि वा यत एवं कुतश्च पयसा जुहुयुरथाप्याहुरेव मेवैनानजस्रानजुह्वत इन्धीरन्ना शरीराणा माहर्तोरिति यदि शरीराणि न विद्येरन् पर्णशरः षष्टिस्त्रीणि च शतान्याहृत्य तेषां पुरुषरूपक

मिव कृत्वा॑ तस्मिंस्ता मावृतं कुर्यु॑रथैनाञ्छरीरै *-राहृतैः॑ संस्पर्श्योद्वासयेयु॑रध्यर्द्धशतं कार्ये॑ सक्थिनी द्विपञ्चाशे च विंशे॑ चोरू द्विपञ्चविंशे शेषं तु शिरस्युपरि दध्या॑त्सा तत्र प्रायश्चि॑त्तिः ॥ १ (२) ॥

सत्रिणां वर्णितं कार्यं प्रायश्चित्तं ब्रवीत्यथ ।
चोद्योत्तरप्रकारेण सुस्पष्ट मिति गृह्यताम् ॥

तत्र प्रथमे चोद्योत्तरे दर्शयति— "तदाहुर्य आहिताग्निरुपवसथे म्रियेत, कथ मस्य यज्ञः स्यादिति ; नैनं याजयेदित्याहुरनभिप्राप्तो हि यज्ञं भवतीति"–इति । तत्र यज्ञवैकल्यविषये केचिद् ब्रह्मवादिनः पृच्छन्ति— 'यः' पुमान् आहिताग्निः सन् उपवसथाख्ये सुत्यादिनात् पूर्वदिने म्रियेत, अस्य यज्ञः कथं प्रवर्त्तते ? इति प्रश्नः । तस्येद मुत्तरम्— 'एनं' मृतं न याजयेदित्यभिज्ञा आहुः । तत्रेय मुपपत्तिः— सुत्याया अनुपक्रान्तत्वादयं यज्ञ मनभिप्राप्त एव भवति ; तस्माद् यागो न युक्तः ॥

द्वितीये प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निरधिश्रितेऽग्निहोत्रे सान्नाय्ये वा हविष्षु वा म्रियेत, का तत्र प्रायश्चित्तिरित्यत्रैवैनान्यनुपर्यादध्याद् यथा सर्वाणि सन्दह्येरन्त्सा तत्र प्रायश्चित्तिः"–इति । 'अग्निहोत्रे' तत्साधनभूते पयसि कार्यार्थं वह्नावधिश्रिते सति, तथा 'सान्नाय्ये' दर्शपूर्णमासार्थे क्षीरे अधिश्रिते सति, तथा 'हविष्षु' पुरोडाशादिषु अधिश्रितेषु, यजमानस्य मरणे किं प्रायश्चित्तम् ? इति प्रश्नः । प्रायो नाशस्तस्य चित्तं समाधानम् । 'अत्रैव' यजमानदहनदेशे एव 'एनानि' क्षीरादीनि 'अनु-

---

* सर्वेष्वेव पुस्तकेषु "०रथैनांच्छरीरै०"–इत्येव पाठो लिपिकरप्रमादादिजन्य एव ।

पर्यादध्यात्' यजमान मनु परितः प्रक्षिपेत् । येन प्रकारेण सर्वाणि तानि यजमानेन सम्भूय दह्येरन् , तथा प्रक्षिपेत् । 'सा' तादृशी क्रिया 'तत्र' दोषे प्रायश्चित्तिः भवति ॥

तृतीये प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निरासन्नेषु हविष्षु म्रियेत, का तत्र प्रायश्चित्तिरिति ; याभ्य एव तानि देवताभ्यो हवींषि गृहीतानि भवन्ति, ताभ्यः स्वाहेत्येवैनान्याहवनीये सर्वहुन्ति जुहुयात् ; सा तत्र प्रायश्चित्तिः"–इति । 'हविष्षु' पुरोडाशादिषु वेद्या मासन्नेषु यजमानमरणे, याभ्यो देवताभ्यः पूर्वं तानि हवींषि उपक्रान्तानि, 'ताभ्यः' तद्देवतानामानि चतुर्थ्यन्तानि उच्चार्य स्वाहेत्यनेनैव मन्त्रेण 'एनानि' हवींषि 'सर्वहुन्ति' निःशेषेण यथा सर्वाणि हुतानि भवन्ति तथा आहवनीये जुहुयात् ॥

चतुर्थे प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निः प्रवसन् म्रियेत, कथ मस्याग्निहोत्रं स्यादित्यभिवान्यवत्सायाः पयसा जुहुयादन्यदिवैतत्पयो यदभिवान्यवत्साया अन्यदिवैतदग्निहोत्रं यत्प्रेतस्य"–इति । अग्निहोत्रं भार्यासमीपे स्थाप्य ग्रामान्तरे 'प्रवसन्' ततः स यदि म्रियेत, तदानीं स्वगृहे पुत्रादिः 'अभिवान्यवत्सायाः पयसा अग्निहोत्रं जुहुयात्' । 'वा गतिगन्धनयोः'-इतिधातोरभिपूर्वस्य 'अभिवा'–इति रूपम् ; अन्यश्चासौ वत्सश्च 'अन्यवत्सः'; अभिप्राप्तोऽन्यवत्सो यस्या गोः, सेयम् 'अभिवान्यवत्सा' ; पोषणादिप्रकारेण उपस्थितेत्यर्थः । एतादृश्या अभिवान्यवत्सायाः यत्पयोस्ति, एतद् 'अन्यदिव' दैनन्दिनाग्निहोत्रीयपयसः सकाशात् अन्यदेवैतद्द्रव्यम् ; प्रेतस्यापि यदग्निहोत्रम् , 'एतत् अन्यदिव' एतत् नित्याग्निहोत्रादन्यदेव कर्मान्तरम् ; तत्समानधर्मकं पुत्रादि-

कर्त्तृकम् ; अतः प्रेतस्याधिकाराभावेऽपि पुत्रादेरधिकारसद्भावात् अनुष्ठान मुपपद्यते इत्यर्थः [*] ॥

तत्रैव पक्षान्तर माह— "अपि वा यत एव कुतश्च पयसा जुहुयुः"–इति। अभिवान्यवत्साया इति नियमो नास्ति, किन्तु 'यतः कुतः' यस्याः कस्याश्चिद्गोः पयसा पुत्रादयो जुहुयुरिति [†] ॥

पुनरपि पक्षान्तर माह— "अथाप्याहुरेव मेवैनानजस्रानजुह्वत इन्धीरन्ना शरीराणा माहर्तोः"–इति। अपि च अन्ये याज्ञिकाः पक्षान्तर माहुः। देशान्तरे मृतस्य प्रेतस्य 'शरीराणाम्' अस्थ्यादिप्रेतावयवानाम् 'आ आहर्त्तोः' आहरणपर्यन्तम् 'एनान्' आहवनीयादीन् त्रीनग्नीन् 'अजस्रान्' उपशमरहितान् 'अजुह्वतः' होमरहितान् 'एव मेव' असमाप्तेनैव प्रकारेण 'इन्धीरन्' प्रज्वालयेयुरिति। होमाभावेऽपि त्रयोऽप्यग्नयो यथा नोपशाम्यन्ति, तथा प्रेतास्थिसमानयनपर्यन्तं प्रज्वालयेदित्यर्थः ॥

प्रेतास्थिविनाशे किं कर्त्तव्य मित्याशङ्क्याह— "यदि शरीराणि न विद्येरन्, पर्णशरः षष्टिस्त्रीणि च शतान्याहृत्य तेषां पुरुषरूपक मिव कृत्वा तस्मिंस्ता माहृतं कुर्युरथैनाञ्छरीरैराहृतैः संस्पर्श्योद्वासयेयुः"–इति। यदि कथञ्चित् 'शरीराणि' अस्थ्यादीनि 'न विद्येरन्' विनश्येयुः, तदा 'पर्णशरः' पलाशवृक्षस्य छिन्नान् वृन्तान् षष्ट्युत्तरशतत्रयसङ्ख्याकानाहृत्य, 'तेषां' वृन्तानां सम्बन्धि 'पुरुषरूपक मिव कृत्वा' मनुष्यसदृशं किञ्चिद्रूपं निर्माय, 'तस्मिन्' रूपे 'ता माहृतं' प्रेतशरीरोचितप्रकारं दहनपिण्डदानादिरूपं

---

[*] अध्वे प्रमीतस्याभिवान्यवत्सायाः पयसाग्निहोत्रं तूष्णीं सर्वं हुतं जुहुयुरा सभवायात्"–इत्यादि आश्व० श्रौ० ३. १०. १७।

[†] "प्रोषितश्चेत् प्रेयात्"–इत्यादि कात्या० श्रौ० २५. ८. ९।

कुर्युः । 'अथ' तदानीं कृत्रिमरूपदहनकाले 'एनान्' आहवनीयाद्यग्नीन् श्मशाने नीत्वा समाहृतैस्तैः पलाशवृन्तनिर्मितैः शरीरावयवैः 'संस्पर्श्य' संस्पृष्टं कृत्वा उद्वासयेयुः * ॥

पुरुषरूपनिर्माणप्रकारं दर्शयति— "अध्यर्द्धशतं काये, सक्थिनी द्विपञ्चाशे च विंशे, चोरू द्विपञ्चविंशे, शेषन्तु शिरस्युपरि दध्यात्; सा तत्र प्रायश्चित्तिः"–इति। आनीतानां पलाशवृन्तानाम् 'अध्यर्द्धशतम्' अधिकेनार्द्धेन पञ्चाशद्रूपेण युक्तं शतं 'काये' मध्यशरीरस्थाने 'दध्यात्' परितः प्रक्षिपेत् । पञ्चाशत्सङ्ख्याकानां वृन्तानां समूहरूपं 'पञ्चाशं', द्विसङ्ख्याके पञ्चाशे 'द्विपञ्चाशे'; विंशतिसङ्ख्याकानां समूहरूपं विंशं ; 'द्विपञ्चाशे च विंशे च सक्थिनी दध्यात्' चत्वारिंशदधिकेन शतेन सक्थिद्वयं निष्पादयेदित्यर्थः। पञ्चविंशतिसङ्ख्याकानां समूहरूपं पञ्चविंशं, द्विसङ्ख्याके पञ्चविंशे, ते 'ऊरू दध्यात्' पञ्चाशत्सङ्ख्याकैर्वृन्तैरूरुद्वयं निष्पादयेदित्यर्थः। एवं नवत्यधिकशतद्वये गते सति 'शेषं' सप्ततिसङ्ख्याकं शिरस्युपरि प्रक्षिपेत्। प्रवसतो मृतस्याग्निहोत्रवैकल्यप्रायश्चित्तं निगमयति— "सा तत्र प्रायश्चित्तिः"–इति। 'सा' प्रोक्तक्रिया 'तत्र' वैकल्ये 'प्रायश्चित्तिः' समाधानकरणम् ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) प्रथमः खण्डः ॥ १ (२) ॥

---

* "शरीरनाशे त्रीणि षष्टिशतानि पलाशवृन्तानां कृष्णाजिने पूर्ववत्"–इति कात्या० श्रौ० २५, ८, १५ ।

॥ अथ द्वितीयः खण्डः ॥

तदाहुर्यस्याग्निहोत्र्युपावसृष्टा॑ दुह्यमानोपविशेत्॑ का तत्र प्रायश्चित्तिरिति॑ ता मभिमन्त्रयेत॑ यस्माद्भीषा निषीदसि॑ ततो नो अभयं कृधि॑ पशून्नः सर्वान् गोपाय॑ नमो रुद्राय मीळ्हुष इति॑ ता मुत्थापये॑दुदस्थाद्देव्यदितिरा॑युर्यज्ञपतावधात्॑ इन्द्राय कृण्वती भाग॑ं मित्राय वरुणाय चेत्यथास्या उदपात्र मूधसि च मुखे चोपगृह्णीया॑दथैनां ब्राह्मणाय दद्यात्॑सा तत्र प्रायश्चित्तिस्त॑दाहुर्यस्याग्निहोत्र्युपावसृष्टा॑ दुह्यमाना वाश्येत॑ का तत्र प्रायश्चित्तिरि॑त्यशनायां ह वा एषा॑ यजमानस्य प्रतिख्याय वाश्यते॑ ता मन्न मप्यादयेच्छान्त्यै॑ शान्तिर्वा अन्नं॑ सूयवसाद्भगवती हि भूया इति॑ सा तत्र प्रायश्चित्तिस्त॑दाहुर्यस्याग्निहोत्र्युपावसृष्टा॑ दुह्यमाना स्पन्देत॑ का तत्र प्रायश्चित्तिरिति॑ सा यत्तत्र स्कन्दये॑त्तदभिमृश्य जपेद्यदद्य॑ दुग्धं पृथिवी मसृप्त॑ यदोषधीरत्यसृपद्यदापः॑ पयो गृहेषु पयो अघ्न्यायां॑ पयो वत्सेषु पयो अस्तु तन्मयीति॑ तत्र यत्परिशिष्टं स्या॑त्तेन जुहुयाद्यद्य॑लं होमाय स्याद्॑ यद्यु वै सर्वं सिक्तं स्या॑दथान्या माहूय तां दुग्ध्वा॑ तेन जुहुयादा त्वेव श्रद्धायै होतव्यं॑ सा तत्र प्रायश्चित्तिः॑ * ॥ २ (३) ॥

---

* सर्वं मेतत् पञ्चमपञ्चिकायाः पञ्चमाध्यायीयद्वितीयखण्डे द्रष्टव्यम् (३भा० १६७पृ०)।

पञ्चमे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्निहोतुरुपावसृष्टा, दुह्यमानोपविशेत्, का तत्र प्रायश्चित्तिरिति; ता मभिमन्त्रयेत"–इति । अग्निहोत्रहविरर्थं दोग्धव्या धेनुः 'अग्निहोत्री' । 'यस्य' अग्निहोत्रिणः सम्बन्धिनी सा धेनुः 'उपावसृष्टा' वत्सेन संयोजिता दुह्यमाना सती दोहनस्य विघ्नं कृत्वा यद्युपविशेत्, तदानीं वक्ष्यमाणेन मन्त्रेण ता मभिमन्त्रयेत । यद्यप्येतत् पञ्चविंशाध्यायस्य द्वितीयखण्डे * वर्णितं, तथापि तत्र बुद्धिस्थसङ्गतिः, अत्र तु प्रायश्चित्तप्राधान्येनोपक्रमात् साक्षादेव सङ्गत मित्यभिप्रेत्य पुनरप्याम्नातम् ॥

तत्रोत्तरशेषं दर्शयति— "यस्माद्भीषा निषीदसि, ततो नो अभयं कृधि, पशून्नः सर्वान् गोपाय, नमो रुद्राय मीळ्हुष इति, ता सुत्थापयेदुदस्थाद्देव्यदितिरायुर्यज्ञपतावधात्, इन्द्राय कृण्वती भागं, मित्राय वरुणाय चेत्यथास्या उदपात्र मूधसि च मुखे चोपगृह्णीयादथैनां ब्राह्मणाय दद्यात्; सा तत्र प्रायश्चित्तिः"-इति । एतत् सर्वं पूर्वत्रैव † व्याख्यातम् ॥

षष्ठे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्निहोतुरुपावसृष्टा, दुह्यमाना वाश्येत, का तत्र प्रायश्चित्तिरित्यशनायां ह वा एषा यजमानस्य प्रतिख्याय वाश्यति, ता मन्न मप्यादयेच्छान्त्यै; शान्तिर्वा अन्नं; सूयवसाद्भगवती हि भूया इति; सा तत्र प्रायश्चित्तिः"-इति । एतदपि पूर्वत्र ‡ व्याख्यातम् ॥

सप्तमे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्निहोतुरुपावसृष्टा,

---

* ३भा० १६७पृ० द्र० । आश्व० श्रौ० ३. ११ । आप० श्रौ० ९. ५ ।

† ३भा० १६८पृ० १२पं०–१६९पृ० ९पं० । आश्व० श्रौ० ३. ११. १–३ ।

‡ ३भा० १६९पृ० १०–२२पं० । आश्व० श्रौ० ३. ११. ४ ।

दुह्यमाना स्पन्देत, का तत्र प्रायश्चित्तिरिति; सा यत्तत्र स्कन्दयेत्तदभिमृश्य जपेद्यदद्य दुग्धं पृथिवी मसृप्त यदोषधीरत्यसृपद्यदापः, पयो गृहेषु पयो अघ्न्यायां, पयो वत्सेषु पयो अस्तु तन्मयीति; तत्र यत् परिशिष्टं स्यात्तेन जुहुयाद्यद्यलं होमाय स्याद्; यद्यु वै सर्वं सिक्तं स्यादथान्यामाहूय तां दुग्ध्वा तेन जुहुयादा त्वेव श्रद्धायै होतव्यं; सा तत्र प्रायश्चित्तिः"–इति। एतदपि पूर्वत्र * व्याख्यातम् ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) द्वितीयः खण्डः ॥ २ (३) ॥

॥ अथ तृतीयः खण्डः ॥

तदाहुर्यस्य सायं दुग्धं॑ सान्नाय्यं॑ दुष्येद्वापहरेद्वा॑ का तत्र प्रायश्चित्तिरिति॑ प्रातर्दुग्धं॑ द्वैधं कृत्वा॑ तस्यान्यतरां भक्तिमातच्य तेन यजे॑त सा तत्र प्रायश्चित्ति॑स्तदाहुर्यस्य प्रातर्दुग्धं॑ सान्नाय्यं॑ दुष्येद्वापहरेद्वा॑ का तत्र प्रायश्चित्ति॑रित्यैन्द्रं॑ वा माहेन्द्रं॑ वा पुरोळाशं॑ तस्य स्थाने निरुप्य तेन यजे॑त सा तत्र प्रायश्चित्ति॑स्तदाहुर्यस्य सर्वमेव सान्नाय्य॑ दुष्येद्वापहरेद्वा॑ का तत्र प्रायश्चित्तिरि॑त्यैन्द्रं॑ वा माहेन्द्रं वेति समानं॑ सा

---

* ३भा० १६९पृ० २३पं०–१७१पृ० ४पं०। आश्व० श्रौ० ३, ११. ७–१०।

तत्र प्रायश्चित्तिस्तदाहुर्यस्य सर्वाण्येव हवींषि दुष्येयुर्वापहरेयुर्वा का तत्र प्रायश्चित्तिरित्याज्यस्यैनानि यथादेवतं परिकल्प्य तयाज्यहविषेष्ट्वा यजेतातो ऽन्या मिष्टि मनुल्बणां तन्वीत यज्ञो यज्ञस्य प्रायश्चित्तिः ॥ ३ (४) ॥

अष्टमे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्य सायं दुग्धं सान्नाय्यं दुष्येद्वापहरेद्वा, का तत्र प्रायश्चित्तिरिति ; प्रातर्दुग्धं द्वैधं कृत्वा तस्यान्यतरां भक्ति मातच्य तेन यजेत, सा तत्र प्रायश्चित्तिः"–इति । दर्शपूर्णमासयोर्दध्यर्थं सायङ्काले दुग्धं पयः सान्नाय्यरूपं *, केशकीटादिभिर्दुष्येत् , यः कश्चिदपहरेद्वा, तदानीं परेद्युः प्रातर्दुग्धं पयो भागद्वयं कृत्वा तत्रैकभाग मातच्य, तेन संस्कृत्य दधिस्थानीयेन तेन यजेत ॥

नवमे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्य प्रातर्दुग्धं सान्नाय्यं दुष्येद्वापहरेद्वा, का तत्र प्रायश्चित्तिरित्यैन्द्रं वा माहेन्द्रं वा पुरोडाशं तस्य स्थाने निरुप्य तेन यजेत, सा तत्र प्रायश्चित्तिः"–इति ।

---

* "स प्रजापतिः पशूनब्रवीदेतदस्मै सन्नयतेति , तत् पशव ओषधीभ्यो ऽध्यात्मन्त्समनयन् ; तत् प्रत्यदुहन् ; यत् समनयन् , तत् सान्नाय्यस्य सान्नाय्यत्वम्"–इति तै० सं० २. ५. ३. ३ । तदेतस्मात् पशुपयसां सान्नाय्यत्व मवगम्यते । गोरस इति, एतद्ब्राह्मणवचनव्याख्यायां सायणः । "सोमः खलु वै सान्नाय्यम्"–इति तै० ब्रा० ३. २. ३. ११ । पौर्णमासं हविः सान्नाय्यम्"–इति शत० ब्रा० १. ६. २. ६ । 'सान्नाय्य' दधिपयोलक्षणम्'–इति शत० ब्रा० ११. २. ६. ६ भाष्ये सायणः । 'सम्यङ् नीयते होमार्थं मग्निं प्रति इति सान्नाय्यं हविर्विशेषः'–इति पा० ३. १. १२९–सूत्रवृत्तौ दीक्षितः । 'सान्नाय्यं दुग्धदधिरूपं हविः'–इति कात्या० श्रौ० ४. २. १७ सू० वृत्तौ याज्ञिकदेवश्च ।

प्रातर्दुग्धरूपस्य सान्नाय्यस्य दोषापहाराभ्यां वैकल्ये सति, तस्य दुग्धस्य स्थाने इन्द्रदेवताकं महेन्द्रदेवताकं वा पुरोडाशं कृत्वा, तेन यजेत। इन्द्रयाजि-महेन्द्रयाजि-भेदाद्देवताव्यवस्था ॥

दशमे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्य सर्व मेव सान्नाय्यं दुष्येद्वापहरेद्वा, का तत्र प्रायश्चित्तिरित्यैन्द्रं वा माहेन्द्रं वेति समानं, सा तत्र प्रायश्चित्तिः"–इति। सायं दुग्धं प्रातर्दुग्धं चेत्युभयं 'सर्वम्' ॥

एकादशे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्य सर्वाण्येव हवींषि दुष्येयुर्वापहरेयुर्वा, का तत्र प्रायश्चित्तिरित्याज्यस्यैनानि यथादेवतं परिकल्प्य तयाज्यहविषेष्ट्या यजेतातो ऽन्या मिष्टि मनुल्बणां तन्वीत यज्ञो यज्ञस्य प्रायश्चित्तिः"–इति। पुरोडाशदधिपयोरूपाणि हवींषि 'सर्वाणि' इत्युच्यन्ते। आज्यस्य सम्बन्धीनि 'एनानि' त्रीणि हवींषि, तत्तद्देवता अनतिक्रम्य तत्तदनुसारेण परिकल्प्य आज्यहविर्युक्तया तया इष्ट्या यजेत। इष्ट्वा च तत्तदूर्ध्वं मन्या मिष्टिम् 'अनुल्बणाम्' अन्यूनानधिकां यथाशास्त्रं 'तन्वीत' विस्तारयेत्। यथाशास्त्र मनुष्ठितो 'यज्ञः' पूर्वस्य विकलस्य 'यज्ञस्य' प्रायश्चित्तिः * ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) तृतीयः खण्डः ॥ ३ (४) ॥

---

* आश्व० श्रौ० ३. १०. १९ सू० द्र०।

॥ अथ चतुर्थः खण्डः ॥

तदाहुर्यस्याग्निहोत्र मधिश्रित॑ ममेध्य मापद्येत॑ का तत्र प्रायश्चित्तिरिति॑ सर्व मेवैनत्स्रुच्यभिपर्यासिच्य॑ प्राङुदेत्याहवनीये॑ हैतां समिध मभ्यादधात्यथोत्तरत आहवनीयस्योष्णं॑ भस्म निरूह्य जुहुयान्मनसा वा प्राजापत्यया वर्चा॑ तद्धुतं चाहुतं च स यद्येकस्मिन्नुन्नीते॑ यदि द्वयोरेष एव कल्पस्तंचेद् व्यपनयितुं॑ शक्नुयान्निषिच्यैतद्दुष्ट॑ मदुष्ट मभिपर्यासिच्य॑ तस्य यथोन्नीती॑ स्यात्तथा जुहुयात्सा॑ तत्र प्रायश्चित्तिस्तदाहुर्यस्याग्निहोत्र मधिश्रितं॑ स्कन्दति वा विष्यन्दते वा॑ का तत्र प्रायश्चित्तिरिति॑ तदद्भिरुपनिनयेच्छान्त्यै॑ शान्तिर्वा आपो॑ ऽथैनद्दक्षिणेन पाणिना॑ ऽभिमृश्य जपति॑ दिवं तृतीयं॑ देवान् यज्ञो॑ ऽगात् ततो मा द्रविण माष्टान्तरिक्षं तृतीयं पितॄन् यज्ञो ऽगात् ततो मा द्रविण माष्ट पृथिवीं तृतीयं॑ मनुष्यान् यज्ञो ऽगात् ततो मा द्रविण माष्ट ययो रोजसा स्कभिता रजांसीति॑ वैष्णुवारुणी मृचं जपति विष्णुर्वै यज्ञस्य दुरिष्टं॑ पाति वरुण * स्विष्टं॑ तयोरुभयोरेव शान्त्यै॑ सा तत्र प्रायश्चित्तिस्तदाहुर्यस्याग्निहोत्र मधिश्रितं॑ प्राङुदायंस्खलते वापि वा भ्रंशते॑ का तत्र प्रायश्चित्तिरिति॑ स यद्युप-

---

* “वरुणः” (सविसर्गः) क।

निवर्तयेत्स्वर्गा॑ल्लोकाद्यजमान मावर्त्तये॑द्वैवास्मा उपविष्टायै॑त मग्निहोत्रपरीशेष * माहरेयुस्त॑स्य यथोन्नीती स्यात्॑ तथा जुहुयात्॑ सा तत्र प्रायश्चित्तिस्तं॑दाहुरथ यदि स्रुग्भिद्येत॑ का तत्र प्रायश्चित्तिरित्यं॑न्यां स्रुच माहृत्य जुहुयाद॑थैतां स्रुचं भिन्ना॑ माहवनीयेऽभ्यादध्यात्॑ प्राग्दण्डां प्रत्यक्पुष्करां॑ सा तत्र प्रायश्चित्तिस्तं॑दाहुर्यस्याहवनीये ह्यग्निर्विद्येता॑थ गार्हपत्य उपशाम्येत्॑ का तत्र प्रायश्चित्तिरिति॑ स यदि प्राञ्च मुद्धरे॑दायतनाच्च्यवे॑त यत्प्रत्यञ्च मसुरवद्यज्ञं तन्वीत॑ यन्मन्थेद् भ्रातृव्यं॑ यजमानस्य जनयेद्॑ यदनुगमयेत्प्राणो यजमानं जह्यात्॑ सर्व मेवैनं सह भस्मानं समोप्यं गार्हपत्यायतने निधाया॑थ प्राञ्च माहवनीय मुद्धरेत्॑ सा तत्र प्रायश्चित्तिः॑ ॥ ४ (५) ॥

द्वादशे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्निहोत्र मधिश्रित ममेध्य मापद्येत, का तत्र प्रायश्चित्तिरिति ; सर्व मेवैतत् स्रुच्यभिपर्यासिच्य प्राङुदेत्याहवनीये हैतां समिध मभ्यादधात्यथोत्तरत आहवनीयस्योष्णं भस्म निरूह्य जुहुयात्, मनसा वा प्राजापत्यया वर्चा तद्धुतं चाहुतञ्च ; स यद्येकस्मिन्नुन्नीते यदि द्वयोरेष एव कल्पस्तच्चेद् व्यपनयितुं शक्नुयान्निष्षिच्यैतद् दुष्ट मदुष्ट मभिपर्यासिच्य तस्य यथोन्नीती स्यात्तथा जुहुयात् ; सा तत्र प्रायश्चित्तिः"

---

* "परिशेष" क, ग, ङ ।

–इति । अग्निहोत्रार्थं पयो गार्हपत्ये पाकार्थं यदधिश्रितम्, तद्यदि किञ्चिद् ‘अमेध्यं’ यज्ञानर्हं केशकीटादिकम् ‘आपद्येत’ प्राप्नुयात्, तदानीम् ‘एतत्’ हविः सर्वमप्यग्निहोत्रहवण्यां ‘स्रुचि’ साकल्येन सिक्त्वा, प्राङ्मुख ‘उदेत्य’ उत्थाय आहवनीयं प्रति गत्वा, तस्मिन् ‘एतां’ नित्यां समिध मादध्यात् । ‘अथ’ अनन्तर माहवनीयस्योत्तरभागे किञ्चिदुष्णं भस्म ततो निस्सार्य तस्मिन् ‘मनसा’ नित्याग्निहोत्रमन्त्र मनुस्मृत्य ‘वाचा वा’ “प्रजापते न त्वदेतानि”–इति (ऋ० सं० १०. १२१. १०.) मन्त्र मुच्चार्य जुहुयात् । ‘तत्’ एतद्भस्म उष्णत्वाद्धुत मपि भवति, अग्निराहित्यादहुत मपि भवति । न केवल मधिश्रित एवामेध्यतया एतत् प्रायश्चित्तम्; किं तर्हि ? चतुरुन्नयनावस्थायां यद्येकस्मिन् उन्नीते, यदि वा द्वयोरुन्नीतयोरमेध्यपातः, तदानी मेष एव ‘कल्पः’ प्रकारः । उन्नयनं नामाग्निहोत्रहवण्यां सेचनम् । तत केशकीटादिदूषित मग्निहोत्रहवण्या मुन्नीतं यद्यपनेतुं शक्नुयात्, तदानी मेतत् दुष्टं ‘निष्षिच्य’ निस्सार्य, स्थाल्या मवस्थितम् ‘अदुष्टं’ क्षीर मग्निहोत्रहवण्या मभिपर्यासिच्य ‘यथोन्नीती स्यात्’ उन्नीती येन प्रकारेण भवति, तेन प्रकारेण जुहुयात्; ‘अदुष्ट” द्रव्यान्तर मधिश्रयणादिना संस्कृत्य जुहुयादित्यर्थः ※ ॥

त्रयोदशे प्रश्नोत्तरे दर्शयति— “तदाहुर्यस्याग्निहोत्र मधिश्रितं स्कन्दति वा विष्यन्दते वा, का तत्र प्रायश्चित्तिरिति; तदद्भिरुपनिनयेच्छान्त्यै; शान्तिर्वा आपो ऽथैनद्दक्षिणेन पाणिना ऽभिमृश्य जपति”–इति । अग्निहोत्रद्रव्यं गार्हपत्ये पाकार्थं

※ “व्यापन्नानि हवींषि केशनखकीटपतङ्गै रन्यैर्वा बीभत्सैः०—० प्रजापते न त्वदेतान्यन्य इति०—० जुहुयात्”–इति आश्व० श्रौ ३. १०. २०–२३।

मधिश्रितं सत्, कदाचित् 'स्कन्दति' स्खलति, क्षीरबिन्दुरधः पततीत्यर्थः। 'विष्यन्दते' विशेषेण स्यन्दनं दाहाधिक्येन स्थालीमुखस्योपरि उद्गमनं; तत् स्कन्नं विष्यन्दितं वा द्रव्यं दक्षिणेन पाणिना स्पृष्ट्वा वक्ष्यमाणं मन्त्रं जपेत् ॥

तं दर्शयति— "दिवं तृतीयं देवान् यज्ञो ऽगात्, ततो मा द्रविण माष्टान्तरिक्षं तृतीयं पितॄन् यज्ञो ऽगात्, ततो मा द्रविण माष्ट; पृथिवीं तृतीयं मनुष्यान् यज्ञो ऽगात्, ततो मा द्रविण माष्ट"–इति *। अस्य स्कन्दनस्य विष्यन्दितस्य वा पयसः 'तृतीयम्' अंशस्वरूपं 'दिवं' स्वर्गलोकम् 'अगात्' प्राप्नोतु। तेन यज्ञोऽपि देवान् प्राप्नोतु। प्रापणाद् वैकल्यपरिहारे सति 'मा' मा मग्निहोत्रिणम् 'द्रविण माष्ट' धनं प्राप्नोतु। तथैवापरं 'तृतीयं' द्रव्यांशस्वरूप मन्तरिक्ष मगात्। तेन यज्ञोऽपि पितॄन् प्राप्नोति। ततः प्रापणात् मां धनं प्राप्नोतु। पुनरप्यपरं 'तृतीयं' द्रव्यांशस्वरूपं पृथिवी मगात्। तेन यज्ञोऽपि मनुष्यानगात्। ततस्तदुभयप्रापणात् मां 'द्रविणं' धनम् 'आष्ट' प्राप्नोतु ॥

मन्त्रान्तरजपं विधत्ते— "ययो रोजसा स्कभिता रजांसीति वैष्णुवारुणी मृचं जपति; विष्णुर्वै यज्ञस्य दुरिष्टं पाति, वरुण स्विष्टं, तयोरुभयोरेव शान्त्यै"–इति। "ययोरोजसा"–इत्याद्यृक् सूक्ते पठिता †। तस्याश्चतुर्थपादे "विष्णू अगन् वरुणा पूर्वहूतौ"–इतिश्रुतत्वादियं विष्णुवरुणदेवताका। यज्ञस्य यद्

---

* संहितायां नाम्नात इति ब्राह्मणे श्रुतोऽयं मन्त्रः।

† "ययोरोजसा स्कभिता रजांसि वीर्येभिर्वीरतमा शविष्ठा।
या पत्येते ऽप्रतीता सहोभिर्विष्णू अगन् वरुणा पूर्वहुतौ ॥"
–इति शत० ब्रा० ४, ५. ७, ७.। "यज्ञो वै विष्णुः"– इत्यादि च तत उत्तरम्।

‘दुरिष्टम्’ अङ्गवैकल्यं, तच्छमयित्वा विष्णुः पाति ; यज्ञस्य यत् ‘स्विष्टं’ यथाशास्त्र मनुष्ठित मङ्गं, तद्वरुणः पाति । फलप्रतिषेधनिवारणं तत्प्रतिपालनम् । तस्मादयं जपः ‘तयोरुभयोः’ दुरिष्टस्विष्टयोर्यथोक्तप्रकारेण शान्त्यर्थं सम्पद्यते । उत्तरवाक्य मुपसंहरति— “सा तत्र प्रायश्चित्तिः”–इति ॥

चतुर्दशे प्रश्नोत्तरे दर्शयति— “तदाहुर्यस्याग्निहोत्र मधिश्रितं प्राङुदायन्स्खलति वा ऽपि वा भ्रंशते, का तत्र प्रायश्चित्तिरिति; स यद्युपनिवर्त्तयेत्स्वर्गाल्लोकाद्यजमान मावर्त्तये दत्रैवास्मा उपविष्टायैत मग्निहोत्रपरीशेष माहरेयुस्तस्य यथोन्नीती स्यात् , तथा जुहुयात् ; सा तत्र प्रायश्चित्तिः”–इति । अग्निहोत्रद्रव्यं गार्हपत्ये ऽधिश्रितं, पाकादुर्द्ध्व मादाय प्राङ्मुख आहवनीयं प्रति ‘उदायन्’ उद्गच्छन् अध्वर्युर्यदा भवति, तदानीं तद्द्रव्यं ‘स्खलति’ यद्वा ‘भ्रंशते’ । बिन्दुपतनं स्खलनम् , साकल्येन द्रव्यपतनं भ्रंशः । पुनरप्यग्निहोत्रस्थाल्या द्रव्यं गृहीतुं सोऽध्वर्युर्यदि पश्चिमाभिमुखो निवृत्तो भवेत् , तदानीं स्वर्गप्राप्तं यजमानं तस्माल्लोकादावर्त्तयेत् । अतो निवृत्ति मकृत्वा स्खलन-भ्रंशदेशे एवोपविष्टाय ‘अस्मै’ अध्वर्यवे स्थालीगत मग्निहोत्रद्रव्यशेष मन्ये पुरुषाः आहरेयुः । ‘तस्य’ द्रव्यस्य स्वीकारेण अध्वर्युर्यथोन्नीती स्यात् , तथा जहुयात् । ‘उन्नीतम्’ उन्नयनं स्थालीगतस्य द्रव्यस्याग्निहोत्रहवण्यां चतुर्वारं प्रक्षेपः ; “चतुरुन्नयति”–इति श्रुतत्वात् । उन्नयनादिसंस्कारपूर्वकं जहुयादित्यर्थः * ॥

पञ्चदशे प्रश्नोत्तरे दर्शयति—“तदाहुरथ यदि स्रुग्भिद्येत, का तत्र प्रायश्चित्तिरित्यन्यां स्रुच माहृत्य जुहुयादथैतां स्रुचं भिन्ना

---

* आश्व श्रौ० २, १०, २१ सू० द्र० ।

माहवनीयेऽभ्यादध्यात् प्राग्दण्डां प्रत्यक्पुष्करां; सा तत्र प्रायश्चित्तिः”–इति। 'स्रुग्' अग्निहोत्रहवणी, तद्भेदे स्रुगन्तरेण हुत्वा भिन्नां स्रुच माहवनीये प्रक्षिपेत्। तदानीं तदीयो दण्डः प्राच्या मवस्थितः, तदीयं 'पुष्कर' बिलं प्रतीच्या मवस्थितम्, यथा भवति तथा प्रक्षिपेत्॥ *

षोडशे प्रश्नोत्तरे दर्शयति— “तदाहुर्यस्याहवनीये ह्यग्निर्विद्येताथ गार्हपत्य उपशाम्येत्, का तत्र प्रायश्चित्तिरिति; स यदि प्राञ्च मुद्धरेत्प्रायतनाच्च्यवेत, यत्प्रत्यञ्च मसुरवद्यज्ञं तन्वीत, यन्मन्थेद् भ्रातृव्यं यजमानस्य जनयेद्, यदनुगमयेत्प्राणो यजमानं जह्यात्; सर्व मेवैनं सह भस्मानं समोप्य, गार्हपत्यायतने निधायाथ प्राञ्च माहवनीय मुद्धरेत्; सा तत्र प्रायश्चित्तिः”–इति। प्रतिदिन माहवनीयाग्निर्होमादूर्ध्व मुपशाम्यति; गार्हपत्याग्निस्तु सर्वदा धार्यते; तस्माद्गार्हपत्यात् तत्तद्धोमकाले आहवनीयार्थं मग्निं विहरेदित्येषो ऽनुष्ठानक्रमः। एवं सति यदि कदाचिदाहवनीयस्य स्थाने अग्निरनुपशान्तो विद्येत, तदानीं गार्हपत्यश्चोपशाम्येत्; तत्रत्यवैकल्यस्य परिहाराय पक्षाः पञ्चविधाः सम्भवन्ति। विद्यमान माहवनीयं गार्हपत्यतया सम्भाव्य, ततोऽपि पूर्वदेशे आहवनीयं कर्तुं तस्मात् पूर्वसिद्धाहवनीयात् प्राञ्च मग्नि मुद्धरेदिति प्रथमः पक्षः। तस्मिन् पक्षे यजमानः 'आयतनात्' स्वकीयस्थानात् प्रच्यवेत; आहवनीयस्थानात् प्रच्युतत्वात्। अथ गार्हपत्यार्थं पूर्वसिद्धादाहवनीयात् प्रत्यञ्च मग्नि मुद्धरेदिति द्वितीयः पक्षः। अस्मिन् द्वितीयपक्षे यज्ञ एषो ऽसुरयज्ञसमानः स्यात्। असुरयज्ञस्य शाखान्तरे तानसुरान् प्रकृत्यैव माम्नायते— “त

---

* भाष्यपुस्तकेष्विहैव चतुर्थखण्डसमाप्तिः।

आहवनीय मग्र आ दधत, अथ गार्हपत्यम्, अथान्वाहार्यपचनम्"–इति (तै० ब्रा० १. १. ४. ४.) । तदीयदोषोऽपि तत्रैवाम्नातः— "भद्रा भूत्वा परा भविष्यन्ति"–इति । गार्हपत्यार्थ मग्निमन्थनं कर्त्तव्य मिति तृतीयः पक्षः । तदानीं विद्यमान आहवनीये तद्विरोधिनोऽग्न्यन्तरस्य मन्थनाद्यजमानस्य भ्रातृ मुत्पादयेत् । पुनराधानं कर्तुं विद्यमान माहवनीयम् 'अनुगमयेत्' उपशमयेदिति चतुर्थः पक्षः । तस्मिन् पक्षे विद्यमानस्य विनाशनात् प्राणो यजमानं परित्यजेत् । आहवनीयगतं भस्मसहितं सर्व मप्यग्निं कस्मिंश्चित् पात्रे प्रक्षिप्य, नीत्वा, गार्हपत्यस्थाने प्रक्षिप्य, अनन्तरं ततो गार्हपत्यात् प्राञ्च माहवनीय मुद्धरेदिति पञ्चमः पक्षः । अस्मिन् पक्षे दोषाभावात् सैव प्रायश्चित्तिर्भवति * ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) चतुर्थः खण्डः ॥ ४ (५) ॥

॥ अथ पञ्चमः खण्डः ॥

तदाहुर्यस्याग्नावग्नि मुद्धरेयु॑ः का तत्र प्रायश्चित्ति रिति॑ स यद्यनुपश्ये॑दुदूह्य पूर्व मपरं निदध्याद्य॑द्यनानुप॑श्येत्सो ऽग्नये॑ ऽग्निव॑ते ऽष्टाकपालं पुरोळाशं

---

* आश्व० श्रौ० ३. १२. द्र० ।

निर्वपे॑त्तस्य याज्यानुवा॑क्ये अग्निनाग्निः समिध्यते॑ त्वं ह्यग्ने अग्निनेत्या॑हुतिं वाहवनीये जुहुया॑दग्नये ऽग्निवते स्वाहे॑ति सा तत्र प्रायश्चित्तिस्त॑दाहुर्यस्य गार्हपत्याहवनीयौ॑ मिथः संसृज्येयातां॑ का तत्र प्रायश्चित्तिरिति॑ सो ऽग्नये वीतये॑ ऽष्टाकपालं पुरोळाशं निर्वपे॑त्तस्य याज्यानुवाक्ये॑ अग्न आयाहि वीतये॑ यो अग्निं देववीतय इत्या॑हुतिं वाहवनीये जुहुया॑दग्नये वीतये स्वाहे॑ति सा तत्र प्रायश्चित्तिस्त॑दाहुर्यस्य सर्व एवाग्नयो॑ मिथः संसृज्येरन् का तत्र प्रायश्चित्तिरिति॑ सो ऽग्नये विविचये॑ ऽष्टाकपालं पुरोळाशं निर्वपे॑त्तस्य याज्यानुवाक्ये॑ स्वर्णं वस्तोरुषसा मरोचि॑ त्वा मग्ने मानुषीरीळते विश इत्या॑हुतिं वाहवनीये॑ जुहुया॑दग्नये विविचये स्वाहे॑ति सा तत्र प्रायश्चित्तिस्त॑दाहुर्यस्याग्नयो॑ ऽन्यैरग्निभिः संसृज्येरन्॑ का तत्र प्रायश्चित्तिरिति॑ सो ऽग्नये क्षामवते॑ ऽष्टाकपालं पुरोळाशं निर्वपे॑त्तस्य याज्यानुवाक्ये॑ अक्रन्ददग्नि * स्तनयन्निव द्यौ॑रधा यथा नः पितरः परास इत्या॑हुतिं वाहवनीये जुहुया॑दग्नये क्षामवते स्वाहेति॑ सा तत्र प्रायश्चित्तिः॑ ॥ ५ (६) ॥

---

* ग-पुस्तके सविसर्गपाठः ।

सप्तदशे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्नावग्नि मुद्धरेयुः, का तत्र प्रायश्चित्तिरिति; स यद्यनुपश्येदुदूह्य पूर्व मपरं निदध्याद् यद्यनानुपश्येत्, सो ऽग्नये ऽग्निवते ऽष्टाकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये 'अग्निनाग्निः समिध्यते'–'त्वं ह्यग्ने अग्निर्नित्याहुतिं वाहवनीये जुहुयादग्नये ऽग्निवते स्वाहेति; सा तत्र प्रायश्चित्तिः"–इति । सायम्प्रातराहवनीयेऽग्नौ स्थित एवं सति पुनरपि गार्हपत्याग्निं य उद्धरेयुः, तदानी मुद्धृतस्याग्नेः प्रक्षेपात् पूर्व मेव विद्यमानस्याग्नेः दर्शनम् । तं 'पूर्वं' विद्यमान मग्निम् 'उदूह्य' तस्मादाहवनीयस्थानादुद्धृत्य, तस्मिन् स्थाने पुनः 'अपरम्' इदानी मानीत मग्निं निदध्यात् । यदि विद्यमानं ('अनानुपश्येत्') नानुपश्येत्, तदानी मानीत मग्निं तत्र प्रक्षिप्य, पश्चादग्निद्वय मवगत्य 'अग्निवते ऽग्नये' देवतायै पुरोडाशं निरूप्य, तस्यैते याज्यानुवाक्ये कुर्यात् । "अग्निनाग्निः"–इति (ऋ० सं० १. १२. ६.) पुरोनुवाक्या, "त्वं ह्यग्ने अग्निना"–इति (ऋ० सं० ८. ४३. १४.) याज्या । सोऽय मेकः पक्षः । दर्विहोमवद्याज्यानुवाक्ये परित्यज्य "अग्नये ऽग्निवते स्वाहा"–इतिमन्त्रेण आहवनीये आज्यं जुहुयादिति [*] द्वितीयः पक्षः ॥

अष्टादशे प्रश्नोत्तरे दर्शयति—"तदाहुर्यस्य गार्हपत्याहवनीयौ मिथः संसृज्येयातां, का तत्र प्रायश्चित्तिरिति ; सो ऽग्नये वीतये ऽष्टाकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये 'अग्न आ याहि वीतये'–'यो अग्निं देववीतय इत्याहुतिं[†] वाहवनीये जुहुयादग्नये

---

[*] आग्नेयीष्विष्टिषु एषा अन्यतमाग्निवतीष्टिः । तथाहि "अथाग्नेय्य इष्टयः"–इत्यधिकारे "साग्नावग्निप्रणयनेऽग्निवते"–इति आश्व० श्रौ० ३. १३. ३, १२ ।

[†] ऋ० सं० ६. १६. १०, १, १२. ९ ।

वीतये स्वाहेति; सा तत्र प्रायश्चित्तिः”–इति। अग्न्युद्धरणादूर्द्ध्वं व्यवस्थितयोराहवनीयगार्हपत्ययोः सतोर्यदि गार्हपत्यगतोऽङ्गार आहवनीये प्रमादात् पतेत्, आहवनीयगतो वा गार्हपत्ये पतेत्, सोऽयं ‘मिथः संसर्गः’; तत्र प्रायश्चित्तार्थस्य पुरोडाशस्य ‘वीति’-गुणयुक्तोऽग्निर्देवता [*]। अन्यत् पूर्ववद् व्याख्येयम्॥

एकोनविंशे प्रश्नोत्तरे दर्शयति— “तदाहुर्यस्य सर्वे एवाग्नयो मिथः संसृज्येरन्, का तत्र प्रायश्चित्तिरिति; सो ऽग्नये विविचयेऽष्टाकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये ‘स्वर्ण वस्तोरुषसा मरोचि’–‘त्वा मग्ने मानुषीरीळते विश इत्याहुतिं [†] वाहवनीये जुहुयादग्नये विविचये स्वाहेति; सा तत्र प्रायश्चित्तिः” –इति। आहवनीय–गार्हपत्य–दक्षिणाग्नीनां सर्वेषां परस्परसंसर्गे सति ‘विविचि’–गुणयुक्तोऽग्निः पुरोडाशदेवता [‡]। अन्यत् पूर्ववद् व्याख्येयम्॥

विंशे प्रश्नोत्तरे दर्शयति— “तदाहुर्यस्याग्नयो ऽन्यैरग्निभिः संसृज्येरन्, का तत्र प्रायश्चित्तिरिति; सो ऽग्नये क्षामवते ऽष्टाकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये ‘अक्रन्ददग्नि स्तनयन्निव द्यौर्’– ‘अधा यथा नः पितरः परास इत्याहुतिं [§] वाहवनीये जुहुयादग्नये क्षामवते स्वाहेति; सा तत्र प्रायश्चित्तिः” –इति। ‘यस्य’ अग्निहोत्रिणः सम्बन्धिन आहवनीयाद्यग्नयोऽन्यदीयैराहवनीयादिभिर्लौकिकाग्निभिर्वा संसृज्येरन्, तस्य प्राय-

---

[*] “गार्हपत्याहवनीययोर्वीतये”–इति आश्व० श्रौ० ३. १३. ५।

[†] ऋ० सं० ७. १०. २, ५. ८. ३।

[‡] “मिथश्चेद् विविचये”–इति आश्व० श्रौ० ३. १३. ५।

[§] ऋ० सं० १०. ४५. ४, ४. २. १६।

श्चित्तार्थे पुरोडाशे 'क्षामवद्'-गुणयुक्तो ऽग्निर्देवता * । अन्यत् पूर्ववद् व्याख्येयम् ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) पञ्चमः खण्डः ॥ ५ (६) ॥

॥ अथ षष्ठः खण्डः ॥

तदाहुर्यस्याग्नयो ग्राम्येणाग्निना सन्दह्येरन्॑ का तत्र प्रायश्चित्तिरिति॑ सो ऽग्नये संवर्गायाष्टाकपालं॑ पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये॑ कुवित्सु नो गविष्टये॑ मा नो अस्मिन्महाधन इत्या॑हुतिं वाहवनीये जुहुया॑दग्नये संवर्गाय स्वाहेति॑ सा तत्र प्रायश्चित्ति॑स्तदाहुर्यस्याग्नयो दिव्येनाग्निना संसृज्येरन्॑ का तत्र प्रायश्चित्तिरिति॑ सो ऽग्नये ऽप्सुमते॑ ऽष्टाकपालं॑ पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये॑ अप्स्वग्ने सधिष्टव॑

---

* आश्व० श्रौ० ३, १३, ४। तै० ब्रा० ३. ७. ४. ५। तै० सं० २. २. ३. ४, ५। भौ० द० जै० सू० ६. ४. १७-२१ ; अधि ५। "क्षामवत्यादिना यद्वत् कर्मणा पृतनापते। दैवदोषादकरणे जाते दोषकदम्बके। होमेनैकेन दोषाणां सर्वेषां क्षय मादिशेत्"—इति भ० पु०। 'एवञ्च एकप्रायश्चित्तेनानेकदोषक्षयाय क्षामवतीष्टिः सर्वत्र दृष्टान्तः'—इति प्रा० त०।

मयो दधे मेधिरः पूतदक्ष इत्या॑हुतिं वाहवनीये जुहुया॑दग्नयेऽप्सुमते स्वाहेति॑ सा तत्र प्रायश्चित्ति॑स्तदाहुर्यस्याग्नयः शवाग्निना संसृज्येरन्॑ का तत्र प्रायश्चित्तिरिति॑ सोऽग्नये शुचये॑ऽष्टाकपालं पुरोळाशं निर्वपे॑त्तस्य याज्यानुवाक्ये॑ अग्निः शुचिव्रततम॑ उदग्ने शुचयस्तवे॑त्याहुतिं वाहवनीये जुहुया॑दग्नये शुचये स्वाहे॑ति सा तत्र प्रायश्चित्तिस्त॑दाहुर्यस्याग्नय आरण्येनाग्निना सन्दह्येरन्॑ का तत्र प्रायश्चित्तिरिति॑ समे वारोपये॑दरणी वोल्मुकं वा मोचये॑द्यद्याहवनीयाद्यदि गार्हपत्या॑द्यदि न शक्नुया॑त्सोऽग्नये संवर्गा॑याष्टाकपालं पुरोळाशं निर्वपे॑त्तस्योक्ते याज्यानुवाक्ये॑ आहुतिं वाहवनीये जुहुया॑दग्नये संवर्गाय स्वाहेति॑ सा तत्र प्रायश्चित्तिः॑ ॥ ६ (७) ॥

एकविंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्नयो ग्राम्येणाग्निना सन्दह्येरन्, का तत्र प्रायश्चित्तिरिति ; सोऽग्नये संवर्गायाष्टाकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये 'कुवित्सु नो गविष्टये'–'मा नो अस्मिन् महाधन इत्याहुतिं * वाहवनीये जुहुयादग्नये संवर्गाय स्वाहेति ; सा तत्र प्रायश्चित्तिः"–इति । 'ग्राम्योऽग्निः' महानसादिगतः । स कदाचित् प्रमादेन प्रवृद्धो ग्रामगतानि गृहाणि दहन्नग्निहोत्रशालागतानाहवनीयादीन-

---

* ऋ० सं० ८. ७५. ११, १२ ।

ग्नीन् सम्यग् दहति, तदानीं प्रायश्चित्तस्य पुरोडाशस्य ‘संवर्ग’-गुणयुक्तो ऽग्निर्देवता[*]। अन्यत् पूर्ववत् ॥

द्वाविंशे प्रश्नोत्तरे दर्शयति—“तदाहुर्यस्याग्नयो दिव्येनाग्निना संसृज्येरन्, का तत्र प्रायश्चित्तिरिति ; सो ऽग्नये ऽप्सुमते ऽष्टाकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये ‘अप्स्वग्ने सधिष्टव’-‘मयो दधे मेधिरः पूतदक्ष इत्याहुतिं[†] वाहवनीये जुहुयादग्नये ऽप्सुमते स्वाहेति ; सा तत्र प्रायश्चित्तिः”-इति । ‘दिव्याग्निः’ वैद्युतः । असनिपाते सति तदीयेनाग्निना आहवनीयादीनां संसर्गे प्रायश्चित्तस्य पुरोडाशस्य ‘अप्सुमान्’ अग्निर्देवता[‡]। अन्यत् पूर्ववत् ॥

त्रयोविंशे प्रश्नोत्तरे दर्शयति— “तदाहुर्यस्याग्नयः शवाग्निना संसृज्येरन्, का तत्र प्रायश्चित्तिरिति ; सो ऽग्नये शुचये ऽष्टाकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये ‘अग्निः शुचिव्रततम’-‘उदग्ने शुचयस्तवेत्याहुतिं[§] वाहवनीये जुहुयादग्नये शुचये स्वाहेति ; सा तत्र प्रायश्चित्तिः”-इति । प्रेतदहनाय प्रवृत्तोऽग्निः ‘शवाग्निः’। तत्संसर्गे पुरोडाशस्य ‘शुचि’-गुणयुक्तो ऽग्निर्देवता । अन्यत् पूर्ववद् व्याख्येयम् ॥

चतुर्विंशे प्रश्नोत्तरे दर्शयति— “तदाहुर्यस्याग्नय आरण्येनाग्निना सन्दह्येरन्, का तत्र प्रायश्चित्तिरिति ; समे वारोपयेदरणी वोल्मुकं वा मोचयेद् ; यद्याहवनीयाद्यदि गार्हपत्याद् ; यदि न

---

[*] “ग्राम्येण संवर्गाय”-इति आश्व० श्रौ० ३. १२. ७।

[†] ऋ० सं० ८. ४३. ९, ३. १. ३।

[‡] “वैद्युतेऽप्सुमते”-इति आश्व० श्रौ० ३. १३. ८।

[§] ऋ० सं० ८. ४४. २१, १७।

[‖] “शुचये संसर्जनेऽग्निनान्येन” इति आश्व० श्रौ० ३. १३. ४

शक्नुयात्, सो ऽग्नये संवर्गायाष्टाकपालं पुरोळाशं निर्वपेत्; तस्योक्ते याज्यानुवाक्ये *आहुतिं वाहवनीये जुहुयादग्नये संवर्गाय स्वाहेति; सा तत्र प्रायश्चित्तिः"–इति । दावाग्निररण्यादागत्य अग्निहोत्रशालां दहन्नाहवनीयादीन् यदा सम्यग् दहति, तदानीं तद्दहनात् पूर्वं मेवाग्नीन् 'अरणी' द्वयोररण्योः सह समारोपयेदेव । तदशक्तौ गार्हपत्याहवनीयात् 'उल्मुकं मोचयेत्' सहसोल्मुक मादाय परितो गच्छेत् । समारोपणं वोल्मुकमोचनं वेति पक्षद्वयस्य अग्निदाहत्वरया यदा न शक्तिः, तदा 'संवर्ग'–गुणयुक्तो ऽग्निः पुरोडाशदेवता † । तदीययाज्यानुवाक्ये च पूर्वं मेवाभिहिते (३१पृ० १३पं०) ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) षष्ठः खण्डः ॥ ६ (७) ॥

* * *

॥ अथ सप्तमः खण्डः ॥

तदाहुर्य आहिताग्नि॑रुपवसथेऽश्रु कुर्वीत॑ का तत्र प्रायश्चित्तिरिति॑ सोऽग्नये व्रतभृते॑ऽष्टाकपालं पुरोळाशं निर्वपेत्त॑स्य याज्यानुवाक्ये॑ त्व मग्ने व्रतभृच्छुचि॑र् व्रतानि बिभ्रद् व्रतपा अदब्ध इत्याहुतिं

---

* ऋ० सं० ८, ४४, २१, १७ ।

† "अग्नये संवर्गाय पद्व्याश्चेत्"–इति कात्या० श्रौ० २५, ४, ३२ ।

वाहवनीये जुहुयादग्नये॑ व्रतभृते स्वाहेति॑ सा तत्र प्रायश्चित्तिस्त॑दाहुर्य आहिताग्निरुपवसथे ऽव्रत्य मा पद्येत॑ का तत्र प्रायश्चित्तिरिति॑ सो ऽग्नये व्रतपतये॑ ऽष्टाकपालं पुरोळाशं निर्वपेत्त॑स्य याज्यानुवाक्ये॑ त्वमग्ने व्र॒तपा असि॑ यद्वो वयं प्र मिनाम व्र॒तानीत्या॑हुतिं वाहवनीये जुहुयादग्नये॑ व्र॒तपतये स्वाहेति॑ सा तत्र प्रायश्चित्तिस्त॑दाहुर्य आहिताग्निर॑मावास्यां पौर्णमासीं वातीयात्॑ * का तत्र प्रायश्चित्तिरिति॑ सोऽग्नये पथिकृते॑ ऽष्टाकपालं पुरोळाशं निर्वपेत्त॑स्य याज्यानुवाक्ये॑ वेत्था हि वेधो अध्वन॑ आ देवानामपि पन्था मगन्मेत्या॑हुतिं वाहवनीये जुहुया॑दग्नये पथिकृते स्वाहेति॑ सा तत्र प्रायश्चित्तिस्त॑दाहुर्यस्य सर्व एवाग्नय उपशाम्येरन्॑ का तत्र प्रायश्चित्तिरिति॑ सो ऽग्नये तपस्वते॑ जनद्वते पावकवते॑ ऽष्टाकपालं पुरोळाशं निर्वपेत्त॑स्य याज्यानुवाक्ये॑ आ याहि तपसा जने॑ष्वा नो याहि तपसा जनेष्वि॑त्याहुतिं वाहवनीये जुहुया॑दग्नये तपस्वते जनद्वते पावकवते स्वाहेति॑ सा तत्र प्रायश्चित्तिः॑ ॥ ७ (८) ॥

पञ्चविंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निरुपवसथे ऽश्रु कुर्वीत , का तत्र प्रायश्चित्तिरिति ; सो ऽग्नये व्रतभृते

---

* "वा अतीयात्" क ।

ऽष्टाकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये ‘त्व मग्ने व्रतभृच्छुचिर्’–‘व्रतानि बिभ्रद् व्रतपा अदब्ध इत्याहुतिं वाहवनीये जुहुयादग्नये व्रतभृते स्वाहेति; सा तत्र प्रायश्चित्तिः”–इति। ‘उपवसथे’ यजनीयदिनात् पूर्वदिने शिरोव्यथादिना मृतबन्धुस्मरणादिना वा नेत्रयोरश्रुमोचने पुरोडाशस्य ‘व्रतभृद्’–गुणको ऽग्निर्देवता। त्व मग्ने व्रतभृदित्यादिके सूत्रकारेण पठिते याज्यानुवाक्ये [*] ॥

षड्विंशे प्रश्नोत्तरे दर्शयति— “तदाहुर्य आहिताग्निरुपवसथे ऽव्रत्य मापद्येत, का तत्र प्रायश्चित्तिरिति; सो ऽग्नये व्रतपतये ऽष्टाकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये ‘त्व मग्ने व्रतपा असि’–‘यद्वो वयं प्र मिनाम व्रतानीत्याहुतिं [†] वाहवनीये जुहुयादग्नये व्रतपतये स्वाहेति; सा तत्र प्रायश्चित्तिः”–इति। व्रतविरुद्धं निषिद्धाचरणम् ‘अव्रत्य’’ दिवास्वापादिकम् ‘आपद्येत’ प्राप्नुयात्, तत्र ‘व्रतपति’–गुणयुक्तोऽग्निः पुरोडाशदेवता[‡] ॥

सप्तविंशे प्रश्नोत्तरे दर्शयति— “तदाहुर्य आहिताग्निरमावास्यां पौर्णमासीं वातीयात्, का तत्र प्रायश्चित्तिरिति; सो ऽग्नये पथिकृते ऽष्टाकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये ‘वेत्था हि वेधो अध्वन’–‘आ देवाना मपि पन्था मगन्मेत्याहुतिं [§] वाहवनीये जुहुयादग्नये पथिकृते स्वाहेति; सा तत्र प्रायश्चित्तिः”

---

[*] “अग्निर्व्रतभृद्। त्व मग्ने व्रतभृच्छुचिरग्ने०—०व्रतानि बिभ्रद् व्रतपा०—०एषैवार्त्याश्रुपाते”–इति आश्व० श्रौ० ३. १२. १३–१५।

[†] ऋ० सं० ८. ११. १, १०. २. ४।

[‡] “व्रतातिपत्तौ व्रतपतये”–इति आश्व० श्रौ० ३. १. २।

[§] ऋ० सं० ६. १६. ३, १०. २. ३।

इति । आहिताग्निरमावास्येष्टिं पौर्णमासेष्टिं वा यदि कदाचिदतिक्रामेत्, तदा 'पथिकृद्'-गुणयुक्तोऽग्निः पुरोडाशदेवता[*] ॥

अष्टाविंशे प्रश्नोत्तरे दर्शयति — "तदाहुर्यस्य सर्व एवाग्नय उपशाम्येरन्, का तत्र प्रायश्चित्तिरिति; सोऽग्नये तपस्वते जनद्वते पावकवतेऽष्टाकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये 'आ याहि तपसा जनेषु'-'आ नो याहि तपसा जनेष्वित्याहुतिं[†] वाहवनीये जुहुयादग्नये तपस्वते जनद्वते पावकवते स्वाहेति; सा तत्र प्रायश्चित्तिः"-इति । आहवनीय-गार्हपत्य-दक्षिणाग्नीनां सर्वेषा मुपशान्तौ 'तपस्वज्जनद्वत्पावकवद्'-गुणयुक्तोऽग्निः पुरोडाशदेवता [‡] ॥ ७ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) सप्तमः खण्डः ॥ ७ (८) ॥

* * *

॥ अथ अष्टमः खण्डः ॥

तदाहुर्य आहिताग्निराग्रयणेनानिष्ट्वा नवान्नं प्राश्नीयात् का तत्र प्रायश्चित्तिरिति सोऽग्नये वैश्वानराय द्वादशकपालं पुरोळाशं निर्वपेत्तस्य याज्यानु-

---

[*] "यदि तृतीयाद्यमावास्यां पौर्णमासीं वा"-इति आश्व० श्रौ० ३. १०. १०-१२ ।

[†] आश्व० श्रौ० ३. १२. २७. द्र० ।

[‡] "तत इष्टिरग्निस्तपस्वान् जनद्वान् पावकवान्"-इति आश्व० श्रौ० ३. १२. २६ ।

वाक्ये वैश्वानरो अजीजनत् पृष्टो दिवि पृष्टो अग्निः पृथिव्या मित्याहुतिं वाहवनीये जुहुयादग्नये वैश्वानराय स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निर्यदि कपालं नश्येत् का तत्र प्रायश्चित्तिरिति सो ऽश्विभ्यां द्विकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये अश्विना वर्त्तिरस्मद् आ गोमता नासत्या रथेनेत्याहुतिं वाहवनीये जुहुयादश्विभ्यां स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निर्यदि पवित्रं नश्येत् का तत्र प्रायश्चित्तिरिति सो ऽग्नये पवित्रवते ऽष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये पवित्रं ते विततं ब्रह्मणस्पते तपोष्पवित्रं विततं दिवस्पद इत्याहुतिं वाहवनीये जुहुयादग्नये पवित्रवते स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निर्यदि हिरण्यं नश्येत् का तत्र प्रायश्चित्तिरिति सो ऽग्नये हिरण्यवते ऽष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये हिरण्यकेशो रजसो विसार आ ते सुपर्णा अभिनन्तँ एवैरित्याहुतिं वाहवनीये जुहुयादग्नये हिरण्यवते स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निर्यदि प्रातरस्नातो ऽग्निहोत्रं जुहुयात् का तत्र प्रायश्चित्तिरिति सो ऽग्नये वरुणा-

या॑ष्टाकपालं पुरोळाशं निर्वपेत्त॑स्य याज्यानुवाक्ये॑ त्वं नो अग्ने वरुणस्य विद्वान्त्स त्वं नो अग्ने ऽवमो भवोतीत्या॑हुतिं वाहवनीये जुहुया॑दग्नये वरुणाय स्वाहेति॑ सा तत्र प्रायश्चित्तिस्त॑दाहुर्य आहिताग्नि॑र्यदि सूतकान्नं प्राश्नीयात्॑ का तत्र प्रायश्चित्तिरिति॑ सो ऽग्नये तन्तुमते॑ ऽष्टाकपालं पुरोळाशं निर्वपेत्त॑स्य याज्यानुवाक्ये॑ तन्तुं तन्वन्रजसो भानु मन्वि॑ह्यक्षानहो नह्यत नोत सोम्या इत्या॑हुतिं वाहवनीये जुहुया॑दग्नये तन्तुमते स्वाहेति॑ सा तत्र प्रायश्चित्ति॑स्तदाहुर्यं आहिताग्नि॑र्जीवे मृतशब्दं श्रुत्वा॑ का तत्र प्रायश्चित्तिरिति॑ सोऽग्नये सुरभिमते॑ ऽष्टाकपालं पुरोळाशं निर्वपेत्त॑स्य याज्यानुवाक्ये॑ अग्निर्होता न्यसीदद्यजीयान्त्सा॑ध्वी मकर्देववीतिं नो अद्येत्या॑हुतिं वाहवनीये जुहुया॑दग्नये सुरभिमते स्वाहेति॑ सा तत्र प्रायश्चित्तिस्त॑दाहुर्य आहिताग्नि॑र्यस्य भार्या गौर्वा यमौ॑ जनयेत् का तत्र प्रायश्चित्तिरिति॑ सो ऽग्नये मरुत्वते॑ त्रयोदशकपालं पुरोळाशं निर्वपेत्त॑स्य याज्यानुवाक्ये॑ मरुतो यस्य हि क्षये॑ ऽराइवेदचर मा अर्हेवेत्या॑हुतिं वाहवनीये जुहुया॑दग्नये मरुत्वते स्वाहेति॑ सा तत्र प्रायश्चित्तिस्त॑दाहुरपत्नीको

ऽप्यग्निहोत्र माहरे३त् ना॑हरे३त् इति॑ आहरेदित्याहुर्यदि नाहरेदनद्धापुरुषः॑ को ऽनद्धापुरुष इति॑ न देवान्न पितॄन्न मनुष्या इति॑ तस्मादपत्नीको ऽप्यग्निहोत्र माहरे॑त्तदेषाभियज्ञगाथा गीयते॑ यजेत् सौत्रामण्या मपत्नीको ऽप्यसोमपः॑ मातापितृभ्या मनृणार्था॑द्यजेति वचनाच्छ्रुतिरिति॑ तस्मात् सौम्यं याजयेत्॑ ॥ ८ (९) ॥

एकोनत्रिंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निराग्रयणेनानिष्ट्वा नवान्नं प्राश्नीयात्, का तत्र प्रायश्चित्तिरिति ; सो ऽग्नये वैश्वानराय द्वादशकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये 'वैश्वानरो अजीजनत्'-'पृष्टो दिवि पृष्टो अग्निः पृथिव्या मित्याहुतिं * वाहवनीये जुहुयादग्नये वैश्वानराय स्वाहेति ; सा तत्र प्रायश्चित्तिः"-इति । गृहेषु नवधान्ये समागते सति, आग्रयणेष्टिं कृत्वा पश्चात् नवान्नं भोक्तव्यम् ; तस्या इष्टेरकरणे 'वैश्वानर'-गुणयुक्तो ऽग्निः † पुरोडाशदेवता ॥

त्रिंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निर्यदि कपालं नश्येत्, का तत्र प्रायश्चित्तिरिति; सो ऽश्विभ्यां द्विकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये 'अश्विना वर्त्तिरस्मद्'-'आ गोमता नासत्या रथेनेत्याहुतिं * वाहवनीये जुहुयादश्विभ्यां

---

* आश्व० श्रौ० २. १५. २ द्र० ।

† आश्व० श्रौ० ३. १३. ८ । गृ० ३. ६. ८ ।

‡ ऋ० सं० १. ९२. १६, ७. ७२. १ ।

स्वाहेति ; सा तत्र प्रायश्चित्तिः"–इति । 'य आहिताग्निः' यस्य आहिताग्नेः पुरोडाशनिष्पादकं 'कपालं' यदि नश्येत्, तदानीमश्विनौ पुरोडाशदेवते * ॥

एकत्रिंशे प्रश्नोत्तरे दर्शयति—"तदाहुर्य आहिताग्निर्यदि पवित्रं नश्येत्, का तत्र प्रायश्चित्तिरिति ; सोऽग्नये पवित्रवतेऽष्टाकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये 'पवित्रं ते विततं ब्रह्मणस्पते'–'तपोष्पवित्रं विततं दिवस्पद इत्याहुतिं † वाहवनीये जुहुयादग्नये पवित्रवते स्वाहेति ; सा तत्र प्रायश्चित्तिः"–इति । आहिताग्नेः पवित्रनाशे 'पवित्रवद्'–गुणयुक्तोऽग्निः ‡ पुरोडाशदेवता ॥

द्वात्रिंशे प्रश्नोत्तरे दर्शयति—"तदाहुर्य आहिताग्निर्यदि हिरण्यं नश्येत्, का तत्र प्रायश्चित्तिरिति ; सोऽग्नये हिरण्यवतेऽष्टाकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये 'हिरण्यकेशो रजसो विसार'–'आ ते सुपर्णा अभिनन्तँ एवैरित्याहुतिं § वाहवनीये जुहुयादग्नये हिरण्यवते स्वाहेति ; सा तत्र प्रायश्चित्तिः"–इति । आहिताग्नेर्हिरण्यनाशे 'हिरण्यवद्'–गुणयुक्तोऽग्निः पुरोडाशदेवता ॥

त्रयस्त्रिंशे प्रश्नोत्तरे दर्शयति—"तदाहुर्य आहिताग्निर्यदि प्रातरस्नातो ऽग्निहोत्रं जुहुयात्, का तत्र प्रायश्चित्तिरिति ; सोऽग्नये वरुणायाष्टाकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये

---

* आश्व० श्रौ० ३. १३. ६, १० ।

† ऋ० सं० ९. ८३. १, २ ।

‡ आश्व० गृ० ३. २ ।

§ ऋ० सं० १. ७९, १, २ ।

'त्वं नो अग्ने वरुणस्य विद्वान्त्स त्वं नो अग्ने ऽवमो भवोतीत्याहुतिं * वाहवनीये जुहुयादग्नये वरुणाय स्वाहेति ; सा तत्र प्रायश्चित्तिः"-इति । आहिताग्नेः स्नान मन्तरेणाग्निहोत्रहोमे 'वरुण'-गुणको ऽग्निः पुरोडाशदेवता * ॥

चतुस्त्रिंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निर्यदि सूतकान्नं प्राश्नीयात्, का तत्र प्रायश्चित्तिरिति ; सो ऽग्नये तन्तुमते ऽष्टाकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये 'तन्तुं तन्वन्रजसो भानु मन्विहि'-'अक्षानहो नह्यत नोत सोम्या इत्याहुतिं † वाहवनीये जुहुयादग्नये तन्तुमते स्वाहेति ; सा तत्र प्रायश्चित्तिः"-इति । आहिताग्नेः सूतकान्नप्राशने 'तन्तुमद्'-गुणको ऽग्निर्देवता ‡ ॥

पञ्चत्रिंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निर्जीवे मृतशब्दं श्रुत्वा, का तत्र प्रायश्चित्तिरिति ; सोऽग्नये सुरभिमते ऽष्टाकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये अग्निर्होता न्यसीदद्यजीयान्त्साध्वी मकर्देववीतिं नो अद्येत्याहुतिं § वाहवनीये जुहुयादग्नये सुरभिमते स्वाहेति ; सा तत्र प्रायश्चित्तिः"-इति । आहिताग्निः स्वस्मिन् जीवत्येव स्वकीयमरणशब्दं यदा द्वेषिमुखाच्छृणुयात, तदानीं 'सुरभि'-मद्गुणयुक्तो ऽग्निर्देवता‖ ॥

षट्त्रिंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निर्यस्य

---

* ऋ० सं० ४. १. ४, ५ ।

† ऋ० सं० १०. ५३. ६, ७ ।

‡ आप० श्रौ० ९. ८. ५. ६० । साङ्ख्या० श्रौ० ५. ४ ।

§ ऋ० सं० ५. १. ६, १०. ५३. ३ ।

‖ "सुरभय एव यस्मिञ्जीवे मृतशब्दः"-इति आश्व० श्रौ० ३. १३. ११ ।

भार्या गौर्वा यमौ जनयेत्, का तत्र प्रायश्चित्तिरिति; सोऽग्नये मरुत्वते त्रयोदशकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये 'मरुतो यस्य हि क्षये'–'ऽरा इवेदचर मा अहेवेत्याहुतिं * वाहवनीये जुहुयादग्नये मरुत्वते स्वाहेति; सा तत्र प्रायश्चित्तिः"–इति। आहिताग्निर्योऽस्ति, तस्येत्यस्मिन्नर्थे यस्येति शब्दः प्रयुक्तः, 'तस्य' आहिताग्नेर्भार्या वा तद्गृहावस्थिता गौर्वा 'यमौ' अपत्यद्वयं सह जनयेत्, तदानीं 'मरुत्वद्'–गुणयुक्तो ऽग्निर्देवता† ॥

सप्तत्रिंशे पर्याये कञ्चिद्विचार मुद्भावयति — "तदाहुरपत्नीकोऽप्यग्निहोत्र माहरे३त्, नाहरे३त्?"–इति। पुरुषे जीवति सति तदा भार्या म्रियते, तदानी माहितैरग्निभिर्भार्याया दाह इत्येकः पक्षः। तथा च मनुः (५. १६७.)—

"भार्यायै पूर्वमारिण्यै दत्त्वाग्नीनन्त्यकर्मणि ।
पुनर्दारक्रियां कुर्यात् पुनराधान मेव च ॥"–इति।

आहितेभ्यो ऽग्निभ्योऽन्येनाग्निना भार्यां दहेदिति द्वितीयः। तथा चाश्वलायनः— "आहार्येणानाहिताग्निं पत्नीं च"–इति (श्रौ० ६. १०. ८, १०.)। भारद्वाजोऽप्याह— "निर्मन्थ्येन पत्नीम्"–इति। अस्मिन् पक्षे पुनरपि विवाहेच्छारहितत्वादय मपत्नीक एव वर्त्तते, सोऽग्निहोत्रम् 'आहरेत्' अनुतिष्ठेन्न वेति प्लुतिद्वयं विचारार्थम्‡ ॥

तत्र निर्णयं दर्शयति— "आहरेदित्याहुः"–इति।

अनुष्ठाने बाधं दर्शयति— "यदि नाहरेदनद्धापुरुषः"–इति।

---

* ऋ० सं० १. ८६. १, ५. ५८, ५।

† "यस्य भार्या गौर्वा यमौ जनयेदिष्टिर्मरुतः"–इति आश्व० श्रौ० ३. १३. १२।

‡ "विचार्यमाणानाम्"–इति पा० ८. २, ९७ सू०।

अद्धेति सत्यनाम *, तद्वैपरीत्यादनृतः पुरुषः 'अनद्धापुरुषः', अननुष्ठानेनानृतो भवेदित्यर्थः ॥

प्रश्नोत्तराभ्यां शब्दार्थं निश्चिनोति— "कोऽनद्धापुरुष इति, न देवान्न पितॄन्न मनुष्यानिति †"–इति । अनद्धापुरुषशब्देन को विवक्षितः ? इति प्रश्नः । यः पुमान् 'देवान्न' पूजयेदिति शेषः, पितॄनपि न पूजयेत्, 'मनुष्यान्' अतिथीनपि न पूजयेत्, तादृशः पुमान् 'अनद्धापुरुषः' इत्युत्तरम् । अग्निहोत्रस्याननुष्ठाने सत्यनद्धापुरुषो भवेदिति ‡ ॥

विपक्षे बाध मुक्त्वा स्वपक्ष मुपसंहरति— "तस्मादपत्नीकोऽप्यग्निहोत्र माहरेत्"–इति ॥

उक्तार्थदार्ढ्याय शाखान्तरगतां गाथा मुदाहरति – "तदेषाभियज्ञगाथा गीयते"–इति । 'तत्' तस्मिन् अवश्यानुष्ठानरूपेऽर्थे 'एषा' वक्ष्यमाणा 'यज्ञम्' अभिलक्ष्य सर्वैर्गीयमाना 'यज्ञगाथा' याज्ञिकैः 'गीयते' पठ्यते ॥

तां गाथां दर्शयति— "यजेत् सौत्रामण्या मपत्नीकोऽप्यसोमपः । मातापितृभ्या मनृणार्थाद्यजेति वचनाच्छ्रुतिः"–इति । सौत्रामणीयाग मपि कुर्यात्, कि मुताग्निहोत्रादिकम् ? हविर्यज्ञेष्वस्याधिकारोऽस्तीत्यर्थः § । तद्वत् सोमयागेष्वधिकारशङ्कायां

---

* निघ० ३. १०. ४ ।

† चातिरिक्तसर्वमूलपुस्तकेषु 'मनुष्या इति'–इति पाठः ।

‡ "अनद्धापुरुषं पुरुषादेष ह वा अनद्धापुरुषो यो न देवानवति, न पितॄन् न मनुष्यान् –इति शत० ब्रा० ६. ३. १. २४ । "अनद्धापुरुष मोच्यते देवपितृमनुष्यानर्थकम्"–इति कात्या० श्रौ० १६. २. १३ ।

§ "सायम्प्रातर्होमौ स्थालीपाको नवश्च यः । बलिश्च पितृयज्ञश्चाष्टका सप्तमः पशुरित्येते पाकयज्ञाः ॥ अग्न्याधेय मग्निहोत्रं पौर्णमास्यमावास्ये । नवेष्टिश्चातुर्मास्यानि पशु-

तद्व्यावृत्त्यर्थं मसोमप इत्युच्यते। यथा पत्नीरहितोऽपि मात्रे पित्रे चाशनाच्छादनादिकं ददाति, तद्वदग्निहोत्र मपि कुर्यादिति शेषः। अत्र हेतुः 'अनृणार्थात्'-इति, ऋणपरिहारनिमित्तम्। तथा च शाखान्तरे श्रूयते— "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते। ब्रह्मचर्येणर्षिभ्यो, यज्ञेन देवेभ्यः, प्रजया पितृभ्य; एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी"-इति (तै० सं० ६. ३.१०.)। अनेनैवाभिप्रायेण 'श्रुतिः' श्रुतेः।'यजेति' वचन मस्ति; यज देवान्, अधीष्व वेदान्, प्रजा मुत्पादयेति शाखान्तरे वचन मस्ति; तस्माद् वचनादनुष्ठानपक्ष एव युक्त इति गाथाया अर्थः। तथा च विष्णुः स्मरति—

"मृतायामपि भार्यायां वैदिकं न त्यजेद् द्विजः।
उपाधिनापि यत् कर्म यावज्जीवं समापयेत्॥"-इति।

उपाधिः कुशमयादिपत्नीकल्पना। तथा च स्मृत्यन्तरम्—

"अन्ये कुशमयीं पत्नीं कृत्वा तु गृहमेधिनः।
अग्निहोत्र मुपासन्ते यावज्जीव मनुव्रताः॥"-इति।

तथा च मैत्रायणीयश्रुतिरप्याम्नायते—

"यस्तु स्वैरग्निभिर्भार्यां संस्करोति कथञ्चन।
असौ मृतः स्त्री भवति स्त्री चैवास्य पुमान् भवेत्॥"-इति।

वन्धीऽत्र सप्तम इत्येते हविर्यज्ञाः॥ अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशिमांस्ततः। वाजपेयोऽतिरात्रश्चाप्तोर्यामात्र सप्तम इत्येते सुत्याः"-इति गो० ब्रा० १.५.२३। "अष्टका पार्वणः श्राद्धं श्रावण्याग्रहायणी। चैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्थाः। अग्न्याधेय मग्निहोत्रं दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः। अग्निष्टोमो ऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयो ऽतिरात्रो ऽप्तोर्याम इति सप्त सोमसंस्थाः"-इति गौ० ध० सू० ८अ०। १भा० २००पृ० १०पं० सायणेनोक्तं चान्यविधं द्रष्टव्यम्।

तस्मात् मृतभार्योऽपि स्वकीयानग्नीनवस्थाप्याग्निहोत्र माहरेत् ॥

तदेतदभिप्रेत्योपसंहरति— "तस्मात् सौम्यं याजयेत्"- इति। ऋणापकरणार्थी दोषराहित्यात् 'सौम्यः'; तादृश मवश्य मग्निहोत्राद्यनुष्ठापयेत् ॥ ८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) अष्टमः खण्डः ॥ ८ (९) ॥

॥ अथ नवमः खण्डः ॥

तदाहुर्वाचापत्नीको ऽग्निहोत्रं कथ मेव जुहोति निविष्टे मृता पत्नी नष्टा वाग्निहोत्रं कथ मग्निहोत्रं जुहोति पुत्रान् पौत्रान्नप्तॄनित्याहुरस्मिंश्च लोके ऽमुष्मिंश्चास्मिल्लोके * ऽयं स्वर्गो ऽस्वर्गेण स्वर्गं लोक मारुरोहेत्यमुष्यैव लोकस्य सन्ततिं धारयति यस्यैषां पत्नीं नेच्छेत् तस्मादपत्नीकस्याधानं कुर्वन्त्यपत्नीको ऽग्निहोत्रं कथ मग्निहोत्रं जुहोति

---

* "॰चास्मिन् लोके" क ; "॰चास्मिंल्लोके" ग, घ, ङ, च ।

श्रद्धा पत्नी सत्यं यजमानः॑ श्रद्धा सत्यं तादित्युत्तमं मि॑थुनं॑ श्रद्धया सत्येन मिथुने॑न स्वर्गांल्लोका* ञ्जयतीति॑ ॥ ६ † (१०) ॥

अत ऊर्द्ध्वं खण्डद्वयं देशविशेषेण केचिदामनन्ति, केचिन्नामनन्ति । अत एव पूर्वनिबन्धकाराः पाठरहितदेशानुसारेण तद्व्याख्यान मुपेक्षितवन्तः; अस्माभिस्तु पाठोपेतदेशानुसारेण तद् व्याख्यायते ॥

पूर्वं मपत्नीकस्य वाचिकं मानसं च द्विविध मग्निहोत्रं प्रतिपादनीयम्, तत्र वाचिकविषयं प्रश्न मुद्भावयति— "तदाहुर्वाचापत्नीको ऽग्निहोत्रं कथ मेव जुहोति?"–इति । यो ऽपत्नीकः पुरुषः, तस्य वाचा निष्पाद्यं यद्यग्निहोत्रं, तत् केन प्रकारेण अनुष्ठातव्यम्? इति प्रश्नः ॥

त मेव प्रश्नं पुनर्विस्पष्टयति— "निविष्टे मृता पत्नी नष्टा वाग्निहोत्रं, कथ मग्निहोत्रं जुहोति?"–इति । नैष्ठिकब्रह्मचर्यादावप्यपत्नीकत्त्व मस्ति, तत्राग्निहोत्रप्रसङ्ग एव नास्ति, विध्यभावात्; अतो ऽपत्नीकत्त्वं विशेष्यते । विवाहादूर्द्ध्व मग्निहोत्रे 'निविष्टे' अनुष्ठातु मुपक्रान्ते सति, पश्चात् पत्नी मृता भवति; तादृशो ऽत्रापत्नीकः । तस्याग्निहोत्रं 'नष्टा वा' नष्ट मेव भवति; पूर्वसिद्धैरग्निभिः पत्नीदाहपक्षे पुनरग्निहोत्रहेतूना मग्नीना मभावात् । अतो ऽपत्नीकः कथ मग्निहोत्रं जुहोति? इति प्रश्नः ॥

---

* "स्वर्गां लोकां" क, ग, घ; "स्वर्गां ल्लोकां" ङ; "स्वर्गां लोकान्" च ।

† ख-नाममूलपुस्तके भाष्यपुस्तकयोश्चैष खण्डो दशमो दशमस्तु नवमः ।

तस्योत्तर माह— "पुत्रान् पौत्रान्नप्तॄनित्याहुरस्मिंश्च लोकेऽमुष्मिंश्चास्मिंल्लोके ऽयं स्वर्गो ऽस्वर्गेण स्वर्गं लोक मारुरोहेत्यमुष्यैव लोकस्य सन्ततिं धारयति, यस्यैषां पत्नीं नैच्छेत्; तस्मादपत्नीकस्याधानं कुर्वन्ति"–इति। यो ऽपत्नीको ऽग्निरहितः स्थविरत्वेनानुष्ठातु मशक्तश्च, तादृशः पुंमान्, पुत्रादीन् प्रत्येवं ब्रूयात्। आहुरिति बहुवचनं छान्दसम्। हे पुत्र–पौत्र–प्रपौत्राः! शृणुत। अस्मिन् लोके, 'अमुष्मिन्' स्वर्गलोके च श्रेयः सम्पादनीयम्। अस्मिन् लोके तु स्थितैः पुरुषैर्यो ऽयं स्वर्गः, शास्त्रेण श्रुत इति शेषः। तं स्वर्गलोकम् 'अस्वर्गेण' स्वर्गविलक्षणेन कामकर्माकामानुष्ठानेन 'आरुरोह' आरोहेत्। इत्येवं पुत्रादीन् प्रति वाचोपदिशति। एतदेव वाजसनेयिभिर्विस्पष्ट माम्नायते— "तस्मात् पुत्र मनुशिष्टं लोक्य माहुः, तस्मादेन मनु शासति"–इति (शत० ब्रा० १४. ४. ३. २६.)। अनेन पुत्राद्यनुशासनेन अमुष्यैव लोकस्य 'सन्ततिम्' अविच्छेदं 'धारयति' सम्पादयति; कुलपरम्परयाग्निहोत्रानुष्ठानेन सर्वेषां स्वर्गप्राप्तौ तद्विच्छेदाभावात्। 'यस्य' यः पुमान् 'एषां पत्नीं नैच्छेत्' स्वस्यानुष्ठातु मशक्तत्वेन पुनर्विवाहसाध्या मेतां पत्नीं नापेक्षेत, तस्मात् तस्य अपत्नीकस्य वाचा प्रेरिताः पुत्रपौत्रादय आधानं कुर्वते। तदाधानपूर्वक मग्निहोत्र मपत्नीकस्य वाचिक मित्युच्यते॥

अथ मानस मग्निहोत्रं प्रश्नोत्तराभ्यां दर्शयति— "अपत्नीको ऽग्निहोत्रं कथ मग्निहोत्रं जुहोति? श्रद्धा पत्नी, सत्यं यजमानः; श्रद्धा सत्यं तदित्युत्तमं मिथुनं; श्रद्धया सत्येन मिथुनेन स्वर्गांल्लोकाञ्जयतीति"–इति। पूर्वोक्तः स्थविरो ऽपत्नीको वा अग्निहोत्रं स्वय मेव मनसा जुहोमीति, यदीच्छेदिति शेषः; तदानीं केन प्रकारेण

तस्य मानसो होमः ? इति प्रश्नः । श्रद्धेत्यादिकं तदुत्तरम् । येयं कर्मश्रद्धा, सैव पत्नी ; यत् तु 'सत्यं' सत्यवाक्यं वैदिकमन्त्रोच्चारणं, स एव यजमानः । श्रद्धा सत्यं चेति यदुभय मस्ति, तदुक्तेन प्रकारेण भावितं सदुत्तमं मिथुनं भवति ; तादृशेन श्रद्धासत्यरूपेण 'मिथुनेन' मानस मनुष्ठानं निष्पाद्य स्वर्गान् लोकान् जयतीत्येव मुत्तरं सम्पन्नम् ॥ ९ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) नवमः खण्डः ॥ ९ (१०) ॥

॥ अथ दशमः खण्डः ॥

तदाहुर्यद्दर्शपूर्णमासयोरुपवसति॑ न ह वा अव्रतस्य देवा हविरश्नन्ति॑ तस्मादुपवसत्यु॑त मे देवा हविरश्नीयुरिति॑ पूर्वां पौर्णमासी मुपवसेदिति पैङ्ग्य॑ मुत्तरा मिति कौषीतकं॑ या पूर्वा पौर्णमासी सानुमति॑र्योत्तरा सा राका॑ या पूर्वामावास्या सा सिनीवाली॑ योत्तरा सा कुहू॑र्यां पर्यस्त मियादभ्युदियादिति सा तिथि॑: पूर्वां पौर्णमासी मुपवसेदनिर्ज्ञाय॑ पुरस्तादमावास्यायां चन्द्रमसं यदुपैति यद्यजते॑ तेन

सोमं क्रीणन्ति॑ तेनोत्तरा मुत्तरा मुपवसेदु॑त्तराणि ह वै सोमो यजते॑ सोम मनु दैवत॑ मेतद्वै देवसोमं॑ यच्चन्द्रमा॑स्तस्मादुत्तरा मुपवसेत्॑ ॥ १० (११) ॥

तद्व्रतनिमित्त मुपवासं विधत्ते – "तदाहुर्यद्दर्शपूर्णमासयोरुपवसति, न ह वा अव्रतस्य देवा हविरश्नन्ति ; तस्मादुपवसत्युत मे देवा हविरश्नीयुरिति"–इति । 'तत्' तस्मिन् नित्यानुष्ठानविषये ब्रह्मवादिन एव माहुः । यः कोऽप्यनुष्ठाता दर्शपूर्णमासयोरुपवासं कुर्यात् । यागरूपं व्रतं निश्चित्य गार्हपत्याद्यग्निसमीपे यो वासः, स उपवासः । यदि वा अस्यापि यजेः समीपे वसन्तीति एतदीयो ऽनुष्ठानसङ्कल्प उपवासः । अग्न्युपस्तरणादिना तदीयो ऽनुष्ठाननिश्चयो ऽवगन्तव्यः । अत एव शाखान्तरे श्रूयते— "उपास्मिञ्छ्वो यक्ष्यमाणे देवता वसन्ति, य एवं विद्वानग्निमुपस्तृणाति"–इति (तै॰ सं॰ १. ६. ७. ३.) । 'अव्रतस्य' नियमविशेषस्वीकाररूपव्रतरहितस्य पुरुषस्य हविः देवा नैवाश्नन्ति । तस्मात् कारणादुत 'मे' ममापि हविर्देवा अश्नीयुरित्यभिप्रेत्य नियमं स्वीकृत्याग्निसमीपे उपवसेत् । एतदेवाभिप्रेत्य आपस्तम्ब आह— "आहवनीयागारे गार्हपत्यागारे वा शेते"–इति (श्रौ॰ ४. ३. १७. *) । यद्वा ग्राम्याशनपरित्याग उपवासः । तत् परित्यज्य आरण्याशनरूपं नियमं स्वीकुर्यात् । अत एव शाखान्तरीया आहुः— "यद् ग्राम्यानुपवसति, तेन ग्राम्यानवरुन्धे ; यदारण्यस्याश्नाति, तेनारण्यान् ; यदनाश्वानुपवसेत् पितृदेवत्यः स्यादारण्यस्याश्नाति"–इति (तै॰ सं॰ १. ६. ७. ३) ॥

---

* "अहं ग्राम्यानुपवसामि"–इत्यादीनि एतदादिसूत्राणि च द्रष्टव्यानि ।

अत्रोपवासतिथिविषये शाखाभेदवचन माश्रित्य विकल्पं दर्शयति— "पूर्वां पौर्णमासी मुपवसेदिति पैङ्ग्य मुत्तरा मिति कौषीतकं; या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका"–इति। खण्डतिथिवशात् यदा दिनद्वये पौर्णमासी तिथिः सम्पद्यते, तदानीं पूर्वां 'पौर्णमासी मुपवसेत्' पूर्वदिने उपवासं कृत्वा परेद्युः यजेतेति सामशाखाप्रवर्त्तकस्य पैङ्गेर्महर्षेर्मतम् * । 'उत्तरां पौर्णमासी मुपवसेत्' उत्तरस्मिन् दिने उपवासं कृत्वा ततोऽपि परेद्युर्यजेतेत्यृक्शाखाप्रवर्त्तकस्य कौषीतकिमहर्षेर्मतम् † । एतदेव मतद्वय मुपजीव्य स्मार्त्ता एवं वर्णयन्ति—

"पर्वप्रतिपदोः सन्धिर्मध्याह्ने पूर्वतोऽपि वा ।
अन्वाधानं पूर्वदिने तद्दिने याग इष्यते ॥
परतश्चेत् परेऽह्नीष्टिस्तद्दिने ऽन्वाहितिर्भवेत् ॥"–इति ।

एतच्च पौर्णमासीद्वयसद्भावे वेदितव्यम्; अनुमतिराकाशब्दाभ्यां पौर्णमासीभेदस्य सर्वत्र व्यवहृतत्वात्। तयोः स्वरूप मभिधानकार आह— "कलाहीने सानुमतिः, पूर्णे राका निशाकरे"– इति (अम० को० १.४.८.) । चतुर्दशीसंयोगाच्चन्द्रमसि कलाहीने सत्यनुमतिरित्युच्यते ; तत्संयोगाभावेन चन्द्रमण्डलपूर्णे सति राकेत्युच्यते ॥

---

* पा० ४. ३. १०५ सू० 'पिङ्गेन प्रोक्तः पैङ्गीकल्पः' । अनु० सू० २. २; ४; १० ; ६. ७ ; ११. ८ । साङ्ख्या० ब्रा० ३. १; १९. ९ ; २४. ९ । साङ्ख्या०श्रौ० ५.२.११ इत्यादि । "मधुकः पैङ्ग्यः"–इति शत० ब्रा० १४. ९. २. १७ । 'मधुकः कोयष्टिकाख्यः पक्षी, तद्वल्लोचने यस्य ; मध्वेव मधुकं क्षौद्रं, तद्वत् पिङ्गनेत्र इति वा'–इति महा० भा० १२ पं० ११८७ श्लो० व्याख्याने नीलकण्ठः ।

† ऋग्वेदस्तु एकविंशतिशाखोऽपि वस्तुतो द्विविधः । तत्र शैशिरीयादयः पञ्च शाकलभेदाः , कौषीतक्यादयस्तु षोडश साङ्ख्यायनभेदाः ।

पौर्णमासीन्याय ममावास्याया मपि दर्शयति— "या पूर्वामावास्या सा सिनीवाली, योत्तरा सा कुहूः"–इति । अत्रापि चतुर्दशीयोगाच्चन्द्रदर्शने सत्यमावास्या सिनीवाली उच्यते ; तद्योगराहित्येन चन्द्रदर्शनाभावे कुहूरिति । तदप्यभिधानकारेणोक्तम्— "सा दृष्टेन्दुः सिनीवाली, सा नष्टेन्दुकला कुहूः"–इति (अम० को० १.४.८.) । अत्राप्युपवासयागनिर्णये मतभेदः पूर्ववद्द्रष्टव्यः ॥

अत्र पूर्वोत्तरविभागनिर्णयाय कर्मोपयोगिन्यास्तिथेः स्वरूपं दर्शयति—"यां पर्यस्त मियादभ्युदियादिति सा तिथिः"–इति । अमावास्यां पौर्णमासीं वा, यां परिप्राप्य सूर्योऽस्त मियात्, तथा या मभिलक्ष्य सूर्य उदियात्, सेय मुदयास्तमयव्यापिनी कर्मोपयुक्ता तिथिः । तादृश्यां तिथौ उदयास्तमययोर्मध्ये पूर्वोत्तराभ्यां चतुर्दशीप्रतिपद्भ्यां मिश्रणे सति पर्वणो द्वैविध्यं भवति ; तस्मिन् द्वैविध्ये पूर्वोक्तं मतद्वयं द्रष्टव्यम् ॥

तदेतदुपसंहरति— "पूर्वां पौर्णमासी मुपवसेदनिर्ज्ञाय पुरस्तादमावास्यायां चन्द्रमसं यदुपैति, यद्यजते, तेन सोमं क्रीणन्ति; तेनोत्तरा मुत्तरा मुपवसेदुत्तराणि ह वै सोमो यजते, सोम मनु दैवत मेतद्वै देवसोमं यच्चन्द्रमास्तस्मादुत्तरा मुपवसेत्"–इति । पूर्वा मिति पैङ्गिमतस्योपसंहारः । अमावास्यादिने 'पुरस्तात्' पूर्वस्यां दिशि चन्द्रमसम् 'अनिर्ज्ञाय' च शास्त्रमार्गेण चन्द्र मदृष्ट्वा चन्द्रोदयो न भविष्यतीति निश्चित्य 'यत् उपैति' उपवसति प्रारभत इति यदस्ति, 'यद् यजते' परेद्युर्यागं करोतीति यदस्ति, 'तेन' उपवासेन यागेन च 'उत्तरा मुत्तराम्' आगामिपक्षगतां पौर्णमासी ममावास्यां चोपवसेत् । 'उत्तराणि' उपवासदिना दुत्तरेषु दिनेषु यजते । स यागः 'सोमो भवति'

सोमयागसदृशो भवति । तं सोम मनु सर्वं मपि दैवतं तृप्यतीति शेषः । योऽयं चन्द्रमा अस्ति, एतदेव ‘सोमं’ देवाना मपेक्षितं सोमद्रव्यसदृशं वस्तु ; यस्माच्चन्द्रमण्डलं देवानां प्रियम् , तस्मात् मण्डलं सम्पूर्णं मभिलक्ष्योत्तरां पौर्णमासी मुपवसेदिति कौषीतकिमतस्योपसंहारः * ॥ १० (११) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) दशमः खण्डः ॥ १० (११) ॥

॥ अथैकादशः खण्डः ॥

तदाहुर्यस्याग्नि मनुद्धृ॑तं मादित्यो ऽभ्युदियाद्वा॑ ऽभ्यस्तमियाद्वा॑ प्रणीतो वा प्राग्घोमादुपशाम्येत्॑ का तत्र प्रायश्चित्तिरिति॑ हिरण्यं पुरस्कृत्य साय मुद्धरेज्ज्यो॑तिर्वै शुक्रं हिरण्यं॑ ज्योतिः शुक्र मसौ तदेव तज्ज्यो॑तिः शुक्रं पश्यन्नुद्धरति॑ रजत मन्तर्धाय प्रातरुद्धरेदेतद् रात्रिरूपं॑ पुरा सम्भेदाच्छायाना माहवनीय मुद्धरेन्॑ मृत्युर्वै तमश्छाया॑ तेनैव तज्ज्योतिषा मृत्युं

---

* “सम्थ्यां पौर्णमासी मुपवसे दुत्तरा मित्येके”–इत्यादीनि सूत्राणि सा० वे० गो० गृ० १. ५. २—११ द्रष्टव्यानि ।

तमश्छायां तरति॑ सा तत्र प्रायश्चित्तिस्त॑दाहुर्यस्य गार्हपत्याहवनी॑यावन्तरेणानो वा रथो वा॑ श्वा वा प्रतिपद्येत॑ का तत्र प्रायश्चित्तिरिति॑ नैनन् मनसि कुर्यादित्याहुरा॑त्मन्यस्य हिता भवन्तीति॑ तच्चेन्मनसि कुर्वीत॑ गार्हपत्यादविच्छिन्ना मुदकधारां हरे॑त् तन्तुं तन्वन्रजसो भानु मन्विही॑त्याहवनीयात्॑ सा तत्र प्रायश्चित्तिस्त॑दाहुः कथ मग्नीनन्वादधानो॑ ऽन्वाहार्यपचन माहारये३त्॑ नाहारये३त् इति॑* आहारयेदित्याहुः॑ प्राणान्वा एषो ऽभ्यात्मन् धत्ते॑ यो ऽग्नीनाधत्ते॑ तेषा मेषो ऽन्नादतमो भवति॑ यदन्वाहार्यपचनस्त॑स्मिन्नेता माहुतिं जुहो॑त्यग्नये ऽन्नादायान्नपतये स्वाहे॑त्यन्नादो हान्नपतिर्भ॑वत्यश्नुते प्रजयान्नाद्यं॑ य एवं वेदान्तरे॑ण गार्हपत्याहवनीयौ॑ होष्यन्त्स॑ञ्चरेतैतेन ह वा एनं॑ सञ्चरमाण मग्नयो विदुर॑य मस्मासु होष्यती॑त्येतेन ह वा अस्य सञ्चरमाणस्य॑ गार्हपत्याहवनीयौ पाप्मान मपहतः सो ऽपहतपाप्मोर्ध्वः स्वर्गं लोक मेतीति वै॑ ब्राह्मण मुदाहरन्ति॑ तदाहुः कथ मग्नीन् प्रवत्स्यन्नुपतिष्ठेत॑ प्रोष्य वाप्रत्येत्याहरहर्वेति॑ तूष्णी मित्याहुस्तू॑ष्णीं वै श्रेयस आकाङ्क्षन्ते॑ ऽथाप्याहु॑रहरहर्वा एते यजमानस्या॑श्रद्धयोद्वासनात्प्र॑प्लावनाद्

---

* "नाहारये३दिति"– क ।

बिभ्यति॑ तानुपतिष्ठतैवा॑भयं वोभयं मे ऽस्त्वित्य॑भयं हैवास्मै भवत्य॑भय॑ हैवास्मै भवति॑ ॥ ११ (१२) ॥

॥ इत्यैतरेयब्राह्मणे सप्तमपञ्चिकायां द्वितीयोऽध्यायः ॥

इत्थ मग्निहोत्रप्रायश्चित्तप्रसङ्गागत मपत्नीकाग्निहोत्रादिकं परिसमाप्य प्रकृत मेव प्रायश्चित्त मनुसरन् प्रश्न मुत्थापयति—“तदाहुर्यस्याग्नि मनुद्धृत मादित्यो ऽभ्युदियाद्वा ऽभ्यस्तमियाद्वा प्रणीतो वा प्राग्घोमादुपशाम्येत्, का तत्र प्रायश्चित्तिरिति”—इति। सायङ्काले आदित्यस्यास्तमयात् पुरा अग्निहोत्रार्थं गार्हपत्यादग्नि मुद्धरेत्, प्रातःकाले तु सूर्योदयात् पुरोद्धरेदित्याम्नातम् *। एवं सति ‘यस्य’ अग्निहोत्रिणो ऽनुद्धृत मग्नि मभिलक्ष्यादित्यः ‘उदियाद्वा अस्तमियाद्वा’ अग्न्युद्धरणात् प्रागेवोदयास्तमयौ भवत इत्यर्थः। अथवा स्वस्वकाले प्रणीतोऽग्निराहवनीयदेशे स्थित्वा होमात् पूर्वं मुपशाम्येत्। तेषु त्रिषु विषयेषु प्रायश्चित्तं पृच्छति॥

तस्योत्तर माह — “हिरण्यं पुरस्कृत्य साय मुद्धरेज्ज्योतिर्वै शुक्रं हिरण्यं, ज्योतिः शुक्र मसौ, तदेव तज्ज्योतिः शुक्रं पश्यन्नुद्धरति; रजत मन्तर्धाय प्रातरुद्धरेदेतद्रात्रिरूपम्; पुरा सम्भेदाच्छायाना माहवनीय मुद्धरेन्मृत्युर्वै तमश्छाया, तेनैव तज्ज्योतिषा मृत्युं तमश्छायां तरति; सा तत्र प्रायश्चित्तिः”—इति। यदा सूर्यास्तमयादूर्ध्वं मुद्धरणीयम्, तदानीं हिरण्यं ‘पुरस्कृत्य’ उपर्यवस्थाप्य, वह्नि मुद्धरेत्। यदेतद्धिरण्य मस्ति, तदेतत् ‘शुक्रं ज्योतिर्वै’ अत्यन्तं भास्वरः प्रकाशः; ‘असौ’ आदित्योऽपि ‘शुक्रं ज्योतिः’ अत्यन्तं

---

* आश्व श्रौ० २. २. १–१८।

भास्वरः प्रकाशः। तथा सति 'तदेव' हिरण्य मेव 'तज्ज्योतिः' आदित्यप्रकाशः। अतः 'शुक्रं' दीप्तिमद्धिरण्यं पश्यन्नेवाग्नि मुद्धरेत्। प्रातःकाले तु रजतम् 'अन्तर्धाय' उपर्यवस्थाप्याग्नि मुद्धरेत्। 'एतत्' च रजतं रात्रेः स्वरूपम्; रात्रौ हि चन्द्रतारादिकं रजतसमानं दृश्यते, अतो रजतेन सूर्योदयात् प्राचीनो रात्रिकाल एवं सम्पद्यते। यद्यप्येतावतैव त्रिविधप्रश्नोत्तरं सम्पन्नम्, तथापि तत्प्रसङ्गात् नित्य मुद्धरणं, पुरेत्यादिना प्रदर्श्यते। छायानां 'सम्भेदः' एकीभावः। सूर्यास्तमये सत्येषा मनुष्यच्छाया एषा वृक्षच्छायेति विभागो न जायते, सोऽयं सम्भेदः। तस्मात् पुरा सूर्यप्रकाशवशाच्छायाविशेषो विज्ञायते। तस्मिन्नेव काले सायं-होमार्थं माहवनीय मुद्धरेत्। तत्रोपपत्तिर्मृत्युरित्यादिः। यदिदं तमः, या च छाया, तदुभयं मृत्युस्वरूप मेव; अतः सत्यादित्यप्रकाशे तेनैव ज्योतिषा मृत्युरूपं तमस्तद्रूपां छायां च 'तरति' उल्लङ्घयति *। सेय मुक्ता तत्र वैकल्ये प्रायश्चित्तिः। नित्योद्धरणस्यापि वैकल्यविरोधित्वादुपचरितं प्रायश्चित्तत्वम्॥

पूर्वत्र सप्तत्रिंशे पर्याये पत्नीरहितस्याग्निहोत्रं विधाय, अष्टत्रिंशे पर्याये दर्शपूर्णमासयोरुपवासनिर्णयः, एकोनचत्वारिंशे पर्याये वाचिकं मानसं वाग्निहोत्र मपत्नीकस्य विधाय, चत्वारिंशे वह्न्युद्धरणकालातिक्रमे प्रायश्चित्त मुक्तम्॥

अथैकचत्वारिंशे प्रश्नोत्तरे दर्शयति—"तदाहुर्यस्य गार्हपत्याहवनीयावन्तरेणानो वा रथो वा श्वा वा प्रतिपद्येत, का तत्र प्रायश्चितिरिति? नैनन् मनसि कुर्यादित्याहुरात्मन्यस्य हिता भवन्तीति; तच्चेन् मनसि कुर्वीत, गार्हपत्यादविच्छिन्ना मुदकधारां

---

* आश्व० श्रौ० ३. १२. १६-२०।

हरेत्, तन्तुं तन्वन्नजसो भानु मन्विहीत्याहवनीयात्; सा तत्र प्रायश्चित्तिः"—इति । गार्हपत्याहवनीययोर्मध्ये शकटं वा रथो वा श्वा वा यदागच्छेत्, तदानी मेतच्छकटादिकं मनसि न कुर्यात्; 'अस्य' अनुष्ठातुः 'आत्मनि' स्वकीये पारमार्थिकस्वरूपे वेदान्तप्रतिपाद्ये वस्तुनि 'हिता भवन्ति' तानि शकटादीन्यवतिष्ठन्ते । अतः शकटादिरूपबुद्धिं परित्यज्य परमात्मबुद्धिं कुर्यात् । यद्यात्मविवेकाभावेन तच्छकटादिकं मनसि कुर्वीत, शकटादिबुद्धिं न परित्यजेत्, तदानीं गार्हपत्यादारभ्याहवनीयपर्यन्त मविच्छिन्ना मुदकधारां हरेत् * । तत्र "तन्तुं तन्वन्"—इति (ऋ० सं० १०. ५३. ६.) मन्त्रः ॥

अथ द्विचत्वारिंशे पर्याये कञ्चिद्विचारमुद्भावयति — "तदाहुः कथ मग्नीनन्वादधानोऽन्वाहार्यपचन माहारये३त्, नाहारये३त्? इति"—इति । अन्वाहार्यनामक ओदनः पच्यते यस्मिन् दक्षिणाग्नौ, सोऽयम् 'अन्वाहार्यपचनः'; तस्य 'आहरणम्' अभिज्वलनम्, दृष्टेरादावन्वाधानकाले दक्षिणाग्नेरभिज्वलनं कुर्यान्न वा? इति । विचारार्थं प्लुतिद्वयम् ॥

तत्र निर्णयं दर्शयति — "आहारयेदित्याहुः; प्राणान्वा एषो ऽध्यात्मन् धत्ते, यो ऽग्नीनाधत्ते; तेषा मेषो ऽन्नादतमो भवति, यदन्वाहार्यपचनस्तस्मिन्नेता माहुतिं जुहोत्यग्नये ऽन्नादायान्नपतये स्वाहेति"—इति । 'आहारयेत्' प्रज्वलयेदित्येव मभिज्ञा आहुः । तत्रेय मुपपत्तिः । 'यः' पुमानग्नीनाधत्ते, 'एषः' एव पुमान् 'अध्यात्मन्' स्वात्मस्वरूपे प्राणानेव धारयति । 'यः' अय मन्वाहार्यपचनोऽस्ति, एषः 'तेषाम्' आहितानां चाग्नीनां मध्ये अति-

---

* आश्व० श्रौ० १०. २. १५ ।

श्रयेनान्नादः ; तस्मात् प्राणधारिणा मन्नभक्षणसिद्धये सोऽयं प्रज्वलनीयः ; प्रज्वलिते 'तस्मिन्' दक्षिणाग्नौ "अग्नयेऽन्नादाय"-इत्यादिमन्त्रेण एता माहुतिं जुहुयात् * ॥

वेदनं प्रशंसति—"अन्नादो हान्नपतिर्भवत्यश्नुते प्रजयान्नाद्यं य एवं वेद"-इति । वेदिता स्वयम् 'अन्नादः' रोगराहित्येन भोक्तुं समर्थः, 'अन्नपतिः' अन्नस्वामी च भवति । तथा 'प्रजया' हि पुत्रादिरूपया सहान्नाद्यं प्राप्नोति ॥

पूर्वं गार्हपत्याहवनीययोर्मध्ये शकटादिगमनं निषिद्धम्, तद्यागकर्त्तुरपि मध्ये सञ्चारनिषेधशङ्कायां तद्व्यावर्त्तयितु माह—"अन्तरेण गार्हपत्याहवनीयौ होष्यन्त्सञ्चरेतैतेन ह वा एनं सञ्चरमाण मग्नयो विदुरय मस्मासु होष्यतीत्येतेन ह वा अस्य सञ्चरमाणस्य गार्हपत्याहवनीयौ पाप्मान मपहतः सो ऽपहतपाप्मोर्द्ध्वः स्वर्गं लोक मेतीति वै ब्राह्मण मुदाहरन्ति"-इति । यः पुमान् होष्यति, स पुमान् 'गार्हपत्याहवनीयावन्तरेण' तन्मध्यगतेन मार्गेण सञ्चरेत । 'एतेन' मार्गेण सञ्चरमाणम् 'एनं' होमकर्त्तार मग्नयः स्वमनसैवं विदुः 'अय मस्मासु होष्यति'-इति । तस्मादग्नीना मभीष्टत्वात् तस्य सञ्चारो युक्तः । किञ्च होमार्थं सञ्चरमाणस्य पाप्मान मुभावग्नी विनाशयतः । स च पापरहित ऊर्द्ध्वगामी स्वर्गं लोकं प्राप्नोति । अस्मिन्नर्थे शाखान्तरगतं बहुविधं ब्राह्मण मभिज्ञा उदाहरन्ति ॥

अथ त्रिचत्वारिंशे प्रश्नोत्तरे दर्शयति — "तदाहुः कथ मग्नीन् प्रवत्स्यन्नुपतिष्ठेत, प्रोष्य वा, प्रत्येत्याहरहर्वेति'? तूष्णी मित्याहुः ; तुष्णीं वै श्रेयस आकाङ्क्षन्ते ; ऽथाप्याहुरहरहर्वा एते यजमानस्या-

---

* ब्राह्मणोक्त एष एव मन्त्रः ।

अद्वयोद्वासनात्प्रप्लावनाद् बिभ्यति, तानुपतिष्ठेतैवाभयं वोऽभयं मेऽस्त्वित्यभयं हैवास्मै भवत्यभयं हैवास्मै भवति"–इति। यदाग्निहोत्री स्वगृह एवाग्नीनवस्थाप्य स्वयं ग्रामान्तरं प्रतिवसति, तदानीं 'प्रवत्स्यन्' अग्निहोत्री प्रवासकाले कथ मग्नीनुपतिष्ठेत? अथ वा 'प्रोष्य' ग्रामान्तरे गत्वा 'प्रत्येत्य' पुनरागत्य कथ मुपतिष्ठेत? अथ वा स्वगृहे तिष्ठन्नपि 'अहरहः' प्रतिदिनं कथ मुपतिष्ठेत? इत्येतस्य प्रश्नत्रयस्य तूष्णी मित्यादिक मुत्तरम्। नात्र मन्त्रपाठः कश्चिदस्ति, किन्तु तूष्णी मेवाञ्जल्यादिना विनयं प्रदर्शयन्नुपतिष्ठेत; लोकेऽपि सेवकाः तूष्णीम्भूता एव सन्तो विनीताः 'श्रेयसः' श्रेष्ठान् राजगुर्वादीन् पुरुषान् 'आकाङ्क्षन्ते' आगत्य स्वाभीष्टं प्रार्थयन्ते। तस्मात् तूष्णी मुपस्थान मित्येकः पक्षः।

'अथाप्याहुः' अपि च अभिज्ञाः केचिदेवं पक्षान्तरं वदन्ति। 'अहरहर्वै' प्रतिदिन मेव 'एते' अग्नयो 'बिभ्यति'। भयकारणं यजमानस्येत्यादिनोच्यते। होमे निष्पन्ने सति पश्चादुपयोगाभावात् यजमानस्य अग्निष्वश्रद्धा भवति; अतोऽय मग्नीनुद्वासयेदित्येको भयहेतुः *। 'प्रप्लावयेत्' लौकिकपाकार्थं नीत्वा प्रप्लावनं † वा कुर्यादिति द्वितीयो भयहेतुः। अतो भयपरिहाराय तानेतेन मन्त्रेण सर्वत्रोपतिष्ठेत। हे अग्नयः! मत्तः सकाशाद् 'वः' युष्माकम्

---

* प्रमापणादिवधान्तेषु त्रिंशद्वधनामसु पठित ममरसिंहेन उद्वासन मिति (२. ८. ११२-११५.)। वस्तुत उद्वासनं निर्वासन मित्यनर्थान्तरम्। "प्रोषितश्चेत् प्रेयात् प्राचीनावीती निवान्यां दुग्ध्वा दक्षिणतोऽधिश्रयणोद्वासने"–इति कात्या० श्रौ० २५. ८. ९। 'उष्णे भस्मन्यधिश्रयण मुद्वासनं च गार्हपत्याद् दक्षिणस्यां दिशि कुर्यात्'–इति सटीकायाम्।

† प्रप्लावनशब्दार्थः १भा० २२९पृ० द्रष्टव्यः। "यस्मिन् कुम्भे रुक्जीवं भवति, तं प्रप्लावयति समुद्रे"–इति शत० ब्रा० ४. ४. ५. २०।

अभय मस्तु ; युष्मत्सकाशात् ममाप्यभय मस्त्विति मन्त्रार्थः । एव मुपस्थानं कुर्वते 'अस्मै' यजमानाय अभय मेव भवति । अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ११ (१२) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) एकादशः खण्डः ॥ ११ (१२) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'-नामभाष्ये
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायाः द्वितीयोऽध्यायः ॥

॥ अथ तृतीयाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ हरिश्चन्द्रो ह वैधस ऐक्ष्वाको राजा ऽपुत्र आस तस्य ह शतं जाया बभूवुस्तासु पुत्रं न लेभे तस्य ह पर्वतनारदौ गृह ऊषतुः स ह नारदं पप्रच्छ यन्विमं पुत्र मिच्छन्ति ये विजानन्ति ये च न किंस्वित्पुत्रेण विन्दते तन् म आ चक्ष्व नारदेति स एकया पृष्टो दशभिः प्रत्युवाच ऋण मस्मिन्त्सन्नयत्यमृतत्वञ्च गच्छति पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखं यावन्तः पृथिव्यां भोगा यावन्तो जातवेदसि यावन्तो अप्सु प्राणिनां भूयान् पुत्रे पितुस्ततः शश्वत्पुत्रेण पितरो ऽत्यायन् बहुलं तमः आत्मा हि जज्ञ आत्मनः स इरावत्यतितारिणी किन्नु मलं कि मजिनं कि मु श्मश्रूणि किं तपः पुत्रं ब्रह्माण इच्छध्वं स वै लोको ऽवदावदः अन्नं ह प्राणः शरणं ह वासो रूपं हिरण्यं पशवो विवाहाः सखा ह जाया कृपणं ह दुहिता ज्योतिर्ह पुत्रः परमे व्योमन् पतिर्जायां प्र विशति गर्भो भूत्वा स मातरं तस्यां पुनर्नवो भूत्वा दशमे

मासि जायते तज्जाया जाया भवति यदस्यां जायते पुनः आभूतिरेषा भूतिर्बीज मेतन्निधीयते देवाश्चैता मृषयश्च तेजः समभरन्महत् देवा मनुष्यानब्रुवन्नेषा वो जननी पुनः नापुत्रस्य लोकोऽस्तीति तत् सर्वे पशवो विदुः तस्मात्तु पुत्रो मातरं स्वसारं चाधिरोहति एष पन्था उरुगायः सुशेवो यं पुत्रिण आ क्रमन्ते विशोकाः तं पश्यन्ति पशवो वयांसि च तस्मात् ते मात्रापि मिथुनीभवन्तीति ह स्मा आख्याय ॥ * १ (१३) ॥

॥ श्रीगणेशाय नमः ॥

आहिताग्नेर्मृतावग्निहोत्राङ्गे विकले तथा ।
प्रायश्चित्त मपत्नीकहोम इत्यादि वर्णितम् ॥ १ ॥
उक्तं द्वात्रिंशदध्यायैः कर्म वर्णत्रयान्वितम् ।
अथ त्वष्टभिरध्यायैर्वर्ण्यते राजकर्मकम् ॥ २ ॥
तत्र क्रतौ राजसूये बह्विष्टिपशुसोमके ।
मध्येऽभिषेचनीयेऽह्नि शौनःशेपं श्रुतं श्रुतौ ॥ ३ ॥
त्रयस्त्रिंशो ऽय मध्यायः शौनःशेपेति नामवान् ।
हरिश्चन्द्रकथा तत्र कथिता बहुपुत्रदा ॥ ४ ॥

तदेतदुपाख्यानं दर्शयति— "हरिश्चन्द्रो ह वैधस ऐक्ष्वाको राजाऽपुत्र आस ; तस्य ह शतं जाया बभूवुस्, तासु पुत्रं न

---

* ङ-च-पुस्तकयोरेव स्वरचिह्नानि सन्ति, नान्येषु पुस्तकेष्विति ।

लेभे ; तस्य ह पर्वतनारदौ गृह ऊषतुः ; स ह नारदं पप्रच्छ”–इति। हरिश्चन्द्रो नाम राजर्षिः ; “प्रस्कण्वहरिश्चन्द्रावृषी”–इति (६.१.१५३.) पाणिनिना सूत्रितत्वात्। स च वेधसो नृपतेः पुत्रः, इक्ष्वाकुवंशोद्भवो राजा पुत्रहीनः आस। स च शतसङ्ख्यानां मध्ये कस्याञ्चिदपि जायायां पुत्रं न लेभे। तस्य राज्ञो गृहे पर्वतनारद-नामानौ यावृषी, तौ निवासं चक्रतुः। तयोर्मध्ये नारद ऋषि मेतया गाथया राजा पप्रच्छ॥

तां गाथां दर्शयति— “यं न्विमं * पुत्र मिच्छन्ति, ये विजानन्ति, ये च न ; किंस्वित्पुत्रेण विन्दते, तन्म आ चक्ष्व नारदेति”–इति। ‘ये’ देवमनुष्यादयो ‘वि जानन्ति’ विवेकज्ञानयुक्ताः, ‘ये’ च पश्वादयो ‘न वि जानन्ति’ विवेकज्ञानरहिताः, ते सर्वेऽपि ‘नु’ क्षिप्रं ‘यम् इमं’ पुत्र मिच्छन्ति, तेन पुत्रेण ‘किंस्विद्विन्दते’ किं नाम फलं पिता लभते? हे नारद! ‘मे’ मह्यं ‘तत्’ फलम् आ चक्ष्व। ‘इति’ राज्ञः प्रश्नः॥

तस्योत्तर मवतारयति— “स एकया पृष्टो दशभिः प्रत्युवाच” –इति। ‘सः’ नारदः ‘एकया’ गाथया पृष्टः सन् ‘दशभिः’ गाथाभिः प्रत्युत्तर मुक्तवान्॥

तत्र प्रथमां गाथा माह— “ऋण मस्मिन्त्सन्नयत्यमृतत्वञ्च गच्छति, पिता पुत्रस्य जातस्य, पश्येच्चेज्जीवतो मुखम्”–इति। उत्पन्नस्य सुखेन जीवतः पुत्रस्य मुखं पिता यदि पश्येत्, तदानीम् ‘अस्मिन्’ पुत्रे स्वकीय मृणं लौकिकं वैदिकं च ‘सन्नयति’ सम्यगवस्थापयति। लौकिकस्य अवस्थापनात् पुत्रपौत्रादिभिः ऋणं प्रत्यर्पणीय मिति स्मृतिकारा आहुः। वैदिकं तु “त्रिभि-

---

* मूलपुस्तकेषु सर्वेष्वेव ‘य न्विमं’–इति लुप्तानुस्वारपाठः।

र्ऋण वा जायते"–इत्यादि श्रुत्युक्तं पूर्व मेवोदाहृतम् (४३पृ०)। तस्य च पुत्रावस्थापनं सम्प्रत्तिनामकेन सम्पद्यते । तच्च कर्म वाजसनेयिभिराम्नातम् —"अथातः सम्प्रत्तिः । यदा प्रेष्यन् मन्यते, अथ पुत्र माह, त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति । स पुत्रः प्रत्याह । अहं ब्रह्म अहं लोक अहं यज्ञः"–इति (शत० ब्रा० १४. ४. ३. २५. ❊)। 'ब्रह्म' मया कर्त्तव्यं वेदाध्ययनम् , मयानुष्ठेयो यज्ञश्च, मया सम्पाद्या उत्तमा लोकाश्चेत्येतत् सर्वं पुत्रेण त्वयैव सम्पादनीय मिति पितृवाक्यस्यार्थः । सर्व महं सम्पादयिष्यामीति पुत्रवाक्यस्यार्थः । अत्राप्यारण्यककाण्डे सङ्क्षिप्य सन्दर्शयिष्यते — "सोऽस्याय मात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते"–इति (ऐ० आ० २.५.४.१०.)। एव मृणं पुत्रे समर्पयति । तथैव 'अमृतत्वं' मरणरहितं मुक्तिपदं च गच्छति ; पुत्रार्पितलौकिकवैदिकभारस्याविघ्नेन तत्त्वज्ञानसम्पादनात् ॥

द्वितीयां गाथा माह— "यावन्तः पृथिव्यां भोगा, यावन्तो जातवेदसि , यावन्तो अप्सु प्राणिनां, भूयान् पुत्रे पितुस्ततः"–इति । 'पृथिव्यां भोगाः' स्वस्य निवासादयः , 'जातवेदसि' अग्नौ भोगा दहनपचनादयः , 'अप्सु' भोगाः स्नानपानादयः। प्राणिना मेते सर्वे भोगा यावन्तः सन्ति । ततस्तावद्भ्यः सर्वेभ्यो भोगेभ्यो 'भूयान्' अभ्यधिकः पितुः पुत्रे भोगो विद्यते ; अत्यन्तसुखहेतुत्वात् । तथा च आहुः— "पुत्रोत्पत्तिविपत्तिभ्यां नापरं सुखदुःखयोः"–इति ॥

❊ "अथ त्रयो वाव लोकाः। मनुष्यलोकः पितृलोको देवलोक इति। सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो, नान्येन कर्मणा ; कर्मणा पितृलोको, विद्यया देवलोको ; देवलोको वै लोकानां श्रेष्ठस्तस्माद् विद्यां प्रशंसन्ति"–इति च तत्पुरस्तात्तत्रैव।

तृतीयां गाथा माह—"शश्वत् पुत्रेण पितरो ऽत्यायन् बहुलं तमः, आत्मा हि जज्ञ आत्मनः, स इरावत्यतितारिणी"-इति। 'पितरः' जनकाः उत्पन्नेन पुत्रेण 'शश्वत्' सर्वदा लोकद्वयेऽपि 'बहुलम्' अभ्यधिकं 'तमः' ऐहिकमामुष्मिकञ्च दुःखम् 'अत्यायन्' अतिक्रामन्ति। तथा च बौधायन आह—

"पुदिति नरकस्याख्या, दुःखञ्च नरकं विदुः।
पुदस्त्राणात्ततः पुत्त्र मिहेच्छन्ति परत्र च॥"-इति *।

किञ्च 'हि' यस्मात् कारणात् पितुः पुत्र उत्पन्न इत्युक्ते सति पिता स्वस्मात् स्वय मेव 'जज्ञे' उत्पन्न इत्युक्तं भवति। ततः पिता यथा 'स्वयं' स्वकीयं दुःखं विनाशयति, तथा पुत्रोऽप्येतदीयं दुःखं विनाशयतीति द्रष्टव्यम्। तस्मात् 'सः' पुत्रः 'इरावती' अन्नयुक्ता 'अतितारिणी' नदीसमुद्रादेरतितरणहेतुर्नौरिति शेषः। यथा नौः दुर्घटं नद्यादिकं तारयति, एवं पुत्रोऽप्यैहिकमामुष्मिकञ्च दुःखं तारयतीत्यर्थः॥

चतुर्थीं गाथा माह— "किन्नु मलं, कि मजिनं, किं सु श्मश्रूणि, किं तपः; पुत्रं ब्रह्माण इच्छध्वं, स वै लोको ऽवदावदः"-इति। अथ मलाजिनश्मश्रुतपःशब्दैः आश्रमचतुष्टयं विवक्षितम्। मलरूपाभ्यां शुक्रशोणिताभ्यां संयोगात् मलशब्देन गार्हस्थ्यं विवक्षितम्। कृष्णाजिनसंयोगादजिनशब्देन ब्रह्मचर्यं विवक्षितम्। क्षौरकर्मराहित्यात् श्मश्रुशब्देन वानप्रस्थ्यं विवक्षितम्। इन्द्रियनियमसद्भावात् तपःशब्देन पारिव्राज्यं विवक्षितम्। 'मल" गार्हस्थ्यं 'किन्नु' किं नाम सुखं करिष्यति? न किञ्चि-

---

* एष श्लोको हरिवंशेऽप्युद्धृतः। मनुसंहितायाञ्चैव मेव ९. १३८। महा० भा० १४, २७५२। रामा० २. १०७. १२। मार्क० पु० ७५. १६।

दित्यर्थः। एव मुत्तरत्रापि योज्यम्। हे 'ब्रह्माणः' विप्राः! विप्रक्षत्रियाद्याः! सर्वे यूयं सुखहेतुत्वात् पुत्र मिच्छध्वम्। 'स वै' स एव पुत्रः 'अवदावदो लोकः' वदितु मयोग्यानि निन्दावाक्यान्यवदाः, तैर्वाक्यैर्नोद्यते न कथ्यत इत्यवदावदः; एवं प्रघट्टेन तेन कथ्यत इति 'अवदावदः' दोषराहित्यात् निन्दानर्ह इत्यर्थः। तादृशो 'लोकः' भोगहेतुः पुत्रः। तस्मादाश्रमेभ्योऽप्याधिक्येन पुत्रेच्छा कर्त्तव्या। यद्यपि हरिश्चन्द्र एवात्र प्रष्टा, तथापि तेन सह ऋषीणां बहूनां सभाया मवस्थानात् ब्रह्माण इति सम्बोधनम्॥

पञ्चमीं गाथा माह— "अन्नं ह प्राणः, शरणं ह वासो, रूपं हिरण्यं, पशवो विवाहाः; सखा ह जाया कृपणं ह दुहिता, ज्योतिर्ह पुत्रः, परमे व्योमन्"—इति। अन्नादयो लोके सुखहेतुत्वेन प्रसिद्धाः। तथा हि शरीरे प्राणावस्थितहेतुत्वादन्न मेव प्राणः। वासः शीतोपद्रवाद्रक्षकत्त्वेन 'शरणं' गृहसमानम्। 'हिरण्य' कर्णाभरणादिकं दृष्टिप्रियत्वाद् रूपसम्पादकम्। 'पशवः' गवाश्वादयः विवाहविशेषेण निर्वाहकाः। जाया भोगे सहकारित्वात् 'सखा ह' सखिस्वरूपैव। एव मेते सुखहेतुत्त्वेन प्रसिद्धा अपि तात्कालिक मल्प मेव सुखं प्रयच्छन्ति। 'दुहिता ह' पुत्री इति तु 'कृपणं' केवलदुःखकारित्वाद् दैन्यहेतुः। तथा च स्मर्यते—

"भवे स्वजनदुःखकारिका सम्प्रदानसमये ऽर्थहारिका।
यौवनेऽपि बहुदोषकारिका दारिका हृदयदारिका पितुः॥"—

इति। 'पुत्रो ह' पुत्रस्तु ज्योतिःस्वरूपम्; तमोनिवारकत्त्वेन प्रकाशरूपत्त्वेन। स हि पितरं 'परमे व्योमन्' उत्कृष्टे आकाशे परब्रह्मस्वरूपे अवस्थापयति। "आकाशस्तल्लिङ्गात्"—इत्यनेन (१. २. २२.) व्याससूत्रेण आकाशव्योमादिशब्दानां ब्रह्मपरत्वं

निर्णीतम् *। पुत्रस्य च ब्रह्मज्ञानहेतुत्वं पूर्वं मेवामृतत्वञ्च गच्छतीत्यत्र प्रतिपादितम् (६१पृ० १८पं०)॥

षष्ठीं गाथा माह— "पतिर्जायां प्रविशति, गर्भो भूत्वा स मातरम्; तस्यां पुनर्नवो भूत्वा, दशमे मासि जायते"–इति। पत्युराकारद्वय मस्ति,— वर्त्तमानपुरुषाकार एकः, रेतोरूपेण गर्भाकारो द्वितीयः। जायाया अपि आकारद्वय मस्ति,— पतिरूप माकारं प्रति जाया भवति, गर्भरूप माकारं प्रति माता भवति। अतः 'सः' तादृशः पतिः, स्वयं रेतोरूपेण गर्भो भूत्त्वा, पूर्वं मवस्थितां जायां भविष्यदाकारेण मातरं सतीं प्रविशति। 'तस्यां' मातरि 'पुनर्नवो भूत्वा' पूर्वं मन्यस्यां मातरि उत्पन्नो जरठः, इदानीं पुनर्नूतनबालो भूत्वा 'तस्याम्' इदानीन्तन्या मस्यां मातरि गर्भपाके सति दशमे मासि उत्पद्यते। तस्मात् पुत्रः स्वस्मात् अन्यो न भवति॥

सप्तमीं गाथा माह—"तज्जाया जाया भवति, यदस्यां जायते पुनः; आभूतिरेषा भूतिर्बीज मेतन्निधीयते"–इति। 'यद्' यस्मात् कारणात् 'अस्यां' गर्भधारिण्याम् 'अयं' पिता पुत्ररूपेण पुनर्जायते, 'तत्' तस्मात् कारणात् लोकप्रसिद्धा या जायास्ति, सा जायते ऽस्या मिति व्युत्पत्त्या जायाशब्दवाच्या भवति। किञ्च एषा भूत्याभूतिशब्दाभ्या मभिधीयते। भवत्यस्यां पुत्ररूपेण पतिरित्येषा 'भूति'-शब्दवाच्या; रेतोरूपेणागत्य अस्यां पुत्ररूपेण भवतीति

---

* "आकाश इति हीवाचेत्यत्र खं ब्रह्म वात्र खम्।
शब्दस्य तत्र रूढत्वात्, वायादेः सर्जनादपि॥
साकाशजगदुत्पत्तिहेतुत्वाच्छ्रौतरूढितः।
एवकारादिना चात्र ब्रह्मैवाकाशशब्दितम॥"–इति तत्राष्टमाधिकरणम्।

'आभूति'-शब्दवाच्या। 'एतत्' एतस्यां स्त्रियां 'बीजं' रेतोरूपं 'निधीयते' प्रक्षिप्यते। तस्मादुक्ताः शब्दा उपपद्यन्ते॥

अष्टमीं गाथा माह— "देवाश्चैता ऋषयश्च, तेजः समभरन्महत्; देवा मनुष्यानब्रुवन्नेषा वो जननी पुनः"-इति। 'एताम्' एतस्यां योषिति देवाश्च महर्षयश्च स्वकीयं 'महत् तेजः' रेतोरूपं सारं 'समभरन्' पुत्रोत्पादनाय सम्पादितवन्तः। स्वय मेव सम्पाद्य ततो मनुष्यानित्यब्रुवन्। हे मनुष्याः! येय मिदानीं जायारूपेण वर्त्तते, सेयं पुनः 'वः' युष्माकं पुत्ररूपे जन्मनि जननी भवति॥

नवमीं गाथा माह— "नापुत्रस्य लोकोऽस्तीति, तत् सर्वे पशवो विदुः; तस्मात् तु पुत्रो मातरं, स्वसारं चाधिरोहति"-इति। 'लोकः' लोकजन्यं सुखम्, अपुत्रस्य नास्ति; न हि पुत्रदर्शनेन यत् सुखं, तदन्यदर्शनेन क्वचिदपि दृश्यते। 'इति' यदस्ति, तत् 'सर्वे' गोमहिष्यादयो जानन्ति यस्मात्, तस्मादेव कारणात् पशुजातः 'पुत्रः' वत्सः स्वकीयां मातरं भगिनीं वा पुत्रोत्पादनार्थं मधिरोहति॥

दशमीं गाथा माह— "एष पन्था उरुगायः सुशेवो, यं पुत्रिण आक्रमन्ते विशोकाः; तं पश्यन्ति पशवो वयांसि च, तस्मात्ते मात्रापि मिथुनीभवन्ति"-इति। 'पुत्रिणः' पुत्रवन्तो देवमनुष्यादयो 'विशोकाः' शोकरहिताः सन्तो 'यं' पन्थानं सुखानुभवरूपं मार्गम् 'आक्रमन्ते' प्राप्नुवन्ति, 'एष पन्थाः' पुत्रसुखानुभवरूपो मार्गः 'उरुगायः' उरुभिर्महद्भिः शास्त्रज्ञैः राजामात्यादिभिश्च गीयते। तथा 'सुशेवः' सुष्ठु सेवितुं योग्यः; सुखाधिक्यस्य विद्यमानत्वात्। 'तं' पुत्रसुखानुभवरूपं 'पशवः' गवादयो 'वयांसि' पक्षिणः 'पश्यन्ति' जानन्ति। तस्मात् 'ते' पशुपक्ष्यादयः पुत्रसुखार्थं

'माता' सहापि मिथुनीभवन्ति, किमुत अन्यया स्त्रिया सहेत्यर्थः ॥

नारदेनोक्तां दशगाथां निगमयति— "इति ह स्मा आख्याय" –इति। 'इति ह' अनेनैव प्रकारेण ('स्मै') 'अस्मै' तस्मै हरिश्चन्द्राय 'आख्याय' उत्तरमभिधायावस्थित इति शेषः ॥ १ (१३)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां तृतीयाध्याये
(त्रयस्त्रिंशाध्याये) प्रथमः खण्डः ॥ १ (१३) ॥

॥ अथ द्वितीयः खण्डः ॥

अथैन मुवाच॑ वरुणं राजान मुपधाव॑ पुत्रो मे जायतां॑ तेन त्वा यजा इति॑ तथेति॑ स वरुणं राजान मुपससार॑ पुत्रो मे जायतां॑ तेन त्वा यजा इति॑ तथेति॑ तस्य ह पुत्रो जज्ञे॑ रोहितो नाम॑ तं होवाचाजनि वै ते पुत्रो॑ यजस्व मानेनेति॑ स होवाच॑ यदा वै पशुर्निर्दशो भवत्य॑थ स मेध्यो भवति॑ निर्दशो न्वस्त्वथ त्वा यजा इति॑ तथेति॑ स ह निर्दश आस॑ तं होवाच॑ निर्दशो न्वभूद्॑यजस्व मानेनेति॑ स होवाच॑ यदा वै पशोर्दन्ता जायन्ते॑ ऽथ स मेध्यो भवति॑ दन्ता न्वस्य जायन्ता॑ मथ त्वा यजा इति॑ तथेति॑ तस्य ह

दन्ता जज्ञिरे॑ तं होवाचाज्ञत वा अस्य दन्ता॑ यजस्व मानेनेति॑ स होवाच॑ यदा वै पशोर्दन्ताः पद्यन्ते॑ ऽथ स मेध्यो भवति॑ दन्ता न्वस्य पद्यन्ता॑ मथ त्वा यजा इति॑ तथेति॑ तस्य ह दन्ताः पेदिरे॑ तं होवाचा॑पत्सत वा अस्य दन्ता॑ यजस्व मानेनेति॑ स होवाच॑ यदा वै पशोर्दन्ताः पुनर्जायन्ते॑ ऽथ स मेध्यो भवति॑ दन्ता न्वस्य पुनर्जायन्ता॑ मथ त्वा यजा इति॑ तथेति॑ तस्य ह दन्ताः पुनर्जज्ञिरे॑ तं होवाचाज्ञत वा अस्य पुनर्दन्ता॑ यजस्व मानेनेति॑ स होवाच॑ यदा वै क्षत्रियः सान्नाहुको भवत्य॑थ स मेध्यो भवति॑ सन्नाहं नु प्राप्नोत्व॑थ त्वा यजा इति॑ तथेति॑ स ह सन्नाहं प्राप॑त्तं होवाच सन्नाहं नु प्राप्नो॑द्यजस्व मानेनेति॑ स तथेत्युक्त्वा॑ पुत्र मामन्त्रयामास॑ ततायं वै मह्यं त्वा मददाद्धन्त त्वयाहमिमं यजा इति॑ स ह नेत्युक्त्वा॑ धनुरादायारण्य मुपातस्थौ॑ स संवत्सर मरण्ये चचार॑ ॥ २ (१४) ॥

पुत्रनिमित्तलाभप्रतिपादका नारदोक्ता दश गाथा उदाहृत्य पुत्रजन्मोपायोपदेशपरं नारदवाक्य मवतारयति— "अथैन मुवाच,— वरुणं राजान मुपधाव, पुत्रो मे जायतां तेन त्वा यजा इति"—इति। 'अथ' पुत्रेच्छानिमित्तकथनानन्तरम् 'एनं' पुत्रार्थिनं हरिश्चन्द्रं नारद उवाच। हे हरिश्चन्द्र! वरुणं राजानम् 'उपधाव' प्रार्थयस्व। येन प्रकारेण प्रार्थनीयः, सोऽभिधीयते—

हे वरुण ! त्वत्प्रसादात् मे पुत्रो जायतां, ततस्तेन पुत्रेण 'त्वां यजै' त्वा मुद्दिश्य यज्ञं करवाणीति ॥

प्रार्थनप्रकारं नारदोपदेश मुक्त्वा हरिश्चन्द्रवृत्तान्तं दर्शयति— "तथेति ; स वरुणं राजान मुपससार, पुत्रो मे जायतां तेन त्वा यजा इति ; तथेति ; तस्य ह पुत्रो जज्ञे रोहितो नाम"–इति । नारदोपदेश मङ्गीकृत्य हरिश्चन्द्रो वरुणम् 'उपससार' प्रार्थयामास । 'सः' वरुणोऽपि तथास्त्विति तदीयपुत्रोत्पत्त्यै वरं दत्तवान् । तेन च वरेणोत्पन्नस्य 'रोहितः'–इत्येतन्नामाभूत् ॥

अथ बहुभिः पर्यायैर्वरुणस्योक्तिर्हरिश्चन्द्रस्य प्रत्युक्तिश्चेत्युभयं प्रतिपाद्यते ; तत्र प्रथमं पर्यायं दर्शयति— "तं होवाचाजनि वै ते पुत्रो यजस्व मानेनेति ; स होवाच , यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति, निर्दशो न्वस्त्वथ त्वा यजा इति ; तथेति"–इति । 'तं' हरिश्चन्द्रं वरुण उवाच । हे हरिश्चन्द्र ! ते पुत्रः 'अजनि वै' उत्पन्न एव, अनेन पुत्रेण मा मुद्दिश्य यागं कुर्विति । एवं वरुणेनोक्ते हरिश्चन्द्रः पुनः प्रत्युवाच । यागार्थः पशुर्यदा निर्दशो भवति, तदा स पशुः 'मेध्यः' यागयोग्यो भवति । निर्गतानि अशौचदिनानि दशसङ्ख्याकानि यस्मात् पशोः सोऽयं 'निर्दशः' । तस्मादयं 'नु' क्षिप्रं निर्दशोऽस्तु, 'अथ' अनन्तरं त्वां प्रति अहं 'यजै' इत्येतद्वाक्यम् । वरुणः 'तथा अस्तु' इति अङ्गीचकार ॥

द्वितीय मुक्तिप्रत्युक्तिपर्यायं दर्शयति— "स ह निर्दश आस ; तं होवाच, निर्दशो न्वभूद्यजस्व मानेनेति ; स होवाच, यदा वै पशोर्दन्ता जायन्ते ऽथ स मेध्यो भवति ; दन्ता न्वस्य जायन्ता मथ त्वा यजा इति ; तथेति"–इति । दशदिनाशौचापगमे शुद्ध-

त्वात् यथा यागयोग्यत्वं, तथा दन्तोत्पन्नत्वादवयवसम्पूर्त्या यागयोग्यत्व मित्यभिप्रायः। स्पष्ट मन्यत् ॥

तृतीयं पर्यायं दर्शयति—"तस्य ह दन्ता जज्ञिरे; तं होवाचाज्ञत वा अस्य दन्ता यजस्व मानेनेति; स होवाच, यदा वै पशोर्दन्ताः पद्यन्तेऽथ स मेध्यो भवति; दन्ता न्वस्य पद्यन्ता मथ त्वा यजा इति; तथेति"—इति। 'अज्ञत वै' जाता एव 'पद्यन्ते' पतन्ति। प्रथमोत्पन्नानां दन्ताना मस्थायित्वेन मुख्यपश्ववयवत्वाभावात्। तथात्वे सति पशोर्मेध्यत्वम् ॥

चतुर्थं पर्यायं दर्शयति — "तस्य ह दन्ताः पेदिरे; तं होवाचापत्सत वा अस्य दन्ता, यजस्व मानेनेति; स होवाच, यदा वै पशोर्दन्ताः पुनर्जायन्तेऽथ स मेध्यो भवति; दन्ता न्वस्य पुनर्जायन्ता मथ त्वा यजा इति; तथेति"—इति। 'अपत्सत वै' पतिताः। पुनरुत्पन्नानां दन्तानां स्थिरत्वेन सम्पूर्णावयवत्वात् पशोर्मेध्यत्वम् ॥

पञ्चमं पर्यायं दर्शयति— "तस्य ह दन्ताः पुनर्जज्ञिरे; तं होवाचाज्ञत वा अस्य पुनर्दन्ता यजस्व मानेनेति; स होवाच, यदा वै क्षत्रियः सान्नाहुको भवत्यथ स मेध्यो भवति; सन्नाहं नु प्राप्नोत्वथ त्वा यजा इति; तथेति"—इति। 'अज्ञत वै' जाता एव। पश्वन्तरस्य पुनर्दन्तोत्पत्तिमात्रेण मेध्यत्वेऽपि अस्य पशोः क्षत्रियत्वात् स्वजात्युचितधनुर्बाणकवचादिसन्नाहशीलित्वे सति जात्युचितव्यापारसम्पूर्त्तौ मेध्यत्वम्; तस्मात् 'नु' क्षिप्र मेवासौ सन्नाहं प्राप्नोतु, अनन्तर मेव यजा इत्युत्तरं वरुणोऽङ्गीचकार ॥

षष्ठं पर्यायं दर्शयति— "स ह सन्नाहं प्रापत्; तं होवाच, सन्नाहं नु प्राप्नोद्यजस्व मानेनेति; स तथेत्युक्त्वा पुत्र मामन्त्रया-

भास; ततायं वै मह्यं त्वा मददादिन्त त्वयाह मिमं यजा इति"–इति। सन्नाहप्राप्तेरूर्द्ध्वं 'सः' हरिश्चन्द्रो वरुणोक्ति मङ्गीकृत्य पुत्र मामन्त्र्यैव मुवाच। उपलालनार्थं पुत्रे पितृवाचि तत-शब्द-प्रयोगः। हे 'तत' पुत्र! 'अयम्' एव वरुणो मह्यं 'त्वां' पुत्रं वरेण दत्तवान्; 'हन्त' दुष्टः अहम् 'इमं' वरुणं यत् 'त्वया' पुत्रेण 'यजै' यागरूपां पूजां करवाणीति हरिश्चन्द्रस्योक्तिः॥

अथ रोहितनाम्नः पुत्रस्य कृत्यं दर्शयति— "स ह नेत्युक्त्वा धनुरादायारण्य मपातस्थौ; स संवत्सर मरण्ये चचार"–इति। 'स ह' स खलु रोहिताख्यः पुत्रः पितुर्वाक्यं निषिध्य, स्वरक्षणार्थं धनुः स्वीकृत्य अरण्यं प्रत्युपगतोऽभूत्। कस्मिंश्चिदरण्ये नैरन्तर्येण 'सः' रोहितः संवत्सरं चचार॥ २ (१४)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां तृतीयाध्याये
(त्रयस्त्रिंशाध्याये) द्वितीयः खण्डः॥ २ (१४)॥

॥ अथ तृतीयः खण्डः॥

अथ हैक्ष्वाकं वरुणो जग्राह॑ तस्य होदरं जज्ञे॑ तदु ह रोहितः शुश्राव॑ सोऽरण्याद् ग्राम मेयाय त॑ मिन्द्रः पुरुषरूपेण पर्य्येत्योवाच॑ नाना श्रान्ताय श्रीरस्तीति॑ रोहित शुश्रुम॑ पापो* नृषद्वरो जन॑ इन्द्र इच्च-

---

* "शुश्रुमापापी" घ, च।

रतः सखा॑ चरैवेति चरैवेति॑ वै * मा ब्राह्मणोऽवोचदिति ह॑ द्वितीयं संवत्सर मरण्ये चचार॑ सो ऽरण्याद् ग्राम मेयाय॑ त मिन्द्रः पुरुषरूपेण पर्येत्योवाच॑ पुष्पिण्यौ चरतो जङ्घे॑ भूष्णुरात्मा फलग्रहिः॑ शेरे ऽस्य सर्वे पाप्मानः॑ श्रमेण प्रपथे हता॑श्चरैवेति चरैवेति॑ वै मा ब्राह्मणोऽवोचदिति ह॑ तृतीयं संवत्सर मरण्ये चचार॑ सो ऽरण्याद् ग्राम मेयाय॑ त मिन्द्रः पुरुषरूपेण पर्येत्योवाच॑ आस्ते भग आसीन॑स्योर्द्ध्वस्तिष्ठति तिष्ठतः॑ शेते निपद्यमानस्य॑ चराति चरतो भग॑श्चरैवेति चरैवेति॑ वै मा ब्राह्मणोऽवोचदिति ह॑ चतुर्थं संवत्सर मरण्ये चचार॑ सो ऽरण्याद् ग्राम मेयाय॑ त मिन्द्रः पुरुषरूपेण पर्येत्योवाच॑ कलिः शयानो भवति॑ सञ्जिहानस्तु द्वापरः॑ उत्तिष्ठंस्त्रेता भवति॑ कृतं सम्पद्यते चरं॑श्चरैवेति चरैवेति॑ वै मा ब्राह्मणोऽवोचदिति ह पञ्चमं संवत्सर मरण्ये चचार॑ सोऽरण्याद् ग्राम मेयाय॑ त मिन्द्रः पुरुषरूपेण पर्येत्योवाच॑ चरन्वै मधु विन्दति॑ चरन्त्स्वादु मुदुम्बरं॑ सूर्यस्य पश्य श्रेमाणं॑ यो न तन्द्रयते॑ चरं॑श्चरैवेति चरैवेति॑ वै मा ब्राह्मणोऽवोचदिति ह षष्ठं संवत्सर मरण्ये चचार॑ सोऽजीगर्त्तं सौयवसि॑ मृषि॑मशनया परीत मरण्य उपेयाय॑ तस्य ह त्रयः

---

* "चरैवेति वै॑"–इति ख, ग। एव मितोत्तरत्रापि चिह्नस्थानपार्थक्यम्।

पुत्रा आसुः शुनःपुच्छः शुनःशेपः शुनोलाङ्गूल इति तं होवाच ऋषे ऽहं ते शतं ददाम्यह मेषा मेकेनात्मानं निष्क्रीणा इति स ज्येष्ठं पुत्रं निगृह्णान उवाच न त्विम मिति नो एवेम मिति कनिष्ठं माता तौ ह मध्यमे सम्पादयाञ्चक्रतुः शुनःशेपे तस्य ह शतं दत्त्वा स त मादाय सो ऽरण्याद् ग्राम मेयाय स पितर मेत्योवाच तत हन्ताह मनेनात्मानं निष्क्रीणा इति स वरुणं राजान मुपससारानेन त्वा यजा इति तथेति भूयान् वै ब्राह्मणः क्षत्रियादिति वरुण उवाच तस्मा एतं राजसूयं यज्ञक्रतुं प्रोवाच त मेत मभिषेचनीये पुरुषं पशु मालेभे ॥ ३ (१५) ॥

रोहितस्यारण्ये संवत्सरचरणानन्तरभाविनं हरिश्चन्द्रादीनां वृत्तान्तं दर्शयति — "अथ हैक्ष्वाकं वरुणो जग्राह, तस्य होदरं जज्ञे ; तदु ह रोहितः शुश्राव ; सो ऽरण्याद् ग्राम मेयाय ; त मिन्द्रः पुरुषरूपेण पर्येत्योवाच, नाना श्रान्ताय श्रीरस्तीति रोहित शुश्रुम, पापो नृषद्वरो जन, इन्द्र इच्चरतः सखा, चरैवेति" —इति । 'अथ' रोहितस्यारण्ये संवत्सरवासानन्तर मेव 'ऐक्ष्वाकं' इक्ष्वाकुवंशोत्पन्नं हरिश्चन्द्रं 'वरुणः' देवो रोगरूपेण जग्राह । वरुणेन गृहीतस्य हरिश्चन्द्रस्य 'उदरं जज्ञे' जलेन पूरित मुच्छूनं महोदरनामकं रोगस्वरूप मुत्पन्नम् । 'तदु ह' तदपि सर्वं मरण्ये स्थितो 'रोहितः' पुत्रो मनुष्यमुखाच्छुश्राव । श्रुत्वा च 'सः' रोहितः पितरं द्रष्टु मरण्याद् ग्रामं प्रत्याजगाम । आगच्छन्तं

रोहितं मार्गमध्ये इन्द्रः केन चिद् ब्राह्मणरूपेण प्राप्य इद मुक्तवान्,—आ समन्ताच्छ्रान्त आश्रान्तः, सर्वत्र पर्यटनेन श्रान्तिं प्राप्तः, तद्विपरीतो ऽनाश्रान्तः एकत्रैव निवासशीलः, तादृशाय ; तथाविधस्य पुरुषस्य 'श्रीः' बहुविधा सम्पन्नास्ति । यद्वा, नानेति पदच्छेदः । 'श्रान्ताय' सर्वत्र पर्यटनेन श्रान्तस्य 'नाना श्रीः' बहुविधा सम्पदस्ति । 'इति' अनेन प्रकारेण रोहित! वयं नीतिकुशलानां पुरुषाणां मुखात् शुश्रुम । 'वरो जनः' विद्यादिभिः श्रेष्ठो ऽपि पुरुषः 'नृषत् पापः' नृषु मनुष्येषु सीदतीति 'नृषत्' श्रेष्ठोऽपि बन्धुगृहेषु सर्वदावस्थितः तैरवज्ञातः 'पापः' तुच्छो भवेत् । अतस्तव पितृगृहे वासो न युक्तः । न च अरण्ये चरतो मम सहायो नास्तीति शङ्कनीयम् ; 'इन्द्र एव' परमेश्वर एव 'चरतः' तव सखा भविष्यति । तस्मात् 'चरैव' सर्वथा अरण्ये चरस्वेति । एव मुवाच । एवं बहुष्वपि पर्यायेषु द्रष्टव्यम् ॥

तत्रेन्द्ररोहितयोः संवादे द्वितीयं पर्यायं दर्शयति— "चरैवेति वै मा ब्राह्मणो ऽवोचदिति ह द्वितीयं संवत्सर मरण्ये चचार ; सो ऽरण्याद् ग्राम मेयाय ; त मिन्द्रः पुरुषरूपेण पर्येत्योवाच, पुष्पिण्यौ चरतो जङ्घे, भूष्णुरात्मा फलग्रहिः, शेरे ऽस्य सर्वे पाप्मानः, श्रमेण प्रपथे हताश्चरैवेति"–इति । ब्राह्मणरूपस्येन्द्रस्य वाक्यं श्रुत्वा ब्राह्मणोऽय मरण्ये चरैवेत्येवं मा मुक्तवानिति मनसि ब्राह्मणवाक्ये महान्त मादरं कृत्वा पुनरप्येकं संवत्सर मरण्ये चरित्वा पश्चात् पितरं द्रष्टुं ग्रामे त मागच्छन्तं पुनरपि इन्द्रो ब्राह्मणरूपेण आगत्य एव मुवाच । 'चरतः' पर्यटनं कुर्वतः पुरुषस्य 'जङ्घे' 'पुष्पिण्यौ' भवतः । यथा पुष्पयुक्ता वृक्षशाखा लता वा, सुगन्धोपेता सेव्या भवति, एवं चरतो जङ्घे श्रमजयेन सेव्ये

भवतः । तथैव 'आत्मा' मध्यदेहः 'भूष्णुः' वर्द्धिष्णुः 'फलग्रहिः' आरोग्यरूपं फलं गृह्णाति । तथैव 'अस्य' चरतः पुरुषस्य 'सर्वे पाप्मानः' सर्वपापानि 'प्रपथे' प्रकृष्टे तीर्थक्षेत्रादिमार्गे 'श्रमेण' तत्तद्देवतादिदर्शने तीर्थयात्रादिप्रयासेन 'हताः' विनाशिताः सन्तः 'शेरे' शेरते, शयाना इव भवन्ति । यथा शयानाः पुरुषाः स्वकार्यं कृषिवाणिज्यादिकं कर्त्तु मशक्ताः, एवं पुण्येन विनष्टाः पाप्मानो नरकं दातु मसमर्था इत्यर्थः । तस्मात् सर्वथा अरण्ये चर, न पितुर्गृहे ऽवतिष्ठस्व ॥

तृतीयं पर्यायं दर्शयति— "चरैवेति वै मा ब्राह्मणो ऽवोचदिति ह तृतीयं संवत्सर मरण्ये चचार ; सोऽरण्याद् ग्राम मेयाय ; त मिन्द्रः पुरुषरूपेण पर्येत्योवाच, आस्ते भग आसीनस्योर्द्ध्वस्तिष्ठति तिष्ठतः, शेते निपद्यमानस्य चराति चरतो भगश्चरैवेति" –इति । 'भगः' सौभाग्यम् । 'आसीनस्य' उपविष्टस्य 'आस्ते' तथैव तिष्ठति, न तु वर्द्धते ; अभिवृद्धिहेतोरुद्योगस्याभावात् । 'तिष्ठतः' उपवेशनं परित्यज्योत्थानं कुर्वतः पुरुषस्य भगः 'ऊर्द्ध्वः' अभिवृद्धेरुन्मुखस्तिष्ठति ; कृषिवाणिज्याद्युद्योगस्य सम्भावितत्वात् । 'निपद्यमानस्य' भूमौ शयानस्य भगः 'शेते' निद्रां करोति ; विद्यमानधनरक्षादिचिन्ताया अप्यभावात् सर्वथैव विनश्यति । 'चरतः' तेषु तेषु देशेषु अर्जनार्थं पर्यटनां कुर्वतः पुरुषस्य 'भगः' सौभाग्यं 'चराति' दिने-दिने वर्द्धते । तस्मात् त्वं चरैवेति, न त्वेकत्र तिष्ठ ॥

चतुर्थं पर्यायं दर्शयति—"चरैवेति वै मा ब्राह्मणो ऽवोचदिति ह चतुर्थं संवत्सर मरण्ये चचार ; सो ऽरण्याद् ग्राम मेयाय ; त मिन्द्रः पुरुषरूपेण पर्येत्योवाच, कलिः शयानो भवति, सञ्जि-

हानस्तु द्वापरः, उत्तिष्ठंस्त्रेता भवति, कृतं सम्पद्यते चरंश्चरैवेति"–इति। चतस्रः पुरुषस्यावस्थाः। निद्रा, तत्परित्यागः, उत्थानं, सञ्चरणं चेति। ताश्चोत्तरोत्तरश्रेष्ठत्वात् कलि–द्वापर–त्रेता–कृत–युगैः समानाः। ततश्च सञ्चरणस्य सर्वोत्तमत्वाच्चरैवेति॥

पञ्चमं पर्यायं दर्शयति—"चरैवेति वै मा ब्राह्मणोऽवोचदिति ह पञ्चमं संवत्सर मरण्ये चचार; सोऽरण्याद् ग्राम मेयाय, त मिन्द्रः पुरुषरूपेण पर्येत्योवाच, चरन् वै मधु विन्दति, चरन्स्वादु मुदुम्बरं, सूर्यस्य पश्य श्रेमाणं, यो न तन्द्रयते चरंश्चरैवेति"–इति। 'चरन्' एव पुरुषः कश्चिद् वृक्षाग्रे 'मधु' माक्षिकं लभते, कश्चित् 'स्वादुं' मधुर मुदुम्बरादिफलविशेषं लभते। एतदुभय मुपलक्षणम्। तत्र तत्र विद्यमानं भोगविशेषं लभते। तत्र सूर्यो दृष्टान्तः। 'यः' सूर्यः सर्वत्र चरन्नपि 'न तन्द्रयते' कदाचिदप्यलसो न भवति, तस्य सूर्यस्य 'श्रेमाणं' श्रेष्ठत्वं जगद्वन्द्यत्वं पश्य। तस्माच्चरैव॥

इत्थ मिन्द्रकृतेनोपदेशेन चरतो रोहितस्य स्वजीवने पितुरारोग्ये च कारणभूतं श्रेयोलाभं दर्शयति— "चरैवेति वै मा ब्राह्मणोऽवोचदिति ह षष्ठं संवत्सर मरण्ये चचार; सोऽजीगर्त्तं सौयवसि मृषि मशनया परीत मरण्य उपेयाय"–इति। षष्ठे संवत्सरे पूर्ववदरण्यसञ्चारी 'स ह' रोहितः कञ्चिदृषिं तस्मिन्नरण्ये 'उपेयाय' प्राप्तवान्। कीदृश मृषिम्? अजीगर्त्तनामकं, सूयवसस्य पुत्रम्, 'अशनया परीतम्' अन्नालाभेन क्षुत्पीड़ितम्॥

अथाजीगर्त्तरोहितयोः संवादं दर्शयति— "तस्य ह त्रयः पुत्रा आसुः,— शुनःपुच्छः शुनःशेपः शुनोलाङ्गूल इति; तं होवाच, ऋषेऽहं ते शतं ददाम्यह मेषा मेकेनात्मानं निष्क्रीणा

इति; स ज्येष्ठं पुत्रं निगृह्णान उवाच, न त्विम मिति; नो एवेम मिति कनिष्ठं माता; तौ ह मध्यमे सम्पादयाञ्चक्रतुः शुनःशेपे; तस्य ह शतं दत्त्वा स त मादाय सोऽरण्याद् ग्राम मेयाय”–इति। ‘तस्य’ अजीगर्त्तस्य शुनःपुच्छादिनामकास्त्रयः पुत्रा आसुः। ‘तं’ पुत्रवन्त मृषिं रोहितः उवाच। हे ऋषे! ‘ते’ तुभ्य महं गवां शतं ददामि। ‘ज्येष्ठं पुत्रं’ शुनःपुच्छनामकं हस्तेन ‘निगृह्णानः’ स्वसमीपे समाकर्षन् रोहितं प्रत्येव मुवाच,— तुभ्य मेकः पुत्रो दीयते, ‘इमं तु’ शुनःपुच्छन्तु ‘न’ ददामि; मम प्रियत्वादिति। ततो माता कनिष्ठं हस्तेन गृहीत्वैव मुवाच—‘इमं’ शुनोलाङ्गूलं तु मम प्रियं ‘नो एव’ सर्वथा न ददामीति। ततः ‘तौ’ उभौ मातापितरौ ‘मध्यमे’ पुत्रे शुनःशेपे दानं ‘सम्पादयाञ्चक्रतुः’ अङ्गीकृतवन्तौ। ततः ‘तस्य’ अजीगर्त्तस्य ‘सः’ रोहितो गवां शतं दत्त्वा ‘तं’ शुनःशेपम् आदायावस्थितः *। ततः ‘सः’ रोहितः तेन शुनःशेपेन सहारण्यात् स्वकीयं ग्रामं प्रत्याजगाम॥

तदागमनादूर्द्ध्वकालीनं वृत्तान्तं दर्शयति— “स पितर मेत्योवाच,— तत हन्ताह मनेनात्मानं निष्क्रीणा इति; स वरुणं राजान मुपससारानेन त्वा यजा इति; तथेति, भूयान् वै ब्राह्मणः क्षत्रियादिति वरुण उवाच; तस्मा एतं राजसूयं यज्ञक्रतुं प्रोवाच,

---

* “षष्ठ्या आक्रोशे”–इति पा० ६. ३. २१। “शेपपुच्छलाङ्गूलेषु शुनः”–तत्रैव वा०५। “उभे वनस्पत्यादिषु युगपत्”–इति पा० ६. २. १४०। शुनःशेपम्। शुनःशेफ इति पाठोऽपि महाभारतादौ (१३. ३. ६.)। शेपः इति, वैतसः इति च द्वे पदे निघण्टुसमाम्नाये पठिते। “शेपो वैतस इति पुंस्प्रजननस्य। शेपः शपतेः स्पृशतिकर्म्मणो, वैतसो वितस्तं भवति”–इति निरु० ३. ४. ४। “स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते, न पुंसः; पुंसोऽपीत्येके, शौनःशेपे दर्शनात्”–इति चाह यास्कः (३. १. ४.)।

त मेत मभिषेचनीये पुरुषं पशु मालेभे"–इति। 'सः' रोहितः पितर मागत्यैव मुवाच। हे 'तत' पितः! 'हन्त' आवयोः हर्षः सम्पन्नः। अहम् 'अनेन' शुनःशेपरूपेण मूल्येन 'आत्मानं' मद्देहं वरुणात् 'निष्क्रीणै' मूल्यं दत्त्वा आत्मानं मोचयामीत्यर्थः। तथोक्ते 'सः' हरिश्चन्द्रो वरुण मुपेत्य 'अनेन' शुनःशेपेन ब्राह्मणेन 'त्वा' त्वां यक्ष्यामीत्युक्तवान्। 'सः' वरुणो ऽपि तथेत्यङ्गीकृत्यैव मुवाच— 'क्षत्रियात्' तव पुत्रात् रोहितादप्ययं ब्राह्मणो 'भूयान्' अभ्यधिक एव, मम प्रियः; इत्युक्त्वा 'तस्मै' हरिश्चन्द्राय कर्त्तव्यत्वेन राजसूय मुपदिदेश च। 'सः' हरिश्चन्द्रो राजसूयं प्रक्रम्य तस्य मध्ये यो ऽभिषेचनीयाख्यः * एकाहः सोमयागः, तस्मिन् 'त मेतं' शुनःशेपं पुरुषं पशुम् 'आलेभे' सवनीयपशुत्वेनालब्धुं निश्चितवान्॥ ३ (१५)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां तृतीयाध्याये
(त्रयस्त्रिंशाध्याये) तृतीयः खण्डः॥ ३ (१५)॥

---

* "संवत्सरान्ते समानपक्षे ऽभिषेचनीय-दशपेयौ, उक्थ्यौ बृहत्पृष्ठ उभयसामाभिषेचनीयः"–इति आश्व० श्रौ० ९. ३. ७, ८। तत्राहनि अभिषेकार्थाना मपां ग्रहणं भवति। तद्विशेषास्तु कात्या० श्रौ० १५. ४. २१–५. ६. सूत्रेषु द्रष्टव्यानि। "राजानो भविष्यन्त्यभिषेचनीयाः०—०विशोऽनभिषेचनीयाः"–इति च शत० ब्रा० १३. ४. २. १७।

॥ अथ चतुर्थः खण्डः ॥

तस्य ह विश्वामित्रो होतासीज्जमदग्निरध्वर्युर्वसिष्ठो ब्रह्मा ऽयास्य उद्गाता तस्मा उपाकृताय नियोक्तारं न विविदुः स होवाचाजीगर्त्तः सौयवसिर्मह्य मपरं शतं दत्ताह मेनं नियोक्ष्यामीति तस्मा अपरं शतं ददुस्तं स निनियोज तस्मा उपाकृताय नियुक्तायाप्रीताय पर्यग्निकृताय विशसितारं न विविदुः स होवाचाजीगर्त्तः सौयवसिर्मह्य मपरं शतं दत्ताह मेनं विशसिष्यामीति तस्मा अपरं शतं ददुः सोऽसिं निःशान एयायाथ ह शुनःशेप ईक्षाञ्चक्रे ऽमानुष मिव वै मा विशसिष्यन्ति हन्ताहं देवता उपधावामीति स प्रजापति मेव प्रथमं देवताना मुपससार कस्य नूनं कतमस्यामृताना मित्येतयर्चा तं प्रजापतिरुवाचाग्निर्वै देवानां नेदिष्ठस्त मेवोपधावेति सोऽग्नि मुपससाराग्नेर्वयं प्रथमस्यामृताना मित्येतयर्चा त मग्निरुवाच सविता वै प्रसवाना मीशे त मेवोपधावेति स सवितार मुपससाराभि त्वा देव सवितरित्येतेन तृचेन तं सवितोवाच वरुणाय वै राज्ञे नियुक्तोऽसीति त मेवोपधावेति स वरुणं राजान मुपससारात उत्तराभिरेकत्रिंशता तं वरुण उवाचाग्निर्वै देवानां मुखं

सुहृदयतम॑स्तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति॑ सोऽग्निं तुष्टावा॑त उत्तराभिर्द्वाविंशत्या॑ त मग्निरुवाच॑ विश्वान् नु देवान् स्तुह्यथ * त्वोत्स्रक्ष्याम इति॑ स विश्वान् देवांस्तुष्टाव॑ नमो महद्भ्यो नमो अर्भकेभ्य इत्येतयर्चा॑ तं विश्वेदेवा ऊचु॑रिन्द्रो वै देवाना मोजिष्ठो बलिष्ठ॑: सहिष्ठः सत्तमः पारयिष्णुतम॑स्तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति॑ स इन्द्रं तुष्टाव॑ यच्चिद्धि सत्य सोमपा इति॑ चैतेन सूक्तेनो॑त्तरस्य च पञ्चदशभि॑स्तस्मा इन्द्र † स्तूयमानः॑ प्रीतो मनसा हिरण्यरथं ददौ॑ त मेतया प्रतीयाय॑ शश्वदिन्द्र इति॑ त मिन्द्र उवाचाश्विनौ नु स्तुह्यथ त्वोत्स्रक्ष्याम इति॑ सोऽश्विनौ तुष्टावा॑त उत्तरेण तृचेन॑ त मश्विना ऊचतु॑रुषसं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति॑ स उषसं तुष्टावा॑त उत्तरेण तृचेन॑ तस्य ह स्मर्च्यृच्युक्तायां वि पाशो मुमुचे॑ कनीय ऐक्ष्वाकस्योदरं भव॑त्युत्तमस्या मेवर्च्युक्तायां वि पाशो मुमुचे॑ऽगद ऐक्ष्वाक आस॑ ॥ ४ (१६) ॥

हरिश्चन्द्रस्य राजसूयानुष्ठानं दर्शयति— "तस्य ह विश्वामित्रो होतासीज्जमदग्निरध्वर्युर्वसिष्ठो ब्रह्मा ऽयास्य उद्गाता; तस्मा उपाकृताय नियोक्तारं न विविदुः ; स होवाचाजीगर्त्तः सौयवसिर्मह्य मपरं शतं दत्ताह मेनं नियोक्ष्यामीति ; तस्मा अपरं शतं

---

* "देवान्स्तुह्यथ" घ।

† "इन्द्रः" क, च, ञ।

ददुस्तं स निनियोज”–इति । विश्वामित्रादयो महर्षयः ‘तस्य’ हरिश्चन्द्रस्य यागे राजसूये होत्रादयश्चत्वारो महर्त्विज आसन् । तत्र जमदग्निरध्वर्युरभिषेचनीये सोमयागे ‘तं’ शुनःशेपं सवनीयपशुत्वेनोपाकृतवान् । बर्हिर्युक्तया प्लक्षशाखया मन्त्रपुरस्सरं समुपस्पृश्य स्वीकारः ‘उपाकरणम्’। तत ऊर्द्ध्वं यूपबन्धनं ‘नियोजनम्’। तस्य क्रूरकर्मत्वादध्वर्युः नियोजने ऽप्रवृत्तः । ततः ‘उपाकृताय तस्मै’* उपाकरणेन संस्कृतस्य शौनःशेपस्य ‘नियोक्तारं’ यूपे बन्धनकर्त्तारं कञ्चिदपि पुरुषं ‘न विविदुः’ न लेभिरे । तदानीं सूयवसस्य पुत्रः, शुनःशेपस्य पिता, ‘सः’ अजीगर्त्तः मह्यं पूर्वस्माच्छतादपेतम् ‘अपरं’ गोशतं हे यजमानर्त्विजः ! दत्त , अहम् ‘एनं’ शुनःशेपं यूपे ‘नियोक्ष्यामि’ रशनया कट्यां शिरसि पादयोश्च बद्ध्वा रशनाग्रस्य यूपे बन्धनं ‘नियोजनम्’ तदहं करिष्यामीति । ‘तस्मै’ अजीगर्त्ताय अपरं गोशतं ददुः ; ‘तं’ च शुनःशेपं ‘सः’ अजीगर्त्तो निनियोज । धातोर्द्विर्भावं परित्यज्योपसर्गस्य द्विर्भावश्छान्दसः ॥

अथ विशसनप्रवृत्तिं दर्शयति— “तस्मा उपाकृताय नियुक्तायाप्रीताय पर्यग्निकृताय विशसितारं न विविदुः ; स होवाचाजीगर्त्तः सौयवसिर्मह्य मपरं शतं दत्ताह मेनं विशसिष्यामीति; तस्मा अपरं शतं ददुः, सो ऽसिं निःशान एयाय”–इति । उपाकरण–नियोजने पूर्वमुक्ते । आप्रीसञ्ज्ञिताभिरेकादशभिः प्रयाजयाज्याभिः यद् यजनं तद् ‘आप्रीणनम्’ । दर्भरूपेणोल्मुकेन त्रिः प्रदक्षिणीकरणं तत् ‘पर्यग्निकरणम्’ । तथाविधसंस्कारचतुष्टययुक्ताय† ‘तस्मै’‡ तस्य शुनःशेपस्य ‘विशसितारं’ हिंसितारं क्रूरा-

---

*, ‡ “षष्ठ्यर्थे चतुर्थीति वाच्यम्”–इति पा० २. ३. ६२ वा० ।

† तदेतच्चतुष्टयविध्यादिकम् १भा० २२३–२५४ पृष्ठेषु द्रष्टव्यम् ।

त्मानं कञ्चिदपि पुरुषं न लेभिरे। ततोऽजीगर्त्तः पूर्ववदपरं गोशतं गृहीत्वा मारयितुम् ‘असिं’ खड्गं ‘निःशानः’ निशितं तीक्ष्णं कुर्वन्नेव ‘एयाय’ आजगाम॥

पितुरजीगर्त्तस्य पुत्रमारणोद्योगानन्तरं वृत्तान्तं दर्शयति—“अथ ह शुनःशेप ईक्षाञ्चक्रेऽमानुष मिव वै मा विशसिष्यन्ति, हन्ताहं देवता उपधावामीति; स प्रजापति मेव प्रथमं देवताना मुपससार, कस्य नूनं कतमस्यामृताना मित्येतयर्चा”–इति। ‘अथ’ पितुः पुत्रमारणोद्योगानन्तरं ‘शुनःशेपः’ पुत्रो मनस्येवं ‘ईक्षाञ्चक्रे’ विचारितवान्। “अन्यत्र पर्यग्निकृतं पुरुष मारण्यांश्चोत्सृजन्ति अहिंसायै”–इतिश्रुतेः पर्यग्निकरणादूर्द्ध्वं मनुष्यं परित्यजन्ति। एते तु ‘मा’ माम् ‘अमानुष मिव’ मनुष्यव्यतिरिक्त मजादिपशु मिव ‘विशसिष्यन्ति’ मारयिष्यन्ति। ‘हन्त’ हा कष्ट मेतत् सम्पन्नम्। अह मितः परं रक्षार्थं देवताः ‘उपधावामि’ भजामि। ‘इति’ एतद् विचार्य देवानां मध्ये ‘प्रथमं’ मुख्यं प्रजापति मेव “कस्य नूनम्”–इत्यृचा (ऋ० सं० १. २४. १.) ‘उपससार’ सेवितवान्॥

तस्य प्रजापतेः सहकारित्वेनाग्नेः सेवां दर्शयति— “तं प्रजापतिरुवाचाग्निर्वै देवानां नेदिष्ठस्त मेवोपधावेति सोऽग्नि मुपससाराग्नेर्वयं प्रथमस्यामृताना मित्येतयर्चा”–इति। ‘तं’ सेवकं शुनःशेपं प्रजापतिरेव मुक्तवान्। अग्निः सर्वेषां देवानां ‘नेदिष्ठः’ हविर्वहनेनातिसमीपवर्त्ती, अतस्त मेवोपास्स्वेत्युक्तः ‘सः’ शुनःशेपः “अग्नेर्वयम्”–इत्यृचा (ऋ०सं०१.२४.२.) अग्नि मुपासितवान्॥

तस्य चाग्नेः सहकारित्वेन सवितुरुपासनं दर्शयति— “त मग्निरुवाच, सविता वै प्रसवाना मीशे, त मेवोपधावेति; स

सवितार मुपससाराभि त्वा देव सवितरित्येतेन तृचेन”–इति । ‘प्रसवानां’ सर्वेषु कार्येषु प्रेरणारूपाणा मनुज्ञानात् सविता ‘ईशे’ स्वामी भवति । तस्मात् त मेवोपधावेत्यग्निनोपदिष्टः “अभि त्वा” –इति (ऋ०सं०१.२४.३–५.) तृचेन सवितार मुपासितवान् ॥

तस्य च सवितुः सहकारित्वेन वरुणस्योपासनं दर्शयति—“तं सवितोवाच, वरुणाय वै राज्ञे नियुक्तो ऽसीति, त मेवोपधावेति ; स वरुणं राजान मुपससारात उत्तराभिरेकत्रिंशता”–इति । हे शुनःशेप ! वरुणार्थं त्वं यूपे बद्धोऽसि, अतो वरुण मुपास्स्वेति सवित्रोक्तः, पूर्वस्मात् सवितृविषयात् तृचात् उत्तराभिरेकत्रिंशत्सङ्ख्याकाभिर्ऋग्भिर्वरुण मुपासितवान्। “न हि ते क्षत्रम्”–इत्याद्याः सूक्तशेषभूता दशर्चः (ऋ० सं० १. २४. ६–१५.), “यच्चिद्धि ते विशः”–इत्यादिक मेकविंशत्यृचं सूक्तम् (ऋ० सं० १. २५.), इत्येवं एकत्रिंशत् सङ्ख्या द्रष्टव्या ॥

तस्य च वरुणस्य सहकारित्वेन पुनरप्यग्नेरुपासनं दर्शयति—“तं वरुण उवाचाग्निर्वै देवानां मुखं सुहृदयतमस्तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति ; सोऽग्निं तुष्टावात उत्तराभिर्द्वाविंशत्या”–इति । अय मग्निः सर्वेषां देवानां ‘मुखं’ मुखस्थानीयः ; अग्निद्वारेणैव सर्वैर्देवैर्हविस्स्वीकारात् । अत एव प्रीत्या हविर्वहनादतिशयेन सुहृदयः ‘सुहृदयतमः’ । ‘तम्’ अग्निं ‘नु’ क्षिप्रं स्तुहीति वरुणेनोक्तः पूर्वोक्ताभ्यः ऋग्भ्यः उत्तराभिर्द्वाविंशतिसङ्ख्याकाभिर्ऋग्भिरग्निं तुष्टाव । “वसिष्वा हि”–इत्यादिकं दशर्चं सूक्तम् (ऋ० सं० १. २६.), “अश्वं न त्वा”–इत्यादिकं त्रयोदशर्चं सूक्तम् (ऋ०सं०१.२७.), तत्रान्त्यां परित्यज्य वसिष्वादिसूक्तद्वयगता ऋचो द्वाविंशतिसङ्ख्याकाः ॥

अग्नेः सहकारित्वेन विश्वेषां देवाना मुपासनं दर्शयति—"त मग्निरुवाच, विश्वान् नु देवान् स्तुह्यथ त्वोत्स्रक्ष्याम इति; स विश्वान् देवांस्तुष्टाव, नमो महद्भ्यो नमो अर्भकेभ्य इत्येतयर्चा"-इति। यद्यपि वरुणपाशेन बद्धत्वात् वरुण एव शुनःशेप मुत्स्रष्टुं समर्थः, तथाप्यग्न्यादीनां सहकारित्ववचनं दार्ढ्यार्थं द्रष्टव्यम्। विश्वे देवा गणरूपा न भवन्ति, किन्तु सर्वे देवाः, तान् "नमो महद्भ्यः"-इत्येतयर्चा (ऋ० सं० १. २७. १३.) उपासितवान् ॥

तेषां च विश्वेषां देवानां सहकारित्वेनेन्द्रस्योपासनं दर्शयति—"तं विश्वे देवा ऊचुरिन्द्रो वै देवाना मोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमस्तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति; स इन्द्रं तुष्टाव, यच्चिद्धि सत्य सोमपा इति चैतेन सूक्तेनोत्तरस्य च पञ्चदशभिः"-इति। ओजोबलादिशब्दाः पूर्वाचार्यैरेवं व्याख्याताः—

"ओजो दीप्तिर्बलं दार्ढ्यं, प्रसह्यकरणे सहः।
सुजनः सन्, पारयिष्णुरुपक्रान्तसमाप्तिकृत्"-इति।

इष्ठप्रत्यय-तमप्प्रत्ययाभ्यां तत्र तत्रातिशय उच्यते। तादृश मिन्द्रं "यच्चिद्धि सत्य सोमपाः"-इत्यनेन सप्तर्चेन सूक्तेन (ऋ० सं० १.२९.), उत्तरस्मिन्नपि "आ व इन्द्रम्"-इत्यादिके द्वाविंशत्यृचे सूक्ते (ऋ० सं० १. ३०.) पञ्चदशभिर्ऋग्भिश्च तुष्टाव ॥

पूर्वं मप्यनुग्रहेण चरैवेत्येव मिन्द्रो रोहितं प्रत्युपदिदेश; तस्योपदेशस्य फलपर्यवसायित्व मनुस्मरतः तस्येन्द्रस्य शुनःशेपस्तुतौ प्रीत्यतिशयं दर्शयति—"तस्मा इन्द्र स्तूयमानः प्रीतो मनसा हिरण्यरथं ददौ, त मेतया प्रतीयाय शश्वदिन्द्र इति"-इति। शुनःशेपेनेन्द्रः स्तूयमानः प्रीतो भूत्वा 'तस्मै' शुनःशेपाय सुवर्णमयं दिव्यं रथ मारोहणार्थं स्वकीयेन मनसैव ददौ। शुनःशेपोऽपि

तदीय मनुग्रह मवगत्य पूर्वोक्ताभ्यः पञ्चदशभ्यः ‘उत्तरया’ “शश्वदिन्द्रः”–इत्येतया (ऋ० सं० १.३०.१६.) ऋचा ‘तं’ रथं ‘प्रतीयाय’ मनसैव प्रतिजगाम * ॥

इन्द्रस्य सहकारित्वेनाश्विनोरुपासनं दर्शयति—“त मिन्द्र उवाचाश्विनौ नु स्तुह्यथ त्वोत्स्रक्ष्याम इति ; सो ऽश्विनौ तुष्टावात उत्तरेण तृचेन”–इति । पूर्वोक्तायाः शश्वदिन्द्रं इत्यस्याः ‘उत्तरेण’ “आश्विनावश्वावत्या”–इति (ऋ० सं० १. ३०. १७–१९.) तृचेनाश्विनौ स्तुतवान् ॥

अश्विनोः सहकारित्वेनोषस उपास्तिं दर्शयति—“त मश्विना ऊचतुरुषसं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति ; स उषसं तुष्टावात उत्तरेण तृचेन”–इति । “कस्त उषः”–इत्यादिः (ऋ० सं० १. ३०. २०–२२.) उत्तरस्तृचः ॥

अथोक्तानां सर्वासां देवताना मनुग्रहेण शुनःशेपस्य बन्धमोक्षं हरिश्चन्द्रस्यारोग्यं च दर्शयति—“तस्य ह स्मर्च्यृच्युक्तायां वि पाशो मुमुचे, कनीय ऐक्ष्वाकस्योदरं भवत्युत्तमस्या मेवर्च्युक्तायां वि पाशो मुमुचे ऽगद ऐक्ष्वाक आस”–इति । ‘तस्य’ पूर्वोक्तस्य तृचस्य सम्बन्धिन्याम् ‘ऋचि–ऋचि’ एकैकस्या मृच्युक्तायां क्रमेण शुनःशेपस्य पाशो ‘विमुमुचे’ विशेषेण मुक्तोऽभूत् † । ‘ऐक्ष्वाकस्य’ हरिश्चन्द्रस्य यत् महोदरं, तदपि क्रमेण ‘कनीयः’ अत्यल्पं भवति । उत्त-

---

* “स्तूयमानः शश्वदिति प्रीतस्तु मनसा ददौ ।
शुनःशेपाय दिव्यं तं रथं सर्वं हिरण्मयम् ॥”–इति बृ० दे० ३. १०१ ।

† “शुनःशेप माजीगर्त्तिं वरुणोऽगृह्णात् , स एतां वारुणी मपश्यत् , तया वै स आत्मानं वरुणपाशादमुञ्चद्”–इति तै० सं० ५. २. २. ३ । “शौनःशेप माख्यापयते , वरुणपाशादेवैनं मुञ्चति”–इति तै० ब्रा० १. ७. १०. ६ ।

मस्या मृच्युक्तायां पाशो विमुमुचे, एवं सर्वात्मना मुक्तो ऽभूत्, ऐक्ष्वाकोऽपि 'अगदः' निःशेषेण रोगरहित आस * ॥ ४ (१६) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां तृतीयाध्याये
(त्रयस्त्रिंशाध्याये) चतुर्थः खण्डः ॥ ४ (१६) ॥

॥ अथ पञ्चमः खण्डः ॥

त ऋत्विज ऊचुस्त्व'मेव नो ऽस्याह्नः संस्था मधिगच्छेत्य'थ हैतं शुनःशेपो ऽञ्जःसवं ददर्श' त मेताभिश्चतसृभिरभिसुषाव' यच्चिद्धि त्वं' गृहे गृह इत्य'थैनं द्रोणकलश मभ्यवनिनाय'योच्छिष्टं' चम्वोर्भरेत्येतयर्चा' ऽथ हास्मिन्नन्वारब्धे' पूर्वाभिश्चतसृभिः' सस्वाहाकाराभिर्जुहवाञ्चकारा'थैन मवभृथ मभ्यवनिनाय' त्वं नो अग्ने वरुणस्य विद्वानित्येताभ्या'मथैन मत ऊर्ध्व'मग्नि माहवनीय मुपस्थापयाञ्चकार' शुनश्चिच्छेपं निदितं सहस्रादित्य'थ ह शुनःशेपो' विश्वामित्रस्याङ्क माससाद' स होवाचाजीगर्त्तः सौयवसिर्ऋषे पुनर्मे पुत्रं देहीति

---

* इद मेवाख्यानं रामायणेऽपि बहु व्यतिक्रम्याख्यातम् १. ६१, ६२ सर्गयोः । भागवते ऽप्यस्त्येतदुपाख्यानम् ९. ८,१६ अध्याययोः । तथा महाभारतेऽपि १२. ३. ६–८ । हरिवंशेऽपि २७. ५७–६० ।

नेति होवाच विश्वामित्रो॑ देवा वा इमं मह्य मरासतेति॑ स ह देवरातो वैश्वामित्र आस॑ तस्यैते कापिलेय-बाभ्रवाः स॑ होवाचाजीगर्त्तः सौयवसिस्त्वं॑ वेहि विह्वयावहा इति॑ स होवाचाजीगर्त्तः सौयवसिरा॑ङ्गिरसो जन्मना॑स्याजीगर्त्तिः श्रुतः कविः॑ ऋषे पैतामहात् तन्तोर्मा॑ ऽपगाः पुनरेहि मा मिति॑ स होवाच शुनःशेपो॑ ऽदर्शुंस्त्वा शासहस्तं न यच्छू॑द्रेष्वलप्सत॑ गवां त्रीणि शतानि॑ त्व मवृणीथा मदङ्गिर इति॑ स होवाचाजीगर्त्तः सौयवसिस्तद्वै॑ मा तात तपति॑ पापं कर्म मया कृतं त॑दहं निह्नवे तुभ्यं॑ प्रतियन्तु शता गवामिति॑ स होवाच शुनःशेपो॑ यः सकृत्पापकं कुर्यात्॑ कुर्यादेनत्ततो ऽपरं॑ नापागाः शौद्रान्याया*दसन्धेयं त्वया कृत मि॑त्यसन्धेय मिति ह॑ विश्वामित्र उपपपा॑द स होवाच विश्वामित्रो भीम एव सौयवसिः॑ शासेन विशिशासिषुः॑ अस्थान् मैतस्य पुत्रो॑भूर्ममैवोपेहि पुत्रता मिति॑ स होवाच शुनःशेपः॑ स वै यथा नो ज्ञपया॑ राजपुत्र तथा वद॑ यथैवाङ्गिरसः सन्नुपेयां तव पुत्रता मिति॑ स होवाच विश्वामित्रो॑ ज्येष्ठो मे त्वं पुत्राणां स्यास्त॑व श्रेष्ठा प्रजा स्यात्॑ उपेयादैवं मे दायं॑ तेन वै त्वोपमन्त्रय इति॑ स होवाच शुनःशेपः॑ सञ्ज्ञानानेषु

---

* "शौद्राग्न्याया"—इति ज, ञ ।

वै ब्रूयात्सौहार्दाय मे श्रियै यथा ऽहं भरत ऋषभोपेयां तव पुत्रता मित्यथ ह विश्वामित्रः पुत्रानामन्त्रयामास मधुच्छन्दाः शृणोतन ऋषभो रेणुरष्टकः ये के च भ्रातरः स्थ नास्मै ज्यैष्ठ्याय कल्पध्व मिति ॥ (५) १७ ॥

बन्धनात् मुक्तस्य शुनःशेपस्योत्तरकालीनं वृत्तान्तं दर्शयति—"त मृत्विज ऊचुस्त्व मेव नो ऽस्याह्नः संस्था मधिगच्छेत्यथ हैतं शुनःशेपो ऽञ्जस्सवं ददर्श ; त मेताभिश्चतसृभिरभिसुषाव, यच्चिद्धि त्वं गृहे गृह इत्यथैनं द्रोणकलश मभ्यवनिनायोच्छिष्टं चम्वोर्भरेत्येतयर्चा ; ऽथ हास्मिन्नन्वारब्धे पूर्वाभिश्चतसृभिः सस्वाहाकाराभिर्जुहवाञ्चकाराथैन मवभृथ मभ्यवनिनाय, त्वं नो अग्ने वरुणस्य विद्वानित्येताभ्या मथैन मत ऊर्द्ध्व मग्नि माहवनीय मुपस्थापयाञ्चकार, शुनश्चिच्छेपं निदितं सहस्रादिति"–इति । देवतानुग्रहयुक्तं 'तं' शुनःशेपं विश्वामित्रादयः सर्वे 'ऋत्विजः' एव मूचुः,— हे शुनःशेप ! त्व मेव 'नः' अस्माकम् 'अस्याह्नः' अभिषेचनीयाख्यस्य 'संस्थां' समाप्तिम् 'अधिगच्छ' प्राप्नुहि, अनुष्ठापयेत्यर्थः । तैरेव मुक्ते सत्यनन्तरं शुनःशेपः 'एतम्' अभिषेचनीयाख्यं सोमयागम् 'अञ्जस्सवं' ददर्श । 'अञ्जसा' ऋजुमार्गेण 'सवः' सोमाभिषवो यस्मिन् यागे सोऽञ्जस्सवः, तादृशं प्रयोगप्रकारं निश्चितवान् । निश्चित्य च 'तं' सोमं "यच्चिद्धि"–इत्यादिभिः चतसृभिः (ऋ० सं० १. २८. ५–२८.) ऋग्भिरभिषुतं कृतवान् । अथ 'एनम्' अभिषुतं सोमम् 'एतया' "उच्छिष्टं चम्वोः"–इत्यृचा (ऋ० सं० १.२८.९.) द्रोणकलश मभिलक्ष्य 'अवनिनाय' द्रोणकलशे प्रक्षिप्तवान् । 'अथ' अनन्तरम् 'अस्मिन्' हरिश्चन्द्रे 'अन्वारब्धे'

शुनःशेपदेह मुपसृष्टवति सत्युक्ताभ्य ऋग्भ्यः 'पूर्वाभिः' "यत्र ग्रावा"-इत्यादिभिश्चतसृभिर्ऋग्भिः (ऋ० सं० १. २८. १–४.) स्वाहाकारसहिताभिः सोमं जुहवाञ्चकार। "यत्र ग्रावा"–इत्यादिकं सूक्तं नवर्चम् ; तत्र यच्चिद्धीति पञ्चमी, ता मारभ्य चतसृभिः ऋग्भिरभिषवः ; "उच्छिष्टम्"–इत्यादिका नवमी, तया द्रोणकलशे प्रक्षेपः ; "यत्र ग्रावा"–इत्यादिभिश्चतसृभिर्होमः ; इत्येवं कृत्स्नस्य सूक्तस्य विनियोगः। 'अथ' होमानन्तर मेव कर्त्तव्यम् अवभृथम् 'अभि'लक्ष्य 'अवनिनाय' सर्वं मवभृथसाधनं तद्देशे नीत्वा, "त्वं नो अग्ने"–इत्यादिकाभ्याम् (ऋ० सं० ४.१.४,५.) अप्स्ववभृथयागं कृतवान् । 'अथ' तथा कृत्वा, तत ऊर्द्ध्वम् 'एनम्' आहवनीय मग्निं "शुनश्चित्"–इत्यादिना 'उपस्थापयाञ्चकार' हरिश्चन्द्र मुपस्थानं प्रेरयामास। सोऽय मञ्जःसवः ; इष्टिपशुसाङ्कर्य्यं मन्तरेण 'अञ्जसा' ऋजुमार्गेणानुष्ठितत्वात् ॥

विश्वामित्राजीगर्त्तयोः कञ्चित् संवादं दर्शयति— " अथ ह शुनःशेपो विश्वामित्रस्याङ्क माससाद ; स होवाचाजीगर्त्तः सौयवसिर्ऋषे पुनर्मे पुत्रं देहीति; नेति होवाच विश्वामित्रो, देवा वा इमं मह्य मरासतेति, स ह देवरातो वैश्वामित्र आस, तस्यैते कापिलेय-बाभ्रवाः"–इति । 'अथ' अभिषेचनीयसमाप्तेरनन्तरं हरिश्चन्द्रसहितेष्वृत्विक्षु विस्मितेषु, स शुनःशेपः इत ऊर्द्ध्वं कस्य पुत्रोऽस्त्विति विचारे सति तदीयेच्छैव नियामिकेति महर्षीणां वचनं श्रुत्वा शुनःशेपः स्वेच्छया विश्वामित्रपुत्रत्व मङ्गीकृत्य सहसा तदीय मङ्क माससाद ; पुत्रो हि सर्वत्र पितुरङ्के निषीदति । तदानीं सूयवसपुत्रो ऽजीगर्त्तो विश्वामित्रं प्रत्येव मुवाच । हे महर्षे ! मदीयं पुत्र मेनं पुनरपि मह्यं देहीति । स विश्वामित्रो

नेति निराकृत्यैव मुवाच। प्रजापत्यादयो 'देवाः' एव 'इमं' शुनःशेपं मह्यम् 'अरासत' दत्तवन्तः ; तस्मात् तुभ्यं न दास्यामीति। 'सः' च शुनःशेपो देवैर्दत्तत्वाद् 'देवरातः'–इति–नामधारी विश्वामित्रपुत्र एवास। 'तस्य' च देवरातस्य 'एते' कपिलगोत्रोत्पन्नाः बभ्रुगोत्रोत्पन्नाश्च बन्धवो ऽभवन् ॥

अथ शुनःशेपाजीगर्त्तयोः संवादं दर्शयति— "स होवाचाजीगर्त्तः सौयवसिस्त्वं वेहि विह्वयावहा इति ; स होवाचाजीगर्त्तः सौयवसिराङ्गिरसो जन्मनास्याजीगर्त्तिः श्रुतः कविः, ऋषे पैतामहात् तन्तोर्मा ऽपगाः पुनरेहि मा मिति ; स होवाच शुनःशेपो ऽदर्शुस्त्वा शासहस्तं न यच्छूद्रेष्वलप्सत, गवां त्रीणि शतानि त्व मवृणीथा मदङ्गिर इति"–इति। विश्वामित्रेण निराकृतः सो ऽजीगर्त्तः शुनःशेपं प्रत्येव मुवाच। हे पुत्र! 'त्वं वा' त्व मेव विश्वामित्रादपगतः सन् 'इहि' अस्मद्गृहे गच्छ। त्वदीयमाता चाहञ्चोभावावां 'विह्वयावहै' विशेषेण तवाह्वानं करवावहै ;— इत्युक्त्वा तूष्णी मवस्थितं तं शुनःशेपं प्रति पुनरपि कया चिन्नाथयैव मुवाच,— हे शुनःशेप! 'त्वं' जन्मना 'आङ्गिरसः' अङ्गिरोगोत्रोत्पन्नः, अजीगर्त्तस्य पुत्रः, 'कविः' विद्वान्, 'श्रुतः' इत्येवं सर्वत्र प्रसिद्धः ; अतो हे 'ऋषे' शुनःशेप! 'पैतामहात्' पितामहेन प्रजापतिना सम्पादितात् 'तन्तोः' सन्तानात् अङ्गिरोवंशात् 'मा अपगाः' अपगतो मा भव ; तस्मात् पुनरपि 'मा मेहि' मद्गृहे समागच्छ। इत्युक्तः शुनःशेपः स्वय मपि गाथया प्रत्युत्तरं ददौ। शासो विशसनहेतुः खड्गः ; हे अजीगर्त्त! मद्वधाय 'शासहस्तं' त्वां सर्वेऽपि 'अदर्शुः' दृष्टवन्तः। 'यत्' क्रूरं कर्म शूद्रेषु अत्यन्तनीचेष्वपि 'नालप्सत' न लब्धवन्तो लौकिका जनाः, तादृशं क्रौर्यं

त्वया कृतम् । हे 'अङ्गिरः' आङ्गिरसगोत्रोत्पन्न ! अजीगर्त्त ! 'मत्' मां निमित्तीकृत्य त्वं गवां शतानि त्रीणि 'अवृणीथाः' वृतवानसि, तदिद मत्यन्तकष्टम् 'इति' उक्तवान् ॥

पुनरप्यजीगर्त्तशुनःशेपयोरुक्तिप्रत्युक्तीदर्शयति— "स होवाचाजीगर्त्तः सौयवसिस्तद्वै मा तात तपति, पापं कर्म मया कृतं; तदहं निह्नवे तुभ्यं प्रतियन्तु शता गवा मिति ; स होवाच शुनःशेपो यः सकृत्पापकं कुर्यात्, कुर्यादेनत्ततोऽपरं ; नापागाः शौद्रान्न्यायादसन्धेयं त्वया कृत मिति"–इति । शुनःशेपेनोपालब्धोऽजीगर्त्तः स्वकीय मनुतापं दर्शयितुं काञ्चिद्गाथा मेव मुवाच,— हे 'तात' पितृवदुपलालनीय शुनःशेप ! मया यत्पापं कृतं, 'तद्वै मा तपति' तदेव मां मनसि सन्तप्तं करोति ; अहं 'तत्' पापं 'निह्नवे' परिहरामि ; 'गवां शतानि' पूर्वं मया गृहीतानि त्रीणि यानि, तानि 'तुभ्यं' त्वदर्थं 'प्रतियन्तु' प्रत्येक मेव प्राप्नुवन्तु ; इतरयोः पुत्रयोर्गावो मा भूवन्, तवैव सर्वाः सन्त्विति । ततः 'सः' शुनःशेपो गाथया प्रत्युत्तरं ददौ । 'यः' पुमान् धर्मशास्त्रभीतिरहितः सकृत्पापकं कुर्यात्, स पुमान् ततः पापादन्यत् 'एनत्' पापं तदभ्यासवशात् कुर्यादेव ; त्वं तु 'शौद्रात् न्यायात्' नीचजातिसम्बन्धिनः क्रूरादाचरणात् 'नापागाः' अपगतो न भवसि ; 'असन्धेयं' प्रतिसमाधानरहितं पापं त्वया कृतम् 'इति' एषा शुनःशेपस्य प्रत्युक्तिः ॥

अथ विश्वामित्रस्य कृत्यं दर्शयति— "असन्धेय मिति ह विश्वामित्र उपपपाद ; स होवाच विश्वामित्रो भीम एव सौयवसिः शासेन विशिशासिषुः अस्थात्, मैतस्य पुत्रो भूर्ममैवोपेहि पुत्रता मिति"–इति । 'असन्धेयम्' अप्रतिसमाधेयं पाप मिति

शुनःशेपेन यदीरितम् , तदेतदप्रतिसमाधेयत्वं विश्वमित्रः 'उपपपाद' युक्तिभिरुपपादितवान् । तदुपपादनार्थ मेव विश्वामित्र इमां गाथा मुवाच । सूयवसस्य पुत्रो ऽजीगर्त्तः 'भीम एव' भयहेतुरेव सन् 'शासेन' हस्तगतखड्गेन सः 'विशिशासिषुरस्थात्' विशसनं कर्त्तु मिच्छुरवस्थितवान् । अतो हे शुनःशेप ! 'एतस्य' पापिष्ठस्य पुत्रो मा भूः , किन्तु ममैव पुत्रता मुपेहि ॥

अथ शुनःशेपविश्वामित्रयोरुक्तिप्रत्युक्ती दर्शयति— "स होवाच शुनःशेपः , स वै यथा नो ज्ञपया राजपुत्र तथा वद , यथैवाङ्गिरसः सन्नुपेयां तव पुत्रता मिति ; स होवाच विश्वामित्रो ज्येष्ठो मे त्वं पुत्राणां स्यास् , तव श्रेष्ठा प्रजा स्यात् , उपेया दैवं मे दायं , तेन वै त्वोपमन्त्रय इति"–इति । विश्वामित्रेणैवम्बोधितः शुनःशेपः पुनरपि गाथया विश्वामित्रं प्रत्येव मुवाच । अयं विश्वामित्रो जन्मना क्षत्रियः सन् स्वकीयेन तपोमहिम्ना ब्राह्मण्यं प्राप्तवानित्येवं तद्वृत्तान्तं सूचयितुं हे राजपुत्रेति सम्बोधितवान् । 'स वै' तथाविधो राजजातीय एव सन् 'यथा' येन प्रकारेण 'नः' अस्माभिः सर्वैः 'आ' समन्तात् 'ज्ञपय' ब्राह्मणत्वेन ज्ञायसे, तथैवास्मद्विषये अपि त्वं वद । कथं वदितव्य मिति वदुच्यते— अह मिदानी मङ्गिरोगोत्रः सन् , तत्परित्यागेन तव पुत्रत्वं येनैव प्रकारेणोपेयाम् , तथैवानुगृह्णाणेति शेषः । एतद्वाक्याभिप्रायः पूर्वैः सङ्क्षिप्य दर्शितः—

"पुरात्मानं नृपं विप्रं तपसा कृतवानसि ।
एव माङ्गिरसं मा त्वं वैश्वामित्र ऋषे कुरु"–इति ।

ततो विश्वामित्रो गाथया प्रत्युत्तर मुक्तवान् । हे शुनःशेप ! त्वं मे पुत्राणां मध्ये 'ज्येष्ठः स्याः' ज्येष्ठो भव, तव पुत्रादिरूपा

'प्रजा' अपीतरस्याः श्रेष्ठा स्यात् । 'मे' मह्यं विश्वामित्राय 'दैवं' देवैः प्रसन्नैर्दत्तं 'दायं' पुत्रत्वरूपलाभम् 'उपेयाः' प्राप्नुहि; 'तेन वै' तेनैव कारणेन 'त्वोपमन्त्रये' त्वां पुत्रत्वेन व्यवहरामि ॥

पुनरपि शुनःशेपविश्वामित्रयोर्वृत्तान्तं दर्शयति— "स होवाच शुनःशेपः, सञ्ज्ञानानेषु वै ब्रूयात्, सौहार्द्याय मे श्रियै, यथा ऽहं भरत ऋषभोपेयां तव पुत्रता मित्यथ ह विश्वामित्रः पुत्रानामन्त्रयामास,— मधुच्छन्दाः शृणोतन, ऋषभो रेणुरष्टकः, ये के च भ्रातरः स्थ, नास्मै ज्यैष्ठ्याय कल्पद्ध्व मिति"–इति । विश्वामित्रेण प्रलोभितः शुनःशेपः स्वकार्यदार्ढ्यार्थं गाथयैव मुवाच । 'सञ्ज्ञानानेषु' मद्विषयैकमत्यं प्राप्तेषु त्वदीयपुत्रेषु 'वै' अपि मां ब्रूयात्, ज्येष्ठभ्रातृत्वेन व्यवहरतु ; तच्च 'मे' मम 'सौहार्द्याय' भ्रातृभिरितरैः स्नेहातिशयाय 'श्रियै' धनलाभाय च सम्पद्यते। हे 'भरतर्षभ' भरतवंशश्रेष्ठ विश्वामित्र ! अहं तव पुत्रतां यथोपेयां, तथैवैतेषां पुत्राणा मग्रे अनुगृहाणेति शेषः । ततो विश्वामित्र इतरान् पुत्रानाहूय गाथयैव माज्ञापितवान्,— यो मधुच्छन्दो नाम *, यश्चर्षभः, योऽपि रेणुः, योऽप्यष्टकः, एते मुख्याः † हे पुत्रकाः ! 'शृणोतन' मदीया माज्ञां शृणुत ; ये केचिद् यूयं

---

* "अथाग्नि मीळे इत्यादि प्रथमं मण्डलं प्रति ।
शतर्चिनस्तु विज्ञेया ऋषयः सुखसिद्धये ॥
तेषां पूर्वो मधुच्छन्दा, मेधातिथिरनन्तरः ।
शुनःशेपस्तृतीयोऽयं, हिरण्यस्तूप उत्तरः ॥"–इत्यादि आर्षानु० १, २, ३ ।

† ऋक्संहिता–सूक्तेषु केषाञ्चिद् द्रष्टारो ऽष्टौ वैश्वामित्राः ज्ञायन्ते आर्षानुक्रमण्यादितः । तत्र मधुच्छन्दसः १. १–१० ; ९. १ । ऋषभस्य ३. १३ ; १४ ; ९. ७१ । रेणोः ९.७० ; १०. ८९ । अष्टकस्य १०. १०४ । प्रजापतेः ३. ३८ ; ५४–५६ । पूरणस्य १०. १६० । कतस्य ३. १७ ; १८ । देवरातस्य (शुनःशेपस्य) १. २४–३० ।

सर्वे भ्रातरः स्थ, ते सर्वेऽपि 'अस्मै' शुनःशेपादस्मादपि 'ज्यैष्ठाय न कल्पध्वं' ज्येष्ठत्वाभिमानं मा कुरुत, किं त्वसावेव युष्माकं मध्ये ज्येष्ठो भूत्वावतिष्ठता मिति ॥ ५ (१७) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां तृतीयाध्याये
(त्रयस्त्रिंशाध्याये) पञ्चमः खण्डः ॥ ५ (१७) ॥

॥ अथ षष्ठः खण्डः ॥

तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः॑ पञ्चाशदेव ज्यायांसो॑ मधुच्छन्दसः पञ्चाशत् कनीयांसस्तद्ये॑ ज्यायांसो॑ न ते कुशलं मेनिरे॑ ताननु व्याजहारान्॑ तान्वः प्रजा भक्षीष्टेति॑ त एतेऽन्ध्राः पुण्ड्राः शबराः* पुलिन्दा॑ मूतिबा इत्युदन्त्या बहवो भवन्ति॑ वैश्वामित्रा दस्यूनां भूयिष्ठाः॑ स होवाच मधुच्छन्दाः॑ पञ्चशता सार्द्धं॑ यन्नः पिता सञ्ज्ञानीते॑ तस्मिंस्तिष्ठामहे वयं॑ पुर-

---

* "शवराः" ख ।

स्त्वा सर्वे कुर्महे त्वा मन्वञ्चो वयं स्मसीत्यथ ह विश्वामित्रः प्रतीतः पुत्रांस्तुष्टाव ते वै पुत्राः पशुमन्तो वीरवन्तो भविष्यथ ये मानं मे ऽनुगृह्णन्तो वीरवन्तमकर्त मा पुर एत्रा वीरवन्तो देवरातेन गाथिनाः सर्वे राध्या * स्थ पुत्रा एष वः सद्विवाचनम् एष वः कुशिका वीरो देवरातस्त मन्वित युष्मांश्च दायं म उपेता विद्यां या मु च विद्मसि ते सम्यञ्चो वैश्वामित्राः सर्वे साकं सरातयः देवराताय तस्थिरे धृत्यै श्रैष्ठ्याय गाथिनाः अधीयत देवरातो रिक्थयोरुभयोर्ऋषिः जह्नूनाञ्चाधिपत्ये दैवे वेदे च गाथिनां तदेतत्परऋक् शतगाथं †शौनःशेप माख्यानं तद्धोता राज्ञे ऽभिषिक्तायाचष्टे हिरण्यकशिपावासीन आचष्टे हिरण्यकशिपावासीनः प्रतिगृणाति यशो वै हिरण्यं यशसैवैनं तत् समर्द्धयत्यो मित्यृचः प्रतिगर एवं तथेति गाथायां ओ मिति वै दैवं तथेति मानुषं दैवेन चैवैनं तन् मानुषेण च पापादेनसः प्रमुञ्चति तस्माद्यो राजा विजिती स्यादप्ययजमान आख्यापयेतैवैतच्छौनःशेप माख्यानं न हास्मिन्नल्पं च नैनः परिशिष्यते सहस्र माख्यात्रे दद्याच्छतं प्रतिगरित्र एते चैवासने श्वेतश्चाश्वतरीरथो होतुः पुत्रकामा हा‡प्याख्यापयेरन्

---

* "राध्याः" क, ङ। † "ऋतगाथं" ख, घ। ‡ "आ" ग।

लभन्ते[*] ह पुत्रान् लभन्ते[†] ह पुत्रान् ॥ ६ (१८) ॥

इत्यैतरेयब्राह्मणे सप्तमपञ्चिकायां तृतीयोऽध्यायः॥३॥

अथ विश्वामित्रपुत्राणां वृत्तान्त माह— "तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः, पञ्चाशदेव ज्यायांसो मधुच्छन्दसः, पञ्चाशत् कनीयांसः"—इति। मधुच्छन्दोनामकः कश्चित् पुत्रो मध्यमः; ततोऽपि ज्येष्ठाः कनिष्ठाश्च प्रत्येकं पञ्चाशत्सङ्ख्याका इत्येवम् 'एकशतं' तस्य पुत्राः॥

तेषां मध्ये ज्येष्ठानां वृत्तान्त माह— "तद्ये ज्यायांसो न ते कुशलं मेनिरे; ताननु व्याजहारान्तान्वः प्रजा भक्षीष्टेति; त एतेऽन्ध्राः पुण्ड्राः शबराः पुलिन्दा मूतिबा इत्युदन्त्या वहवो भवन्ति वैश्वामित्रा दस्यूनां भूयिष्ठाः"—इति। 'तत्' तेषु एकशतसङ्ख्याकेषु पुत्रेषु मध्ये 'ये' मधुच्छन्दसो ज्येष्ठाः पञ्चाशत्सङ्ख्याकाः सन्ति, 'ते' शुनःशेपस्य विश्वामित्रपुत्रत्वं 'कुशलं न मेनिरे' इदं समीचीन मित्येवं नाङ्गीकृतवन्तः। 'तान्' ज्येष्ठान् पञ्चाशत्सङ्ख्याकान् 'अनु'-लक्ष्य विश्वामित्रो 'व्याजहार' व्याहरणं शापरूपं वाक्य मुक्तवान्। हे ज्येष्ठपुत्राः! युष्माकं मदीयाज्ञातिलङ्घिनां 'प्रजाः' पुत्रादिकाः 'अन्तान् भक्षीष्ट' चण्डालादिरूपान् नीचजातिविशेषान् भजता मिति। 'त एते' शप्ताः सन्तोऽन्ध्रत्वादिपञ्चविधनीचजातिविशेषा भवन्ति। 'इति'—शब्दस्य तत्प्रदर्शनत्वादन्येऽपि नीचजातिविशेषाः सर्वे विवक्षिताः। उद्गतोऽन्तः 'उदन्तः' अत्यन्तनीचजातिः, तत्र भवाः 'उदन्त्याः'। ते 'बहवः' अनेकविधाः वैश्वामित्रसन्ततिजाः

---

[*] "०रंलभन्ते" क, ख, घ, च, "०रंल्लभन्ते" ङ।

[†] "पुत्रां लभन्ते" घ, "पुत्रान्ल्लभन्ते" ङ, "पुत्राल्लभन्ते" च।

'दस्यूनां' तस्कराणां मध्ये 'भूयिष्ठाः' अत्यधिकाः ॥ ज्येष्ठानां वृत्तान्त मुक्त्वा मधुच्छन्दसः तत्कनिष्ठानाञ्च वृत्तान्तं गाथया दर्शयति— "स होवाच मधुच्छन्दाः पञ्चाशता सार्द्धं, यन्नः पिता सञ्जानीते तस्मिंस्तिष्ठामहे वयं, पुरस्त्वा सर्वे कुर्महे, त्वा मन्वञ्चो वयं स्मसीति"–इति । कनिष्ठपुत्राणां पञ्चाशता सह मधुच्छन्दोनामकः 'सः' मध्यमः पुत्रः, शुनःशेपं प्रत्येव मुवाच— हे शुनःशेप ! 'नः' अस्माकं 'पिता' विश्वामित्रो 'यत्' कार्यं त्वदीयज्येष्ठपुत्रत्वरूपं 'सञ्जानीते' सम्यक् जानाति, अङ्गीकरोति ; 'तस्मिन्' कार्ये वयं 'तिष्ठामहे' तत् कार्यं मङ्गीकुर्मः । 'सर्वे' वयं 'त्वा' शुनःशेपनामानं त्वां 'पुरस्कुर्महे' पुरस्कृत्य ज्येष्ठं कृत्वा वर्त्तामहे । 'त्वा मन्वञ्चः' शुनःशेप मनु गच्छन्तः 'स्मसि' भवाम इत्युक्तवान् ॥

विश्वामित्रवृत्तान्तं दर्शयति— "अथ ह विश्वामित्रः प्रतीतः पुत्रांस्तुष्टाव"–इति । 'अथ' मधुच्छन्दस्सहितानां पञ्चाशत्कनिष्ठपुत्राणां शुनःशेपविषयज्येष्ठपुत्रत्वाङ्गीकारानन्तरं स विश्वामित्रः 'प्रतीतः' तेषु प्रत्ययं मदनुकूला इति विश्वासं प्राप्तः प्रीत्या पुत्रान् गाथाभिस्तुष्टाव ॥

तत्र प्रथमां गाथा माह— "ते वै पुत्राः पशुमन्तो वीरवन्तो भविष्यथ, ये मानं मेऽनुगृह्णन्तो वीरवन्त मकर्त्त मा"–इति । हे मधुच्छन्दःप्रमुखाः कनिष्ठपुत्राः! 'ये' यूयं 'मे मानं' मदीयं मतम् 'अनुगृह्णन्तः' आनुकूल्येन स्वीकुर्वन्तो 'मां' विश्वामित्रं 'वीरवन्तं' स्वधर्मशूरपुत्रयुक्तम् 'अकर्त्त' कृतवन्तः, 'ते वै' तादृशा यूयं बहुविधपशुपुत्रयुक्ताश्च भविष्यथ ॥

द्वितीयां गाथा माह— "पुर एत्रा वीरवन्तो देवरातेन गाथिनाः, सर्वे राध्याः स्थ पुत्रा एष वः सद्विवाचनम्"–इति ।

गाथिनशब्दो विश्वामित्रस्य पितर माचष्टे। हे 'गाथिनाः' गाथिनपौत्राः * 'पुर एत्ता' युष्माकं पुरतो एत्ता, मुख्येन देवरातेन सह यूयं सर्वे 'वीरवन्तः' श्रेष्ठपुत्रयुक्ताः 'राध्याः स्थ' सर्वैः पुरुषैराराधनीयाः पूज्या भवथ ; हे 'पुत्राः' मधुच्छन्दःप्रभृतयः ! 'एषः' देवरातो 'वः' युष्माकं 'सद्विवाचनम्' सन्मार्गस्य विशेषतो ऽध्यापकं, करिष्यतीति शेषः ॥

तृतीयां गाथा माह— "एष वः कुशिका वीरो देवरातस्त मन्वित, युष्मांश्च दायं म उपेता विद्यां या मु च विद्मसि"—इति। हे 'कुशिकाः' कुशिकनाम्नो मत्पितामहस्य सम्बन्धिनो मधुच्छन्दःप्रभृतयः! 'एषः' देवरातः 'वः' युष्माकं, ज्येष्ठभ्रातेति शेषः। 'तं' देवरातं यूयम् 'अन्वित' अनुगता भव। मे 'मदीयं' 'दायं' धनं युष्मांश्च 'उपेता' प्राप्स्यति ; चकाराद् देवरातञ्च। 'या मु च' यामपि काञ्चिद् वेदशास्त्रादिरूपां 'विद्यां' 'विद्मसि' वयं जानीमः, सापि युष्मान् 'उपेता' प्राप्स्यति ॥

चतुर्थीं गाथा माह— "ते सम्यञ्चो वैश्वामित्राः सर्वे साकं सरातयः, देवरताय तस्थिरे धृत्यै श्रैष्ठ्याय गाथिनाः"—इति। हे 'वैश्वामित्राः' विश्वामित्रस्य मम पुत्राः। ये 'गाथिनाः' गाथिनगोत्राः, 'ते' यूयं सर्वेऽपि 'सम्यञ्चः' समीचीनबुद्धयः, ये 'साकं' देवरातेन सार्द्धं 'सरातयः' रातिर्धनसम्पत्तिस्तया युक्ताः सन्तो 'देवराताय' मदीयश्रेष्ठपुत्रस्य देवरातस्य 'धृत्यै' धारणं युष्मत्पोषणम्, 'श्रैष्ठ्याय' युष्माकं मध्ये श्रेष्ठत्वञ्च 'तस्थिरे' अङ्गीकृतवन्तः ॥

पञ्चमीं गाथा माह— "अधीयत देवरातो रिक्थयोरुभयोर्ऋषिः, जह्नूनाञ्चाधिपत्ये दैवे वेदे च गाथिनाम्"—इति। "इक्

---

* "रेणूनां वैश्वामित्रगाथिनरैणवेति"—इति आश्व० श्रौ० १२. १४. ६।

स्मरणे"–इति धातुः । 'अधीयत' स्मृतिकारैर्महर्षिभिः स्मर्यते । कथ मिति तदुच्यते— अयं देवरातो द्व्यामुष्यायणत्वाद् 'उभयोः' अजीगर्त्तविश्वामित्रयोः सम्बन्धिनी ये 'रिक्थे' धने, तयोः 'ऋषिः' द्रष्टा, तदुभय मर्हतीत्यर्थः । अजीगर्त्तस्य कूटस्थ ऋषिर्जह्नुसञ्ज्ञकः ; तस्य वंशे जाताः सर्वे जह्नवः ; तेषां च 'आधिपत्ये' स्वामित्वे देवरातो योग्यः । तथा 'दैवे' देवसम्बन्धिनि यागादिकर्मणि, 'वेदे' च मन्त्ररूपे समर्थः । 'गाथिनाम्' अस्मत्पितृवंशोत्पन्नानाञ्च सर्वेषा माधिपत्ये योग्यः ॥

उक्त मुपाख्यान मुपसंहरति— "तदेतत्परऋक्शतगाथं शौनःशेप माख्यानम्"–इति । "कस्य नूनं ०—० नि धारय"–इत्यन्ताः सप्ताधिकनवतिसङ्ख्याका ऋचः *, "त्वं नः"–"स त्वम्"–इत्यादिकास्तिस्र ऋचः †, एव मृचां शतम् ; 'परः'शब्दोऽधिकवाची ; पूर्वोक्तादृक्शतात् 'परः' अधिका एकत्रिंशत्सङ्ख्याकाः "यन्न्विमम्" –इत्याद्या गाथाः ‡ यस्मिन्नाख्याने तदेतत् 'परऋक्शतगाथं' । शुनःशेपेन दृष्टाः सप्ताधिकनवतिसङ्ख्यायुक्ता ऋचो याः सन्ति, अन्येन दृष्टास्तिस्र ऋचो याः सन्ति, ब्राह्मणे प्रोक्ता एकत्रिंश-

---

* ऋक्संहितायां शुनःशेपेन दृष्टानि अष्टौ सूक्तान्याम्नातानि । तत्र प्रथममण्डलस्य षष्ठानुवाकात्मकानि सप्त, नवममण्डलीयतृतीयञ्चैकम् । इह प्रथममण्डलीयानां ग्रहण मिष्टम् ; तेषा मेवात्र प्रतीकग्रहणादितः समुल्लेखात । तदत्र कस्य नून मिति प्रथमसूक्ताद्यभागः नि धारयेति तु सप्तमसूक्तान्तभाग इति बोध्यम् । तदेवं १सू० १५ऋ०, २सू० २१ऋ०, ३सू० १०ऋ, ४सू० १२ऋ०, ५सू० ९ऋ०, ६सू० ७ऋ०, ७सू० २२ऋ० । सङ्कलनया ९७ ऋचो भवन्ति ।

† तत्र त्वं न इत्यस्याः (ऋ० सं० ४. १. ४.), स त्व मिति तदुत्तरस्याश्च वामदेवऋषिः तृतीयस्याः शुनश्चिच्छेप मित्यस्याः (५. २. ७.) कुमारो वृशो वोभौ वा ऋषी ।

‡ यन्न्विमं पुत्र मिच्छन्तीति ५९पृ० ७पं० द्रष्टव्यम् ।

गाथाविशेषा याः सन्ति, तैः सर्वैरुपेतं "हरिश्चन्द्रो ह वैधसः"-इत्यादिकं (५८पृ० ५पं०) सर्वं शुनःशेपविषय माख्यानम् ॥

तस्याख्यानस्य राजसूयक्रतौ विनियोगं दर्शयति— "तद्धोता राज्ञेऽभिषिक्तायाचष्टे"-इति । राजसूयक्रतावभिषेचनीयाख्ये कर्मणि यदा राजा अभिषिक्तो भवति, तदानीं तस्मै 'राज्ञे' 'तत्' आख्यानं होता कथयेत् * ॥

तत्रेतिकर्त्तव्यं दर्शयति— "हिरण्यकशिपावासीन आचष्टे; हिरण्यकशिपावासीनः प्रतिगृणाति; यशो वै हिरण्यं, यशसैवैनं तत् समर्द्धयति"-इति †। होता यदा उपाख्यानं कथयति, तदानीं 'हिरण्यकशिपौ' सुवर्णनिर्मितसूत्रैर्निष्पादिते कशिपौ स होतोपविशेत्। तदाख्यानमध्ये अध्वर्युश्च हिरण्यकशिपावासीनो वक्ष्यमाणं 'प्रतिगरं' ब्रूयात्। हिरण्यस्य यशोहेतुत्वात् यशस्त्वम्; तथा सति 'एनं' यशसैव समृद्धं करोति ॥

अध्वर्युणा प्रयोक्तव्यं प्रतिगरविशेषं दर्शयति— "ओ मित्यृचः प्रतिगर, एवं तथेति गाथाया; ओ मिति वै दैवं, तथेति मानुषं; दैवेन चैवैनं तन् मानुषेण च पापादेनसः प्रमुञ्चति"-इति ‡। होता प्रयुक्ताया एकैकस्या ऋचोऽन्ते "अध्वर्यौरोम्"-इत्येतादृशः प्रतिगरो भवति। ओ मित्येतच्छन्दोरूपं 'दैवं' देवैरङ्गीकारार्थं प्रयुज्यते; तत् तथेत्यन्तं 'मानुषं' मनुष्या अङ्गीकारे तथेति शब्दं

---

* "अथ राजसूयाः"-इति प्रक्रम्य प्रोक्त माश्वलायनेन— "संस्थिते मरुत्वतीये दक्षिणत आहवनीयस्य हिरण्यकशिपावासीनोऽभिषिक्ताय पुत्रामात्यपरिवृताय राज्ञे शौनःशेप माचक्षीत"-इति श्रौ० ९. ३. ९।

† एष एव पाठः समुद्धृत आश्वलायनेन। श्रौ० ९. ३. १०।

‡ उद्धृतश्चैष पाठ आश्व० श्रौ० ९. ३. ११, १२।

प्रयुञ्जते । 'तत्' तेन प्रतिगरणेन दैवेन मानुषेण चाध्वर्युः 'एनं' राजानं 'पापात्' ऐहिकादपकीर्त्तिरूपात्, 'एनसः' नरकहेतोश्च 'प्रमुञ्चति' प्रमुक्तं करोति ॥

क्रत्वर्थत्वेनोपाख्यानं विधाय क्रतुनिरपेक्षपुरुषार्थत्वेन विधत्ते— "तस्माद्यो राजा विजिती स्यादप्ययजमान आख्यापयेतैवैतच्छौनःशेप माख्यानं ; न ह्यस्मिन्नल्पञ्चनैनः परिशिष्यते"—इति *। यस्मादुपाख्यानं पापप्रशमनहेतुः, 'तस्माद्' 'अयजमानः अपि' राजसूयक्रतुरहितोऽपि राजा 'विजिती' यदि विजयोपेतः स्यात्, तदानी मेतच्छौनःशेप माख्यानम् 'आख्यापयेत्' तस्य राज्ञो यः कश्चिद् ब्राह्मण उपाख्यानं ब्रूयात् । तथा सति 'तस्मिन्' राजनि 'अल्पञ्चन' किञ्चिदपि 'एनः' पापं 'न ह वै परिशिष्यते' सर्वं पापं नश्यतीत्यर्थः ॥

आख्यानप्रयुक्तां दक्षिणां विधत्ते— "सहस्त्र माख्यात्रे दद्याच्छतं प्रतिगरित्र, एते चैवासने श्वेतश्चाश्वतरीरथो होतुः"—इति †। योऽय माख्याता होता, तस्मै क्रत्वर्थदक्षिणा मन्तरेण उपाख्यानप्रयुक्तां दक्षिणां गोसहस्त्ररूपां दद्यात् । 'प्रतिगरित्रे' अध्वर्यवे गोशतं दद्यात् । ये हिरण्यकशिपुरूपे द्वे 'आसने' स्तः, एते अपि ताभ्या मेव दद्यात् । अश्वतरीभ्यां सङ्कीर्णजातियुक्ताभ्यां अधिकशक्तिभ्यां युक्तो रथः 'अश्वतरीरथः', स च रजतेनालङ्कृतत्वात् श्वेतः, सोऽपि तादृशो होतुर्देयः ॥

पूर्वं मयज्ञसंयुक्तः कल्पो विजयिनो राज्ञो अभिहितः, इदानीं पुत्रकामाना मपि सर्वेषां विधत्ते— "पुत्रकामा ह्या-

---

* पाठ एष एवोद्धृतः आश्व० श्रौ० ९. ३. १३ ।

† "सहस्रमाख्यात्रे दद्याच्छतं प्रतिगरित्रे यथास्वमासने"—इति आश्व० श्रौ०९.३,१४-१६ ।

प्याख्यापयेरन्; लभन्ते ह पुत्रान्, लभन्ते ह पुत्रान्”–इति। ये पुत्रकामाः सन्ति, ते ‘ह’ प्रसिद्ध मेतदुपाख्यानम् ‘आख्यापयेरन्’ ब्राह्मणमुखाच्छृणुयुरित्यर्थः। ते पुत्रान् लभन्ते। अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ६ (१८) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां तृतीयाध्याये
(त्रयस्त्रिंशाध्याये) षष्ठः खण्डः ॥ ६ (१८) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादिष्टतो
भगवत्सायणाचार्येण विरचिते माधवीये ‘वेदार्थप्रकाश’–नामभाष्ये
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायाः तृतीयोऽध्यायः ॥

॥ अथ चतुर्थाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ प्रजापतिर्यज्ञ मसृजत यज्ञं सृष्ट मनु ब्रह्मक्षत्रे असृज्येतां ब्रह्मक्षत्रे अनु द्वय्यः प्रजा असृज्यन्त हुतादश्चाहुतादश्च ब्रह्मैवानु हुतादः क्षत्र मन्वहुताद एता वै प्रजा हुतादो यद् ब्राह्मणा अथैता अहुतादो यद्राजन्यो वैश्यः शूद्रस्ताभ्यो यज्ञ उदक्रामत्तं ब्रह्मक्षत्रे अन्वैतां यान्येव ब्रह्मण आयुधानि तैर्ब्रह्मान्वैद् यानि क्षत्रस्य तैः क्षत्र मेतानि वै ब्रह्मण आयुधानि यद्यज्ञायुधान्यथैतानि क्षत्रस्यायुधानि यदश्वरथः कवच इषुधन्व तं क्षत्र मनन्वाप्यन्यवर्त्ततायुधेभ्यो ह स्मास्य विजमानः पराङेवैत्यथैनं ब्रह्मान्वैत्त माप्नोत्त माप्त्वा परस्तान्निरुध्यातिष्ठत् स आप्तः परस्तान्निरुद्धस्तिष्ठञ्ज्ञात्वा स्वान्यायुधानि ब्रह्मोपावर्त्तत तस्माद्धाप्येतर्हि यज्ञो ब्रह्मण्येव ब्राह्मणेषु प्रतिष्ठितोऽथैनत् क्षत्र मन्वागच्छत्तदब्रवीदुप माऽस्मिन् यज्ञे ह्वयस्वेति तत् तथेत्यब्रवीत् तद्वै निधाय स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा

यज्ञ मुपावर्त्तस्वेति॑ तथेति॑ तत्क्षत्रं निधाय॑ स्वान्यायुधानि॑ ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण॑ ब्रह्म भूत्वा यज्ञ मुपावर्त्तत॑ तस्माद्वाप्येतर्हि॑ क्षत्रियो यजमानो॑ निधायैव स्वान्यायुधानि॑ ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण॑ ब्रह्म भूत्वा यज्ञ मुपावर्त्तते॑ ॥ १ (१९) ॥

॥ श्रीगणेशायनमः ॥

शौनःशेपप्रसङ्गेन याः क्रिया राजकर्त्तृकाः ।
तद्विशेषविधानार्थ मध्यायोऽत्र प्रवक्ष्यते ॥ १ ॥

अत्रादौ किञ्चिदुपाख्यान माह— "प्रजापतिर्यज्ञ मसृजत ; यज्ञं सृष्ट मनु ब्रह्मक्षत्रे असृज्येतां ; ब्रह्मक्षत्रे अनु द्वय्यः प्रजा असृज्यन्त, हुतादश्चाहुतादश्च ; ब्रह्मैवानु हुताद ; एता वै प्रजा हुतादो यद् ब्राह्मणा, अथैता अहुतादो यद्राजन्यो वैश्यः शूद्रः"—इति । पुरा प्रजापतिर्ज्योतिष्टोमाख्यं यज्ञं सृष्ट्वा तदनन्तरं ब्राह्मणक्षत्रियजातिद्वयम् ; तत ऊर्ध्वं हुतादश्चाहुतादश्चेत्युभयविधाः प्रजा असृज्यन्त । तत्र ब्राह्मणजाति मेवानु तद्व्यक्तिभूता हुतादः सृष्टाः, क्षत्रियजाति मनु तद्व्यक्तिसजातीया अहुतादः प्रजाः सृष्टाः । ये ब्राह्मणाः सन्ति, 'एताः' प्रजा आर्त्विज्यसद्भावाद्धुतशेष मदन्ति भक्षयन्तीति 'हुतादः', ये राजन्य–वैश्य–शूद्राः 'एताः' प्रजाः आर्त्त्विज्याभावात् हुतशेषं न भक्षयन्तीति 'अहुतादः' । इत्थं यज्ञं चतुरो वर्णान् च प्रजापतिः सृष्टवान् ॥

अथ सृष्टस्य यज्ञस्य वृत्तान्त माह— "ताभ्यो यज्ञ उदक्रामत्, तं ब्रह्मक्षत्रे अन्वैतां ; यान्येव ब्रह्मण आयुधानि तैर्ब्रह्मान्वैद् ; यानि क्षत्रस्य तं क्षत्रम् ; एतानि वै ब्रह्मण आयुधानि यद्यज्ञा-

युधान्यथैतानि क्षत्रस्यायुधानि यदश्वरथः कवच इषुधन्व''–इति । स यज्ञः 'ताभ्यः' प्रजाभ्यो ऽपरक्त उत्क्रम्य दूरे ऽगच्छत् । तं 'गच्छन्तं' यज्ञं ब्राह्मणजाति–क्षत्रियजाती द्वे 'अन्वैतां' पश्चाद् गच्छताम् । ब्राह्मणस्य योग्यानि यान्यायुधानि, तैः सह ब्राह्मणजातिर्यज्ञ मन्वगच्छत् ; क्षत्रियस्य योग्यानि यान्यायुधानि, तैः सह क्षत्रियजातिर्यज्ञ मन्वगच्छत् । यानि यज्ञायुधत्वेन शाखान्तरे श्रूयन्ते "स्फ्यश्च कपालानि चाग्निहोत्रहवणी च शूर्पञ्च कृष्णाजिनञ्च शम्या चोलूखलञ्च मुसलञ्च दृषच्चोपला चैतानि वै दश यज्ञायुधानि''–इति (तै० सं० १.६.८.२,३.), तान्येव ब्राह्मणजातेरुचितान्यायुधानि । योऽय मश्वयुक्तो रथो यश्च कवचः यदपि बाणयुक्तं धनुः, एतान्यपि क्षत्रियजातेरुचितान्यायुधानि ॥

यज्ञ मनुगच्छन्त्योर्ब्राह्मणक्षत्रियजात्योर्मध्ये ब्राह्मणजातेर्यज्ञप्राप्तिं दर्शयति—"तं क्षत्र मनन्वाप्य न्यवर्त्ततायुधेभ्यो ह स्मास्य विजमानः पराङेवैत्यथैनं ब्रह्मान्वैत्, तमाप्नोत्, त माप्त्वा परस्तान्निरुद्ध्यातिष्ठत्, स आप्तः परस्तान्निरुद्धस्तिष्ठञ्ज्ञात्वा स्वान्यायुधानि ब्रह्मोपावर्त्तत ; तस्माद्धाप्येतर्हि यज्ञो ब्रह्मण्येव ब्राह्मणेषु प्रतिष्ठितः''–इति । 'क्षत्रं' क्षत्रियजातिः, 'तं' यज्ञम् 'अनन्वाप्य' अनुगमनेन अलब्ध्वा, तस्मादनुगमनात् न्यवर्त्तत । यज्ञस्तु क्षत्रियस्यायुधेभ्यो धनुरादिभ्यो 'विजमानः' भीतिं प्राप्नुवन् 'पराङेव' पुनरावृत्तिरहित एव 'एति स्म' पलाय्य दूरे गतः । 'अथ' अनन्तरम् 'एनं' यज्ञं 'ब्रह्म' ब्राह्मणजातिः 'अन्वैत्' अन्वगच्छत्, अनुगम्य च 'तं' यज्ञ माप्नोति स्म । आप्त्वा च 'तं' यज्ञ मतिक्रम्य 'परस्तात्' परभागे 'निरुद्ध्य' यज्ञगमनं प्रतिबद्ध्यातिष्ठत् । अत्र यज्ञ आप्तः, तथा ब्राह्मणजात्या प्राप्तः, 'परस्तात्' परभागे 'निरुद्धः'

गमनात् प्रतिबद्धः। तत्रैव तिष्ठन् ब्राह्मणस्य हस्ते स्फ्यकपालादीनि स्वकीयान्यायुधानि ज्ञात्वा ब्राह्मणजातिं प्रति 'उपावर्तत' समीप आगच्छत्। यस्मादेवं तस्मादिदानी मपि यज्ञो 'ब्रह्मण्येव' आर्त्विज्ययोग्यायां ब्राह्मणजातावेव, तत्रापि प्रयोगकुशलेषु 'ब्राह्मणेषु' प्रतिष्ठितो वर्त्तते॥

अथ क्षत्रियस्य यज्ञप्राप्तिं दर्शयति— "अथैनत् क्षत्र मन्वागच्छत्तदब्रवीदुप मा ऽस्मिन् यज्ञे ह्वयस्वेति ; तत् तथेत्यब्रवीत् ; तद्वै निधाय स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा यज्ञ मुपावर्त्तस्वेति, तथेति; तत्क्षत्रं निधाय स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा यज्ञ मुपावर्त्तत; तस्माद्धाप्येतर्हि क्षत्रियो यजमानो निधायैव स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा यज्ञ मुपावर्त्तते"–इति *। 'अथ' ब्राह्मणस्य यज्ञप्राप्तेरनन्तरम्, 'एनत्' ब्रह्म ब्राह्मणजातिं 'क्षत्रं' क्षत्रियजातिम् 'अन्वागच्छत्'। आगत्य च 'तद्' ब्रह्म प्रत्येव मब्रवीत्। हे ब्राह्मण! मां क्षत्रिय मस्मिन् यज्ञे 'उपह्वयस्व' अनुजानीहि, मा माहूय यज्ञेन संयोजयेत्यर्थः। 'तत्' उक्तं कार्यं तथैवास्त्विति ब्राह्मणो ऽब्रवीत्। उक्त्वा च क्षत्रियायैवं बुद्धिप्रदानं कृतवान्—हे क्षत्रिय! 'तद्वै' तथा सति तव यज्ञप्राप्तौ अपेक्षायां सत्यां स्वकीयानि धनुरादीनि 'आयुधानि' क्वचित् स्थापनीयानि ; तान्यवस्थाप्य ब्राह्मणस्यैव योग्यैः स्फ्यकपालाद्यायुधैर्ब्राह्मणस्य योगेन शान्तिश्रद्धालुत्वयुक्तेन 'रूपेण' वेषेण च युक्तो 'ब्रह्म भूत्वा' ब्राह्मणसदृशो भूत्वा यज्ञं प्रत्युपावर्त्तस्वेति। 'तत् क्षत्रम्' स च क्षत्रियः 'तथेति' अङ्गीकृत्य स्वकीयानि धनुरादीन्यायुधानि 'निधाय'

---

* अतएवैव माम्नातम्— "स एष यज्ञायुधी यजमानः"–इति शत०ब्रा० १२,५,२,८।

परित्यज्य, शान्तवेषेण यज्ञं प्राप्तवान् । यस्मादादिसृष्टौ एवं सम्पन्नं, तस्मादिदानी मपि क्षत्रियो ब्राह्मणवेषेण धनुरादिरहितेन यज्ञ मनुतिष्ठति ॥ १ (१९) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां चतुर्थाध्याये
(चतुस्त्रिंशाध्याये) प्रथमः खण्डः ॥ १ (१९) ॥

॥ अथ द्वितीयः खण्डः ॥

अथातो देवयजनस्यैव याच्ञा-*-स्त॑दाहुर्यद् ब्राह्मणो राजन्यो॑ वैश्यो दीक्षिष्यमाणः॑ क्षत्रियं देवयजनं याचति॑ कं क्षत्रियो याचेदिति॑ दैवं क्षत्रं याचेदित्याहु॑रादित्यो वै दैवं क्षत्र॑ मादित्य एषां भूताना मधिप॑तिः स यदहर्दीक्षिष्यमाणो भवति॑ तदहः पूर्वाह्ण॑ एवोद्यन्तं मादित्य मुपतिष्ठेतेदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं॑ देव सवितर्देवयजनं मे देहि॑ देवयज्याया इति॑ देवयजनं याचति॑ स यत् तत्र याचित उत्तरां सर्प॑त्यों तथा ददामीति हैव तदाह॑ तस्य ह न काचन रिष्टि†र्भवति॑ देवेन सवित्रा प्रसूत॑स्योत्तरोत्तरिणीं ह श्रिय मश्नुते॑ऽश्नुते ह प्रजाना मैश्वर्यं

---

* "या च्न्य" क, ङ, "याच्न्द" च ।   † "ऋष्टि" ङ ।

माधिपत्यं य एव मुपस्थाय याचित्वा देवयजन मध्यवसाय दीक्षते क्षत्रियः सन् ॥ २ (२०) ॥

क्षत्रियस्य यज्ञप्राप्ति मुक्त्वा देवयजनलाभं वक्तुं प्रश्न मुद्भावयति—"अथातो देवयजनस्यैव याच्ञास्तदाहुर्यद् ब्राह्मणो राजन्यो वैश्यो दीक्षिष्यमाणः क्षत्रियं देवयजनं याचति ; कं क्षत्रियो याचेदिति"–इति । 'अथ' क्षत्रियस्य यज्ञेच्छानन्तरम् , यतो देवयजन मपेक्षितम् , 'अतः' कारणाद् 'देवयजनस्यैव' देवा इज्यन्ते यस्मिन् देशे स देवयजनस्तस्यैव 'याच्ञाः' * याचन मभिधीयतइति शेषः । 'तत्' तत्र देवयजने ब्रह्मवादिनः प्रश्न माहुः । 'यद्' यस्मात् कारणाद् ब्राह्मणादयस्त्रयो वर्णाः 'क्षत्रियम्' अभिषिक्तं राजानं प्रति देवयजनं याचति ; तस्माद्राज्ञोऽपि देवयजनो याचितव्यः । 'क्षत्रियः' राजा 'कम्' अन्यं स्वामिनं याचेदिति प्रश्नः ॥

तस्योत्तर माह—"दैवं क्षत्रं याचेदित्याहुरादित्यो वै दैवं क्षत्र मादित्य एषां भूताना मधिपतिः"–इति । राज्ञो मनुजेषु मध्ये स्वाम्यन्तराभावे ऽपि देवसम्बन्धिक्षत्रियजातेः स्वामित्वात् तत्रैव याचन मुचित मित्युत्तर माहुः । योऽय मादित्योऽस्ति , असावेव 'दैवं' देवसम्बन्धि 'क्षत्रं' क्षत्रियजातिः । अय मादित्य एषां प्राणिनां तमोनिवारणेनाधिष्ठाता पालयिता ; ततः स्वामित्वात् तत्समीपे याचन मुचितम् ॥

तस्य प्रकारं दर्शयति— "स यदहर्दीक्षिष्यमाणो भवति, तदहः पूर्वाह्ण एवोद्यन्त मादित्य मुपतिष्ठेतेदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमम् , देव सवितर्देवयजनं मे देहि देवयज्याया इति

---

* "याच्ञाय कृणुते"–इति अथ०सं०१२,४,३०। "याच्ञा" शत०ब्रा० २. ३. ४. ४।

देवयजनं याचति"–इति । 'सः' राजा यस्मिन्नेवाहनि दीक्षितु मुद्युक्तः, तस्याह्नः पूर्वाह्णकाले एव 'उद्यन्तम्' ऊर्द्ध्वं गच्छन्त मादित्य मृग्यजुर्भ्या मुपतिष्ठेत् । "इदं श्रेष्ठम्"–इत्यृचः प्रतीकम्, "देव सवितः"–इत्यादिकं यजुषः । हे देव सवितः ! 'देवयज्यायै' देवसम्बन्धियागार्थं 'मे' मह्यं 'देवयजनं' देवोचितयागदेशं देहि, 'इति' अनेन प्रकारेण देवं याचेत् । ऋचोपस्थानं, यजुषा याचन मिति व्यवस्थया द्रष्टव्यम् ॥

राज्ञा याचितस्यादित्यस्य प्रत्युत्तरं सम्पादयति— "स यत् तत्र याचित उत्तरां सर्पत्यों तथा ददामीति हैव तदाह"-इति । आदित्यो 'यद्' यदि 'तत्र' तदानी मनेन राज्ञा याचितः सन् 'उत्तरां' यत्र स्वयं तिष्ठति तस्मादनन्तरभाविनीं दिशं प्रति 'सर्पति' गच्छेत्, तदानीं 'तत्' तेन सर्पणेन 'ॐ तथा ददामि' इत्येव मुत्तरम् 'आह' ब्रूते । लोकेऽपि पृष्टः पुरुषो वाचा वा हस्तशिरश्चालनादिना वोत्तरं प्रयच्छति, तद्वदत्रापि सर्पण मेवोत्तर मस्तु । सर्पणस्याभिप्रायः ॐ तथा ददामीत्यनेन कथितः । 'ॐ' त्वदुक्त मङ्गीकरोमि, 'तथा' तेनैव प्रकारेण देवयजनं ददामि ॥

ता मेतां देवयजनयाच्ञां प्रशंसति— "तस्य ह न काचन रिष्टिर्भवति, देवेन सवित्रा प्रसूतस्योत्तरोत्तरिणीं ह श्रिय मश्नुते; ऽश्नुते ह प्रजाना मैश्वर्यं माधिपत्यं य एव मुपस्थाय याचित्वा देवयजन मध्यवसाय दीक्षते क्षत्रियः सन्"–इति । 'यः' पुमान् 'क्षत्रियः' स्वयं राजा सन्, 'एवम्' ऋचादित्य मुपस्थाय, यजुषा याचित्वा, ततो देवयजनं निश्चित्य, 'दीक्षते' दीक्षां प्राप्नोति ; 'तस्य' राज्ञः सवित्रा देवेन 'प्रसूतस्य' अनुज्ञातस्य 'रिष्टिः' हिंसा 'काचन' काचिदपि न भवति । न केवलं हिंसाराहित्यं, किन्तु 'उत्तरो-

त्तरिणीं’ दिने दिने वर्द्धमानां श्रियम् ‘अश्नुते’ प्राप्नोति ; किञ्च ‘प्रजानां’ सर्वासाम् ‘ऐश्वर्यम्’ ईश्वरत्वं नियमनसामर्थ्यम्, ‘आधिपत्यम्’ अधिष्ठाय पालयितृत्वम्, तत्तद्योगक्षेमसम्पादनम् ‘अश्नुते’ प्राप्नोति ॥ २ (२०) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां चतुर्थाध्याये
(चतुस्त्रिंशाध्याये) द्वितीयः खण्डः ॥ २ (२०) ॥

॥ अथ तृतीयः खण्डः ॥

अथात इष्टापूर्त्तस्यापरिज्यानिः क्षत्रियस्य यजमानस्य स पुरस्ताद् दीक्षाया आहुतिं जुहुयाच्चतुर्गृहीत माज्य माहवनीय इष्टापूर्त्तस्यापरिज्यान्यै पुनर्न इन्द्रो मघवा ददातु ब्रह्म पुनरिष्टं पूर्त्तं दात् स्वाहेत्यथानूबन्ध्याये समिष्टयजुषा मुपरिष्टात् पुनर्नो अग्निर्जातवेदा ददातु क्षत्रं पुनरिष्टं पूर्त्तं दात्स्वाहेति सैषेष्टापूर्त्तस्यापरिज्यानिः क्षत्रियस्य यजमानस्य यदेते आहुती तस्मादेते होतव्ये ॥ ३ (२१) ॥

तस्यैव क्षत्रियस्य होमं विधत्ते— “अथात इष्टापूर्त्तस्यापरिज्यानिः क्षत्रियस्य यजमानस्य ; स पुरस्ताद् दीक्षाया आहुतिं जुहुयाच्चतुर्गृहीत माज्य माहवनीय इष्टापूर्त्तस्यापरिज्यान्यै”—

इति । 'अथ' देवयजननिश्चयानन्तरम् , यस्मादनुष्ठेयस्य इष्टापूर्त्तस्य 'अपरिज्यानिः' विनाशाभावोऽपेक्षितः , 'अतः' कारणात् यजमानस्य 'क्षत्रियस्य' राज्ञः इष्टापूर्त्तापरिज्यानिसञ्ज्ञको होमः , अभिधीयते इति शेषः । इष्टापूर्त्तशब्दार्थः पूर्वाचार्यैर्दर्शितः—

"वर्णाश्रमान्वयी धर्म इष्टम् , पूर्त्तं मथेतरत् ।
प्रपा-तटाकादिरूपं तच्च सर्वत्र दृश्यते ।
स्मार्त्तं पूर्त्तं श्रौत मिष्ट मिति केचिदिहोचिरे"–इति ।

'सः' राजा दीक्षायाः पूर्वं माहुतिं जुहुयात् । 'चतुर्गृहीत माज्यं' द्रव्यम् ; 'आहवनीयः' होमस्थानम् ; अनुष्ठेयस्येष्टापूर्त्तस्य फलपर्यवसायित्वलक्षणो विनाशाभावः प्रयोजनम् ॥

होमे मन्त्रं दर्शयति— "पुनर्न इन्द्रो मघवा ददातु, ब्रह्म पुनरिष्टं पूर्त्तं दात् स्वाहेति"–इति । "पुनर्नः"–इत्यादिक मृचः प्रतीकम् , "ब्रह्म"–इत्यादिकं यजुः । 'ब्रह्म' वेदरूपो मन्त्रः, 'इष्टं पूर्त्तं' यथोक्तलक्षणे 'पुनर्दात्' भूयो ददातु । तदर्थ मिदं 'स्वाहा' स्वाहुत मस्तु ॥

दीक्षणीयेष्टेः पूर्वकालीनं होमं विधायानुबन्ध्याख्यपशोरुत्तरकालीनं होमं विधत्ते— "अथानूबन्ध्यायै समिष्टयजुषा मुपरिष्टात् पुनर्नो अग्निर्जातवेदा ददातु क्षत्रं पुनरिष्टं पूर्त्तं दात् स्वाहेति"–इति । 'अथ' प्राचीनहोमकथनानन्तरम् , उच्यत इति शेषः । 'अनूबन्ध्यायै' अनुबन्ध्याख्यपशोः सम्बन्धीनि यानि त्रीणि समिष्टयजूंषि सन्ति , तेषा मुपरिष्टात् जुहुयादिति शेषः * ।

---

* "१भा० ८७पृ० १७पं० , ३९५पृ० २०पं०, २भा० २३६ पृ० द्र०। "संस्थितायां मैत्रावरुण्यनूबन्ध्या"–इति आश्व० श्रौ० ६.१४.७ । "अथ प्रातः ०—० "मैत्रावरुणीं वशा मनूबन्ध्या मालभते"–इति शत० ब्रा० २.४.४.१४ ।

'पुनर्नः'–इत्यृचः प्रतीकम् ; इयं, पूर्वोक्ता चेत्यृग्द्वयं शाखान्तरगतम्। 'क्षत्रं' क्षत्रियजातिरिष्टं पूर्त्तञ्च 'पुनर्द्दात्' भूयो ददातु । तदर्थं स्वाहुत मिद मस्तु ॥

पूर्वोत्तरकालीन माहुतिद्वयं प्रशंसयति— "सैषेष्टापूर्त्तस्यापरिज्यानिः क्षत्रियस्य यजमानस्य, यदेते आहुती ; तस्मादेते होतव्ये"–इति। योऽयं क्षत्रियो राजा यजमानः, तस्य 'एते' पूर्वोत्तरकालीने आहुती विद्येते; 'सा एषा' आहुतिक्रिया इष्टस्य पूर्तस्य च 'अपरिज्यानिः' अविनाशहेतुः ; तस्मात् कारणात् 'एते' उभे आहुती होतव्ये॥ ३ (२१)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां चतुर्थाध्याये
(चतुस्त्रिंशाध्याये) तृतीयः खण्डः॥ ३ (२१)॥

॥ अथ चतुर्थः खण्डः ॥

तदु ह स्माह सौजात आराळ्हिर॑जीतपुनर्वण्यं वा एतद्य॑देते आहुती इति॑ यथा ह कामयेत॑ तथैते कुर्या॑द्य इतो ऽनुशासनं कुर्यादि॑तीमे त्वेव जुहुया॑द् ब्रह्म प्रपद्ये ब्रह्म मा क्षत्राद् गोपायतु॑ ब्रह्मणे स्वाहेति॑ तत्तदिती३॑* ब्रह्म वा एष प्रपद्यते॑ यो यज्ञं

---

* "तत्तदितीं३" ख, ग, च ।

प्रपद्यते ब्रह्म वै यज्ञो यज्ञादु ह वा एष पुनर्जायते यो दीक्षते तं ब्रह्म प्रपन्नं क्षत्रं न परिजिनाति ब्रह्म मा क्षत्राद्गोपायत्वित्याह यथैनं ब्रह्म क्षत्राद्गोपायेद् ब्रह्मणे स्वाहेति तदेनत्प्रीणाति तदेनत्प्रीतं क्षत्राद्गोपायत्यथानूबन्ध्यायै समिष्टयजुषा मुपरिष्टात् क्षत्रं प्रपद्ये क्षत्रं मा ब्रह्मणो गोपायतु क्षत्राय स्वाहेति तत्तदितीँ३* क्षत्रं वा एष प्रपद्यते यो राष्ट्रं प्रपद्यते क्षत्रं हि राष्ट्रं तं क्षत्रं प्रपन्नं ब्रह्म न परिजिनाति क्षत्रं मा ब्रह्मणो गोपायत्वित्याह यथैनं क्षत्रं ब्रह्मणो गोपायेत् क्षत्राय स्वाहेति तदेनत्प्रीणाति तदेनत्प्रीतं ब्रह्मणो गोपायति सैषेष्टापूर्त्तस्यैवापरिज्यानिः क्षत्रियस्य यजमानस्य यदेते आहुती तस्मादेते एव होतव्ये ॥ ४ (२२) ॥

अथ प्रकारान्तरेणाहुतिद्वयं विधत्ते— "तदु ह स्माह सौजात आराळ्हिरजीतपुनर्वण्यं वा एतद् यदेते आहुती इति ; यथा ह कामयेत तथैते कुर्याद् , य इतो ऽनुशासनं कुर्यादितीमे त्वेव जुहुयाद्"–इति । 'तदु ह' तत्रैव पूर्वोक्तहोमस्थाने, सौजातनामकः कश्चिदृषिः , स चाराळ्हनामकस्य पुत्रः , एव मुवाच । कथ मिति तदुच्यते— 'एते' वक्ष्यमाणे आहुती 'इति' यदस्ति , तदेतद् 'अजीतपुनर्वण्यं वै' नष्ट मप्राप्तं वा यद्वस्तु तदेतदजीतं ,

---

* "तत्तदितीम्२" घ ।

तस्य पुनरपि वनसाधनं प्राप्तिकारण मजीतपुनर्वण्यम्, वक्ष्यमाण माहुतिद्वय मेतन्नामक मित्यर्थः। 'इति' यदेतत्सौजातस्य मतं, तदेव यथेत्यादिना प्रशस्यते। 'यः' पुमान् 'इतः' सौजातवाक्याद् 'अनुशासनम्' उपदिष्ट मनुष्ठानं कुर्यात्, स पुमान् 'यथा' येनैव प्रकारेण कामयेत, 'तथा' तेनैव प्रकारेण सिद्धं फल मुद्दिश्य 'एते कुर्यात्' एतदनुष्ठानेन काम्यमानं फलं सिध्यति; तस्मात् कारणात् 'इमे' एवाहुती जुहुयात्; न तु पूर्वे ॥

तत्र दीक्षणीयेष्टेः प्राचीनं होममन्त्रं दर्शयति— "ब्रह्म प्रपद्ये, ब्रह्म मा क्षत्राद् गोपायतु, ब्रह्मणे स्वाहेति"–इति। 'ब्रह्म' ब्राह्मणजातिं 'प्रपद्ये' रक्षकतया प्राप्नोमि। 'ब्रह्म मा' ब्राह्मणजातिर्मां 'क्षत्रात्' क्षत्रियजातेः 'गोपायतु' पालयतु। 'ब्रह्मणे' ब्राह्मणजातये स्वाहुत मिद मस्तु। अनेन मन्त्रेण आहवनीये चतुर्गृहीत माज्यं जुहुयात् ॥

अस्याहुतेः पूज्यतां दर्शयति— "तत्तदितीँ३"–इति। सर्वेऽपि याज्ञिकाः, पूज्यहोमप्रसङ्गे तदा तदा 'तत्तत् इति' एवम् एतदेव अनुष्ठान मुदाहरन्ति। पूजार्था सानुनासिकप्लुतिः ॥

अथ मन्त्रतात्पर्यं दर्शयति— "ब्रह्म वा एष प्रपद्यते, यो यज्ञं प्रपद्यते; ब्रह्म वै यज्ञो, यज्ञादु ह वा एष पुनर्जायते, यो दीक्षते; तं ब्रह्म प्रपन्नं क्षत्रं न परिजिनाति; ब्रह्म मा क्षत्राद्गोपायत्विति- त्याह, यथैनं ब्रह्म क्षत्राद्गोपायेद्; ब्रह्मणे स्वाहेति तदेनत्प्रीणाति, तदेनत् प्रीतं क्षत्राद्गोपायति"–इति। 'यः' पुमान् 'यज्ञं' 'प्रपद्यते' प्रारभते, एष पुमान् 'ब्रह्म वै' ब्राह्मणजाति मेव प्रारभते। 'ब्रह्म वै' ब्राह्मणजातिरेव यज्ञः; तया जात्या साध्यत्वात्। एवं सति 'यः' पुमान् 'दीक्षते' दीक्षां प्राप्नोति, 'एषः' पुमान् पूर्वं जातोऽपि

'यज्ञादु ह वै' अनुष्ठीयमानात् यज्ञादेव पुनरपि जायते। 'ब्रह्म प्रपन्नं' यज्ञोपक्रमेण यज्ञरूपब्राह्मणजातिं प्रपन्नं 'तं' यजमानं 'क्षत्रं' क्षत्रियजातिः 'न परिजिनाति' नैव हिनस्ति। एतावता "ब्रह्म प्रपद्ये"–इत्यस्य मन्त्रपादस्य तात्पर्यं दर्शितम्। यस्तु मध्यमो मन्त्रभागो "ब्रह्म मा क्षत्राद् गोपायतु"–इत्येवं ब्रूते, तस्मिन् भागे ब्राह्मणजातिः 'एनं' यजमानं क्षत्रियजातेर्यथा 'गोपायेत्' रक्षेत्, तथा स मध्यमभागो ब्रूते। "ब्रह्मणे स्वाहा"–इत्येतादृशो यस्तृतीयभागः, 'तत्' तेन भागेन 'ब्रह्म' ब्राह्मणजातिः 'प्रीणाति' तर्पयति। 'तदेनद्' ब्रह्म प्रीतं सत् यजमानं क्षत्रियजातेः 'गोपायति' रक्षति॥

पूर्वकालीनं होमं विधायोत्तरकालीनं होमं विधत्ते—"अथानूबन्ध्यायै समिष्टयजुषा मुपरिष्टात्"–इति। पूर्ववद् व्याख्येयम् (१११पृ०)॥

तस्मिन् होमे मन्त्रं तदीयतात्पर्यञ्च दर्शयति—"क्षत्रं प्रपद्ये, क्षत्रं मा ब्रह्मणो गोपायतु, क्षत्राय स्वाहेति; तत्तदितीँ३; क्षत्रं वा एष प्रपद्यते, यो राष्ट्रं प्रपद्यते ; क्षत्रं हि राष्ट्रं, तं क्षत्रं प्रपन्नं ब्रह्म न परिजिनाति ; क्षत्रं मा ब्रह्मणो गोपायत्वित्याह, यथैनं क्षत्रं ब्रह्मणो गोपायेत् ; क्षत्राय स्वाहेति तदेनत्प्रीणाति ; तदेनत्प्रीतं ब्रह्मणो गोपायति"–इति। पालनीयो देशो 'राष्ट्रं' तच्च क्षत्रियेण पालनीयत्वात् क्षत्रस्वरूपम्। अन्यत्सर्वं ब्रह्मवाक्यवद् व्याख्येयम् (११४पृ०)॥

तदेतदाहुतिद्वयं प्रशंसति—"सैषेष्टापूर्त्तस्यैवापरिज्यानिः, क्षत्रियस्य यजमानस्य यदेते आहुती ; तस्मादेते एव होतव्ये"–इति। पूर्वोक्ताहुतिद्वयविषयवाक्यवद (११२पृ०) व्याख्येयम्।

एवकारः पूर्वोक्ताहुतिद्वयव्यावृत्त्यर्थः । एतदेव सौजाताख्यस्य महर्षेर्मतं प्रशस्तम् ॥ ४ (२२) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां चतुर्थाध्याये
(चतुस्त्रिंशाध्याये) चतुर्थः खण्डः ॥ ४ (२२) ॥

॥ अथ पञ्चमः खण्डः ॥

अथैन्द्रो वै देवतया क्षत्रियो भवति॑ त्रैष्टुभश्छन्दसा॑ पञ्चदश स्तोमेन॑ सोमो राज्येन॑ राजन्यो बन्धुना॑ स ह दीक्षमाण एव॑ ब्राह्मणता मभ्युपैति॑ यत्कृष्णाजिन मध्यूहति॑ यद्दीक्षितव्रतं चरति॑ यदेनं ब्राह्मणा अभि सङ्गच्छन्ते॑ तस्य ह दीक्षमाणस्येन्द्र एवेन्द्रिय मादत्ते॑ त्रिष्टुब् वीर्यं॑ पञ्चदशस्तोम आयुः॑ सोमो राज्यं॑ पितरो यशस्कीर्ति॑ मन्यो वा अय मस्मद्भवति॑ ब्रह्म वा अयं भवति॑ ब्रह्म वा अय मुपावर्त्तत इति वदन्तः॑ स पुरस्ताद्दीक्षाया आहुतिं हुत्वा ऽऽहवनीय मुपतिष्ठेत नेन्द्राद्देवताया एमि न त्रिष्टुभश्छन्दसो॑ न पञ्चदशात्स्तोमान्न सोमाद्राज्ञो॑ न पित्र्याद् बन्धोर्मा म इन्द्र इन्द्रिय मादित मा त्रिष्टुब् वीर्यं॑ मा पञ्चदशस्तोम आयुर्मा

सोमो राज्यं॑ मा पितरो यशस्कीर्तिं॑ स हेन्द्रियेण वीर्येणायुषा॑ राज्येन यशसा बन्धुना॑ग्निं देवता मुपैमि॑ गायत्रीच्छन्दस्त्रि॑वृतं स्तोमं॑ सोमं राजानं॑ ब्रह्म प्रपद्ये ब्राह्मणो भवामीति॑ तस्य ह नेन्द्र इन्द्रिय मादत्ते॑ न त्रिष्टुब् वीर्यं॑ न पञ्चदशस्तोम आयुर्न॑ सोमो राज्यं॑ न पितरो यशस्कीर्तिं॑ य एव मेता माहुतिं हुत्वा॑ ऽऽहवनीय मुपस्थाय॑ दीक्षते क्षत्रियः सन्॑ ॥ ५ (२३) ॥

क्षत्रियस्याहवनीयोपस्थानं विधातुं प्रस्तौति— “अथैन्द्रो वै देवतया क्षत्रियो भवति, त्रैष्टुभश्छन्दसा, पञ्चदश स्तोमेन, सोमो राज्येन, राजन्यो बन्धुना ; स ह दीक्षमाण एव ब्राह्मणता मभ्युपैति,— यत् कृष्णाजिन मध्यूहति, यद् दीक्षितव्रतं चरति, यदेनं ब्राह्मणा अभि सङ्गच्छन्ते ; तस्य ह दीक्षमाणस्येन्द्र एवेन्द्रिय मादत्ते, त्रिष्टुब् वीर्यं, पञ्चदशस्तोम आयुः, सोमो राज्यं, पितरो यशस्कीर्तिं, मन्यो वा अय मस्मद्भवति, ब्रह्म वा अयं भवति, ब्रह्म वा अय मुपावर्त्तत इति वदन्तः”—इति । ‘अथ’ होमकथनानन्तरम्, उपस्थान मुच्यत इति शेषः । योऽयं क्षत्रियोऽस्ति, सोऽयं देवतया ‘ऐन्द्रो वै’ इन्द्रसम्बन्धी एव भवति ; देवतानां मध्ये इन्द्रः क्षत्रियस्याभिमानी देवतेत्यर्थः । तथा ‘छन्दसा त्रैष्टुभः’ छन्दसां मध्ये त्रिष्टुप् एतदभिमानिनी । स्तोमानां मध्ये ‘पञ्चदशः’ एतदभिमानी । राज्येन निमित्तेनायं सोमरूपः, सोम एव तदीयराज्याभिमानी । ‘बन्धुना’ पितृपितामहादिबन्धुवर्गेण

‘राजन्यो’ राजजातीयः। एवं सति ‘स ह’ स खलु क्षत्रियो ‘दीक्षमाण एव’ दीक्षां स्वीकुर्वन्नेव ब्राह्मणत्वजातिं प्राप्नोति। कथ मिति तदुच्यते— ब्राह्मणयजमानवत् कृष्णाजिनम् ‘अध्यूहति’ आच्छादयतीति यदस्ति, तथा ‘दीक्षितव्रतं’ मुष्टिबन्धनवाङ्नियमादिकं चरतीति यदस्ति, तथा ‘ब्राह्मणाः’ ऋत्विजो भूत्वा ‘एनं’ क्षत्रिय मभितः ‘सङ्गच्छन्ते’ सङ्गता भवन्तीति यदस्ति, तेन सर्वेण संस्कारेणायं क्षत्रियो ब्राह्मण्यं प्राप्नोति। ‘तस्य ह’ तादृशस्यैव क्षत्रियस्य ‘दीक्षमाणस्य’ दीक्षां प्राप्नुवतः ‘इन्द्रियं’ चक्षुरादिपाटवं इन्द्र एव ‘आदत्ते’ अपहरति, तथा ‘वीर्यं’ युद्धादिसामर्थ्यं त्रिष्टुप् अपहरति, पञ्चदशस्तोम आयुरपहरति, सोमो राज्य मपहरति। पितरो यशः कीर्त्तिं मपहरन्ति। ऐहिकं युद्धादिविषयकं यशः, आमुष्मिकी यज्ञदानविषया कीर्त्तिः। एव मपहरता मिन्द्रत्रिष्टुबादीनां को ऽभिप्रायः? सोऽभिधीयते— ‘अय” क्षत्रियः ‘अस्मत्’ इन्द्रादिभ्यः ‘अन्यो वै’ स्वतन्त्र एव भवति। पूर्वं मस्मदधीनः सन्, इदानीं यागं कुर्वन् ‘ब्रह्म वै’ ब्राह्मण एव अयं भवति। कथ मिति तदुच्यते— ‘अयं’ क्षत्रियो ‘ब्रह्म वै’ ब्राह्मणजाति मेव कृष्णाजिनाच्छादनादिभिरुपेत्य वर्त्तते; तथा सत्यस्मदपेक्षा मन्तरेणैव सर्वपुरुषार्थसाधनसमर्थत्वात्, अस्मदधीनतां परित्यज्यान्य एव स्वतन्त्रो भवतीति स्वाभिप्रायं परस्परं वदन्तः सर्व मप्येतदीय मपहरन्ति॥

तस्योपद्रवस्य शान्त्यर्थं मुपस्थानं विधत्ते— “स पुरस्ताद् दीक्षाया आहुतिं हुत्वा ऽऽहवनीय मुपतिष्ठेत”–इति। दीक्षणीयेष्टेः पूर्वोक्ता माहुतिं हुत्वा, तत्र आहवनीयं वक्ष्यमाणेन मन्त्रेणोपतिष्ठेत्॥

तं मन्त्रं दर्शयति—"नेन्द्राद् देवताया एमि, न त्रिष्टुभश्छन्दसो, न पञ्चदशात् स्तोमान्न सोमाद्राज्ञो, न पित्र्याद् बन्धोर्मा म इन्द्र इन्द्रिय मादित, मा त्रिष्टुब् वीर्यं, मा पञ्चदशस्तोम आयुर्, मा सोमो राज्यं, मा पितरो यशस्कीर्त्तिं ; स हेन्द्रियेण वीर्येणायुषा राज्येन यशसा बन्धुनाग्निं देवता मुपैमि ; गायत्रीच्छन्दस्त्रिवृतं स्तोमं सोमं राजानं ब्रह्म प्रपद्ये, ब्राह्मणो भवामीति"—इति । क्षत्रियोऽहं इन्द्ररूपायाः मदीयदेवयायाः 'नैमि' पृथग्भूतो न गच्छामि, तथा सत्यभिमानिभ्यः छन्दस्तोमराजबन्धुभ्यो नापगच्छामि ; अय मिन्द्रो मदीय मिन्द्रियम् 'मा आदित' मा अपहरतु, तथा त्रिष्टुबादयो वीर्यादीन् मापहरन्तु ; तेषा मिन्द्रादीना मनुग्रहादह मिन्द्रियादिभिः सहावस्थितो भूत्वा तत्पालनसमर्थ मग्निं देवता मुपैति ; तथा गायत्री-त्रिवृत्स्तोम-ब्राह्मणजातीः 'प्रपद्ये' प्राप्नोमि ; तेषा मग्न्यादीना मनुग्रहात् ब्राह्मणो भवामि ॥

अनेन मन्त्रेण यदुपस्थानं, तत् प्रशंसति— "तस्य ह नेन्द्र इन्द्रिय मादत्ते, न त्रिष्टुब् वीर्यं, न पञ्चदशस्तोम आयुर्, न सोमो राज्यं, न पितरो यशस्कीर्तिं, य एव मेता माहुतिं हुत्वाऽऽहवनीय मुपस्थाय दीक्षते क्षत्रियः सन्"—इति । 'यः' पुमान् क्षत्रियजातियुक्तः सन् उक्तक्रमेण दीक्षायाः प्राचीना माहुतिं हुत्वा, "नेन्द्रात्"—इत्यादिमन्त्रेण आहवनीय मुपस्थाय, पश्चाद् दीक्षां प्राप्नोति, 'तस्य' क्षत्रियस्येन्द्रियादीनिन्द्रादयो नापहरन्ति ॥ ५ (२२) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां चतुर्थाध्याये
(चतुस्त्रिंशाध्याये) पञ्चमः खण्डः ॥ ५ (२२) ॥

॥ अथ षष्ठः खण्डः ॥

अथाग्नेयो वै देवतया क्षत्रियो दीक्षितो भवति गायत्रश्छन्दसा त्रिवृत् स्तोमेन ब्राह्मणो बन्धुना स होदवस्यन्नेव क्षत्रियता मभ्युपैति तस्य होदवस्यतो ऽग्निरेव तेज आदत्ते गायत्री वीर्यं त्रिवृत्स्तोम आयुर्ब्राह्मणा ब्रह्म यशस्कीर्ति मन्यो वा अथ मस्मद्भवति क्षत्रं वा अयं भवति क्षत्रं वा अय मुपावर्त्तत इति वदन्तः सो ऽनूबन्ध्यायै समिष्टयजुषा मुपरिष्टाद्धुत्वाहुति माहवनीय मुपतिष्ठेत नाग्नेर्देवताया एमि न गायत्राश्छन्दसो न त्रिवृतः स्तोमान्न ब्रह्मणो बन्धोर्मा मे ऽग्निस्तेज आदित मा गायत्री वीर्यं मा त्रिवृत्स्तोम आयुर्मा ब्राह्मणा यशस्कीर्तिं स ह तेजसा वीर्येणायुषा ब्रह्मणा यशसा कीर्त्यैन्द्रं देवता मुपैमि त्रिष्टुभं छन्दः पञ्चदशं स्तोमं सोमं राजानं क्षत्रं प्रपद्ये क्षत्रियो भवामि देवाः पितरः पितरो देवा यो ऽस्मि स सन्यजे स्वं म इद मिष्टं स्वं पूर्त्तं स्वं श्रान्तं स्वं हुतं तस्य मे य मग्निरुपद्रष्टाय वायुरुपश्रोता ऽसावादित्यो ऽनुख्यातेद मह य एवास्मि सो ऽस्मीति तस्य ह नाग्निस्तेज आदत्ते न गायत्री वीर्यं न त्रिवृत्स्तोम आयुर्न ब्राह्मणा ब्रह्म यशस्कीर्त्तिं

य एव मेता माहुतिं हुत्वा ऽऽहवनीय मुपस्थायोदवस्यति क्षत्रियः सन् ॥ ६ (२४) ॥

पूर्वहोमानन्तर मुपस्थानं विधायोत्तरहोमादूर्द्ध्वं मुपस्थानं विधातुं प्रस्तौति – "अथाग्नेयो वै देवतया क्षत्रियो दीक्षितो भवति, गायत्रश्छन्दसा, त्रिवृत् स्तोमेन ब्राह्मणो बन्धुना, स ह्योदवस्यन्नेव क्षत्रियता मभ्युपैति ; तस्य ह्योदवस्यतो ऽग्निरेव तेज आदत्ते, गायत्री वीर्यं, त्रिवृत्स्तोम आयुर्, ब्राह्मणा ब्रह्म यशस्कीर्त्तिम् ; अन्यो वा अय मस्मद्भवति, क्षत्रं वा अय मुपावर्त्तत इति वदन्तः"–इति । 'अथ' पूर्वोपस्थानानन्तरम्, उत्तरोपस्थानं वक्ष्यत इति शेषः । अयं यजमानः पुरा क्षत्रियोऽपि इदानीं दीक्षितः सन् ब्राह्मण्यं प्राप्य देवतया अग्निसम्बन्धी भवति, अग्निरस्य ब्राह्मणस्य स्वामी । एवं गायत्री-त्रिवृद्-ब्राह्मणजातिसम्बन्धी द्रष्टव्यः । तादृश इदानीं ब्राह्मणः सन् 'उदवस्यन्नेव' उदवसानीयेष्ट्या सोमयागं समापयन् एव * ब्राह्मण्यं परित्यज्य क्षत्रियत्वं प्राप्नोति । तस्माद् उदवसानीयेष्टिं कुर्वतोऽस्य यजमानस्य तेजःप्रभृतीनग्न्यादयो ऽपहरन्ति । 'ब्रह्म' वेदः, तदध्ययनमैहिकं 'यशः', तदनुष्ठाननिमित्ता आमुष्मिकी 'कीर्त्तिः' । अपहरता मग्न्यादीनां कोऽभिप्रायः ? सोऽभिधीयते । 'अयम्' इदानीं ब्राह्मणः सन् 'अस्मदन्यः' स्वतन्त्रो भवति ; अयं 'क्षत्रं वै'

---

* उपरिष्टाद् वक्ष्यति "अवभृथादुदेत्य अनूबन्ध्ययेष्टोदवस्यति"–इति ८. २. १ । "अथो ये दीर्घसत्र मासीरन्, संवत्सरं वा भूयो वा०—० । अथोदवसानीययेष्ट्या यजते ०—० अथ यदैवैषोदवसानीयेष्टिः सन्तिष्ठते ऽथ साय माहुतिं जुहोति, काल एव प्रातराहुतिम्" –इति शत० ब्रा० ४. ५. १. १२–१६ ।

क्षत्रिय एव भवति । तदपि कथ मिति तत् उच्यते — 'अय' यागकाले ब्राह्मणः सन्, यागादूर्द्ध्वं ब्राह्मण्यं परित्यज्य स्वकीयां क्षत्रियजाति मेव उपेत्य वर्त्तते ; तस्मादस्यास्मत्तोऽन्यत्व मिति परस्परं वदन्तो ऽग्न्यादयः तेजआदीनपहरन्ति ॥

तच्छान्त्यर्थं मुपस्थानं विधत्ते— "सो ऽनूबन्ध्यायै समिष्टयजुषा मुपरिष्टाद्धुत्वाहुति माहवनीय मुपतिष्ठेत"-इति । पूर्ववद् व्याख्येयम् (१११,११८ पृ०) ॥

तत्रोपस्थाने मन्त्र माह— "नाग्नेर्देवताया एमि, न गायत्र्याश्छन्दसो, न त्रिवृतः स्तोमान्न ब्रह्मणो बन्धोर् ; मा मे ऽग्निस्तेज आदित, मा गायत्री वीर्यं, मा त्रिवृत् स्तोम आयुर्, मा ब्राह्मणा ब्रह्म यशस्कीर्त्तिं ; स ह तेजसा वीर्येणायुषा ब्रह्मणा यशसा कीर्त्त्येन्द्रं देवता मुपैमि, त्रिष्टुभं छन्दः, पञ्चदशं स्तोमं, सोमं राजानं, क्षत्रं प्रपद्ये, क्षत्रियो भवामि, देवाः पितरः पितरो देवा यो ऽस्मि स सन् यजे ; स्वं म इद मिष्टं, स्वं पूर्त्तं, स्वं श्रान्तं, स्वं हुतं ; तस्य मे ऽय मग्निरुपद्रष्टायं वायुरुपश्रोता ऽसावादित्यो ऽनुख्यातेद महं य एवास्मि सो ऽस्मीति"-इति । अत्र नाग्नेर्देवताया इत्यादि, क्षत्रियो भवामीत्यन्तं पूर्वमन्त्रवद् (११९पृ०) व्याख्येयम् । हे 'देवाः' अग्न्यादयः ! 'पितरः' पालकाः ! यूयं, शृणुतेति शेषः । पितरो देवा इति पुनर्वचन मादरार्थम् । भवदनुग्रहात् कृष्णाजिनाच्छादनादिसंस्कारेण 'यः' ब्राह्मणो ऽस्मि यज्ञसमाप्तिपर्यन्तं, स एव ब्राह्मणः सन् 'यजे' यागं कुर्वे । 'मे' मम इदम् 'इष्टं' श्रौतं कर्म 'स्वं' स्वाधीनं जातम् । तथा 'पूर्त्तं' स्मार्त्तं मपि कर्म 'स्वं' स्वाधीनं जातम् । तथा 'श्रान्तं' श्रमरूपं तपो ऽपि 'स्वं' स्वाधीनं जातम् । 'हुतम्' अन्यदपि काम्यहोमा-

दिकं 'स्वं' स्वाधीनं जातम् । 'तस्य' तादृशस्येष्टापूर्त्तादियुक्तस्य 'मे' मम 'अय'' भूलोकावस्थितोऽग्निः 'उपद्रष्टा' समीपे स्थित्वा साक्षित्वेनावलोकयिता ; 'अयम्' अन्तरिक्षावस्थितो वायुः 'उपश्रोता' तस्याग्नेर्मुखादस्मद्वृत्तान्तं श्रोष्यति ; 'असौ' द्युलोकावस्थित आदित्यः, तम् 'अनु' पश्चात् 'ख्याता' स्वर्गलोके कथयिष्यति— इदं कर्माहं कृतवानिति । एवं फलपर्यन्तकर्मणि समाप्ते सति कर्मोपक्रमात् पूर्वं य एव क्षत्रियोऽस्मि स एवाहं क्षत्रियो भूत्वा तिष्ठामीति ॥

अनेन मन्त्रेण यदुपस्थानं, तत् प्रशंसति— "तस्य ह नाग्निस्तेज आदत्ते, न गायत्री वीर्यं, न त्रिवृत्स्तोम आयुर्, न ब्राह्मणा ब्रह्म यशस्कीर्त्तिं ; य एव मेता माहुतिं हुत्वा ऽऽहवनीय मुपस्थायोदवस्यति क्षत्रियः सन्"–इति । पूर्वं "तस्य ह नेन्द्र इन्द्रियम्"–इत्यादि यद्वाक्य मुक्तम् (११८पृ०), तद्वद् व्याख्येयम् ॥ ६ (२४) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां चतुर्थाध्याये
(चतुस्त्रिंशाध्याये) षष्ठः खण्डः ॥ ६ (२४) ॥

॥ अथ सप्तमः खण्डः ॥

अथातो दीक्षाया॑ आवेदनस्यैव तदाहु॑र्यद् ब्राह्मणस्य दीक्षितस्य॑ ब्राह्मणो ऽदीक्षिष्टेति॑ दीक्षामावेदयन्ति॑ कथं क्षत्रियस्यावेदयेदिति॑ यथैवैतद् ब्राह्म-

णस्य दीक्षितस्य॑ ब्राह्मणो ऽदीक्षिष्टेति॑ दीक्षा मावेदय॑न्त्येव मेवैतत् क्षत्रियस्यावेदयेत्॑ पुरोहितस्यार्षेयेणेति॑ तत्तदितीँ३॑* निधाय वा एष स्वान्यायुधानि॑ ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण॑ ब्रह्म भूत्वा यज्ञ मुपावर्त्तत॑ तस्मात् तस्य पुरोहितस्यार्षेयेण॑ दीक्षा मावेदये॑युः पुरोहितस्यार्षेयेण॑ प्रवरं प्रवृणीरन्॑ ॥ ७ (२५) ॥

क्षत्रियस्य दीक्षितत्वावेदनमन्त्रे सन्देहात् प्रश्न मुद्भावयति— “अथातो दीक्षाया आवेदनस्यैव ; तदाहुर्यद् ब्राह्मणस्य दीक्षितस्य ब्राह्मणो ऽदीक्षिष्टेति दीक्षा मावेदयन्ति , कथं क्षत्रियस्य आवेदयेदिति”–इति । ‘अथ’ दीक्षानन्तरम् , देवानां मनुष्याणां चाग्रे यत एतदीयदीक्षा कथनीया , ‘अतः’ कारणाद् दीक्षायाः ‘आवेदनस्य’ प्रकटीकरणस्यैव कश्चित् निर्णय उच्यते । ‘तत्’ तस्मिन् आवेदने सन्दिहाना ब्रह्मवादिनः प्रश्न माहुः— ब्राह्मणस्य दीक्षाया ऊर्द्ध्वम् “अदीक्षिष्टायं ब्राह्मणः”–इति † मन्त्रेण दीक्षा प्रख्यापनीया । तथा च तैत्तिरीया आमनन्ति— अदीक्षिष्टायं ब्राह्मण इति त्रिरुपांश्वाह , देवेभ्य एवैनं प्राह ; त्रिरुच्चैरुभयेभ्य एवैनं देवमनुष्येभ्यः प्राह”–इति (सं० ६. १. ४. ३.) । एवं सति क्षत्रियस्य दीक्षावेदने कि मस्मिन् मन्त्रे ब्राह्मणशब्दः

---

* “तत्तदितीं३” ख, ग, घ ।

† “अदीक्षिष्टायं ब्राह्मणः”–एतन्मात्र मेव मन्त्रस्वरूपम् । न चैष मन्त्रः सांहितिकः, तदुक्तं तैत्तिरीयसंहिताभाष्ये सायणेन “अध्वर्योः कश्चिन्मन्त्र मुत्पाद्य विनियुङ्क्ते अदीक्षिष्टायं ब्राह्मण इति०—० ।”–इति (१. २. २.) । एतदेव दीक्षितावेदन मुच्यते ।

क्षत्रियपरत्वेनोहनीयः, आहोस्विदविकृत एव पठनीयः? इति प्रश्नाभिप्रायः॥

तत्रोत्तर माह— "यथैवैतद् ब्राह्मणस्य दीक्षितस्य ब्राह्मणोऽदीक्षिष्टेति दीक्षा मावेदयन्त्येव मेवैतत् क्षत्रियस्यावेदयेत् पुरोहितस्यार्षेयेणेति"–इति। अत्र शब्दो नोहितव्यः, अविकृत एव ब्राह्मणशब्दः क्षत्रियदीक्षावेदनेऽपि प्रयोक्तव्यः। यदि ब्राह्मणप्रवरोऽपेक्षितः, तदानीं 'पुरोहितस्य' ब्राह्मणस्य सम्बन्धिनार्षेयेण प्रयोगः कर्त्तव्यः। तथा चापस्तम्बः क्षत्रियवैश्ययोरपि ब्राह्मणशब्देनैवावेदनं दर्शयति— "अदीक्षिष्टायं ब्राह्मणोऽसावमुष्यपुत्रोऽमुष्यपौत्रोऽमुष्यनप्ताऽमुष्याः पुत्रोऽमुष्याः पौत्रोऽमुष्या नप्तेति; ब्राह्मणो वा एष जायते, यो दीक्षते ❊; तस्माद्राजन्यवैश्या अपि ब्राह्मण इत्येवावेदयति"–इति (श्रौ० १०. ११. ५, ६. †)॥

ईदृशस्यावेदनस्य पूज्यतां दर्शयति— "तत्तदिती३ँ"–इति। पूर्ववद् (११४पृ०) व्याख्येयम्॥

ब्राह्मणत्वेनावेदन मुपपादयति — "निधाय वा एष स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्राह्मणो रूपेण ब्रह्म भूत्वा यज्ञ मुपावर्त्तत; तस्मात् तस्य पुरोहितस्यार्षेयेण दीक्षा मावेदयेयुः, पुरोहितस्यार्षेयेण प्रवरं प्रवृणीरन्"–इति। 'स्वान्यायुधानि' धनुरादीनि, 'ब्रह्मण आयुधानि' स्फ्यकपालादीनि ‡; यस्मात् स्वायुधपरित्यागपूर्वकं ब्रह्मायुधस्वीकारेण ब्राह्मणो भूत्वा यज्ञं प्राप्तवान्,

---

❊ 'मातुरग्रेऽधिजननं, द्वितीयं मौञ्जिबन्धने।
तृतीयं यज्ञदीक्षायां, द्विजस्य श्रुतिचोदनात्॥'–इति म सं० २. १६९।

† "अथैनं त्रिरुपांश्वावेदयति, त्रिरुच्चैः"–इति एतत्पूर्वांशः।

‡ १०२पृ० 'एतानि वै'–इत्यादि धन्वेत्यन्तं द्रष्टव्यम्। १०५पृ० ७पं० अपि द्र०।

तस्मात् 'तस्य' यजमानस्य पुरोहितसम्बन्धिना गोत्रेण दीक्षावेदनम्, तथा प्रवरोऽपि विज्ञेयः * ॥ ७ (२५) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां चतुर्थाध्याये
(चतुस्त्रिंशाध्याये) सप्तमः खण्डः ॥ ७ (२५) ॥

॥ अथ अष्टमः खण्डः ॥

अथातो यजमानभागस्यैव तदाहुः प्राश्नीयात् क्षत्रियो यजमानभागाँ३† न प्राश्नीया३त् इति यत् प्राश्नीयाद्हुताद्धुतं प्राश्य पापीयान्त्स्याद् यन्न प्राश्नीयाद् यज्ञादात्मान मन्तरियाद् यज्ञो वै यजमानभागः स ब्रह्मणे परिहृत्यः पुरोहितायतनं वा एतत् क्षत्रियस्य यद् ब्रह्मार्द्धात्मो ह वा एष क्षत्रियस्य यत् पुरोहित उपाह परोक्षेणैव प्राशितरूप माप्नोति नास्य प्रत्यक्षम्भक्षितो भवति यज्ञ उ ह वा एष प्रत्यक्षं यद् ब्रह्म ब्रह्मणि हि सर्वो यज्ञः प्रतिष्ठितो

---

* वक्ष्यति चोपरिष्टादिहैव पञ्चमाध्यायीयपञ्चमखण्डे "पुरोधयैव दीक्षयैव प्रवरेणैव"—इति।

† "यजमानभागां२" ख, ग, घ, ।

यज्ञे यजमानो॑ यज्ञ एव तद् यज्ञ मप्यत्यर्जन्ति॑ यथा ऽप्स्वापो॑ यथा ऽग्नावग्नि॑ तद्वै नातिरिच्यते॑ तद्वेनं॑ न हिनस्ति॑ तस्मात् स ब्रह्मणे परिहृत्यो॑ ऽग्नौ हैके जुह्वति॑ प्रजापतेर्विभान्नाम लोकस्त॑स्मिंस्त्वा दधामि॑ सह यजमानेन स्वाहेति॑ तत्तथा न कुर्या॑द् यजमानो वै यजमानभागो॑ यजमानं ह सो ऽग्नौ प्रवृणक्ति॑ य एनं तत्र ब्रूयाद्॑ यजमान मग्नौ प्रावाक्षीः॑ प्रास्याग्निः प्राणान् धक्ष्यति॑ मरिष्यति यजमान इति॑ शश्वत् तथा स्यात्॑ तस्मात्तस्याशां नेयादाशां नेयात्॑ ॥ ८ (२६) ॥

इत्यैतरेयब्राह्मणे सप्तमपञ्चिकायां चतुर्थोऽध्यायः॥४॥

दर्शपूर्णमासयोः यजमानभागप्राशनं विहितम् *, तदत्र दीक्षणीयादीष्टिषु चोदकप्राप्तम् †; क्षत्रियस्य तत्प्राशने निर्णयं वक्तुं विचार मवतारयति— "अथातो यजमानभागस्यैव; तदाहुः प्राश्नीयात् क्षत्रियो यजमानभागाँ३, न प्राश्नीयात्३ ? इति"–इति। 'अथ' दीक्षावेदननिर्णयानन्तरम्, दीक्षणीयादीष्टयो यतो बुद्धिस्थाः, 'अतः' कारणात्, तत्र यजमानभागस्यैव, प्रकारविशेष

---

* "पश्चात् कुशेषु यजमानभागम्"–इति आश्व० श्रौ० १. १२. ३। "अथ यद्ध पूर्वार्द्धं पुरोडाशस्य प्रशीर्य पुरस्ताद् ध्रुवायै निदधाति, यजमानो वै ध्रुवा, तद्ध यजमानस्य प्राशितं भवति"–इति शत० ब्रा० १. ८. १. ३९।

† "पौर्णमासेनेष्टिपशुसोमा उपदिष्टाः"–इति आश्व० श्रौ० २. १. १।

उच्यत इति शेषः । 'तत्' तस्मिन् भागे ब्रह्मवादिनो विचार माहुः । क्षत्रियो ब्राह्मणवत् किं यजमानभागं प्राश्नीयात्, उत न ? इति । विचारार्थं प्लुतिद्वयम् ॥

पक्षद्वये दोष मुद्भावयति— "यत्प्राश्नीयादहुताद्धुतं प्राश्य पापीयान्त्स्याद्, यन्न प्राश्नीयाद् यज्ञादात्मान मन्तरियाद् ; यज्ञो वै यजमानभागः"–इति । हुत मत्तीति 'हुतात्', तादृशो न भवतीति 'अहुतात्'; "अथैता अहुतादो यद्राजन्यो वैश्यः शूद्रः" –इति पूर्वं मुक्तम् (१०३पृ०) ; अतोऽयं क्षत्रियः 'अहुतात्' योग्यतारहितो यदि हुतशेषं प्राश्नीयात् , तदानीं 'पापीयान्' अत्यन्तपापयुक्तो भवेत् । अप्राशनपक्षे तु यज्ञादात्मानम् 'अन्तरियाद्' विच्छिन्द्यात् ; यजमानभागस्य यज्ञहेतुत्वेन यज्ञस्वरूपत्वात् तद्भागराहित्ये यज्ञात् स्वयं विच्छिन्नो भवति ॥

उक्तं दोषद्वयं परिहर्त्तुं पक्षान्तर माह— "स ब्रह्मणे परिहृत्यः"–इति । 'सः' यजमानभागः ऋत्विग्विशेषाय 'ब्रह्मणे' 'परिहृत्यः' परितः सर्वात्मना समर्पणीयः ॥

तत्समर्पणे दोषद्वयराहित्यं दर्शयति— "पुरोहितायतनं वा एतत् क्षत्रियस्य, यद् ब्रह्मार्द्धात्मो ह वा एष क्षत्रियस्य ; यत् पुरोहित उपाह परोक्षेणैव प्राशितरूप माप्नोति , नास्य प्रत्यक्षं भक्षितो भवति"–इति । ऋत्विग्रूपो 'ब्रह्मा' इति यदस्ति , एतत् क्षत्रियस्य पुरोहितायतनम् ; पुरोहितो योऽस्ति, एषः क्षत्रियस्य 'अर्द्धात्मो ह वै' अर्द्धदेह एव । उ-ह-वा इति निपातसमूहो ऽवधारणार्थः । अर्द्धशरीरस्थानीयपुरोहितरूपेण ब्रह्मणा तस्मिन् भागे सति 'परोक्षेणैव' व्यवधानेनैव 'प्राशितरूपं' प्राशितसादृश्यं प्राप्नोत्येव । अहशब्द उपशब्दश्च मिलित्वा अवधारणार्थौ । 'अस्य'

क्षत्रियस्य ‘प्रत्यक्षम्’ अव्यवधानेन स्वमुखे स भागो भक्षितो न भवति ; एवं सति व्यवधानेन भक्षितत्वाद् यज्ञान्तरायो न भविष्यति, स्वमुखेन भक्षणाभावादयं पापीयानपि न भविष्यति ॥

ब्रह्मणस्तद्भागप्राशनं प्रशंसति— “यज्ञ उ ह वा एष प्रत्यक्षं यद् ब्रह्मा, ब्रह्मणि हि सर्वो यज्ञः प्रतिष्ठितो, यज्ञे यजमानो, यज्ञ एव तद् यज्ञ मप्यत्यर्जन्ति ; यथा ऽप्स्वापो यथा ऽग्नावग्निं, तद्वै नातिरिच्यते तदेनं न हिनस्ति तस्मात् स ब्रह्मणे परिहृत्यः”— इति । यो ब्रह्मास्ति, एष ‘प्रत्यक्षम्’ अव्यवधानं यथा भवति तथा ‘यज्ञ उ ह वै’ यज्ञस्वरूप एव ; तत्साधकत्वात् । किञ्च ब्रह्मण्येव सर्वो यज्ञः प्रतिष्ठितः ; वेदत्रयवैकल्यपरिहर्तृत्वेन ब्रह्मणो भिषग्रूपत्वस्योक्तत्वात् * । तस्मिंश्च प्रतिष्ठिते यज्ञे, यजमानो ऽपि प्रतिष्ठितः; तत्फलभागित्वात् । एवं सति ‘तत्’ तेन भागप्राशनेन ‘यज्ञे एव’ ब्रह्मरूपे भागरूपं ‘यज्ञम्’ अपि ‘अत्यर्जन्ति’ सम्यक् प्रक्षिपन्ति । तत्र दृष्टान्तः—यथा लोके अप्सु प्रक्षिप्ता आपः एकत्वेन संसृज्यन्ते , यथा वाग्नौ प्रक्षिप्त मग्नि मेकीभूतं पश्यामः , ‘तद्वै’ तथा ब्रह्मणा प्राशितं हविः ‘नातिरिच्यते’ अतिरिक्तं न भवति किन्तु यज्ञरूपेण ब्रह्मणा सहैकीभूतं हविः ‘एनं’ क्षत्रियं ‘न हिनस्ति’ न बाधते। तस्मात् ‘सः’ यजमानभागो ब्रह्मणे ‘परिहृत्यः’ समर्पणीयः ॥

पक्षान्तर मुपन्यस्य दूषयति— “अग्नौ हैके जुह्वति ; प्रजापतेर्विभान्नाम लोकस्तस्मिंस्त्वा दधामि सह यजमानेन स्वाहेति ; तत्तथा न कुर्याद् ; यजमानो वै यजमानभागो यजमानं ह सो ऽग्नौ प्रवृणक्ति ; य एनं तत्र ब्रूयाद् यजमान मग्नौ प्रावार्क्षीः ,

---

* ५.५, ९.—३भा० २०७पृ० ३पं० द्र० ।

प्रास्याग्निः प्राणान् धक्ष्यति,– मरिष्यति यजमान इति ; शश्वत् तथा स्यात् ; तस्मात्तस्याशां नेयादाशां नेयात्"–इति । 'एके' याज्ञिकाः , तं यजमानभागं अग्नौ जुह्वति । तत्र "प्रजापतेः"–इत्यादिको मन्त्रः । प्रजापतेः सम्बन्धी यो लोकः, तस्य "विभान्"–इति तन्नामधेयम् ; विशेषेण भातीति तद्व्युत्पत्तेः । हे यजमानभाग ! यजमानेन सह त्वां तस्मिन् लोके 'दधामि' प्रक्षिपामि, तदर्थ मिदं स्वाहुत मस्तु । अनेन मन्त्रेण यत् होमानुष्ठान मस्ति, तत्तथा न कुर्यात् । यजमानभागस्य यजमानस्वरूपत्वेन तस्य भागस्य होमे 'सः' होमकर्त्ता यजमान मेवाग्नौ 'प्रवृणक्ति' प्रवृक्तं दग्धं करोति । 'तत्र' तदानीं 'यः' शत्रु रागत्य 'एनं' कर्त्तारं 'ब्रूयात्' शपेत । कथ मिति तदुच्यते— हे होमकर्त्तस्त्वं यजमान मग्नौ 'प्रावार्क्षीः' प्रवृक्तवान् दग्धवानसि , 'अस्य' यजमानस्य प्राणानग्निः प्रकर्षेण धक्ष्यति, यजमानो मरिष्यतीति ; स शापो ऽवश्यं तथैव स्यात् । तस्मात् 'तस्य' होमस्य 'आशाम्' इच्छा मपि 'नेयात्' न प्राप्नुयात् । अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ८ (२६) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां चतुर्थाध्याये
(चतुस्त्रिंशाध्याये) अष्टमः खण्डः ॥ ८ (२६) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'–नामभाष्ये
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायाः चतुर्थोऽध्यायः ॥

॥ अथ पञ्चमाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ विश्वन्तरो ह सौषद्मनः श्यापर्णान् परिचक्षाणो विश्यापर्णं यज्ञ माजह्रे तद्धानुबुध्य * श्यापर्णास्तं यज्ञ माजग्मुस्ते ह तदन्तर्वेद्यासाञ्चक्रिरे तान् ह † दृष्ट्वोवाच पापस्य वा इमे कर्मणः कर्त्तार आसतेऽपूतायै वाचो वदितारो यच्छ्यापर्णा इमानुत्थापयतेमे मेऽन्तर्वेदि मासिषतेति तथेति तानुत्थापयाञ्चक्रुस्ते होत्थाप्यमाना रुरुविरे ये तेभ्यो भूतवीरेभ्योऽसितमृगाः कश्यपानां सोमपीथ मभिजिग्युः पारिक्षितस्य जनमेजयस्य विकश्यपे यज्ञे तैस्ते तत्र वीरवन्त आसुः क‡ स्वित्सोऽस्माकास्ति वीरो य इमं सोमपीथ मभिजेष्यतीत्यय मह मस्मि वो वीर इति होवाच रामो मार्गवेयो रामो हास मार्गवेयोऽनूचानः श्यापर्णीयस्तेषां होत्तिष्ठता मुवाचापि नु राजन्नित्थंविदं वेदेरुत्थापयन्तीति यस्त्वं कथं वेत्थ ब्रह्मबन्धविति ॥ १ (२७) ॥

---

* "तद्धानुबुध्यः" क, ख, घ, ङ, च ; परं भाष्यविरुद्धः ।

† "तान् हा" ख ।

‡ "कः"–इति सविसर्गपाठः क पुस्तके ।

॥ श्रीगणेशाय नमः ॥

क्षत्रियो यजमानो यस्तस्य होमादि वर्णितम् ।
फलनामा तु चमसस्तस्यैवात्रोपवर्ण्यते ॥ १ ॥

तत्रादौ क्षत्रियस्य सोमभक्षराहित्यप्रदर्शनार्थ मुपाख्यानमाह— "विश्वन्तरो ह सौषद्मनः श्यापर्णान् परिचक्षाणो विश्यापर्णं यज्ञ माजह्रे; तद्धानुबुध्य श्यापर्णास्तं यज्ञ माजग्मुस्ते ह तदन्तर्वेद्यासाञ्चक्रिरे; तान् ह दृष्ट्वोवाच,— पापस्य वा इमे कर्मणः कर्त्तार आसते, ऽपूतायै वाचो वदितारो यच्छ्यापर्णा, इमानुत्थापयतेमे मेऽन्तर्वेदि मासिषतेति *; तथेति, तानुत्थापयाञ्चक्रुः" –इति । शोभनं सद्म राजगृहं यस्य राज्ञः, सोऽयं 'सुषद्मा', तस्य पुत्रः 'सौषद्मनः' । स च 'विश्वन्तर'नामकः । स कदाचिद् यागं चिकीर्षुः 'श्यापर्णान्' तन्नामकान् ब्राह्मणविशेषान् 'परिचक्षाणः' आर्त्विज्ये निराकुर्वन् 'विश्यापर्णं यज्ञ माजह्रे' श्यापर्णनामकब्राह्मणविरहित मेव यज्ञ मनुष्ठितवान् । 'तद्ध' तत्सर्वं श्यापर्णनामका ब्राह्मणाः 'अनुबुध्य' मनुष्यमुखादवगत्य, विश्वन्तरेण राज्ञा तदानी मनाहूता एव तं यज्ञ माजग्मुः । आगत्य 'ते ह' त एव श्यापर्णाः 'तदन्तर्वेदि' तस्य यज्ञस्य वेदिमध्ये 'आसाञ्चक्रिरे' राजानुज्ञा मन्तरेण स्वय मेवोपविष्टवन्तः । राजा 'तान्' उद्दण्डान् श्यापर्णान् दृष्ट्वा, स्वकीयान् वेत्रपाणीन् पुरुषानुवाच । 'यद्' ये श्यापर्णाः सन्ति, इमे 'अपूतायै वाचो वदितारः' अपूतां वाचं मदीयावज्ञारूपां वदन्तः 'पापस्य कर्मणः कर्त्तारः' धौर्त्यरूपं व्यापारं कर्त्तु मुद्यता इहासते; 'इमे' श्यापर्णाः 'मेऽन्तर्वेदि'

---

* 'मा आसिषत' स्वयमेवोपविष्टा मा भवन्त्वित्यर्थ एवात्र न्याय्यः स्यात्; अन्यथा मूले श्रुतौ माशब्दो ऽव्याख्यात एव भवेदिति ध्येयम् ।

मदीयाया वेदेर्मध्ये 'आसिषत' स्वय मेवोपविष्टाः ; इमान् धूर्त्तान् हे वेत्रपाणयः ! उत्थापयत । 'इति' एवं राज्ञोक्ता वेत्रपाणयः 'तथा'–इत्यङ्गीकृत्य 'तान्' श्यापर्णानुत्थापयाञ्चक्रुः ॥

तेषां श्यापर्णानां वृत्तान्त माह— "ते होत्थाप्यमाना रुरुविरे; ये तेभ्यो भूतवीरेभ्यो ऽसितमृगाः कश्यपानां सोमपीथ मभिजग्युः पारिक्षितस्य जनमेजयस्य विकश्यपे यज्ञे , तैस्ते तत्र वीरवन्त आसुः ; क स्वित्सो ऽस्माकास्ति वीरो य इमं सोमपीथ मभिजेष्यतीति"–इति । वेत्रपाणिभिरुत्थाप्यमानाः 'ते' श्यापर्णा ब्राह्मणाः 'रुरुविरे' रवं शब्दं परस्पर मुच्चैर्ध्वनिं कृतवन्तः । तत्र दृष्टाः केचिद् अन्यान् प्रति काञ्चित्पुरातनीं कथा मूचुः । परिक्षितपुत्रो जनमेजयाख्यो यो राजा, स कदाचित् कश्यपवंशोत्पन्नान् ब्राह्मणान् विहाय 'विकश्यपं' यज्ञं भूतवीरसञ्ज्ञकैर्ब्राह्मणैर्ऋत्विग्भिः कारयामास । तदानीं कश्यपानां मध्ये 'ये' केचिद् असितमृगनामकाः पुरुषाः 'सोमपीथं' जनमेजयसम्बन्धिनं सोमयागं 'तेभ्यः' भूतवीरसञ्ज्ञकेभ्यो ब्राह्मणेभ्यः बलादाकृष्य स्वयम् 'अभिजिग्युः' अभितो जयं प्राप्ताः, (बहुषु यज्ञप्रयोगेषु विजिगीषुकथां कृत्वा) 'तान्' भूतवीरान् ब्राह्मणान् पराजयं प्रापय्य स्वय मसितमृगनामानो जितवन्तः ; 'तैः' असितमृगैः 'ते' कश्यपाः 'तत्र' जनमेजयस्य यज्ञे 'वीरवन्तः' शूरपुरुषोपेता आसुः । एतां कथा मुदाहृत्य श्यापर्णाः स्वकीयानेवं पृच्छन्ति,— 'अस्माक' राज्ञा तिरस्कृताना मस्माकं मध्ये 'यः' पुमान् 'इमं सोमपीथं' विश्वन्तरस्य राज्ञः सोमयाग मभिजेष्यति, स तादृशो वीरः 'कश्चिदस्ति' यः कोऽपि अस्ति ? 'इति' एव मुच्चैः शब्दं चक्रुः ॥

---

* अस्माकेत्यदन्तशब्दोऽस्मदीयवचनः ; ततो विभक्तेर्लुकि रूपम् (ऋ०सं०१, ९७, २.) ।

तस्य प्रश्नस्य श्यापर्णानां मध्ये केनचिदुक्त मुत्तरं दर्शयति— "अय मह मस्मि वो वीर इति होवाच रामो मार्गवेयः"–इति। मृगयुर्नाम काचिद् योषित्, तस्याः पुत्रो रामनामा कश्चिद् ब्राह्मण एव मुवाच— हे श्यापर्णाः! 'वः' युष्माकं मध्ये 'वीरः' परकीयान् विजेतुं शूरः 'अह मय मस्मि' भवतां पुरतो वर्त्तमानो ऽस्मीति॥

तस्य रामस्य वृत्तान्त माह— "रामो हास मार्गवेयो ऽनूचानः श्यापर्णीयस्तेषां होत्तिष्ठता मुवाचापि नु राजन्नित्थंविदं वेदेरुत्थापयन्तीति; यस्त्वं कथं वेत्थ ब्रह्मबन्धविति"–इति। 'श्यापर्णीयः' श्यापर्णानां ब्राह्मणानां सम्बन्धी*, मृगयुपुत्रो रामः 'अनूचानः' साङ्गवेदशास्त्रपारङ्गत आस। तत्रावस्थितानां तेषां श्यापर्णानां वेदेरुत्तिष्ठतां मध्य ऽवस्थितो रामो विश्वन्तरं प्रत्येव मुवाच,— हे राजन्! 'इत्थंविदं' यागसम्बन्धिप्रयोगप्रकाराभिज्ञं मा मपि त्वदीया वेत्रपाणयः 'अनु' चिप्रं वेदेरुत्थापयन्ति, तदेतदयुक्त मिति। तच्छ्रुत्वा विश्वन्तरो राजैव मुवाच— हे 'ब्रह्मबन्धो' ब्राह्मणाधम राम! यस्त्वं धार्ष्ट्यात् ब्रवीषि, स त्वं कथं वेत्थ? इति। अत्र राजोवाचेत्यध्याहर्त्तव्यम्॥ १ (२७)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां पञ्चमाध्याये
(पञ्चत्रिंशाध्याये) प्रथमः खण्डः॥ १ (२७)॥

---

* अस्ति श्यापर्णशब्दो विदाद्यन्तर्गणगोपवनादिगणे पठितः (पा०२,४,६७.), कार्त्तकौजपादिगणे च पैलश्यापर्णेयाः कपिश्यापर्णेयाः इति (पा०६.२.३७.)। तद्विद्वाञ्छ्यापर्णः सायकायन आह"–इति शत० ब्रा०१०,४,१,१०। तत्रैवान्यत्रान्यत्र च ६,२,१,३९;९,५,२,१।

॥ अथ द्वितीयः खण्डः ॥

यत्रेन्द्रं देवताः पर्यवृञ्जन्॑ विश्वरूपं त्वाष्ट्र मभ्यमंस्त॑ वृत्र मस्तृत यतीन्त्सालावृकेभ्यः॑ प्रादादरुर्मघानवधीद्॑ बृहस्पतेः प्रत्यवधीदिति॑ तत्रेन्द्रः सोमपीथेन व्यार्द्धते॑न्द्रस्यानु व्यृद्धिं क्षत्रं॑ सोमपीथेन व्यार्द्धता॑पीन्द्रः सोमपीथे ऽभवत्॑ त्वष्टुरामुष्य सोमं॑ तद् व्यृद्ध मे॑वाद्यापि क्षत्रं सोमपीथेन॑ स यस्तं भक्षं विद्याद्यः॑ क्षत्रस्य सोमपीथेन व्यृद्धस्य॑ येन क्षत्रं समृध्यते॑ कथं तं वेदेरुत्थापयन्तीति॑ वेत्थ ब्राह्मण त्वं तं भक्षाँ३॑ वेद ही॑ति तं वै नो ब्राह्मण ब्रूहीति॑ तस्मै वै ते राजन्निति होवाच॑ ॥ २ (२८) ॥

अथ रामः स्वकीयं वेदनं राज्ञोऽग्रे दर्शयति— "यत्रेन्द्रं देवताः पर्य्यवृञ्जन् ; विश्वरूपं त्वाष्ट्र मभ्यमंस्त, वृत्र मस्तृत, यतीन्त्सालावृकेभ्यः प्रादादरुर्मघानवधीद्, बृहस्पतेः प्रत्यवधीदिति ; तत्रेन्द्रः सोमपीथेन व्यार्द्धतेन्द्रस्यानु व्यृद्धिं क्षत्रं सोमपीथेन व्यार्द्धतापीन्द्रः सोमपीथे ऽभवत् त्वष्टुरामुष्य सोमं ; तद् व्यृद्ध मेवाद्यापि क्षत्रं सोमपीथेन ; स यस्तं भक्षं विद्याद्यः क्षत्रस्य सोमपीथेन व्यृद्धस्य येन क्षत्रं समृध्यते, कथं तं वेदेरुत्थापयन्तीति"—इति । हे विश्वन्तर ! मदीयं वेदनं शृणु । पुरा कदाचिद् देवताः इन्द्रस्योपरि पञ्चापराधान् सम्पाद्य इन्द्रं 'पर्य्यवृञ्जन्' यज्ञेषु परितो वर्जितवन्तः । 'यत्र' यदा वर्जनं कृतं, तत्र तत्रेन्द्रः 'सोमपीथेन व्यार्द्धत' सोमपानेन वियुक्तो ऽभूत् । इन्द्रस्य ये ऽपराधास्ते ऽभिधीयन्ते ।

त्वष्टुः पुत्रं विश्वरूपनामानं ब्राह्मणम् 'अभ्यमंस्त' इन्द्रो हिंसितवान्। तथा तेन त्वष्ट्रेत्यादिश्रुतं वृत्रनामानं ब्राह्मणम् 'अस्तृत' हिंसितवान्। एतदुभयं तैत्तिरीयैः "विश्वरूपो वै त्वाष्ट्रः"–"त्वष्टा हतपुत्रः"– इत्यनुवाकद्वये विस्पष्ट माम्नातम् *। तथा यतिवेषधरानसुरान् शस्त्रेण छित्वा 'सालावृकेभ्यः' अरण्यश्वभ्यः प्रादात् †। तथा अन्यानप्यरुर्मघनामकान् ब्राह्मणवेषानसुरान् अवधीत्। तथा स्वगुरोर्बृहस्पतेर्वाक्यं स्वकीयेन वाक्येन प्रत्यवधीत्। सोऽयं प्रतिघातो न युक्तः; तथा चापस्तम्बः स्मरति— "वाक्येन वाक्यस्य प्रतिघात माचार्यस्य वर्जयेच्छ्रेयसां च"–इति। एते पञ्चापराधाः तैर्निमित्तभूतैरिन्द्रस्य सोमपाने निवारिते सति 'व्यृद्धिं' तन्निवारणम् अनु 'क्षत्रं' सर्वापि क्षत्रियजातिः 'सोमपीथेन व्यार्ध्यत' सोमपानेन वियुक्ताभूत्। तदूर्द्ध्वं 'सोमपीथे' सोमपानेऽपि स प्रवृत्तो ऽभूत्। कथ मिति तदुच्यते— 'अमुष्य त्वष्टुः सोमं आ', बलादपिबदिति शेषः। तथाच तैत्तिरीया आमनन्ति— "स यज्ञवेशसं कृत्वा प्रासहा सोम मपिबत्"–इति ‡। 'तत्' तथा सति, इन्द्रेण बलात्सोमे पीते सति, क्षत्रियान्तरस्य तत्सामर्थ्याभावादिदानी मपि क्षत्रं 'सोमपीथेन व्यृद्ध मेव' सोमपानरहित मेव

---

* तै० सं० २. ५. १. १; २. १।

† "इन्द्रो यतीन्त्सालावृकेभ्यः प्रायच्छत्"–इति तै० सं० ६. २. ७. ५। ता० ब्रा० ८. १. ४। 'वेदविरुद्धनियमोपेतान् यतीन्'–इति तत्र सायणः। ता० ब्रा० १३. ४. १७, 'यतीन्—एतत्संज्ञकान् यज्ञविरोधिजनान्' इति तु तत्र सायणः।

‡ तै० सं० २. ५. २. १। "इन्द्रो यज्ञवेशसं"–इत्यादिः संहितापाठः। "इन्द्राणी देवी प्रासहा ददाना"–इति तै० ब्रा० २. ४. २. ७। "इन्द्रस्य प्रिया जाया वावाता प्रासहा नाम"–इति पुरस्तादाम्नात मिहैव (९८पृ० २पं०)।

अवतिष्ठते । 'येन' भक्षविशेषेण क्षत्रं समृद्धं भवति, तादृशो योऽन्यो भक्षः, सोमपानेन वियुक्तस्य क्षत्रस्य सम्भवति, तं भक्षं यः पुमान् विद्यात्, 'तं' तादृशं क्षत्रियभक्षविद मस्मदादिपुरुषं कथ मेते वेतपाणयो वेदेरुत्थापयतीति रामस्योपालम्भः ॥

अथ रामविश्वन्तरयोरुक्तिप्रत्युक्तीर्दर्शयति— "वेत्थ ब्राह्मण त्वं तं भक्षाँ३ ? वेद हीति ; तं वै नो ब्राह्मण ब्रूहीति ; तस्मै वै ते राजन्निति होवाच"–इति । हे 'ब्राह्मण' राम ! त्वं तादृशं भक्षं किं वेत्थ ? इति विश्वन्तरस्य प्रश्नः ; तदर्था प्लुतिः । 'वेद हि' जानाम्येवेति रामो ऽब्रवीत् । हे ब्राह्मण ! 'तं वै' त मेव क्षत्रियभक्षं 'नः' अस्माकं ब्रूहीति विश्वन्तरः पप्रच्छ । हे राजन् ! 'तस्मै ते वै' तादृशाय पृच्छते तुभ्य मेव, कथयामीति राम उवाच ॥ (२) २८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां पञ्चमाध्याये
(पञ्चत्रिंशाध्याये) द्वितीयः खण्डः ॥ २ (२८) ॥

॥ अथ तृतीयः खण्डः ॥

त्रयाणां भक्षाणा॑ मेक माहरिष्यन्ति॑ सोमं वा दधि वा ऽपो वा॑ स यदि सोमं॑ ब्राह्मणानां स भक्षो॑ ब्राह्मणांस्तेन भक्षेण जिन्विष्यसि॑ ब्राह्मणकल्पस्ते प्रजाया माजनिष्यते॑ आदाय्यापाय्यावसायी॑ यथा-

कामंप्रयाप्यो॑ यदा वै क्षत्रियाय पापं भवति॑ ब्राह्मणकल्पो ऽस्य प्रजाया माजायत॑ ईश्वरो ह्यस्माद् द्वितीयो वा तृतीयो वा॑ ब्राह्मणता मभ्युपैतो॑ः स ब्रह्मबन्धवेन जिज्यूषितो॑ ऽथ यदि दधि॑ वैश्यानां स भक्षो॑ वैश्यांस्तेन भक्षेण जिन्विष्यसि॑ वैश्यकल्पस्ते प्रजाया माजनिष्यते॑ ऽन्यस्य बलिकृदन्यस्याद्यो॑ यथाकामज्येयो॑ यदा वै क्षत्रियाय पापं भवति॑ वैश्यकल्पो ऽस्य प्रजाया माजायत॑ ईश्वरो ह्यस्माद् द्वितीयो वा तृतीयो वा॑ वैश्यता मभ्युपैतो॑ः स वैश्यतया जिज्यूषितो॑ ऽथ यद्यप॑ः शूद्राणां स भक्षः॑ शूद्रांस्तेन भक्षेण जिन्विष्यसि॑ शूद्रकल्पस्ते प्रजाया माजनिष्यते॑ ऽन्यस्य प्रेष्यः कामोत्थाप्यो॑ यथाकामवध्यो॑ यदा वै क्षत्रियाय पापं भवति॑ शूद्रकल्पो ऽस्य प्रजाया माजायत॑ ईश्वरो ह्यस्माद् द्वितीयो वा तृतीयो वा॑ शूद्रता मभ्युपैतो॑ः स शूद्रतया जिज्यूषितः॑ ॥ (३) २९ ॥

क्षत्रियस्य हेया भक्षास्त्रिविधाः, उपादेयो भक्ष एकः ; तत्र हेयान् भक्षान् दर्शयति— "त्रयाणां भक्षाणा मेक माहरिष्यन्ति, सोमं वा दधि वा ऽपो वा"-इति । हेयानां त्रयाणां मध्ये भक्ष मेकं क्षत्रियस्य तव अनभिज्ञा ऋत्विज आहरिष्यन्ति । कं भक्ष मित्याशङ्क्य सोमं वा दधि वा जलं वेत्युक्तम् ॥

तत्र सोमपक्षे दोषं दर्शयति— "स यदि सोमं, ब्राह्मणानां स

भक्षो, ब्राह्मणांस्तेन भक्षेण जिन्विष्यसि ; ब्राह्मणकल्पस्ते प्रजाया माजनिष्यत,— आदाय्यापाय्यावसायी यथाकामप्रयाप्यो ; यदा वै क्षत्रियाय पापं भवति , ब्राह्मणकल्पो ऽस्य प्रजाया माजायत , ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा ब्राह्मणता मभ्युपैतोः, स ब्रह्मबन्धवेन जिज्यूषितः”–इति । ‘सः’ अनभिज्ञ ऋत्विग् यदि ते विश्वन्तरस्य क्षत्रियस्य ‘सोमं’ भक्षम् , आहरेदिति शेषः , ‘सः’ सोमो ब्राह्मणानां योग्यो भक्षः , तेन भक्षेण ब्राह्मणान् ‘जिन्विष्यसि’ प्रीणयिष्यसि ; न तु क्षत्रियस्य तव प्रीतिः । तथा सति ‘ते’ तव राज्ञः ‘प्रजायां’ सन्ततौ ‘ब्राह्मणकल्पः’ ईषदसमाप्तो ब्राह्मणः* आजनिष्यते । क्षत्रियधर्मेण शौर्येण रहितत्वात् तस्य ब्राह्मणसदृशत्वम् । स च पुत्रो ब्राह्मणवत् वक्ष्यमाणगुणचतुष्टयोपेतो भवति । आदानं प्रतिग्रहः, तच्छीलः ‘आदायी’ ; प्रतिग्रहश्च ब्राह्मणगुणः । ऋत्विग्भूत्वा सोमम् ‘आ’ समन्तात् पाययतीति ‘आपायी’ ; तदेतद् याजन मपि ब्राह्मणगुणः । अवस मन्नं तस्य सम्बन्धि याचन मावसः , त मावस मेति प्राप्नोति ‘आवसायी’ ; परगृहे सदा भोजनयाचन मपि ब्राह्मणगुणः । काम मिच्छा मनतिक्रम्य यथाकामं, तदनुसारेण ‘प्रयाप्यः’ निर्वासयितुं शक्यः ; क्षत्रियवैश्यादिवत् शौर्य्यधनाद्यभावात् यः कोऽप्यागत्य दुर्बलं ब्राह्मणं तद्गृहात् तदीयग्रामाद्वा निष्कासयितु मिच्छति, तदानी मयं ब्राह्मणो दुर्बलत्वात् तेन निःसारयितुं शक्यते । एव मेते चत्वारो धर्माः ब्राह्मणगुणाः । सोमं भक्षयतो राज्ञः एतद्गुणकः पुत्रो जायते । किञ्च यदा प्रमादात् ‘क्षत्रियाय पापं’ क्षत्रियस्य किञ्चिन्निषिद्धाचरणं भवति , तदानीं तेन पापेन तस्य क्षत्रियस्य

---

* “ईषदसमाप्तौ कल्पब्देश्यदेशीयः”–इति पा० ५, ३, ६७ सू ।

‘प्रजायां’ सन्ततौ ‘ब्राह्मणकल्पः’ शौर्यराहित्यादिना ब्राह्मणसदृशः पुत्र आजायते। ‘अस्मात्’ पापिनः क्षत्रियात् ‘द्वितीयो वा तृतीयो वा’ पुत्रो वा पौत्रो वा ‘ब्राह्मणताम् अभ्युपैतोः’ शौर्यादिगुणरहितं ब्राह्मण्यं प्राप्तु मीश्वरः* समर्थो भवति। ‘सः’ ब्राह्मणसदृशः क्षत्रियपुत्रो ‘ब्राह्मणबन्धवेन’ ब्राह्मणाना मधमबन्धुत्वेन ब्राह्मणोचित-याच्ञादिना ‘जिज्यूषितः’ जीवितु मिष्टः, नीचरूपदैन्यवृत्त्या जीवितुं प्रवृत्तो भवतीत्यर्थः॥

सोमस्य भक्षत्वे दोष मुक्त्वा दध्नो भक्षत्वे दोष माह— “अथ यदि दधि, वैश्यानां स भक्षो, वैश्यांस्तेन भक्षेण जिन्विष्यसि, वैश्यकल्पस्ते प्रजाया माजनिष्यते,— ऽन्यस्य बलिकृदन्यस्याद्यो यथाकामज्येयो; यदा वै क्षत्रियाय पापं भवति, वैश्यकल्पो ऽस्य प्रजाया माजायत, ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा वैश्यता मभ्युपैतोः, स वैश्यतया जिज्यूषितः”–इति। यदि ते दधिरूपं भक्ष माहरेत्, तदा दध्नो वैश्यभक्षत्वात् तेन वैश्यान् प्रीणयिष्यसि। ततस्तव सन्ततौ वैश्यसमानः पुत्र आजनिष्यते। वैश्यश्च वाणिज्यं कुर्वन् ‘अन्यस्य’ राज्ञो ‘बलिकृत्’ बलिं पूजां करोति, करं प्रयच्छतीत्यर्थः। अत एव ‘अन्यस्य’ राज्ञः ‘आद्यः’ भक्ष्यो ऽधीनो भवतीत्यर्थः। तस्य राज्ञः काम मिच्छा मनतिक्रम्य ‘ज्येयः’ अभिभवनीयो भवति। “ज्या अभिभवे”–इति धातुः†। त एते करप्रदान-पराधीनत्व-तिरस्कार्यत्वाख्या वैश्यगुणाः। यदा क्षत्रियस्य किञ्चित् पापं सम्भवति, तदा तस्य सन्ततौ वैश्यसदृशो

---

[*] “ईश्वरे तोसुन्-कसुनौ”–इति पा० ३. ४. १३ सू०।

[†] “चतुर्भिर्धर्मैर्ब्राह्मणं भुनक्ति— अर्चया च, दानेन च, अज्येयतया च अवध्यतया च” –इति शत० ब्रा० ११, ५, ७, १। ‘ज्यानिर्हानिस्तदविषय मज्येयता’–इति तत्र सा० भा०।

जायते । 'अस्मात्' क्षत्रियात् पापिनो ऽन्यः पुत्रः पौत्रो वा वैश्यतां प्राप्तुं समर्थो भवति । स च 'वैश्यतया' वैश्यवृत्त्या करप्रदानादिना जीवितुं प्रवृत्तो भवति ॥

दधिभक्षे दोष मुक्त्वा जलभक्षे दोष माह— "अथ यद्यपः, शूद्राणां स भक्षः, शूद्रांस्तेन भक्षेण जिन्विष्यसि ; शूद्रकल्पस्ते प्रजायामाजनिष्यते,—ऽन्यस्य प्रेष्यः कामोत्थाप्यो यथाकामवध्यो ; यदा वै क्षत्रियाय पापं भवति , शूद्रकल्पो ऽस्य प्रजायामाजायत , ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा शूद्रतामभ्युपेतोः, स शूद्रतया जिज्यूषितः"–इति । यदि ते क्षत्रियस्य कश्चिदृत्विक् 'अपः' जलं भक्ष माहरेत् , तदानीं 'सः' जलात्मकः शूद्राणां भक्षः, तेन भक्षेण शूद्रान् प्रीणयिष्यसि । ततस्तव सन्ततौ शूद्रसदृशः पुत्र उत्पद्यते । शूद्रश्च 'अन्यस्य' उत्तमवर्णत्रयस्य 'प्रेष्यः' प्रेषणीयो भृत्यो भवति । तथा 'कामोत्थाप्यः' मध्यरात्रादौ यदा कदाचिद् दिने इच्छा भवति , तदानीं मय मुत्थाप्यते । तथा तदीयं 'कामम्' इच्छाम् अनतिक्रम्य 'वध्यः' कुपितेन स्वामिना ताड्यो भवति । एते शूद्रगुणाः । क्षत्रियस्य कदाचित् पापे सति शूद्रसमानः पुत्रो जायते । 'अस्मात्' क्षत्रियात् अन्यः पुत्रः पौत्रो वा शूद्रत्वं प्राप्तुं समर्थो भवति । 'सः' पुत्रः शूद्रवर्णतया दासत्ववृत्त्या जीवितुं प्रवृत्तो भवति ॥ (३) २९ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां पञ्चमाध्याये
(पञ्चत्रिंशाध्याये) तृतीयः खण्डः ॥ ३ (२९) ॥

॥ अथ चतुर्थः खण्डः ॥

एते वै ते त्रयो भक्षा राजन्निति होवाच येषा माशां नेयात् क्षत्रियो यजमानो ऽथास्यैष स्वो भक्षो न्यग्रोधस्यावरोधाश्च फलानि चौदुम्बराण्याश्वत्थानि प्लाक्षाण्यभिषुणुयात्तानि भक्षयेत् सो ऽस्य स्वो भक्षो यतो वा अधि देवा यज्ञेनेष्ट्वा स्वर्गं लोक मायंस्तत्रैतांश्चमसान् न्युब्जंस्ते न्यग्रोधा अभवन् न्युब्जा इति हाप्येनानेतर्ह्याचक्षते कुरुक्षेत्रे ते ह प्रथमजा न्यग्रोधानां तेभ्यो हान्ये ऽधिजातास्ते यन्न्यञ्चो ऽरोहंस्तस्मान्न्यङ् रोहति न्यग्रोहो न्यग्रोहो वै नाम तन्न्यग्रोहं सन्तं न्यग्रोध इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः ॥ (४) ३० ॥

अथ क्षत्रियोचितं भक्षं दर्शयितु मुक्तानां भक्षाणां क्षत्रियेण हेयतां सङ्गृह्याह— "एते वै ते त्रयो भक्षा राजन्निति होवाच ; येषा माशां नेयात् क्षत्रियो यजमानः"–इति । क्षत्रियो यागं कुर्वन् 'येषां' भक्षाणाम् 'आशाम्' इच्छा मपि 'नेयात्' न प्राप्नुयात् । हे 'राजन्' विश्वन्तर ! ते त्रयोऽपि 'एते' पूर्वं मुक्ताः ॥

उपादेयं भक्षं दर्शयति— "अथास्यैष स्वो भक्षो न्यग्रोधस्यावरोधाश्च फलानि चौदुम्बराण्याश्वत्थानि प्लाक्षाण्यभिषुणुयात् तानि ; भक्षयेत् ; सो ऽस्य स्वो भक्षः"–इति । 'अथ' हेयभक्षकथनानन्तरम्, उपादेयो भक्षः कथ्यत इति शेषः । 'अस्य' राज्ञ एव 'एषः' वक्ष्यमाणः स्वो भक्षः । को ऽसौ ? इति, सोऽभिधीयते — 'न्यग्रोधस्यावरोधाः' शाखाभ्यो ऽवाङ्मुखत्वेन प्ररोहन्तो

मूलविशेषाः, तथैवोदुम्बराश्वत्थप्लक्षाख्यानां वृक्षाणां फलानि च, 'तानि' सर्वाणि 'अभिषुणुयात्'; अभिषुत्य च यो रसो भवति, तं भक्षयेत्; 'सः' अयम् 'अस्य' क्षत्रियस्य स्वोचितो भक्षः ॥

अथ न्यग्रोधप्रशंसार्थं तदुत्पत्तिं दर्शयति— "यतो वा अधि देवा यज्ञेनेष्ट्वा स्वर्गं लोकमायंस्तत्रैतांश्चमसान् न्युब्जंस्ते न्यग्रोधा अभवन्, न्युब्जा इति हाप्येनानेतर्ह्याचक्षते; कुरुक्षेत्रे ते ह प्रथमजा न्यग्रोधानां, तेभ्यो हान्ये ऽधिजाताः"–इति। देवाः पुरा 'यतो वा अधि' यद्यज्ञदेशस्य कुरुक्षेत्रस्योपरि यज्ञेनेष्ट्वा स्वर्गं लोकम् 'आयन्' प्राप्नुवन्, 'तत्र' तस्मिन् यज्ञदेशे 'तान्' सोमचमसान् 'न्युब्जान्' अधोमुखानेतानस्थापयन्; अधोमुखाः 'ते' चमसाः न्यग्रोधवृक्षा अभवन्। 'एतर्हि' इदानीमपि तस्मिन् कुरुक्षेत्रे 'एनान्' न्यग्रोधवृक्षान् 'न्युब्जाः'–'इति' अनेन नाम्ना आचक्षते। 'ते' कुरुक्षेत्रदेशस्था वृक्षा भूलोकवर्त्तिनां सर्वेषां न्यग्रोधवृक्षाणां मध्ये 'प्रथमजाः' प्रथमत उत्पन्नाः; 'तेभ्यः' तद्देशवर्त्तिन्यग्रोधवृक्षेभ्यः 'अन्ये' देशान्तरवर्त्तिनो न्यग्रोधाः 'अधिजाताः' आधिक्येनोत्पन्नाः ॥

न्यग्रोधशब्दं निर्वक्ति— "ते यन्न्यञ्चो ऽरोहंस्तस्मान्न्यङ् रोहति न्यग्रोहो, न्यग्रोहो वै नाम; तन्न्यग्रोहं सन्तं न्यग्रोध इत्याचक्षते परोक्षेण; परोक्षप्रिया इव हि देवाः"–इति। 'ते' चमसाः 'यद्' यस्मात् कारणात् 'न्यञ्चः' अधोमुखाः 'अरोहन्' प्रादुर्भूताः, 'तस्मात्' कारणात् 'न्यङ्' अधोमुखो 'रोहति' प्रादुर्भवतीति व्युत्पत्त्या 'न्यग्रोहः' सम्पन्नः। स च वस्तुतो न्यग्रोह इत्येव नामार्हति, तस्य नाम्नो व्युत्पत्त्यनुसारित्वात्, तथापि न्यग्रोहं सन्तं वृक्षं लौकिका हकारस्य धकारादेशं कृत्वा न्यग्रोध इति परोक्ष-

नाम्ना व्यवहरन्ति; 'देवानां' पूज्यानां आचार्योपाध्यायादीनां परोक्षनामप्रियत्वात् ॥ (४) ३० ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां पञ्चमाध्याये
(पञ्चत्रिंशाध्याये) चतुर्थः खण्डः ॥ ४ (३०) ॥

॥ अथ पञ्चमः खण्डः ॥

तेषां यश्चमसानां रसो ऽवाङैत्ते॑ ऽवरोधा अभ॑वन्नथ य ऊर्द्ध्वस्तानि फला॑न्येष ह वाव क्षत्रिय॑ः स्वाद्भक्षान्नैति॑ यो न्यग्रोधस्यावरोधांश्च॑ फलानि च भक्ष॑यत्युपा ह परोक्षेणैव॑ सोमपीथ माप्नोति॑ नास्य प्रत्यक्षं भक्षितो भवति॑ परोक्ष मिव ह वा एष सोमो राजा॑ यन्न्यग्रोध॑ः परोक्ष मिवैष ब्रह्मणो॑ रूप मुपनिगच्छति॑ यत् क्षत्रियः पुरोधयैव॑ दीक्षयैव प्रवरेणैव॑ क्षत्रं वा एतद् वनस्पतीनां यन्न्यग्रोध॑ः क्षत्रं राजन्यो नितत इव हीह॑ क्षत्रियो राष्ट्रे वसन् भवति॑ प्रतिष्ठित इव नितत इव॑ न्यग्रोधो ऽवरोधै॑र्भूम्यां प्रतिष्ठित इव॑ तद्यत् क्षत्रियो यजमानो॑ न्यग्रोधस्यावरोधांश्च॑ फलानि च भक्षयत्या॑त्मन्येव तत्॑ क्षत्रं वनस्पतीनां प्रतिष्ठापयति॑ क्षत्र आत्मानं॑ क्षत्रे ह वै स

आत्मनि॑ क्षत्रं॑ वनस्पतीनां प्रतिष्ठापयति॑ न्यग्रो॒ध इवावरोधैर्भूम्यां॑ प्रति राष्ट्रे ति॑ष्ठत्युग्रं॑ ह्यास्य राष्ट्र मव्यथ्यं॑ भव॑ति य एव मेतं भक्षं भक्षयति॑ क्षत्रियो यजमानः॑ ॥ ५ (३१) ॥

न्यग्रोधवृक्षस्योत्पत्ति मुक्त्वा तदीयाना मवरोधानां फलानां चोत्पत्तिं दर्शयति— "तेषां यश्चमसानां रसो ऽवाङैत्, ते ऽवरोधा अभवन्नथ य ऊर्ध्वस्तानि फलानि"–इति । 'तेषाम्' अधोमुखत्वेनावस्थितानां चमसानां वटवृक्षत्वे सति चमसगतो यो रसः, सः 'अवाङैत्' अधोमुखो ऽगच्छत् । 'ते' रसविशेषाः 'अवरोधाः' अधोमुखत्वेनोत्पन्नाः वटशाखाभ्यो निर्गता मूलविशेषा अभवन् । 'अथ' तद्वैलक्षण्येन यो रस ऊर्ध्वो निरगच्छत्, 'तानि' रसरूपाणि वटफलानि अभवन् ॥

तेषा मेवावरोधानां फलानाञ्च क्षत्रियभक्षत्वेन प्रशंसति— "एष ह वाव क्षत्रियः स्वाद्भक्षान्नैति, यो न्यग्रोधस्यावरोधांश्च फलानि च भक्षयत्युपा ह परोक्षेणैव सोमपीथ माप्नोति ; नास्य प्रत्यक्षं भक्षितो भवति ; परोक्ष मिव ह वा एष सोमो राजा यन्न्यग्रोधः, परोक्ष मिवैष ब्रह्मणो रूप मुपनिगच्छति, यत् क्षत्रियः पुरोधयैव दीक्षयैव प्रवरेणैव"–इति । 'यः' पुमान् न्यग्रोधवृक्षस्य 'अवरोधांश्च' अधोमुखानि मूलानि च, तत्फलानि च भक्षयति, एष एव क्षत्रियः स्वोचिताद्भक्षान्नापैति । किञ्चायं क्षत्रियः 'परोक्षेणैव' न्यग्रोधव्यवधानेनैव 'सोमपीथं' सोमपानम् 'उपा ह प्राप्नोति' सर्वथा प्राप्नोति । 'अस्य' क्षत्रियस्य 'प्रत्यक्षम्' अव्यवधानं यथा भवति तथा सोमो भक्षितो न भवति ; न्यग्रोधेन व्यव-

हितत्वात् । योऽयं न्यग्रोधः, एष परोक्ष मिव यथा भवति तथा वर्त्तमानः सोमो राजा; योऽयं क्षत्रियोऽस्ति, एषोऽपि 'परोक्ष मिव' व्यवधानेनैव ब्राह्मणो भूत्वा 'रूपं' तदीयवेषम् उपनिगच्छति; 'पुरोधयैव' पुरोहितद्वारेण, 'दीक्षयैव' दीक्षारूपसंस्कारेण च, 'प्रवरेणैव' पुरोहितगोत्रेण च, ब्राह्मणस्य सम्पादितत्वादिति शेषः॥

प्रकारान्तरेण न्यग्रोधक्षत्रिययोः साम्य मापाद्य प्रशंसति— "क्षत्रं वा एतद् वनस्पतीनां यन्न्यग्रोधः, क्षत्रं राजन्यो; नितत इव हीह क्षत्रियो राष्ट्रे वसन् भवति प्रतिष्ठित इव, नितत इव न्यग्रोधो ऽवरोधैर्भूम्यां प्रतिष्ठित इव"–इति । यो न्यग्रोधोऽस्ति, 'एतत्' न्यग्रोधस्वरूपं वनस्पतीनां मध्ये क्षत्रियजातिरेव, 'राजन्यः' देशाधिपतिरपि 'क्षत्रं' मनुष्याणां मध्ये क्षत्रियजातिः । किञ्चायं क्षत्रियः 'इह राष्ट्रे' स्वदेशे वसन् 'नितत इव हि' तत्तद्ग्रामेषु सञ्चरणेन नितरां सन्तत एव भवति, तथा 'प्रतिष्ठित इव' राज्यस्थैर्येण चलनरहित एव भवति; न्यग्रोधवृक्षोऽपि अधोमुखैः अवरोधैः 'नितत इव' नितरां व्याप्त एव भवति, तथा भूम्यां 'प्रतिष्ठित इव' स्थिर एव भवति । तस्मादस्त्युभयोः साम्यम् ॥

न्यग्रोधभक्ष मुपसंहरति— "तद्यत् क्षत्रियो यजमानो न्यग्रोधस्यावरोधांश्च फलानि च भक्षयत्यात्मन्येव तत् क्षत्रं वनस्पतीनां प्रतिष्ठापयति, क्षत्र आत्मानम्"–इति । 'तत्' तस्मात् न्यग्रोधक्षत्रिययोः सादृश्यसद्भावाद् यः 'क्षत्रियः' पुरुषो यागं कुर्वन् न्यग्रोधवृक्षस्यावरोधान् फलानि च भक्षयेत्, तदानीं वनस्पतीनां सम्बद्धं 'क्षत्रं' क्षत्रियजातिम् 'आत्मन्येव' स्वोदरमध्ये एव प्रतिष्ठापयति; तथैव 'आत्मानं' स्वस्वरूपं वनस्पतिसम्बन्धिनि 'क्षत्रे' न्यग्रोधे प्रतिष्ठापयति ॥

उपसंहृतं तं भक्षं पुनरपि प्रशंसति— "क्षत्रे ह वै स आत्मनि क्षत्रं वनस्पतीनां प्रतिष्ठापयति, न्यग्रोध इवावरोधैर्भूम्यां प्रति राष्ट्रे तिष्ठत्युग्रं हास्य राष्ट्र मव्यथ्यं भवति य एव मेतं भक्षं भक्षयति क्षत्रियो यजमानः"–इति । 'यः' क्षत्रियो यागं कुर्वन् 'एतं' न्यग्रोधसम्बन्धिनं भक्षं भक्षयति, स क्षत्रियः स्वयं वनस्पतीनां सम्बन्धिनि 'क्षत्रे' न्यग्रोधे प्रतिष्ठितः सन् 'आत्मनि' स्वस्मिन् वनस्पतीनां सम्बन्धि 'क्षत्रं' न्यग्रोधं प्रतिष्ठापयति ; यथा न्यग्रोधोऽवरोधैर्भूम्यां प्रतिष्ठितः, एव मयं राजा राष्ट्रे प्रतितिष्ठति । अस्य राष्ट्रम् 'उग्रं' तेजस्वि सत् 'अव्यथ्यं' केनापि व्यथितु मशक्यं भवति ॥ ५ (३१) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां पञ्चमाध्याये
(पञ्चत्रिंशाध्याये) पञ्चमः खण्डः ॥ ५ (३१) ॥

॥ अथ षष्ठः खण्डः ॥

अथ यदौदुम्बरा॑ण्यूर्जो वा एषो ऽन्नाद्याद् वनस्पतिरजायत यदुदुम्बरो॑ भौज्यं वा एतद् वनस्पतीना॑ मूर्जं मेवास्मिंस्तदन्नाद्यं॑ भौज्यञ्च वनस्पतीनां क्षत्रे दधात्यथ यदाश्वत्थानि॑ तेजसो वा एष वनस्पतिरजायत यदश्वत्थः॑ साम्राज्यं वा एतद् वनस्पतीनां॑ तेज एवास्मिं॑स्तत्साम्राज्यञ्च वनस्पतीनां क्षत्रे दधा-

त्यथ यत् प्लाक्षाणि यशसो वा एष वनस्पतिरजायत यत् प्लक्षः स्वाराज्यञ्च ह वा एतद् वैराज्यञ्च वनस्पतीनां यश एवास्मिंस्तत् स्वाराज्यवैराज्ये च वनस्पतीनां क्षत्रे दधात्येतान्यस्य पुरस्तादुपक्लृप्तानि भवन्त्यथ सोमं राजानं क्रीणन्ति ते राज्ञ एवावृतोपवसथात्प्रतिवेशैश्चरन्त्यथौपवसथ्य महरेतान्यध्वर्युः पुरस्तादुपकल्पयेताधिषवणं चर्माधिषवणे फलके द्रोणकलशं दशापवित्रं मद्रीन् पूतभृतं चाधवनीयञ्च स्थाली मुदञ्चनं चमसञ्च तद्यदेतद् राजानं प्रातरभिषुण्वन्ति तदेनानि द्वेधा विगृह्णीयादभ्यन्यानि सुनुयान् माध्यन्दिनायान्यानि परिशिंष्यात् ॥ ६ (३२) ॥

न्यग्रोधस्यावरोधान् फलानि च प्रशस्य, औदुम्बरादिप्रशंसां क्रमेण दर्शयति— "अथ यदौदुम्बराण्यूर्जो वा एषो ऽन्नाद्याद् वनस्पतिरजायत यदुदुम्बरो ; भौज्यं वा एतद् वनस्पतीना मूर्जं मेवास्मिंस्तदन्नाद्यं भौज्यञ्च वनस्पतीनां क्षत्रे दधाति"—इति। 'अथ' न्यग्रोधप्रशंसानन्तरम्, उदुम्बरप्रशंसा कथ्यते— 'यद्' यानि 'औदुम्बराणि' फलानि भक्षत्वेनोक्तानि, तेषा मुत्पादको यदुम्बरो ऽस्ति, एषः 'ऊर्जः' रसात्, अन्नाद्याच्च वनस्पतिरूपो ऽजायत। 'एतद्' उदुम्बरफलं वनस्पतीनां मध्ये 'भौज्यं वै' भोजनार्हं मेव। 'तत्' तेनौदुम्बरभक्षेण अस्मिन् क्षत्रे 'ऊर्ज्जं मेव' रस मेव तथान्नाद्यं वनस्पतीनां मध्ये भोजनयोग्यं द्रव्य मवस्थापयति॥

अश्वत्थफलानि प्रशंसति— "अथ यदाश्वत्थानि, तेजसो वा एष वनस्पतिरजायत यदश्वत्थः; साम्राज्यं वा एतद् वनस्पतीनां, तेज एवास्मिंस्तत्साम्राज्यञ्च वनस्पतीनां क्षत्रे दधाति"—इति। 'अथ' औदुम्बरप्रशंसानन्तरम्, अश्वत्थफलानि प्रशस्यन्ते। यान्यश्वत्थफलानि सन्ति, तेषां जनको यो ऽश्वत्थः, एष वनस्पतिः तेजस एवोदपद्यत। 'एतद्' अश्वत्थफलं वनस्पतीनां सम्बन्धि साम्राज्यस्वरूप मेव; 'तत्' तेन अश्वत्थफलभक्षेण तेज एव वनस्पतीनां साम्राज्यञ्च अस्मिन् क्षत्रे स्थापयति॥

प्लक्षफलानि प्रशंसति— "अथ यत् प्लाक्षाणि, यशसो वा एष वनस्पतिरजायत यत् प्लक्षः; स्वाराज्यञ्च ह वा एतद् वैराज्यञ्च वनस्पतीनां, यश एवास्मिंस्तत् स्वाराज्यवैराज्ये च वनस्पतीनां क्षत्रे दधाति"—इति। 'अथ' अश्वत्थप्रशंसानन्तरम्, यानि प्लक्षफलानि विद्यन्ते, तानि प्रशस्यन्ते। योऽयं प्लक्षोऽस्ति, एष वनस्पतिः यशस एवोत्पन्नः। 'एतत्' प्लक्षफलं वनस्पतीनां सम्बन्धि स्वाराज्यवैराज्यरूपम्। स्वातन्त्र्येण राजत्वं 'स्वाराज्यं', विशेषेण राजत्वं 'वैराज्यम्'। 'तत्' तेन प्लक्षफलेन 'अस्मिन्' क्षत्रे यशश्च स्वाराज्यवैराज्ये च सम्पादयति॥

भक्षद्रव्यं प्रशस्य तस्य प्रयोग माह— "एतान्यस्य पुरस्तादुपक्लृप्तानि भवन्त्यथ सोमं राजानं क्रीणन्ति; ते राज्ञ एवाहतोपवसथात्प्रतिवेशैश्चरन्त्यथौपवसथ्य महरेतान्यध्वर्युः पुरस्तादुपकल्पयेताधिषवणं चर्माधिषवणे फलके द्रोणकलशं दशापवित्र मद्रीन् पूतभृतं चाधवनीयञ्च स्थाली मुदञ्चनं चमसञ्च; तद्यदेतद् राजानं प्रातरभिषुण्वन्ति, तदेनानि द्वेधा विगृह्णीयादभ्यन्यानि सुनुयान्, माध्यन्दिनायान्यानि परिशिंष्यात्"—इति। 'एतानि' न्यग्रोधा-

वरोधादीनि 'अस्य' राज्ञोऽर्थे सोमक्रयात् पूर्वम् 'उपक्लृप्तानि' सम्पादितानि भवन्ति । तत ऊर्द्ध्वं सोमक्रयः । ततः 'ते' अध्वर्युप्रभृतयः 'राज्ञ एवावृता' सोमस्यैव प्रकारेण उपवसथदिनात् पूर्वं 'प्रतिवेशैः' प्रसिद्धैः क्रियाविशेषैः * 'चरन्ति' अनुतिष्ठेयुः । 'अथ' अनन्तरम्, औपवसथ्य महः । औपवसथ्ये ऽहनि अध्वर्युः 'पुरस्तात्' प्रथमं 'एतानि' वक्ष्यमाणानि चर्मादीनि 'उपकल्पयेत' सम्पादयेत् । यस्मिंश्चर्मणि सोमो ऽभिषूयते, तत् चर्माधिषवणाख्यम् † । ययोः फलकयोरभिषूयते, ते फलके अधिषवणसञ्ज्ञके ‡ । द्रोणकलशं प्रौढं दारुपात्रम् § । दशापवित्रं वस्त्रम् ‖ । अद्रयो ऽभिषे-

---

* "प्रतिवेशं पचेयुः । तस्याश्नीयात् । गृहमेध्येव भवति । नास्य यज्ञो व्यृध्यते" –इति तै० ब्रा० १. ६. ७. १ । प्रातिस्विकत्वेन पर्वौं विशतीति प्रतिवेशः पर्वार्थ ओदनः ; तं दक्षिणाग्नौ पक्तारः पचेयुः'–इत्यादि तद्भाष्यम् (तै० सं० १. ८. ४.) । "दक्षिणाग्नौ पत्न्याः प्रतिवेश मोदनं पचति"–इति आप० श्रौ० ८. १०. १० । "प्रतिवेशा अपि पचन्ते" –इति च तत्रैव ८. ११. ११ । इह तु महानसपाचका प्रतिवेशा विवक्षिताः ।

† "अधिषवणं परिकृत्तं भवति"–इत्यादि शत० ब्रा० ३. ५. ३. २२ । 'अधि उपरि सोमः सूयत इत्यधिषवणम् । सर्वरोहित मिति वचनाद्द गोचर्म'–इत्यादि का० श्रौ० ८. ५. २६ टी० । नाभिप्रमाणा अरत्निमात्राङ्गी मुञ्जरज्जुव्यूता औदुम्बरी मञ्चिका आसन्दीत्युच्यते । तस्या मासन्द्यां अधिषवणफलकयोरुपरि प्राग्ग्रीव मुत्तरलोम यत् चर्म आस्तृणाति, तदेवाधिषवणाख्यम् । अस्मिन्नेवास्तीर्णे चर्मणि वासोवद्ध मेव सोमं स्थापयति । तदेतत् कात्या० श्रौ० ७. ९. २७—३० सूत्रेषु स्पष्टम् ।

‡ उपरवाणा मुपरि अस्थूलान् प्रागग्रानुदगग्रान् वा दर्भानास्तीर्यं अधिषवणफलके उपदधाति । अधि उपरि सूयते सोमो ययोः, ते । ते च वारणे प्रादेशपरिमितस्थूले अरत्निपरमितदीर्घे भवतः । तदेवमादिकं वर्णनं कात्या० श्रौ० ८. ५. २५ सू० टी० द्रष्टव्यम् । "अथाधिषवणे फलके उपदधाति"–इत्यादि च शत० ब्रा० ३. ४. ५. २२ ।

§ "द्रोणकलशः—द्रुममयः कलशाकारो वैकङ्कतः ; यस्योपरि धाराग्रहा गृह्यन्ते" –इत्यादि का० श्रौ० ८.७.५. या० दे० । धाराग्रहाणां परिचयस्तूक्तपूर्वः (२भा० २पृ०) ।

‖ जीवन्मेषाणां श्वेतरोमग्रथितसूत्रनिर्मिते सोमरसपावनार्थे ऊर्णापवित्रे द्वे भवतः ।

चणार्थो ग्रावाणः * । पूतभृदाधवनीयौ पात्रविशेषौ † । स्थाली कुम्भः ‡ । उदञ्चनम् उन्नयनपात्रम् § । चमसो भक्षार्थं दारुपात्रम् ‖ । एतान्यध्वर्युः सम्पाद्य, तत ऊर्द्ध्वं 'यद्' यदा 'एतत्' एतं राजानं प्रातःकाले अभिषुण्वन्ति, 'तत्' तदानीम् 'एनानि' न्यग्रोधावरोधादीनि द्वेधा विभजेत् । तत्र 'अन्यानि' एकभाग-

---

तत्रैकं यजमानस्यारत्निमात्रम्, तदेव द्रोणकलशे स्थाप्यते ; अथापरं प्रादेशमात्रम्, तदेव परिप्लवायां युज्यते । तदेतद् द्वितीय मूर्णापवित्रं भवत्युभयतोदश मिति दशापवित्रं चोच्यते । का० श्रौ० ९. २. १६, १७ द्रष्टव्यम् ।

* "अथ ग्राव्ण उपावहरति"—इत्यादि शत० ब्रा० ३. ५. ४. २४ । "तस्मिन् ग्राव्णः पञ्च, वैष्णवाः स्थेति (वा० सं० ५. २५.)"—इति कात्या० श्रौ० ८. ५. २८ ।

† पूतभृद्-आधवनीयौ— पूतं सोमं बिभर्त्तीति पूतभृत् । एतत्संज्ञकः पृथुमुखो महाकलशो भवति । आधवनीयश्च तद्रूप एव ; आधूयते प्रचाल्यते सोमोऽस्मिन्नित्येव तत्र प्रकृतिप्रत्ययगतोऽर्थविशेषः (का० श्रौ० ९. २. २०.) । यज्ञे यद्यपि आधवनीयकुम्भस्यैव प्राथम्यम्, तथापि 'अल्पाच्तरं (पूर्वम्)'—इति शब्दानुशासनाद् (पा० सू० २.२.३४,) द्वन्द्वे तस्य परप्रयोगः पूतभृदाधवनीयाविति ।

‡ स्थाल्यश्चतस्रः— 'आग्रयणोक्थ्यादित्यध्रुवाणाम्'—इति का० श्रौ० ९. २. १४ सूत्रव्याख्यायां याज्ञिकदेवः ।

§ उदञ्चनौ— पूतभृताधवनीययोः कुम्भयोः सोमोदकग्रहणसाधनपात्रभूतौ जलभाण्डविशेषौ । का० श्रौ० ९.२.२१ ; ९.६.१५ ; १०.५.१. भाष्याणि द्रष्टव्यानि । 'उदङ्कोऽनुदके'—इति पा० सू० ३. ३. १२३ । 'घृतोदङ्कश्चर्ममयं भाण्डम् । अनुदके किम् ? उदकोदञ्चनः'—इति तत्र दीक्षितः (सि० कौ०) ।

‖ दश चमसाः— सोमपानपात्राणि । 'चमसो देवपानः'—इति ऋ०सं०१०.१६.८ । 'औदुम्बरेण चमसेन चतुःस्रक्तिना'—इति शत० ब्रा० ७.२.११.२ । 'दश चमसान्त्सवन्तानधः'—इति का० श्रौ० ९.२.२२ । 'त्सरुमतः'—इति च मानवसूत्रम् । तथाच मुष्टियुक्तानि । न्यग्रोधरोहितकपर्णान्यतमकाष्ठनिर्मितानि । होतुः, ब्रह्मणः, उद्गातुः, सुन्वतः, प्रशास्तुः, ब्राह्मणाच्छंसिनः, पोतुः, नेष्टुः, आग्नीध्रस्य, अच्छावाकस्येति दश । कात्या० श्रौ० (९.९.२५ ; १२.१३.) भाष्यं द्रष्टव्यम् ।

गतानि 'तस्मिन्' प्रातस्सवने अभिषुणुयात्, इतरभागगतानि तु माध्यन्दिनसवनाय स्थापयेत् ॥ ६ (३२) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां पञ्चमाध्याये
(पञ्चत्रिंशाध्याये) षष्ठः खण्डः ॥ ६ (३२) ॥

॥ अथ सप्तमः खण्डः ॥

तद्यच्चैतां*श्चमसानुन्नयेयुस्तदेतं यजमानचमस मुन्नयेत् तस्मिन् द्व दर्भतरुणके प्रास्ते† स्यातां तयोर्वषट्कृते ऽन्तःपरिधि पूर्वं प्रास्येद् दधिक्रावणो अकारिष मित्येतयर्चा सस्वाहा‡कारयानुवषट्कृते परमा दधिक्राः शवसा पञ्चकृष्टीरिति तद्यच्चैतांश्चमसानाहरेयुस्तदेतं यजमानचमस माहरेत् तान्यच्चोद्गृह्णीयुस्तदेन मुपोद्गृह्णीयात् तद्यदेळां होतोपह्वयेत यदा चमसं भक्षयेदथैन मेतया भक्षयेद् यदत्र शिष्टं रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः। इदं तदस्य मनसा शिवेन सोमं राजान मिह भक्ष-

---

* "तद्यत् वैतां"—इति क। † "प्राप्ते"—इति ग।

‡ "सः स्वाहा०"—इति क, "सह स्वाहा०"—इति ग।

यामीति॑ शिवो ह वा अस्मा एष वानस्पत्यः॑ शिवेन मनसा भक्षितो भवत्यु॑ग्रं हास्य राष्ट्र मव्यथ्यं भवति॑ य एव मेतं भक्षं भक्षयति॑ क्षत्रियो यजमानः॑ शन्न एधि हृदे पीतः॑ प्र ण आयुर्जीवसे सोम तारीरि॑त्यात्मनः प्रत्यभिमर्श॑ ईश्वरो ह वा एषो ऽप्रत्यभिमृष्टो॑ मनुष्यस्यायुः प्रत्यवहर्त्तो॑रनर्हन् मा भक्षयतीति॑ तद् यदेतेनात्मान मभिमृशत्या॑युरेव तत्म तिरत॑ आ प्यायस्व समेतु ते॑ सं ते पयांसि स मु यन्तु वाजा इति॑ चमस माप्याययत्यभिरूपाभ्यां॑ यद् यज्ञे ऽभिरूपं तत् समृद्धम्॑ ॥ ७ (३३) ॥

अथास्य फलचमसस्य* उन्नयनादिप्रयोगं दर्शयति— “तद्यत्रैतांश्चमसानुन्नयेयुस्तदेतं यजमानचमस मुन्नयेत्; तस्मिन् द्वे दर्भतरुणके प्रास्ते स्यातां, तयोर्वषट्कृतेऽन्तःपरिधि पूर्वं प्रास्येद्, दधिक्रावणो अकारिष मित्येतयर्चा सस्वाहाकारयानुवषट्कृते ऽपर मा दधिक्राः शवसा पञ्चकृष्टीरिति”–इति । तत ऊर्द्ध्वं ‘यत्र’ यदा ‘एतान्’ ब्रह्महोत्रादिचमसान् दशसङ्ख्याकानुन्नयेयुः, ‘तत्’ तदानीं ‘यजमानस्य’ राज्ञश्चमसम् ‘उन्नयेत्’ अभिषुतेन न्यग्रोधादिना पूरयेत् । ‘तस्मिन्’ पूरिते चमसे ऽल्पं दर्भद्वयं प्रक्षिप्य तयोर्मध्ये प्रथमप्रक्षिप्तं दर्भं ‘वषट्कृते’ वषट्कारे कृते सति “दधिक्रावणः”–

---

* न्यग्रोधफलान्यङ्कुरांश्चाहृत्य सम्पिष्य चूर्णयित्वा दध्ना मिश्रणं कृत्वा राजन्यवैश्ययोरन्यतरस्य यजमानस्य भक्षणाय चमसनामपात्रे रक्षितो भवति, स एव यजमानचमसः फलचमस इत्युच्यते, तच्च इतरान् सोमचमसाननु उन्नेयो भवति । कात्या० श्रौ० १०, ९, ३०—३२ सूत्रेषु द्रष्टव्यम् ।

इत्येतयर्चा स्वाहाकारसहितया परिधीना मन्तः प्रक्षिपेत्। 'अनुवषट्कृते' अनुवषट्कारे कृते सत्यपरं दर्भम् "आ दधिक्राः"–इत्यनयर्चा पूर्ववत् स्वाहाकारसहितया परिधीना मन्तः प्रक्षिपेत् * ॥

अथास्य फलचमसस्य भक्षणं विधत्ते— "तद्यत्रैतांश्चमसानाहरेयुस्तदेतं यजमानचमस माहरेत्; तान्यत्रोद्गृह्णीयुस्तदेन मुपोद्गृह्णीयात्; तद्यदेळां होतोपह्वयेत, यदा चमसं भक्षयेदथैन मेतया भक्षयेद्"–इति। ततो होमादूर्द्ध्वं 'यत्र' यदा 'एतान्' होत्रादीनां चमसान् ऋत्विज आहरेयुः, 'तद्' तदानीम् एतं 'यजमानस्य' राज्ञश्चमस माहरेत्। 'तान्' आहृतान् होत्रादिचमसान् 'यत्र' यदा 'उद्गृह्णीयुः' भक्षणार्थं मूर्द्ध्वं धारयेयुः, 'तत्' तदानीम् 'एतं' यजमानस्य राज्ञश्चमसम् 'उपोद्गृह्णीयात्' ऊर्द्ध्वं धारयेत्। तत ऊर्द्ध्वं यदा होतेळा मुपह्वयेत, उपहूय च स्वकीयं चमसं यदा भक्षयेत्, 'अथ' तदानीम् 'एनं' यजमानचमसम् 'एतया' वक्ष्यमाणयर्चा राजा भक्षयेत्॥

ता मृचं पठति— "यदत्र शिष्टं रसिनः सुतस्य, यदिन्द्रो अपिबच्छचीभिः। इदं तदस्य मनसा शिवेन, सोमं राजान मिह भक्षयामीति"–इति। 'रसिनः' रसयुक्तस्य 'सुतस्य' अभिषुतस्य अवरोधादिद्रव्यस्य 'अत्र' पात्रे 'यच्छिष्टं' योऽवशिष्टो भागः, 'यत्' च पात्रस्थं द्रव्य मिन्द्रः 'शचीभिः' कर्मविशेषैः संस्कृत मपिबत्। शचीशब्दः कर्मनामसु पठितः †। 'अस्य' द्रव्यस्य सम्बन्धि

---

* "इतरेषु सोमचमसेषु हूयमानेषु एनं फलचमसं चमसाध्वर्युरेव कुशतरुणेन चमसाद् गृहीत्वा जुहोति"–इति कात्या० श्रौ० १०. ९. ३२ सू० टी०।

† निघण्टौ वाङ्नामसु (१. ११.) ४९ , कर्मनामसु (२. १.) २२ , प्रज्ञानामसु च (३. ९. ८) ।

'तदिदं” शिष्टं 'शिवेन' भक्तियुक्ततया मङ्गलेन मनसा 'इह' कर्मणि 'सोमं राजानं' सोमराजरूपं भावयित्वा भक्षयामि ॥

तदिदं समन्त्रकभक्षणं प्रशंसति— "शिवो ह वा अस्मा एष वानस्पत्यः, शिवेन मनसा भक्षितो भवत्युग्रं ह्यास्य राष्ट्र मव्यथ्यं भवति, य एव मेतं भक्षं भक्षयति क्षत्रियो यजमानः"–इति । 'यः' क्षत्रियो यजमानः, 'एवम्' उक्तेन प्रकारेण 'एतं' फलचमसरूपं भक्षं भक्षयति, 'अस्मै' यजमानाय एष 'वानस्पत्यः' भक्षः 'शिवो ह वै' मङ्गलो हितकारी भूत्वा 'शिवेन मनसा' भक्तियुक्तेन मङ्गलेन मनसा भक्षितो भवति । 'अस्य' राज्ञो राष्ट्रम् 'उग्रम्' शत्रूणा मभिभवनायोग्ररूपं भूत्वा केनापि 'अव्यथ्य” व्यथयितु मशक्यं भवति । भयं चलनं वा कदाचिदपि नास्य राष्ट्रस्य भवतीत्यर्थः ॥

भक्षणादूर्ध्वं मन्त्रेण आत्मस्पर्शं विधत्ते— "शन्न एधि हृदे पीतः, प्र ण आयुर्जीवसे सोम तारीरित्यात्मनः प्रत्यभिमर्शः"– इति । हे 'सोम' सोमस्थानीयावरोधादिभक्ष ! अस्माभिः पीतः सन् 'नः' अस्माकं हृदये 'श मेधि' सुखहेतुर्भव । 'जीवसे' चिरजीवनाय 'नः' अस्माक मायुः 'प्रतारीः' प्रकर्षेण सम्पादय । 'इति' अनेन मन्त्रेण 'आत्मनः' स्वकीयहृदयस्य 'प्रत्यभिमर्शः' हस्तेन सम्पूर्णः स्पर्शः कर्त्तव्यः ॥

अथान्वयव्यतिरेकाभ्या मभिमर्शं प्रशंसति— "ईश्वरो ह वा एषो ऽप्रत्यभिमृष्टो मनुष्यस्यायुः प्रत्यवहर्त्तोरनर्हन्मा भक्षयतीति; तद्यदेतेनात्मान मभिमृशत्यायुरेव तत्प्र तिरते"–इति । 'एषः' अवरोधादिभक्षः 'अप्रत्यभिमृष्टः' मन्त्रपूर्वकात्मस्पर्शरहितः सन् 'मनुष्यस्य' राज्ञः आयुः 'प्रत्यवहर्त्तोः' विनाशयितु मीश्वरः समर्थो

भवति। केनाभिप्रायेणेति, सोऽभिधीयते— 'अनर्हन्' भक्षयितुमयोग्यः सन् मां भक्षयतीति तस्य भक्षस्याभिप्रायः। सोऽयं व्यतिरेकः, तद्यदित्यादिरन्वयः। 'तत्' तदा भक्षणादूर्द्ध्वं यथा 'एतेन' अत्र इत्यादिमन्त्रेणाभिमृशति, 'तत्' तेनाभिमर्शनेनायुरेव 'प्रतिरते' प्रकर्षेण वर्द्धयति ॥

द्वाभ्या मृग्भ्यां तस्य चमसस्य पूरणं विधत्ते— "आ प्यायस्व समेतु ते (ऋ० सं० १.९१.१६.), सं ते पयांसि स मु यन्तु वाजा इति (ऋ० सं० १. ९१. १८.) चमस माप्याययत्यभिरूपाभ्यां; यद्यज्ञे ऽभिरूपं तत्समृद्धम्"-इति। प्रथमाया मृचा प्यायस्वेति श्रवणाद्, द्वितीयस्यास्तृतीयपादे चाप्यायमान इति श्रवणादिदं मन्त्रद्वय माप्यायनस्य 'अभिरूपम्' अनुकूलम्। यज्ञे 'यद्' अङ्गम् 'अभिरूपम्' अनुकूलं क्रियते, 'तद्' अङ्गं 'समृद्धं' सम्पूर्णं भवति ॥ ७ (३२) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां पञ्चमाध्याये
(पञ्चत्रिंशाध्याये) सप्तमः खण्डः ॥ ७ (३२) ॥

॥ अथ अष्टमः खण्डः ॥

तद्यच्चैतांश्चमसान्त्सादयेयु॑स्तदेतं यजमानचमसं सादयेत्ता॑न्यत्र प्रकल्पयेयु॑स्तदेन मनु प्रकल्पये᳚दथैन माहृतं भक्षयेन्न॑राशंसपीतस्य॑ देव सोम

ते मतिविद्द॑ ऊमैः पितृभिर्भक्षितस्य भक्षयामीति॑ प्रातस्सवने नाराशंसो भक्ष॑ ऊर्वैरिति माध्यन्दिने॑ काव्यैरिति तृतीयसवन॑ ऊमा वै पितरः प्रातस्सवन॑ ऊर्वा माध्यन्दिने॑ काव्यास्तृतीयसवने॑ तद्देतत् पितॄनेवामृता॑न्त्सवनभाजः करोति॑ सर्वो हैव सो ऽमृत इति ह स्मा॑ह प्रियव्रतः सोमापो॑ यः कश्च सवनभागित्य॑मृता ह वा अस्य पितरः॑ सवनभाजो भवन्त्यु॑ग्रं हास्य राष्ट्र मव्यथ्यं भवति॑ य एव मेतं भक्षं भक्षयति॑ क्षत्रियो यजमानः॑ समान आत्मनः प्रत्यभिमर्शः॑ समान माप्यायनं चमसस्य॑ प्रातस्सवनस्यैवावृता॑ प्रातस्सवने चरेयु॑र्माध्यन्दिनस्य माध्यन्दिने॑ तृतीयसवनस्य तृतीयसवने॑ त मेव मेतं भक्षं प्रोवाच॑ रामो मार्गवेयो॑ विश्वन्तराय सौषद्मनाय॑ तस्मिन् होवाच प्रोक्ते॑ सहस्र मु ह ब्राह्मण तुभ्यं दद्मः॑ सश्यापर्ण* उ मे यज्ञ† इ॑त्येत मु हैव प्रोवाच॑ तुरः कावषेयो॑ जनमेजयाय पारिक्षिता॑यैत मु हैव प्रोचतुः॑ पर्वतनारदौ॑ सोमकाय साहदेव्याय॑ सहदेवाय सार्ञ्जयाय॑‡ बभ्रवे दैवावृधाय॑ भीमाय वैदर्भाय॑ नग्नजिते

---

* "सः श्यापर्ण"—इति ङ । † "यज"—इति ग ।

‡ "सार्जयाय"—इति क, "साँर्जयाय"—इति ख, "सांर्ज्जयाय"—इति ग, "साञ्जयाय"—इति च, "सार्ज्जयाय"—इति न, ञ ।

गान्धारायैत॑ मु हैव प्रोवाचा॑ग्निः सनश्रुतायारिन्द-माय॑ क्रतुविदे जानकय॑ एत मु हैव प्रोवाच॑ वसिष्ठः सुदासे पैजवनाय॑ ते ह ते सर्वँ एव महज्जग्मु॑रेतं भक्षं भक्षयित्वा॑ सर्वैं हैव महाराजा आसु॑रादित्य इव ह स्म श्रियां॑ प्रतिष्ठितास्तपन्ति॑ सर्वाभ्यो दिग्भ्यो बलि मावहन्त॑ आदित्य इव ह वै श्रियां॑ प्रतिष्ठितस्तपति॑ सर्वाभ्यो दिग्भ्यो बलि मावहत्यु॑ग्रं हास्य राष्ट्र मव्यथ्यं भवति॑ य एव मेतं भक्षं भक्षयति॑ क्षत्रियो यजमानो यजमानः॑ ॥ ८ (३४) ॥

॥इत्यैतरेयब्राह्मणे सप्तमपञ्चिकायां पञ्चमोऽध्यायः॥५॥

भक्षिताप्यायितस्य नाराशंससञ्ज्ञस्य चमसस्य* प्रयोगं विधत्ते—"तद्यत्रैतांश्चमसान्त्सादयेयुस्तदेतं यजमानचमसं सादयेत्; तान्यत्र प्रकम्पयेयुस्तदेन मनु प्रकम्पयेदथैन माहृतं भक्षयेन्नराशंसपीतस्य देव सोम ते मतिविद ऊमैः पितृभिर्भक्षितस्य भक्षयामीति प्रातस्सवने नाराशंसो भक्ष, ऊर्वैरिति माध्यन्दिने, काव्यैरिति तृतीयसवने"–इति। 'तत्' तस्मादाप्यायनात् ऊर्द्ध्वं 'यत्र' यदा 'एतान्' होत्रादीनां चमसानाप्यायितान् सादयेयुः, तदानी मेतं 'यजमानस्य' राज्ञश्चमसं सादयेत्। 'तान्' होत्रादीनां चमसान् यदा प्रकम्पयेयुः, तदैव 'एनम्' राजचमस मनु प्रकम्पयेत्। 'अथ'

---

* "आप्यायितांश्चमसान् सादयन्ति, ते नराशंसा भवन्ति"–इति आश्व० श्रौ० ४. ५. ६. २०। 'हुतशिष्टा भक्षिता आप्यायिताश्चमसा नाराशंसाः'–इति सा० भा० (ता० ब्रा० १७. ११; तै० ब्रा० २. ७.)।

अनन्तर मेतं चमसं भक्षणार्थं माहृतं नराशंसेत्यादिमन्त्रेण भक्षयेत्। हे सोमसदृश फलचमस देव! 'नराशंसपीतस्य' नरा मनुष्या ऋभुप्रमुखाः शस्यन्ते यस्मिन् सवनविशेषे सोऽयं नराशंसः, तत्र देवैः पीतस्य, ऊमनामभिः पितृभिश्च भक्षितस्य, 'मतिविदः' अस्मदभिप्रायाभिज्ञस्य ते भक्षयामि 'इति' अनेन मन्त्रेण प्रातस्सवने नराशंसचमससम्बन्धी भक्षः कर्त्तव्यः। इतरयोस्तु सवनयोस्तस्मिन् मन्त्रे 'ऊमैरिति' अस्य पदस्य स्थाने 'ऊर्वैः'–'काव्यैः'–इति पदद्वयं क्रमेण पठनीयम् ॥

त्रिविधं मन्त्रतात्पर्यं दर्शयति— "ऊमा वै पितरः प्रातस्सवन, ऊर्वा माध्यन्दिने, काव्यास्तृतीयसवने, तदेतत् पितॄनेवामृतान्त्सवनभाजः करोति"–इति। ऊमा, ऊर्वाः, काव्याः,–इत्येते सवनत्रयगताः पितृविशेषाः; अतस्तच्छब्दप्रयोगेण तान् पितॄन् सवनभाजः करोति। पितरश्च द्विविधाः; मृता अमृताश्च। इदानीं मनुष्याः सन्तो मरणादूर्ध्वं पितृलोकं प्राप्ताः 'मृताः', सृष्टिमारभ्य पितृलोके ऽवस्थिताः 'अमृताः'; ऊमादयस्तथाविधत्वादमृतशब्देन विशेष्यते ॥

अथ मन्त्रतात्पर्ये मतान्तरं दर्शयति— "सर्वो हैव सो ऽमृत इति ह स्माह प्रियव्रतः सोमापो यः कश्च सवनभागिति"–इति। न केवल मूमादय एव पितरः प्रसिद्धा अमृताः, किन्तु यः कोऽपि पीत्वा सवनभाग् भवति; स सर्वोऽप्यूमादिशब्दैरुपलक्षितत्वादमृत एव भवतीति* 'सोमापः' सोमपः प्रियव्रताख्यो महर्षिराह स्म ॥

इदानीं नराशंसचमसभक्षं प्रशंसति— "अमृता ह वा अस्य

---

* तथाहि— "भक्षयित्वाऽपाम सोमं ममृता अभूम, शन्नो भव हृद आपीत इन्दविति मुखहृदये अभिमृशेरम्"–इति आश्व० श्रौ० ५, ६, २६।

पितरः सवनभाजो भवन्त्युग्रं हास्य राष्ट्र मव्यथ्यं भवति , य एव मेतं भक्षं भक्षयति क्षत्रियो यजमानः"–इति । 'अस्य' राज्ञो भक्षयितुः 'पितरः' पितृपितामहादयः सर्वेऽपि सवनभाजः सन्तः 'अमृताः' मरणरहिता देवा भवन्ति । उग्र मित्यादि पूर्ववत् (१५५पृ०) । अन्न इत्यादिमन्त्रेण स्वदेहस्पर्शनम्, आ प्यायस्वेतिमन्त्रद्वयेन (१५६पृ०) चमसपूरणञ्च ॥

प्रातस्सवने यदुक्तं तदुत्तरयोः सवनयोरतिदिशति— "समान आत्मनः प्रत्यभिमर्शः, समान माप्यायनं चमसस्य"–इति ॥

फलचमसे विद्यमानं प्रयोगविशेष मभिधाय अवशिष्टं सोमचमसगतं प्रयोगं सवनत्रयेऽप्यतिदिशति— "प्रातस्सवनस्यैवावृता प्रातस्सवने चरेयुर्, माध्यन्दिनस्य माध्यन्दिने, तृतीयसवनस्य तृतीयसवने"–इति । सोमविषयस्य प्रातस्सवनस्यैव 'आवृता' प्रकारेण फलचमसविषयप्रातस्सवने 'चरेयुः' अनुतिष्ठेयुः । एव मितरत्रापि योज्यम् ॥

उक्तं फलचमसभक्ष मुपसंहरति— "त मेव मेतं भक्षं प्रोवाच रामो मार्गवेयो विश्वन्तराय सौषद्मनाय"–इति ।

अथ विश्वन्तरस्य वाक्यं दर्शयति— "तस्मिन् होवाच प्रोक्ते सहस्र मु ह ब्राह्मण तुभ्यं दद्मः सश्यापर्ण उ मे यज्ञ इति"–इति । 'तस्मिन्' राजभक्षे रामेण 'प्रोक्ते' सति स राजा रामं प्रत्येव मुवाच— हे 'ब्राह्मण' राम ! तुभ्यं वयं 'सहस्र मु ह' गवां सहस्रं सम्पूर्णं दद्मः । पुरा मे यज्ञो विश्यापर्णं आसीत् *, इदानीं तु 'सश्यापर्णः' एवास्तु ; भवदीयाः श्यापर्णनामकाः सर्वे ब्राह्मणाः अस्मिन् यज्ञे वसन्त्विति ॥

---

* तदुक्तं पुरस्तात्— "विश्यापर्णं यज्ञ माजह्रे"–इति १३१ पृ० ।

इदानीं सम्प्रदायकथनेन भक्षं प्रशंसति— "एत मु हैव प्रोवाच तुरः कावषेयो जनमेजयाय पारिक्षिताय; एत मु हैव प्रोचतुः पर्वतनारदौ सोमकाय साहदेव्याय, सहदेवाय सार्ञ्जयाय, बभ्रवे दैवावृधाय, भीमाय वैदर्भाय, नग्नजिते गान्धाराय; एत मु हैव प्रोवाचाग्निः सनश्रुतायारिन्दमाय, क्रतुविदे जानकये; एत मु हैव प्रोवाच वसिष्ठः सुदासे पैजनवाय; ते ह ते सर्वं एव महज्जग्मुरेतं भक्षं भक्षयित्वा सर्वे हैव महाराजा आसुरादित्य इव ह स्म श्रियां प्रतिष्ठितास्तपन्ति, सर्वाभ्यो दिग्भ्यो बलि मावहन्ते"— इति। 'एतं' पूर्वोक्त मेव भक्षं कवषस्य पुत्रस्तुरो नाम महर्षिः, परिक्षित्पुत्राय जनमेजयसञ्ज्ञकाय प्रोवाच। अय मेकः सम्प्रदायः। तथैव 'एतं' भक्षं पर्वतनारदाख्यावृषी सहदेवस्य पुत्राय सोमकाय प्रोचतुः। सोमकश्चान्यस्मै सहदेवाय प्रोवाच। सहदेवश्च सार्ञ्जयाय प्रोवाच। सार्ञ्जयश्च बभ्रवे प्रोवाच। बभ्रुश्च दैवावृधाय प्रोवाच। दैवावृधश्च भीमाय प्रोवाच। भीमश्च वैदर्भाय प्रोवाच। वैदर्भश्च नग्नजिते प्रोवाच। नग्नजिच्च गान्धाराय प्रोवाच। अयं द्वितीयः सम्प्रदायः। तथा 'एतम्' एव भक्ष मग्निनामको महर्षिः सनश्रुताय प्रोवाच। सनश्रुतश्चारिन्दमाय प्रोवाच। अरिन्दमश्च क्रतुविदे प्रोवाच। क्रतुविच्च जानकये प्रोवाच। अयं तृतीयः सम्प्रदायः। अथ 'एतम्' एव भक्षं वसिष्ठो महर्षिः सुदासे महर्षये प्रोवाच। सुष्ठु धनं दासतीति सुदाः, अथवा सुष्ठु शत्रून् दस्यत्युपक्षयतीति सुदाः। स च पैजवनाय प्रोवाच। यद्वा* सहदेवाय सार्ञ्जयायेत्यादिषु वाक्येषु सहदेवादिनाम्नां सार्ञ्जयादि-

---

* सुदाएव पैजवनोऽन्यत्र प्रसिद्धः। तथाहि— ऋ० सं० ७.१८.२२-२५ ऋक्षु 'सुदासः पैजवनस्य'-इति। "विश्वामित्र ऋषिः सुदासः पैजवनस्य पुरोहितः"-इत्यादिर्निरुक्तग्रन्थश्च

पदानि विशेषणतया योज्यानि। द्वितीयस्तच्छब्द एतच्छब्दार्थः। 'ते ह' एते तुरादयः पैजवनान्ताः सर्व एव पुरुषाः 'एतं' फलचमसभक्षं भक्षयित्वा 'महज्जग्मुः' महत्त्वं प्राप्ताः। महत्त्वस्यैव सर्वे हेत्यादिकं विवरणम्। सर्वेऽप्येते 'महाराजाः' सार्वभौमाः आसुः। यथा ह्यादित्यो द्युलोके प्रतिष्ठितस्तपति, एव मेते 'श्रियां' गजाश्वादिकायां सम्पदि प्रतिष्ठिताः सन्तः 'तपन्ति' शत्रूणां तापं कुर्वन्ति। तथा 'सर्वाभ्यो दिग्भ्यः' सर्वदिगवस्थितेभ्यो राजभ्यः सकाशाद् 'बलि मावहन्ते' कर माददानाः स्वामिनो भवन्ति॥

नराशंसभक्षं पुनरपि फलकथनेन प्रशंसति— "आदित्य इव ह वै श्रियां प्रतिष्ठितस्तपति, सर्वाभ्यो दिग्भ्यो बलि मावहत्युग्रं हास्य राष्ट्र मव्यथ्यं भवति य एव मेतं भक्षं भक्षयति क्षत्रियो यजमानो यजमानः"–इति। पूर्ववद् व्याख्येयम्। अभ्यासोऽध्यायसमाप्त्यर्थः॥ ८ (३४)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां पञ्चमाध्याये
(पञ्चत्रिंशाध्याये) अष्टमः खण्डः॥ ८ (३४)॥

(२.७.२.)। अत एव पूर्वोक्तस्य 'सहदेवश्च साञ्जंकाय'–इत्यादि व्याख्यानस्यायुक्तत्व मनुभूय सुयुक्तं व्याख्यानं वक्तुं प्रक्रमते यद्वेति। सहदेवस्य सृञ्जयापत्यत्वेन साञ्जंयत्वम्, नग्नजितश्च गन्धारदेशवासित्वेन गान्धारत्वं शतपथे प्रसिद्धम् (२. ४. ४. ४ ; ८. १. ४. १०.)। एव मन्येष्वपि तत्तद्विशेषणनिदानान्यन्वेष्टव्यानि।

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'–नामभाष्ये ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायाः पञ्चमोऽध्यायः ॥

अथातः पशोरेकः(१) । तदाहुर्य आहिताग्निरेकादश(२) । हरिश्चन्द्रः षट्(३) । प्रजापतिर्यज्ञमष्टौ(४) । विश्वन्तरोऽष्टौ(५) ॥ ७ * ॥

अथातः पशोस्, तदाहुर्यद्दर्शपूर्णमासयोर्, अथात इष्टापूर्त्तस्य, तेषां यश्चमसानां चत्वारि॥७†॥

॥ इति सप्तमपञ्चिका समाप्ता ॥

---

* १, ९, ५९, १०३, १३१ पृ० (१—११—६—८—८=३४ ख०) ।

† १, ४७, ११०, १४४ पृ० (१०—१०—१०—४=३४ख० । १भा० २३९पृ० द्र० ।

॥ ऐतरेयब्राह्मणम् ॥

॥ अथाष्टमपञ्चिका ॥

(तत्र)

॥ प्रथमाध्यायस्य प्रथमः खण्डः ॥

॥ ॐ ॥ अथात * स्तुतशस्त्रयोरेवैकाहिकं प्रातस्सवन मैकाहिकं तृतीयसवन मेते वै शान्ते क्लृप्ते प्रतिष्ठिते सवने यदैकाहिके शान्त्यै क्लृप्त्यै प्रतिष्ठित्या अप्रच्युत्या उक्तो माध्यन्दिनः पवमानो य उभयसाम्नो बृहत्पृष्ठस्योभे हि सामनी क्रियेते आ त्वा रथं यथोतय इदं वसो सुत मन्ध इति राथन्तरी प्रतिपद् राथन्तरो ऽनुचरः पवमानोक्थं वा एतद् यन्मरुत्वतीयं पवमाने वा अत्र रथन्तरं कुर्वन्ति बृहत्पृष्ठं सवीवधतायै तदिदं रथन्तरं स्तुत माभ्यां प्रतिपदनुचराभ्या मनुशंसत्यथो ब्रह्म वै रथन्तरं क्षत्रं बृहद् ब्रह्म खलु वै क्षत्रात् पूर्वं ब्रह्मपुरस्तान् म उग्रं राष्ट्र मव्यथ्य मसदित्यथान्नं वै रथन्तर मन्न मेवास्मै तत् पुरस्तात् कल्पयत्यथेयं वै पृथिवी रथन्तर मियं खलु वै

---

* "अथातः"—इति सविसर्गः क, ज।

प्रतिष्ठा॑ प्रतिष्ठा मेवास्मै तत् पुरस्तात् कल्पयन्ति॑ समान इन्द्रनिहवो ऽविभक्तः॑ सो ऽह्ना मुद्वान् ब्राह्मणस्पत्य॑ उभयसाम्नो रूप॑ मुभे हि सामनी क्रियेते॑ समान्यो धाय्या अविभक्तास्ता॑ अह्ना मैकाहिको मरुत्वतीयः प्रगाथः॑ ॥ १ ॥

॥ श्रीगणेशाय नमः ॥

फलाख्यचमसो भक्षो राज्ञो यज्ञे प्रकीर्त्तितः ।
उच्यते राजयज्ञेऽस्मिन् विशेषः स्तोत्रशस्त्रयोः ॥

तदेतत् प्रतिजानीते— "अथात स्तुतशस्त्रयोरेव"–इति । 'अथ' राज्ञो यज्ञे भक्षविशेषकथनानन्तरम्, यतः स्तुतशस्त्रयोर्विशेषो जिज्ञासितः, 'अतः' कारणात् तयोरेव, विशेष उच्यत इति शेषः ॥

तं विशेषं वक्तु मादौ विशेषरहित मंशं दर्शयति— "ऐकाहिकं प्रातस्सवन मैकाहिकं तृतीयसवन मेते वै शान्ते क्लृप्ते प्रतिष्ठिते सवने यदैकाहिके, शान्त्यै क्लृप्त्यै प्रतिष्ठित्या अप्रच्युत्यै"–इति । एकाहे प्रकृतिरूपे * यत् प्रातस्सवनं यच्च तृतीयसवन मुक्तम्†, तदुभयं राज्ञो विकृतावपि तथैव प्रयोक्तव्यम्; न तु तयोः कश्चिद् विशेषोऽस्ति । ऐकाहिके ये उभे प्रातस्सवन–तृतीयसवने, ते 'एते' एव 'शान्ते' सुखकरे 'क्लृप्ते' स्वभ्यस्ते 'प्रतिष्ठिते' सम्पन्ने; अतस्तयोः प्रकृतिवदनुष्ठानं 'शान्त्यै' सुखार्थं, 'क्लृप्त्यै' स्वभ्यासार्थं, 'प्रतिष्ठित्यै' सम्पत्त्यर्थम्, 'अप्रच्युत्यै' विनाशराहित्यार्थं च भवति ॥

---

* ३भा० २४८पृ० द्र० ।

† १भा० ३६३पृ०—२भा० ५०पृ०, २भा० ११५—१८०पृ० द्र० ।

यथा प्रातस्सवन–तृतीयसवनयोः प्राकृताद् विशेषो नास्ति, तथा माध्यन्दिनसवनेऽपि मरुत्वतीय मैकाहिकं होत्रकशस्त्राणि चैकाहिकानि *; स्तोत्रे तु विशेषोऽस्ति, त मिमं दर्शयति— "उक्तो माध्यन्दिनः पवमानो य उभयसाम्नो बृहत्पृष्ठस्योभे हि सामनी क्रियेते"–इति। बृहद्रथन्तरं चेत्युभयविधं साम यस्मिन् अभिजिदादौ सोऽय मुभयसामा; बृहत्साम पृष्ठस्तोत्रं यस्मिन् अभिजिदादौ सोऽयं 'बृहत्पृष्ठः'। तादृशस्य 'उभयसाम्नो बृहत्पृष्ठस्य' अभिजिदादेर्यो माध्यन्दिनः पवमान उक्तः †, स एवात्र राजयज्ञे माध्यन्दिनः पवमानो द्रष्टव्यः। न चोभयसामत्वं बृहत्पृष्ठत्वं चोभयं व्याहत मिति शङ्कनीयम्; माध्यन्दिनपवमानस्तोत्रे रथन्तरं साम, पृष्ठस्तोत्रे बृहत्सामेत्येव मुभयसामत्वस्य व्यवस्थितत्वात्। 'उभे हि'–इत्यनेनेय मेव व्यवस्था स्पष्टीक्रियते॥

(यद्यपि मरुत्वतीयशस्त्रावयवाः प्रतिपदादयः प्राकृता एव, तथापि तदनुवादेनात्र प्रशंसा क्रियते ‡) तत्र प्रतिपदनुचरौ दर्शयति— "आ त्वा रथं यथोतय, इदं वसो सुत मन्ध इति राथन्तरी प्रतिपद्, राथन्तरो ऽनुचरः; पवमानोक्थं वा एतद् यन् मरुत्वतीयम्; पवमाने वा अत्र रथन्तरं कुर्वन्ति, बृहत्पृष्ठं, सवीवधतायै; तदिदं रथन्तरं स्तुत माभ्यां प्रतिपदनुचराभ्या मनुशंसति"–इति। "आ त्वा रथम्"–इति (ऋ० सं० ८. ६८. १.) यस्तृचः, सोऽयं मरुत्वतीयशस्त्रस्य प्रतिपत् §। अस्मिंस्तृचे रथन्तरं साम उद्गातृभिर्गीयते, तस्मादियं प्रतिपद् 'राथन्तरी'। "इदं वसो सुतम्"–इत्ययं (ऋ० सं० ८.२.१.)

---

* २भा० ५१—११४पृ० द्र०।

† २भा० ६१पृ० द्र०।

‡ वक्ष्यमाणचिह्नान्तर्गतग्रन्थो ख–पुस्तके नास्ति।

§ २भा० ६५,६६पृ० द्र०।

तृचो ऽनुचरः ; छन्दोदेवतादिना पूर्वेण समानत्वात् *। रथन्तरसामाधारस्य पूर्वस्य तृचस्य अनुसारित्वादस्यापि रथन्तरत्वम् । यत् मरुत्वतीयं शस्त्र मस्ति, एतत् 'पवमानोक्थं वै' पवमानस्तोत्रानुसारेण शस्यमानत्वात् । 'उक्थं' शस्त्रम्, तद् द्विविधं पवमानोक्थं ग्रहोक्थञ्च; अतोऽत्र पवमानोक्थ मिति विशेष्यते । अस्मिंश्च माध्यन्दिनपवमानस्तोत्रे सामगा रथन्तरं साम कुर्वन्ति, पृष्ठस्तोत्रन्तु बृहत्सामोपेतं कुर्वन्ति, तदेतदुभयं 'सवीवधतायै' सम्पद्यते । उभयतः शिक्यद्वयेन जलकुम्भद्वयं वोढुं यः काष्ठविशेषः पुरुषाणा मंसे ध्रियते, स वीवध इत्युच्यते । सामद्वयोपेतस्य माध्यन्दिनसवनप्रयोगस्य वीवधसदृशत्वाद् वीवधेन सह वर्त्तत इति सवीवधत्वम् †। यदि रथन्तरं साम माध्यन्दिने पवमाने स्तुतम्, तदिदम् 'आभ्याम्' "आ त्वा रथम्"– "इदं वसो सुतम्"–इत्येताभ्यां प्रतिपदनुचराभ्या मनुशंसेत् ॥

ब्रह्मान्नपृथिवीरूपत्वेन रथन्तरं प्रशंसति— "अथो ब्रह्म वै रथन्तरं, क्षत्रं बृहद्; ब्रह्म खलु वै क्षत्रात् पूर्वं, ब्रह्मपुरस्तान् म उग्रं राष्ट्र मव्यथ्य मसदित्यथान्नं वै रथन्तर मन्न मेवास्मै तत् पुरस्तात् कल्पयत्यथेयं वै पृथिवी रथन्तर मियं खलु वै प्रतिष्ठा, प्रतिष्ठा मेवास्मै तत् पुरस्तात् कल्पयति"–इति । यद् 'रथन्तरं' साम, तद् ब्राह्मणजातिस्वरूपम्; उभयोः प्रजापतिमुखजत्वात् ।

---

* २भा० ६७पृ० द्र० ।

† 'विवधवीवधशब्दौ उभयतोबद्धशिक्ये स्कन्धवाह्ये काष्ठे वर्त्तते'–इति सि० कौ० (पा० ४.४.१७ सू०) । ता० ब्रा० ४.५.१९ ; १४.१.१० । आश्व० गृ० १.१२.२ । विवध इति ह्रस्वादिपाठस्तैत्तिरीयाणाम् ७.३.५.४ ; ७.६ । विवध इति पवर्गमध्यपाठोऽपि क्वाचित्कः ।

तथा 'बृहत्'साम-क्षत्रियजात्योः प्रजापतिबाहुजत्वसाम्यादेकत्वम्। ब्राह्मणजातिः क्षत्रियजातेः पूर्वभाविनी, अतो बृहत्सामसाध्यात् पृष्ठस्तोत्रात् पूर्वं रथन्तरसामसाध्यस्य पवमानस्तोत्रस्य अनुष्ठानेऽय मभिप्रायः। 'ब्रह्म' ब्राह्मणजातिः 'पुरस्तात्' पूर्वकाले यस्य राष्ट्रस्य, तदिदं 'ब्रह्मपुरस्तात्' 'मे' राज्ञो राष्ट्रम् उग्र मव्यथ्यम् 'असद्' भवेदित्यभिप्रायः *। किञ्च अन्नहेतुत्वाद् 'रथन्तरं' साम अन्नात्मकम्; 'तत्' तेन रथन्तरप्रयोगेण 'अस्मै' राज्ञे अन्न मेव 'पुरस्तात् कल्पयति' प्रथमतः सम्पादयति। किञ्चेदं 'रथन्तरं' साम 'इयं पृथिवी' भूमिस्वरूप मेव; इयञ्च भूमिः प्राणिनां 'प्रतिष्ठा' आधारः; 'तत्' तेन रथन्तरप्रयोगेण 'अस्मै' यजमानाय राज्ञे प्रतिष्ठा मेव कल्पयति ॥

"इन्द्र नेदीय एदिहि"—"उत्तिष्ठ ब्रह्मणस्पते"—इत्येतं प्रगाथद्वयं (ऋ० सं० ८. ५३. ५, ६; १. ४०. १०२.) प्रशंसति—"समान इन्द्रनिहवोऽविभक्तः; सोऽह्ना मुद्वान्, ब्राह्मणस्पत्य उभयसाम्नो रूप मुभे हि सामनी क्रियेते"—इति। इन्द्रो नितरा माह्वयते यस्मिन् प्रगाथे, सोऽत्र च प्रकृतौ च 'समानः' एक एव। तस्यैवेदं व्याख्यानम् 'अविभक्तः'—इति, अविकृत इत्यर्थः †। 'सः' च प्रगाथः 'अह्नां', रूप मिति शेषः। अहःप्रयोगस्य निष्पादकत्वात् तद्रूपत्वम्। यः प्रगाथः 'उद्वान्' उच्छब्दवान् 'ब्राह्मणस्पत्यः' ब्रह्मणस्पतिदेवताकश्च; "उत्तिष्ट ब्रह्मणस्पते"—इत्येवं श्रुतत्वात्। सोऽपि प्रशंसनीयः। किञ्चासौ प्रगाथ उभयसाम्नो रूपम्; 'हि' यस्मात् 'उभे' बृहद्-रथन्तरे सामनी, तस्मिन् प्रगाथे सामगैर्गीयेते ‡ ॥

---

* ता० ब्रा० ११. १. २—४ द्र०। † २भा० ६७—७६पृ० द्र०।

‡ 'सामगैरभिधीयते'—इति ख।

धाय्याना मृचां प्रकृतौ विकृतौ चैकत्व माह—"समान्यो धाय्या अविभक्तास्ता अह्नाम्"-इति । 'समान्यः'-इत्यस्य व्याख्यानम् 'अविभक्ताः'-इति । ताश्चाहर्विशेषनिष्पादकत्वात् तत्स्वरूपाः * ॥

"प्र व इन्द्राय बृहते"-इत्यस्य (ऋ० सं० ८. ८९. ३, ४.) मरुत्वतीयप्रगाथस्य प्रकृतिविकृत्योरेकत्वं दर्शयति— "ऐकाहिको मरुत्वतीयः प्रगाथः"-इति † ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां प्रथमाध्याये
(षट्त्रिंशाध्याये) प्रथमः खण्डः ॥ १ ॥

॥ अथ द्वितीयः खण्डः ॥

जनिष्ठा उग्रः सहसे तुरायेति सूक्त॑ मुग्रवत् सहस्वत्त॑त् क्षत्रस्य रूपं॑ मन्द्र ओजिष्ठ इत्योजस्व॑त्तत्क्षत्रस्य रूपं॑ बहुलाभिमान इत्य॑भिवदभिभूत्यै रूपं॑ तदेकादशर्चं भव॑त्येकादशाक्षरा वै त्रिष्टुप्॑ त्रैष्टुभो वै राजन्य॑ ओजो वा इन्द्रियं॑ वीर्यं त्रिष्टु॑बोजः क्षत्रं वीर्यं राजन्यस्त॑देन मोजसा क्षत्रेण वीर्येण समर्द्धयति॑ तद्गौरिवीतं भव॑त्येतद्वै मरुत्वतीयं॑ समृद्धं यद्गौरिवीतं॑

---

* २भा० ७६-८२पृ० द्र० ।

† २भा० ८३पृ० द्र० ।

तस्योक्तं ब्राह्मणं॑ त्वा मिद्धि हवामह इति॑ बृहत्पृष्ठं भवति॑ क्षत्रं वै बृहत्॑ क्षत्रेणैव तत् क्षत्रं समर्द्धयत्य॑थो क्षत्रं वै बृहदात्मा॑ यजमानस्य निष्केवल्यं तद्यद् बृहत्पृष्ठं भवति॑ क्षत्रं वै बृहत्॑ क्षत्रेणैवैनं तत्समर्द्धयत्य॑थो ज्यैष्ठ्यं वै बृह॑ज्ज्यैष्ठ्येनैवैनं तत्समर्द्धयत्य॑थो श्रैष्ठ्यं वै बृह॑च्छ्रैष्ठ्येनैवैनं तत्समर्द्धयत्य॑भि त्वा शूर नोनुम इति॑ रथन्तर मनुरूपं कुर्वन्त्य॑यं वै लोको रथन्तर॑ मसौ लोको बृहद॑स्य वै लोकस्या॑सौ लोको ऽनुरूपो॑ ऽमुष्य लोकस्यायं लोकोऽनुरूपस्त॑द्यद् रथन्तर मनुरूपं कुर्व॑न्त्युभावेव तल्लोकौ॑ यजमानाय सम्भोगिनौ कुर्वन्त्य॑थो ब्रह्म वै रथन्तरं॑ क्षत्रं बृहद्॑ ब्रह्मणि खलु वै क्षत्रं प्रतिष्ठितं॑ क्षत्रे ब्रह्मा॑थो साम्न एव सयोनितायै॑ यद्वावानेति धाय्या॑ तस्या उक्तं ब्राह्मणं॑ मुभयं शृणवच्चन इति सामप्रगाथ॑ उभयसाम्नो रूपं॑ मुभे हि सामनी क्रियेते ॥ २ ॥

मरुत्वतीये शस्त्रे निविद्धानीयं सूक्तं प्रशंसति— "जनिष्ठा उग्रः सहसे तुरायेति सूक्त मुग्रवत्सहस्वत्तत्क्षत्रस्य रूपं, मन्द्र ओजिष्ठ इत्योजस्वत्तत् क्षत्रस्य रूपं, बहुलाभिमान इत्यभिवदभिभूत्यै रूपं; तदेकादशर्चं भवत्येकादशाक्षरा वै त्रिष्टुप्, त्रैष्टुभो वै राजन्य, ओजो वा इन्द्रियं वीर्यं त्रिष्टुबोजः क्षत्रं वीर्यं राजन्यस्तदेन मोजसा क्षत्रेण वीर्येण समर्द्धयति; तद्गौरिवीतं भवत्येतद्वै मरुत्वतीयं

समृद्धं यद्गौरिवीतं; तस्योक्तं ब्राह्मणम्"-इति । "जनिष्ठाः"-इत्यस्मिन् पादे * उग्रशब्द सहःशब्दयोर्विद्यमानत्वात् तदेतत् सूक्तम् 'उग्रवत्सहस्वत्'। तच्चोभयं क्षत्रियजातेः स्वरूपम्; क्षत्रियोऽपि क्रूरो बलवांश्च। द्वितीयपादस्य * पूर्वभागे "मन्द्र ओजिष्ठः" -इतिश्रुतत्वात् सूक्तम् 'ओजस्वत्' ओजःशब्दोपेतम् । ओजो नाम बलहेतुरष्टमो धातुः; तस्य च धातोः क्षत्रिये सम्पूर्णत्वाद् ओजःशब्दोपेतं सूक्तं क्षत्रियस्य स्वरूपम् । तदुत्तरभागे * "बहुलाभिमानः"-इतिश्रुतत्वात् 'अभिवत्' अभिशब्दोपेतम् । तच्च 'अभिभूत्यै' शत्रूणा मभिभवस्य स्वरूपम्। किञ्च 'तत्' सूक्त मेकादशर्चं भवति †, त्रिष्टुप् चैकादशाक्षराः, राजन्यश्च त्रिष्टुप्सम्बन्धी; तयोरुभयोः प्रजापतिबाहुजत्वात् । किञ्चेयं त्रिष्टुबोजःप्रभृतीनां हेतुत्वात् तत्स्वरूपम् । ओजो बलहेतुरष्टमो धातुः, वीर्यं शरीरादिबलम्, इन्द्रियं चक्षुरादिपाटवम्; राजन्यश्चौजःप्रभृतीनां स्वरूपभूतः । तत्रौजः पूर्व मेवोक्तम्, 'क्षत्रं' क्षत्रियजातियुक्तत्वम्, 'वीर्यं' शरीरादिबलम् । एवञ्च राजयज्ञे 'तत्' तेन त्रिष्टुप्छन्दस्कसूक्तपाठेन 'एनं' राजानं ओजःक्षत्रवीर्यैः समृद्धं करोति । किञ्च 'एतत्' सूक्तं गौरिवीत्याख्येन महर्षिणा दृष्टत्वात् गौरीवीताख्यं भवति ‡ । यस्मादेतद् गौरिवीतं, तस्मात् 'एतत्' मरुत्वतीयं शस्त्रं 'समृद्धं' सम्पूर्णं भवति । 'तस्य' च गौरिवीतनाम्नः सूक्तस्य 'ब्राह्मणं' "तद्वा एतद् यजमानजननम्"-इत्यादिना पूर्व मेवोक्तम् § ॥

---

* सोऽयमर्द्धर्चः— "जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः"-इति ।

† ऋ० सं० १०. ७३. १—११ ऋचः । ‡ २भा० ८४पृ० १७पं० द्र० ।

§ ३प० २अ० ८ख०—२भा० ८२पृ० १०पं० द्र० ।

अथ निष्केवल्यशस्त्र माह — "त्वा मिद्धि हवामह इति बृहत्पृष्ठं भवति ; क्षत्रं वै बृहत्, क्षत्रेणैव तत् क्षत्रं समर्द्धयत्यथो क्षत्रं वै बृहदात्मा यजमानस्य निष्केवल्यं ; तद्यद् बृहत्पृष्ठं भवति, क्षत्रं वै बृहत्, क्षत्रेणैवैनं तत्समर्द्धयत्यथो ज्यैष्ठ्यं वै बृहज्ज्यैष्ठ्येनैवैनं तत्समर्द्धयत्यथो श्रैष्ठ्यं वै बृहच्छ्रैष्ठ्येनैवैनं तत्समर्द्धयति"–इति । "त्वा मिद्धि"–इत्यादिकस्तृचो निष्केवल्यशस्त्रस्य स्तोत्रियप्रतिपद्रूपः, बृहत्साम्न आधारत्वाद् बृहद्रूपः, तेन च साम्ना पृष्ठस्तोत्रस्य निष्पाद्यत्वात् पृष्ठस्वरूपश्च भवति । "त्वा मिद्धि"–इत्यस्या ऋच्युत्पन्नं बृहत्साम 'क्षत्रं वै' क्षत्रियजातिरूप मेव ; अतः 'क्षत्रेणैव' त्वा मिद्धीति तृचरूपेण 'तत्' क्षत्रं यजमानरूपं समृद्धं करोति । 'अथो' अपि चोक्तरीत्या क्षत्र मेव बृहद्रूपं निष्केवल्यशस्त्रं च यजमानस्य 'आत्मा' देहभूतः ; 'तत्' तथा सति 'यद्' यदि बृहत्पृष्ठशब्दद्वयवाच्यं त्वा मिद्धीत्यादिकं निष्केवल्यं भवेत्, 'तत्' तेन निष्केवल्येन, क्षत्रं वै बृहदिति पूर्व मुक्तत्वात् 'क्षत्रेणैव' त्वा मिद्धीत्यादिना बृहद्रूपेण निष्केवल्येनैव 'एनं' यजमानं समृद्धं करोति । 'अथो' अपि च त्वा मिद्धीत्यादिकं बृहद्रूपं 'ज्यैष्ठ्यं वै' वयोवृद्धेः स्वरूपम्, अतो 'ज्यैष्ठ्येनैव, वयोवृद्ध्यैव 'एनं' राजानं समृद्धं करोति । 'अथो' अपि च त्वा मिद्धीत्यादिकं बृहद्रूपं 'श्रैष्ठ्यं वै' गुणोत्कर्ष एव ; तथा सति 'श्रैष्ठ्येनैव ' गुणोत्कर्षेणैव यजमानं समृद्धं करोति ॥

निष्केवल्यशस्त्रस्य प्रतिपद मुक्त्वा अनुरूप माह— "अभि त्वा शूर नोनुम इति रथन्तर मनुरूपं कुर्वन्त्ययं वै लोको रथन्तर मसौ लोको बृहदस्य वै लोकस्यासौ लोको ऽनुरूपो ऽमुष्य लोकस्यायं लोको ऽनुरूपस्तद्यद् रथन्तर मनुरूपं कुर्वन्त्युभावेव तल्लोकौ

यजमानाय सम्भोगिनौ कुर्वन्त्यथो ब्रह्म वै रथन्तरं, क्षत्रं बृहद्; ब्रह्मणि खलु वै क्षत्रं प्रतिष्ठितं, क्षत्रे ब्रह्माथो साम्न एव सयोनितायै"–इति। "अभि त्वा शूर"–इत्येतं तृचं निष्केवल्यशस्त्रस्यानुरूपं कुर्युः *। यद्यपि त्वा मिद्ध्यभि त्वेत्येतौ प्रगाथौ ऋग्द्वयात्मकौ, तथापि प्रग्रथनेन तृचत्वं सम्पाद्य प्रतिपदनुचरत्वं द्रष्टव्यम्। अभि त्वेत्ययं तृचो रथन्तरसाम्न आधारत्वाद् रथन्तर मित्युच्यते। बृहद्रथन्तरशब्दाभ्यां विवक्षितं त्वा मिद्ध्यभि त्वेति तृचद्वयं मिलित्वा प्रशस्यते। भूलोको रथन्तरस्वरूपः, स्वर्गलोको बृहत्स्वरूपः; तावेतौ लोकौ परस्परानुरूपौ; अस्मिंल्लोके दत्तेन हविषा देवाः स्वर्गे जीवन्ति, स्वर्गादागतया वृष्ट्या मनुष्या जीवन्ति, तदेतत् परस्पर मनुरूपत्वम्। एवं सति बृहद्रथन्तररूपाभ्यां प्रतिपदनुचराभ्या मुभावेव लोकौ यजमानार्थं समीचीनभोगयुक्तौ कुर्वन्ति। 'अथो' अपि च प्रजापतिमुखजत्वसाम्येन रथन्तरस्य ब्राह्मणरूपत्वात्, तदीयबाहुजत्वसाम्येन बृहतः क्षत्रियरूपत्वाच्च † बृहद्रथन्तराभिधानयोस्तृचयोरनुष्ठानेन ब्रह्मक्षत्रयोः परस्परा प्रतिष्ठा भवति। 'अथो' अपि च तृचद्वयानुष्ठानं निष्केवल्यशस्त्रस्य तृचद्वयाश्रितसाम्नश्च 'सयोनितायै' समानस्थानत्वाय सम्पद्यते॥

धाय्यां दर्शयति— "यद्वावानेति (सं०१०.७४.६) धाय्या; तस्या उक्तं ब्राह्मणम्'–इति। 'तस्याः' धाय्यायाः प्रशंसारूपं 'ब्राह्मणं' "तं देवा अब्रुवंस्त्वं वा अवोचथाः"–इत्यादिना पूर्व मेवोक्तम् ‡॥

---

* 'इत्येष तृचः निष्केवल्यस्यानुरूपः कार्यः'–इति ख।

† १भा० १९पृ० ५पं०, २०३पृ० १२पं०—तै०सं०७. १. १. ४।

‡ ३प० २अ० १० ख०—२भा० ८४पृ० ६पं० द्र०।

सामाधारभूतं प्रगाथं दर्शयति— "उभयं शृणवच्चन इति सामप्रगाथ उभयसाम्नो रूप मुभे हि सामनी क्रियेते"–इति । उभय मित्यादिप्रगाथो बृहद्रथन्तरसामद्वयस्य स्वरूपम् ; यस्मादेते उभयसामनी तस्मिन् प्रगाथे सामगैर्गीयेते, तस्मात् तद्रूपत्वं युक्तम् * ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां प्रथमाध्याये
(षट्त्रिंशाध्याये) द्वितीयः खण्डः ॥ २ ॥

॥ अथ तृतीयः खण्डः ॥

त मु ष्टुहि यो अभिभूत्योजा इति सूक्त मभिवदभिभूत्यै रूप मषाळ्ह मुग्रं सहमान माभिरित्युग्रवत् सहमानवत् तत्क्षत्रस्य रूपं तत्पञ्चदशर्चं भवत्योजो वा इन्द्रियं वीर्यं पञ्चदश ओजः क्षत्रं वीर्यं राजन्यस्तदेन मोजसा क्षत्रेण वीर्येण समर्द्धयति तद्भारद्वाजं भवति भारद्वाजं वै बृहदार्षेयेण सलोमैष ह वाव क्षत्रिययज्ञः समृद्धो यो बृहत्पृष्ठस्तस्माद् यत्र क्व च क्षत्रियो यजेत बृहदेव तत्र पृष्ठं स्यात् तत् समृद्धम् ॥ ३ ॥

---

* २भा० १०४—११३पृ० द्र० ।

निष्केवल्यशस्त्रे निविद्धानीयसूक्तं दर्शयति— "त मु ष्टुहि यो अभिभूत्योजा इति (सं० ६.१८.१–१५.) सूक्त मभिवदभिभूत्यै रूपम्"–इति । 'अभिवत्' अभिशब्दोपेतं सूक्तम् । तस्माद् 'अभिभूत्यै' शत्रूणा मभिभवस्य स्वरूपम् [*] ॥

तस्या ऋचः तृतीयपाद मनूद्य प्रशंसति— "अषाळ्हमुग्रं सहमान माभिरित्युग्रवत्, सहमानवत्, तत् क्षत्रस्य रूपम्"–इति । उग्रशब्द–सहमानशब्द–युक्त मिदं सूक्तम्; तच्च शब्दद्वयवाच्यं क्षत्रियजातेः स्वरूपम्; क्षत्रियो ह्युग्रो भूत्वा शत्रून् अभिभवति ॥

तत्सूक्तगता ऋक्सङ्ख्यां प्रशंसति— "तत् पञ्चदशर्चं भवत्योजो वा इन्द्रियं वीर्यं पञ्चदश, ओजः क्षत्रं वीर्यं राजन्यस्तदेन मोजसा क्षत्रेण वीर्येण समर्द्धयति"–इति । पूर्वोक्तत्रिष्टुप्-प्रशंसावाक्यवत् (१७१ पृ०) इदं पञ्चदशस्तोमप्रशंसावाक्यं व्याख्येयम् [†] ॥

ऋषिद्वारा सूक्तं प्रशंसति— "तद्भारद्वाजं भवति; भारद्वाजं वै बृहदार्षेयेण सलोमा"–इति । भरद्वाजेन दृष्टत्वादिदं सूक्तं 'भारद्वाजम्', 'बृहत्' सामापि तथा भारद्वाजम् । तादृशबृहद्योगादयं क्रतुः 'आर्षेयेण सलोमा' आर्षेयो भरद्वाजमुनिसम्बन्धः, लोमशब्देन केशयुक्तो मूर्द्धोपलक्ष्यते; 'सलोमा' सशिरस्कः, सम्पूर्णं इत्यर्थः । भरद्वाज-मुनिदृष्टस्य बृहतः सम्पूर्णत्वाद् बृहद्द्वारा मुनिसम्बन्धे [‡] सति क्रतोरपि सम्पूर्णत्वं द्रष्टव्यम् ॥

इदानीं बृहद्रथन्तरसामोपेतप्रकृतयज्ञक्रतुसमृद्धि [§] मुपजीव्यैक-

---

[*] प्रकृतौ तु इन्द्रस्य नू वीर्यं मिति विहितम् (२भा० ११३पृ०) द्र० ।

[†] "पिबा सोमं त मु ष्टुहीति मध्यन्दिनः, तयोरैकाहिके पुरस्तादन्ये वा शंसेयुः"–इति आश्व० श्रौ० ८. ५. ४, ५ ।

[‡] 'सम्पूर्णत्वाद् भरद्वाजमुनिसम्बन्धे'–इति ख । [§] '०क्रतुसम्बन्ध'–इति ख ।

सामकेऽपि क्षत्रिययज्ञे पृष्ठस्तोत्रस्य बृहत्सामसाध्यत्वं विधत्ते— “एष ह वाव क्षत्रिययज्ञः समृद्धो यो बृहत्पृष्ठस्तस्माद् यत्र क्व च क्षत्रियो यजेत, बृहदेव तत्र पृष्ठं स्यात्, तत् समृद्धम्”— इति। ‘यः’ क्रतुः द्विसामकत्वेन * बृहत्पृष्ठोपेतः, एष एव क्षत्रिययज्ञः ‘समृद्धः’ सम्पूर्णः। यस्मादेवं, तस्माद् ‘यत्र क्व च’ एकसामकेन अपि क्रतुना क्षत्रियो यजेत, तत्र पृष्ठस्तोत्रं बृहत्सामयुक्तमेव कुर्यात्। ‘तत्’ एतदनुष्ठानं ‘समृद्धं’ सम्पूर्णं भवति ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां प्रथमाध्याये
(षट्त्रिंशाध्याये) तृतीयः खण्डः ॥ ३ ॥

॥ अथ चतुर्थः खण्डः ॥

ऐकाहिका होत्रा। एता वै शान्ताः क्लृप्ताः। प्रतिष्ठिता होत्रा। यदैकाहिकाः। शान्त्यै क्लृप्त्यै। प्रतिष्ठित्या अप्रच्युत्यै। ताः सर्वरूपा भवन्ति। सर्वसमृद्धाः सर्वरूपतायै। सर्वसमृद्ध्यै। सर्वरूपाभिर्होत्राभिः। सर्वसमृद्धाभिः। सर्वान् कामानवाप्नवामेति। तस्माद् यत्र क्व चैकाहा। असर्वस्तोमा असर्वपृष्ठा। ऐकाहिका एव। तत्र होत्राः†

---

* ‘द्विसामकौ’—इति ख।

† “होत्रा”—इति निर्विसर्गपाठः ग, ङ। एवमुत्तरत्रापि यण्परे सकारे।

स्युस्तत्समृद्ध मुक्थ्य एवायं पञ्चदशः स्यादित्याहुरोजो वा इन्द्रियं वीर्यं पञ्चदश ओजः क्षत्रं वीर्यं राजन्यस्तदेन मोजसा क्षत्रेण वीर्येण समर्द्धयति तस्य त्रिंशत्स्तुतशस्त्राणि भवन्ति त्रिंशदक्षरा वै विराड् विराळन्नाद्यं विराज्येवैनं तदन्नाद्ये प्रतिष्ठापयति तस्मात् तदुक्थ्यः पञ्चदशः स्यादित्याहुर्ज्योतिष्टोम एवाग्निष्टोमः स्याद् ब्रह्म वै स्तोमानां त्रिवृत् क्षत्रं पञ्चदशो ब्रह्म खलु वै क्षत्रात् पूर्वं ब्रह्म पुरस्तान् म उग्र राष्ट्र मव्यथ्य मसदिति विशः सप्तदशः शौद्रो वर्ण एकविंशो विशञ्चैवास्मै तच्छौद्रञ्च वर्ण मनुवर्त्मानौ कुर्वन्त्यथो तेजो वै स्तोमानां त्रिवृद्वीर्यं पञ्चदशः प्रजातिः सप्तदशः प्रतिष्ठैकविंशस्तदेनं तेजसा वीर्येण प्रजात्या प्रतिष्ठयान्ततः समर्द्धयति तस्माज्ज्योतिष्टोमः स्यात् तस्य चतुर्विंशति स्तुतशस्त्राणि भवन्ति चतुर्विंशत्यर्द्धमासो वै संवत्सरः संवत्सरे कृत्स्न मन्नाद्यं कृत्स्न एवैनं तदन्नाद्ये प्रतिष्ठापयति तस्माज्ज्योतिष्टोम एवाग्निष्टोमः स्यादग्निष्टोमः स्यात् ॥ ४ ॥

॥ इत्यैतरेयब्राह्मणेऽष्टमपञ्चिकायां प्रथमोऽध्यायः॥ १ ॥

माध्यन्दिनसवने होतुः शस्त्रविशेष मभिधाय होत्रकाणां विशेषाभावं दर्शयति— "ऐकाहिका होत्रा ; एता वै शान्ताः क्लृप्ताः प्रतिष्ठिता होत्रा, यदैकाहिकाः शान्त्यै क्लृप्त्यै प्रतिष्ठित्या अप्रच्युत्यै ; ताः सर्वरूपा भवन्ति सर्वसमृद्धाः, सर्वरूपतायै सर्वसमृद्ध्यै, सर्वरूपाभिर्होत्राभिः सर्वसमृद्धाभिः, सर्वान् कामानवाप्नवामेति, तस्माद् यत्र क्व चैकाहा असर्वस्तोमा असर्वपृष्ठा ऐकाहिका एव तत्र होत्राः स्युस्तत्समृद्धम्"–इति। मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकानां याः क्रियास्ताः 'होत्राः' *, ताश्च 'ऐकाहिकाः' एकाहे प्रकृतिरूपे विहिता एवात्र विकृतिरूपे क्षत्रिययज्ञे कर्त्तव्याः। 'एताः' च होत्राः शान्तत्वादिगुणकाः। शान्तादिशब्दार्थाः पूर्ववद् (१६५पृ०) व्याख्येयाः। 'ताः' चैकाहिका होत्राः 'सर्वरूपाः सर्वसमृद्धाश्च भवन्ति' तत्तद्विकृतिषु होत्रकाणां ये ये विशेषा उक्ताः, तद्रूपत्वं सर्वरूपत्वम्; तत्तत्फलसमृद्धिः सर्वसमृद्धिः; एतच्चोभय मिन्द्राभिष्टवनेन क्षत्रियस्य प्रतिपादनसामर्थ्यात् सम्पद्यते। अतः 'सर्वरूपतायै' सर्वलोकप्राप्त्यर्थं, तत्र च सर्वभोगसमृद्ध्यर्थम्, उक्ता होत्रकाः सम्पद्यन्ते। ततः क्षत्रियाः पुरुषाः सर्वरूपाभिः सर्वसमृद्धाभिरैकाहिकाभिर्होत्राभिः सर्वान् कामानवाप्नवामेति अभिप्रायेण ऐकाहिकानुष्ठानं कुर्युः †। एकाहाश्च द्विविधाः,— सर्वस्तोम-सर्वपृष्ठाः, तद्विपरीताश्च। पृष्ठ्यषळहे प्रतिपादिताः त्रिवृत्-पञ्चदश-सप्तदश-एकविंश-त्रिणव-त्रयस्त्रिंशरूपाः षट्सङ्ख्याकाः सर्वे स्तोमाः। तस्मिन्नेव पृष्ठ्यषळहे रथन्तर-बृहद्-वैरूप-वैराज-शाक्वर-रैवतानि षट्सङ्ख्याकानि सर्व-

---

* ३भा० २४७पृ० १८पं०, २७७पृ० १७पं० द्र०।

† 'ऐकाहिकहौत्रानुष्ठानं'–इति ख।

पृष्ठानि *। तैः सर्वैः स्तोमैः पृष्ठैश्च युक्तेभ्य एकाहेभ्यो व्यतिरिक्ताः कतिपयस्तोमपृष्ठयुक्ता एकाहाः 'असर्वस्तोमा असर्वपृष्ठाः' च। यस्माद् ऐकाहिका होत्राः पूर्वोक्तरीत्या प्रशस्ताः, तस्मात् यत्र क्वापि असर्वस्तोमा असर्वपृष्ठाश्चैकाहा अनुष्ठीयन्ते, तत्र सर्वत्र ऐकाहिका एव होत्राः स्युः; न तु नूतनो विशेषः कश्चिदस्ति । 'तत्' तादृशं कर्म 'समृद्धं' फलेन सम्पूर्णम् ॥

अथ क्षत्रिययज्ञस्य संस्थाविशेषो निर्णेतव्यः, तदर्थ मादौ केषाञ्चित् पक्ष मुपन्यस्यति— "उक्थ्य एवायं पञ्चदशः स्यादित्याहुरोजो वा इन्द्रियं वीर्यं पञ्चदश, ओजः क्षत्रं वीर्यं राजन्यस्तदेन मोजसा क्षत्रेण वीर्येण समर्द्धयति"–इति । 'अयं' क्षत्रिययज्ञ उक्थ्यसंस्थ एव †; सर्वेष्वपि स्तोत्रेषु पञ्चदशस्तोम एव स्यादित्येव मेके ब्रह्मवादिन आहुः । ओजो वा इत्यादिकं पूर्ववद् (१७५पृ०) व्याख्येयम् ॥

उक्थ्ये स्तोत्रशस्त्रसङ्ख्यां प्रशंसति— "तस्य त्रिंशत् स्तुतशस्त्राणि भवन्ति ; त्रिंशदक्षरा वै विराड्, विराळन्नाद्यं विराज्येवैनं तदन्नाद्ये प्रतिष्ठापयति ; तस्मात् तदुक्थ्यः पञ्चदशः स्यादित्याहुः"–इति । 'तस्य' उक्थ्यस्य पञ्चदश स्तोत्राणि, पञ्चदश शस्त्राणि ‡ इत्येवं त्रिंशत् सङ्ख्या ; तथा सत्यक्षरद्वारा विराड्रूपत्वाद्, विराजश्चान्नसाधनत्वात् 'एनं' यजमानं विराट्साम्येन अन्नाद्ये प्रतिष्ठापयति, 'तस्मात्' एवं पञ्चदशस्तोत्रशस्त्रत्वात्

---

* २भा० ९६पृ० *, २९६— २९९पृ० द्र० ।

† उक्थ्यक्रतुप्रयोगः ३प० ५अ० (२भा० २१४—२४४पृ०) द्र० ।

‡ "पञ्चदशोक्थ्यस्य स्तोत्राणि पञ्चदश शस्त्राणि"–इति २भा० १९०पृ० । "पञ्चदश स्तोत्राणि पञ्चदश शस्त्राणि, स मासः"–इति ता० ब्रा० ४. २. ९ ।

'तदुक्थ्यः' स क्षत्रिययज्ञ उक्थ्यसंस्थः पञ्चदशस्तोमयुक्तः स्यात् । इत्येवं केचिदाहुः ॥

अथ स्वपक्ष माह— "ज्योतिष्टोम एवाग्निष्टोमः स्याद्"–इति । योऽयं क्षत्रियाणां ज्योतिष्टोमः, सोऽग्निष्टोमसंस्थ एव स्यात् ॥

तस्मिन्नग्निष्टोमे ये त्रिवृदादयश्चत्वारः स्तोमास्तान् ब्राह्मणादिवर्णचतुष्टयरूपेण तेजआदिगुणचतुष्टयरूपेण च प्रशंसति— "ब्रह्म वै स्तोमानां त्रिवृत्, क्षत्रं पञ्चदशो, ब्रह्म खलु वै क्षत्रात् पूर्वं, ब्रह्म पुरस्तान् म उग्रं राष्ट्र मव्यथ्य मसदिति; विशः सप्तदशः; शौद्रो वर्ण एकविंशो; विशञ्चैवास्मै तच्छौद्रं च वर्ण मनुवर्त्मानौ कुर्वन्त्यथो तेजो वै स्तोमानां त्रिवृद्, वीर्यं पञ्चदशः, प्रजातिः सप्तदशः, प्रतिष्ठैकविंशस्तदेनं तेजसा वीर्येण प्रजात्या प्रतिष्ठयान्ततः समर्द्धयति; तस्माज्ज्योतिष्टोमः स्यात्"–इति । प्रजापतेर्मुखबाहुमध्यदेहपादेभ्य उत्पत्तिसाम्यात् त्रिवृदादिस्तोमानां ब्राह्मणादिवर्णचतुष्टयरूपत्वम् *। तत्र ब्राह्मणपूर्वकं राष्ट्रं मदीय मुग्र मव्यथनीयं चास्त्वित्यभिप्रायेण क्षत्रियस्य त्रिवृत्–पञ्चदशौ क्रमेण अनुष्ठेयौ । सप्तदशैकविंशयोनुष्ठानेन वैश्यशूद्रौ वर्णौ क्षत्रियस्यानुगामिनौ कुर्वन्ति । त्रिविदादिस्तोमानां तेजोवीर्यप्रजननप्रतिष्ठासाधनत्वात् तत्तद्रूपत्वम् । तेषा मनुष्ठानेन 'एनं' क्षत्रियम् 'अन्ततः' यज्ञस्यान्ते तेजआदिभिः समृद्धं करोति । तस्मात् क्षत्रियस्य त्रिविदादिस्तोमचतुष्टयविशिष्टो ज्योतिष्टोमः स्यात् ॥

अग्निष्टोमसंस्थे तस्मिन् स्तोत्रशस्त्रसङ्ख्यां प्रशंसति— "तस्य चतुर्विंशति स्तुतशस्त्राणि भवन्ति; चतुर्विंशत्यर्द्धमासो वै संवत्सरः, संवत्सरे कृत्स्न मन्नाद्यं, कृत्स्न एवैनं तदन्नाद्ये प्रतिष्ठापयति;

---

* १भा० १९पृ० ५पं०, २०३पृ० १२पं०—तै० सं० ७, १, १, ४।

तस्माज्ज्योतिष्टोम एवाग्निष्टोमः स्यादग्निष्टोमः स्यात्"–इति। ‘तस्य’ अग्निष्टोमसंस्थस्य ज्योतिष्टोमस्य द्वादश स्तोत्राणि द्वादश शस्त्राणि, एवं चतुर्विंशतिसङ्ख्या; ततोऽर्द्धमासद्वारा संवत्सरत्वम्; संवत्सरे च हिः सस्यानां पच्यमानत्वादन्नाद्यं ‘कृत्स्नं’ सम्पूर्णं भवति*। तेन ‘एनं’ यजमानं सम्पूर्णे एव अन्नाद्ये प्रतिष्ठापयति। तस्मात् क्षत्रियस्य ज्योतिष्टोमो अग्निष्टोमसंस्थ एव स्यात्, न तूक्थ्यसंस्थः। अभ्यासोऽध्यायपरिसमाप्त्यर्थः † ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां प्रथमाध्याये
(षट्त्रिंशाध्याये) चतुर्थः खण्डः ॥ ४ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये ‘वेदार्थप्रकाश’–नामभाष्ये
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायाः प्रथमोऽध्यायः॥

---

* "चतुर्विंशतिरग्निष्टोमस्य स्तुतशस्त्राणि"–इति २प० ४अ०(२भा० १२१पृ०)। अपि ता० ब्रा० ४, २, १२ एव मेव।

† "अथ राजसूयाः (९, ३, १)"–इत्याद्याश्वलायनग्रन्थ इहालोच्यः।

॥ अथ द्वितीयाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

अथातः पुनरभिषिकस्यैव॑ सूयते ह वा अस्य क्षत्रं॑ यो दीक्षते क्षत्रियः सन्॑त्स यदा ऽवभृथादुदेत्या॑नूबन्ध्ययेष्ट्वोदवस्यत्य॑थैन मुदवसानीयायां संस्थितायां॑ पुनरभिषिञ्चति॑ तस्यैते पुरस्तादे॑व सम्भारा उपक्लृप्ता भवन्त्यौ॑दुम्बर्यासन्दी॑ तस्यै प्रादेशमात्राः पादाः स्युर॑रत्निमात्राणि शीर्षण्यानूच्यानि॑ मौञ्जं विवयनं॑ व्याघ्रचर्मास्तरण॑ मौदुम्बरश्चमस॑ उदुम्बरशाखा॑ तस्मिन्नेतस्मिंश्चमसे ऽष्टातयानि॑ निषुतानि भवन्ति॑ दधि मधु सर्पिरातपवर्ष्या आपः॑ शष्पाणि च तोक्मानि च सुरा दूर्वा॑ तद्यैषा दक्षिणा॑ स्फ्यावर्त्तनिर्वेदिर्भवति॑ तत्रैतां प्राची मासन्दीं प्रतिष्ठापयति॑ तस्या अन्तर्वेदि द्वौ पादौ भवतो॑ बहिर्वेदि द्वा॑वियं वै श्रीस्त॑स्या एतत् परिमितं रूपं॑ यदन्तर्वेद्यथैष भूमा॑ ऽपरिमितो यो बहिर्वेदि॑ तद्यदस्या अन्तर्वेदि॑ द्वौ पादौ भवतो॑ बहिर्वेदि द्वा॑ उभयोः कामयोरुपाप्त्यै॑ यश्चान्तर्वेदि यश्च बहिर्वेदि॑ ॥ ५ ॥

॥ श्रीगणेशाय नमः ॥

सुतशस्त्रविशेषोऽस्य क्षत्रियस्योपवर्णितः ।
क्रतौ समाप्तेऽथ पुनरभिषेकोऽत्र वर्ण्यते ॥

त मेत मभिषेकं प्रतिजानीते— "अथातः पुनरभिषेकस्यैव" —इति । 'अथ' क्रतुसमाप्त्यनन्तरम्, यतः क्षत्रियो ऽभिषेक मर्हति, 'अतः' कारणात् पुनरभिषेकस्यैव, विधिरुच्यत इति शेषः ※ । राज्ञः पूर्वं मभिषिक्तत्वादयं पुनरभिषेको भवति । इतरस्यापि क्षत्रियस्य माहेन्द्रग्रहाय प्रस्तुते सत्यभिषेकस्य आध्वर्यवस्य विद्यमानत्वात् † अयं पुनरभिषेको भवति ॥

त मेव विधत्ते— "सूयते ह वा अस्य क्षत्रं यो दीक्षते क्षत्रियः सन्त्स यदा ऽवभृथादुदेत्यानूबन्ध्ययेष्ट्वोदवस्यत्यथैन मुदवसानीयायां संस्थितायां पुनरभिषिञ्चति"—इति । 'यः' पुमान् क्षत्रियः सन् 'दीक्षते' दीक्षां प्राप्नोति, 'अस्य' क्षत्रस्य पुरुषस्य 'क्षत्रं' सर्वेषां प्राणिनां क्षतात् त्राणम् 'सूयते' प्रवर्त्तते । तस्मात् 'सः' क्षत्रियो यदा 'अवभृथादुदेत्य' अवभृथाख्यं कर्म समाप्तं कृत्वा, 'अनूबन्ध्यया' तदाख्यया कया चित् पशुस्थानीयया 'इष्ट्वा' यागं कृत्वा, पश्चात् 'उदवस्यति' उदवसानीयाख्ययेष्ट्या कर्मावसानं करोति; 'अथ' तदानीम् 'एनं' क्षत्रिय मुदवसानीयेष्टौ समाप्तायां पुनरपि कर्माङ्गत्वेन ऋत्विजो ऽभिषिञ्चेयुः ॥

※ "तं वै प्राञ्चं तिष्ठन्त मभिषिञ्चति पुरस्ताद् ब्राह्मणो ऽभिषिञ्चत्यध्वर्युर्वा, यो वास्य पुरोहितो भवति; पश्चादितरे ०—० इदं सर्वं यो राजसूयेन यजते"—इत्यादि शत० ब्रा० ५. ४. २. १—५ ।

† "तं वै माध्यन्दिने सवने ऽभिषिञ्चति ०—० अगृहीते माहेन्द्रे"—इत्यादि शत० ब्रा० ५.३.५.१ । 'माहेन्द्रे ग्रहे अगृहीते सोमरसेनापूर्णे, मरुत्वतीयान्ते इत्यर्थः'—इति तत्र सा० भा० ।

तस्याभिषेकस्य साधनानि विधत्ते — "तस्यैते पुरस्तादेव सम्भारा उपक्लृप्ता भवन्त्यौदुम्बर्यासन्दी ; तस्यै प्रादेशमात्राः पादाः स्युररत्निमात्राणि शीर्षण्यानूच्यानि ; मौञ्जं विवयनं, व्याघ्रचर्मास्तरण, औदुम्बरश्चमस , उदुम्बरशाखा ; तस्मिन्नेतस्मिंश्चमसे ऽष्टातयानि निषुतानि भवन्ति,— दधि मधु सर्पिरातपवर्ष्या आपः शष्पाणि च तोक्मानि च दूर्वा"–इति । 'तस्य' पुनरभिषेकस्य 'एते' वक्ष्यमाणाः 'सम्भाराः' सम्पादनीया द्रव्यविशेषाः 'पुरस्तादेवोपक्लृप्ताः' अभिषेककालात्प्रागेव सम्पादिता भवेयुः । के वस्तुविशेषाः सम्पादनीयाः ? ते ऽभिधीयन्ते । उदुम्बरकाष्ठैर्निर्मिता काचिदासन्दी । 'तस्यै' तस्या आसन्द्याः चत्वारः पादाः प्रादेशपरिमिताः ; तेषां पादानां शिरस्युपरिभागे ऽवस्थितानि 'शीर्षण्यानि', अन्वक्तिर्यगवस्थितानि काष्ठानि 'अनूच्यानि', तानि 'शीर्षण्यनूच्यानि' * अरत्निपरिमितानि । प्रादेशद्वय मरत्निः । 'विवयनं' विविधं वयनं रज्जूना मोतप्रोतरूपेण संयोजनम् , तच्च 'मौञ्जं' मुञ्जतृणेन निर्मितम् । ईदृश्या आसन्द्या उपरि आस्तरणं व्याघ्रचर्म । दध्यादिप्रक्षेपार्थः प्रौढ उदुम्बरकाष्ठनिर्मितश्चमसः । तथा काचित् सूक्ष्मा 'उदुम्बरशाखा' । 'तस्मिन्नेतस्मिन् औदुम्बरे' प्रौढे चमसे वक्ष्यमाणदध्यादिद्रव्याणि 'अष्टातयानि' । अत्र द्वितयत्रितयादिवत् "सङ्ख्याया अवयवे तयप्"–इति (पा०५.२.४२.सू०)

---

* वक्ष्यत्युपरिष्टात् तृतीयाध्यायीयाद्यखण्डभाष्ये — 'अनूच्ये पार्श्वद्वयवर्त्तिनी फलके'–इति । "आसन्दी समभरन् । तस्या ग्रीष्मश्च वसन्तश्च द्वौ पादावास्तां, शरच्च वर्षाश्च द्वौ । बृहच्च रथन्तरं चानूच्ये३ आस्तां, यज्ञायज्ञियं च वामदेव्यं च तिरश्चे"–इति अथ० सं० १५. ३. ३–५ । "चतुःस्रक्तयः पादा भवन्ति, चतुःस्रक्तीन्यनूच्यानि"–इति शत० ब्रा० ६. ७. १. १५ । "चत्वारः पादाश्चत्वार्यनूच्यानि"–इति च तत्रैव २८ ।

सूत्रेण तयप् प्रत्ययः । अष्टसङ्ख्याका अवयवा येषां दध्यादीनां तान्यष्टातयानि । दीर्घश्छान्दसः । तानि च 'निषुतानि' नितरां सुतानि प्रक्षिप्तानि भवन्ति । चमसे प्रक्षेपणीयान्यष्टद्रव्याणि कानि ? इति, तान्युच्यन्ते— दधि, मधु, सर्पिरित्येतानि त्रीणि प्रसिद्धानि ; आतपयुक्तवर्षभवाः 'आतपवर्ष्याः' *, तादृश्य आपश्चतुर्थं द्रव्यम् ; 'शष्पाणि' श्यामतृणानि, पञ्चमं द्रव्यम् ; 'तोक्मानि' अङ्कुराणि षष्ठं द्रव्यम् ; सुरा, दूर्वेति द्रव्यद्वयं प्रसिद्धम् ॥

सम्पादिताया आसन्द्याः प्रतिष्ठापनं विधत्ते— "तद्यैषा दक्षिणा स्फ्यवर्त्तनिर्वेदेर्भवति, तत्रैतां प्राची मासन्दीं प्रतिष्ठापयति ; तस्या अन्तर्वेदि द्वौ पादौ भवतो बहिर्वेदि द्वावियं वै श्रीस्तस्या एतत्परिमितं रूपं यदन्तर्वेद्यथैष भूमाऽपरिमितो यो बहिर्वेदि ; तद् यदस्या अन्तर्वेदि द्वौ पादौ भवतो, बहिर्वेदि द्वौ, उभयोः कामयोरुपाप्त्यै यश्चान्तर्वेदि यश्च बहिर्वेदि"-इति । पुरा वेदिपरिग्रहार्थं स्फ्येन लेखात्रयं कृतम्— दक्षिणा प्रतीच्युदीची च । तत्र देवयजनदेशे यैषा वेदेः सम्बन्धिनी दक्षिणा 'स्फ्यवर्त्तनिः' स्फ्यस्य रेखा भवति, 'तत्र' तस्यां रेखायाम् 'एताम्' आसन्दीं 'प्राचीं' प्रागग्राम् अवस्थापयेत् । 'तस्याः' चासन्द्या उत्तरदिग्गतौ द्वौ पादावन्तर्वेदि तिष्ठतः ; दक्षिणदिग्गतौ द्वौ पादौ बहिर्वेदि स्थापनीयौ । 'इय' भूमिः 'श्रीर्वै' सम्पद्रूपैव । 'तस्याः' भूमेरन्तर्वेदि यद् रूप मस्ति, एतत् 'परिमितम्' अल्पम्, अथ बहिर्वेदि 'यः' प्रदेशोऽस्ति, एष 'भूमा' बहुलः अत एव 'अपरि-

---

* "अन्तरिक्षात् प्रतिगृह्यातपवर्ष्याः"-इति कात्या० श्रौ० १५. ४. ५ । 'आतपे वर्षन्ति, ताः अन्तरिक्षात् प्रतिगृह्य भूमिपतनात् प्रागेव आकाशात् पततीरादाय गृह्णाति' -इति तद्-व्याख्यानम् ।

मितः' इयानिति परिच्छेदरहितः । एवं सति वेदेर्मध्ये बहिश्चासन्या द्वौ द्वौ पादाविति यदस्ति , तदुभयोः कामयोः प्राप्तिर्भवति,— यश्च कामो वेदिमध्ये लभ्यते, यश्च अन्यः कामो वेदेर्बहिर्लभ्यते, तदुभयसिद्ध्यर्थ मेवं स्थापन मिति ॥ १ (५) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तत्रिंशाध्याये) प्रथमः खण्डः ॥ १ (५) ॥

॥ अथ द्वितीयः खण्डः ॥

व्याघ्रचर्मण्यास्तृणात्युत्तरलोम्ना॑ प्राचीनग्रीवे॑ण क्षत्रं वा एतदारण्यानां पशूनां यद् व्याघ्रः॑ क्षत्रं राजन्यः॑ क्षत्रेणैव तत्क्षत्रं समर्द्धयति॑ तां पश्चात् प्राङुपविश्याच्य॑ जानु दक्षिण मभिमन्त्रयत॑ उभाभ्यां पाणिभ्या॑ मालभ्याग्निष्ट्वा गायत्र्या॑ सयुक् छन्दसारोहतु॑ सवितोष्णिहा॑ सोमो ऽनुष्टुभा॑ बृहस्पतिर्बृहत्या॑ मित्रावरुणौ पङ्क्त्येन्द्रस्त्रिष्टुभा॑ विश्वेदेवा जगत्या॑ तानह मनु राज्याय॑ साम्राज्याय भौज्याय॑ स्वाराज्याय वैराज्याय॑ पारमेष्ठ्याय राज्याय॑ माहाराज्या-

याधिपत्यायं स्वावश्यायातिष्ठायारोहामीत्येता मासन्दी मारोहेद्दक्षिणेनाग्रे जानुनाथ सव्येन तत्तदितीश्चतुरुत्तरैर्वै देवाश्छन्दोभिः सयुग् भूत्वैतां श्रिय मारोहन्यस्था मेत एतर्हि प्रतिष्ठिता अग्निर्गायत्र्या सवितोष्णिहा सोमोऽनुष्टुभा बृहस्पतिर्बृहत्या मित्रावरुणौ पङ्क्त्येन्द्रस्त्रिष्टुभा विश्वेदेवा जगत्या ते एते अभ्यनूच्येते अग्नेर्गायत्र्यभवत्सयुग्वेति कल्पते ह वा अस्मै योगक्षेम उत्तरोत्तरिणीं ह श्रिय मश्नुतेऽश्नुते ह प्रजाना मैश्वर्यं माधिपत्यं य एव मेता अनु देवता एता मासन्दी मारोहति क्षत्रियः सन्नथैन मभिषेक्ष्यन्नपां शान्तिं वाचयति शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचं मे। सर्वाँ* अग्नीँ रप्सुषदो हुवे वो मयि वर्चो बल मोजो निधत्तेति नैतस्याभिषिषिचानस्याशान्ता आपो वीर्यं निर्हणन्निति † ॥ २ (६) ॥

प्रतिष्ठिताया आसन्द्या उपरि चर्मास्तरणं विधत्ते— “व्याघ्रचर्मणास्तृणात्युत्तरलोम्ना प्राचीनग्रीवेण ; क्षत्रं वा एतदारण्यानां पशूनां यद्‌ व्याघ्रः, क्षत्रं राजन्यः, क्षत्रेणैव तत् क्षत्रं समर्द्धयति”— इति। उत्तर मूर्द्ध्वभागे लोमानि यस्य चर्मणस्तत् ‘उत्तरलोम’, प्राच्यां दिशि ग्रीवा यस्य चर्मणस्तत् ‘प्राचीनग्रीवम्’। तादृशेन

---

* “सर्वां”—इति ख, ग।

† “निर्हणंनिति”—इति ख, ग, ज।

व्याघ्रचर्मणा ता मासन्दी मास्तृणीयात् । अरण्ये एवावस्थिता आरण्याः पशवो हरिणादयः । यो व्याघ्रोऽस्ति एतदारण्यपशूनां मध्ये 'क्षत्रं वै' क्षत्रियवच्छूरः ; योऽयं 'राजन्यः' यजमानः, सोऽपि 'क्षत्रं' क्षत्रियजातित्वाच्छूरः । अतश्चर्मास्तरणाद् व्याघ्रचर्मरूपेण 'क्षत्रेणैव' यजमानरूपं 'क्षत्रं' समृद्धं करोति ॥

आसन्द्या अभिमन्त्रणं विधत्ते— "तां पश्चात्प्राङुपविश्याच्य जानु दक्षिण मभिमन्त्रयत उभाभ्यां पाणिभ्या मालभ्य"—इति । प्रतिष्ठापिताया आसन्द्याः पश्चाद् भागे यजमानः प्राङ्मुख उपविश्य, दक्षिणं यत् जान्वस्ति, तत् 'आच्य' भूमिस्पृष्टं यथा भवति तथा न्यग्भूतं कृत्वा, सव्यजानु ऊर्द्ध्वमुख मेवावस्थाप्य, उभाभ्यां पाणिभ्या मासन्दीम् 'आलभ्य' स्पृष्ट्वा, वक्ष्यमाणमन्त्रेणाभिमन्त्रयेत् ॥

तं मन्त्रं दर्शयति— "अग्निष्ट्वा गायत्र्या सयुक् छन्दसारोहतु, सवितोष्णिहा, सोमो ऽनुष्टुभा, बृहस्पतिर्बृहत्या, मित्रावरुणौ पङ्क्त्येन्द्रस्त्रिष्टुभा, विश्वेदेवा जगत्या, तानहं मनु राज्याय साम्राज्याय भौज्याय स्वाराज्याय वराज्याय पारमेष्ठ्याय राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायारोहामीति"—इति । हे आसन्दि! 'त्वा' त्वां गायत्र्या छन्दसा 'संयुक्' सहितः अग्निः आरोहतु । 'उष्णिहा' छन्दसा सहितः सविता आरोहतु । एवं सोमबृहस्पतिमित्रावरुणेन्द्रविश्वेदेवाः अनुष्टुबादिच्छन्दोभिः सहिताः त्वा मारोहन्तु । 'तान्' अग्न्यादीन् देवान् 'अनु' पश्चाद् अहम् आरोहामि । किमर्थम् ? राज्यादिसिद्ध्यर्थम् । 'राज्यं' देशाधिपत्यम् । 'साम्राज्यं' धर्मेण पालनम् । 'भौज्यं' भोगसमृद्धिः । 'स्वाराज्यम्' अपराधीनत्वम् । 'वैराज्यम्' इतरेभ्यो भूपतिभ्यो वैशिष्ट्यम् । एतदुक्त मैहिकम् , अथामुष्मिक मुच्यते—

'पारमेष्ठ्यम्' प्रजापतिलोकप्राप्तिः । तत्र 'राज्यं' ऐश्वर्यम् । 'माहाराज्यं' तत्रत्येभ्यश्चाधिक्यम् । 'आधिपत्यं' इतरान् प्रति स्वामित्वम् । 'स्वावश्यम्' अपारतन्त्र्यम् । 'आतिष्ठत्वं' चिरकालवासित्वम् ॥

अनेन मन्त्रेणाभिमन्त्रणादूर्ध्व मारोहणं विधत्ते— "इत्येता मासन्दी मारोहेद्दक्षिणेनाग्रे जानुनाथ सव्येन"–इति । 'इति'–शब्दः पूर्वोक्त मभिमन्त्रणमन्त्रं परामृशति । तेनैव मन्त्रेण 'एताम्' आसन्दी मारोहेत् । तत्रायं प्रकारः— दक्षिणेन जानुना प्रथमं समारोहेत्, ततः सव्येनारोहेत् ॥

आरोहणं प्रशंसति— "तत्तदिती३ँ"–इति । 'तत्' आरोहणम्, 'तत्' आरोहणम्, 'इति' एवं सर्वे जनाः पूजयन्ति । पूजार्थेयं प्लुतिः ॥

मन्त्रतात्पर्यं दर्शयति— "चतुरुत्तरैर्वै देवाश्छन्दोभिः सयुग् भूत्वैतां श्रिय मारोहन् यस्या मेत एतर्हि प्रतिष्ठिता ; अग्निर्गायत्र्या, सवितोष्णिहा, सोमो ऽनुष्टुभा, बृहस्पतिर्बृहत्या, मित्रावरुणी पङ्क्त्येन्द्रस्त्रिष्टुभा, विश्वेदेवा जगत्या"–इति । चत्वार्यक्षराण्येकैकस्माच्छन्दसः 'उत्तराणि' अधिकानि येषु गायत्र्यादिषु जगत्यन्तेषु छन्दस्सु, तानि 'चतुरुत्तराणि' ; तादृशैश्छन्दोभिः 'सयुग् भूत्वा' साहित्यं प्राप्य, 'देवाः' अग्न्यादयः 'एताम्' आसन्दीं 'श्रियम्' ऐश्वर्यरूपाम् आरोहन् । 'यस्याम्' आसन्द्याम् 'एते' अग्न्यादयः इदानी मपि प्रतिष्ठिता वर्त्तन्ते । देवाश्छन्दोभिः सयुग् भूत्वेत्यय मर्थो अग्निर्गायत्र्येत्यादिना स्पष्टीकृतः ॥

उक्त मर्थं मन्त्रसंवादेन दृढयति— "ते एते अभ्यनूच्येते अग्नेर्गायत्र्यभवत्सयुग्वेति"–इति । 'ते एते' देवच्छन्दसी परस्परसहिते

कया चिदृचा अभ्यनूच्येत । सेय मृगग्निरित्यादिका (१८८पृ०)। येयं गायत्री, सेय मग्नेः 'सयुग्वा' सहवासिन्यभवत् । 'इति' तस्या ऋचोऽर्थः ॥

क्षत्रियस्यारोहणं प्रशंसति— "कल्पते ह वा अस्मै योगक्षेम उत्तरोत्तरिणीं ह श्रियं मश्नुते, ऽश्नुते ह प्रजाना मैश्वर्यं माधिपत्यं, य एव मेता अनु देवता एता मासन्दी मारोहति क्षत्रियः सन्"–इति । 'यः' पुमान् क्षत्रियः सन् एता देवता अनु स्वय मपि उक्तेन प्रकारेण एता मासन्दी मारोहति, 'अस्मै' क्षत्रियाय 'योगक्षेमः' 'कल्पते' सिध्यति । अप्राप्तस्य लाभस्य प्राप्तिर्योगः, प्राप्तस्य वस्तुनो रक्षणं क्षेमः, योगसहितः क्षेमो 'योगक्षेमः' । किञ्चायं क्षत्रियः 'उत्तरोत्तरिणीं' दिनेदिने वर्द्धमानां श्रियं प्राप्नोति; तथा सर्वासां प्रजानाम् 'ऐश्वर्यं' नियामकत्वम्, 'आधिपत्यम्' अधिकत्त्वेन पालनञ्च प्राप्नोति ॥

अभिषेककर्त्तुः शान्तिमन्त्रवाचनं विधत्ते— "अथैन मभिषेक्ष्यन्नपां शान्तिं वाचयति"–इति । 'अथ' आसन्द्यारोहणानन्तरम्, 'एनम्' आरूढं क्षत्रियं योऽन्योऽभिषेक्ष्यति, स पुमान् 'अपां' शान्तिं जलदेवतानां शान्तिकरं मन्त्रं 'वाचयेत्' क्षत्रियस्य अग्रे स्वयं सकृदुक्त्वा तं क्षत्रियं पाठयेत् ॥

एतं शान्तिमन्त्रं दर्शयति— "शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचं मे । सर्वाँ अग्नीँरप्सुषदो हुवे वो मयि वर्चो बल मोजो निधत्तेति"–इति । हे 'आपः' देवताः ! 'शिवेन' शान्तेन अनुग्रहयुक्तेन चक्षुषा मा मवलोकयत, तथा 'शिवया' शान्तया 'तन्वा' मदीयां त्वच मुपस्पृशत । 'अप्सु' जलेषु सीदन्तीति 'अप्सुषदः' और्वादयोऽग्नयः, तान् अग्नीन् सर्वान्

'वः' युष्मदर्थं 'हुवे' आह्वयामि, यूय मपि 'वर्चः' कान्तिः शरीरबलम्, तत्कारणम् 'ओजः' च मयि 'निधत्त' सम्पादयत ॥

तदेतच्छान्तिमन्त्रवाचनं प्रशंसति— "नैतस्याभिषिषिचानस्याशान्ता आपो वीर्यं निर्हणन्निति"–इति । 'अशान्ताः' उग्रा आपः । तथा च अन्यत्र श्रूयते— "दिव्या आपो ऽशान्ताः"–इति ताश्चापः शान्तिवाचनाभावे 'अभिषिषिचानस्य' अभिषेकं प्राप्तस्य 'एतस्य' क्षत्रियस्य वीर्यं 'निर्हण्युः' विनाशयेयुः [illegible] तु शान्तिपाठे 'न निर्हणन्' * नैव विनाशयन्ति,–इति' अभिप्रायेण शान्तिं वाचयेत ॥ २ (६) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्ततिंशाध्याये) द्वितीयः खण्डः ॥ २ (६) ॥

॥ अथ तृतीयः खण्डः ॥

अथैन मुदुम्बरशाखा मन्तर्द्धायाभिषिञ्चतीमा आपः शिवतमा इमाः सर्वस्य भेषजीः । इमा राष्ट्रस्य वर्द्धनीरिमा राष्ट्रभृतो ऽमृताः । याभिरिन्द्र मभ्यषिञ्चत् प्रजापतिः सोमं राजानं वरुणं यमं मनुं । ताभिरद्भिरभिषिञ्चामि त्वा महं राज्ञां त्व मधिराजो

---

* 'न निर्हरणं'–इति क।

भवेह। महान्तं त्वा महीनां सम्राजं चर्षणीनां। देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनद्। देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामि बलाय श्रियै यशसे ऽन्नाद्याय। भूरिति य इच्छेदिममेव प्रत्य मद्यादित्यथ य इच्छेद् द्विपुरुषं भूर्भुव इत्यथ य इच्छेत् त्रिपुरुषं वा ऽप्रतिमं वा भूर्भुवः स्वरिति तद्धैक आहुः सर्वाप्तिर्वा एषा यदेता व्याहृतयो ऽतिसर्वेण हास्य परस्मै कृतं भवतीति तमेतेनाभिषिञ्चेद्देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामि बलाय श्रियै यशसे ऽन्नाद्यायेति तदु पुनः परिचक्षते यदसर्वेण वाचो ऽभिषिक्तो भवतीश्वरो ह तु पुरायुषः प्रैतोरिति ह स्माह सत्यकामो जाबालो य एताभिर्व्याहृतिभिर्नाभिषिञ्चतीतीश्वरो ह सर्वमायुरैतोः सर्वमाप्नोद्विजयेनेत्य ह स्माहोद्दालक आरुणिर्य एताभिर्व्याहृतिभिरभिषिञ्चतीति तमेतेनैवाभिषिञ्चेद् देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामि बलाय श्रियै यशसे

MIRZAPUR PHŒNIX UNION LIBR
12, Kalidas Sinha's Lane,

ऽन्नाद्या॑य भूर्भुवस्स्वरित्यथैतानि ह वै॑ क्षत्रियादीजानाद्॑ व्युत्क्रान्तानि भवन्ति॑ ब्रह्मक्षत्रे ऊर्ग॑न्नाद्य॑ मपा मोषधीनां रसो॑ ब्रह्मवर्चस मिरापुष्टिः प्रजातिः॑ क्षत्ररूप॑ तदथो अन्नस्य रस॑ ओषधीनां क्षत्रं प्रतिष्ठा॑ तद्यदेवामू पुरस्तादाहुती जुहोति॑ तदस्मिन् ब्रह्मक्षत्रे दधाति॑ ॥ ३ (७) ॥

अभिषेकप्रकारं विधत्ते— “अथैन मुदुम्बरशाखा मन्तर्द्धायाभिषिञ्चति”–इति । ‘अथ’ शान्तिवाचनानन्तरम्, ‘एनं’ क्षत्रियम् ‘उदुम्बरशाखा मन्तर्द्धाय’ शिरस्युदुम्बरशाखया व्यवधानं कृत्वा चमसस्थैर्दध्यादिभिरभिषिञ्चेत् * ॥

तिस्र ऋचः, एकं यजुः, व्याहृतयश्चेत्येते अभिषेकमन्त्राः । तत्र प्रथमा मृच माह— “इमा आपः शिवतमा इमाः सर्वस्य भेषजीः । इमा राष्ट्रस्य वर्द्धनीरिमा राष्ट्रभृतो ऽमृताः”–इति । ‘आपः’–इत्यनेन दध्यादिसर्वद्रव्याणि उपलक्ष्यन्ते । ‘इमाः’ दध्यादिसहिताः आपः ‘शिवतमाः’ अतिशयेन शान्ताः । तथा ‘इमाः’ आपः ‘सर्वस्य’ दारिद्र्यादिरोगस्य ‘भेषजीः’ औषधरूपाः । तथा ‘इमाः’ आपो राष्ट्रस्य ‘वर्द्धनीः’ अभिवृद्धिहेतवः । अत एव ‘इमाः’ आपो ‘राष्ट्रभृतः’ राष्ट्रधारिण्यः । स्वयं च ‘अमृताः’ विनाशरहिताः ॥

द्वितीया मृच माह— “याभिरिन्द्र मभ्यषिञ्चत् प्रजापतिः

---

* “स्थितं प्राञ्च मभिषिञ्चति”–इत्यादि- (कात्या० श्रौ० १५.५. ३०–३३.)-पाठाच्चाभिषेकप्रकारविशेषाश्चाभिगन्तव्याः ।

MIRZAPUR PHŒNIX UNION LIBRARY
12, Kalidas Sinha's Lane,

सोमं राजानं वरुणं यमं मनुं । ताभिरद्भिरभिषिञ्चामि त्वा महं राज्ञां त्व मधिराजो भवेह"–इति । पुरा प्रजापतिः 'याभिः' दध्यादिसहिताभिरद्भिरिन्द्रादीनभ्यषिञ्चत्, हे क्षत्रिय ! ताभिरद्भिः त्वा मह मभिषिञ्चामि ; त्वं च 'इह' लोके राज्ञां सर्वेषां अधिको राजा भव ॥

तृतीया मृच माह— "महान्तं त्वा महीनां सम्राजं चर्षणीनां । देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनद्"–इति । 'जनित्री' तवोत्पादिका मातृरूपा देवी, त्वां 'महीनां' महता मपि पुरुषाणां मध्ये अतिशयेन महान्तम्, 'चर्षणीनां' मनुष्याणां सर्वेषां 'सम्राजं' सम्यक् धर्मेण पालयितारं कृत्वा, 'अजीजनत्' उत्पादितवती ; अतो भवदीया 'जनित्री' माता, स्वयं तदा पुण्यात्मा भूत्वोत्पादितवती ॥

तिस्र ऋचो ऽभिधाय यजुर्विधत्ते— "देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या मग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामि बलाय श्रियै यशसे ऽन्नाद्याय"–इति * । हे क्षत्रिय ! 'सवितुः' प्रेरकस्य देवस्य परमेश्वरस्य 'प्रसवे' अभ्यनुज्ञायां सत्यां त्वा मभिषिञ्चामि । केन साधनेन ? 'अश्विनोः' देवयोः सम्बन्धिभ्यां बाहुभ्यां, न तु मदीयाभ्याम् ; तथा 'पूष्णः' देवस्य हस्ताभ्याम् । मणिबन्धपर्यन्तौ दण्डाकारौ 'बाहू', अङ्गुलि-

---

* एवंविधमन्त्रपाठे तैत्तिरीया दूषण मप्यामनन्ति। तद्यथा— "यद् ब्रूयात् अग्नेस्त्वा तेजसाभिषिञ्चामीति, तेजस्व्येव स्यात्; दुश्चर्मा तु भवेत्। सोमस्य त्वा द्युम्नेनाभिषिञ्चामीत्याह, सौम्यो वै देवतया पुरुषः, स्वयैवैनँ देवतयाभिषिञ्चति"–इति तै० ब्रा० १.७.८। सोमस्य त्वेत्यादिस्तु तैत्तिरीयाणां वाजसनेयिनाञ्च अभिषेकमन्त्रः (सं० १. ८. १४,— वा० सं० १०. १७.)।

सहितावग्रभागौ 'हस्तौ'। तथाग्निसम्बन्धिना 'तेजसा' शारीरकान्त्या, सूर्यस्य सम्बन्धिना 'वर्चसा' वाह्यप्रकाशेन, इन्द्रसम्बन्धिना 'इन्द्रियेण' चक्षुरादिपाटवेन। कस्मै प्रयोजनायाय मभिषेकः? तव शारीरवलाय, 'श्रियै' हस्त्यश्वादिसम्पदे, 'यशसे' कीर्त्यै, 'अन्नाद्याय' अन्नसमृद्धये॥

अथ कामनाभेदेन व्याहृतीर्दर्शयति— "भूरिति य इच्छेदिम मेव प्रत्यन्न मद्यादित्यथ य इच्छेद् द्विपुरुषं भूर्भुव इत्यथ य इच्छेत् त्रिपुरुषं वाऽप्रतिमं वा भूर्भुवस्स्वरिति"–इति। 'यः' अभिषेक्ता 'इम मेव' अभिषिच्यमानं क्षत्रियं प्रति असौ 'अन्न मद्यात्' नीरोगो भवेदिति 'इच्छेत्' कामयेत, तं 'भूरिति' व्याहृत्या अभिषिञ्चेत्। अथ 'यः' अभिषेक्ता पुत्रपौत्राभ्यां द्वाभ्यां पुरुषाभ्यां सहितम् 'इमं' क्षत्रियं प्रति अन्न मद्यादिति कामयेत, तदानीं 'भूर्भुवः इति' व्याहृतिद्वयेन अभिषिञ्चेत्। अथ 'यः' अभिषेक्ता पुत्रपौत्रप्रपौत्रैस्त्रिभिः पुरुषैः युक्तम् 'इमं' क्षत्रियम् प्रति पुरुषत्रयपर्यन्तं जीवित्वा सुखेनान्न मद्यादिति कामयेत; अथवा त मेतम् 'अप्रतिमं' स्वतुल्यक्षत्रियान्तररहितं कुर्यात् * इति कामयेत, तदानीं 'भूर्भुवस्स्वरिति' व्याहृतित्रयेण अभिषिञ्चेत्॥

अत्र किञ्चित् पूर्वपक्ष मुद्भावयति — "तद्धैक आहुः, — सर्वाप्तिर्वा एषा यदेता व्याहृतयोऽतिसर्वेण ह्यस्य परस्मै कृतं भवतीति; त मेतेनाभिषिञ्चेद् देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या मग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामि वलाय श्रियै यशसेऽन्नाद्यायेति"–इति। 'तद्ध' तस्मिन् एव अभिषेके ब्रह्मवादिनः केचिदेव माहुः,— या एता

---

* "कुर्याम्"–इति ख।

व्याहृतयः सन्ति, 'एषा' व्याहृतिरूपा 'सर्वाप्तिर्वै' सर्वफलप्राप्तिसाधनम्; अथो व्याहृतिभिरभिषेके 'अस्य' अभिषिच्यमानस्य 'परस्मै' परस्य स्वस्मादन्यस्य क्षत्रियस्य 'अतिसर्वेण' तदपेक्षामात्र मतिक्रम्य कृत्स्नेनापि मन्त्रजातेन अभिषेचनं कृतं भवति; तदेतदधिकाभिषेचन मयुक्तम् 'इति' अभिप्रेत्य 'तं' क्षत्रियम् 'एतेन' देवस्य त्वेत्यादिना यजुषा अभिषिञ्चेत्, न तु व्याहृतिभिरिति तेषां पक्षः ॥

तं पक्षं दूषयति— "तदु पुनः परिचक्षते; यदसर्वेण वाचो ऽभिषिक्तो भवतीश्वरो ह तु पुरायुषः प्रैतोरिति ह स्माह सत्यकामो जाबालो य मेताभिर्व्याहृतिभिर्नाभिषिञ्चतीति"—इति । 'तदु' तदपि पूर्वोक्तं मतं पुनरन्ये ऽभिज्ञाः 'परिचक्षते' निराकुर्वन्ति । 'यं' क्षत्रियम् 'एताभिः' व्याहृतिभिः नाभिषिञ्चति, 'एषः' क्षत्रियो 'यद्' यस्मात् कारणाद् 'असर्वेण' सम्पूर्त्तिरहितेन 'वाचा' वाक्येन मन्त्रेण अभिषिक्तो भवति, तस्मादयं स्वोचितादायुषः पुरा 'प्रैतोः' प्रैतुं मर्त्तुम् 'ईश्वरः' समर्थो भवति; तस्माद् आयुःक्षयहेतुत्वादयं पक्षो न युक्त इति जबालाया पुत्रः 'सत्यकामः' महर्षिराह स्म ॥

पूर्वपक्षं दूषयित्वा सिद्धान्त माह— "ईश्वरो ह सर्व मायुरेतोः सर्व माप्नोद्विजयेनेत्यु ह स्माहोद्दालक आरुणिर्य मेताभिर्व्याहृतिभिरभिषिञ्चतीति; त मेतेनैवाभिषिञ्चेद् देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या मग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रियेणाभिषिञ्चामि बलाय श्रियै यशसे ऽन्नाद्याय भूर्भुवस्स्वरिति"—इति । 'यं' क्षत्रियम् 'एताभिः' व्याहृतिभिरभिषिञ्चति, स क्षत्रियः 'सर्व मायुरेतोः' सर्वात्मनायुः प्राप्तुम् 'ईश्वरः' समर्थो

भवति; ततो 'विजयेन' शत्रूनभिभूय सर्वं भोगम् 'आप्नोत्' आप्नोति । 'इति' एवं वरुणस्य पुत्र उद्दालक आह स्म । तस्मात् 'तं' क्षत्रियम् 'एतेन' व्याहृत्यन्तेन यजुषा अभिषिञ्चेत्, न तु केवलेन । सोऽयं व्याहृत्यन्तो मन्त्रो नित्यप्रयोगे द्रष्टव्यः, काम्यप्रयोगे तु व्याहृतिविकल्पः पूर्वं मुक्तः * ॥

अभिषेकाङ्गं होमं विधत्ते— "अथैतानि ह वै क्षत्रियादीजानाद् व्युत्क्रान्तानि भवन्ति,— ब्रह्मक्षत्रे ऊर्गन्नाद्य मपा मोषधीनां रसो ब्रह्मवर्चस मिरापुष्टिः प्रजातिः क्षत्ररूपं; तदथो अन्नस्य रस ओषधीनां क्षत्रं प्रतिष्ठा; तद्यदेवामू पुरस्तादाहुती जुहोति, तदस्मिन् ब्रह्मक्षत्रे दधाति"–इति । 'अथ' अभिषेकानन्तरम्, होम उच्यत इति शेषः । 'ईजानाद्' यागं कृतवतः क्षत्रियात् 'एतानि' वक्ष्यमाणानि 'व्युत्क्रान्तानि' अपगतानि भवन्ति । तानि निर्दिश्यन्ते— 'ब्रह्मक्षत्रे' एतस्य समीपे वर्त्तमानं जातिद्वयम्, 'ऊर्क्' क्षीरादिरसः, 'अन्नाद्यम्' ओदनादिकम्; तदेतदुभय मपा मोषधीनाञ्च 'रसः' सारः । 'अपां सारः' क्षीरादिः, 'ओषधीनां रसः' अन्नाद्यम् । 'ब्रह्मवर्चसं' श्रुताध्ययनसम्पत्तिः, 'इरापुष्टिः' अन्नसमृद्धिः, 'प्रजातिः' पुत्रोत्पादनम् । तच्च सर्वं क्षत्रियस्य स्वरूपम्; अत्यन्त मपेक्षितत्वाद् । एतेषां व्युत्क्रान्तौ क्षत्रियस्य स्वरूपहानिरेव भवति । 'अथो' अपि च 'अन्नस्य' ओदनस्य, 'रसः' रसस्य क्षीरादेः, 'ओषधीनां' व्रीहियवादीनां 'क्षत्रं प्रतिष्ठा' क्षत्रिय आश्रयः । तस्माद् उक्तो व्यतिक्रमः क्षत्रियस्य न युक्तः । 'तत्' तथा सति 'यत्' यदि 'अमू' बुद्धिस्थे आहुती अभिषिक्तस्य क्षत्रियस्य पुरस्ताद् जुहुयात्, 'तत्'

---

* 'भूरिति'–इत्यादिः, 'भूर्भुवइति'–इत्यादिश्च १९५ पृ० ६ पं० द्र० ।

तदानीम् 'अस्मिन्' अभिषेके ब्राह्मणजातिं, क्षत्रियजातिं, तदुपलक्षित मन्त्रादिकं च सर्वं मवस्थापयति। "ब्रह्म प्रपद्ये ०—० स्वाहा"– "क्षत्रं प्रपद्ये०—०स्वाहा"–इत्याहुतिद्वयं * जुहुयादिति तात्पर्यार्थः † ॥ ३ (७) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तत्रिंशाध्याये) तृतीयः खण्डः ॥ ३ (७) ॥

* * *

॥ अथ चतुर्थः खण्डः ॥

अथ यदौदुम्बर्यासन्दी भवत्यौ॑दुम्बरश्चमस॑ उदुम्बरशाखो॑र्ग्वा अन्नाद्य मुदुम्बर॑ ऊर्ज मेवास्मिंस्तदन्नाद्यं दधात्य॑थ यद् दधि मधु घृतं भवत्य॑पां स ओषधीनां रसो॑ऽपा मेवास्मिंस्तदोषधीनां रसं दधात्य॑थ यदातपवर्ष्या आपो भवन्ति॑ तेजश्च ह वै ब्रह्मवर्चसं चातपवर्ष्या आप॑स्तेज एवास्मिंस्तद् ब्रह्मवर्चसं च दधात्य॑थ यच्छष्पाणि च तोक्मानि च भवन्ती॑रायै

---

* पुरस्तात् ७. ४. ४. (११२–११६) द्रष्टव्यम्।

† तै० सं० १. ८. १४, तै० ब्रा० १. ७. ८, वा० सं० १०. १७, वा० ब्रा० (शत०) ५. ४. २ अभिषेकविवरणं द्रष्टव्यम्।

तत्पुष्ट्यै रूप मथो प्रजात्या । इरा मेवास्मिंस्तत्पुष्टिं दधात्यथो प्रजाति । मथ यत् सुरा भवति । क्षत्ररूपं तदथो अन्नस्य रसः । क्षत्ररूप मेवास्मिंस्तद्दधात्यथो अन्नस्य रस । मथ यद् दूर्वा भवति । क्षत्रं वा एतदोषधीनां यद् दूर्वा । क्षत्रं राजन्यो नितत इव हीह क्षत्रियो राष्ट्रे वसन् भवति । प्रतिष्ठित इव । निततेव दूर्वावरोधैर्भूम्यां प्रतिष्ठितेव । तद्यद् दूर्वा भवत्योषधीना मेवास्मिँस्तत्* क्षत्रं दधात्यथो प्रतिष्ठा मेतानि ह वै यान्यस्मादीजानाद् व्युत्क्रान्तानि भवन्ति । तान्येवास्मिँस्तद् दधाति तैरेवैनं तत्समर्द्धयत्यथास्मै सुरा कंसं हस्त आदधाति । स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुत इत्याधाय शान्तिं वाचयति नाना हि वां देवहितं सदस्कृतं मा संसृक्षाथां परमे व्योमनि सुरा त्व मसि शुष्मिणी । सोम एष राजा मैनं हिंसिष्ट । स्वां योनि माविशन्ताविति सोमपीथस्य चैषां सुरापीथस्य च व्यावृत्तिः । पीत्वा यं रातिं मन्येत । तस्मा एनां प्रयच्छेत्तद्धि मित्रस्य रूपं मित्र एवैनां तदन्ततः प्रतिष्ठापयति । तथा हि मित्रे प्रतितिष्ठति प्रतितिष्ठति य एवं वेद । ॥ ४ (८) ॥

---

* "मेवास्मिंस्तत्"–इति क, ग, ङ। एव मिहोत्तरत्र च।

अभिषिक्तसाधनानि क्रमेण प्रशंसितु मादावासन्द्यादित्रयं प्रशंसति— "अथ यदौदुम्बर्यासन्दी भवत्यौदुम्बरश्चमस उदुम्बरशाखोर्ग्वा अन्नाद्य मुदुम्बर ऊर्जं मेवास्मिंस्तदन्नाद्यं दधाति"- इति । आसन्दी-चमस-शाखानां कारणभूतो यः 'उदुम्बरः', सोऽयं रसस्यान्नस्य स्वरूपभूतः; तेन 'अस्मिन्' यजमाने रस मन्नञ्च सम्पादयति ॥

दध्यादित्रयं प्रशंसति— "अथ यद् दधि मधु घृतं भवत्यपां स ओषधीनां रसो ऽपा मेवास्मिंस्तदोषधीनां रसं दधाति"- इति । दधिघृतयोः पशुभक्षिततृणोदकजन्यत्वात् ओषधिरसत्वम्; मधुनो मधुकरानीतपुष्परसजन्यत्वाद् ओषधिसारत्वम् ॥

आतपसहिता वृष्टिजन्या आपः प्रशंसति— "अथ यदातपवर्ष्या आपो भवन्ति, तेजश्च ह वै ब्रह्मवर्चसं चातपवर्ष्या आपस्तेज एवास्मिंस्तद् ब्रह्मवर्चसं च दधाति"-इति *। आतपसम्बन्धात् तेजस्त्वम्, आहुतिफलरूपवृष्टिसम्बन्धाद् ब्रह्मवर्चसत्वम् ॥

श्यामतृणान्यङ्कुराणि च प्रशंसति— "अथ यच्छष्पाणि च तोक्मानि च भवन्तीरायै तत् पुष्ट्यै रूप मथो प्रजात्या इरा मेवास्मिंस्तत् पुष्टिं दधात्यथो प्रजातिम्"-इति । तृणाना मङ्कुराणां च पश्वन्नत्वात् तद्भक्षणेन पशुपुष्टिप्रजोत्पादनयोर्दृष्टत्वात् इरापुष्टिप्रजातिरूपत्वम् ॥

---

* आध्वर्यवेष्वभिषेकसाधनेषु सप्तदशविधा आपः श्रूयन्ते । ता यथा— सारस्वत्यः, वृष्णऊर्मिः, स्यन्दमानाः, ओजस्वत्यः, अपयत्यः, अपाम्पतिः, निवेष्यः, सूर्यत्वचसः, आतपवर्ष्याः, वैशन्त्यः, कूप्याः, प्रुष्वाः, मधु, गोरुल्ब्याः, पयः, घृतम्, मरीच्यः । "स सारस्वतीरेव प्रथमा गृह्णाति"-इत्यारभ्य, "सप्तदशापः सम्भरति"-इत्यन्तः शत० ब्रा० ५. ३. ४. ३-२२ कण्डिका द्रष्टव्याः । षोडश वेति च तत्रास्ति पक्षान्तरम् । तै० सं० १. ८. ११, तै० ब्रा० १. ७. ५ अपि एव मेव ।

सुरां प्रशंसति — "अथ यत् सुरा भवति, क्षत्ररूपं तद्; अथो अन्नस्य रसः; क्षत्ररूप मेवास्मिंस्तद्दधात्यथो अन्नस्य रसम्" -इति। सुरायाः क्षत्रियस्येव मदयोगात् क्षत्ररूपत्वम्, व्रीह्याद्यङ्कुरजन्यत्वादन्नरसत्वञ्च ॥

दूर्वां प्रशंसति— "अथ यद् दूर्वा भवति; क्षत्रं वा एतदोषधीनां यद् दूर्वा, क्षत्रं राजन्यो, नितत इव हीह क्षत्रियो राष्ट्रे वसन् भवति, प्रतिष्ठित इव; निततेव दूर्वावरोधैर्भूम्यां, प्रतिष्ठितेव; तद्यद् दूर्वा भवत्योषधीना मेवास्मिंस्तत् क्षत्रं दधात्यथो प्रतिष्ठाम्"-इति। ओषधिजातौ दूर्वायाः क्षत्रियजातित्वं राजसम्बन्धिक्षत्रियजातिसाम्यादवगन्तव्यम् *। तदेव साम्यं नितत इवेत्यादिना प्रपञ्चयते। 'इह' राष्ट्रे क्षत्रियो वसन्, तेषु ग्रामेषु सञ्चारात् स्वपुरुषस्थापनाच्च, स्वयं नितरां 'ततः' विस्तृतः 'इव' राज्यैश्वर्येण प्रतिष्ठित एव भवति; दूर्वा 'अवरोधैः' अधोमुखैः स्वकीयमूलैर्नितरां 'तता इव' व्याप्तेव, स्थैर्याद् एकत्र प्रतिष्ठितेव भवति। तथा सति 'यद्' यत्र दूर्वा भवति, तदानीम् ओषधिसम्बन्धिक्षत्रियजातिम् 'अस्मिन्' यजमाने सम्पादयति, अपि च 'प्रतिष्ठां' स्थैर्य मपि सम्पादयति ॥

प्रत्येकं प्रशस्य समुदायरूपेण प्रशंसति— "एतानि ह वै यान्यस्मादीजानाद् व्युत्क्रान्तानि भवन्ति, तान्येवास्मिंस्तद्दधाति; तैरेवैनं तत्समर्द्धयति"-इति। 'ईजानाद्' यागं कृतवतः 'अस्मात्' क्षत्रियाद् यान्येव 'एतानि' दध्युदुम्बरादीनि व्युत्क्रान्तानि भवन्ति,

---

* "अयं वाव माऽधूर्वीदिति यदब्रवीदधूर्वीन्मीति, तस्माद् दूर्वा; धूर्वा ह वै तां दूर्वेत्याचक्षते परीक्षम्; परीक्षकामा हि देवाः। तदेतत् क्षत्रम्। प्राणो ह्येष रसः"-इति शत० ब्रा० ७, ४, २, १२।

तान्येव 'अस्मिन्' क्षत्रिये सम्पाद्य , तैरेवैनं समृद्धं करोति ॥

अभिषिक्तस्य क्षत्रियस्य पानपात्रं विधत्ते— "अथास्मै सुराकंसं हस्त आदधाति"–इति। 'अथ' अभिषेकानन्तरम् , 'अस्मै' अस्य क्षत्रियस्य हस्ते सुरायुक्तं कांस्यपात्र मादध्यात् ॥

तत्र मन्त्र माह— "स्वादिष्ठया मदिष्ठया प्रवस्व सोम धारया इन्द्राय पातवे सुतः (सं० ९.१.१.)"–इति। हे सोम! त्वत्समानं सुराद्रव्यं 'स्वादिष्ठया' अतिशयेन स्वादुभूतया , 'मदिष्ठया' अतिशयेन मदहेतुभूतया त्वदीयया 'धारया' पवस्व यजमानं शोधय। हे द्रव्यविशेष! 'इन्द्राय पातवे' इन्द्रस्य पानार्थं 'सुतः' अभिषुतः सम्पादितोऽसि ॥

मन्त्रान्तरेण शान्तिवाचनं विधत्ते— "इत्याधाय शान्तिं वाचयति"–इति। 'इति' अनेन पूर्वोक्तमन्त्रेण हस्ते सुरायुक्तं कांस्यपात्र माधाय, वक्ष्यमाणमन्त्रेण शान्तिं वाचयेत् ॥

तं मन्त्रं दर्शयति— "नाना हि वां देवहितं सदस्कृतं ; मा संसृक्षाथां परमे व्योमनि ; सुरा त्व मसि शुष्मिणी , सोम एष राजा, मैनं हिंसिष्टं स्वां योनि माविशन्ताविति"–इति। हे सुरासोमौ! 'वां' युवयोः 'देवहितं' देवैः सम्पादितं 'सदः' स्थानं 'नाना कृतं' पृथगेव निष्पादितम्। अतः 'परमे व्योमनि' उत्कृष्टे उदराकाशे 'मा संसृक्षाथां' मा संसर्गं कुरुतम्। संसर्गे हि सोमस्य बाधः स्यात्। हे मद्य! त्वं 'शुष्मिणी' बलवती सुरासि, एष सोमो राजा, तौ बलवन्तौ युवा मुभौ 'स्वां योनि माविशन्तौ' उदरमध्ये विभागेन स्वं स्वं स्थानं प्रविशन्तौ 'एनं' पातारं 'मा हिंसिष्टं' हिंसित मुपद्रुतं मा कुरुतम्। 'इति' एतं मन्त्रं क्षत्रियस्याग्रे कथयित्वा, तं वाचयेत् ॥

तस्य मन्त्रस्य तात्पर्यं दर्शयति— "सोमपीथस्य चैषा सुरापीथस्य च व्यावृत्तिः"–इति। 'एषा' मन्त्रप्रतिपाद्या सोमपानसुरापानयोः परस्परव्यावृत्तिः ; मा संसृक्षाथा मिति संसर्गस्य निषिद्धत्वात् ॥

पीतशेषस्य दानं विधत्ते— "पीत्वा यं रातिं मन्येत, तस्मा एनां प्रयच्छेत्, तद्धि मित्रस्य रूपं ; मित्र एवैनां तदन्ततः प्रतिष्ठापयति, तथा हि मित्रे प्रतितिष्ठति"–इति। कांस्यपात्रगतां सुरां क्षत्रियः स्वयं पीत्वा, 'यं' पुरुषं 'रातिं' स्वस्य धनदातारं मित्रं मन्येत, 'तस्मै' पुरुषाय 'एनाम्' अवशिष्टां सुरां प्रयच्छेत्। 'तत्' एकपात्रगतद्रव्यपानं मित्रस्य स्वरूपम् ; परस्परं मित्रयोः सहभोजनदर्शनात्। 'तत्' तेन दानेन 'अन्ततः' पानान्ते मित्रे एव 'एनां' सुरां प्रतिष्ठापयति। 'तथा हि' तथैव कुर्वन्, स्वय मपि मित्रे प्रतिष्ठितो भवति ॥

वेदनं प्रशंसति— "प्रतितिष्ठति य एवं वेद"–इति ॥ ४ (८) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तत्रिंशाध्याये) चतुर्थः खण्डः ॥ ४ (८) ॥

॥ अथ पञ्चमः खण्डः ॥

अथोदुम्बरशाखा मभि प्रत्यवरोहत्यूर्ग्वा अन्नाद्य मुदुम्बर ऊर्ज मेव तदन्नाद्य मभि प्रत्यवरोहत्युपर्यै-

वासीनो॑ भूमौ पादौ प्रतिष्ठाप्य॑ प्रत्यवरोह मा॑ह प्रतितिष्ठामि द्यावापृथिव्योः॑ प्रतितिष्ठामि प्राणापानयोः॑ प्रतितिष्ठाम्यहोरात्रयोः॑ प्रतितिष्ठाम्यन्नपानयोः॑ प्रति ब्रह्मन् प्रति क्षत्रे॑ प्रत्लेषु त्रिषु लोकेषु॑ तिष्ठामीत्यन्ततः॑ सर्वेणात्मना प्रतितिष्ठति॑ सर्वस्मिन् ह वा एतस्मिन् प्रतितिष्ठत्यु॑त्तरोत्तरिणीं ह श्रिय मश्नुते॑ ऽश्नुते ह प्रजाना मैश्वर्य माधिपत्यं॑ य एव मेतेन पुनरभिषे॑केणाभिषिक्तः क्षत्रियः प्रत्यवरोह॑त्येतेन प्रत्यवरोहेण प्रत्यवरुह्योपस्थं कृत्वा॑ प्राङासीनो नमो ब्रह्मणे नमो ब्रह्मणे॑ नमो ब्रह्मण इति त्रिष्कृत्वो ब्रह्मणे॑ नमस्कृत्य वरं॑ ददामि॑ जित्या अभिजित्यै॑ विजित्यै सञ्जित्या॑ इति वाचं विसृजते॑ स यन्नमो ब्रह्मणे नमो ब्रह्म॑णे नमो ब्रह्मण इति त्रिष्कृत्वो॑ ब्रह्मणे नमस्करोति॑ ब्रह्मण एव त॑त्क्षत्रं वश मेति॑ तद्यत्र वै ब्रह्मणः क्षत्रं वश मेति॑ तद्राष्ट्रं समृद्धं॑ तद्वीरवदा हास्मिन् वीरो जायते॑ ऽथ यद्वरं ददामि॑ जित्या अभिजित्यै॑ विजित्यै सञ्जित्या॑ इति वाचं विसृजत॑ एतद्वै वाचो जितं॑ यद् ददामीत्याह॑ यदेव वाचो जितां॑३ * तन् म इद मनु कर्म॑ सन्तिष्ठाता इति विसृज्य॑ वाच

---

* "जिताँ३"-इति क, ख, घ। "जितँ३"-इति च।

मुपोत्था॑याहवनीये समिध मभ्याद्दधाति॑ समिदसि सम्वेङ्क्ष्वेन्द्रियेण॑ वीर्येण स्वाहे॑तीन्द्रियेणै॑व तद्वीर्ये॑णात्मान मन्तत: समर्द्धँयत्या॑धाय समिधं त्रीणि पदानि॑ प्राङुदङ्ङभ्युत्क्रामति॑ कॢप्तिरसि दिशां मयि देवेभ्य: कल्पत॑ कल्पतां मे योगक्षेमो॑ऽभयं मे ऽस्त्वित्यपराजितां दिश मुपतिष्ठते॑ जितस्यैवापुन: पराजयाय॑ तत्तदितीँ३॑ * ॥ ५ (९) ॥

आसन्द्या अवरोहं विधत्ते— “अथोदुम्बरशाखा मभि प्रत्यवरोहत्यूर्ग्वा अन्नाद्य मुदुम्बर ऊर्ज मेव तदन्नाद्य मभि प्रत्यवरोहति”–इति । ‘अथ’ अभिषेकानन्तरम्, भूमौ उदुम्बरशाखा मवस्थाप्य, ताम् ‘अभि’लक्ष्य प्रत्यवरोहेत् । योऽय मुदुम्बर: स ‘ऊर्ग्वै’ रसरूप एव ; तत्फले माधुर्यसद्भावात् । तथान्नाद्यस्वरूपश्च ; तद्भक्षणेनोदरपूरणात् । तस्माद् उदुम्बरशाखायां प्रत्यवरोहेणोर्ज मन्नाद्यं चाभिलक्ष्यावरोहति ॥

तत्र प्रकारं विधत्ते— “उपर्यैवासीनो भूमौ पादौ प्रतिष्ठाप्य प्रत्यवरोह माह”–इति । आसन्द्या उपर्यैव स्वय मुपविष्ट:, प्रथमत: पादौ भूमाववस्थाप्य प्रत्यवरोहसाधनभूतं मन्त्रं पठेत् ॥

तं मन्त्रं दर्शयति— “प्रतितिष्ठामि द्यावापृथिव्यो:, प्रतितिष्ठामि प्राणापानयो:, प्रतितिष्ठाम्यहोरात्रयो:, प्रतितिष्ठाम्यन्नपानयो:, प्रति ब्रह्मन्, प्रति क्षत्रे, प्रत्येषु त्रिषु लोकेषु तिष्ठा-

---

* “तत्तदितीं१”–इति ग, ङ।

मीति"–इति । भूमौ यदवरोहणं, तद् द्यावापृथिव्यादिषु सर्वेष्ववस्थान मिति मन्त्रार्थः ॥

अनेन मन्त्रेण क्रियमाणं प्रत्यवरोहं प्रशंसति— "अन्ततः सर्वेणात्मना प्रतितिष्ठति, सर्वस्मिन् ह वा एतस्मिन् प्रतितिष्ठत्युत्तरोत्तरिणीं ह श्रिय मश्नुते, ऽश्नुते ह प्रजाना मैश्वर्यं माधिपत्यं, य एव मेतेन पुनरभिषेकेणाभिषिक्तः क्षत्रियः प्रत्यवरोहति"–इति । 'यः' क्षत्रियः उक्ताभिषेकादूर्ध्व मनेन मन्त्रेण प्रत्यवरोहति, स पुरुषः 'अन्ततः' अभिषेकस्यान्ते धनिकत्वादिना सर्वेण रूपेण प्रतिष्ठितो भवति । 'एतस्मिन् सर्वस्मिन्' द्यावापृथिव्यादिके प्रतिष्ठितो भवति । उत्तरेत्यादि पूर्ववद् (१८०पृ०) योजनीयम् ॥

प्रत्यवरोहादूर्ध्वं कर्त्तव्यं विधत्ते— "एतेन प्रत्यवरोहेण प्रत्यवरूह्योपस्थं कृत्वा, प्राङासीनो नमो ब्रह्मणे नमो ब्रह्मणे नमो ब्रह्मण इति त्रिष्कृत्वो ब्रह्मणे नमस्कृत्य, वरं ददामि जित्या अभिजित्यै विजित्यै सञ्जित्या इति वाचं विसृजते"–इति । प्रत्यवरूह्येति दीर्घश्छान्दसः । 'एतेन' पूर्वोक्तेन प्रत्यवरोहमन्त्रेण 'प्रत्यवरूह्य' भूमौ 'उपस्थम्' आसनविशेषं * कृत्वा, प्राङ्मुख आसीनो नमस्कारमन्त्रं त्रिः पठित्वा, वर मित्यादिमन्त्रेण वाचं विसृजेत् । वाग्विसर्गो ऽलौकिकव्यवहारः । 'जितिः' जयमात्रम् । अभितः सर्वेषु देवेषु जितिः 'अभिजितिः' । प्रबलदुर्बलशत्रूणां तारतम्येन विविधो जयो 'विजितिः' । पुनः शत्रुत्वराहित्याय सम्यग् जितिः 'सञ्जितिः' । एतत्सिद्ध्यर्थं ब्राह्मणाय 'वर' गां ददामि † ॥

---

* "समस्तजङ्घोरुररत्निभ्यां जानुभ्यां चोपस्थं कृत्वा यथा शकुनिरुत्पतिष्यन्"–इति आश्व० श्रौ० ६. ५. ४ ।

† "वरो दक्षिणा"–इति तै० सं० १. ८. १ । तै० आर० २. १६. ३. । "वरो दक्षिणा

नमस्कारमन्त्रं प्रशंसति— "स यन्नमो ब्रह्मणे नमो ब्रह्मणे नमो ब्रह्मण इति त्रिष्कृत्वो ब्रह्मणे नमस्करोति, ब्रह्मण एव तत्क्षत्रं वश मेति; तद्यत्र वै ब्रह्मणः क्षत्रं वश मेति, तद्राष्ट्रं समृद्धं, तद्वीरवदा हास्मिन् वीरो जायते"—इति। 'सः' क्षत्रियो मन्त्रेणनमस्करोतीति यदस्ति, तेन 'ब्रह्मण एव' ब्राह्मणस्यैव क्षत्रियजातिर्वश मेति। 'तत्' तेन ब्राह्मणाधीनत्वेन तद्राष्ट्रं सर्ववस्तुसमृद्धं वीरपुरुषोपेतं च भवति; 'अस्मिन्' क्षत्रिये 'वीरः' पुरुष आजायते ॥

वरदानमन्त्रं प्रशंसति— "अथ यद्वरं ददामि, जित्या अभिजित्यै विजित्यै सञ्जित्या इति वाचं विसृजते; एतद्वै वाचो जितं, यद् ददामीत्याह; यदेव वाचो जितां३; तन् म इद मनु कर्म सन्तिष्ठाता इति"—इति। वर मित्यादिमन्त्रेण वाचं विसृजत इति यदस्ति (२०६ पृ०), तस्मिन् मन्त्रस्वरूपे ददामीति यदाह, एतदेव वाक्सम्बधि 'जितं' जयः। यदेव वाचो जित मस्ति, [पूजार्थे जिता मिति दीर्घः *] 'तद्' वाग् वज्ररूपं 'मे' मदीयम् 'इदं कर्म' अनुष्ठानं 'सन्तिष्ठातै' सम्यगवतिष्ठताम्; 'इति' तस्य मन्त्रस्याभिप्रायः ॥

समिदाधानं विधत्ते— "विसृज्य वाच मुपोत्थायाहवनीये समिध मभ्यादधाति"—इति। उक्तेन प्रकारेण वाङ्नियमं परित्यज्य, तस्मादासनात् उत्थितो वक्ष्यमाणमन्त्रेणाहवनीये समिधं प्रक्षिपेत् ॥

वरो हि राजन्यस्य"—इति तै० ब्रा० १. ६. १. ५। "पशुर्दक्षिणा धेनुर्वरो वा"—इति कात्या० श्रौ० ६. ७. २९। "आचार्याय वरं ददाति; गौर्ब्राह्मणस्य, ग्रामो राजन्यस्य"—इति पार० गृ० १. १०. १२। "अश्वं निविदां शस्त्रे०—० वर मेव ददाति"—इति २भा० ४२पृ०।

* मद्दृष्टेषु सर्वेष्वेव पुस्तकेषु 'जितां३'—इति प्लुताङ्को विद्यते; पूजार्था प्लुतिरेवोक्षिता, उक्तञ्च तथा बहुत्रैव, वक्ष्यति चोपरिष्टादनेकत्र (२०९ पृ०)।

तं मन्त्रं दर्शयति—"समिदसि सम्वेङ्क्ष्वेन्द्रियेण वीर्येण स्वाहेति"–इति । हे काष्ठ ! त्वं 'समिदसि' समिन्धनसाधनमसि । इङ्खति-धातोर्लोण्मध्यमपुरुषैकवचनम् 'एङ्क्ष्व'–इति ; स च गत्यर्थः * । 'उ'-शब्दो ऽनर्थकः । इन्द्रियपाटवेन , शरीरसामर्थ्येन च 'समेङ्क्ष्व' संयोजय, तदर्थं स्वाहुत मिद मस्तु ॥

मन्त्रस्य तात्पर्यं दर्शयति— "इन्द्रियेणैव तद्वीर्येणात्मानमन्ततः समर्द्धयत्याधाय समिधं त्रीणि पदानि प्राङुदङ्ङभ्युत्क्रामति"–इति । 'तत्' तेन समिदाधानमन्त्रेण आत्मान मभिषेककर्मान्ते वीर्येन्द्रियाभ्यां समृद्धं करोति । समिधं प्रक्षिप्य प्राङ्मुख उदङ्मुखो वा पदत्रय मभित उत्क्रामेत् । यद्वा प्राङुदङिति अन्तरालवर्तिनी मैशानीं दिश मभिलक्ष्योत्क्रामेत् ॥

तत्र मन्त्रं दर्शयति— "क्लृप्तिरसि दिशां मयि देवेभ्यः कल्पत, कल्पतां मे योगक्षेमो ऽभयं मे ऽस्तु"–इति । दिग्विशेष मभिलक्ष्य क्रियमाणं त्रैपदोत्क्रमणं दिशां 'क्लृप्तिः' कल्पनं , स्वाधीनत्वसम्पादनम् ; तथा सम्पादक मसि । अतो मयि देवार्थं 'कल्पत' कल्पनं सामर्थ्यं कुरु । बहुवचनं छान्दसम् । 'मे' मम 'योगक्षेमः' योगसहितः क्षेमः 'कल्पताम्' सम्पाद्यताम् ; तथैव 'मे' मम सर्वत्र 'अभयं' भयराहित्य मस्तु ॥

दिगुपस्थानं विधत्ते — "इत्यपराजितां दिश मुपतिष्ठते, जितस्यैवापुनः पराजयाय ; तत्तदिती३ँ"–इति । 'इति' अनेन पूर्वोक्तेन क्लृप्तिरसीत्यादिनैव मन्त्रेण पराजयरहितां प्राचीमुदीचीं वा दिश मुपतिष्ठते । अथवा 'अपराजितां दिशम्' ऐशानीम् उपतिष्ठते । पूर्वं जितस्यैव दिग्विशेषस्य, पुनः परा-

---

* "उख उखि०—०इख इखि०—०रिगि लिगि गत्यर्थाः"–इति धा०पा०स्वा०१२८–१५५ ।

जयराहित्यार्थ मुपस्थानम् । लोकाश्च सर्वे तदुपस्थान मिति पूजयन्ति । पूजार्थेयं सानुनासिका प्लुतिः ॥ ५ (८) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तत्रिंशाध्याये) पञ्चमः खण्डः ॥ ५ (८) ॥

॥ अथ षष्ठः खण्डः ॥

देवासुरा वा एषु लोकेषु संयेतिरे॑ त एतस्यां प्राच्यां दिशि येतिरे॑ तांस्ततोऽसुरा अजयंस्ते॑ दक्षिणस्यां दिशि येतिरे॑ तांस्ततोऽसुरा अजयंस्ते॑ प्रतीच्यां दिशि येतिरे॑ तांस्ततोऽसुरा अजयंस्त॑ उदीच्यां दिशि येतिरे॑ तांस्ततोऽसुरा अजयंस्त॑ एतस्मिन्नवान्तरदेशे येतिरे॑ य एष प्राङुदङ् ते ह ततो जिग्युस्तं यदि क्षत्रिय उपधावे॑त्सेनयोः समायत्योस्तथा मे कु॑रु यथाह मिमां सेनां जयानीति॑ स यदि तथेति ब्रूयाद् वनस्पते वीड्वङ्गो हि भूया इ॑त्यस्य रथोपस्थ मभिमृश्याथैनं ब्रूयादातिष्ठस्वैता॑ ते दिश मभिमुखः सन्नद्धो रथोऽभिप्रवर्त्ततां * स उदङ् स प्रत्यङ् स

---

* "ऽभिप्रवर्त्तताँ"–इति ङ ।

दक्षिणा स प्राङ् सो ऽभ्यमित्र मित्यभीवर्त्तेन हविष्येवैन मावर्त्तयेद्रथेन मन्वीक्षेताप्रतिरथेन शासेन सौपर्णेनेति जयति ह तां सेनां यद्यु वा एन मुपधावेत्सङ्ग्रामं संयतिष्यमाणस्तथा मे कुरु यथा ऽह मिमं सङ्ग्रामं सञ्जयानीत्येतस्या मेवैनं दिशि यातयेज्जयति ह तं सङ्ग्रामं यद्यु वा एन मुपधावेद्राष्ट्रादपरुध्यमानस्तथा मे कुरु यथा ऽह मिदं राष्ट्रं पुनरवगच्छानीत्येता मेवैनं दिश मुपनिष्क्रमयेत् तथाह राष्ट्रं पुनरवगच्छत्युपस्थायामित्राणां व्यपनुत्तिं ब्रुवन् गृहानभ्येत्यप प्राच इन्द्र विश्वाँ अमित्रानिति सर्वतोहास्मा अनमित्र मभयं भवत्युत्तरोत्तरिणीं ह श्रिय मश्नुते ऽश्नुते ह प्रजाना मैश्वर्यं माधिपत्यं य एव मेता ममित्राणां व्यपनुत्तिं ब्रुवन् गृहानभ्येत्येत्य गृहान् पश्चाद् गृहस्याग्नेरुपविष्टायान्वारब्धाय ऋत्विगन्ततः कंसेन चतुर्गृहीतास्तिस्र आज्याहुतीरैन्द्रीः प्रपदं जुहोत्यनाधृष्या अरिष्टा अज्यान्या अभयाय ॥ ६ (१०) ॥

अपराजितां दिश मुपतिष्ठत इति यदुक्तं , तत्रैशान्या दिशो मुख्यापराजितत्वं दर्शयति— "देवासुरा वा एषु लोकेषु संयेतिरे ; त एतस्यां प्राच्यां दिशि येतिरे ; तांस्ततो ऽसुरा अजयंस्ते दक्षिणस्यां दिशि येतिरे ; तांस्ततो ऽसुरा अजयंस्ते प्रतीच्यां दिशि

येतिरे ; तांस्ततो ऽसुरा अजयंस्त उदीच्यां दिशि येतिरे ; तांस्ततो ऽसुरा अजयंस्त एतस्मिन्नवान्तरदेशे येतिरे ; य एष प्राङुदङ् ते ह ततो जिग्युः"–इति । पुरा कदाचिद् देवाश्च असुराश्च 'एषु' भूरादिलोकेषु निमित्तभूतेषु 'संयेतिरे' युद्धं कृतवन्तः । तत्र प्राच्यादिषु चतसृषु यत्रयत्र युद्धं कृतम् , तत्रतत्रासुराणा मेव विजयो ऽभूत् । 'य एष प्राङुदङ्' दिग्द्वयस्पर्शी कश्चिदवान्तरदेश ऐशान्यात्मकः, एतस्मिन् देशे यदा युद्धं कृतं, तदा 'ते' देवाः 'ततः' देशान्निमित्तभूतात् 'जिग्युः' जयं प्राप्ताः । तस्मादिय मैशानी दिगपराजिता पूर्वोक्तमन्त्रेणोपस्थेया ॥

त मेत मभिषिक्तक्षत्रियवृत्तान्तं तावदवस्थाप्य, तत्प्रसङ्गागतं पुरुषान्तरवृत्तान्तं दर्शयति— 'तं यदि क्षत्रिय उपधावेत् सेनयोः समायत्योस्तथा मे कुरु, यथाह मिमां सेनां जयानीति ; स यदि तथेति ब्रूयाद् , वनस्पते वीड्वङ्गो हि भूया इत्यस्य रथोपस्थ मभिमृश्याथैनं ब्रूयाद्"–इति । क्वचिद् * देशे युद्धार्थ मुभे सेने परस्परं समागच्छतः । तयोः समागच्छन्त्योः 'सेनयोः' मध्ये यः कोऽपि 'क्षत्रियः' विजयार्थी सन् 'तम्' अभिषिक्तं ऐशानीदिगुपस्थानयुक्तं राजानं यदि 'उपधावेत्' शरणं गच्छेत् । केन अभिप्रायेण ? इति, सोऽभिधीयते— हे अभिषिक्त क्षत्रिय ! यथा अहम् इमां शत्रुसेनां जयानि, तथा मे अनुग्रहं कुरु इति तदभिप्रायः । तदानीं 'सः' अभिषिक्तः क्षत्रियः यदि 'तथा–इति' अङ्गीकारं ब्रूयात् , तदानीं "वनस्पते"–इत्यृचा (सं० ६. ४७. २६. †) जयार्थिनः पुरुषस्य रथोर्द्ध्वभाग मभिमृश्यानन्तरम् 'एनं' जयार्थिनं प्रति वक्ष्यमाणं मन्त्रं ब्रूयात् ॥

---

* 'कस्मिंश्चिद्' ख ।

† आश्व० गृ० सू० २, ६, द० ।

तं मन्त्रं दर्शयति— "आतिष्ठस्वैतां ते दिश मभिमुखः सन्नद्धो रथोऽभिप्रवर्त्ततां ; स उदङ्, स प्रत्यङ्, स दक्षिणा, स प्राङ्, सोऽभ्यमित्र मिति"–इति । हे जयार्थिन्! 'एताम्' ऐशानीं दिशम् 'आतिष्ठस्व' प्राप्नुहि । ते रथः 'एताम्' ऐशानीं दिशं प्रत्यभिमुखः 'सन्नद्धः' सर्वायुधादिसन्नाहोपेतः अभितः प्रवर्त्तताम् । ततः 'सः' रथ उदङ्मुखः प्रवर्त्तताम् ; ततः 'सः' रथः प्रत्यङ्मुखः प्रवर्त्तताम् ; ततः 'सः' रथः दक्षिणामुखः प्रवर्त्तताम् ; ततः 'सः' रथः प्राङ्मुखः प्रवर्त्तताम् ; तत ऊर्द्धम् 'अभ्यमित्र" त्वदीयं शत्रुं प्रति प्रवर्त्तताम् ॥

जयार्थिनं प्रति एतन्मन्त्रकथनादूर्द्ध मभिषिक्तस्य कर्त्तव्यं दर्शयति— "अभीवर्त्तेन हविषेत्येवैन मावर्त्तयेदथैन मन्वीक्षेताप्रतिरथेन शासेन सौपर्णेनेति"–इति । "अभीवर्त्तेन"–इत्यादिसूक्तेन (सं०१०.१७४. ✻) 'एनं' जयार्थिन मुक्तक्रमेण दिक्ष्वावर्त्तयेत् । 'अथ' अनन्तर मावर्त्तमान मेनं सूक्तत्रयेण अन्वीक्षेत । "आशुः शिशानः"–इति (सं० १०.१०३. †) अप्रतिरथं सूक्तम्, "शास इत्था"–इति (सं० १०. १५२. ‡) शाससूक्तम्, "प्र धारा यन्तु मधुनः"–इति सौपर्णं सूक्तम् § ॥

अभिषिक्तस्य कृत्य मुक्त्वा जयार्थिनः कृत्यं दर्शयति—"जयति ह तां सेनाम्"–इति ॥

सेनाद्वययुद्धे जयार्थं प्रयोग मुक्त्वा पुरुषद्वन्द्वयुद्धेऽपि त माह— "यद्यु वा एन मुपधावेत्सङ्ग्रामं संयतिष्यमाणस्तथा मे कुरु यथाऽह मिमं सङ्ग्रामं सञ्जयानीत्येतस्या मेवैनं दिशि यातयेज्जयति ह

✻ आश्व० गृ० सू० ३. ११ द्र०।

†, ‡ आश्व० गृ० ३. १२ द्र० ।

§ आश्व० गृ० ३, १२, १४,— ३भा० ३५२पृ० द्र० ।

तं सङ्ग्रामम्''–इति । यः कोऽपि पुमान् 'संयतिष्यमाणः' युद्धं करिष्यन् तं सङ्ग्रामं जेतुम् 'एनम्' अभिषिक्तं यदि उपधावेत् , तथा मे कुर्विति पूर्ववत् (२११ पृ०) ॥

राष्ट्राद् भ्रष्टस्य पुनरपि राष्ट्रप्राप्त्यर्थं प्रयोगं दर्शयति—“ यद्यु वा एन मुपधावेद्राष्ट्रादपरुध्यमानस्तथा मे कुरु यथा ऽह मिदं राष्ट्रं पुनरवगच्छानीत्येता मेवैनं दिश मुपनिष्क्रमयेत्तथा ह राष्ट्रं पुनरवगच्छति''–इति । यथा वै सेनयोर्युद्धे पुरुषयोर्युद्धे वा अभिषिक्तेन उदीचीं दिशं प्रति प्रस्थापितस्य जयः , तथैव राष्ट्रभ्रष्टोऽपि अभिषिक्तेनैशानीं दिशं प्रस्थापितो राष्ट्रं पुनः प्राप्नोति ॥

इत्थं प्रासङ्गिकं प्रयोगत्रय मुक्त्वा प्रकृत मेव अभिषिक्तविषयं प्रयोग माह—“उपस्थायामित्राणां व्यपनुत्तिं ब्रुवन् गृहानभ्येत्यप प्राच इन्द्र विश्वाँ अमित्रानिति सर्वतो हास्मा अनमित्र मभयं भवत्युत्तरोत्तरिणीं ह श्रिय मश्नुते ; ऽश्नुते ह प्रजाना मैश्वर्यं माधिपत्यं ; य एव मेता ममित्राणां व्यपनुत्तिं ब्रुवन् गृहानभ्येति” –इति । पूर्वत्र (२०८ पृ०) “क्लृप्तिरसि”–इत्यादिमन्त्रेण अभिषिक्तस्य पदत्रयाभ्युत्क्रमेणैशानदिगुपस्थानं चाभिहितम् , तां दिश मुपस्थाय, अनन्तरम् 'अमित्राणां' शत्रूणां 'व्यपनुत्तिं' विशेषेणापनोदनहेतुम् , अत एव व्यपनुत्त्यभिधानाम् “अप प्राचः”– इत्यादिका मृचं (सं०१०.१३१.१.) ब्रुवन् , स्वगृहानभिगच्छेत् । तस्या मृचि द्वितीयपादे नुदस्वेतिश्रवणादियमृगमित्राणां व्यपनुत्तिः । 'अस्मै' एवं गृह मागच्छतोऽस्य यजमानस्य 'सर्वतः' सर्वासु दिक्षु शत्रुराहित्यलक्षण मभयं भवति । न केवलं भयराहित्यं किन्तु उत्तरोत्तराभिवृद्धिसम्पत्प्राप्त्युपायादिक मपि यथोक्तमन्त्रोच्चारणेन गृहानभ्यागतो भवति ॥

गृहप्राप्तेरूर्ध्वं कर्त्तव्यं विधत्ते— "एत्य गृहान् पश्चाद् गृह्यस्याग्नेरुपविष्टायान्वारब्धाय ऋत्विगन्ततः कंसेन चतुर्गृहीतास्तिस्र आज्याहुतीरैन्द्रीः प्रपदं जुहोत्यनार्त्त्या अरिष्ट्या अज्यान्या अभयाय"–इति। 'एत्य' गृहान् प्रत्यागत्य, योऽयं 'गृह्यः' गृहे वर्त्तमानः औपासनोऽग्निः, तस्य पश्चाद् भागे 'उपविष्टाय' आसीनाय ऋत्विजे 'अन्वारब्धाय' उपस्पृष्टवते क्षत्रियाय, तादृशस्य क्षत्रियस्य अनार्त्त्यादिसिद्ध्यर्थम् 'ऋत्विक्' अध्वर्युः 'अन्ततः' सर्वप्रयोगान्ते 'कंसेन' कांस्यपात्रेण 'चतुर्गृहीताः' चतुर्वारस्वीकृताः 'ऐन्द्रीः' इन्द्रदेवताकाः वक्ष्यमाणैस्त्रिभिः मन्त्रैस्तिस्र आज्याहुतीः प्रपदं यथा भवति तथा जुहुयात्। 'प्रपदं' प्रकृष्टं पदम्। तथा च आहुः—

"पादा यस्यास्तु यावन्तो यावदक्षरसम्मिताः।
ऋच्यध्ययन मेतेषां प्रपदं तद्विदुर्बुधाः"–इति॥

अतः प्रपदशब्देन अक्षरपादादिवैकल्यरहितं लाक्षणिक मुच्चारण मभिधीयते। 'अनार्त्तिः' व्याधिपीडाराहित्यम्। 'अरिष्टिः' शत्रुभिरहिंसा। 'अजानिः' द्रव्यहानिराहित्यम्। 'अभयं' चौरादिभयराहित्यम् *॥ ६ (१०)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तत्रिंशाध्याये) षष्ठः खण्डः॥ ६ (१०)॥

---

* तै० सं० १. ८.१५, तै० ब्रा० १. ७. ९, शत० ब्रा० ५. ४. ३, कात्या०श्रौ० १५. ६ द्र०।

॥ अथ सप्तमः खण्डः ॥

पर्यू षु प्र धन्व वाजसातये परि वृत्रा भूर्ब्रह्म प्राण ममृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये सह प्रजया सह पशुभिर्णि सक्षणिर्द्विषस्तरध्या ऋणया न ईयसे स्वाहा अनु हि त्वा सुतं सोम मदामसि महे सम भुवो ब्रह्म प्राण ममृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये सह प्रजया सह पशुभिर्यराज्ये वाजाँ अभि पवमान प्र गाहसे स्वाहा अजीजनो हि पवमान सूर्यं विधारे श स्वर्ब्रह्म प्राण ममृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये सह प्रजया सह पशुभिः क्मना पयो गोजीरया रंहमाणः पुरन्ध्या स्वाहेत्यनार्त्तो ह वा अरिष्टो ऽजीतः सर्वतो गुप्तस्त्रय्यै विद्यायै रूपेण सर्वा दिशो ऽनु सञ्चरत्यैन्द्रे लोके प्रतिष्ठितो यस्मा एता ऋत्विगन्ततः कंसेन चतुर्गृहीतास्तिस्र आज्याहुतीरैन्द्रीः प्रपदं जुहोत्यथान्ततः प्रजाति माशास्ते गवा मश्वानां पुरुषाणा मिह गावः प्रजायध्व मिहाश्वा इह पूरुषाः इहो सहस्रदक्षिणो वीरस्त्राता निषीदत्विति बहुर्ह वै प्रजया पशुभिर्भवति य एव मेता मन्ततः प्रजाति माशास्ते गवा मश्वानां पुरुषाणा मेष ह वाव क्षत्रियो विकृष्टो य मेवंविदो

याजयन्त्यथ ह तं व्येव कर्षन्ते यथा ह वा इदं निषादा वा सेळगा वा पापकृतो वा वित्तवन्तं पुरुषमरण्ये गृहीत्वा कर्त्तमन्वस्य वित्तमादाय द्रवन्त्येवमेव त ऋत्विजो यजमानं कर्त्तमन्वस्य वित्तमादाय द्रवन्ति यमनेवंविदो याजयन्त्येतद्ध स्म वै तद्विद्वानाह जनमेजयः पारिक्षित एवंविदं हि वै मामेवंविदो याजयन्ति तस्मादहं जयाम्यभीत्वरीं सेनां जयाम्यभीत्वर्या सेनया न मा दिव्या न मानुष्य इषव ऋच्छन्त्येष्यामि सर्वमायुः सर्वभूमिर्भविष्यामीति न ह वा एनं दिव्या न मानुष्य इषव ऋच्छन्त्येति सर्वमायुः सर्वभूमिर्भवति यमेवंविदो याजयन्ति याजयन्ति ॥ ७ (११) ॥

इत्यैतरेयब्राह्मणेऽष्टमपञ्चिकायां द्वितीयोऽध्यायः ॥२॥

उक्ताहुत्यर्थं प्रथमं मन्त्रमाह— "पर्यू षु प्र धन्व वाजसातये परि वृत्रा भूर्ब्रह्म प्राण ममृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये; सह प्रजया सह पशुभिर्णि सक्षणिर्द्विषस्तरध्या ऋणया न ईयसे स्वाहा"–इति । अत्र "पर्यूषु"–इत्यादिकाया ऋचः परि वृत्राणि सक्षणिरिति द्वितीयः पादः*; तस्मिन् पादे 'वृत्राणि'–इति यत् पदं, तस्य पदस्य मध्ये भूरित्यादिकं पशुभि-

---

* "पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः । द्विषस्तरध्या ऋणया न ईयसे"–इति सं० ९. ११०. १ ।

रित्यन्तं पदजातं प्रक्षेपणीयम् । वृत्रेत्येतदक्षरद्वयं पुरस्तात्, णीत्येतत् परस्तात्, मध्ये प्रक्षेपः । अत एव अस्योच्चारणस्य प्रपद मिति नाम सम्पन्नम् । प्रक्षिप्तं पदजातं यस्मिन् उच्चारणे तदुच्चारणं 'प्रपदम्' । तत्र तावत् संहिताया माम्नाताया ऋचो ऽय मर्थः— हे इन्द्र ! 'वाजसातये' अन्नलाभाय । 'परि-उ-षु'–इति निपातत्रयसमूहेन परित इत्येतावानेवार्थो ऽभिधीयते । 'परितः' सर्वतः 'प्र धन्व' प्रकर्षेण धारय । धारणार्थो धन्वति–धातुः । अस्मभ्य मन्नं धातुं चित्तं धारयेत्यर्थः । 'वृत्राणि' शत्रून् 'परि सक्षणिः' परितः निराकरिष्णुर्भव । सक्षणि–धातुरौचित्यान्निराकरणं ब्रूते । 'द्विषः' शत्रून् 'तरध्यै' तरितुम् 'ऋणयाः' प्रयत्नं प्राप्तः, 'नः' अस्मदर्थम् 'ईयसे' चेष्टसे इति । अस्या मृचि 'वृत्राणि' –इतिपदस्य मध्ये प्रक्षिप्तस्य भूरित्यादि–पशुभिरित्यन्त–पदजातस्याय मर्थः— 'अयं' क्षत्रियः 'असौ' विष्णुगुप्तादिनामको भूरादीन् 'प्रपद्यते' शरणं गच्छति । 'भूः' पृथिवी, 'ब्रह्म' वेदः, 'प्राणः' प्रसिद्धः, 'अमृतं' मरणरहितम् । देवतारूपं भूरादिकं शरणं प्रपन्नस्य क्षत्रियस्य 'प्रजया' पुत्रादिरूपया सह, 'पशुभिः' गवादिभिश्च सह 'स्वस्तये' क्षेमार्थं, त्वं 'शर्म' सुखं, 'वर्म' कवचम्, 'अभयं' भयरहितं देवतादिरूपं स्थानञ्च, कुर्विति शेषः । एतत्सिद्ध्यर्थं 'स्वाहा' तुभ्य मिदं सुहुत मस्तु ॥

प्रपदनामकं प्रथमं मन्त्र मुक्त्वा, तन्नामकं द्वितीयं मन्त्र माह— "अनु हि त्वा सुतं सोम मदामसि महे सम भूवो ब्रह्म प्राण ममृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये सह प्रजया सह पशुभिर्यं राज्ये वाजाँ अभि पवमान प्र गाहसे स्वाहा"–इति । अत्रापि "अनु हि त्वा"–इत्येतस्या मृचि 'महे समर्य राज्ये'–इति द्वितीयः

पादः *। तत्र 'समर्यं'-इति यत् पदं, तस्य समेत्यक्षरद्वय मधस्तात् कृत्वा, र्यंत्येतत् तृतीय मक्षर मुपर्यवस्थाप्य, भुव इत्यादिकं पदजातं प्रक्षेपणीयम् । तस्या ऋचो ऽय मर्थः— हे सोम ! 'सुतम्' अभिषुतं त्वाम् 'अनुमदामसि' वयं हृष्यामः । समरं युद्धम्, त मर्हति 'समर्यः' शूरः; तथाविध हे इन्द्र ! 'महे' महति राज्ये † 'एनं' क्षत्रियं, स्थापयेति शेषः । हे 'पवमान' शोधक! 'वाजान्' अन्नानि 'अभिप्रगाहसे' सर्वतः प्रकर्षेण गाहसे विलोड़यसि, सम्पादयसीत्यर्थः । पदमध्ये प्रक्षिप्तस्य पदजातस्य आदौ 'भुवः'-इत्यन्तरिक्ष मुच्यते; ब्रह्मेत्यादिकं स्वाहाकारान्तं पूर्ववत् (२१७ पृ०) ॥

प्रपदनामकं तृतीयं मन्त्र माह— "अजीजनो हि पवमान सूर्यं विधारे श स्वर्ब्रह्म प्राण ममृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये सह प्रजया सह पशुभिः क्मना पयो गोजीरया रंहमाणः पुरन्ध्या स्वाहेति"-इति । अत्रापि 'विधारे शक्मना'-इति द्वितीयः पादः ‡। तत्र तस्य शक्मनेतिपदस्य शेत्येक मक्षर मधस्तादुच्चार्य, क्मनेत्यक्षर मुपरिष्टादवस्थाप्य, मध्ये स्वरित्यादिकं पशुभिरित्यन्तं पदजातं प्रक्षेपणीयम् । तस्या ऋचो ऽय मर्थः— हे 'पवमान' शोधक ! इन्द्र ! त्वं सूर्यम् 'अजीजनः' उत्पादितवानसि । 'शक्मना' स्वशक्त्या 'पयः' जलं 'विधारे' विशेषेण

---

* "अनु हि त्वा सुतं सोम मदामसि महे समर्यं राज्ये । वाजा अभि पवमान प्र गाहसे"-इति सं० ९. ११०. २ ।

† पदसंहितायां तु 'समर्यराज्ये'-इत्येकं पदम्, समनुष्यराज्ये इति च तद्व्याख्यानं कृत मनेनैवाचार्येण संहिताभाष्ये ।

‡ "अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः । गोजीरया रंहमाणः पुरन्ध्या"-इति सं० ९. ११०, ३ ।

मेघमध्ये धारयसि । 'गोजीरया' गवां जीवनेन निमित्तेन 'रंहमाणः' वृष्टिप्रदानार्थं सञ्चरन्, 'पुरं' पूर्णफलं 'ध्या' चिन्तया *। गोजीरयेत्युपलक्षणं, सर्वप्राणिजीवन मित्यर्थः। अत्रापि 'शक्मना'-इतिपदमध्ये प्रक्षिप्तस्य पदजातस्यादौ 'स्वः'-इति द्युलोकोऽभिधीयते; ब्रह्मेत्यादिकं स्वाहाकारान्तं पूर्ववत् (२१७ पृ०)। एतेषां प्रपदनामकानां मन्त्राणां लक्षणं पूर्व मेव 'पादा यस्यास्तु'-इतिश्लोकेनोदाहृतम् (२१४ पृ०)। पर्युष्वित्यादिकाया ऋचो मध्ये भूर्ब्रह्म प्राणेत्यादिकायाः अस्या ऋचो यावन्तः पादाः यावदक्षरसम्मिताः, तेषां सर्वेषां पतनं प्रपद मिति तस्य लक्षणवाक्यस्यार्थः ॥

उक्तमन्त्रत्रयसाध्या आहुतीः प्रशंसति— "अनार्त्तो ह वा अरिष्टोऽजीतः सर्वतो गुप्तस्त्रय्यै विद्यायै रूपेण सर्वा दिशोऽनुसञ्चरत्यैन्द्रे लोके प्रतिष्ठितो यस्मा एता ऋत्विगन्ततः कंसेन चतुर्गृहीतास्तिस्र आज्याहुतीरैन्द्रीः प्रपदं जुहोति"-इति। 'यस्मै' क्षत्रियाय 'ऋत्विक्' अध्वर्युः 'अन्ततः' अभिषेकप्रयोगान्ते यथोक्तक्रमेण जुहोति। असौ क्षत्रियः 'अनार्त्तः' रोगरहितः, 'अरिष्टः' शत्रुभिरहिंसितः, तैः शत्रुभिः युद्धेऽप्यजितः†, सर्वतो 'गुप्तः' इन्द्रेण रक्षितः। केन साधनेन रक्षित इति, तदुच्यते— 'त्रय्यै विद्यायै रूपेण' वेदत्रयोक्तमन्त्रेणेत्यर्थः। तेन रक्षितः सन्, 'सर्वा दिशः' प्राच्याद्याः 'अनुसञ्चरति' अनुक्रमेण विजयार्थं प्रवर्त्तते, मरणादूर्द्धम् ऐन्द्रे लोके प्रतिष्ठितो भवति ॥

होमादूर्द्धं माशीर्मन्त्रपाठं विधत्ते— "अथान्ततः प्रजाति

---

* "'पुरन्ध्या' बहुविधप्रज्ञानेन"-इति संहिताभाष्ये सायणः।

† मूलपाठन्तु अजीत इति दीर्घमध्यः; तस्यैव व्याख्यान मजित इति।

माशास्ते,— गवा मश्वानां पुरुषाणा मिह गावः प्रजायध्व मिहाश्वा इह पूरुषाः इहो सहस्रदक्षिणो वीरस्त्राता निषीदत्विति"-इति । 'अथ' होमानन्तरम्, 'अन्ततः' प्रयोगान्ते "इह गावः"-इत्यादिमन्त्रेण * गवादीनां 'प्रजातिम्' उत्पत्तिम् 'आशास्ते' प्रार्थयेत । मन्त्रस्याय मर्थः— गावः 'इह' मद्राष्ट्रे 'प्रजायध्वं' प्रकर्षेणोत्पन्ना भवत । एव मश्वाः, पुरुषाश्च । 'इहो' अस्मिन् एव राष्ट्रे 'सहस्रदक्षिणः' यागेषु सहस्रसङ्ख्यदक्षिणादानशीलो 'वीरः' पुत्रः 'त्राता' प्रजानां रक्षकः सन्, निषीदतु ॥

अनेन मन्त्रेण प्रार्थनं प्रशंसति— "बहुर्ह वै प्रजया पशुभिर्भवति य एव मेता मन्ततः प्रजाति माशास्ते गवा मश्वानां पुरुषाणाम्"-इति । य एव माशास्ते क्षत्रियः, प्रजादिभिः बहुर्ह वै स्या मिति ; स एव तथा भवति ॥

पुनरभिषेकपर्यन्ते ऽस्मिन् क्षत्रिययागे याजयितॄणा मृत्विजां वेदनं प्रशंसति— "एष ह वाव क्षत्रियो ऽविकृष्टो य मेवंविदो याजयन्ति"-इति । 'एवम्' उक्ताभिषेकप्रकारं जानन्त ऋत्विजो 'यं' क्षत्रियं याजयति, 'एष एव' क्षत्रियः सर्वेषु 'अविकृष्टः' अनपकृष्टः ; न ह्यस्य कदाचिदप्यपकर्षो भवति ॥

ऋत्विजा मभिषेकपरिज्ञानाभावं निन्दति— "अथ ह तं व्येव कर्षन्ते, यथा ह वा इदं निषादा वा सेळगा वा पापकृतो वा वित्तवन्तं पुरुष मरण्ये गृहीत्वा कर्त्त मन्वस्य वित्त मादाय द्रवन्त्येव मेव त ऋत्विजो यजमानं कर्त्त मन्वस्य वित्त मादाय द्रवन्ति, य मनेवंविदो याजयन्ति"-इति । 'अनेवंविदः' अभिषेकप्रकार मजानन्त ऋत्विजो 'यं' क्षत्रियं याजयन्ति, 'तं'

---

* सा० म० ब्रा० १, २, १२ । "०णोऽपि पूषा नि०"-इति तत्र पाठः ।

क्षत्रियं 'विकर्षन्ते एव' विकृष्ट मपकृष्टं कुर्वन्त्येव । तत्रेदं निदर्शनमुच्यते— 'निषादाः' नीचजातयो मनुष्याः, 'सेळगाः' चौराः । इळा अन्नं, तया सह वर्त्तन्ते इति 'सेळाः' धनिकाः, तान् धनापहारार्थं गच्छन्तीति चौराः 'सेळगाः' । 'पापकृतः' हिंसाकारिणः । त एते त्रिविधा दुष्टाः 'वित्तवन्तं' बहुधनोपेतं पुरुष मरण्यमध्ये गृहीत्वा 'कर्त्तं मन्वस्य' कस्मिंश्चिदन्धकूपादिरूपे गर्ते तं प्रक्षिप्य, तदीयं धन मपहृत्य 'द्रवन्ति' पलायन्ते ; एव मेव अनभिज्ञा ऋत्विजो यजमानं नरकरूपं कर्त्तं मन्वस्य, नरकहेतोरनुष्ठाने अवस्थाप्य, दक्षिणारूपेण तदीयं द्रव्य मपहृत्य, स्वगृहेषु गच्छन्ति ॥

उक्ताभिषेकपर्यन्तक्षत्रिययाग मुदाहरणमुखेन प्रशंसति— "एतद्ध स्म वै तद्विद्वानाह जनमेजयः पारिक्षितः,— एवंविदं हि वै मा मेवंविदो याजयन्ति, तस्मादहं जयाम्यभीत्वरीं सेनां जयाम्यभीत्वर्या सेनया न मा दिव्या न मानुष्य इषव ऋच्छन्त्येष्यामि सर्व मायुः सर्वभूमिर्भविष्यामीति"—इति । परिक्षितस्य राज्ञः पुत्रो जनमेजयः, 'तदेतत्' सर्वं प्रयोगमाहात्म्यं विद्वान्, सभामध्ये एव मुवाच— अह मप्येवंवित्, ऋत्विजो ऽप्येवंविदः ; तस्माद् अभिषेकान्तेन यागेन द्वन्द्वयुद्धे जयामि । किञ्च 'अभीत्वरीम्' अभितो युद्धार्थं मुद्युक्तां परकीयां सेनां सदृश्या सेनया जयामि । तथाविधं मां 'दिव्या इषवः' देवप्रेरिता वाणाः न प्राप्नुवन्ति, 'मानुष्यः' चेषवः नाप्नुवन्ति, अपमृत्युरहितः सर्व मप्यायुः प्राप्स्यामि, सर्वा चतुस्सागरपरिवेष्टिता भूमिर्यस्याधीना सोऽयं 'सर्वभूमिः', तादृशो भविष्यामीति ॥

जनमेजयवाक्योदाहरणे दृढीकृत मर्थं निगमयति— "न ह वा एनं दिव्या न मानुष्य इषव ऋच्छन्त्येति, सर्व मायुः

सर्वभूमिर्भवति, य मेवंविदो याजयन्ति-याजयन्ति"-इति । स्पष्टोऽर्थः । अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ७ (११) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तत्रिंशाध्याये) सप्तमः खण्डः ॥ ७ (११) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'-नामभाष्ये
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायाः द्वितीयोऽध्यायः ॥

॥ अथ तृतीयाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ अथात ऐन्द्रो महाभिषेक॑स्ते देवा अब्रुवन्त्सप्रजापतिका॑ अयं वै देवाना मोजिष्ठो बलिष्ठः॑ सहिष्ठः सत्तमः पारयिष्णुतम॑ इम मेवाभिषिञ्चामहा इति तथेति॑ तद्वैतदिन्द्र मेव॑ तस्मा एता मासन्दीं समभरन्नृचं नाम॑ तस्यै बृहच्च रथन्तरञ्च॑ पूर्वौ पादावकुर्व॑न् वैरूपं च वैराजं चापरौ॑ शाक्वररैवते शीर्षण्ये॑ नौधसञ्च कालेयं चानूच्ये॑ ऋचः प्राचीनाताना॑न्त्सामानि तिरश्चीनवायान्॑ यजूंष्यतीकाशान्॑ यश आस्तरणं॑ श्रिय मुपबर्हणं॑ तस्यै सविता च बृहस्पति॑श्च पूर्वौ पादावधारयतां॑ वायुश्च पूषा चापरौ॑ मित्रावरुणौ शीर्षण्ये॑ अश्विनावनूच्ये॑ स एता मासन्दी मारोह॑द्वसवस्त्वा गायत्रेण छन्दसा॑ त्रिवृता स्तोमेन॑ रथन्तरेण साम्ना ऽऽरोह॑न्तु तानन्वारोहामि साम्राज्याय॑ रुद्रास्त्वा त्रैष्टुभेन छन्दसा॑ पञ्चदशेन स्तोमेन॑ बृहता साम्ना ऽऽरोहन्तु॑ तानन्वारोहामि भौज्याया॑दित्यास्त्वा जागतेन छन्दसा॑ सप्तदशेन

स्तोमेन वैरूपेण साम्ना ऽऽरोहन्तु तानन्वारोहामि स्वाराज्याय विश्वे त्वा देवा आनुष्टुभेन छन्दसैकविंशेन स्तोमेन वैराजेन साम्ना ऽऽरोहन्तु तानन्वारोहामि वैराज्याय साध्याश्च त्वाप्त्याश्च देवाः पाङ्क्तेन छन्दसा त्रिणवेन स्तोमेन शाक्वरेण साम्ना ऽऽरोहन्तु तानन्वारोहामि राज्याय मरुतश्च त्वाङ्गिरसश्च देवा अतिच्छन्दसा छन्दसा त्रयस्त्रिंशेन स्तोमेन रैवतेन साम्ना ऽऽरोहन्तु तानन्वारोहामि पारमेष्ठ्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायारोहामीत्येता मासन्दी मारोहत् त मेतस्या मासन्द्या मासीनं विश्वे देवा अब्रुवन्न वा अनभ्युत्क्रुष्ट इन्द्रो वीर्यं कर्तुं मर्हत्यभ्येन मुत्क्रोशामेति तथेति तं विश्वे देवा अभ्युदक्रोशन्निमं देवा अभ्युत्क्रोशत सम्राजं साम्राज्यं भोजं भोजपितरं स्वराजं स्वाराज्यं विराजं वैराज्यं राजानं राजपितरं परमेष्ठिनं पारमेष्ठ्यं क्षत्र मजनि क्षत्रियो ऽजनि विश्वस्य भूतस्याधिपतिरजनि विशा मत्ता ऽजनि पुरां भेत्ता ऽजन्यसुराणां हन्ता ऽजनि ब्रह्मणो गोप्ता ऽजनि धर्मस्य गोप्ता ऽजनीति त मभ्युत्क्रुष्टं प्रजापतिरभिषेक्ष्यन्नेतयर्चाभ्यमन्त्रयत ॥ १ (१२) ॥

॥ श्रीगणेशाय नमः ॥

पुनः कार्योऽभिषेकोऽन्ते क्रत्वन्तत्वेन वर्णितः ।
अभिषेकः पुमर्थो यस्तस्योपोद्घात उच्यते ॥ १ ॥

तत्रादाविन्द्रस्याभिषेकं प्रतिजानीते — "अथात ऐन्द्रो महाभिषेकः"–इति । 'अथ' मानुषक्षत्रियाभिषेकोक्त्यनन्तरम् , यतो दैवो ऽभिषेको बुभुत्सितः , अतः कारणादिन्द्रसम्बन्धी महाभिषेकः , कथ्यत इति शेषः । आरोहणाभ्युत्क्रोशनाभिमन्त्रणादिभिर्वक्ष्यमाणैरस्याभिषेकस्य महत्त्वं द्रष्टव्यम् ॥

तदभिषेकार्थं देवविचारं दर्शयति— "ते देवा अब्रुवन्सप्रजापतिका,— अयं वै देवाना मोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतम इम मेवाभिषिञ्चामहा इति ; तथेति ; तद्वै तदिन्द्र मेव"–इति । प्रजापतिना सह वर्त्तन्ते इति 'सप्रजापतिकाः' । 'ते' अग्न्यादयो देवाः परस्पर मिदम् 'अब्रुवन्' हस्तेन एनं प्रदर्श्य कथयन्ति । अय मेवेन्द्रो 'देवानां' मध्ये 'ओजिष्ठः' अतिशयेनाष्टमधातुयुक्तः, 'बलिष्ठः' अतिशयेन शरीरबलयुक्तः, 'सहिष्ठः' अतिशयेन वैर्यभिभवशीलः, 'सत्तमः' अतिशयेन स्वभक्तेषु साधुः, 'पारयिष्णुतमः' अतिशयेन प्रक्रान्तस्य कार्यस्य समाप्तिकृत् ; तस्मादिम मेव सर्वे वय मभिषिञ्चामहै । इति कैश्चिदुक्ते सति, अन्ये सर्वेऽपि 'तथा–इति' अङ्गीकृत्य , 'तद्वै' तदानी मेव, 'तदिन्द्र मेव' तं सर्वैरनुमित मिन्द्र मेव, अभ्यषिञ्चन्निति शेषः ॥

तत्र प्रकारं दर्शयति— "तस्मा एता मासन्दीं समभरन्नृचं नाम ; तस्यै बृहच्च रथन्तरञ्च पूर्वौ पादावकुर्वन् , वैरूपं च वैराजं चापरौ, शाक्वररैवते शीर्षण्ये, नौधसञ्च कालेयं चानूच्ये , ऋचः प्राचीनातानान्सामानि तिरश्चीनवायान् , यजूंष्यतीकाशान् ,

यश आस्तरणं, श्रिय मुपबर्हणं; तस्यै सविता च बृहस्पतिश्च पूर्वौ पादावधारयतां, वायुश्च पूषा चापरौ, मित्रावरुणौ शीर्षण्ये, अश्विनावनूच्ये; स एता मासन्दी मारोहद्"–इति । 'तस्मै' इन्द्रार्थम् 'एतां' वक्ष्यमाणां वेदमयी मासन्दीं समभरन् । 'ऋचं नाम'–इति आसन्द्या विशेषणम्, ऋग्रूपा मेतन्नामिका मित्यर्थः । 'तस्यै' तस्या ऋग्रूपाया आसन्द्या बृहदादीन्यष्टसामानि पूर्वपादाद्यष्टावयवान् अकुर्वन् । आसन्द्यां शयानस्येन्द्रस्य शिरोदेशस्थं फलकं 'शीर्षण्य', तच्च पाददेशावस्थितस्य फलकस्योपलक्षणम्; अत एव 'शीर्षण्ये'–इति द्विवचन मुच्यते । 'अनूच्ये' पार्श्वद्वयवर्त्तिनी फलके । ऋग्रूपा ये मन्त्राः सन्ति, तान् 'प्राचीनातानान्' प्राक्प्रत्यगायतनत्वेन विस्तारितान् दीर्घतन्तुविशेषानकुर्वन् । गीयमानानि 'सामानि' 'तिरश्चीनवायान्' तिर्यक्त्वेन वयनहेतून् ऋजुविशेषान् अकुर्वन् । यजूंषि 'अतीकाशान्' रज्ज्वन्तरालच्छिद्रविशेषान् अकुर्वन् । 'यशः' कीर्त्तिः, देवतारूपम् तदासन्द्या उपरि आस्तरणम् । 'श्रियं' या तु श्रीः सम्पदभिमानिनी देवता, ताम् 'उपबर्हणम्' शिरस उपधान मकुर्वन् । 'तस्यै' तस्या आसन्द्याः पादादीनष्टावयवान् सवित्रादयो ऽष्टौ देवा अधारयन् । इन्द्रः 'एतां' वेदमयीं वक्ष्यमाणैः षण्मन्त्रैरारोहत् ॥

तान् मन्त्रान् दर्शयति— "वसवस्त्वा गायत्रेण छन्दसा त्रिवृता स्तोमेन रथन्तरेण साम्ना ऽऽरोहन्तु, तानन्वारोहामि साम्राज्याय; रुद्रास्त्वा त्रैष्टुभेन छन्दसा पञ्चदशेन स्तोमेन बृहता साम्ना ऽऽरोहन्तु, तानन्वारोहामि भौज्याया ; ऽऽदित्यास्त्वा जागतेन छन्दसा सप्तदशेन स्तोमेन वैरूपेण साम्ना ऽऽरोहन्तु, तानन्वारोहामि

स्वाराज्याय ; विश्वे त्वा देवा आनुष्टुभेन छन्दसैकविंशेन स्तोमेन वैराजेन साम्ना ऽऽरोहन्तु, तानन्वारोहामि वैराज्याय ; साध्याश्च त्वाप्त्याश्च देवाः पाङ्क्तेन छन्दसा त्रिणवेन स्तोमेन शाक्वरेण साम्ना ऽऽरोहन्तु, तानन्वारोहामि राज्याय ; मरुतश्च त्वाङ्गिरसश्च देवा अतिच्छन्दसा छन्दसा त्रयस्त्रिंशेन स्तोमेन रैवतेन साम्ना ऽऽरोहन्तु, तानन्वारोहामि पारमेष्ठ्याय ; माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायारोहामीत्येता मासन्दी मारोहत्"–इति । वस्वादयो देवगणाः, गायत्र्यादिच्छन्दोभिः, त्रिवृदादिस्तोमैः ; रथन्तरादिसामभिश्च सह हे आसन्दि ! त्वां प्रथमत आरोहन्तु ; तान् 'अनु' पश्चादह मारोहामि । 'आप्त्याः'–इत्यनेनापि वस्वादिशब्दवत् कश्चिद्देवगणविशेष उच्यते । साम्राज्यादीन्यारोहणप्रयोजनानि । एते च शब्दाः पूर्वाध्याये "व्याघ्रचर्मणा स्तृणाति"–इत्यस्मिन् खण्डे (१८६ पृ०) व्याख्याताः । एतैः षड्भिर्मन्त्रैरिन्द्र उक्ता मासन्दी मारोहत् ॥

इन्द्रारोहणादूर्ध्वं देवाना मभ्युत्क्रोशनं दर्शयति— "त मेतस्या मासन्द्या मासीनं विश्वे देवा अब्रुवन्,— न वा अनभ्युत्क्रुष्ट इन्द्रो वीर्यं कर्तुं मर्हत्यभ्येन मुत्क्रोशामेति ; तथेति ; तं विश्वे देवा अभ्युदक्रोशन्निमं देवा अभ्युत्क्रोशत सम्राजं साम्राज्यं भोजं भोजपितरं स्वराजं स्वाराज्यं विराजं वैराज्यं राजानं राजपितरं परमेष्ठिनं पारमेष्ठ्यं, क्षत्र मजनि क्षत्रियो ऽजनि विश्वस्य भूतस्याधिपतिरजनि विशा मत्ता ऽजनि पुरां भेत्ता ऽजन्यसुराणां हन्ता ऽजनि ब्रह्मणो गोप्ता ऽजनि धर्मस्य गोप्ता ऽजनीति"–इति । 'एतस्यां' वेदमय्या मासन्द्या मासीनं 'तम्' इन्द्रं प्रति 'विश्वे' सर्वे देवाः परस्पर मिद मब्रुवन् । यथा लोके वन्दिनो गुणकथनेन

राज्ञः कीर्त्तिं कुर्वन्ति, एव मत्रापि गुणकीर्त्तनम् 'अभ्युत्क्रोशनम्', तेन रहितः 'अनभ्युत्क्रुष्टः' इन्द्रो युद्धादौ वीर्यं कर्त्तुं नैवार्हति ; कीर्त्तिं मन्तरेण परेषां प्रीत्यनुदयात् । तस्माद् अभितः 'एनम्' इन्द्रम् 'उत्क्रोशाम' उद्घोषयामि । 'इति' एवं विचार्य, 'तथा–इति' अङ्गीकृत्य, 'तम्' इन्द्रम् सर्वे देवा अभ्युदक्रोशन् । इम मित्यादिरभ्युत्क्रोशनप्रकारः । हे देवाः ! 'इमम्' इन्द्रम् अभितः 'उत्क्रोशत' उद्घोषयत । कीदृश मिन्द्रम् ? सम्राट्स्वरूपम्, अत एव साम्राज्यं कर्त्तुं मर्हम् ; 'भोजं' भोक्तारम्, अत एव 'भोजपितरं' भोगपालकम् ; स्वराड्रूपत्वादेव स्वाराज्यं कर्तुं मर्हम् ; विराड्रूपत्वादेव वैराज्यं कर्त्तुं मर्हम् ; राजरूपत्वाद् 'राजपितरं' सर्वेषां राज्ञां पालकम् ; परमेष्ठिरूपत्वात् पारमेष्ठ्यं पद मनुभवितुं योग्यम् । 'क्षत्र मजनि' ईदृशी क्षत्रियजातिर्लोके समुत्पन्ना । तज्जातिमान् क्षत्रियः पुरुषः समुत्पन्नः । सर्वस्य प्राणिजातस्याधिपतिरुत्पन्नः । 'विशां' प्रजानाम् 'अत्ता' भोक्ता समुत्पन्नः । 'पुरां' परकीयानां 'भेत्ता' विदारयिता समुत्पन्नः । असुराणां 'हन्ता' घातकः समुत्पन्नः । 'ब्रह्मणः' वेदस्य 'गोप्ता' रक्षकः समुत्पन्नः । 'इति' अय मुत्क्रोशनमन्त्रः ॥

अभ्युत्क्रोशनादूर्द्ध्वं प्रजापतिकर्त्तव्यं दर्शयति— "त मभ्युत्क्रुष्टं प्रजापतिरभिषेक्ष्यन्नेतयर्चाभ्यमन्त्रयत"–इति । 'एतया' निषसादेति (२२९ पृ०) वक्ष्यमाणया ॥ १ (१२) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां तृतीयाध्याये
(अष्टत्रिंशाध्याये) प्रथमः खण्डः ॥ १ (१२) ॥

॥ अथ द्वितीयः खण्डः ॥

निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठाय सुक्रतुरिति त मेतस्या मासन्द्या मासीनं प्रजापतिः पुरस्तात् तिष्ठन् प्रत्यङ्मुख औदुम्बर्यार्द्रया शाखया सपलाशया जातरूपमयेन च पवित्रेणान्तर्धायाभ्यषिञ्चद् इमा आपः शिवतमा इत्येतेन तृचेन देवस्य त्वेति च यजुषा भूर्भुवस्स्वरित्येताभिश्च व्याहृतिभिः ॥ २ (१३) ॥

“एतयर्चाभ्यमन्त्रयत”—इत्यत्र योऽयं मन्त्र ऋक्शब्देन विवक्षितः, तं मन्त्रं दर्शयति— “निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठाय सुक्रतुरिति”—इति । ‘धृतव्रतः’ स्वीकृतनियमो ‘वरुणः’ सर्वस्यारिष्टस्य निवारयितेन्द्रः, ‘पस्त्यासु’ गृहेष्वागत्य, साम्राज्यादिफलसिद्ध्यर्थं ‘सुक्रतुः’ शोभनसङ्कल्पो भूत्वा ‘निषसाद’ अस्या मासन्द्यां निषस्सवान् ॥

अनेन मन्त्रेणाभिमन्त्रितस्येन्द्रस्याभिषेकप्रकारं दर्शयति— “त मेतस्या मासन्द्या मासीनं प्रजापतिः पुरस्तात् तिष्ठन् प्रत्यङ्मुख औदुम्बर्यार्द्रया शाखया सपलाशया जातरूपमयेन च पवित्रेणान्तर्धायाभ्यषिञ्चद्, इमा आपः शिवतमा इत्येतेन तृचेन, देवस्य त्वेति च यजुषा, भूर्भुवस्स्वरित्येताभिश्च व्याहृतिभिः”—

इति । 'एतस्यां' पूर्वोक्तायां वेदमय्या मासन्द्या मासीनं 'तम्' इन्द्रं प्रजापतिरभ्यषिञ्चत् । किं कुर्वन्? 'पुरस्तात्' आसन्द्याः पूर्वस्यां दिशि प्रत्यङ्मुखस्तिष्ठन् । किं कृत्वा? 'आर्द्रया' आर्द्रपत्रोपेतया उदुम्बरशाखया सुवर्णमयेन च पवित्रेण 'अन्तर्धाय' व्यवधानं कृत्वा । केन मन्त्रेण? "इमा आपः"–इत्यादिकेन, क्रत्वङ्गाभिषेके प्रोक्तेन (१८९पृ०) त्रिविधेन मन्त्रजातेन ॥२(१३)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां तृतीयाध्याये
(अष्टत्रिंशाध्याये) द्वितीयः खण्डः ॥ २ (१३) ॥

॥ अथ तृतीयः खण्डः ॥

अथैनं प्राच्यां दिशि वसवो देवा॑ः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्च॑न्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः साम्राज्याय॑ तस्मादेतस्यां प्राच्यां दिशि॑ ये के च प्राच्यानां राजान॑ः साम्राज्यायैव ते ऽभिषिच्यन्ते॑ सम्राळित्येनानभिषिक्तानाचक्षत॑ एता मेव देवानां विहितिं॑ मन्वथैनं दक्षिणस्यां दिशि॑ रुद्रा देवा॑ः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्च॑न्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभि॑र्भौ-

ज्याय' तस्मादेतस्यां दक्षिणस्यां दिशि' ये के च सत्वतां राजानो' भौज्यायैव ते ऽभिषिच्यन्ते' भोजेत्येनानभिषिक्तानाचक्षत' एता मेव देवानां विहिति' मन्वथैनं प्रतीच्यां दिश्यादित्या देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः स्वाराज्याय' तस्मादेतस्यां प्रतीच्यां दिशि' ये के च नीच्यानां राजानो' ये ऽपाच्यानां स्वाराज्यायैव ते ऽभिषिच्यन्ते' स्वराळित्येनानभिषिक्तानाचक्षत 'एता मेव देवानां विहिति' मन्वथैन मुदीच्यां दिशि विश्वे देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्वैराज्याय' तस्मादेतस्या मुदीच्यां दिशि' ये के च परेण हिमवन्तं' जनपदा उत्तरकुरव उत्तरमद्रा इति' वैराज्यायैव ते ऽभिषिच्यन्ते 'विराळित्येनानभिषिक्तानाचक्षत 'एता मेव देवानां विहिति' मन्वथैन मस्यां ध्रुवायां' मध्यमायां प्रतिष्ठायां दिशि' साध्याश्चाप्त्याश्च देवाः' षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभी राज्याय' तस्मादस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि' ये के च कुरुपञ्चालानां

राजानः सवशोशीनराणां राज्यायैव ते ऽभिषिच्यन्ते राजेत्येनानभिषिक्तानाचक्षत एता मेव देवानां विहिति मन्वथैन मूर्ध्वायां दिशि मरुतश्चाङ्गिरसश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः पारमेष्ठ्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायेति स परमेष्ठी प्राजापत्यो ऽभवत् स एतेन महाभिषेकेणाभिषिक्त इन्द्रः सर्वा जितीरजयत् सर्वाँल्लो*कानविन्दत् सर्वेषां देवानां श्रैष्ठ्य मतिष्ठां परमता मगच्छत्साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्य माधिपत्यं जित्वास्मिँल्लोके † स्वयम्भूः स्वराळमृतो ऽमुष्मिन्त्स्वर्गे लोके सर्वान्कामानाप्त्वा ऽमृतः समभवत् समभवत् ॥ ३ (१४) ॥

इत्यैतरेयब्राह्मणेऽष्टमपञ्चिकायां तृतीयोऽध्यायः॥ ३ ॥

इन्द्रस्य प्रजापतिकृताभिषेकादूर्ध्वं दिग्भेदेन देवविशेषै रभिषेकः कृतः ; तत्र प्राच्यां दिशि त मभिषेकं दर्शयति—“अथैनं प्राच्यां दिशि वसवो देवाः षड्भिश्चैव पञ्चविंशैरहोभि-

---

* ‘सर्वान्लो०’–इति क, ‘सर्वांलो०’–इति ग, ‘सर्वाँल्लो०’–इति ख, ङ ।

† ‘०स्मिंलोके’–इति क, ग, ‘०स्मिँल्लोके’–इति ङ ।

रभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः साम्राज्याय"–इति । 'अथ' प्राजापत्याभिषेकानन्तरम्, 'एनम्' इन्द्रं प्राच्यां दिशि अवस्थिता वसवो देवा एकत्रिंशत्सु अहस्सु पूर्वोक्तैर्मन्त्रैः अभ्यषिञ्चत्; तच्च साम्राज्यसिद्धये भवति ॥

इदानीं लौकिकाचारप्रदर्शनेनेन्द्रस्य प्राच्यां दिशि तमभिषेकं द्रढयति— "तस्मादेतस्यां प्राच्यां दिशि ये के च प्राच्यानां राजानः साम्राज्यायैव ते ऽभिषिच्यन्ते सम्राळित्येनानभिषिक्तानाचक्षत एता मेव देवानां विहिति मनु"–इति । यस्माद् वसुभिः प्राच्यां दिश्यभिषेकः कृतः, 'तस्मात्' इदानी मपि 'प्राच्यानां' पूर्वदिग्वर्त्तिनां मनुष्याणां ये के च राजानः सन्ति, ते सर्वेऽपि 'देवानां' वसूनां सम्बन्धिनीम् 'एता मेव विहितिं' पूर्वोक्त मेव विधानम् अनु 'साम्राज्याय' साम्राज्यसिद्ध्यर्थं मभिषिच्यन्ते । अत एव अभिषिक्तान् 'एनान्' राज्ञः 'सम्राट्' 'इति' अनेन शब्देन व्यवहरन्ति ॥

दिगन्तरेषु* देवान्तरैरिन्द्राभिषेकं दर्शयति— "अथैनं दक्षिणस्यां दिशि रुद्रा देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्भौज्याय तस्मादेतस्यां दक्षिणस्यां दिशि ये के च सत्वतां राजानो भौज्यायैव ते ऽभिषिच्यन्ते भोजेत्येनानभिषिक्तानाचक्षत एता मेव देवानां विहिति मन्वथैनं प्रतीच्यां दिश्यादित्या देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः स्वाराज्याय तस्मादेतस्यां प्रतीच्यां दिशि ये के च नीच्यानां राजानो ये ऽपाच्यानां स्वाराज्यायैव ते ऽभिषिच्यन्ते स्वराळित्ये-

---

* "दिगन्तरेऽपि"–इति ख ।

नानभिषिक्तानाचक्षत एता मेव देवानां विहिति मन्वथैन मुदीच्यां दिशि विश्वे देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्वैराज्याय तस्मादेतस्या मुदीच्यां दिशि ये के च परेण हिमवन्तं जनपदा उत्तरकुरव उत्तरमद्रा इति वैराज्यायैव ते ऽभिषिच्यन्ते विराळित्येनानभिषिक्तानाचक्षत एता मेव देवानां विहिति मन्वथैन मस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि साध्याश्चाप्त्याश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभी राज्याय तस्मादस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि ये के च कुरुपञ्चालानां राजानः सवशोशीनराणां राज्यायैव ते ऽभिषिच्यन्ते राजेत्येनानभिषिक्तानाचक्षत एता मेव देवानां विहिति मन्वथैन मूर्द्धायां दिशि मरुतश्चाङ्गिरसश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः पारमेष्ठ्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायेति स परमेष्ठी प्राजापत्यो ऽभवत्"—इति । प्रथमपर्यायवद् व्याख्येयम् । 'सत्वतां' दक्षिणस्यां दिशि वर्त्तमानाः प्राणिनः सत्वन्नामकाः *, तेषाम् । ये राजानोऽभिषिक्ताः, ते 'भोज' 'इति' अनेन शब्देन व्यवह्रियन्ते । प्रतीच्यां दिशि वर्त्तमानाः प्राणिनो नीच्या अपाच्याश्च† । निकर्षं मञ्चन्तीति 'नीच्याः', अपकर्षं मञ्चन्तीति 'अपाच्याः' । जात्या निकर्षः, व्यवहारेणापकर्षः । उभयविधानां प्राणिनां ये राजानः सन्ति, ते 'स्वराट्' 'इति' अनेन

---

* "तदेतद् गाथयाभिगीतम्— 'शतानीकः समन्तासु मेध्यं सात्राजितो हयम् । आदत्त यज्ञं काशीनां भरतः सत्वता मिव'—इति"—इति शत० ब्रा० १३. ५. ४. २१ ।

† 'उड्राः कुन्तलाश्च अपाच्याः'—इति है० अभि० चि० ९६१ ।

शब्देन व्यवह्रियन्ते । उदीच्यां दिशि 'हिमवन्तं परेण' हिमवत्पर्वतस्य परभागे 'जनपदाः' ग्रामविशेषाः 'उत्तरकुरवः' उत्तरकुरुनामकाः *, 'उत्तरमद्राः' उत्तरमद्रनामकाः सन्ति, तत्रत्या राजानो 'विराट्' 'इति' अनेन शब्देन व्यवह्रियन्ते । 'मध्यमा दिक्' मध्यदेशः । स च प्राच्यादिभिर्दिग्भिः सर्वाभिरपेक्ष्यत्वेन 'ध्रुवः' भवति ; तदपेक्षयैव पूर्वा पश्चिमेत्यादिः व्यवहारः । स च देशः सर्वेषां वैदिकाना माश्रयः । तत्र ये वशदेशैः † उशीनरदेशैश्च सहिताः कुरुपञ्चालदेशाः सन्ति, तेषां देशानां ये राजानः, ते 'राजा' 'इति' अनेन शब्देन व्यवह्रियन्ते । 'ऊर्ध्वायां दिशि' स्वर्गरूपायाम्, मनुष्यस्य सञ्चाराभावात् तत्र राजानो नोदाहृताः, किन्तु इन्द्रस्यैवाभिषेक उक्तः । तस्यां दिश्यभिषेकेण 'सः' इन्द्रः 'परमेष्ठी' परमपदे अवस्थितः, 'प्राजापत्यः' प्रजापतिसम्बन्धी अभवत् ॥

कृत्स्न मिन्द्राभिषेकं निगमयति— "स एतेन महाभिषेकेणाभिषिक्त इन्द्रः सर्वा जितीरजयत् सर्वाँल्लोकानविन्दत् सर्वेषां देवानां श्रैष्ठ्य मतिष्ठां परमता मगच्छत्साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्य माधिपत्यं जित्वास्मिँल्लोके स्वयम्भूः स्वराळमृतो ऽमुष्मिन्त्स्वर्गे लोके सर्वान् कामानाप्त्वा ऽमृतः समभवत्-समभवत्"-इति । पूर्वोक्ताभिषेकेण अभिषिक्तः

---

* 'अहो सह शरीरेण प्राप्तोऽस्मि परमां गतिम् । उत्तरान् वा कुरून् पुण्यानथ वाप्यमरावतीम्"-इति महा० भा० १३ प० २८४१ । 'नैवेशिकं सर्वगुणोपपन्नं ददाति वै यस्तु नरो द्विजाय । स्वाध्यायचारित्रगुणान्विताय तस्यापि लोकाः कुरुषूत्तरेषु'—इति च तत्रैव २९५८ ।

† वश इत्यस्यैवाक्षरविपर्ययेणैकारद्वययोगेन च महाभारतादौ प्रसिद्धः किं शिविरिति ? । तथा ह्यादिपर्वणि 'शिविरौशीनरः'-इति ३६६९ ।

इन्द्रः 'जितीः' जेतव्याः सर्वा युद्धभूमीः अजयत् । तेन जयेन सर्वान् लोकान् 'अविन्दत्' अलभत ; देवानां मध्ये 'श्रैष्ठ्यम्' अतिशयेन प्रशस्तत्वम् , 'अतिष्ठां' सर्वानतिक्रम्यावस्थानं 'परमताम्' उत्कृष्टत्व मगच्छत् । जातितः उत्तमत्वं श्रैष्ठ्यम् , गुणैरुत्तमत्वं परमत्वम् । साम्राज्यादीनि पदानि अस्मिंल्लोके 'जित्वा' प्राप्य 'स्वयम्भूः' प्रजापतिरूपः , 'स्वराट्' स्वतन्त्रराजः , 'अमृतः' इतरमनुष्यवदल्पकाले मरणरहितः सन् 'अमुष्मिन्' परोक्षे स्वर्गे लोके सर्वान् 'कामान्' भोगान् प्राप्य 'अमृतः' मरणरहितो मुक्तः समभवत् ॥ अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ३ (१४) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां तृतीयाध्याये
(अष्टत्रिंशाध्याये) तृतीयः खण्डः ॥ ३ (१४) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'–नामभाष्ये
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायाः तृतीयोऽध्यायः ॥

॥ अथ चतुर्थाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ स य इच्छेदेवंवित्क्षत्रिय मयं॑ सर्वा जितीर्जयेता॑यं सर्वाँल्लोकान् * विन्देता॑यं सर्वेषां राज्ञां॑ श्रैष्ठ्य मतिष्ठां परमता गच्छेत॑ साम्राज्यं भौ॑ज्यं स्वाराज्यं वैराज्यं॑ पारमेष्ठ्यं राज्यं॑ माहाराज्य माधिप॑त्य मयं समन्तपर्यायी स्या॑त्सार्वभौमः सार्वायुष॑ † आन्तादा परार्द्धात्॑ पृथिव्यै समुद्रपर्यन्ताया एकरा॑ळिति त मेतेनैन्द्रेण महाभिषेकेण॑ क्षत्रियं शापयित्वा ‡ ऽभिषिञ्चे॑त् याञ्च रात्रीमजायेथा॑ याञ्च प्रेता॑सि तदुभय मन्तरेणेष्टापूर्त्तं ते लोकं॑ सुकृत मायुः प्रजां वृञ्जीयं॑ यदि मे द्रुह्येरिति॑ स य इच्छेदेवंवित्क्षत्रियो ऽहं॑ सर्वा जितीर्जयेय॑ महं सर्वाँल्लोकान् विन्देय॑ महं सर्वेषां राज्ञां॑ श्रैष्ठ्य मतिष्ठां परमतां गच्छेयं॑ साम्राज्यं भौज्यं॑ स्वाराज्यं वैराज्यं॑ पारमेष्ठ्यं राज्यं॑ माहाराज्य माधिपत्य॑ महं

---

* "सर्वान् लोकान्" क, 'सर्वांलोकान्' ग, "सर्वांल्लोकान्" ङ।

† "सर्वायुषः" क, ख।

‡ "शाणयित्वा" ङ।

समन्तपर्यायी स्यां॑ सार्वभौमः सार्वायुष॑ आन्तादा परार्द्धात्॑ पृथिव्यै समुद्रपर्यन्ताया एकराळिति॑ स न विचिकित्सेत्॑स ब्रूयात्सह श्रद्धया॑ यां च रात्री मजाये ऽहं॑ यां च प्रेतास्मि॑ तदुभयमन्तरेणेष्टापूर्त्तं मे लोकं॑ सुकृत मायुः प्रजां वृञ्जीथा॑ यदि ते द्रुह्येय मिति॑ ॥ १ (१५) ॥

॥ श्रीगणेशाय नमः ॥

पुरुषार्थाभिषेकार्थ मादावैन्द्राभिषेचनम् ।
उक्त मत्र पुमर्थोऽय मभिषेक उदीर्यते ॥ १ ॥

त मभिषेकं विधत्ते— "स य इच्छेदेवंवित् क्षत्रिय मयं सर्वा जितीर्जयेतायं सर्वांल्लोकान् विन्देतायं सर्वेषां राज्ञां श्रैष्ठ्य मतिष्ठां परमतां गच्छेत साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्य माधिपत्य मयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुष आन्तादा परार्द्धात् पृथिव्यै समुद्रपर्यन्ताया एकराळिति त मेतेनैन्द्रेण महाभिषेकेण क्षत्रियं शापयित्वा ऽभिषिञ्चेद्"— इति । 'एवंवित्' इन्द्रसम्बन्धिमहाभिषेकविद् 'यः' आचार्यः क्षत्रियं प्रति सर्वजयादिफल मिच्छेत्, 'सः' आचार्यः क्षत्रिय मेतं 'शापयित्वा' शपथं कारयित्वा, 'एतेन' पूर्वोक्तेन इन्द्रसम्बन्धिना महाभिषेकविधानेन 'तं' क्षत्रिय मभिषिञ्चेत् । कीदृशी फलेच्छा ? इति, साभिधीयते— 'अयं' क्षत्रियो जेतव्याः सर्वा युद्धभूमीर्जयेत् ; तथा 'सर्वान् लोकान्' देशविशेषान् लभेत ; 'सर्वेषां' राज्ञां मध्ये श्रैष्ठ्याद्याधिपत्यान्तगुणयुक्तो भवेत् ; 'समन्तपर्यायी' देशतः कालतः सर्वव्यापी स्यात् ; 'आ अन्तात्' समुद्र-

तीरपर्यन्तं सार्वभौमत्वं देशव्याप्तिः, 'आ परार्द्धात्' परार्द्धशब्दाभिधेयकालसङ्ख्यापर्यन्तं सर्वायुषत्वं कालव्याप्तिः; एवंविधो भूत्वा समुद्रपर्यन्तायाः पृथिव्याः एक एव राजा अस्तु; 'इति' अनयेच्छया आचार्यो महाभिषेकेण त मभिषिञ्चेत् ॥

शापयित्वेति यदुक्तं, त मेव शपथप्रकारं दर्शयति— "याञ्च रात्री मजायेथा, याञ्च प्रेतासि, तदुभय मन्तरेणेष्टापूर्त्तं ते लोकं सुकृत मायुः प्रजां वृञ्जीयं यदि मे द्रुह्येरिति"–इति । अभिषिच्यमान ! हे क्षत्रिय ! यद्याचार्याय मे 'द्रुह्येः' द्रोहं कुर्याः, तदानीं त्वं 'यां रात्रि मजायेथाः' यस्यां रात्रावुत्पन्नोऽसि, 'याञ्च रात्रिं प्रेतासि' यस्यां रात्रौ मरिष्यसि, 'तदुभय मन्तरेण' उत्पत्तिमरणदिनयोर्द्वयोर्मध्ये 'ते' तव 'इष्टापूर्त्तं' श्रौतस्मार्त्तकर्मद्वयं, तथा पुण्यलोकं, तद्धेतुभूत मन्यदपि सुकृतं, दीर्घ मायुः, 'प्रजां' पुत्रादिकां 'वृञ्जीय' त्वत्तो वर्जयेयम्; 'इति' एतद् आचार्यस्य वाक्यम् । तदेतदङ्गीकारयित्वा पश्चादभिषिञ्चेत् आचार्यः ॥

क्षत्रियार्थी यादृशीं फलपरम्परां कामयित्वा शपथं कारयति, क्षत्रियोऽपि तादृशीं फलपरम्परां कामयमानः शपथं कुर्यात् । तदेतत् क्षत्रियवाक्यं दर्शयति— "स य इच्छेदेवंवित् क्षत्रियोऽहं सर्वा जितीर्जयेय महं सर्वाँल्लोकान् विन्देय महं सर्वेषां राज्ञां श्रैष्ठ्य मतिष्ठां परमतां गच्छेयं साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्य माधिपत्य महं समन्तपर्यायी स्यां सार्वभौमः सार्वायुष आन्तादा परार्द्धात् पृथिव्यै समुद्रपर्यन्ताया एकराळिति, स न विचिकित्सेत्, स ब्रूयात् सह श्रद्धया, याञ्च रात्री मजायेऽहं याञ्च प्रेतास्मि, तदुभय मन्तरेणेष्टापूर्त्तं मे लोकं सुकृत मायुः प्रजां वृञ्जीथा यदि ते द्रुह्येय मिति"–इति । 'यः' क्षत्रियः

‘एवंवित्’ महाभिषेकमाहात्म्याभिज्ञः, सर्वंजयादिकं समुद्रपर्यन्तं, पृथिव्या मेकराजत्वपर्यन्तं फलजात मिच्छेत् (पूर्वत्राचार्यवाक्यत्वात् जयेत विन्देतेत्यादिः प्रथमपुरुषप्रयोगः , अत्र तु क्षत्रियवाक्यत्वात् जयेय मित्यादिः उत्तमपुरुषप्रयोगः), ‘सः’ क्षत्रियः फलकामी ‘न विचिकित्सेत्’ आचार्योक्ते ऽर्थे संशयं न कुर्यात् । ‘सः’ क्षत्रिय आचार्यस्याभीष्टं शपथ मेवं कुर्यात् ,— हे आचार्य ! अहं यदि ते द्रुह्येयम् , तदानीं त्वं मम जन्ममरणमध्यवर्त्तीष्टापूर्त्तादिकं सर्वं ‘वृञ्जीथाः’ नाशयेः , इति श्रद्धया सहितं शपथं ब्रूयात् ॥ १ (१५) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) प्रथमः खण्डः ॥ १ (१५) ॥

॥ अथ द्वितीयः खण्डः ॥

अथ ततो ब्रूयाच्च॑तुष्टयानि वानस्पत्यानि सम्भरत॑ नैय्यग्रोधान्यौदुम्बराण्या॑श्वत्थानि प्लाक्षाणीति॑ क्षत्रं वा एतद् वनस्पतीनां यन्न्यग्रोधो॑ यन्नैय्यग्रोधानि सम्भरन्ति॑ क्षत्र मेवास्मिंस्तद्दधाति॑ भौज्यं वा एतद् वनस्पतीनां यदुदुम्बरो॑ यदौदुम्बराणि सम्भरन्ति॑ भौज्य मेवास्मिंस्तद्दधाति॑ साम्राज्यं वा एतद्

वनस्पतीनां यदश्वत्थो॑ यदाश्वत्थानि सम्भरन्ति॑ साम्राज्य मेवास्मिंस्तद्दधाति॑ स्वाराज्यञ्च ह वा एतद् वैराज्यञ्च वनस्पतीनां यत् प्लक्षो॑ यत्प्लाक्षाणि सम्भरन्ति॑ स्वाराज्यवैराज्ये एवास्मिंस्तद्दधात्य॑थ ततो ब्रूयाच्चतुष्टयान्यौषधानि सम्भरत॑ तोक्मकृतानि॑ व्रीहीणां महाव्रीहीणां॑ प्रियङ्गूनां यवाना मिति॑ क्षत्रं वा एतदोषधीनां यद् व्रीहयो॑ यद् व्रीहीणां तोक्म सम्भरन्ति॑ क्षत्र मेवास्मिंस्तद्दधाति॑ साम्राज्यं वा एतदोषधीनां यन् महाव्रीहयो॑ यन्महाव्रीहीणां तोक्म सम्भरन्ति॑ साम्राज्य मेवास्मिंस्तद्दधाति॑ भौज्यं वा एतदोषधीनां यत् प्रियङ्गवो॑ यत् प्रियङ्गूनां तोक्म सम्भरन्ति॑ भौज्य मेवास्मिंस्तद्दधाति॑ सैनान्यं वा एतदोषधीनां यद्यवा॑ यद्यवानां तोक्म सम्भरन्ति॑ सैनान्य मेवास्मिंस्तद्दधाति॑ ॥ २ (१६) ॥

सम्भारान् विधत्ते— "अथ ततो ब्रूयाच्चतुष्टयानि वानस्पत्यानि सम्भरत,— नैयग्रोधान्यौदुम्बराण्याश्वत्थानि प्लाक्षाणीति" —इति । 'अथ' क्षत्रियशपथानन्तरम्, यत आचार्येणाभिषेकः कर्त्तव्यः, 'ततः' कारणादाचार्यः परिचारकान् ब्रूयात्,— वनस्पतिसम्बन्धीनि न्यग्रोधादीनि (फलानि चतुर्विधानि *) हे परिचारकाः ! सम्पादयतेति ॥

---

* बन्धनीचिह्नान्तःकृतंपदद्वयं घ-च-पुस्तकयोर्नास्ति ।

तत्र वृक्षचतुष्टयं क्रमेण प्रशंसति— "क्षत्रं वा एतद् वनस्पतीनां यन्न्यग्रोधो ; यन्नैय्यग्रोधानि सम्भरन्ति, क्षत्र मेवास्मिंस्तद्दधाति ; भौज्यं वा एतद् वनस्पतीनां यदुदुम्बरो ; यदौदुम्बराणि सम्भरन्ति, भौज्य मेवास्मिंस्तद्दधाति ; साम्राज्यं वा एतद् वनस्पतीनां यदश्वत्थो ; यदाश्वत्थानि सम्भरन्ति, साम्राज्य मेवास्मिंस्तद्दधाति ; स्वाराज्यञ्च ह वा एतद् वैराज्यञ्च वनस्पतीनां यत् प्लक्षो ; यत् प्लाक्षाणि सम्भरन्ति, स्वाराज्यवैराज्ये एवास्मिंस्तद्दधाति"–इति । न्यग्रोधस्य वनस्पतीनां मध्ये राजवद् व्याप्त्याधिक्यात् क्षत्रत्वम् ; उदुम्बरादीनां भौज्यादिसाधनत्वात् तद्रूपत्वम् । अतश्चतुर्विधफलसम्पादनेन यजमाने क्षत्रभौज्यादीनि फलानि सम्पादयति ॥

सम्भारान्तराणि विधत्ते— "अथ ततो ब्रूयाच्चतुष्टयान्यौषधानि सम्भरत तोक्मकृतानि,— व्रीहीणां, महाव्रीहीणां, प्रियङ्गूनां, यवाना मिति"–इति । 'अथ' नैयग्रोधादिफलसम्पादनानन्तरम्, यतो व्रीह्याद्यङ्कुरसम्पादन मपेक्षितम् ; 'ततः' आचार्य एवं ब्रूयात्,— हे परिचारकाः ! 'तोक्मकृतानि' अङ्कुरनिमित्तान्यौषधिद्रव्याणि चतुर्विधानि सम्पादयत । सूक्ष्मबीजरूपा व्रीहयः, प्रौढबीजरूपा महाव्रीहयः, प्रियङ्गवो यवाश्च प्रसिद्धाः ॥

चतुर्विध मोषधिद्रव्यं प्रशंसति— "क्षत्रं वा एतदोषधीनां यद् व्रीहयो ; यद् व्रीहीणां तोक्म सम्भरन्ति, क्षत्र मेवास्मिंस्तद्दधाति ; साम्राज्यं वा एतदोषधीनां यन्महाव्रीहयो ; यन्महाव्रीहीणां तोक्म सम्भरन्ति, साम्राज्य मेवास्मिंस्तद्दधाति ; भौज्यं वा एतदोषधीनां यत् प्रियङ्गवो ; यत् प्रियङ्गूनां तोक्म सम्भरन्ति ; भौज्य मेवास्मिंस्तद्दधाति ; सैनान्यं वा एतदोषधीनां यद्यवा ;

यद्यवानां तोक्म सम्भरन्ति, सैनान्य मेवास्मिंस्तद्दधाति"–इति । ओषधीनां मध्ये व्रीहीणां बलहेतुत्वात् क्षत्रत्वम्, महाव्रीह्यादीना मपि अनुष्ठानद्वारा साम्राज्यहेतुत्वात् तद्रूपत्वम्; अतो व्रीह्यादितोक्माना मङ्कुराणां सम्पादनेन यजमाने क्षत्रसाम्राज्यादिकं सर्वं सम्पादयति ॥ २ (१६) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनत्रिंशाध्याये) द्वितीयः खण्डः ॥ २ (१६) ॥

॥ अथ तृतीयः खण्डः ॥

अथास्मा औदुम्बरीमासन्दीं सम्भरन्ति॑ तस्या उक्तं ब्राह्मणं॑ मौदुम्बरश्चमसो वा पात्री वोदुम्बरशाखा॑ तानेतान्त्सम्भारान्त्सम्भृत्यौ॑दुम्बर्यां पात्र्यां वा चमसे वा समावपेयु॑स्तेषु समोप्ते॑षु दधि मधु सर्पिरातपवर्ष्या आपो॑ऽभ्यानीय प्रतिष्ठा॑प्यैतामासन्दीमभिमन्त्रयेत॑ बृहच्च ते रथन्तरञ्च॑ पूर्वौ पादौ भवतां॑ वैरूपञ्च वैराजं चापरौ॑ शाक्वररैवते शीर्षण्ये॑ नौधसञ्च कालेयं चानूच्ये॑ ऋचः प्राचीनातानाः॑ सामानि तिरश्चीनवाया॑ यजूंष्यतीकाशा॑ यश आस्तरणं॑ श्रीरुप-

बर्हणं॑ सविता च ते बृहस्पतिश्च॑ पूर्वौ पादौ धारयतां॑ वायुश्च पूषा चापरौ॑ मित्रावरुणौ शीर्षण्ये॑ अश्विनावनूच्ये इत्यथैन मेता मासन्दी मारोहयेद् वसवस्त्वा गायत्रेण छन्दसा॑ * त्रिवृता स्तोमेन॑ रथन्तरेण साम्ना ऽऽरोहन्तु॑ तानन्वारोह साम्राज्याय॑ रुद्रास्त्वा त्रैष्टुभेन छन्दसा॑ पञ्चदशेन स्तोमेन॑ बृहता साम्ना ऽऽरोहन्तु॑ तानन्वारोह भौज्याया॑दित्यास्त्वा जागतेन छन्दसा॑ सप्तदशेन स्तोमेन॑ वैरूपेण साम्ना ऽऽरोहन्तु॑ तानन्वारोह स्वाराज्याय॑ विश्वे त्वा देवा आनुष्टुभेन छन्दसैकविंशेन स्तोमेन॑ वैराजेन साम्ना ऽऽरोहन्तु॑ तानन्वारोह वैराज्याय॑ मरुतश्च त्वाङ्गिरसश्च देवा॑ अतिच्छन्दसा छन्दसा त्रयस्त्रिंशेन स्तोमेन॑ रैवतेन साम्ना ऽऽरोहन्तु॑ तानन्वारोह पारमेष्ठ्याय॑ साध्याश्च त्वाप्त्याश्च देवाः॑ पाङ्क्तेन छन्दसा॑ त्रिणवेन स्तोमेन॑ शाक्वरेण साम्ना ऽऽरोहन्तु॑ तानन्वारोह राज्याय॑ माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायारोहेत्येता मासन्दी मारोहयेत् त मेतस्या मासन्द्या मासीनं॑ राजकर्त्तारो ब्रूयुर्न॑ वा अनभ्युत्क्रुष्टः क्षत्रियो वीर्यं कर्त्तुं मर्हत्य॑भ्येन मुत्क्रोशामेति॑ तथेति॑ तं राजकर्त्तारो ऽभ्युत्क्रोशन्तीमं॑ जना अभ्युत्क्रोशत सम्राजं

---

* "छन्दसा"-इति ङ। एव मिहोत्तरत्रापि।

साम्राज्यं भोजं भोजपितरं स्वराजं स्वाराज्यं विराजं वैराज्यं परमेष्ठिनं पारमेष्ठ्यं राजानं राजपितरं क्षत्रमजनि क्षत्रियो ऽजनि विश्वस्य भूतस्याधिपतिरजनि विशा मत्ता ऽजन्यमित्राणां हन्ता ऽजनि ब्राह्मणानां गोप्ता ऽजनि धर्मस्य गोप्ता ऽजनीति त मभ्युत्क्रुष्ट मेवंविदभिषेक्ष्यन्नेतयर्चाभिमन्त्रयेत ॥ ३ * (१७) ॥

आसन्द्यादिसम्भारान् विधत्ते—"अथास्मा औदुम्बरी मासन्दीं सम्भरन्ति ; तस्या उक्तं ब्राह्मण मौदुम्बरश्चमसो वा पात्री वोदुम्बरशाखा ; तानेतान्त्सम्भारान्त्सम्भृत्यौदुम्बर्यां पात्र्यां वा चमसे वा समावपेयुस्तेषु समोप्तेषु दधि मधु सर्पिरातपवर्ष्या आपो ऽभ्यानीय प्रतिष्ठाप्यैता मासन्दी मभिमन्त्रयेत"—इति । 'अथ' वानस्पत्यौषधिसम्भारानन्तरम्, 'अस्मै' क्षत्रियायौदुम्बरी मासन्दीं सम्पादयेयुः । 'तस्याः' चासन्द्या विधायकं 'ब्राह्मणं' "प्रादेशमात्राः पादाः"—इत्यादिना पूर्व मेवोक्तम् † । चतुष्कोणो दण्डयुक्तः पात्रविशेषश्चमसः ‡ । आकारनियमरहिता

---

* प्राय एष एव खण्डः किञ्चिद्पाठव्यत्ययेन पूर्व मपि श्रुतः (२२२पृ०) ।

† १८२पृ० ९पं०, १८४पृ० १०पं० ।

‡ 'चमसो देवपानः'—इति ऋ० सं० १०. १६. ८ । 'औदुम्बरेण चमसेन चतुःस्रक्तिना'—इति शत० ब्रा० ७. ९. ११. २ । न्यग्रोध-रोहितक-पर्णान्यतमकाष्ठनिर्मितश्च स भवति । 'दश चमसान्त्सवन्तानधः'—इति का० श्रौ० ९. २. २२ । 'स्रवमतः'—इति च मानवसूत्रम् । तथाच ते सुष्टियुक्ताः ; किञ्च होतुः, ब्रह्मणः, उद्गातुः ; सुन्वतः, प्रशास्तुः, ब्राह्मणाच्छंसिनः, पोतुः, नेष्टुः, आग्नीध्रस्य, अच्छावाकस्येति दश । कात्या० श्रौ० (९. ९. २५ ; १९. ३,) भाष्यं द्रष्टव्यम् ।

'पात्री' *। तयोः पात्रीचमसयोरन्यतरमौदुम्बरं सम्पादयेत्। यद्वा, पात्री मृन्मयी, शाखा चौदुम्बरी सम्पादनीया। ततः पात्रीचमसयोरन्यतरस्मिन् वानस्पत्यौषधिसम्भारान् समावपेयुः। समोप्तेषु तेषु सम्भारेषु दध्यादीनां सेचनं कृत्वा चमसं भूमौ प्रतिष्ठाप्य एता मासन्दीं वक्ष्यमाणमन्त्रेणाभिमन्त्रयेत्॥

तं मन्त्रं दर्शयति— "बृहच्च ते रथन्तरञ्च पूर्वौ पादौ भवतां, वैरूपञ्च वैराजं चापरौ, शाक्वररैवते शीर्षण्ये, नौधसञ्च कालेयं चानूच्ये, ऋचः प्राचीनातानाः, सामानि तिरश्चीनवाया, यजूंष्यतीकाशा, यश आस्तरणं, श्रीरुपबर्हणं, सविता च ते बृहस्पतिश्च पूर्वौ पादौ धारयतां, वायुश्च पूषा चापरौ, मित्रावरुणौ शीर्षण्ये, अश्विनावनूच्ये इति"–इति। इन्द्रासन्दीप्रतिपादकवाक्यवदयं मन्त्रो व्याख्येयः †॥

अभिमन्त्रणादूर्ध्व माचार्यकर्त्तव्यं दर्शयति— "अथैन मेता मासन्दी मारोहयेद्"–इति। 'अथ' अभिषिक्तम् 'एनं' क्षत्रियं एतस्या मासन्द्यारूढं कुर्यात्॥

तत्र मन्त्रं दर्शयति— "वसवस्त्वा गायत्रेण छन्दसा, त्रिवृता स्तोमेन, रथन्तरेण साम्नाऽऽरोहन्तु, तानन्वारोह साम्राज्याय; रुद्रास्त्वा त्रैष्टुभेन छन्दसा, पञ्चदशेन स्तोमेन, बृहता साम्नाऽऽरोहन्तु, तानन्वारोह भौज्याय; आदित्यास्त्वा जागतेन छन्दसा,

---

* पात्री त्रिविधा भवति। तत्र 'इडापात्री' अरत्निमात्री मध्यसङ्गृहीता; 'पुरोडाशपात्री' प्रादेशमात्री समचतुरस्रा, अर्थात् षडङ्गुलपरिमितपरिमण्डलखातवती; 'पिष्टपात्री' हविर्धारणी अतिविपुला; सैवाकारनियमरहिता इति विवेकः। कात्या° श्रौ० १. ३. ३६ सू० या० वृ० द्र०।

† २२५पृ० २१पं० आरभ्य द्रष्टव्यम्।

सप्तदशेन स्तोमेन, वैरूपेण साम्ना ऽऽरोहन्तु ; तानन्वारोह स्वाराज्याय ; विश्वे त्वा देवा आनुष्टुभेन छन्दसैकविंशेन स्तोमेन, वैराजेन साम्ना ऽऽरोहन्तु ; तानन्वारोह वैराज्याय ; मरुतश्च त्वाङ्गिरसश्च देवा अतिच्छन्दसा छन्दसा , त्रयस्त्रिंशेन स्तोमेन , रैवतेन साम्ना ऽऽरोहन्तु ; तानन्वारोह पारमेष्ठ्याय ; साध्याश्च त्वाप्त्याश्च देवाः पाङ्क्तेन छन्दसा , त्रिणवेन स्तोमेन , शाक्वरेण साम्ना ऽऽरोहन्तु ; तानन्वारोह राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायारोहेत्येता मासन्दी मारोहयेत्"–इति । इन्द्रारोहणमन्त्रवत् व्याख्येयम् * । तत्र आरोहणकर्त्तुः अप्रयोज्यत्वात् 'आरोहामि'–इत्युत्तमपुरुषः, अत्र त्वाचार्यप्रयोज्यत्वात् 'आरोह' –इति मध्यमपुरुषः । तत्रत्ययोः पञ्चमषष्ठमन्त्रयोः अत्र क्रमविपर्यासो ऽध्ययनसम्प्रदायप्राप्तः (२२४पृ०) । अनेन मन्त्रेण आचार्यः आसन्द्यां क्षत्रिय मारोहयेत् ॥

आरोहणादूर्द्ध्व मभ्युत्क्रोशनं विधत्ते— "त मेतस्या मासन्द्या मासीनं राजकर्त्तारो ब्रूयुर्न वा अनभ्युत्क्रुष्टः क्षत्रियो वीर्यं कर्त्तु मर्हत्यभ्येन मुत्क्रोशामेति ; तथेति ; तं राजकर्त्तारो ऽभ्युत्क्रोशन्तीमं जना अभ्युत्क्रोशत सम्राजं साम्राज्यं भोजं भोजपितरं स्वराजं स्वाराज्यं विराजं वैराज्यं परमेष्ठिनं पारमेष्ठ्यं राजानं राजपितरं ; क्षत्र मजनि, क्षत्रियो ऽजनि, विश्वस्य भूतस्याधिपतिरजनि, विशा मत्ता ऽजन्यमित्राणां हन्ता ऽजनि, ब्राह्मणानां गोप्ता ऽजनि, धर्मस्य गोप्ता ऽजनीति"–इति । राज्ञः कर्त्तारो 'राजकर्त्तारः' पितृभ्रात्रादयः । इन्द्रविषयाभ्युत्क्रोशनवाक्यवदिदं वाक्यं व्याख्येयम † ॥

---

* २३६पृ० २०पं० आरभ्य द्रष्टव्यम्। † २२७पृ० १५पं० आरभ्य द्रष्टव्यम्।

आचार्यस्य क्षत्रियाभिमन्त्रणं विधत्ते— "त मभ्युत्क्रुष्ट मेवंविदभिषिच्यन्नेतयर्चाभिमन्त्रयेत"–इति । पूर्ववद् (२२८ पृ०) व्याख्येयम् ॥ ३ (१७) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनत्रिंशाध्याये) तृतीयः खण्डः ॥ ३ (१७) ॥

॥ अथ चतुर्थः खण्डः ॥

निष॑साद धृ॒तव्र॑तो॒ वरु॑णः प॒स्त्या॑स्वा॑ साम्राज्याय भौज्याय॑ स्वाराज्याय वैराज्याय॑ पारमेष्ठ्याय राज्याय॑ माहाराज्यायाधिपत्याय॑ स्वावश्यायातिष्ठाय सुक्रतुरिति॑ त मेतस्या मासन्द्या मासीन॑ मेवंवित् पुरस्तात् तिष्ठन् प्रत्यङ्मुख॑ औदुम्बर्यार्द्रया शाखया॑ सपलाशया जातरूपमयेन च पवित्रेणान्तर्धायाभिषिञ्चतीमा आपः शिवतमा इत्येतेन तृचेन देवस्य त्वेति च यजुषा भूर्भुवस्स्वरित्येताभिश्च व्याहृतिभिः * ॥ ४ (१८) ॥

---

* पुरस्तादप्याम्नात एष खण्डः । अस्ति च तत्र द्वयोः पाठभेदः (२२९पृ०) ।

एतयर्चेत्युक्तं (२४५पृ० ६पं०) मन्त्रं दर्शयति— "निषसाद धृतव्रतो वरुणः पस्त्यास्वा, साम्राज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठाय सुक्रतुरिति"–इति । पूर्ववद् (२२९पृ०) व्याख्येयम् ॥

अभिमन्त्रणादूर्ध्व मभिषेकप्रकारं दर्शयति— "त मेतस्या मासन्द्या मासीन मेवंवित् पुरस्तात् तिष्ठन् प्रत्यङ्मुख औदुम्बर्यार्द्रया शाखया सपलाशया जातरूपमयेन च पवित्रेणान्तर्धायाभिषिञ्चतीमा आपः शिवतमा इत्येतेन तृचेन, देवस्य त्वेति च यजुषा, भूर्भुवस्स्वरित्येताभिश्च व्याहृतिभिः"–इति । इन्द्राभिषेकवाक्यवद् (२३०पृ०) व्याख्येयम् ॥ ४ (१८) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) चतुर्थः खण्डः ॥ ४ (१८) ॥

॥ अथ पञ्चमः खण्डः ॥

प्राच्यां त्वा दिशि वसवो देवाः॑ षड्भिश्चैव पञ्चविं॑शैरहोभिरभिषिञ्च॑न्त्वेतेन च तृचेनैतेन च य॑जुषैताभिश्च व्याहृतिभिः साम्राज्या॑य दक्षिणस्यां त्वा दिशि रुद्रा देवाः॑ षड्भिश्चैव पञ्चविंशै॑रहोभिरभिषि॑ञ्चन्त्वेतेन च तृचेनैतेन च यजुषै॑ताभिश्च व्याहृ-

तिभिर्भौज्याय प्रतीच्यां त्वा दिश्यादित्या देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः स्वाराज्यायोदीच्यां त्वा दिशि विश्वे देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्वैराज्यायोर्ध्वायां त्वा दिशि मरुतश्चाङ्गिरसश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः पारमेष्ठ्यायास्यां त्वा ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि साध्याश्चाप्त्याश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभी राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायेति स परमेष्ठी प्राजापत्यो भवति स एतेनैन्द्रेण महाभिषेकेणाभिषिक्तः क्षत्रियः सर्वा जितीर्जयति सर्वाँल्लोकान् * विन्दति सर्वेषां राज्ञां श्रैष्ठ्य मतिष्ठां परमतां गच्छति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्यमाधिपत्यं जित्वाऽस्मिँल्लोके† स्वयम्भूः स्वराळमृतोऽमुष्मिन्स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः सम्भ-

---

* "सर्वालोकान्" घ, "सर्वान् लोकान्" क, ङ। "सर्वांल्लोकान्" ख।

† "ऽस्मिंलोके" घ, "ऽस्मिंल्लोके" क, ङ।

वर्ति य मेतेनैन्द्रेण महाभिषेकेण क्षत्रियं शापयित्वा ऽभिषिञ्चति ॥ ५ (१९) ॥

अभिषेकादूर्ध्व मभिमन्त्रण माह—“प्राच्यां त्वा दिशि वसवो देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः साम्राज्याय ; दक्षिणस्यां त्वा दिशि रुद्रा देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्भौज्याय ; प्रतीच्यां त्वा दिश्यादित्या देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः स्वाराज्याय ; उदीच्यां त्वा दिशि विश्वे देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्वैराज्याय ; ऊर्ध्वायां त्वा दिशि मरुतश्चाङ्गिरसश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः पारमेष्ठ्याय ; अस्यां त्वा ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि साध्याश्चाप्त्याश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभी राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायेति ; स परमेष्ठी प्राजापत्यो भवति”—इति । उक्तेन मन्त्रेणाभिमन्त्रितः क्षत्रियः परमेष्ठिपदस्य योग्यो भूत्वा प्रजापतेः सम्बन्धीति ॥

महाभिषेक मुपसंहरति— “स एतेनैन्द्रेण महाभिषेकेणाभिषिक्तः क्षत्रियः सर्वा जितीर्जयति , सर्वाँल्लोकान् विन्दति , सर्वेषां राज्ञां श्रैष्ठ्य मतिष्ठां परमतां गच्छति ; साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्य माधिपत्यं जित्वा ऽस्मिँल्लोके

स्वयम्भूः स्वराळमृतो ऽमुष्मिन्त्स्वर्गे लोके सर्वान् कामानाप्त्वा ऽमृतः सम्भवति, य मेतेनैन्द्रेण महाभिषेकेण क्षत्रियं शापयित्वा ऽभिषिञ्चति"–इति । 'यं' क्षत्रियं आचार्यः स्वद्रोहराहित्याय शपथं कारयित्वा इन्द्रसम्बन्धिना महाभिषेकेण अभिषिञ्चति, सोऽभिषिक्तः क्षत्रियः इन्द्रवत् सर्वं जयादि फलं प्राप्नोति ॥ ५ (१८) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) पञ्चमः खण्डः ॥ ५ (१८) ॥

॥ अथ षष्ठः खण्डः ॥

इन्द्रियं वा एतदस्मिँल्लोके * यद्दधि॑ यद्दध्ना ऽभिषिञ्चती॑न्द्रिय मेवास्मिंस्तद्दधाति॑ रसो वा एष ओषधिवनस्पतिषु यन् मधु॑ यन् मध्वाभिषिञ्चति॑ रस मेवास्मिंस्तद्दधाति॑ तेजो वा एतत्पशूनां यद् घृतं यद् घृतेनाभिषिञ्चति॑ तेज एवास्मिंस्तद्दधात्य॑मृतं वा एतदस्मिँल्लोके † यदापो॑ यदद्भिरभिषिञ्चत्य॑मृतत्व मेवास्मिंस्तद्दधाति॑ सो ऽभिषिक्तो ऽभिषेक्त्रे ब्राह्मणाय हिरण्यं दद्या॑त् सहस्रं दद्या॑त् क्षेत्रं चतुष्पाद्

---

*, † "०स्मिन् लोके" क, "०स्मिंल्लोके" ख, ङ, "०स्मिंलोके" घ ।

दद्यादथाप्याहुरसङ्ख्यात मेवापरिमितं दद्यादपरिमितो वै क्षत्रियो ऽपरिमितस्यावरुद्ध्या इत्यथास्मै सुराकंसं हस्त आदधाति स्वादिष्ठया मदिष्ठया पवस्व सोम धारया इन्द्राय पातवे सुत इति तां पिबेद् यदत्र शिष्टं रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः इदं तदस्य मनसा शिवेन सोमं राजान मिह भक्षयामि अभि त्वा वृषभा सुते सुतं सृजामि पीतये तृम्पा व्यश्नुही मद मिति यो ह वाव सोमपीथः सुरायां प्रविष्टः सहैवैतेनैन्द्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य भक्षितो भवति न सुरा तां पीत्वा ऽभिमन्त्रयेतापाम सोमं शन्नो भवेति तद्यथैवादः प्रियः पुत्रः पितरं प्रिया वा जाया पतिं सुखं शिव मुपस्पृशत्याविस्रसं एवं हैवैतेनैन्द्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य सुरा वा सोमो वान्यद्वान्नाद्यं सुखं शिव मुपस्पृशत्याविस्रसः ॥ ६ (२०) ॥

अभिषेकसाधनानि दध्यादिद्रव्याणि प्रशंसति— "इन्द्रियं वा एतदस्मिँल्लोके यद्दधि, यद्दध्ना ऽभिषिञ्चतीन्द्रिय मेवास्मिंस्तद्दधाति ; रसो वा एष ओषधिवनस्पतिषु यन् मधु, यन् मध्वाभिषिञ्चति रस मेवास्मिंस्तद्दधाति ; तेजो वा एतत् पशूनां यद् घृतं, यद् घृतेनाभिषिञ्चति तेज एवास्मिंस्तद्दधाति ; अमृतं वा एतदस्मिन् लोके यदापो , यदद्भिरभिषिञ्चत्यमृतत्व मेवास्मिंस्तद्-

धाति"–इति। दध्न इन्द्रियपाटवहेतुत्वाद् इन्द्रियत्वम्। मधुनः पुष्पजन्यत्वेन ओषधिवनस्पतिरसत्वम्। घृतस्य स्निग्धभास्वरत्वेन पशुतेजस्त्वम्। अपां चाप्यायनहेतुत्वादमृतत्वम्। एतैर्द्रव्यैरभिषिक्ते सति यजमान इन्द्रियादिकं सम्पादयति॥

आचार्याय दक्षिणादानं विधत्ते— "सोऽभिषिक्तोऽभिषेक्त्रे ब्राह्मणाय हिरण्यं दद्यात्, सहस्रं दद्यात्, क्षेत्रं चतुष्पाद्दद्यात्; अथाप्याहुरसङ्ख्यात मेवापरिमितं दद्यादपरिमितो वै क्षत्रियोऽपरिमितस्यावरुद्ध्या इति"–इति। हिरण्यस्यैव सङ्ख्या सहस्र मिति, सहस्रनिष्कपरिमित मित्यर्थः*। चतुष्पाच्छब्देन गवादिक मभिधीयते। पूर्वोक्तसहस्रपक्ष मपेक्ष्याधिकाभिप्रायेण असङ्ख्यात मिति पक्षान्तर मुक्तम्; तस्यैव व्याख्यान मपरिमित मिति। इयदेवेति सङ्ख्यानियमो नास्ति किन्तु स्वशक्त्यनुसारेण प्रभूत मेव दद्यात्। क्षत्रियो हि देशाधिपतित्वेन 'अपरिमितः' बहुधनयुक्तः, अतः 'अपरिमितस्य' प्रभूतस्य फलस्य सिद्ध्यर्थ मित्यभिप्रायेण पक्षान्तरम्॥

दक्षिणायां दत्ताया माचार्यकर्त्तव्यं दर्शयति — "अथास्मै सुराकंसं हस्त आदधाति, स्वादिष्ठया मदिष्ठया पवस्व सोमधारया इन्द्राय पातवे सुत इति"–इति। 'अथ' दक्षिणास्वीकारादनन्तरम्, 'अस्मै' अस्य क्षत्रियस्य हस्ते सुरया पूर्णं कांस्यपात्रं

---

* "सर्षपाः षट् यवो मध्यस्, त्रियवं त्वेककृष्णलम्।
पञ्चकृष्णलको माषस्, ते सुवर्णस्तु षोडश।
* * * *। चतुःसौवर्णिको निष्कः"–इत्यादि म० सं० ८. १३३–३८। "अभिषेचनीये तु द्वात्रिंशतं–द्वात्रिंशतं सहस्राणि पृथङ् मुख्येभ्यः, षोडश-षोडश द्वितीयिभ्यः, अष्टावष्टौ तृतीयिभ्यः, चत्वारि–चत्वारि पादिभ्यः"–इति आश्व० श्रौ० ९. ३. ३–५।

स्वादिष्ठयेति मन्त्रेण स्थापयेत् । स च मन्त्रः क्रत्वङ्गाभिषेके व्याख्यातः (२०२पृ० ५पं०) ॥

क्षत्रियकर्त्तव्यं दर्शयति— “तां पिबेद् , यदत्र शिष्टं रसिनः सुतस्य , यदिन्द्रो अपिबच्छचीभिः , इदं तदस्य मनसा शिवेन , सोमं राजान मिह भक्षयामि ; अभि त्वा वृषभा सुते , सुतं सृजामि पीतये, तृम्पा व्यश्नुही मद मिति”–इति । ‘तां’ कांस्यपात्रस्थां सुरां क्षत्रियो यदत्रेतिमन्त्रद्वयेन पिबेत् । ‘अत्र’ कांस्यपात्रे ‘रसिनः’ रसयुक्तस्य ‘सुतस्य’ अभिषुतस्य व्रीह्याद्यङ्कुरजस्य पेयद्रव्यस्य यत् ‘शिष्ट’’ योऽवशिष्टो भागः , ‘यत्’ च द्रव्यं ‘शचीभिः’ कर्मविशेषैः संस्कृत मिन्द्रो ऽपिबत् । शचीशब्दः कर्मनाम * । ‘इह’ अस्मिन्नभिषेककर्मणि ‘सोमं राजानं’ सोमसदृशं ‘अस्य’ पेयद्रव्यस्य , ‘तदिदं’ स्वरूपं ‘शिवेन’ शान्तेन भक्तियुक्तेन मनसा भक्षयामि । सोऽय मेको मन्त्रः । (वा० सं० १९. ३५.) हे ‘वृषभ’ श्रेष्ठ ! इन्द्र ! त्वा मभिलक्ष्य ‘सुते’ अस्मिन् द्रव्ये अभिषुते सति ‘पीतये’ तव पानार्थं ‘सुतम्’ अभिषुतं द्रव्यं ‘सृजामि’ त्वद्धस्ते ददामि । ‘तृम्प’ तेन द्रव्येण तृप्तो भव । ‘मद’’ हर्षं ‘व्यश्नुहि’ विशेषेण प्राप्नुहि । अयं द्वितीयो मन्त्रः (सं० ८. ४५. २२.) ॥

तदिदं पानं प्रशंसति— “यो ह वाव सोमपीथः सुरायां प्रविष्टः, सहैवेतेनैन्द्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य भक्षितो भवति ; न सुरा”–इति । ‘यो ह वाव’ यः खलु ‘सोमपीथः’ सोमस्य पानविशेषः ‘सुरायां’ सुराद्रव्ये प्रविष्टोऽस्ति , ‘एतेन’ सोमपानविशेषेण सहैव पूर्वोक्तेन्द्राभिषेकविधानेन अभिषिक्तस्य

---

* निघ० २. २. २२ । निरु० ३. १, १ ; १२. ३. ८ ।

क्षत्रियस्य द्रव्यविशेषो भक्षितो भवति; न तु सुरा भक्षिता भवति *। सोऽयं मन्त्रद्वयस्य महिमा † ॥

पानादूर्द्ध्व मभिमन्त्रणं विधत्ते— "तां पीत्वा ऽभिमन्त्रयेतापाम सोमं, शन्नो भवेति"–इति । "अपाम सोमम्"–इत्यृगेका (सं० ८. ४८. ३. ‡), "शन्नो भव"–इति द्वितीया (सं० ८. ४८. ४. §); ताभ्या मभिमन्त्रयेत ॥

इदानीं दृष्टान्तेन पानं प्रशंसति— "तद्यथैवादः प्रियः पुत्रः पितरं, प्रिया वा जाया पतिं, सुखं शिव मुपस्पृशत्याविस्रसः, एवं हैवैतेनैन्द्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य सुरा वा सोमो वान्यद्वान्नाद्यं सुखं शिव मुपस्पृशत्याविस्रसः"–इति । 'तत्' तत्र पाने, आदौ लौकिकं निदर्शन मुच्यते,— यथैव प्रियः पुत्रः शिवं सुखं यथा भवति तथा पितर मुपस्पृशति, प्रिया वा जाया च पतिं यथा स्पृशति । 'शिवं' शान्तम्; शास्त्रनिषिद्धमार्गेण यत् सुखं, तत् नरकहेतुत्वादुग्रम्; विहितमार्गेण तु तदभावाच्छान्तम् । सुखस्पर्शस्यावधिर्नेत्याविस्रस इत्यनेनोच्यते । 'आ अविस्रसः' आ अविस्रंसनाद्, देहपातपर्यन्त मित्यर्थः । यथा

---

* "न वा एतदयो न हिरण्यं, यत् सीसम्; न स्त्री न पुमान्, यत् क्लीवः; न सोमो न सुरा, यत् सौत्रामणीसमृद्धैः"–इति तै० ब्रा० १. ८. ५. ३। "सुरा सुनोतेः"–इति निरु० १. ४. १।

† "आम्नायवचनादहिंसा प्रतीयेत"–इति, "आम्नायवचनादेतत् भवति"–इति च निरु० १. ५. १; ७. ७. १।

‡ "अपाम सोम ममृता अभूमागन्म ज्योतिरविदाम देवान् ।
किं नूनमस्मान् कृणवदरातिः किमु धूर्त्तिरमृत मर्त्यस्य"–इति तत्पाठः ।

§ "शं नो भव हृद आ पीत इन्दो पितेव सोम सूनवे सुशेवः ।
सखेव सख्य उरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीः"–इति तत्पाठः ।

स्वर्गदयं दृष्टहेतुः, 'एवं ह्वैव' अनेनैव प्रकारेण पूर्वोक्तैन्द्रमहाभिषेकविधिना अभिषिक्तस्य क्षत्रियस्य सुरा वा सोमो वा अन्यान्यन्नद्रव्याणि वा देहपातपर्यन्तं शान्तसुखस्वर्गप्रदानि ॥ ६ (२०) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) षष्ठः खण्डः ॥ ६ (२०) ॥

॥ अथ सप्तमः खण्डः ॥

एतेन ह वा ऐन्द्रेण महाभिषेकेण॑ तुरः कावषेयो॑ जनमेजयं पारिक्षित मभिषिषेच॑ तस्मादु जनमेजयः पारिक्षितः॑ समन्तं सर्वतः पृथिवीं जयन् परीया॑याश्वेन* च मेध्येनेजे॑ तदेषाभियज्ञगाथा गीयते॑ आसन्दीवति धान्यादं॑ रुक्मिणं हरितस्रज॑म् अश्वं बबन्ध सारङ्गं॑ देवेभ्यो जनमेजय इ॑त्येतेन ह वा ऐन्द्रेण महाभिषेकेण॑ च्यवनो भार्गवः॑ शार्यातं मानव मभिषिषेच॑ तस्मादु शार्यातो मानवः॑ समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे॑ देवानां हापि सत्रे गृहपतिरा॑सैतेन ह वा ऐन्द्रेण

---

* "परियायाश्वेन" घ। एव मिह सर्वत्र, उत्तरखण्डे ऽपि।

महाभिषेकेण सोमशुष्मा वाजरत्नायनः शतानीकं सात्राजित मभिषिषेच तस्मादु शतानीकः सात्राजितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेज एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदावाम्बाष्ठ्य मभिषिषिचतुस्तस्मादाम्बाष्ठ्यः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेज एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदौ युधांश्रौष्टि मौग्रसैन्य मभिषिषिचतुस्तस्मादु युधांश्रौष्टिरौग्रसैन्यः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेज एतेन ह वा ऐन्द्रेण महाभिषेकेण कश्यपो विश्वकर्माणं भौवन मभिषिषेच तस्मादु विश्वकर्मा भौवनः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे भूमिर्ह जगावित्युदाहरन्ति न मा मर्त्यः कश्चन दातु मर्हति विश्वकर्मन् भौवन मां दिदासिथ निमङ्क्ष्येऽहं सलिलस्य मध्ये मोघस्त एष कश्यपायास सङ्गर इत्येतेन ह वा ऐन्द्रेण महाभिषेकेण वसिष्ठः सुदासं पैजवन मभिषिषेच तस्मादु सुदाः पैजवनः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेज एतेन ह वा ऐन्द्रेण महाभिषेकेण संवर्त्त आङ्गिरसो मरुत्त

माविक्षित मभिषिषेच तस्मादु मरुत्त आविक्षितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे तदप्येषः* श्लोको ऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे आविक्षितस्य कामप्रेर्विश्वे देवाः सभासद इति ॥ ७ (२१) ॥

उक्तं महाभिषेकं चिरन्तनशिष्टाचारोदाहरणेन प्रशंसति—"एतेन ह वा ऐन्द्रेण महाभिषेकेण तुरः कावषेयो जनमेजयं पारिक्षित मभिषिषेच ; तस्मादु जनमेजयः पारिक्षितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"–इति । कवषस्य पुत्रः, तुरनामको महर्षिः, परिक्षितपुत्रं जनमेजयम्, उक्तविधानेन अभिषिषेच ; तस्मादेव कारणात् जनमेजयः 'सर्वतः' सर्वासु दिक्षु पृथिवीं 'समन्तम्' अन्तेन समुद्रतीरेण संयुक्तं यथा भवति तथा 'जयन्' विजयं प्राप्नुवन् 'परीयाय' परितश्चचार । अभिषेकमाहात्म्येनैव दिग्विजयं कृतवानित्यर्थः । अभिषेकप्रसादादेव 'मेध्येन' यागयोग्येन अश्वेन च 'ईजे' इष्टवान्, अश्वमेधं कृतवानित्यर्थः ॥

अस्मिन्नर्थे काञ्चिद् गाथा मुदाहरति— "तदेषाभियज्ञगाथा गीयते"–इति । 'तत्' तस्मिन् जनमेजयवृत्तान्ते 'एषा' वक्ष्यमाणा 'गाथा' यज्ञविषया गीतिः वैदिकैः अभितो गीयते ॥

तां गाथां दर्शयति—"आसन्दीवति धान्यादं रुक्मिणं हरितस्रजम्, अश्वं बबन्ध सारङ्गं देवेभ्यो जनमेजय इति"–इति । आसन्दीवानिति देशविशेषस्य नामधेयम् । तस्मिन् देशे जनमे-

---

* क-ख-पुस्तकयोरिह निर्विसर्गपाठः ।

जयो 'देवेभ्यो' देवार्थं यागयोग्य मश्वं बबन्ध । कीदृश मश्वम् ? 'धान्यादं' धान्य मेवात्ति, 'रुक्मिणं' रुक्मशब्देन ललाटगतं श्वेतलाञ्छन मुपलक्ष्यते, तदुक्तम्, हरितवर्णा स्रक् यस्यासौ 'हरितस्रक्' पुष्पमाला इव वर्णो देहं व्याप्य वर्त्तत इत्यर्थः, सारं कर्मसु श्रेष्ठं यागं गच्छतीति 'सारङ्गः' । 'इति' अनया गाथया जनमेजयस्य अभिषेकमहिमोदाहृतः ॥

जनमेजयवत् शार्यातनामकं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेण च्यवनो भार्गवः शार्यातं मानव मभिषिषेच; तस्मादु शार्यातो मानवः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे; देवानां हापि सत्रे गृहपतिरास"—इति । भृगोः पुत्रः, च्यवननामको महर्षिः, मनुवंशोत्पन्नं शार्यातनामकं राजानम् अभिषिषेच । तस्मात् फलं पूर्ववत् । किञ्च देवानां सम्बन्धिनि सत्रेऽपि शार्यातो गृहपतिरभूत् ॥

शतानीकनामानं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेण सोमशुष्मा वाजरत्नायनः शतानीकं सात्राजित मभिषिषेच; तस्मादु शतानीकः सात्राजितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"—इति । सोमशुष्मनामकः कश्चिन् महर्षिः, स च वाजरत्नस्य पौत्रः । तथाविधो मुनिः, सत्राजितः पुत्रं शतानीकनामकं क्षत्रियम् अभिषिषेच । शेषं पूर्ववत् ॥

आम्बाष्ठ्यनामानं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदावाम्बाष्ठ्य मभिषिषिचतुस्तस्मादाम्बाष्ठ्यः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"—इति ॥

युधांश्रौष्टिनामक मुग्रसेनस्य पुत्रं राजान मुदाहरति— “एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदौ युधांश्रौष्टि मौग्रसैन्य मभिषिषिचतुस्तस्मादु युधांश्रौष्टिरौग्रसैन्यः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे”–इति ॥

भुवनाख्यस्य पुत्रं विश्वकर्मनामकं राजान मुदाहरति— “एतेन ह वा ऐन्द्रेण महाभिषेकेण कश्यपो विश्वकर्माणं भौवन मभिषिषेच ; तस्मादु विश्वकर्मा भौवनः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे”–इति ॥

भौवनाभिषेकमाहात्म्यं प्रशंसितुं पुरातनमहर्षिप्रोक्त मुदाहरणं दर्शयति— “भूमिर्ह जगावित्युदाहरन्ति”–इति । ‘भूमिः’ देवता ‘जगौ’ भौवनं प्रति किञ्चिद् वाक्यं गाथारूप मुक्तवती ; ‘इति’ एवं पूर्वे महर्षयः उदाहरन्ति ॥

तां गाथां दर्शयति— “न मा मर्त्यः कश्चन दातु मर्हति विश्वकर्मन् भौवन मां दिदासिथ, निमङ्क्ष्ये ऽहं सलिलस्य मध्ये मोघस्त एष कश्यपायास सङ्गर इति”–इति । भुवनाख्यस्य पुत्र ! हे विश्वकर्मन् ! कश्चिदपि मनुष्यः ‘मां’ भूमिं दातुं नार्हति । अत एव मीमांसका विचार्य सर्वस्वदाने महाभूमिदानं निवारितवन्तः* । एवं सति, त्वं ‘मां’ भूमिं ‘दिदासिथ’ कश्यपाय त्वदीयाचार्याय दातु मिच्छसि , अहं तु ‘सलिलस्य’ समुद्रस्य मध्ये ‘निमङ्क्ष्ये’ निमज्जनं करिष्ये ; तथा सति, ‘ते कश्यपाय’ त्वदीयाचार्यस्य कश्यपस्य ‘एष सङ्गरः’ भूमिप्रतिग्रहविषयः ‘मोघः आस’ व्यर्थ एव बभूव । ‘इति’ ईदृश मपि महाभूमिमज्जनं महाभिषेकमहिम्ना निवारित मिति तात्पर्यार्थः ॥

---

* मी० द० ६, ७, ३ सू० २ अधि० द्रष्टव्यम् ।

सुदा इत्येतन्नामकं पिजवनस्य पुत्रं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेण वसिष्ठः सुदासं पैजवन मभिषिषेच ; तस्मादु सुदाः पैजवनः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"–इति ॥

अविक्षिन्नामकस्य पुत्रं मरुत्तनामानं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेण संवर्त्त आङ्गिरसो मरुत्त माविक्षित मभिषिषेच ; तस्मादु मरुत्त आविक्षितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"–इति । संवर्त्तनामको महर्षिः, अङ्गिरसः पुत्रः ॥

तेन कृतं मरुत्ताभिषेकं प्रशंसितुं श्लोक मुदाहरति— "तदप्येषः श्लोकोऽभिगीतः"–इति । 'तत्' तस्मिन् अपि मरुत्ताभिषेकमाहात्म्ये 'एषः' वक्ष्यमाणः 'श्लोकः' पादबद्धो मन्त्रः 'अभिगीतः' अभितः सर्वैः पठितः ॥

तं श्लोकं दर्शयति — "मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे, आविक्षितस्य कामप्रेर्विश्वे देवाः सभासद इति"–इति । मरुत्तनाम्नो राज्ञो गृहे मरुत्सञ्ज्ञका देवाः भोजनकाले परिवेषणस्य कर्त्तारो भूत्वा अवसन् ; तथैव 'आविक्षितस्य' अविक्षित्-पुत्रस्य 'कामप्रेः' सर्वकामपूरितस्य मरुतस्य गृहे 'विश्वे' सर्वे देवाः 'सभासदः' सभाया मुपविष्टाः, सेवन्त इति शेषः । 'इति' एष सर्वोऽपि महाभिषेकस्य महिमेत्यभिप्रायः ॥ ७ (२१) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) सप्तमः खण्डः ॥ ७ (२१) ॥

॥ अथ अष्टमः खण्डः ॥

एतेन ह वा ऐन्द्रेण महाभिषेकेणोदमय आत्रेयो ऽङ्ग मभिषिषेच तस्मादङ्गः * समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे स होवाचालोपाङ्गो दश नागसहस्राणि दश दासीसहस्राणि ददामि ते ब्राह्मणोप मा ऽस्मिन् यज्ञे ह्वयस्वेति

तदप्येते श्लोका अभिगीताः

याभिर्गोभिरुदमयं प्रैयमेधा † अयाजयन्
द्वे द्वे सहस्रे बद्धाना ‡ मात्रेयो मध्यतो ददात्
अष्टाशीतिसहस्राणि § श्वेतान् वैरोचनो हयान्
प्रष्टीन् ¶ निश्चृत्य प्रायच्छद् यजमाने पुरोहिते
देशाद्देशात्समोळ्हानां सर्वासा माढ्यदुहितृणाम्
दशाददात्सहस्राण्यात्रेयो निष्ककण्ठ्यः
दश नागसहस्राणि दत्त्वात्रेयो ऽवचत्नुके
श्रान्तः पारिकुटान् प्रैप्सद् दानेनाङ्गस्य ब्राह्मणः
शतं तुभ्यं शतं तुभ्य मिति स्मैव प्रताम्यति
सहस्रं तुभ्य मित्युक्त्वा प्राणान्त्सम प्रतिपद्यत
इति ॥ ८ (२२) ॥

---

* "तस्मादङ्गः" क ।

† "प्रय्यमेधा" ख, घ, ङ ।

‡ "वद्धाना" च ।

§ "अष्टाशीतिः सहस्राणि" ख, घ, ङ, च, ठ ।

¶ "प्रष्ठीन्" क ।

अङ्गनामकं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेणोदमय आत्रेयो ऽङ्ग मभिषिषेच ; तस्मादङ्गः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"–इति । उदमयनामकः कश्चित् महर्षिः अत्रेः पुत्रः, अङ्ग मभिषिषेच ॥

तस्याङ्गाभिषेकस्य माहात्म्यं दर्शयितुं कञ्चिद् वृत्तान्त माह— "स होवाचालोपाङ्गो,— दश नागसहस्राणि दश दासीसहस्राणि ददामि ते, ब्राह्मणोप मा ऽस्मिन् यज्ञे ह्वयस्वेति"–इति । यो ऽय मङ्गनामको राजा उक्तः, 'सः' अयम् 'अलोपाङ्गः' महदस्याङ्गसौष्ठवः, सम्पूर्णावयव इत्यर्थः । स कदाचित् स्वकीयाभिषेककर्त्तरि उदमयनामके पुरोहिते स्वार्थं यागं कुर्वाणे सति, तं प्रत्येव मुवाच । हे ब्राह्मण ! 'अस्मिन्' त्वदीये यज्ञे माम् 'उपह्वयस्व' समाह्वानं कुरु ; अह मागत्य त्वदीययज्ञे दक्षिणासम्पूर्त्त्यर्थं तुभ्यं गजसहस्राणि दासीसहस्राणि च ददामीति * । सेयं बहुदानसम्पत्तिः, समृद्धिश्च महाभिषेकप्रसादलब्धा ॥

एव मेवार्थं प्रपञ्चयितुं श्लोकानुदाहरति— "तदप्येते श्लोका अभिगीताः"–इति । 'तत्' तस्मिन्नप्यङ्गराजपुरोहितस्य यागे दानप्रतिपादकाः 'एते' पञ्च श्लोकाः 'अभिगीताः' सर्वतो ऽभिज्ञैः पठिताः ॥

तत्र प्रथमं श्लोक माह— "याभिर्गोभिरुदमयं प्रैयमेधा अयाजयन्, द्वे द्वे सहस्रे बद्वाना मात्रेयो मध्यतो ऽददात्"–इति । प्रियमेधस्य पुत्राः 'प्रैयमेधाः' महर्षयः, उदमयनामकं अङ्गराजपुरोहितं 'याभिर्गोभिः' दक्षिणारूपाभिः 'अयाजयन्', ता गावो वक्ष्यन्त इति शेषः । 'बद्वम्'–इति शतकोटिसङ्ख्याया

---

* मूले तु "दश नागसहस्राणि, दश दासीसहस्राणि"–इति विद्यते ।

नामधेयम् *। 'बद्वानां' शतकोटिसङ्ख्याकानां गवां मध्ये, प्रतिदिनं द्वे द्वे सहस्रे 'मध्यतः' मध्यन्दिनसवने अत्रिपुत्र उदमयो दत्तवान् ॥

द्वितीयं श्लोक माह— "अष्टाशीतिसहस्राणि श्वेतान् वैरोचनो हयान्, प्रष्टीन् निसृत्य प्रायच्छद् यजमाने पुरोहिते"– इति। 'वैरोचनः' विरोचनस्य पुत्रः अङ्गनामको राजा, स्वकीयपुरोहिते उदमयनामके 'यजमाने' यागं कुर्वाणे, स्वय मागत्य अष्टाशीतिसहस्रसङ्ख्यानश्वान् श्वेतवर्णान् 'प्रष्टीन्' पृष्ठवाहनयोग्यवयस्कान् 'निसृत्य' स्वकीयाश्वबन्धनस्थानान्निस्सार्य, 'प्रायच्छत्' दत्तवान् ॥

तृतीयं श्लोक माह— "दशाद्दशात्समोळ्हानां सर्वासा माढ्यदुहितृणाम्, दशाददात्सहस्राण्यात्रेयो निष्ककण्ठ्यः"–इति।

---

* दश, [शतं], सहस्रम्, अयुतम्, प्रयुतम्, नियुतम्, अर्बुदम्, न्यर्बुदम्, निखर्वम्, बद्वम्, अक्षितम्। एताश्च सङ्ख्याः क्रमाद्द दशगुणोत्तरा वैदिक्यः। ता० ब्रा० १७.१४.२ द्रष्टव्यम्। तथाच प्रयुत मिति लक्षस्यैव नामान्तरम्, अर्बुद मिति च कोटेर्नामान्तरम्; एवं शतकोटेर्नाम स्यान्निखर्व मिति, तथा बद्व मिति तु स्यात् सहस्रकोटेरेव नामधेय मिति विचार्यम्। कस्यचिन्मते त्विह बद्वशब्दः स्यात् बद्वन्निति क्तान्तस्यार्थे। तथा च 'बद्वानां' स्थिराणां दानार्थरक्षितानां गवा मिति, देवयजनमार्गस्थानां गवा मिति वार्थः सम्भाव्येत। नान्तबद्वव्याख्यानं ता० ब्रा० १.१.६ सा० भा० द्रष्टव्यम्। "चतुरशीत्यधिकैस्त्रयोदशसहस्रैरेकं बद्वं (बद्वं) भवति। तथाहि— 'हिरण्येन ०—० सप्त च (२९७पृ० ७, ८पं०)'–इति श्रुत्युक्तानि सप्ताधिकशतं बद्वानि श्रीशुकेनोत्तरश्लोके चतुर्दशलक्षत्वेन सङ्गृहीतानि,— 'अदात् कर्मणि मष्णारे नियुतानि चतुर्दश'–इति (२८ श्लो०)। एवं चतुर्दशलक्षाणां सप्ताधिकशतभागो बद्व मित्युक्तं भवति। इयञ्च बद्वसङ्ख्या श्लोकेन सङ्गृह्यते— 'चतुर्दशानां लक्षाणां सप्ताधिकशतांशकः। बद्वं चतुरशीत्यग्रसहस्राणि त्रयोदश'–इति"–इति भाग० पु० ९.२०.२९ श्लोकस्य १०.७०.९ श्लोकस्य च व्याख्याने स्वामी श्रीधरः।

'देशाद्देशात्' दिग्विजयकाले तत्तद्देशविशेषात् 'समोळ्हानां' सम्यक् 'आ' समन्तात् 'ऊढानाम्' आनीतानाम् 'आढ्यदुहितॄणां' धनिकपुत्रीणां सर्वासां 'दश सहस्राणि' 'आत्रेयः' 'अङ्गराजपुरोहितो दत्तवान् । ताश्च दुहितरो 'निष्ककण्ठ्यः' आभरणोपेतकण्ठयुक्ताः ॥

चतुर्थं श्लोक माह— "दश नागसहस्राणि दत्त्वात्रेयो ऽवचत्नुके, श्रान्तः पारिकुटान् प्रैप्सद् दानेनाङ्गस्य ब्राह्मणः"—इति । अङ्गराजस्य पुरोहितो ब्राह्मणः आत्रेयः, अवचत्नुकनामदेशे गजसहस्राणि दशसङ्ख्याकानि दत्त्वा, दानेन श्रान्तः सन् 'पारिकुटान्' परिचारकान् 'प्रैप्सत्' प्रेषितवान्, हे परिचारकाः ! यूयं दत्तेत्येव मुक्तवानित्यर्थः ॥

पञ्चमं श्लोक माह— "शतं तुभ्यं शतं तुभ्य मिति स्मैव प्रताम्यति, सहस्रं तुभ्य मित्युक्त्वा प्राणान्त्स्म प्रतिपद्यत इति"—इति । परिचारकाणा मप्यग्रे एकैकशो वक्तु मशक्तः, तुभ्यं शतं तुभ्यं शत मिति शतसङ्ख्या प्रोक्ता ; तत्रापि 'प्रताम्यति स्मैव' ग्लानि मेव प्राप्तवान् । ततः शतसङ्ख्यां परित्यज्य सहस्रं तुभ्य मित्युक्त्वा, तस्या मपि सङ्ख्यायां बहुशः प्रोक्तायां श्रान्तः सन्, 'प्राणान् प्रतिपद्यते स्म' मध्ये मध्ये श्रमपरिहाराय दीर्घश्वासं कृतवान् इत्यर्थः । अङ्गराजस्य पुरोहितयागे तादृशसामर्थ्यं महाभिषेकप्रसादलब्ध मिति तात्पर्यार्थः ॥ ८ (२२) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) अष्टमः खण्डः ॥ ८ (२२) ॥

॥ अथ नवमः खण्डः ॥

एतेन ह वा ऐन्द्रेण महाभिषेकेण दीर्घतमा मामतेयो भरतं दौष्षन्ति * मभिषिषेच तस्मादु भरतो दौष्षन्तिः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वैश्च मेध्यैरीजे

तदप्येते श्लोका अभिगीताः

हिरण्येन परीवृतान् कृष्णाञ्छुक्लदतो † मृगान्
मष्णारे भरतोऽददाच्छतं बद्धानि सप्त च
भरतस्यैष दौष्षन्तेरग्निः साचीगुणे ‡ चितः
यस्मिन्त्सहस्रं ब्राह्मणा बद्धशो गा विभेजिरे
अष्टासप्ततिं भरतो दौष्षन्तिर्यमुना मनु
गङ्गायां वृत्रघ्ने ऽबध्नात् पञ्चपञ्चाशतं हयान्
त्रयस्त्रिंशच्छतं राजा ऽश्वान् बध्वाय मेध्यान्
दौष्षन्तिरत्यगाद्राज्ञो मायां मायवत्तरः §
महाकर्म भरतस्य न पूर्वे नापरे जनाः
दिवं मर्त्यं इव हस्ताभ्यां नोदापुः पञ्चमानवा

इत्येतं ह वा ऐन्द्रं महाभिषेकं बृहदुक्थ ऋषिर्दुर्मुखाय पाञ्चालाय प्रोवाच तस्मादु दुर्मुखः

---

* "दौष्यन्ति" क, "दौःषन्ति" ख, घ, ञ, ठ। एव मिहोत्तरत्रापि।

† "कृष्णान् शुक्लदतो" क, "कृष्णाञ्छुक्लदतो" ख, ग।

‡ "साचिगुणे" क।

§ "मायावत्तरः" क।

पाञ्चालो राजा सन् विद्यया समन्तं सर्वतः पृथिवीं जयन् परीयायैतं ह वा ऐन्द्रं महाभिषेकं वासिष्ठः सात्यहव्यो ऽत्यरातये जानन्तपये प्रोवाच तस्मादत्यरातिर्जानन्तपिरराजा सन् विद्यया समन्तं सर्वतः पृथिवीं जयन् परीयाय स होवाच वासिष्ठः सात्यहव्यो ऽजैषीर्वै समन्तं सर्वतः पृथिवीं महन् मा गमयेति स होवाचात्यरातिर्जानन्तपिर्यदा ब्राह्मणोत्तरकुरून् जयेय मथ त्व मु हैव पृथिव्यै राजा स्याः सेनापतिरेव ते ऽहं स्या मिति स होवाच वासिष्ठः सात्यहव्यो देवक्षेत्रं वै तन्न वैतन्मर्त्त्यो जेतु मर्हत्यद्रुक्षो वै म आ ऽत इदं दद इति ततो हात्यरातिं जानन्तपिं मात्तवीर्यं निःशुक्र ममित्रतपनः शुष्मिणः शैब्यो * राजा जघान तस्मादेवं विदुषे ब्राह्मणायैवं चक्रुषे न क्षत्रियो द्रुह्येन्नेद्राष्ट्रादव पद्येयन्नेद्वा म प्राणो जहदिति-जहदिति ॥ ९ (२३) ॥

॥इत्यैतरेयब्राह्मणेऽष्टमपञ्चिकायां चतुर्थोऽध्यायः ॥ ४॥

दुष्यन्तस्य पुत्रं † भरताख्यं राजान मुदाहरति—"एतेन ह वा ऐन्द्रेण महाभिषेकेण दीर्घतमा मामतेयो भरतं दौष्यन्ति मभिषिषेच ; तस्माद् भरतो दौष्यन्तिः समन्तं सर्वतः पृथिवीं

---

* "शैव्यो" क, ङ, ञ ।

† "दुःषन्तपुत्रं" ञ ।

जयन्, परीयायाश्वैरु च मेध्यैरीजे"–इति । ममताख्यायाः स्त्रियाः पुत्रो 'दीर्घतमाः' इत्येतन्नामा मुनिर्भरत मभिषिषेच । भरतोऽपि दिग्विजयेन पृथिवीं परीत्य, मेध्यैरश्वैरपीजे । 'उ च' –इति निपातयोः समूहः समुच्चयार्थः ॥

भरताभिषेकमाहात्म्यं दर्शयितुं श्लोकान् उदाहरति— "तदप्येते श्लोका अभिगीताः"–इति । 'तत्' तस्मिन् भरताभिषेकमाहात्म्ये अपि 'एते' वक्ष्यमाणाः पञ्च श्लोकाः परिगीयन्ते ॥

तत्र प्रथमं श्लोक माह— "हिरण्येन परीवृतान् कृष्णाञ्छुक्लदतो मृगान्; मष्णारे भरतोऽददाच्छतं बद्वानि सप्त च"–इति । मृगशब्देनात्र गजा विवक्षिताः; मृगवदिति बाहुल्यविवक्षया वा मृगशब्दः । ते च गजाः 'हिरण्येन परीवृताः' सर्वाभरणयुक्ताः, शरीरपुष्ट्या वर्णोत्कर्षे सत्यत्यन्तं कृष्णाः प्रतिभासन्ते, शुक्लाभ्यां दन्ताभ्यां युक्ताः । तादृशान् गजान्, मष्णारनामके देशे, भरतनामको राजा दत्तवान् । शत मित्यादिना तत्सङ्ख्योच्यते । 'बद्वम्'–'वृन्दम्'–इत्येतौ पर्यायौ * । वृन्दशब्दस्य शतकोटिवाचित्वेन गणितग्रन्थकारैर्दर्शितः ॥

"एकं दश च शतं च सहस्रञ्चायुतनियुते तथा ।
प्रयुतकोट्यर्बुदवृन्दं स्थानं स्थानाद् दशगुणात्"–इति † ।

---

* नात्र मानं किञ्चित् पश्यामः ।

† "एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः । अर्बुद मब्जः (शङ्कः) खर्वनिखर्वौ महापद्मशङ्कवस्तस्मात् । जलधिश्चान्त्यं मध्यं परार्द्ध मिति दशगुणोत्तराः संज्ञाः सङ्ख्याया व्यवहारार्थं कृताः पूर्वैः"–इति लीला० । "एकं दश शतं चैव सहस्र मयुतं तथा । लक्षं च नियुतं चैव कोटिरर्बुद मेव च । वृन्दः खर्वो निखर्वश्च शङ्खपद्मौ च सागरः । अन्त्यं मध्यं परार्द्धं च दशवृद्ध्या यथोत्तरम्"–इति ब्रह्माण्ड पु० ।

तानि च शतकोटिरूपाणि 'बद्धानि' सप्ताधिकशतसङ्ख्याकानि । तावतो गजान् दत्तवानित्यर्थः * ॥

द्वितीयं श्लोक माह— "भरतस्यैष दौष्यन्तेरग्निः साचीगुणे चितः; यस्मिन्त्सहस्रं ब्राह्मणा बद्धशो गा विभेजिरे"—इति । साचीनामगुणके कस्मिंश्चिद् देशे दुष्यन्तपुत्रस्य भरतस्य एषोऽग्निश्चितः, अग्निचयनं कृतवानित्यर्थः । 'यस्मिन्' अग्निचयने सहस्रसङ्ख्याका ब्राह्मणाः 'बद्धशः' प्रत्येकं शतकोटिसङ्ख्यया † 'गाः विभेजिरे' गवां विभागं कृतवन्तः ॥

तृतीयं श्लोक माह— "अष्टासप्ततिं भरतो दौष्यन्तिर्यमुनामनु; गङ्गायां वृत्रघ्ने ऽबध्नात् पञ्चपञ्चाशतं हयान्"—इति । 'मेध्यैरश्वैरीजे'—इत्युक्तम् (२६८पृ० १,२पं०), तेषा मश्वानां सङ्ख्या अत्रोच्यते । अष्टाधिका सप्ततिः 'अष्टासप्ततिः' ताम्, अश्वाना मष्टासप्ततिं दुष्यन्तपुत्रो भरतः 'यमुना मनु' यमुनायास्तीरे 'अबध्नात्' बद्धवान्, तावतो ऽश्वमेधान् कृतवानित्यर्थः । 'गङ्गायां' गङ्गातीरे वृत्रघ्ननामके देशे च पञ्चाधिकपञ्चाशत्सङ्ख्याकान् हयान् 'अबध्नात्' बद्धवान्, तावतो ऽश्वमेधान् कृतवानित्यर्थः ॥

चतुर्थं श्लोक माह— "त्रयस्त्रिंशच्छतं राजा ऽश्वान् बध्वाय मेध्यान्; दौष्यन्तिरत्यगाद्राज्ञो मायां मायवत्तरः"—इति । यमुनातीरे गङ्गातीरे च अनुष्ठिताः अश्वाः त्रयस्त्रिंशदधिकशतसङ्ख्याकाः । तावतो ऽश्वान् 'मेध्यान्' यज्ञयोग्यान् विध्युक्तक्रमेण बन्धनं कृत्वा, सोऽयं राजा दौष्यन्तिः 'मायवत्तरः' अतिशयेन मायावी सन्, 'राज्ञः' स्वकीयशत्रोर्मायाम् 'अत्यगात्' अतिक्रान्तवान् ॥

---

* 'बद्धानि'—इत्यस्य स्थिराणि गजरूपद्रव्याणि देवयजनस्थितानि वेति चार्थः स्यात् ।

† 'बद्धशः'—इत्यस्य बन्धनक्रमेणेत्यप्यर्थः स्यात् सुकरः, स्थिरभावत इति वा ।

पञ्चमं श्लोकमाह— "महाकर्म भरतस्य न पूर्वे नापरे जनाः ; दिवं मर्त्य इव हस्ताभ्यां नोदापुः पञ्चमानवा इति"–इति । 'भरतस्य' राज्ञो यदेतत् 'महाकर्म', तदेतत् 'पूर्वे' पित्रादयो न कर्त्तुं शक्ताः, 'अपरे' जनाः पुत्रपौत्रादयश्च न कर्त्तुं शक्ताः । तत्र दृष्टान्तः । यथा मनुष्यो 'दिवं' स्वर्गं हस्ताभ्यां स्प्रष्टुमशक्तः, एवं 'पञ्चमानवाः' निषादपञ्चमाः चत्वारो वर्णाः * 'नोदापुः' तदीयं कर्म प्राप्तुमशक्ताः । सोऽयं सर्वोऽपि महाभिषेकस्य महिमेत्यर्थः ॥

अथ सम्प्रदायकथनमुखेन महाभिषेकं प्रशंसति— "एतं ह वा ऐन्द्रं महाभिषेकं बृहदुक्थ ऋषिर्दुर्मुखाय पाञ्चालाय प्रोवाच ; तस्मादु दुर्मुखः पाञ्चालो राजा सन्, विद्यया समन्तं सर्वतः पृथिवीं जयन्, परीयाय"–इति । बृहदुक्थनामकः कश्चन ऋषिः, पञ्चालदेशस्वामिने दुर्मुखनाम्ने राज्ञे तमेतम् इन्द्रसम्बन्धिनं महाभिषेकं प्रोवाच । तस्मादेव कारणात् स राजा सन् 'विद्यया' महाभिषेकज्ञानेनैव सर्वासु दिक्षु समन्तं समग्रां पृथिवीं जयन्, 'परीयाय' परितः सञ्चचार ॥

अथ ब्राह्मणस्योक्ताभिषेकाधिकाराभावेऽपि तद्विद्याधिकारसद्भावात् तत्फलसिद्धिं दर्शयति— "एतं ह वा ऐन्द्रं महाभिषेकं वासिष्ठः सात्यहव्योऽत्यरातये जानन्तपये प्रोवाच ; तस्मादत्यरातिर्जानन्तपिरराजा सन्, विद्यया समन्तं सर्वतः पृथिवीं जयन्, परीयाय"–इति । वसिष्ठगोत्रोत्पन्नो 'वासिष्ठः', सत्यहव्यस्य पुत्रः 'सात्यहव्यः', तादृशो मुनिः, अत्यरातिनामकाय जनन्तपपुत्राय

---

* "गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके, चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवः"–इति निरु० ३, २, ९ ।

ब्राह्मणाय, त मेतं महाभिषेकं प्रोवाच । तस्मादेव कारणादय मत्यरातिर्जानन्तपिः स्वय मराजा सन्नप्यभिषेकविद्यया जयं प्राप्तः परितो गतवान् ॥

यथा अभिषेके शपथं कृत्वा गुरुद्रोहो न कर्त्तव्यः, एवं विद्याया मपीति दर्शयति— "स होवाच वासिष्ठः सात्यहव्यो ऽजैषीर्वै समन्तं सर्वतः पृथिवीं महन् मा गमयेति ; स होवाचात्यरातिर्जानन्तपिर्यदा ब्राह्मणोत्तरकुरून् जयेय मथ त्व मु हैव पृथिव्यै राजा स्याः, सेनापतिरेव ते ऽहं स्या मिति ; स होवाच वासिष्ठः सात्यहव्यो देवक्षेत्रं वै तन्न वैतन् मर्त्त्यो जेतु मर्हत्यद्रुक्षो वै म आ ऽत इदं दद इति ; ततो हात्यरातिं जानन्तपि मात्तवीर्यं निःशुक्र ममित्रतपनः शुष्मिणः शैब्यो राजा जघान"—इति । सात्यहव्यो वासिष्ठो गुरुः, अत्यरातिं शिष्य मेव मुवाच,— हे अत्यराते ! विद्यासामर्थ्यात् पृथिवीं जितवानसि । अतो 'मां' गुरुं 'महद् गमय' महत्वम् ऐश्वर्यं प्रापय । ततः शिष्यो ऽत्यराति रेव मुवाच— मा भूदिदानीं तव महत्त्वम्, हे 'ब्राह्मण' आचार्य ! यदा अहम् 'उत्तरकुरून्' एतन्नामकान् हिमवत्पर्वतस्योत्तरदेशान् जयेयम्, तदानीं त्व मेव पृथिव्याः राजा भव, अहं तु त्वदीयसेनापतिरेव भवामीति । ततः सात्यहव्यो वासिष्ठः 'सः' गुरुरेव मुवाच,— हे अत्यराते ! हिमवत्पर्वतस्योत्तरतो* यदस्ति, तद्देवक्षेत्रम्, अतः तत् क्षेत्रं मनुष्यो जेतुं नैवार्हति ; त्वं तु 'मे' मह्यम् 'अद्रुक्षो वै' द्रोहं कृतवानेव ; मदपेक्षितं महत्त्वं दातु मनिच्छुः सन् वचनार्थं यत् किञ्चिद् उक्तवानसि ; अतः शपथोल्लङ्घिनो गुरुद्रोहिणः तव 'इदं' सामर्थ्यम् 'आ ददे' अपहरामीति । 'ततः'

---

* "मेरोरुत्तरतो" ठ ।

सामर्थ्यापहरणात् अत्यरातिं जानन्तपिम् 'आत्तवीर्यं' गुरुणापहृतवीर्यम् 'निःशुक्रम्' अपहृततेजस्कं, कश्चित् शत्रुतापनः शिविपुत्रः शुष्मिणाख्यो * राजा 'जघान' हतवान् ॥

एतद्वृत्तान्तकथनफलं दर्शयति — "तस्मादेवं विदुषे ब्राह्मणायैवं चक्रुषे न क्षत्रियो द्रुह्येन्नेद्राष्ट्रादव पद्येयं नेदा मा प्राणो जहदिति-जहदिति"-इति । यस्माद् गुरुद्रोहे महती हानिरुक्ता, 'तस्मात्' 'एवं विदुषे' महाभिषेकाभिज्ञाय, 'एवं चक्रुषे' अभिषेककर्त्रे, 'ब्राह्मणाय' आचार्याय क्षत्रियो न द्रुह्येत् । केनाभिप्रायेणेति, सोऽभिधीयते— 'राष्ट्राद्' अस्माद् देशात् 'न इत् अव पद्येयम्' नैवापन्नो भूयासम् । अथवा मां प्राणो 'न इत् जहत्' नैव परित्यजत्वित्यभिप्रायः । अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ९ (२३) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) नवमः खण्डः ॥ ९ (२३) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'-नामभाष्ये
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायाः चतुर्थोऽध्यायः ॥

---

* "शुष्माख्यो" ज ।

॥ अथ पञ्चमाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ अथातः पुरोधाया एव न ह वा अपुरोहितस्य राज्ञो देवा अन्न मदन्ति तस्माद्राजा यक्ष्यमाणो* ब्राह्मणं पुरो दधीत देवा मे ऽन्न मदन्नित्यग्नीन्वा एषः स्वर्ग्यान् राजोद्धरते यत् पुरोहितं तस्य पुरोहित एवाहवनीयो भवति जाया गार्हपत्यः पुत्रोऽन्वाहार्यपचनः स यत् पुरोहिताय करोत्याहवनीय एव तज्जुहोत्यथ यज्जायायै करोति गार्हपत्य एव तज्जुहोत्यथ यत् पुत्राय करोत्यन्वाहार्यपचन एव तज्जुहोति त एनं शान्ततनवो ऽभिहुता अभिप्रीताः स्वर्गं लोक† मभिवहन्ति क्षत्रं च बलं च राष्ट्रं च विशं च त एवैन मशान्ततनवो ऽनभिहुता अनभिप्रीताः स्वर्गाल्लोकान्नुदन्ते‡ क्षत्राच्च बलाच्च राष्ट्राच्च विशश्चाग्निर्वा एष वैश्वानरः पञ्चमेनिर्यत् पुरोहि-

---

* "ऽयक्ष्यमाणो" क । भाष्ये च पक्षान्तरत्वेन स्वीकृतः ।

† "स्वर्गंल्लोक" ङ ।

‡ "स्वर्गांलोकां नुदन्ते" ख, "स्वर्गांल्लोकां" नुदन्ते" घ, "स्वर्गांल्लोकान्नुदन्ते" ङ । दृष्टोत्तरत्र चैव मेव पाठाः ।

त॑स्तस्य वाच्येवैका मेनिर्भवति॑ पादयोरेका त्वच्येका॑ हृदय एकोपस्थ एका॑ ताभिर्ज्वलन्तीभिर्दीप्यमानाभि॑रुपोदेति राजानं॑ स यदाह क्व भगवो॑ ऽवात्सीस्तृणान्यस्मा आहरतेति॑ तेनास्य तां शमयति॑ या ऽस्य वाचि मेनिर्भ॑वत्यथ यदस्मा उदक मानयन्ति॑ पाद्यं तेनास्य तां शमयति॑ यास्य पादयोर्मेनिर्भवत्य॑थ यदेन मलङ्कुर्वन्ति॑ तेनास्य तां शमयति॑ यास्य त्वचि मेनिर्भ॑वत्यथ यदेनं तर्पयन्ति॑ तेनास्य तां शमयति॑ यास्य हृदये मेनिर्भ॑वत्यथ यदस्यानारुद्धो वेश्मसु वसति॑ तेनास्य तां शमयति॑ यास्योपस्थे मेनिर्भवति॑ स एनं शान्ततनुर॑भिहुतो ऽभिप्रीतः॑ स्वर्गं लोक * मभिवहति॑ क्षत्रं च बलं च राष्ट्रं च विशं च॑ स एवैन मशान्ततनुर॑नभिहुतो ऽनभिप्रीतः॑ स्वर्गाल्लोकान्नुदते॑ क्षत्राच्च बलाच्च राष्ट्राच्च विशश्च॑ ॥ १ (२४) ॥

॥ श्रीगणेशाय नमः ॥

महाभिषेक ऐन्द्रो यः क्षत्रस्यासौ पुरोहितः ।
पौरोहित्यं ब्राह्मणस्य वक्तव्य मधुनोच्यते ॥ १ ॥

तदेतत् प्रतिजानीते— "अथातः पुरोधाया एव"—इति । 'अथ' क्षत्रियस्य महाभिषेककथनानन्तरम् , यतो ब्राह्मणस्य

---

* "स्वर्गंल्लोक" ङ ।

पौरोहित्यं बुभुत्सितं भवति, 'अतः' कारणात् 'पुरोधाया एव' पौरोहित्यस्यैव विधिः, उच्यत इति शेषः ॥

तद्विधिं दर्शयति— "न ह वा अपुरोहितस्य राज्ञो देवा अन्न मदन्ति, तस्माद्राजा यक्ष्यमाणो ब्राह्मणं पुरो दधीत,— देवा मे ऽन्न मदन्निति"—इति। यस्मात् अपुरोहितस्य राज्ञः अन्नं देवाः 'न अदन्ति' न भक्षयन्ति, 'तस्मात्' राजा यक्ष्यमाणो ब्राह्मणं पुरोहितं कुर्यात्। केनाभिप्रायेणेति, सोऽभिधीयते— देवाः मदीय मन्न मदन्त्विति तस्याभिप्रायः। 'अयक्ष्यमाणः' इति वा पदच्छेदः। यागाभावेऽपि प्रजापालने धर्मबोधनाय पुरोहितः सम्पादनीयः ॥

तदेतत् प्रशंसति— "अग्नीन्वा एषः स्वर्ग्यान् राजोद्धरते, यत् पुरोहितम्"—इति। पुरोहितं सम्पादयतीति यदस्ति, तेन 'एषः' राजा स्वर्गहेतून् अग्नीनेवोद्धरते ॥

तानग्नीन् दर्शयति— "तस्य पुरोहित एवाहवनीयो भवति, जाया गार्हपत्यः, पुत्रो ऽन्वाहार्यपचनः; स यत् पुरोहिताय करोत्याहवनीय एव तज्जुहोत्यथ यज्जायायै करोति गार्हपत्य एव तज्जुहोत्यथ यत् पुत्राय करोत्यन्वाहार्यपचन एव तज्जुहोति; त एनं शान्ततनवो ऽभिहुता अभिप्रीताः स्वर्गं लोक मभिवहन्ति,— क्षत्रं च बलं च राष्ट्रं च विशं च"—इति। 'तस्य' ह राज्ञः पुरोहितादय एव आहवनीयाद्यग्निस्थानीयाः। अन्वाहार्यपचनो दक्षिणाग्निः। 'सः' राजा पुरोहितादिभ्यो 'यत्' अपेक्षितं करोति, तदेतदाहवनीयादिषु होमसमानम्। अतः पुरोहितद्वारा 'ते' अग्नयः 'शान्ततनवः' स्वकीय मुग्ररूपत्वं परित्यज्य अभीष्टहोमेन प्रीताः 'एनं' क्षत्रियं स्वर्गादिकं प्रापयन्ति। 'क्षत्रं'

मानसोत्साहरूपं शौर्यम्, 'बलं' शारीरम्, 'राष्ट्र' देशः, 'विट्' प्रजाः; पुरोहितादिप्रीत्या तदेतत् सर्वं प्राप्यते ॥

विपक्षे बाधक माह— "त एवैन मशान्ततनवो ऽनभिहुता अनभिप्रीताः स्वर्गाल्लोकान्नुदन्ते, क्षत्राच्च बलाच्च राष्ट्राच्च विशश्च" –इति । 'त एव' पुरोहितादयो ऽभीष्टहोमाभावेन प्रीतिरहिताः 'अशान्ततनवः' स्वर्गादेः 'एनं' राजानम् मपनुदन्ते ॥

पुनरपि पुरोहितं प्रकारान्तरेण प्रशंसति— "अग्निर्वा एष वैश्वानरः पञ्चमेनिर्यत् पुरोहितस्तस्य वाच्येवैका मेनिर्भवति, पादयोरेका, त्वच्येका, हृदय एकोपस्थ एका, ताभिर्ज्वलन्तीभिर्दीप्यमानाभिरुपोदेति राजानं; स यदाह क्व भगवो ऽवात्सीस्तृणान्यस्मा आहरतेति, तेनास्य तां शमयति यास्य वाचि मेनिर्भवत्यथ यदस्मा उदक मानयन्ति पाद्यं, तेनास्य तां शमयति यास्य पादयोर्मेनिर्भवत्यथ यदेन मलङ्कुर्वन्ति, तेनास्य तां शमयति यास्य त्वचि मेनिर्भवत्यथ यदेनं तर्पयन्ति, तेनास्य तां शमयति यास्य हृदये मेनिर्भवत्यथ यदस्यानारुद्धो वेश्मसु वसति, तेनास्य तां शमयति यास्योपस्थे मेनिर्भवति"–इति । परोपद्रवकारिणी क्रोधरूपा शक्तिः 'मेनिः'–इत्युच्यते, यथाग्नेर्ज्वाला, तद्वत् । अतो यः पुरोहितोऽस्ति, सोऽयं पञ्चविधमेन्युपेतो वैश्वानरनामकाग्निसमानः; वागादीनि पञ्च मेनिस्थानानि च । अतः पुरोहितः 'ताभिः' मेनिभिः 'ज्वलन्तीभिः' ज्वालासदृशीभिः, 'दीप्यमानाभिः' परेषु दीप्तिं सन्तापं कुर्वन्तीभिः सह राजानम् 'उपोदेति' समीपे प्राप्नोति । तदा 'सः' राजा हे भगवन्! एतावन्तं कालं कुत्रावात्सीः? एतस्य पुरोहितस्योपवेशनार्थं हे परिचारकाः! 'तृणानि' तृणनिर्मितानि कुशाद्यासनानि आहरत; 'इति'

अनेन राजसम्बन्धिना प्रियवाक्येन, वाचि एका या 'मेनिः' बाधिका शक्तिः, तां स राजा शमयति। पाद्यार्थोदकानयनेन पादगता मेनिः शाम्यति। वस्त्रगन्धाद्यलङ्करणेन त्वग्गता मेनिः शाम्यति। धनादिना सन्तर्पणेन हृदयगता मेनिः शाम्यति। 'अस्य' राज्ञो वेश्मसु 'अनारुद्धः' विरोधरहितः शयनादिकं कुर्वन् विस्रम्भेण वसतीति यदस्ति, तेनोपस्थगता मेनिः शाम्यति। गृहे समागतस्य पुरोहितस्य एतावन्त उपचाराः कर्त्तव्या इत्यर्थः॥

अन्वयव्यतिरेकाभ्या मुक्तोपचारं प्रशंसति— “स एनं शान्ततनुरभिहुतोऽभिप्रीतः स्वर्गं लोक मभिवहति, क्षत्रं च बलं च राष्ट्रं च विशं च; स एवैन मशान्ततनुरनभिहुतोऽनभिप्रीतः स्वर्गाल्लोकान्नुदते, क्षत्राच्च बलाच्च राष्ट्राच्च विशश्च”–इति। उक्तोपचारहोमेन प्रीतौ सत्यां शान्ततनुः स्वर्गादिकं प्रापयतीत्यन्वयः। उक्तोपचारहोमाभावे स्वर्गादेरपनुदतीति व्यतिरेकः॥ १ (२४)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां पञ्चमाध्याये
(चत्वारिंशाध्याये) प्रथमः खण्डः॥ १ (२४)॥

॥ अथ द्वितीयः खण्डः॥

अग्निर्वा॑ एष वैश्वानरः॑ पञ्चमेनिर्यत् पुरोहित॑स्ताभी राजानं परिगृह्य तिष्ठति॑ समुद्र इव भूमि॑-

मयुव मार्यँस्य* राष्ट्रं भवति नैनं पुरायुषः प्राणो जहात्याजरसं जीवति सर्वँ मायुरेति न पुनर्म्रियते यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः क्षत्रेण क्षत्रं जयति बलेन बल मश्नुते यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितस्तस्मै विशः सञ्जानते सम्मुखा एकमनसो यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः ॥ २ (२५) ॥

उक्तोपचारेण प्रीतं पुरोहितं दृष्टान्तेन प्रशंसति — "अग्निर्वा एष वैश्वानरः, पञ्चमेनिर्यत् पुरोहितस्ताभी राजानं परिगृह्य तिष्ठति, समुद्र इव भूमिम्"–इति । योऽयं पुरोहितोऽस्ति, स एषः 'पञ्चमेनिः' पञ्चविधोग्रशक्तियुक्तो वैश्वानरनामकोऽग्निरेव ; निग्रहानुग्रहयोः अग्निवच्छक्तिमत्त्वात् । स पुरोहितः 'ताभिः' अशान्ताभिः शक्तिभिः तं राजानं 'परिगृह्य' परितः स्वीकृत्य तिष्ठति । यथा समुद्रो भूमिं परितः स्वीकृत्य तिष्ठति, तद्वत् ॥

पुरोहितवशादनिष्टपरिहारं दर्शयति— "अयुव मार्यस्य राष्ट्रं भवति, नैनं पुरायुषः प्राणो जहात्याजरसं जीवति , सर्वं मायुरेति , न पुनर्म्रियते , यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः"–इति । 'यस्य' राज्ञः 'एवं विद्वान्' वेदशास्त्रोक्तप्रकारेण धर्माधर्मौ बोधयितु मभिज्ञो ब्राह्मणो 'राष्ट्रगोपः' राष्ट्रपरिपालनक्षमः पुरोहितो भवति , ईदृशस्यार्यस्य राज्ञो राष्ट्रम् 'अयुतं' कदाचिदपि पृथग्भावरहितं भवति । "यु मिश्रणामिश्रणयोः"

---

* "मयुवमार्यँस्य"–इत्येवं च पाठो भाष्यसम्मतः ।

–इति धातुः (अदा० प०) अमिश्रणेऽपि वर्त्तते, अयुवमितिपदेन स निषिध्यते ; राष्ट्र मस्थिरं न भवतीत्यर्थः । अथ वा 'अस्य' राष्ट्रम् 'अयुवमारि' युवमरणरहितं भवतीत्यर्थः । 'एनं' राजानम् 'आयुषः पुरा' प्राणो न परित्यजति, अपमृत्युः न भवतीत्यर्थः । अत एव 'आ जरसं' जरापर्यन्तं सुखेन जीवति ; 'सर्व मायुरेति' प्राप्तायामपि जराया मवशिष्टं सर्व मायुः प्राप्नोति । ततः सन्नत् मृत्वा 'पुनर्न म्रियते' पुरोहितमुखेन तत्त्वज्ञानं सम्पाद्य मुच्यते इत्यर्थः ॥

अनिष्टपरिहारं दर्शयित्वा इष्टप्राप्तिं दर्शयति—"क्षत्रेण क्षत्रं जयति, बलेन बल मश्नुते, यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः"–इति । उक्तविधपुरोहितयुक्तो राजा स्वकीयेन 'क्षत्रेण' कुमारादिना, परकीयं 'क्षत्रं' कुमारादिकं जयति । यथा स्वकीयेन 'बलेन' सैन्येन, परकीयं 'बल' सैन्यम् 'अश्नुते' व्याप्नोति, अभिभवतीत्यर्थः ॥

इष्टप्राप्त्यनिष्टपरिहारौ दर्शयित्वा प्रजानुरागं दर्शयति—"तस्मै विशः सञ्जानते, सम्मुखा एकमनसो यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः"–इति । उक्तविधपुरोहितयुक्ताय 'तस्मै' तस्य राज्ञो 'विशः' प्रजाः 'सञ्जानते' राज्ञा सहैकमत्यं प्राप्नुवन्ति ; प्राप्य च परस्पर मप्येकमनस्का राज्ञः सम्मुखा भवन्ति ; न तु कस्मिन्नपि कार्ये विमुखाः ॥ २ (२५) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां पञ्चमाध्याये
(चत्वारिंशाध्याये) द्वितीयः खण्डः ॥ २ (२५) ॥

॥ अथ तृतीयः खण्डः ॥

तदप्येतदृषिणोक्तं॑ स इद्राजा प्रतिजन्यानि विश्वा॑ शुष्मेण तस्थावभि वीर्येणेति॑ सपत्ना वै द्विषन्तो॑ भ्रातृव्या जन्यानि॑ तानेव तच्छुष्मेण वीर्येणाधितिष्ठति॑ बृहस्पतिं यः सुभृतं बिभर्त्तीति॑ बृहस्पतिर्ह वै देवानां पुरोहितस्त॑ मन्वन्ये मनुष्यराज्ञां पुरोहिता॑ बृहस्पतिं यः सुभृतं बिभर्त्तीति यदाह॑ पुरोहितं यः सुभृतं बिभर्त्तीत्येव तदाह॑ वल्गूयति वन्दते पूर्वभाज मित्य॑पचिति मेवास्मा एतदाह॑ स इत् क्षेति सुधित ओकसि स्व इति॑ गृहा वा ओकः॑ स्वेष्वेव तद्गृहेषु सुहितो वसति॑ तस्मा इळा पिन्वते विश्वदानी मित्य॑न्नं वा इळा॑न्न मेवास्मा एतदूर्जस्वच्छुष्मवद्भवति॑ तस्मै विशः स्वय मेवा नमन्त इति॑ राष्ट्राणि वै विशो॑ राष्ट्राण्येवैनं॑ तत् स्वय मुपनमन्ति॑ यस्मिन् ब्रह्मा राजनि॑ पूर्व एतीति॑ पुरोहित मेवैतदाहा॑प्रतीतो जयति सं धनानीति॑ राष्ट्राणि वै धनानि तान्यप्रतीतो जयति॑ प्रतिजन्यान्युत या सजन्येति॑ सपत्ना वै द्विषन्तो भ्रातृव्या जन्यानि॑ तानप्रतीतो जयत्य॑वस्यवे यो वरिवः कृणोतीति॑ यदाहा॑वसीयसे यो वसीयः करोतीत्येव तदाह॑

ब्रह्मणे राजा त मवन्ति देवा इति पुरोहित मेवैतदभिवदति ॥ ३ (२६) ॥

पुरोहितमहिमानं दृढयितुं * मन्त्र मुदाहरति— "तदप्येतदृषिणोक्तम्"–इति । 'तदेतत्' पुरोहितमाहात्म्य मपि 'ऋषिणा' मन्त्रदर्शिना तिसृभिः ऋग्भिरुक्तम् (सं० ४. ५०. ७-९.) ॥

तत्र प्रथमाया ऋचः पूर्वार्द्धं दर्शयति— "स इद्राजा प्रतिजन्यानि विश्वा, शुष्मेण तस्थावभि वीर्येणेति"–इति । 'स इत्' स एव पुरोहितयुक्तो राजा 'प्रतिजन्यानि' प्रतिपक्षबलानि 'विश्वा' सर्वाणि 'शुष्मेण' वीर्येण स्वकीयेनाधिकेन बलेन 'अभितस्थौ' अभितिष्ठति, अभिभवतीत्यर्थः ॥

अस्यार्द्धस्य तात्पर्यं दर्शयति— "सपत्ना वै द्विषन्तो भ्रातृव्या जन्यानि तानेव तच्छुष्मेण वीर्येणाधितिष्ठति"–इति । 'जन्यानि' –इत्यनेन सपत्ना एव अभिधीयन्ते ; सपत्नशब्दस्य व्याख्या द्विषन्तो भ्रातृव्या इति । तानेव भ्रातृव्यान् 'तत्' तेन 'शुष्मेण' अधिकेन 'वीर्येण' सामर्थ्येन 'अधितिष्ठति' अभिभवति ॥

तृतीयं पाद मनूद्य व्याचष्टे— "बृहस्पतिं यः सुभृतं बिभर्त्तीति ; बृहस्पतिर्ह वै देवानां पुरोहितस्त मन्वन्ये मनुष्यराज्ञां पुरोहिता ; बृहस्पतिं यः सुभृतं बिभर्त्तीति यदाह, पुरोहितं यः सुभृतं बिभर्तीत्येव तदाह"–इति । यो हितोपदेशेन राजानं सुष्ठु बिभर्त्तीति 'सुभृत' । तादृशं 'बृहस्पतिं' बृहस्पतिसमानं पुरोहितं 'बिभर्त्ति' पोषयति, स इद्राजेति पूर्वत्रान्वयः । "बृहस्पतिर्ह वै देवानां पुरोहितः" । यो बृहस्पतिः देवानां पुरो-

---

* "दर्शयितुं" ठ ।

हितः, तं बृहस्पतिम् 'अनु' पश्चात् मनुष्यराज्ञाम् अन्ये पुरोहिता वर्त्तन्ते ; अतः पुरोहितानां बृहस्पत्यनुसारित्वात् बृहस्पति मिति पदेन पुरोहितविषय मेवैतद् वाक्यं मन्त्र माह ॥

चतुर्थं पाद मनूद्य व्याचष्टे— "वल्गूयति वन्दते पूर्वभाज मित्यपचिति मेवास्मा एतदाह"–इति । स राजा 'पूर्वभाजं' प्रथमतो भजनयुक्तं पुरोहितं (स हि राजानं तदीयहितविचारेण प्रथमतो भजति , तादृशं) 'वल्गूयति' राजा अर्चयति , 'वन्दते' नमस्करोति । 'एतत्' एतेन पादेन 'अस्मै' अस्मिन् यजमाने 'अपचिति मेव' पूजा मेव मन्त्र आह ॥

द्वितीयस्या ऋचः प्रथमपाद मनूद्य व्याचष्टे— "स इत् चेति सुधित ओकसि स्व इति ; गृहा वा ओकः स्वेष्वेव तद् गृहेषु सुहितो वसति"–इति । 'स इत्' स एव राज्ञा पूजितः पुरोहितः 'सुधितः' सुप्रीतः 'स्वे' स्वकीये एव 'ओकसि' गृहे 'चेति' निवसति । 'ओकः'-शब्देनात्र 'गृहाः' एवोच्यन्ते । ततः स्वेष्वेव गृहेषु सुप्रीतो वसतीत्युक्तं भवति ॥

द्वितीयं पाद मनूद्य व्याचष्टे— "तस्मा इळा पिन्वते विश्वदानी मित्यन्नं वा इळान्न मेवास्मा एतदूर्जस्वच्छश्वद्भवति"–इति । 'तस्मै' पुरोहितयुक्ताय राज्ञे 'इळा' अन्नं 'विश्वदानीं' सर्वस्मिन्नपि काले (इदानीं तदानी मित्यादिवदवगन्तव्यम्*) 'पिन्वते' वर्द्धते, अन्नसमृद्धिर्भवति । अस्मिन् पादे 'इळा'-शब्देन अन्न मेवोच्यते ; 'एतत्' अन्नम् 'अस्मै' अस्मिन् राजनि 'ऊर्जस्वत्' क्षीरादिरसोपेतं 'शश्वत्' सर्वदा तिष्ठति ॥

तृतीयं पाद मनूद्य व्याचष्टे— "तस्मै विशः स्वय मेवा नमन्त

---

* अथ० प्राति ४, २२ । विश्वदानीं = सर्वदा निरु० ११, ४, १० ।

इति ; राष्ट्राणि वै विशो राष्ट्राण्येवैनं तत् स्वय मुपनमन्ति"–इति । 'तस्मै' पुरोहितयुक्ताय राज्ञे 'विशः' प्रजाः 'स्वय मेव तदीयप्रयत्ननिरपेक्षा एव 'आ नमन्ते' आनतिं प्राप्ता भवन्ति । अस्मिन् पादे 'विट्'-शब्देन 'राष्ट्राण्येव' प्रजोपेता देशा एव विवक्षिताः । तादृशानि राष्ट्राण्येव 'एनं' पुरोहितयुक्तं क्षत्रियं स्वय मेव प्राप्नुवन्ति ॥

चतुर्थं पाद मनूद्य व्याचष्टे— "यस्मिन् ब्रह्मा राजनि पूर्वं एतीति ; पुरोहित मेवैतदाह"–इति । 'यस्मिन्' राजनि 'ब्रह्मा' ब्राह्मणः हित मुपदिशन् 'पूर्वं एति' प्रथमतो गच्छति , स इत् क्षेतीति पूर्वत्रान्वयः । अनेन पादेन पूर्वं एतीत्येतं पुरोहित मेव मन्त्रो ब्रूते ॥

तृतीयस्या ऋचः प्रथमपाद मनूद्य व्याचष्टे— "अप्रतीतो जयति सं धनानीति ; राष्ट्राणि वै धनानि तान्यप्रतीतो जयति"–इति । अयं पुरोहितयुक्तो राजा 'अप्रतीतः' प्रतिकूलैः शत्रुभिः इतः प्राप्तः प्रतीतः , तद्विपरीतो ऽप्रतीतः , शत्रुप्राप्तिरहित एव भूत्वा धनोपेतानि राष्ट्राणि सम्यक् 'जयति' सम्पादयति । अस्मिन् पादे 'धन'-शब्देन राष्ट्राण्येव विवक्षितानि ; तानि स्वयं प्रतिपक्षरहित एव जयति ॥

द्वितीयं पाद मनूद्य व्याचष्टे— "प्रतिजन्यान्युत या सजन्येति ; सपत्ना वै द्विषन्तो भ्रातृव्या जन्यानि तानप्रतीतो जयति"–इति । 'जन्यानि' शत्रून् , 'अप्रतीतः' स्वय मप्रतिपक्षो जयतीत्यनुवर्त्तते । किञ्च 'या' सेना 'सजन्या' शत्रुसहिता , ता मपि जयति । अस्मिन् पादे 'जन्य'-शब्देन सपत्ना अभिधीयन्ते, तस्य व्याख्यानं 'द्विषन्तो भ्रातृव्याः'–इति । 'तान्' भ्रातृव्यान् 'अप्रतीतः' प्रतिपक्षरहितो जयति ॥

तृतीयं पाद मनूद्य व्याचष्टे— "अवस्यवे यो वरिवः कृणोतीति यद्वाहावसीयसे यो वसीयः करोतीत्येव तदाह"–इति । 'अवस्यवे' वसुरहिताय ब्राह्मणाय पुरोहिताय 'यः' राजा 'वरिवः कृणोति' परिचर्यां करोति 'इति' मन्त्रो यदाह, तत्र 'अवसीयसे' अत्यन्तदरिद्राय धनरहिताय 'यः' राजा 'वसीयः' अतिशयेन धनवन्तं करोति 'इति' अनेनैव प्रकारेण मन्त्रो ब्रूते ॥

चतुर्थं पाद मनूद्य व्याचष्टे— "ब्रह्मणे राजा त मवन्ति देवा इति; पुरोहित मेवैतदभिवदति"–इति । 'ब्रह्मणे' ब्राह्मणाय पूर्वोक्तेन अवस्यव इति चतुर्थ्यन्तेन अन्वेति, तथा राजेति पदं य इत्यनेन अन्वेति । 'तं' तादृशं पुरोहितपूजकं राजानं देवाः 'अवन्ति' पालयन्ति । 'एतद्' एतेन ब्रह्मण इति पदेन पुरोहित मेव मन्त्रः अभिवदति ॥ ३ (२६) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां पञ्चमाध्याये
(चत्वारिंशाध्याये) तृतीयः खण्डः ॥ ३ (२६) ॥

॥ अथ चतुर्थः खण्डः ॥

यो ह वै त्रीन् पुरोहितां॑स्त्रीन् पुरोधातॄन् वेद॑ स ब्राह्मणः पुरोहि॑तः स वदेत पुरोधाया॑ अग्निर्वा॑व पुरोहि॑त॒ः पृथिवी पुरोधाता॑ वायुर्वाव पुरोहितो

ऽन्तरिक्षं पुरोधाता ऽऽदित्यो वाव पुरोहितो द्यौः पुरोधातैष ह वै पुरोहितो य एवं वेदाथ स तिरोहितो य एवं न वेद तस्य राजा मित्रं भवति द्विषन्त मप बाधते यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः क्षत्रेण क्षत्रं जयति बलेन बल मश्नुते यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितस्तस्मै विशः सञ्जानते सम्मुखा एकमनसो यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितो भूर्भुवस्स्वरो ममो ऽह मस्मि स त्वं स त्व मस्यमो ऽहं द्यौरहं पृथिवी त्वं सामाह मृक् त्वं तावेह संवहावहै पुराण्यस्मान् महाभयात् तनूरसि तन्वं मे पाहि या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ता मह्य मस्मिन्नासने ऽच्छिद्रं शर्म यच्छत या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ता मह्य मस्मिन्नासने ऽच्छिद्रं शर्म यच्छत अस्मिन्राष्ट्रे श्रिय मावेशयाम्यतो देवीः प्रति पश्याम्यापः दक्षिणं पाद मवनेनिजे ऽस्मिन् राष्ट्र इन्द्रियं दधामि सव्यं पाद मवनेनिजे ऽस्मिन् राष्ट्र इन्द्रियं वर्द्धयामि पूर्व मन्य मपर मन्यं पादाववनेनिजे देवा राष्ट्रस्य गुप्त्या अभयस्यावरुद्ध्या आपः पादावनेजनीर्द्विषन्तं निर्दहन्तु मे ॥ ४ (२७) ॥

अथ पौरोहित्यस्य योग्यायोग्यौ ब्राह्मणौ विविनक्ति— "यो ह वै त्रीन् पुरोहितांस्त्रीन् पुरोधातॄन् वेद, स ब्राह्मणः पुरोहितः; स वदेत पुरोधाया ; अग्निर्वाव पुरोहितः, पृथिवी पुरोधाता ; वायुर्वाव पुरोहितो, ऽन्तरिक्षं पुरोधाता ; ऽऽदित्यो वाव पुरोहितो, द्यौः पुरोधातैष ह वै पुरोहितो य एवं वेदाथ स तिरोहितो य एवं न वेद"–इति । राजा स्वहितोपदेशार्थं स्वस्य पुरोहितो ऽवस्थापितः ; तस्य पुरोहितस्य योऽय मवस्थापयिता राजा, स पुरोधाता । देवतासु मध्ये ये त्रयः पुरोहिताः सन्ति, ये च त्रयः पुरोधातारः सन्ति, तानुभयविधान् 'यो वेद' तत्प्रतिपादकं मन्त्रं सर्वदानुसन्धत्त इत्यर्थः । 'सः' तादृशो ब्राह्मणः 'पुरोहितः' पुरोहितो भवितुं योग्यः । 'सः' च ब्राह्मणः 'पुरोधायै' पौरोहित्यार्थम् "अग्निः"–इत्यादिकं मन्त्रं जपेत् । अग्निवाय्वादित्याः पुरोहितरूपाः, पृथिव्यन्तरिक्षद्युलोकाः पुरोधातृरूपा इति मन्त्रार्थः । 'यः' पुमान् 'एवं वेद' मन्त्रार्थं मनुसन्धत्ते, 'एषः' एव योग्यः पुरोहितः ; 'अथ' तद्वैलक्षण्येन 'यः' पुमान् एवं न वेद, स 'तिरोहितः' पौरोहित्यादन्तर्हितः, तदयोग्य इत्यर्थः ॥

योग्यं पुरोहितं प्रशंसति— "तस्य राजा मित्रं भवति द्विषन्त मप बाधते, यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः"–इति । यस्य 'एव" मन्त्रादिवेदित्वगुणयुक्तः पुरोहितो भवेत्, 'तस्य' राज्ञो देशान्तरवर्त्ती 'राजा' 'मित्र" बन्धुर्भवति । तथा 'द्विषन्तम्' अन्यं राजानं पुरोहितयुक्तो राजा 'बाधते' विनाशयति ॥

पुनरपि द्वेधा प्रशंसति— "क्षत्रेण क्षत्रं जयति, बलेन बल मश्नुते, यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितस्तस्मै विशः

सञ्जानते, सम्मुखा एकमनसो , यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः”–इति । पूर्ववद् (२८७पृ०) व्याख्येयम् ॥

अथ राज्ञः पुरोहितवरणमन्त्र माह— “भूर्भुवस्स्वरो ममो ऽह मस्मि, स त्वं; सत्व मस्यमो ऽहं ; द्यौरहं पृथिवी त्वं ; सामाह मृक् त्वं ; तावेह संवहावहै , पुराण्यस्मान् महाभयात् तनूरसि तन्वं मे पाहि”–इति । ‘भूर्भुवस्स्वः’–इतिशब्दैर्लोकत्रयाभिमानिन्य देवता उच्यन्ते, प्रणवेन परमात्मा । एते सर्वे अनुगृह्णन्त्वित्यभिप्रायः । पुरोहितः ‘अहम्’ ‘अमः’ द्युलोकरूपो ऽस्मि, त्वन्तु ‘सः’ भूलोकरूपोऽसि । पुनरपि ‘स त्व मसि, अमोहम्’–इत्यभिधानं दार्ढ्यार्थम् । तस्यैव व्याख्यानं ‘द्यौरहं’ पृथिवी त्वम्’–इति । तथा सामस्वरूपोऽहम्, ऋक्स्वरूपस्त्व मसि । ‘तौ’ उभावावाम् ‘इह’ राष्ट्रे ‘आ’ समन्तात् ‘पुराणि’ तदुपलक्षितग्रामाश्च ‘संवहावहै’ सम्यग् वहनं पुरादिनिर्वाहं करवावहै । त्वं मम ‘तनूः’ शरीर मसि , अतो मदीयां ‘तन्वं’ शरीरं ‘अस्मात्’ ऐहिकात् , आमुष्मिकात् च ‘महाभयात्’ ‘पाहि’ रक्ष ॥

अनेन मन्त्रेण राज्ञा वृतो यः पुरोहितः, तस्य राजदत्तविष्टराभिमन्त्रण माह— “या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः , ता मह्य मस्मिन्नासने ऽच्छिद्रं शर्म यच्छत”–इति * । सोमो राजा यासा मोषधीनां ताः ‘सोमराज्ञ्यः’ , ‘बह्व्यः’ बहुजातीयाः , ‘शतविचक्षणाः’ शतशाखाभिन्नाः । तादृश्य ओषधयो याः सन्ति, तास्तथाविधाः हे ओषधयः ! ‘अस्मिन्नासने’ तृणादिनिर्मिते कटादिरूपे ‘मह्यं’ पुरोहिताय ‘छिद्ररहितं शर्म’ दुखस्पर्शरहितं सुखं ‘यच्छत’ दत्त ॥

---

* सं० १०, ९७, १८ । म० ब्रा० २. ८. ३ । गो० गृ० सू० ४. १०. ४ ।

अभिमन्त्रिते विष्टरे उपवेशन माह — "या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवी मनु, ता मह्य मस्मिन्नासने ऽच्छिद्रं शर्म यच्छत"–इति *। वंशदलादिनिर्मितविष्टरगताः 'ओषधयः' पृथिवी मनु 'विष्ठिताः' विशेषेण स्थापिताः, ता मह्य मित्यादि पूर्ववत् (२८८पृ०) ॥

पुरोहितस्य पाद्यार्थं समानीताना मपा मभिमन्त्रणमन्त्रं दर्शयति — "अस्मिन् राष्ट्रे श्रिय मावेशयाम्यतो देवीः प्रति पश्याम्यापः"–इति †। हे आपः! पुरोहितोऽह मस्मिन् राष्ट्रे 'श्रियम् आवेशयामि' धनादिसम्पदं सम्पादयामि। अतः कारणाद् 'देवीः' द्योतनात्मिकाः युष्मान् प्रति पश्यामि ॥

ताभिरद्भिः पुरोहितस्य पादप्रक्षालनमन्त्र माह— "दक्षिणं पाद मवनेनिजे ऽस्मिन् राष्ट्र इन्द्रियं दधामि; सव्यं पाद मवनेनिजे ऽस्मिन् राष्ट्र इन्द्रियं वर्द्धयामि; पूर्व मन्य मपर मन्यं पादाववनेनिजे देवा राष्ट्रस्य गुप्त्या अभयस्यावरुद्ध्यै"–इति ‡। मदीयं दक्षिणं पादम् 'अवनेनिजे' प्रक्षालयामि। तेन अस्मिन् राष्ट्रे प्राणिना मिन्द्रियपाटवहेतुं धनं सम्पादयामि। वामपादप्रक्षालनेन च तद् वर्द्धयामि। 'पूर्वं' प्रथमम् 'अन्यं' दक्षिणं पादं शोधयित्वा, 'अपरं' पश्चात् 'अन्यं' वामं पादं शोधयामि। हे देवाः! एव मुभौ पादौ प्रक्षालयामि, तच्च राष्ट्रस्य 'गुप्त्यै' रक्षार्थम्, 'अभयस्य' चौरादिभयराहित्यस्य 'अवरुद्ध्यै' सम्पादनाय भवति ॥

---

* सं० १०. ९७. १९। वा० सं० १२. ९३ (एतत्पूर्वा ऋगपि तत्र ९२)। म० ब्रा० २. ८. ४। गो० गृ० ४. १०. ५।

† म० ब्रा० २. ८. ५, ६। गो० गृ० ४. १०. ७, ८।

‡ म० ब्रा० २. ८. ७, ८। गो० गृ० ४, १०, ९, १०।

पादप्रक्षालनावशिष्टाना मपा मभिमन्त्रणमन्त्र माह—"आपः पादावनेजनीर्द्विषन्तं निर्दहन्तु मे"–इति । 'पादावनेजनीः' पादशुद्धिकरणभूता इमा आपो 'मे' मदीयं 'द्विषन्तं' शत्रुं निःशेषेण दहन्तु ॥ ४ (२७) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां पञ्चमाध्याये
(चत्वारिंशाध्याये) चतुर्थः खण्डः ॥ ४ (२७) ॥

॥ अथ पञ्चमः खण्डः ॥

अथातो ब्रह्मणः परिमरो यो ह वै ब्रह्मणः परिमरं वेद पर्येनं द्विषन्तो भ्रातृव्याः परि सपत्नां म्रियन्तेऽयं वै ब्रह्म योऽयं पवते त मेताः पञ्च देवताः परिम्रियन्ते विद्युद्वृष्टिश्चन्द्रमा आदित्योऽग्निर्विद्युद्वै विद्युत्य वृष्टि मनुप्रविशति सान्तर्धीयते तां न निर्जानन्ति यदा वै म्रियतेऽथान्तर्धीयतेऽथैनं न निर्जानन्ति स ब्रूयाद्विद्युतो मरणे द्विषन्मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति क्षिप्रं हैवैनं न निर्जानन्ति वृष्टिर्वै वृष्ट्वा चन्द्रमस मनुप्रविशति सान्तर्धीयते तां न निर्जानन्ति यदा वै म्रियतेऽथा-

न्तर्धीयते॑ऽथैनं न निर्जानन्ति॑ स ब्रूयाद् वृष्टेर्मरणे
द्विषन् मे म्रियतां॑ सोऽन्तर्धीयतां॑ तं मा निर्ज्ञासिषु-
रिति॑ क्षिप्रं हैवैनं न निर्जानन्ति॑ चन्द्रमा वा अमा-
वास्याया॑मादित्य मनुप्रविशति॑ सोऽन्तर्धीयते॑ तं न
निर्जानन्ति॑ यदा वै म्रियते ऽथान्तर्धीयते॑ ऽथैनं न
निर्जानन्ति॑ स ब्रूयाच्चन्द्रमसो मरणे॑ द्विषन्मे म्रियतां॑
सो ऽन्तर्धीयतां॑ तं मा निर्ज्ञासिषुरिति॑ क्षिप्रं हैवैनं
न निर्जानन्त्यादित्यो वा अस्तं यन्नग्नि मनुप्रविशति॑
सोऽन्तर्धीयते॑ तं न निर्जानन्ति यदा वै म्रियते ऽथा-
न्तर्धीयते॑ ऽथैनं न निर्जानन्ति॑ स ब्रूयादादित्यस्य
मरणे॑ द्विषन्मे म्रियतां॑ सोऽन्तर्धीयतां॑ तं मा निर्ज्ञा-
सिषुरिति॑ क्षिप्रं हैवैनं न निर्जानन्त्यग्निर्वा उद्वान्
वायु मनुप्रविशति॑ सोऽन्तर्धीयते॑ तं न निर्जानन्ति॑
यदा वै म्रियते ऽथान्तर्धीयते॑ ऽथैनं न निर्जानन्ति॑ स
ब्रूयादग्नेर्मरणे॑ द्विषन्मे म्रियतां॑ सो ऽन्तर्धीयतां॑ तं
मा निर्ज्ञासिषुरिति॑ क्षिप्रं हैवैनं न निर्जानन्ति॑
ता वा एता देवता॑ अत एव पुनर्जायन्ते॑ वायोरग्नि-
र्जायते॑ प्राणाद्धि बलान् मथ्यमानो ऽधिजायते॑ तं
दृष्ट्वा ब्रूयादग्निर्जायतां॑ मा मे द्विषन् जन्यत एवं
पराङ् प्रजिघ्रात्वित्यतो हैव पराङ् प्रजिघ्रात्यग्नेर्वा

आदित्यो जायते तं दृष्ट्वा ब्रूयादादित्यो जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघात्वित्यतो हैव पराङ् प्रजिघात्यादित्याद्वै चन्द्रमा जायते तं दृष्ट्वा ब्रूयाच्चन्द्रमा जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघात्वित्यतो हैव पराङ् प्रजिघाति चन्द्रमसो वै वृष्टिर्जायते तां दृष्ट्वा ब्रूयाद् वृष्टिर्जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघात्वित्यतो हैव पराङ् प्रजिघाति वृष्टेर्वै विद्युज्जायते तां दृष्ट्वा ब्रूयाद्विद्युज्जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघात्वित्यतो हैव पराङ् प्रजिघाति * स एष ब्रह्मणः परिमरस्तमेतं ब्रह्मणः परिमरं मैत्रेयः कौषारवः सुत्वने कैरिशये भार्गायणाय राज्ञे प्रोवाच तं ह पञ्च राजानः परिमम्रुस्ततः सुत्वा महज्जगाम तस्य व्रतं न द्विषतः पूर्व उपविशेद् यदि तिष्ठन्तं मन्येत तिष्ठेतैव न द्विषतः पूर्वः संविशेद् यद्यासीनं मन्येतासीतैव न द्विषतः पूर्वः प्रस्वप्याद् यदि जाग्रतं मन्येत जाग्रियादेवापि ह यद्यस्याश्ममूर्द्धा द्विषन् भवति क्षिप्रं हैवैनं स्तृणुते-स्तृणुते ॥ ६ (२८) ॥

॥इत्यैतरेयब्राह्मणेऽष्टमपञ्चिकायां पञ्चमोऽध्यायः॥ ५॥

---

* "प्रजिध्यत्वित्यतो॰—॰ प्रजिध्यति" क। एवं पूर्वत्र चेह सर्वत्र।

अथोक्तपुरोहितसहितस्य शत्रुक्षयार्थं कञ्चित् प्रयोग माह— "अथातो ब्रह्मणः परिमरो ; यो ह वै ब्रह्मणः परिमरं वेद, पर्येनं द्विषन्तो भ्रातृव्याः परि सपत्ना म्रियन्ते"–इति । 'अथ' पौरोहित्यविधानानन्तरम्, यतः पुरोहितेन सम्पाद्यः शत्रुक्षयो ऽपेक्षितः, 'अतः' कारणाद् 'ब्रह्मणः परिमरः' एतन्नामकः कर्मविशेषः, अभिधीयत इति शेषः । ब्रह्मशब्देनात्र वायुर्विवक्षितः* ; "अयं वै ब्रह्म, योऽयं पवते"–इति वक्ष्यमाणत्वात् (१४पं०) । तस्य वायोः परितो विद्युदादीनां मरणप्रकारः 'परिमरः'–इत्युच्यते † । तद्भावनारूपस्य कर्मविशेषस्य तदेव नामधेयम् । 'यः' पुमान् ब्राह्मणः परिमरं 'वेद' मनसा भावयति, 'एनं परि' एतस्य परितो ऽवस्थितासु सर्वासु दिक्षु, इदानीम् एनं 'द्विषन्तः' द्वेषं कुर्वन्तः शत्रवो म्रियन्ते ; जात्या शत्रवः 'सपत्नाः', तेऽपि परितो म्रियन्ते ‡ ; तस्मादेतद् वदनं सम्पादनीयम् ॥

वेद्यस्वरूप माह— "अयं वै ब्रह्म, यो ऽयं पवते, त मेताः

---

* "तद् ब्रह्मणः परिमर इत्युपासीत"–इति तै० आ० ९. १०. ४ । "ब्रह्मणः परिमरः । परिम्रियन्ते ऽस्मिन् पञ्च देवता विद्युद् वृष्टिश्चन्द्रमा आदित्यो ऽग्निरित्येताः ; अतो वायुः परिमरः, श्रुत्यन्तरप्रसिद्धेः (ऐ० ब्रा० ८. ५. ५.) । स एष एवायं वायुराकाशेनानन्य इत्याकाशो ब्रह्मणः परिमरः, त माकाशं वाय्वात्मानं ब्रह्मणः परिमर इत्युपासीत"–इति तत्र शां० भा० ।

† "परिमरौ उभयतो मरणयुक्तौ ; यस्य पशोः अग्रजोऽपि मृतः, अनुजोऽपि मृतः, तादृशौ"–इति तै० सं० ५. ६. २१. सा० भा० ।

‡ "पर्येणं म्रियन्ते द्विषन्तः सपत्नाः परि येऽप्रिया भ्रातृव्याः"–इति तै० आ० ९. १०. ४ । "परि एन मेवंविदं प्रतिस्पर्द्धिनो द्विषन्तोऽद्विषन्तोऽपि सपत्ना यतो भवति, अतो विशेष्यन्ते द्विषन्तः सपत्ना इति । य एनं द्विषन्तः सपत्नाः, ते परिम्रियन्ते प्राणान् जहति । किञ्च ये चाप्रिया अस्य भ्रातृव्याः अद्विषन्तोऽपि, ते च परिम्रियन्ते"–इति तत्र शां० भा० ।

पञ्च देवताः परिम्रियन्ते,— विद्युद् वृष्टिश्चन्द्रमा आदित्योऽग्निः” -इति। यः ‘अयं’ वायुः ‘पवते’ अन्तरिक्षे सञ्चरति, अय मेव ब्रह्मशब्देन विवक्षितः। ‘एताः’ विद्युदादयः पञ्च देवताः ‘तं’ वायु ‘परिम्रियन्ते’ तस्य परितो विनाशं गच्छन्ति। तदेतदनुसन्धेयस्वरूपम् ॥

तत्रादौ विद्युतो मृतिं प्रतिपादयति— “विद्युद्वै विद्युत्य वृष्टि मनुप्रविशति, सान्तर्धीयते, तां न निर्जानन्ति”-इति। येयं विद्युदस्ति, सा ‘विद्युत्य’ प्रकाशं कृत्वा, पश्चाद् वृष्टि मनुप्रविशति; अत एव सा ‘अन्तर्धीयते’ अस्माभिर्न दृश्यते। ‘तां’ वृष्टौ प्रविष्टां विद्युतं क्व गता, कुत्र स्थिता? इति मनुष्या निःशेषेण न जानन्ति ॥

तत्र दृष्टान्त माह— “यदा वै म्रियते ऽथान्तर्धीयते ऽथैनं न निर्जानन्ति”-इति। लोके कश्चित् पुरुषो यस्मिन् क्षणे म्रियते, तस्मिन्नेव क्षणे अन्यैर्न दृश्यते, ततो जना विचार्यापि क्व गतः कुत्रावस्थित इति ‘एनं’ पुरुषं मृतं ‘न निर्जानन्ति’; यद्यपि कुणपं पश्यन्ति, तथापि जीवात्मानं न जानन्त्येव। तथैव विद्युद्विनाश इति द्रष्टव्यम् ॥

यथोक्तध्यानवतो जप्य मन्त्र* माह— “स ब्रूयाद्विद्युतो मरणे द्विषन् मे म्रियतां, सोऽन्तर्धीयतां, तं मा निर्ज्ञासिषुरिति”-इति। विद्युतो मरणे सत्युपासको द्विषदित्यादिकं मन्त्रं ब्रूयात्। तस्याय मर्थः— इयं विद्युदिव मदीयः शत्रुः म्रियताम्, स पुनः केनापि न दृश्यताम्, अतो विचार्यापि क्व गतः, क्वास्ते? इति ‘तं’ शत्रुं तदीया बन्धवो निःशेषेण मा जानन्त्विति ॥

---

[*] “जपमन्त्र” ज।

जपफलं दर्शयति— "क्षिप्रं हैवैनं न निर्जानन्ति"–इति । शीघ्र मेव मृत मेनं शत्रुं तदीया बन्धवो नैव जानन्ति ॥

विद्युत इव वृष्टेर्विनाशं दर्शयति— "वृष्टिर्वै वृष्ट्वा चन्द्रमस मनुप्रविशति, सान्तर्धीयते, तां न निर्जानन्ति ; यदा वै म्रियते ऽथान्तर्धीयते ऽथैनं न निर्जानन्ति , स ब्रूयाद् वृष्टेर्मरणे द्विषन् मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति ; क्षिप्रं हैवैनं न निर्जानन्ति"–इति । येयं वृष्टिरस्ति, सेयं 'वृष्ट्वा' भूमौ जलं पातयित्वा, स्वय माप्यमण्डलरूपं चन्द्रमस मनुप्रविशति । अन्यत् पूर्ववद् योज्यम् ॥

चन्द्रमसो विनाशं दर्शयति— "चन्द्रमा वा अमावास्याया मादित्य मनुप्रविशति, सोऽन्तर्धीयते, तं न निर्जानन्ति; यदा वै म्रियते ऽथान्तर्धीयते ऽथैनं न निर्जानन्ति, स ब्रूयाच्चन्द्रमसो मरणे द्विषन् मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति ; क्षिप्रं हैवैनं न निर्जानन्ति"–इति । अयं चन्द्रमाः 'अमावास्यायां' तिथौ साकल्येन आदित्य मनुप्रविशति । अन्यत् पूर्ववत् ॥

आदित्यस्य विनाशं दर्शयति— "आदित्यो वा अस्तं यन्नग्नि मनुप्रविशति , सोऽन्तर्धीयते, तं न निर्जानन्ति ; यदा वै म्रियते ऽथान्तर्धीयते ऽथैनं न निर्जानन्ति, स ब्रूयादादित्यस्य मरणे द्विषन् मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति ; क्षिप्रं हैवैनं न निर्जानन्ति"–इति । आदित्यो यदास्त मेति, तदानी मग्नि मनुप्रविशति । तदेतत् तैत्तिरीयैः समाम्नातम्— "अग्निं वावादित्यः सायं प्रविशति, तस्मादग्निर्दूरान्नक्तं ददृशे ; उभे हि तेजसी सम्पद्येते"–इति (ब्रा० ८. १. ३. *) अन्यत् पूर्ववत् ॥

---

* "उद्यन्तं वावादित्य मग्निरनुसमारोहति , तस्माद्धूम एवाग्नेर्दिवा ददृशे"–इति तत्परांशः ।

अग्नेर्विनाशं दर्शयति— "अग्निर्वा उद्वान् वायु मनुप्रविशति, सोऽन्तर्धीयते, तं न निर्जानन्ति ; यदा वै म्रियते ऽथान्तर्धीयते ऽथैनं न निर्जानन्ति, स ब्रूयादग्नेर्मरणे द्विषन् मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति ; क्षिप्रं हैवैनं न निर्जानन्ति"–इति। 'उद्वान्' अग्नेरुपशमः, तं प्राप्नुवन्नग्निर्वायु मनुप्रविशति ; वायुबाहुल्ये दीपविनाशदर्शनात् । अन्यत् पूर्ववत् ॥

वायोः परितो म्रियमाणानां देवतानां पुनर्वायोरेव जन्म दर्शयति— "ता वा एता देवता अत एव पुनर्जायन्ते"–इति । 'वायोः' जगत्कारणभूतसूत्रात्मरूपत्वात् जगदेकदेशानां विद्युदादीनां जन्मविनाशौ वाय्वधीनौ ॥

पूर्वं विद्युदादीना मग्न्यन्तानां क्रमेण विनाशो दर्शितः ; इदानी मग्न्यादीनां विद्युदन्तानां क्रमेण उत्पत्तिं विवक्षुरग्नेरुत्पत्तिं दर्शयति— "वायोरग्निर्जायते ; प्राणाद्धि बलान्मथ्यमानो ऽधिजायते ; तं दृष्ट्वा ब्रूयादग्निर्जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघ्यत्वित्यतो हैव पराङ् प्रजिघ्यति"–इति । योऽय मग्निः, सोऽयं वायोर्जायते । कथ मेतदिति, तदुच्यते— 'प्राणाद्' बलात् प्राणवायुसम्बन्धिशक्तिवशान्मथ्यमानोऽय मग्निः अधिकत्वेन जायते*। 'तं' जायमान मग्निं दृष्ट्वा सोऽय मग्न्यादिजन्मध्याता अग्निरित्यादिकं मन्त्रं जपेत् । अय मग्निर्वायोः सकाशात् सुखेन जायतां, 'मे द्विषन्' मदीयः शत्रुः 'मा जनि' मोत्पद्यताम् । अत एव मन्त्रः 'पराङ् प्रजिघ्यतु' विमुखो भूत्वा प्रकर्षेण गच्छतु । 'इति' एतस्मिन् मन्त्रे जपिते सति 'अतः' जपितुः सकाशात् शत्रुः विमुखो भूत्वा दूरे गच्छति ॥

---

* "शमीगर्भादग्निं मन्यते"–इति तै० ब्रा० १. १. ९. १ द्रष्टव्यम् ।

आदित्यस्योत्पत्तिं दर्शयति— "अग्नेर्वा आदित्यो जायते ; तं दृष्ट्वा ब्रूयादादित्यो जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघ्यत्वित्यतो हैव पराङ् प्रजिघ्यति"–इति । रात्रावग्निं प्रविष्ट आदित्यः परेद्युरग्नेर्जायते । अत एव अहनि अग्निस्तेजोरहितः, सूर्योऽधिकतेजा भासते *। अन्यत् पूर्ववत् ॥

चन्द्रमस उत्पत्तिं दर्शयति— "आदित्याद्वै चन्द्रमा जायते† ; तं दृष्ट्वा ब्रूयाच्चन्द्रमा जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघ्यत्वित्यतो हैव पराङ् प्रजिघ्यति"–इति । अमावास्यायामादित्ये प्रविष्टश्चन्द्रमाः शुक्लपक्षप्रतिपदि आदित्यात् जायते । अन्यत् पूर्ववत् ॥

वृष्टेरुत्पत्तिं दर्शयति— "चन्द्रमसो वै वृष्टिर्जायते‡ ; तां दृष्ट्वा ब्रूयाद् वृष्टिर्जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजि-

---

* २९५पृष्ठगता टीप्पनी द्रष्टव्यवलोक्या ।

† "अयं सोमो वृष्णो अश्वस्य रेतः"–इति सं० १. १६४. ३५ । किञ्च "अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते ; तदेतेनोपेक्षितव्यम्, आदित्यतोऽस्य दीप्तिर्भवतीति । 'सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः (वा० सं० १८. ४०.)'–इत्यपि निगमो भवति ०—० । 'अत्राह गोरमन्वत'–इति (सं० १. ८४. १५.)"–इति निरु० २. २. २ ।

‡ "पर्जन्याद्वै वृष्टिर्जायते"–इति शत० ब्रा० १२. १. १. २ । "रसात्मकत्वात् चन्द्रमसः रसानुप्रदानसम्बन्धः"–इति दु० (निरु० ११. १. ६.) । चन्द्रमःपदस्य निर्वचनम् निरु० ११. १. ५, तै० ब्रा० २. २. १० । "अभ्राद् वृष्टिरिवाजनि"–इति सं० ७. ९४. १ । "सौम्या ह्यापः"–इति च गतं पुरस्तात् (१भा० ६१पृ० २पं०) । वस्तुतः सूर्यस्यैव मुख्यं वृष्टिप्रदत्वम् । तथाहि— "अग्निर्वा इतो वृष्टिमुदीरयति, मरुतः सृष्टां नयन्ति, यदा खलु वा असावादित्यो न्यङ् रश्मिभिः पर्यावर्त्ततेऽथ वर्षति"–इत्यादि तै० सं० २. ४. १०. स्फुटं द्रष्टव्यम् । उक्तमिहापि पुरस्तात् (१भा० ६१पृ० ६पं०) "असाविमां वृष्ट्याभ्युनत्त्यभिजिघ्रति"–इति ।

ध्यलितो हैव पराङ् प्रजिध्यति"—इति। जलमये चन्द्रमण्डले प्रविष्टा वृष्टिः कालान्तरे चन्द्राज्जायते। अन्यत् पूर्ववत्॥

विद्युदुत्पत्तिं दर्शयति— "वृष्टेर्वै विद्युज्जायते*; तां दृष्ट्वा ब्रूयाद् विद्युज्जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिध्यलित्यतो हैव पराङ् प्रजिध्यति"—इति। वृष्टौ प्रविष्टा विद्युत् पुनरपि कदाचित् प्रसक्ताया वृष्टेर्जायते। अन्यत् पूर्ववत्॥

उक्त मर्थ मुपसंहरति— "स एष ब्रह्मणः परिमरः"—इति। यश्च वायुसम्बन्धिपरिमरनामकः कर्मविशेष उक्तः (२९३पृ०), 'स एषः' ध्यानरूपो जप्य इत्यर्थः†॥

त मेतं कर्मविशेष मुदाहरणमुखेन प्रशंसति— "त मेतं ब्रह्मणः परिमरं मैत्रेयः कौषारवः सुत्वने कैरिशये भार्गायणाय राज्ञे प्रोवाच, तं ह पञ्च राजानः परि मम्रुस्ततः सुत्वा महज्जगाम"—इति। उक्तं कर्मविशेषं कुषारपुत्रो मैत्रेयनामको महर्षिः सुत्वनाम्ने राज्ञे प्रोवाच। कीदृशाय सुत्वने? किरिशस्यापत्यं कैरिशिः तस्मै 'कैरिशये', भर्गस्य गोत्रापत्यं भार्गायणः तस्मै 'भार्गायणाय'। 'तं' सुत्वनामकं राजानं 'परितः' सर्वदिक्षु वर्त्तमानाः पञ्चसङ्ख्याका द्वेषिणो राजानो मृताः। ततः 'सुत्वा' राजा 'महत्' प्रौढं निस्सम्पत्नपदं जगाम॥

---

* "विद्युद्वा अपां ज्योतिः"—इति शत० ब्रा० ७. ५. २. ४९। "आपो वै वृष्टिः"—इति च तत्रैव ८. २. ३. ४। "आदित् प्रत्नस्य रेतसो ज्योतिः पश्यन्ति"—इति सं० ८. २. ६. ३०। निरुक्तेऽपि ४. २. ६ द्रष्टव्यम्। आदिदितिमन्त्रस्य ब्रह्मपरं व्याख्यान मपि शङ्करेणाभाषि छा० उप० ३. १७. ७ द्रष्टव्यम्।

† "षड् वै ब्रह्मणो द्वारोऽग्निर्वायुरापश्चन्द्रमा विद्युदादित्यः"—इत्यादिः (११. ४. ४. १.) शतपथग्रन्थ इह समालोच्य इति शिवम्॥

उक्तं जन्मविशेष मनुष्ठातुः व्रतविशेषं विधत्ते— "तस्य व्रतं, —न द्विषतः पूर्वं उपविशेद्, यदि तिष्ठन्तं मन्येत तिष्ठेतैव ; न द्विषतः पूर्वः संविशेद्, यद्यासीनं मन्येतासीतैव ; न द्विषतः पूर्वः प्रस्वप्याद्, यदि जाग्रतं मन्येत जाग्रियादेव"—इति । 'तस्य' अनुष्ठातुः एतद् व्रत मुच्यते । एतदीयो द्विषन् यदा उपविशति, ततः प्राक् स्वयं नोपविशेत् ; किन्तु चारमुखेन तदीयं वृत्ततां विचार्य , यदि द्विषन्तं तिष्ठन्तं मन्येत, तदानीं स्वय मपि तिष्ठेतैव ; तथा यदा द्विषन् शयनं करोति, ततः प्राक् स्वयं न 'संविशेत्' शयनं न कुर्यात् ; यदि द्विषन्त मुपविष्टं मन्येत, तदा स्वय मप्युपविशेदेव । तथा द्विषन् यदा निद्रां करोति, ततः प्राक् स्वयं न प्रस्वप्यात् ; किन्तु यदि द्विषन्तं जाग्रतं मन्येत, तदानीं स्वय मपि 'जाग्रियात्' प्रबुद्ध एवावतिष्ठेतैव ॥

एवं व्रत माचरतः फलं दर्शयति— "अपि ह यद्यस्याश्ममूर्द्धा द्विषन् भवति क्षिप्रं हैवैनं स्तृणुते-स्तृणुते"—इति । 'अस्य' राज्ञो ऽनुष्ठातुः 'द्विषन्' शत्रुः यदि 'अश्ममूर्द्धा' पाषाणसदृशशिरस्को भवति, अतिप्रबल इत्यर्थः ; तथाप्ययं कर्मविशेषः शीघ्र मेव 'एनं' शत्रुं 'स्तृणुते' हिनस्ति । अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ५ (२८) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां पञ्चमाध्याये
(चत्वारिंशाध्याये) पञ्चमः खण्डः ॥ ५ (२८) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'–नामभाष्ये ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायाः पञ्चमोऽध्यायः ॥

अथात स्तुतशस्त्रयोश्चत्वारि(१)। अथातः पुनरभिषिक्तस्य सप्त(२)। अथात ऐन्द्रस्त्रीणि(३)। स य इच्छेन्नव(४)। अथातः पुरोधायाः पञ्च(५) ॥ ५ * ॥

अथात स्तुतशस्त्रयोः, पर्यू षु प्र धन्व, एतेन ह वा अष्टौ ॥ ५ † ॥

॥ इति अष्टमपञ्चिका समाप्ता ॥

॥ इति ऐतरेयं ब्राह्मणं सम्पूर्णम् ॥

---

* १६५, १८२, २२३, २३७, २७४ पृ० (४—७—३—९—५ = २८ ख०)।
† १६५, २१५, २५७पृ० (१०—१०—८=२८ ख०)। १भा० २२२पृ०†द्रष्टव्यम्।

१ *

॥ अथैतरेयविषयसूची ॥

१ अग्निष्टोमयज्ञः (ज्योतिष्टोमीयैकाहविशेषः) १भा० १२पृ०—२भा० २३५पृ०
२ उक्थ्यक्रतुः (ज्योतिष्टोमीयैकाहविशेषः) २भा० २३५—२४३ पृ० ।
३ षोड़शिप्रयोगः (ज्योतिष्टोमीयैकाहविशेषः) २भा० २४५—२६६ पृ० ।
४ अतिरात्रक्रतुः (ज्योतिष्टोमीयैकाहविशेषः) २भा० २६६—३०४ पृ० ।
५ गवामयनसत्रम् (संवत्सरसत्रविशेषः) २ भा० ३०४—३६५ पृ० ।
६ आदित्यानामयनसत्रम्
७ अङ्गिरसामयनसत्रम् } (संवत्सरसत्रविशेषौ) २भा० ३३०—३३३पृ० ।
८ भरतद्वादशाहयागः
९ व्यूढद्वादशाहयागः } (अहीनविशेषौ सत्रविशेषौ च) २भा० ३६६ पृ०—३भा० १६२ पृ० ।
१० अग्निहोत्रयागः (हौत्रविशेषः) ३भा० १६३—१६५,४भा० ४४—५८ पृ० ।
प्रकीर्णकम् ... ... ३भा० १६५पृ०—४भा० ८ पृ० ।
आहिताग्नेः प्रायश्चित्तानि ४भा० ९—४४ पृ० ।
शौनःशेपाध्यायः ... ... ४ भा० ५९—१०२ पृ० ।
११ राजसूयक्रतुः (सोमयागविशेषः) ४भा० १०३—२७३ पृ० ।
सर्वयज्ञसाधारणविधयः ... ४भा० २७४—२९० पृ० ।
ब्रह्मणः परिमरः ... ... ४भा० २९१—३०० पृ० ।

तदत्र ब्राह्मणे एकादश यज्ञा विहिता इति सङ्क्षेपः ।

---

* इत आरभ्य सप्तविध-सूचीपत्राणि चतुर्भागाणा मेव वेदितव्यानि ।

२

॥ अथ सभाष्यैतरेयविषयसूची ॥

॥ प्रथमभागस्य ॥

सायणभाष्यभूमिकारम्भः १
वेदलक्षणं तन्निर्वचनादिकञ्च १
स्त्रीशूद्रद्विजबन्धूनां वेदानधिकारित्वम् २
वेदस्यापौरुषेयत्वनिरूपणम् ३
वेदार्थाधिगमस्यात्यावश्यकत्वनिर्णयः ४
वेदार्थानुष्ठानज्ञानयोः फलतारतम्यम् ४
भूतार्थवादस्य स्वार्थेऽपि प्रामाण्यम् ५
वेदस्य भागद्वयकथनम् ६
ब्राह्मणग्रन्थलक्षणनिर्णयाधिकरणम् ६
ऐतरेयनामनिर्वचनादिकम् ७
ऐतरेयब्राह्मणस्य प्रधानतो विषयनिर्णयः... ... ८
सोमयागेषु ज्योतिष्टोमस्य प्राधान्यम् ८
अग्निष्टोमस्य प्रकृतित्वकथनम् ९
उक्थ्यादीनां विकृतित्वकथनम् ९
ऋत्विग्वरणस्यादौ वक्तव्यत्वेऽप्यहौत्रत्वम् १०
ऋग्वेदस्य हौत्रत्वनिर्णयाधिकरणम् १०
इष्टिगतयोरपि याज्यानुवाक्ययोर्हौत्रत्वकथनम् ... ११

॥ प्रथमपञ्चिकायाः प्रथमाध्यायारम्भः १२ पृ० ॥

प्रथमा मिष्टिं विधातु मग्नेर्विष्णोश्च प्रशंसा ... १३
द्वादशसु शस्त्रेषु आज्यशस्त्रस्य प्राथम्यम् ... १३

द्वादशसु शस्त्रेषु आग्निमारुतशस्त्रस्यान्तिमत्वम् ... १४
दीक्षणीयेष्टेर्विधानम् १५
अग्नाविष्णवोः प्रथमोत्तमत्वात् मध्यदेवताना मप्युपलक्षकत्वम् १६
अग्नाविष्णवोः सर्वदेवतात्मकत्वम् १७
आग्नावैष्णवयोः पुरोडाशयोः यज्ञस्याद्यन्तावयवत्वम् ... १७
आग्नावैष्णवयोः पुरोडाशयोः ब्रह्मवादिचोद्यम् १८
दीक्षणीयेष्टौ प्रतिष्ठाकामस्य द्रव्यान्तरविधानम् ... १९
... घृतचरुणा अप्रतिष्ठादोषपरिहारकथनम् ... २०
... घृतचरोः प्रतिष्ठाहेतुत्ववेदनप्रशंसनम् ... २०
... कालविधानम् २१
... सप्तदशसामिधेनीविधानम् २३
इष्टिसोमयोः पौर्वापर्याभावनिर्णयाधिकरणम् ... २५
विप्रस्य सोमपूर्वत्वनियमाभावनिर्णयाधिकरणम् ... २५
सामधेनीनां सङ्ख्याविकल्पाभाव निर्णयाधिकरणम् ... २६
वैश्यस्य सामिधेनीसङ्ख्यानिर्णयाधिकरणम् २७
प्रकृतौ गोदोहननिर्णयाधिकरणम् २७
वैमृधादौ सामिधेनीकर्मनिर्णयाधिकरणम् २८
इष्टिशब्दस्य निर्वचनादिकम् ३०
आहूतिशब्दस्य निर्वचनादिकम् ३०
ऊतिशब्दस्य निर्वचनादिकम् ३०
होतृशब्दस्य निर्वचनादिकम् ३१
दीक्षितस्य गर्भसाम्यत्वेन संस्कार्यत्वकथनम् ... ३४
... अद्भिरभिषेचनसंस्कारः ३४
... नवनीतेनाभ्यञ्जनसंस्कारः ३५
... नेत्रयोरञ्जनसंस्कारः ३५
... दर्भपिञ्जूलैः पावनसंस्कारः ३६
... प्राचीनवंशाख्यशालाप्रवेशविधिः ... ३७
... देवयजने उपवेशनसञ्चरणयोर्विधिः ... ३७

दीक्षितस्य देवयजनाद् बहिर्गमननिषेधः ... ३७
वासःपरिधानसंस्कारः ३८
कृष्णाजिनाच्छादनसंस्कारः ३८
मुष्टीकरणसंस्कारः ३८
मुष्टिद्वयप्रशंसनम् ३९
अवभृथगमनात् प्राक् कृष्णाजिनोन्मोचनम् ... ४०
कृष्णाजिनोन्मोचनकाले वासस उन्मोचननिषेधः ... ४०
दण्डादीनां संस्कारहेतुत्वाभावनिर्णयाधिकरणम् ... ४१
दीक्षणीयेष्टौ प्रथमस्याज्यभागस्य पुरोनुवाक्या ४२
द्वितीयस्याज्यभागस्य पुरोनुवाक्या ४२
ईजानस्य प्रथमद्वितीयाज्यभागयोः पुरोनुवाक्याद्वयम् ... ४३
प्रथमद्वितीयाज्यभागयोरन्यत् पुरोनुवाक्याद्वयम् ... ४४
प्रधानहविषि याज्यानुवाक्याविधानम् ४४
याज्यानुवाक्ययोरनुवाक्याया एव प्राथम्यम् ... ४५
यज्ञस्य रूपसमृद्धत्वोपदेशः ४५
अग्नेर्विष्णोश्च दीक्षापालत्वेन प्रशंसनम् ४६
त्रिष्टुप्छन्दस इन्द्रियसाधनत्वेन प्रशंसा ४६
याज्यानुवाक्ययोः समुच्चयनिर्णयाधिकरणम् ४७
स्विष्टकृद्यागे गायत्रीच्छन्दस्कयोर्याज्यानुवाक्ययोर्विधानम् ... ४८
आयुष्कामस्योष्णिक्छन्दस्कयोर्विधानम् ... ४९
स्वर्गकामस्यानुष्टुप्छन्दस्कयोर्विधानम् ५०
श्रीकामस्य बृहतीच्छन्दस्कयोर्विधानम् ५०
यज्ञकामस्य पङ्क्तिच्छन्दस्कयोर्विधानम् ५१
वीर्यकामस्य त्रिष्टुप्छन्दस्कयोर्विधानम् ५१
पशुकामस्य जगतीच्छन्दस्कयोर्विधानम् ५२
अन्नकामस्य विराड्छन्दस्कयोर्विधानम् ५२
विराड्छन्दसः पञ्चवीर्यत्वेन प्रशंसा ५४
विराड्छन्दस्कयोः संयाज्ययोर्नित्यत्वेन विधानम् ... ५५

दीक्षितस्य सत्यवदनविधानम् ५६
    सत्यवदनमन्त्रः ५६
    चक्षुर्दृष्टस्यैव सत्यत्वम् ५७
    विचक्षणशब्दस्य चक्षुःपर्यायत्वम् ५८

॥ प्रथमपञ्चिकायाः द्वितीयाध्यायारम्भः ६० पृ० ॥

प्रायणीयशब्दार्थनिर्णयः ६१
प्रायणीयोदनीययोरिष्ट्योः प्रशंसा ६२
आख्यायिका— प्रायणीयेष्टौ देवताविशेषविधानार्था ... ६२
प्रायणीयेष्टौ पुरःस्थायिन्याः पथ्यादेवताया यागविधिः ... ६४
    दक्षिणदिग्वर्त्तिनोऽग्नेर्यागविधिः ... ६५
    पश्चिमदिग्व्यवस्थितस्य सोमस्य यागविधिः ... ६५
    उत्तरदिग्व्यवस्थितस्य सवितुर्यागविधिः ... ६६
    ऊर्द्ध्वदिग्वर्त्तिन्या अदितेर्यागविधिः ६६
    पथ्यादीना माज्येन यागोऽदितेस्तु चरुणा ... ६६
    पञ्चदेवतायजनेनैव यज्ञस्य पाङ्क्तत्वम् ... ६७
पञ्चप्रयाजानां प्रकृतावनुष्ठानप्रकारः ६९
प्रायणीयेष्टौ प्रयाजाहुतौ तेजोब्रह्मवर्चसकामस्य प्रागपवर्गत्वम् ६९
        — अन्नाद्यकामस्य दक्षिणापवर्गत्वम् ... ७०
        — पशुकामस्य प्रत्यगपवर्गत्वम् ... ७०
        — यज्ञकामस्य उत्तरापवर्गत्वम् ... ७१
        — स्वर्गकामस्य ऊर्द्ध्वापवर्गत्वम् ... ७१
    वाक्‌सम्पादकत्वेन पथ्यायागस्य प्रशंसा ... ७१
    प्राणापानसम्पादकत्वेनाग्नीषोमयोः प्रशंसा ... ७२
    प्रेरकत्वेन सवितृदेवतायाः प्रशंसा ७२, ७३
    प्रतिष्ठाहेतुत्वेनादितेः प्रशंसा ७२, ७३
    चक्षुःस्वरूपत्वेन अग्नीषोमयोः प्रशंसा ... ७२

प्रायणीयेष्टौ प्रसङ्गतः सर्वदेवतानां जातिनिरूपणम् ... ७५
„ प्रथमदेवतायाः पथ्यायाः पुरोनुवाक्या ... ७७
„ पथ्यादीनां पञ्चानां देवतानां क्रमेण याज्यानुवाक्ये ७८
„ पथ्यादीनां पञ्चानां देवतानां क्रमेण संयाज्ये ... ८०
शाखान्तरीयस्यानुयाजवर्जनस्याशङ्का ... ८५
प्रयाजवदनुयाजवत् कर्त्तव्य मिति विधिः ... ८६
पत्नीसंयाजानां समिष्टयजुषश्च निषेधः ... ८६
निष्कासस्थापनविधिः ८७
उदयनीयेष्टौ याज्यानुवाक्यानां व्यत्यासविधिः ८८
प्रायणीयेष्टौ विहितस्यादित्यस्य चरोः प्रशंसा ८९
विहितायाः प्रथमायाः पथ्यादेवताया उदयनीयेष्टौ उत्तमात्वविधानम् ९०
मीमांसा— निष्कासस्योदयनीयसंस्कारनिर्णयाधिकरणम् ... ९१

॥ प्रथमपञ्चिकायास्तृतीयाध्यायारम्भः ९२ पृ० ॥

सोमक्रयस्य दिङ्निरूपणम् ९३
प्राचीनवंशं नीयमाने सोमे पठितव्यानामृचामष्टत्वादष्टसङ्ख्यायाः प्रशंसा ९४
प्रैषमन्त्रः— सोमप्रवहणीनाम् ९८
सोमप्रवहणीनामष्टानां विधानम् ९८
पुण्यकर्मकरणकालेऽपि पापसम्भवहेतुनिरूपणम् ... १०१
अनन्यचित्तस्यैव मन्त्रादिपाठविधिः १०१
व्यग्रतयानुष्ठानस्य निषेधः १०१
वारुण्या सोमप्रवहणीपाठसमापनस्य हेतुकथनम् ... १०५
सोमस्य शकटादवरोहणविधिः १०८
आख्यायिका— सोमोपावहरणस्य दिग्विधानार्था ... १०९
सोमस्य जयहेतुत्वकथनम् ११०
अर्थवादेन विधेयाना मुन्नयनप्रकारोपदेशः १११

आतिथ्येष्टेः विधानं कालनिर्णयश्च ११२
नवकपालहविर्द्रव्याणां विधानम् ११३
विष्णुदैवतत्वविधानम् ११३
स्वरूपकथनं नामहेतुश्च ११३, ११५
याज्यानुवाक्ये ११४
शाखान्तरीयनिर्वापमन्त्रप्रशंसा ११४
अग्निमन्थनविधानम् ११५
अर्हणीयागते गोहिंसनस्य युगान्तरधर्म्मतेति व्यवस्था ... ११५
मीमांसा— वैष्णवधर्मानतिदेशनिर्णयाधिकरणम् ... ११६
प्रैषमन्त्रः— अग्निमन्थनीयानाम् ११९
आतिथ्येष्टौ अग्निमन्थनीयानां त्रयोदशानां विधानम् ... ११९
अग्निमन्थने रक्षोहननानां नवानां विधानम् ... १२१
ब्राह्मणग्रन्थविहिताया एवाहुतेः स्वर्ग्याहुतित्वनिरूपणम् ... १२९
अब्राह्मणपरिचयः (स्मृत्युक्तः) १२९
आतिथ्येष्टौ आज्यभागयोः पुरोनुवाक्याद्वयविधिः १३२
— याज्याद्वयविधानम् १३३
प्रधानहविषोः याज्यानुवाक्याविधानम् ... १३३
संयाज्ययोर्विधानम् १३४
इड़ाभक्षणादूर्ध्वं कर्त्तव्यानां निवारणम् ... १३४
इड़ाभक्षणस्य द्वैविध्यवर्णनम् १३४
प्रयाजानुयाजानां प्रकृष्टत्वापकृष्टत्ववर्णनम् १३५
आतिथ्येष्टौ अनुयाजानां निषेधः १३४
दोलिकावहनदृष्टान्तेन अनुयाजाना मभावेऽपि दोषाभावनिरूपणम् १३६
मीमांसा— प्रायणीयातिथ्ययोः शंय्विड़ान्तताधिकरणम् ... १३७
— — परशंय्विड़ान्ततानिर्णयाधिकरणम् १३८
नित्यानुवादलक्षणम् १३७
विकल्पेऽष्टौ दोषाः, परिसङ्ख्यायां त्रयो दोषाश्चेति कथनम् ... १३८

॥ प्रथमपञ्चिकायाश्चतुर्थाध्यायारम्भः १४० पृ० ॥

आख्यायिका— प्रवर्ग्यप्रकरणारम्भार्थिका १४०
प्रवर्ग्यस्य साधनानां सम्पादनविधिः १४१
प्रैषमन्त्रः— प्रवर्ग्याभिष्टवमन्त्राणाम् १४२
प्रवर्ग्यस्य अनुज्ञापनमन्त्रः १४२
अभिष्टवस्य (२१) एकविंशत्यृचां विधानम् ... १४४
— (१३) त्रयोदशर्चां विधानम् ... १४७
— (७६) षट्सप्तत्यृचां विधानम् ... १५१
— पूर्वपटलसमाप्तिकारिका ... १५७
— उत्तरपटलारम्भकथनम् ... १५८
— (२१) पुनरेकविंशत्यृचां विधानम् ... १६०
— पटलद्वयकरणतात्पर्यकथनम् ... १५७
षड्भिर्मन्त्रैरनूत्थानादीनां षण्णां कर्मणां विधानम् १६२
अपराह्णेऽपि याज्यामन्त्रद्वयविधिः १६३
अनुवषट्कारमन्त्रः तद्विधानञ्च १६२
प्रवर्ग्यस्य शाखान्तरप्रसिद्धो ब्रह्मजपमन्त्रः १६३
होमादूर्ध्वं होत्रा पठनीयानां सप्तर्चां विधिः ... १६३
सोम-घर्म-वाजिनानां स्विष्टकृत्यवदाननिषेधः १६३
प्रवर्ग्यस्य हविःशेषभक्षणे होतुः प्रतीक्षा १६४
पात्राणां संसादने होतुर्मन्त्रद्वयम् १६५
उत्तमदिनेऽपराह्णे समधिकानामृचां पाठविधिः ... १६५
अभिष्टवस्य समाप्तिमन्त्रविधिः १६५
देवमिथुनरूपेण प्रशंसा १६५
उक्तार्थवेदनस्य तद्वेदनपूर्वकानुष्ठानस्य च प्रशंसा ... १६७
आख्यायिका— उपसदिष्टिविधानार्था १६६
उपसत्सु प्रधानमन्त्रत्रयाणां विधानम् १७१
मन्त्रत्रयावृत्त्या द्वादशयागनिर्वृत्त्युपदेशः ... १७२

यागविशेषेषु उपसन्मन्त्रसङ्ख्यापार्थक्यम् १७३
सन्ध्याकालोऽसुराणा मधिकृतः १७३
मीमांसा— उपसदा मावर्त्तनीयत्वनिर्णयाधिकरणम् ... १७५
उपसदां विजयहेतुत्वेन प्रशंसा १७६
तानूनप्त्रस्य विधानार्थिकाया आख्यायिकाया आरम्भः ... १७६
    नाम्नो निर्वचनम् १७८
    परस्परद्रोहनिषेधः १७९
    उपसद्भ्यः पूर्व मनुष्ठेयत्वम् १७९
आतिथ्येष्टावास्तीर्णस्यैव वर्हिष उपसत्स्वनुवृत्तिविधानम् ... १८१
उपसत्सु द्रव्यदेवतयोः प्रस्तावः १८२
    द्रव्यदेवतयोर्विधानम् १८२
    अङ्गभूतस्य व्रतोपायनस्य विधिः १८३
    पृथिव्यन्तानां सप्तलोकानां क्रमात् क्षुद्रतरत्वम् ... १८३
    पूर्वापराह्णयोः सामधेनीनां विधानम् ... १८४
    याज्यापुरोनुवाक्यानां विधानम् १८४
उपसदा माज्यहविष्कत्वेन प्रशंसनम् १८५
मीमांसा— आतिथ्योपसदग्नीषोमीयवर्हिष एकत्वनिर्णयाधिकरणम् १८७
आतिथ्योपसदग्नीषोमीयपरिचयः १८६
मीमांसा— तद्वर्हिष आतिथ्ये एव प्रोक्षणादिनिर्णयाधिकरणम् १८७
उपसत्सु प्रयाजानुयाजनिषेधः १८९
    आश्रावणविधिः १८९
    आप्यायनविधिः (सोमस्य) १९०
    तानूनप्त्रस्य क्रूरकर्मत्वकथनम् १९०
    निह्नवविधिः (सोमस्य) १९१
मीमांसा— उपसत्सु प्रयाजादिनिषेधस्यानुवादत्वनिर्णयाधिकरणम् १९२

॥ प्रथमपञ्चिकायाः पञ्चमाध्यायारम्भः १९५ पृ० ॥

आख्यायिका— सोमक्रयविधानार्था १९६

सोमक्रयस्य विधानम् १९७

  मन्त्राणां मन्द्रध्वनिविधानम् १९८

मीमांसा— द्रव्याणां समुच्चयत्वनिर्णयाधिकरणम् ... १९९

प्रैषमन्त्रः— अग्निप्रणयनीयाना मृचाम् २०२

अग्निप्रणयनीयानां प्रथमर्ग्-विधानम् ब्राह्मणस्य ... २०२

  प्रथमर्ग्-विधानम् क्षत्रियस्य २०३

  प्रथमर्ग्-विधानम् वैश्यस्य २०४

  द्वितीयादीनां सप्ताना मृचां विधानारम्भः ... २०४

  आद्यन्तयोस्त्रिरावृत्त्या द्वादशत्वापादनविधिः २११

प्रैषमन्त्रः— हविर्द्धानप्रवर्त्तनीयाना मृचाम् २१४

हविर्द्धानप्रवर्त्तनीयाना मष्टाना मृचां विधानारम्भः ... २१४

  सप्तमर्ग्-पाठकाले रराटीक्षणविधिः ... २१८

  समापनाय अष्टमर्चः पाठकालस्य विधिः ... २१९

  आद्यन्तयोस्त्रिरावृत्त्या द्वादशत्वापादनविधिः ... २२०

हविर्द्धानयोः यजुषैव सम्परिश्रयणविधिः २१९

  मेथीनिहननविधिः २१९

  ईषानिहननविधिः २२०

  दक्षिणे कृष्णाजिनस्यास्तरणविधिः ... २२०

द्वयोश्छदिषोरुपरि तृतीयस्य छदिषोऽवस्थापनविधिः ... २१६

प्रैषमन्त्रः— अग्नीषोमप्रणयनीयाना मृचाम् २२३

अग्नीषोमप्रणयनीयानां सप्तदशाना मृचां विधानम् ... २२४

  नैमित्तिकपरिधानीयाया विधिः ... २३०

  आद्यन्तयोरावृत्त्यैकविंशत्वापादनविधिः २३०

प्रजापतेरेकविंशावयवपरिगणनम् २३०

आदित्यप्रशंसा २३१

॥ द्वितीयपञ्चिकायाः प्रथमाध्यायारम्भः २३३ पृ० ॥

आख्यायिका— अग्नीषोमीयपशुविधानार्था २३५

अग्नीषोमीयपशोः यूपविधानम् २३५

यूपस्य निखननविधिः २३६

  आश्रयणे याज्ञिकप्रसिद्धिकथनम् २४४

  अष्टाश्रित्वविधिः २३६

  खादिरत्वविधिः स्वर्गकामस्य २३७

  बैल्वत्वविधिरन्नाद्यकामस्य पुष्टिकामस्य च ... २३८

  पालाशत्वविधिस्तेजस्कामस्य ब्रह्मवर्चसकामस्य च २३८

  अञ्जनप्रकारोपदेशः २४२

प्रैषमन्त्रः— यूपाञ्जनानुवचनीयाना मृचाम् २४२

  तत्र वैकल्प्यविधिः २४२

यूपाञ्जनानुवचनीयानां सप्ताना मृचां विधानारम्भः ... २४२

आद्यन्तयोरावृत्त्यैकादशत्वापादनविधिः २४९

मीमांसा— यूपस्य हौत्राध्वर्यवमन्त्रयोः समुच्चयत्वनिर्णयाधिकरणम् २४९

  उच्छ्रयणादिकर्मणा मेकत्वनिर्णयाधिकरणम् ... २५०

यूपस्य उच्छ्रयणप्रकारोपदेशः २४३

  अनुप्रहरणे विचारः २५२

  अनुप्रहरणनिषेधः पशुकामस्य २५२

  अनुप्रहरणविधिः स्वर्गकामस्य २५३

  प्रस्तरस्य च यजमानत्वोपचारः २५४

  अनुप्रहरणस्य प्रतिनिधिकथनम् २५४

  स्वरुप्रहरणप्रकारोपदेशः २५५

अग्नीषोमीयस्य पशोः आलम्भनविधिः २५५

  — स्वरूपनिर्णयः २५५

  — शेषभक्षणे विचारः २५६

  — यजमानस्वरूपत्वेन भक्षणनिषेधः ... २५६

अग्नीषोमीयस्य पशोः लिप्साभक्षणयोर्विधिः २५७
— एकादशप्रयाजानां विधिः ... २६१
मीमांसा— 'यजमानः प्रस्तरः'-इत्यादेर्गौणत्वनिर्णयाधिकरणम् २५८
स्वरुच्छेदनप्रयोजकत्वाभावनिर्णयाधिकरणम् ... २५९
अग्नीषोमीयस्य पशोः प्रथमप्रयाजयाज्याविधिः ... २६२
— प्रयाजदेवतापरिगणनम् ... २६३
— द्वितीयप्रयाजयाज्याद्वयविधिः ... २६३
— तृतीयप्रयाजयाज्याविधिः ... २६३
— चतुर्थप्रयाजयाज्याविधिः ... २६४
— पञ्चमप्रयाजयाज्याविधिः ... २६४
— षष्ठप्रयाजयाज्याविधिः ... २६४
— सप्तमप्रयाजयाज्याविधिः ... २६५
— अष्टमप्रयाजयाज्याविधिः ... २६५
— नवमप्रयाजयाज्याविधिः ... २६५
— दशमप्रयाजयाज्याविधिः ... २६५
— एकादशप्रयाजयाज्याविधिः ... २६६
— प्रयाजानां यथर्षिव्यवस्था ... २६६
प्रैषमन्त्रः— पर्यग्निकरणानां तिसृणा मृचाम् २६८
पर्यग्निकरणास्तिस्र ऋचो मैत्रावरुणस्य २६८
प्रैषमन्त्रः— मैत्रावरुणं प्रत्यध्वर्योः २६९
उपप्रैषमन्त्रः— होतारं प्रति मैत्रावरुणस्य २७०
अन्यमनस्कस्य यज्ञीयवाक्-प्रयोग-निषेधः २७०
अनन्यमनस्कस्यैव यज्ञीयद्रव्यादिसम्पादनविधिः ... २७०
प्रैषमन्त्रः— अध्रिगुं प्रति होतुः २७२
शाखान्तरीयस्याध्रिगुप्रैषस्य पूर्वार्द्धस्य व्याख्यानारम्भः ... २७२
शाखान्तरीयस्याध्रिगुप्रैषस्यापरार्द्धस्य व्याख्यानारम्भः ... २८६
अध्रिगुप्रैषे श्रुतस्य मेधपतिशब्दस्य एक-द्वि-बहु-देवताकप्रयोगेषु
एक-द्वि-बहु-वचनान्ततया प्रयोज्यत्वविधिः ... २७२

संज्ञप्यमानस्य पशोः पुरस्तादग्निहरणम् २७५
— अधस्ताद् बर्हिःस्तरणम् २७५
— मात्रादनुज्ञाया ग्रहणम् २७५
— पदा मुदीचीनत्वकरणम् २७६
— प्राणादीनां प्रेरणम् २७६
— त्वक्छेदनप्रकारोपदेशः ... २७६
— वक्षःप्रभृत्यङ्गानां परिचयः ... २७६
— पुरीषगूहनस्थानखननम् ... २७७
मी० द्विपश्वादिपशुविकृतौ मेधपतिशब्दस्य देवतानुसारेणोहाधिकरणम् २७७
मी० बहुदेवत्यपशावपि एकवचनान्त-मेधपतिशब्दस्य विकल्पाधिकरणम् २७९
मी० एकादशिन्या मेकवचनान्त-मेधपतिशब्दस्योहाधिकरणम् २८०
मी० द्विपशुयागे सूर्यं चक्षुर्गमयतादितिमन्त्राणा मनूहाधिकरणम् २८१
मी० द्विपशुयागेऽध्रिगुप्रैषे एकधेत्यस्य शब्दस्याभ्यासाधिकरणम् २८१
मी० 'श्येन मस्यवक्षः'-इत्यादौ श्येनादिशब्दानां कार्त्स्न्यवचनाधिकरणम् २८२
मी० 'प्रशसा बाहू'-इत्यत्र प्रशसाशब्दस्य प्रशंसापरत्वाधिकरणम् २८२
मी० 'षड्विशतिरस्य वङ्क्रयः'-इत्यादौ पदान्तरोहाधिकरणम् २८३
अध्रिगुप्रैषमन्त्रस्य प्रथमभागस्य व्याख्यानम् २७३
द्वितीयभागस्य व्याख्यानम् २७३
तृतीयभागस्य व्याख्यानम् २७४
चतुर्थभागस्य व्याख्यानम् २७५
पञ्चमभागस्य व्याख्यानम् २७५
षष्ठभागस्य व्याख्यानम् २७५
सप्तमभागस्य व्याख्यानम् २७६
अष्टमभागस्य व्याख्यानम् २७६
नवमभागस्य व्याख्यानम् २७७
दशमभागस्य व्याख्यानम् २८६
एकादशभागस्य व्याख्यानम् २९०
द्वादशभागस्य व्याख्यानम् २९१

अध्रिगुप्रैषमन्त्रपाठानन्तरं जपविधिस्तन्मन्त्रश्च ... २९२
मीमांसा— अग्नीषोमीयपशावुरूकशब्देन वपाभिधानाधिकरणम् २९३
आख्यायिका— पशुपुरोडाशविधानार्था २९५
पशुपुरोडाशस्य विधानम् २९७
पुरुषाश्वगोऽव्यजव्रीहीणां यज्ञीयपशुत्वम्, तत्रापि अजस्य प्राशस्त्यम् २९६
किम्पुरुषगौरगवयोष्ट्रशरभाणा मयज्ञीयपशुत्वान्वाख्यानम् २९७
मीमांसा— पशुपुरोडाशस्य देवतासंस्कारकताधिकरणम् २९८
अग्नीषोमीयप्रयाजादिभिः पुरोडाशस्योपकाराधिकरणम् २९९
पशुपुरोडाशयागस्य प्रशंसा ३०१
वपायाज्ययोर्विधानम् ३०२
याज्याया विधानम् ३०३
स्विष्टकृद्याज्याया विधानम् ... ३०४
इड़ोपह्वानस्य विधानम् ३०४
प्रैषमन्त्रः— हृदयाद्यङ्गावदानसूक्तविधौ ३०६
हृदयाद्यङ्गावदानस्य सूक्तविधानम् ३०६
याज्याविधिः ३०७
वनस्पतियागस्य विधिः ३०८
स्विष्टकृद्यागस्य विधानम् ३०८
इड़ोपह्वानस्य विधिः ३०९
मीमांसा— मनोताया मूहाभावाधिकरणम् ३०९

॥ द्वितीयपञ्चिकाया द्वितीयाध्यायारम्भः ३११ पृ० ॥

आख्यायिका— पर्यग्निकरणस्तुत्यर्था ३१२
देवानां विग्रहवत्त्व-कर्माधिकारित्वयोर्विचारः ... ३१३
पर्यग्निकरणविधिः ३१४
शामित्रदेशे बर्हिःप्रक्षेपविधिः ३१५
पशोः पुरीषस्थापनार्थं मवटखननविधिः ३१६

पशुपुरोडाशप्रशंसार्थौ प्रश्नोत्तरौ ३१७
प्रैषमन्त्रः— स्तोकानुवचनीयायाः ३२०
स्तोकानुवचनीयानां विधिः ३२१
स्तोकस्य प्रशंसा ३२४
वपाप्रशंसायां प्रश्नद्वयम् ३२६
आख्यायिका— वपाहोमप्रशंसार्था ३२८
वपामात्रस्य पशुरूपत्वे प्रश्नः ३२९
आज्याद्याहुतिभिः सह वपाहुतेः प्रशंसा ३३१
अवदाने विशेषविधिः ३३३
आज्यस्य हिरण्यप्रतिनिधित्वोपपादनम् ३३३
अवदानगतपञ्चसङ्ख्यायाः प्रशंसा ३३४
प्रैषमन्त्रः— प्रातरनुवाकार्थः ३३६
प्रातरनुवाकीया ऋचः ३३६
प्रातरनुवाकशब्दस्य निर्वचनम् ३३८
प्रातरनुवाकस्य देवसम्बन्धविशदनम् ३३८
    देवोत्कर्षहेतुत्वम् ३३८
    कालविशेषविधिः ३३९
    कालविधौ पक्षान्तरविधिः ३४१
    प्रैषमन्त्रः— अध्वर्योरुपाकरणार्थः ... ३४१
    आख्यायिका— प्रथमाया ऋचो विधानार्था ३४३
    तदृचोऽर्थवादेन विध्युन्नयनम् ... ३४४
    आख्यायिका— तदृक्-प्रशंसार्था ... ३४४
    तस्या ऋचस्त्रिरावृत्तिविधिः ३४६
प्रातरनुवाकीयाना मृचां शतसंख्याविधानम् आयुष्कामस्य ३४९
    सङ्ख्यान्तरविधिः अहीनरात्रादुत्तरक्रतुकामस्य ३४९
    द्विगुणसङ्ख्याविधिः प्रजां पशूंश्च कामयमानस्य ३५०
    अष्टशतसङ्ख्याविधिः दुर्ब्राह्मणत्वपरिहारकामस्य ३५१
प्रसङ्गतः स्वर्गलोकस्येतः सहस्राश्वीनदूरवर्त्तित्वकथनम् ... ३५१

प्रातरनुवाकीयाना मृचां अपरिमिताध्ययनविधिः सर्वकामसिद्धिकामस्य ३५२
सहस्रसङ्ख्याविधिः स्वर्गकामस्य ... ३५१
प्रथमभागे छन्दोविधानम् ... ३५२
द्वितीयभागे छन्दोविधानम् ... ३५२
तृतीयभागे छन्दोविधानम् ... ३५३
भागत्रये देवतात्रयविधिः ... ३५४
ग्राम्याः पशवः सप्त— बौधायनोक्ताः ३५३
आपस्तम्बमतानुसारिणाम् ... ३५३
सामगानां क्रुष्टादयः सप्त स्वराः ३५३
प्रातरनुवाकस्य अनुवचनप्रकारनिर्णयाय प्रश्नोत्तरे ... ३५६
— अपरप्रश्नोत्तरे ... ३५७
शंसनेन छन्दोभागानां प्रीत्यभिधानम् ... ३५८
परिधानीयाया निर्देशः ३६०
तत्र सोमपदेवतानां परिगणनम् ३५९
असोमपदेवतानां परिगणनम् ३५९
आहुतिभागाः, स्तोमभागाः, छन्दोभागाश्चेति त्रिविधा देवाः ३५८
प्रयाजदेवतानां सङ्ख्यानिर्देशः ३६०
अनुयाजदेवतानां सङ्ख्यानिर्देशः ३६०
उपयाजदेवतानां सङ्ख्यानिर्देशः ३६०

॥ द्वितीयपञ्चिकायास्तृतीयाध्यायारम्भः ३६३ पृ० ॥

आख्यायिका— अपोनप्त्रीयानुवचनविधानार्था ३६४
अपोनप्त्रीयसूक्तस्य नैरन्तर्येणाध्ययनविधिः ३६६
प्रथमाया ऋच आवृत्तिसहितं सान्तत्यम् ३६७
अध्ययनप्रकारोपदेशः ३६८
आध्वर्यवसूत्रोक्तः प्रयोगक्रमः ... ३७०
आपस्तम्बादुक्तप्रैषादिप्रदर्शनम् ... ३७०

अपोनप्त्रीयसूक्तस्य ऋचामनुवचनकालनियमः ... ३७०
परिधानीयायाः विधानम् ... ३७७
आख्यायिका— वसतीवर्यैकधनयोः ३७२
यजुर्मन्त्रः— होतुः प्रश्नार्थः ३७३
अध्वर्योः प्रत्युत्तरार्थः ३७३
निगदरूपो होतुः प्रत्युत्थानार्थः ३७४
अपामनुवर्त्तनविधानं होतुः ३७५
अपोनप्त्रीयानुवचने सादनप्रकारः ३७८
प्रातरनुवाकस्य प्रशंसापूर्वकं विधानम् ३७९
उपांश्वन्तर्यामहोमादूर्ध्वं वाग्विसर्जनस्य विधिः, तत्प्रकारश्च ३८०
उपांशुसवनाभिमर्शनोपपादनम् ३८१
बहिष्पवमानार्थं प्रसर्पणविधानम् ३८२
अनुमन्त्रणविधानम् ३८४
यजुर्मन्त्रः— बहिष्पवमानानुमन्त्रणार्थः ३८५
बहिष्पवमानानुमन्त्रणार्थोऽपरः ३८५
सवनीयपुरोडाशेषु मैत्रावरुणी पयस्या ३८५
आख्यायिका— मैत्रावरुणपयस्याप्रशंसार्था ३८६
सवनीयपुरोडाशविधानार्था ३८८
सवनीयपुरोडाशविधिः ३८८
पुरोडाशशब्दनिर्वचनम् ३८९
पुरोडाशस्वरूपनिर्धारणाय पूर्वोत्तरपक्षौ ३८९
पुरोडाशशेषभक्षणे पूर्वोत्तरपक्षौ ३९१
हविष्पङ्क्तिविधानम् (धा, क, प, पु, प,) ३९३
अक्षरपङ्क्तिविधानम् (सु. मत्. पत्. वक्. दे.) ... ३९४
नाराशंसपङ्क्तिविधानम् (प्रा० २, मा० २, तृ० १, चमसाः) ३९५
सवनपङ्क्तिविधानम् (प. प्रा. म. तृ. अ.) ३९५
सवनीयपुरोडाशानां याज्यामन्त्राणां व्याख्यानानि ... ३९६
याज्यामन्त्राणां वेदनप्रशंसा ... ३९७

यजुर्मन्त्राः— सवनीयपुरोडाशयाज्यार्थाः, तेषां व्याख्यानानि च ३९६
सवनीयपुरोडाशस्विष्टकृद्याज्यार्थः ... ३९८
स्विष्टकृतो याज्याया विधिः, तन्मन्त्रवेदनपूर्वकानुष्ठानप्रशंसा च ३९८

॥ द्वितीयपञ्चिकायाश्चतुर्थाध्यायारम्भः ३९९ पृ० ॥

आख्यायिका— ऐन्द्रवायवादिद्विदेवत्यग्रहविधानार्था ... ४००
देवानां विजयक्रमेण सोमपानक्रमविधानार्था ४०१
ऐन्द्रवायवग्रहविधानम् ४०२
ऐन्द्रवायवग्रहे मन्त्रसंवाद-लोकव्यवहारौ ४०२
द्विदेवत्यग्रहाणां प्राणरूपत्वेन प्रशंसा ४०४
ऐन्द्रवायवग्रहस्य याज्यानुवाक्ययोर्विधानम् ४०५
द्विदेवत्यग्रहाणां ग्रहणहोमयोः पात्रवैषम्यविधिः ... ४०६
होतुर्ग्रहशेषभक्षप्रतिग्रहमन्त्रविधिः ४१०
यजुर्मन्त्रः— अध्वर्योः ग्रहशेषभक्षप्रदानार्थः ४१०
होतुः ऐन्द्रवायवग्रहशेषभक्षणार्थः ... ४१०
होतुः मैत्रावरुणग्रहशेषभक्षणार्थः ... ४११
होतुः आश्विनग्रहशेषभक्षणार्थः ४१२
द्विदेवत्यग्रहाणां भक्षणे विशेषविधिः ४१२
द्विदेवत्यग्रहेषु होतृप्रयोक्तव्यमन्त्राणा मुच्छ्वासविधिः ... ४१४
अनुवषट्कारमन्त्रप्रयोगनिषेधः ४१४
यजुर्मन्त्रः— ग्रहेषु याज्यान्ते वषट्कृतहोमादुत्तर मनुवषट्कारार्थः ४१४
आगूकरणार्थः ४१५
वषट्कारार्थः ४१५
प्रैषमन्त्रौ— ऐन्द्रवायवे ग्रहे मैत्रावरुणस्य ४१५
मैत्रावरुणस्य यज्ञीयमनोरूपत्वान्वाख्यानम् ४१६
होतुः यज्ञीयवाग्रूपत्वान्वाख्यानम् ४१६
ऋतुयाजस्वरूपकथनम् ४१८

ऋतुग्रहयागानां विधानम् ४१८
ऋतुग्रहयागानां प्रथमादिषु षट्सु विशेषविधिः ... ४१८
सप्तमादिषु चतुर्षु विशेषविधिः ... ४१८
एकादशद्वादशयोः विशेषविधिः ... ४१९
अनुवषट्कारप्रयोगनिषेधः ... ४१९
इड़ोपह्वानग्रहशेषभक्षणयोः पौर्वापर्यविधिः ... ४२१
होतृहस्तसम्पादितावान्तरेड़ाप्राशन-होतृचमसभक्षणयोः
पौर्वापर्यविचारः, तन्निर्णयश्च ४२२
द्विदेवत्यग्रहशेषस्य विन्दोर्होतृचमसे प्रक्षेपविधिः ... ४२३
आख्यायिका— तूष्णींशंसविधानार्था ४२५
तूष्णींशंसस्यासुरविनाशहेतुत्वप्रदर्शनार्था ४२५
तूष्णींशंसस्वरूपप्रदर्शनार्था ४२६
तूष्णींशंसानुष्ठानविधानार्था ४२८
चक्षुःस्वरूपत्वोपपादनम् ४३१
तूष्णींशंसस्यानुष्ठानप्रकारः, प्रशंसा च ... ४२८
यजुर्मन्त्रः— तूष्णींशंसात् प्राक् प्रयोज्यः ४२८
तूष्णींशंसस्य प्रथमभागः प्रातस्सवने ... ४२७. ४३०
... — द्वितीयभागः माध्यन्दिनसवने ... ४२७, ४३०
... — तृतीयभागः तृतीयसवने ... ४२७, ४३०
तूष्णींशंसस्य होतुरनुकूलत्वेन प्रशंसनम् ४३२
यज्ञमूलत्वेन प्रशंसनम् ४३२
आह्वाव-निवित्-सूक्तानां विधानम् ... ४३५
आह्वावस्वरूपोपदेशः ४३५
निवित्स्वरूपोपदेशः ४३५
सूक्तस्वरूपोपदेशः ४३५
आह्वावनिवित्सूक्तानां ब्रह्मक्षत्रवैश्यस्वरूपत्वम् ४३५
निविदः क्षत्रियजातित्वम् सूक्तस्य वैश्यजातित्वम् ... ४३४
निविन्मध्ये सूक्तशंसने क्षत्रविरोधः ४३६

सूक्तमध्ये निविच्छंसने वैश्यविरोधः ४३६
आहावनिवित्सूक्तानां यथाक्रमेणानुष्ठेयता ४३७
आख्यायिका— निवित्प्रशंसार्था ४३७
निवित्प्रशंसायां मन्त्रसंवादप्रदर्शनम् ४३७
सूक्तात् पूर्वं निविदनुष्ठानस्य प्रशंसा ४३८
यजुर्मन्त्रः— आहावनामकः ४३५
निविन्नामको द्वादशपदात्मकः ४४०
द्वादशपदोपेताया निविदः प्रथमपदविधिः ४४०
— द्वितीयपदविधिः ४४०
— तृतीयपदविधिः ४४०
— चतुर्थपदविधिः ४४१
— पञ्चमपदविधिः ४४१
— षष्ठपदविधिः ४४१
— सप्तमपदविधिः ४४१
— अष्टमपदविधिः ४४२
— नवमपदविधिः ४४२
— दशमपदविधिः ४४२
— एकादशपदविधिः ४४२
— द्वादशपदविधिः ४४३
निविदनन्तरप्रयोज्यसूक्तप्रयोगप्रकारः ४४४
आख्यायिका— आग्नीध्रीयवासादिसिद्ध्यर्था ४४६
सदस्यवस्थितेषु धिष्ण्येष्वाग्नीध्रादग्निविहरणविधिः ... ४४७
आज्यनामनिर्वचनादिकम् ४४८
आज्यशस्त्राज्यस्तोत्रयोस्तुल्यत्वबोधनम् ४४८
ऐन्द्राग्नशस्त्रविधानम् (अच्छावाकस्य) ४४८
अच्छावाकस्य सदःप्रवेशे विशेषविधिः ४४९
अच्छावाकीयशस्त्रस्य प्रशंसा ४५०
यज्ञस्य देवरथत्वेन वर्णनम् ४५०

आज्यशस्त्रस्य बहिष्पवमानस्तोत्रोत्तरप्रयोज्यत्वविधिः ... ४५२
प्रउगशस्त्रस्य आज्यस्तोत्रोत्तरप्रयोज्यत्वविधिः ४५२
आज्यप्रउगशस्त्रयोः रश्मिस्थानीयत्वम् ४५३
स्तोत्रशस्त्रयोः सर्वथा तुल्यताया विधानम् ४५३
    देवताकृतातुल्यतादोषपरिहारः ... ४५३
    छन्दःकृतातुल्यतादोषपरिहारः ... ४५४
ऐन्द्राग्नग्रहस्य याज्याया विधानम् ४५५
    याज्यागताक्षरप्रशंसा ४५६
शस्त्रयाज्ययोः देवताकृतवैयधिकरण्योद्भावनम्, तत्परिहारश्च ४५६
आज्यशस्त्रस्य ग्रहद्वारकं तूष्णींशंसद्वारकञ्च ऐन्द्राग्नत्वम् ४५७
